॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

परिमळाद्युपेता

सम्पुटम् – १९

तृतीयाध्यायस्य द्वितीयपादे पराभिध्यानाधिकरणमारभ्य
तृतीयाध्यायस्य द्वितीयपादान्तम्

प्रकाशनम्
श्रीगुरुसार्वभौमसंशोधनमन्दिरम्
जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्
श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

श्रीमन्न्यायसुधा
परिमळाद्युपेता

सम्पुटम् – १९

प्रथमं मुद्रणम् - ई.सन् २०१५

Śrīman-Nyāyasudhā
Parimaḷādyupetā

Volume - 19

First Edition -2015 A.D.

ISBN No. 978-81-928761-1-5

मन्मथ संवत्सरम्, गतशके १९३७, निज आषाढ कृष्ण त्रयोदशी, गुरुवासरः

मन्त्रालयम्

Published by :

Śrī Gurusārvabhauma Saṁśodhana Mandiram
Jagadguru Śrīman Madvāchārya Mūla Mahāsamsthāna
Śrī Rāghavendra Swāmy Mutt
Mantrālayam - 518 345
India.

✲ मुद्रकः ✲

धनंजयाचार्य बाळाचार्य वरखेडकरः

सुधा मुद्रणम्
शंकरपुरम्, बेंगळूर - ५६० ००४
दूरवाणी– २६६००६३०, ६५६० २८३६
मोबाइल– ९२४३० ७४४१४

SUDHA MUDRANA
Shankarpuram, Bangalore - 560 004
Phone : 2660 0630, 6560 2836
Mobile : 92430 74414

समर्पणपत्रिका

श्रीमत्परमहंसपरिव्राजकाचार्य पदवाक्यप्रमाणपारावारपारङ्गत

सर्वतन्त्रस्वतन्त्र श्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनाचार्य

श्रीमन्मूलरघुपतिवेदव्यासदेवदिव्यश्रीपादपद्माराधक

जगद्गुरु श्रीमन्मध्वाचार्यमूलमहासंस्थानाधीश्वराणां

श्रीमद्द्वैतसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वराणां

परमपूज्यानां कामधेनुकल्पवृक्षसदृशानां

श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानां

हृत्कमलनिवासि-

श्रीमूलरघुपतिपादकमलयोः

समर्पितोऽयं ग्रन्थः ॥

श्रीवेदान्तरसात्मकं भगवतो व्यासस्य हार्द्रानुगं
श्रीमन्मध्वसुतत्त्वबोधनचणं टीकार्यसङ्गुम्फितम् ।
श्रीमन्न्यायसुधाख्यग्रन्थनिचयं व्याख्यासमूहैर्युतं
श्रीशे श्रीसुबुधेन्द्रसंयमिमणिः भक्त्याऽर्पयन्मोक्षदम् ॥

★ ★ ★

॥ श्रीमन्मूलरामो विजयते ॥

श्रीमत्परमहंसपरिव्राजकाचार्य पदवाक्यप्रमाणपारावारपारङ्गत सर्वतन्त्रस्वतन्त्र
श्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनाचार्य श्रीमन्मूलरघुपतिवेदव्यासदेवदिव्यश्रीपादपद्माराधक
जगद्गुरु श्रीमन्मध्वाचार्यमूलमहासंस्थानाधीश्वराणां
श्रीराघवेन्द्रस्वामिमठीयवेदान्तसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वराणां
श्रीमत्सुशमीन्द्रतीर्थश्रीचरणकरकमलसञ्जात
श्रीमत्सुयतीन्द्रतीर्थवरकुमारकाणां

श्रीमत्सुबुधेन्द्रतीर्थश्रीपादानां

अनुग्रहसन्देशः

अपौरुषेयवेदराशेः तात्पर्यार्थनिर्णयार्थं प्रवृत्तस्य, श्रीनारायणाभिन्नश्रीवेदव्यासमुनिना रचितस्य ब्रह्ममीमांसाशास्त्रस्य, श्रीवेदव्याससम्मतमभिप्रायं मुमुक्षुजीविनां उपकारार्थं स्फुटीकर्तुं, पूर्णप्रज्ञ इति महिताः श्रीमदाचार्याः श्रीमध्वाचार्याः, 'सूत्रभाष्यं, अनुव्याख्यानं, न्यायविवरणं, अणुभाष्यमि'ति चत्वारि ग्रन्थरत्नानि व्यरीरचन्। तत्र परमतखण्डनपूर्वकस्वमतस्थापनोद्देशेन प्रवृत्तं परवादिगजसिंहायितं 'श्रीमदनुव्याख्यानं', विद्वज्जनस्य परमादरपात्रं सत् शोभतेतराम्।

श्रीमदाचार्यभाववेत्तारः, 'श्रीमत्पूर्णप्रमतिकारुण्यसरणिं प्रपन्नाः', 'श्रीटीकाचार्या' इति प्रथितयशसः मिथ्यावादध्वान्तसन्तानभानुभूताः श्रीजयतीर्थमुनयः श्रीमदनुव्याख्यानाब्धिं निर्मथ्य निर्विषां तत्त्वज्ञानामृतरूपां 'श्रीमन्न्यायसुधां' उत्पाद्य, अन्वर्थनामधेयं श्रीमन्न्यायसुधाग्रन्थं निर्माय, ज्ञानामृतपिपासुजनेभ्यः पातुं प्रददुः। इयं न्यायसुधा वस्तुनिष्ठविषयप्रतिपादनपरा, परमार्थबोधनचणा, विद्वन्मनीषानिकषायिता, परवादविध्वंसननिष्णाता सती विद्वत्प्रपञ्चे सर्वोच्चशास्त्रग्रन्थत्वेन राराजते।

'टिप्पण्याचार्यचक्रवर्तिनः' इत्येव ख्याताः श्रीराघवेन्द्रतीर्थाः श्रीमन्न्यायसुधायाः अर्थगाम्भीर्यं अर्थवैशद्यं च जिज्ञासुभ्यः अवगमयितुं 'परिमळा'ख्यां टिप्पणीं विरचय्य, श्रीमन्न्यायसुधायाः क्षोणीगीर्वाणगम्यतां संसाधितवन्तः। परिमळाचार्याणां वाक्यगुम्फैरेव, परिमळस्य सार्थक्यमवगन्तव्यं यथा—

ये तु न्यायसुधापानकामुका रसिका बुधाः।
आघ्रायेमं परिमळं सेवन्तां ते सुधामिमाम् ॥

विद्वत्परिज्ञेयमहाविशेषाः भाष्यटीकाद्यविरुद्धग्रन्थकर्तारः श्रीराघवेन्द्रतीर्थगुरुसार्वभौमाः श्रीमन्न्यायसुधाग्रन्थस्य प्रौढिमामधिकृत्य, एवमुद्घोषयन्ति यथा—

प्रतिवाक्यं (प्रत्यक्षरं) प्रतिपदमनेकाकूतगर्भिता।
प्रतिभाति सुधाऽथापि ग्रन्थाल्पत्वाय नोच्यते ॥

महान् सन्तोषावहो विषयः यत् अस्मत्पूर्वाश्रमपितृपादानां पण्डितप्रवराणां, महामहोपाध्यायादिबिरुदाङ्कितानां श्री राजा श्री गिरिआचार्याणां आध्यक्ष्ये सम्पन्नस्य परिश्रमस्य फलेन, श्रीमन्न्यायसुधायाः श्रीपरिमळसहितपञ्चविंशतिटिप्पणीनामुपलब्धिः सञ्जाता आसीत् । एवं परिमळादिपञ्चविंशतिटिप्पणीभिरलङ्कृतस्य श्रीमन्न्यायसुधाग्रन्थस्य संशोधनपूर्वकं प्रकाशनकार्यं अस्माभिः पूर्वाश्रमे एव सङ्कल्प्य प्रारब्धमासीत् । अस्मत्परमगुरूणां परमपूज्य श्रीश्रीसुशमीन्द्रतीर्थश्रीपादानां श्रीमठस्य पीठाधिपतित्वसमये प्रथमदशसम्पुटानि प्रकाशितानि । अस्मद्गुरुपादानां परमपूज्य श्रीश्रीसुयतीन्द्रतीर्थानां पीठाधिपतित्वसमये एकादशसम्पुटादारभ्य पञ्चदशसम्पुटपर्यन्तं, ग्रन्थानां प्रकाशनं विधाय लोकार्पणं संसाधितमासीत् ।

अधुना, अस्माकं पीठाधिपतित्वसमये षोडशसम्पुटादारभ्य द्वाविंशतिसम्पुटपर्यन्तं प्रकाशनं विधाय, समग्रसुधाग्रन्थस्य संशोधनप्रकाशनरूपमहत्कार्यं सम्पादितं, श्रीगुरुराजसन्निधौ समर्पितं च दृष्ट्वा, प्रमोमुदीत्यस्मच्चेतः । एतत्सर्वं महत् ज्ञानयज्ञकार्यं हंसनामकपरमात्मनः साक्षात्परम्परायामागतस्य अस्माकं विद्यामठस्य पीठाधिपतिभिः सम्पूजितस्य नित्यं अस्माभिरपि सम्पूज्यमान-चतुर्मुखब्रह्माराधितपादपङ्कजस्य, चतुर्युगमूर्तेः भगवतः श्रीरमारमणस्य श्रीमूलरामस्य, श्रीमध्वकरार्चितश्रीदिग्विजयरामस्य, श्रीजयतीर्थकरार्चितश्रीजयरामस्य च पूजासाधितपुण्यफलेन शक्यमभूदिति संस्मृत्य संस्मृत्य आत्मनः धन्यान् मन्यामहे ।

'सुधा वा पठनीया वसुधा वा पालनीया' इत्युक्तिरीत्या, श्री सुधाऽध्ययनस्य महत्त्वं, सुधाग्रन्थस्य श्रीकरत्वं च अनुसन्धाय, सर्वे सुधीजनाः परिमळादिपञ्चविंशतिटिप्पणीभूषितानां, श्रीमठेन प्रकाशितानां, समग्रश्रीसुधाग्रन्थानां गुरुमुखेन अध्ययनं विधाय, श्रीमध्वशास्त्रप्रमेयाणां, यथार्थज्ञानं सम्पाद्य श्रीगुरुराजानुग्रहपात्राणि भूत्वा, 'ज्ञानेनैव परं पदमि'त्युक्तरीत्या कृतार्थाः भवेयुरित्याशास्महे ।

श्रीमन्त्रालयक्षेत्रे, प्रतिदिनं एतान् ग्रन्थानेव उपयुज्य, विंशत्यधिकछात्रेभ्यः वयमेव श्रीमन्न्यायसुधापाठकरणे प्रवृत्ताः स्मः इति सामोदं कथयितुमभिलषामः । अनेन श्रीमठप्राकारस्य बौद्धिकाध्यात्मिकसुषमा नूनमभिवर्धिता चकास्ति । जिज्ञासवः सुधीजनाः श्रीमन्न्यायसुधाऽध्ययनस्य कक्ष्यासु भागं ग्रहीतुमर्हन्तीति उद्घोषयितुमुत्सुका वयम् ।

एतज्ज्ञानकार्ये कृतभूरिपरिश्रमाणां समेषां विदुषाम्, अध्यापकानां, सम्पादकमण्डलीसदस्यानां, तथा, पाठशोधने, प्रतिकृतिशोधने च सहकृतवतां अन्येषां विद्वज्जनानां च, कृतकार्यस्य आशंसनं कुर्वाणाः वयं, एते सर्वेऽपि अस्मदुपास्य-श्रीमूलरघुपत्यभिन्नवेदव्यासस्य, श्रीगुरुसार्वभौमस्य च अनुग्रहविशेषस्य पात्राणि भवन्तु, तद्बलेन उपोद्बलिताः सन्तः एवमेव भविष्यत्कालेऽपि ज्ञानकार्येषु बद्धकङ्कणाः भवन्तु इति अस्मदुपास्यश्रीमूलरामे, श्रीगुरुराजे च, भक्त्या सम्प्रार्थयामः ।

अधुना एतद्भूरिप्रमाणस्य मुद्रणादिकार्यस्य बहुसमर्थरीत्या निर्वहणं कृतवद्भ्यः सुधामुद्रणाधिकारिभ्यः वरखेडकर धनञ्जयाचार्येभ्यश्च अस्माकं विशेषानुग्रहवचनानि ।

इति नारायणस्मृतिः ।

मन्त्रालयक्षेत्रम्,
मन्मथसंवत्सरम्, गतशके १९३७,
वैशाख शुक्ल पौर्णिमा ।

जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थान-श्रीराघवेन्द्रस्वामिमठाधीशानां
श्री श्री सुयतीन्द्रतीर्थश्रीपादानां वरकुमारकाणां
श्री श्री सुबुधेन्द्रतीर्थश्रीपादानां
परमानुग्रहेण सम्पादितोऽयं ग्रन्थः ।

प्रधानसम्पादकाः

महामहोपाध्यायाः राष्ट्रपतिप्रशस्तिपुरस्कृताः श्रीपादपुत्राः

श्री राजा श्री गिरिआचार्याः

सम्पादकविद्वन्मण्डली

विद्वान् डॉ. विद्यावाचस्पति श्री वादिराजाचार्य राघवेन्द्राचार्य पञ्चमुखी

निर्देशकः श्रीगुरुसार्वभौमसंशोधनमन्दिरम्, श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

विद्वान् डॉ. श्री एन्. वादिराजाचार्यः

प्रांशुपालाः श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्, मन्त्रालयः

विद्वान् श्री कडप राघवेन्द्राचार्याः

विद्वान् श्री पुराणिक सुब्रह्मण्याचार्याः

विद्वान् आहिताग्नि श्री वरखेडकर भीमसेनाचार्याः

प्रकाशनम्

जगद्गुरुश्रीगुरुसार्वभौमसंशोधनमन्दिरम्

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

श्रीमन्न्यायसुधा - परिमळाद्युपेता

टिप्पणीनां क्रमः तथा सङ्क्षिप्तनामानि

क्र.सं.	कर्तृनाम	टिप्पणीनाम	सङ्क्षिप्तनाम
१	श्री विजयीन्द्रतीर्थाः	न्यायसुधाबिन्दुः	बिन्दुः—
२	श्री राघवेन्द्रतीर्थाः	परिमळः	परि०—
३	श्री श्रीपादराजतीर्थाः	वाग्वज्रः	वाग्वज्रः—
४	श्री वादिराजतीर्थाः	गुर्वर्थदीपिका	गु०दी०—
५	श्री यदुपत्याचार्याः	टिप्पणी	यादु०—
६	श्री वंशपल्ली श्रीनिवासाचार्याः	वाक्यार्थविवृतिः	वं०प०—
७	श्री गलगली नरसिंहाचार्याः	आनन्दः	आनन्दः—
८	श्री कंबाळूरु रामचन्द्रतीर्थाः	विवृतिः	कं०रा०—
९	श्री श्रीनिधितीर्थाः	टिप्पणी	श्रीनिधि०—
१०	श्री विद्याधीशतीर्थाः	वाक्यार्थचन्द्रिका	वा०चं०—
११	श्री पाण्डुरङ्गि केशवाचार्याः	शेषवाक्यार्थचन्द्रिका	शे०चं०—
१२	श्री पाण्डुरङ्गि नरसिंहाचार्याः	वाक्यार्थरत्नमाला	वा०र०—
१३	श्री सत्यव्रततीर्थाः	सुधाविवृतिः	स०व्र०—
१४	श्री कुण्डलगिरिआचार्याः	रसकूलङ्कषः	कुण्डल०—
१५	श्री सत्यनाथतीर्थाः	दुर्घटवाक्यार्थविचारः	स०ना०—
१६	श्री विठ्ठलभट्टाः	टिप्पणी	विठ्ठ०—
१७	श्री विष्णुतीर्थाः	रसरञ्जनी	रस०—
१८	श्री अडवी कृष्णाचार्याः	लघुरसरञ्जनी	ल०र०—
१९	श्री मन्नारी कृष्णाचार्याः	चषकः	चषकः—
२०	श्री एरी बाळाचार्याः	उपस्पर्शः	ए०बा०—
२१	श्री काशी आचार्याः	काशी टिप्पणी	काशी०—
२२	श्री गूढकर्तृकाचार्याः	गूढकर्तृका	गूढ०—
२३	श्री प्रदीपकाराः	प्रदीपः	प्रदीपः—
२४	श्री पांग्री श्रीनिवासाचार्याः	टिप्पणी	पांग्री०—
२५	श्री कल्लापूर सत्याधिराजाचार्याः	हुग्गि	हुग्गि०—

टिप्पणीविषये स्पष्टीकरणम्

श्रीमज्जयतीर्थविरचितं महामेरुतुल्यं श्रीमन्न्यायसुधाग्रन्थमनेके व्याचख्युः। साम्प्रतमस्माभिः, उपलब्धाः श्रीमन्न्यायसुधाव्याख्याः सङ्गृह्यैकत्र मुद्रापयितव्याः इत्येकमात्रोद्देशेन अनेकव्याख्यासहिततया श्रीमन्न्यायसुधाग्रन्थः मुद्रापितः।

श्रीमद्विजयीन्द्रतीर्थश्रीपादानां श्रीमद्राघवेन्द्रतीर्थश्रीपादानां च सुधाव्याख्यानयोः इदानीं मुद्रापितायां यस्यां कस्याञ्चित् सुधाव्याख्यायां यस्मिन् कस्मिंश्चिद्विषये भिन्नाभिप्राये सति (विरुद्धाभिप्राये सति) सः तद्व्याख्यातॄणामभिप्राय एव। सः श्रीमद्विजयीन्द्रतीर्थश्रीपादानां वा परिमलकाराणां वा सम्पादकानां वा प्रकाशकानां वा सम्मत इति न मन्तव्यमिति एतन्मूलकतया स्पष्टीकुर्मः।

इत्थम्

सम्पादकाः

॥ श्रीमन्मूलरामो विजयते ॥

प्रकाशकीयम्

द्वापरे श्रीगौतममहर्षिभिः शप्तेषु साधुजनेषु व्याकुलीभूतेषु श्रीब्रह्मरुद्रेन्द्रादिभिः प्रार्थितो भगवान्नारायणः श्रीवेदव्यासत्वेनावतीर्य राशीभूतान् वेदान् विभज्य, वेदार्थनिर्णायकानि चतुःषष्ट्यधिकपञ्चशत(५६४)ब्रह्मसूत्राणि व्यरचयत्।

एषां ब्रह्मसूत्राणां श्रीवाय्ववतारिणः सर्वज्ञाः श्रीमदानन्दतीर्थभगवत्पादाः भाष्यम्, श्रीमदनुव्याख्यानम्, न्यायविवरणम्, अणुभाष्यं चेति ग्रन्थचतुष्टयं विरचय्य महदुपाकुर्वन्।

श्रीमदाचार्याणां प्रियान्तेवासिनां श्रीत्रिविक्रमपण्डिताचार्याणां "व्यक्ततर्कततिं कुरु" इति प्रार्थनामनुरुध्य श्रीमदाचार्याः उपर्युक्तग्रन्थेष्वन्यतमं श्रीमदनुव्याख्यानग्रन्थं रचयामासुः।

अनुव्याख्यानस्यास्य इन्द्रांशसंभूताः श्रीमज्जयतीर्थश्रीमच्चरणाः श्रीमन्न्यायसुधानाम्नीं मेरुतुल्यामनुपमां टीकां व्यरचयन्।

ग्रन्थोऽयं चित्रपदपुञ्जमण्डितः, महागाम्भीर्यवान् महापण्डितवरेण्यानामपि महान्तं गर्वपर्वतं खण्डयितुं दक्षश्चकास्ति।

अस्यामोघस्य ग्रन्थस्य महत्त्वम् एतद्ग्रन्थस्य एतदीयानामनेकासां व्याख्यानां सङ्ख्यैव व्यञ्जयति।

	व्याख्यातारो महाभागाः	व्याख्यानस्य नाम
१)	श्री श्रीपादराजतीर्थाः	वाग्वज्रम्
२)	श्री विजयीन्द्रतीर्थाः	न्यायसुधाबिन्दुः
३)	श्री वादिराजतीर्थाः	गुर्वर्थदीपिका
४)	श्री राघवेन्द्रतीर्थाः	परिमलः
५)	श्री यदुपत्याचार्याः	टिप्पणी
६)	श्री वंशपल्ली श्रीनिवासाचार्याः	वाक्यार्थविवृतिः
७)	श्री गलगली नरसिंहाचार्याः	आनन्दः
८)	श्री कंबालूरु रामचन्द्रतीर्थाः	विवृतिः
९)	श्री श्रीनिधितीर्थाः	टिप्पणी

टिप्पणीविषये स्पष्टीकरणम्

श्रीमज्जयतीर्थविरचितं महामेरुतुल्यं श्रीमन्न्यायसुधाग्रन्थमनेके व्याचख्युः। साम्प्रत-मस्माभिः, उपलब्धाः श्रीमन्न्यायसुधाव्याख्याः सङ्गृह्यैकत्र मुद्रापयितव्याः इत्येकमात्रोद्देशेन अनेकव्याख्यासहिततया श्रीमन्न्यायसुधाग्रन्थः मुद्रापितः।

श्रीमद्विजयीन्द्रतीर्थश्रीपादानां श्रीमद्राघवेन्द्रतीर्थश्रीपादानां च सुधाव्याख्यानयोः इदानीं मुद्रापितायां यस्यां कस्याञ्चित् सुधाव्याख्यायां यस्मिन् कस्मिंश्चिद्विषये भिन्नाभिप्राये सति (विरुद्धाभिप्राये सति) सः तद्व्याख्यातृणामभिप्राय एव। सः श्रीमद्विजयीन्द्रतीर्थ-श्रीपादानां वा परिमलकाराणां वा सम्पादकानां वा प्रकाशकानां वा सम्मत इति न मन्तव्य-मिति एतन्मूलकतया स्पष्टीकुर्मः।

इत्थम्

सम्पादकाः

॥ श्रीमन्मूलरामो विजयते ॥

प्रकाशकीयम्

द्वापरे श्रीगौतममहर्षिभिः शप्तेषु साधुजनेषु व्याकुलीभूतेषु श्रीब्रह्मरुद्रेन्द्रादिभिः प्रार्थितो भगवान्नारायणः श्रीवेदव्यासत्वेनावतीर्य राशीभूतान् वेदान् विभज्य, वेदार्थनिर्णायकानि चतुःषष्ट्यधिकपञ्चशत(५६४)ब्रह्मसूत्राणि व्यरचयत्।

एषां ब्रह्मसूत्राणां श्रीवाय्ववतारिणः सर्वज्ञाः श्रीमदानन्दतीर्थभगवत्पादाः भाष्यम्, श्रीमदनुव्याख्यानम्, न्यायविवरणम्, अणुभाष्यं चेति ग्रन्थचतुष्टयं विरचय्य महदुपाकुर्वन्।

श्रीमदाचार्याणां प्रियान्तेवासिनां श्रीत्रिविक्रमपण्डिताचार्याणां "व्यक्ततर्कततिं कुरु" इति प्रार्थनामनुरुध्य श्रीमदाचार्याः उपर्युक्तग्रन्थेष्वन्यतमं श्रीमदनुव्याख्यानग्रन्थं रचयामासुः।

अनुव्याख्यानस्यास्य इन्द्रांशसंभूताः श्रीमज्जयतीर्थश्रीमच्चरणाः श्रीमन्न्यायसुधानाम्नीं मेरुतुल्यामनुपमां टीकां व्यरचयन्।

ग्रन्थोऽयं चित्रपदपुञ्जमण्डितः, महागाम्भीर्यवान् महापण्डितवरेण्यानामपि महान्तं गर्वपर्वतं खण्डयितुं दक्षश्चकास्ति।

अस्यामोघस्य ग्रन्थस्य महत्त्वम् एतद्ग्रन्थस्य एतदीयानामनेकासां व्याख्यानां सङ्ख्यैव व्यञ्जयति।

	व्याख्यातारो महाभागाः	**व्याख्यानस्य नाम**
१)	श्री श्रीपादराजतीर्थाः	वाग्वज्रम्
२)	श्री विजयीन्द्रतीर्थाः	न्यायसुधाबिन्दुः
३)	श्री वादिराजतीर्थाः	गुर्वर्थदीपिका
४)	श्री राघवेन्द्रतीर्थाः	परिमलः
५)	श्री यदुपत्याचार्याः	टिप्पणी
६)	श्री वंशपल्ली श्रीनिवासाचार्याः	वाक्यार्थविवृतिः
७)	श्री गलगली नरसिंहाचार्याः	आनन्दः
८)	श्री कंबालूरु रामचन्द्रतीर्थाः	विवृतिः
९)	श्री श्रीनिधितीर्थाः	टिप्पणी

१०)	श्री विद्याधीशतीर्थाः	वाक्यार्थचन्द्रिका
११)	श्री पाण्डुरङ्गि नरसिंहाचार्याः	वाक्यार्थरत्नमाला
१२)	श्री पाण्डुरङ्गि केशवाचार्याः	शेषवाक्यार्थचन्द्रिका
१३)	श्री कुण्डलगिरि आचार्याः	रसकूलङ्कषः
१४)	श्री सत्यव्रततीर्थाः	सुधाविवृतिः
१५)	श्री सत्यनाथतीर्थाः	दुर्घटवाक्यार्थविचारः
१६)	श्री विठ्ठलभट्टाः	टिप्पणी
१७)	श्री कल्लापूर सत्याधिराजाचार्याः	हुग्गि
१८)	श्री विष्णुतीर्थाः	रसरञ्जनी
१९)	श्री अडवि कृष्णाचार्याः	लघुरसरञ्जनी
२०)	श्री मन्नारि कृष्णाचार्याः	चषकः
२१)	श्री एरी बाळाचार्याः	उपस्पर्शः
२२)	श्री काशी तिम्मण्णाचार्याः	काशी टिप्पणी
२३)	श्री गूढकर्तृकटिप्पणीकाराः	टिप्पणी
२४)	श्री प्रदीपकाराः	प्रदीपः
२५)	श्री पांग्री श्रीनिवासाचार्याः	टिप्पणी
२६)	श्री रोट्टि वेङ्कटभट्टाः	सुधाविवृतिः
२७)	श्री ताम्रपर्णी आचार्याः	टिप्पणी
२८)	श्री उमर्जी प्रह्लादकृष्णाचार्याः	उमर्जी
२९)	श्री व्यासतत्त्वज्ञतीर्थाः	कुलिशम्
३०)	श्री महेश्वरसूरिः	टिप्पणी
३१)	श्री पुट्ट तंबि आचार्याः	टिप्पणी
३२)	श्री रत्नगर्भ ओडेयर्	टिप्पणी
३३)	श्री अनन्तभट्टाः	टिप्पणी
३४)	श्री सत्यनाथाचार्याः	टिप्पणी
३५)	श्री जयवेङ्कटाचार्याः	टिप्पणी
३६)	श्री गूढकर्तृकाचार्याः	सुधासारसङ्ग्रहः
३७)	श्री गलगली गोविन्दाचार्याः	पञ्चरत्नस्तबकः
३८)	श्री श्रीमुष्णाचार्याः	पञ्चाधिकरणी

३९) श्री लिङ्गेरि श्रीनिवासाचार्याः सिद्धान्तप्रभा
४०) श्री पाण्डुरङ्गि केशवाचार्याः सुधावाक्यार्थविनोदः
४१) श्री उडुपि राघवेन्द्रतीर्थाः (पुत्तिगे मठः) टिप्पणी
४२) श्री सत्यनाथाः न्यायसुधापरशुः
४३) श्री सुमतीन्द्रतीर्थाः भावरत्नकोशः
४४) श्री पाण्डुरङ्गि केशवाचार्याः मञ्जरी
४५) श्री व्यासतत्त्वज्ञतीर्थाः लघुरसरञ्जनी
४६) श्री व्यासतत्त्वज्ञतीर्थाः गुरुरसरञ्जनी
४७) श्री भीमराव् कुलकर्णी कुम्बारगेरी टिप्पणी
४८) श्री सत्यपराक्रमतीर्थाः सुधाफक्किका
४९) श्री हुलिगि श्रीपत्याचार्याः टिप्पणी
५०) श्री अहोबिलाचार्याः टिप्पणी
५१) श्री सत्यप्रज्ञतीर्थाः टिप्पणी

एतादृशस्य अत्युत्तमग्रन्थस्य मुद्रणकार्यं श्रीमत्परमपूज्यानां प्रातःस्मरणीयानां श्रीमत्सुजयीन्द्रतीर्थ-श्रीमत्सुशमीन्द्रतीर्थ-श्रीमत्सुयतीन्द्रतीर्थ-श्रीमच्चरणानामादेशं सदिच्छां चानुरुध्य सम्प्रति श्रीराघवेन्द्रस्वामि-मठीयपीठाधीश्वराः पूज्याः श्री १००८ श्रीमत्सुबुधेन्द्रतीर्थश्रीपादाः कारयन्तीति अस्माकं परमं प्रमोदस्थानम् ।

अस्य ग्रन्थस्य संशोधनकार्ये अस्मद्विद्यापीठीयप्राच्यग्रन्थालयस्थाः अधोनिर्दिष्टाः टिप्पण्यः हस्तप्रति-कृतयोऽपि उपयोजिता इति निवेदयितुं नितान्तं तुष्यामः ।

ग्रन्थस्यास्य प्रकाशनार्थं श्रीसुधाव्याख्यानं विठ्ठलभट्टीयं हस्तलिखितं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीउत्तरादिमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्पयामः । संशोधनादिकार्येष्वनुकूलयितुं श्रीसुधाव्याख्यानं श्रीनिधितीर्थीयं तालपत्रस्थं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीपुत्तिगेमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्प-यामः । एवमेव मुद्रणकार्येऽस्मिन् साक्षाद्वा परोक्षे वा सहकृतवद्भ्यः परमपूज्येभ्यः श्रीमठाधीश्वरेभ्यः सर्वेभ्यः सभक्तिप्रणामगणं कार्तज्ञ्यमाविष्कुर्मः । श्रीनिधितीर्थीयं व्याख्यानं तालपत्रस्थं तौलवलिपिगतं देवनागरिलिपिगतं कृतवतः विद्वान् श्री साणूरु भीमभट्टतनूजः श्री कृष्णमूर्ति महाशयान् सन्दर्भेऽस्मिन् सप्रश्रयं स्मरामः ।

ग्रन्थस्यास्य संपादनविषये महदुपकृतवद्भ्यः विद्वद्भ्यः वैकुण्ठवासिभ्यः श्री आचार्य साणूरु भीमभट्ट महाशयेभ्यः तथा एतद्ग्रन्थसम्पादकेभ्यः विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्या-चार्येभ्यः, तथा विद्वद्भ्यः आहिताग्नि श्री वरखेडकर भीमसेनाचार्येभ्यः, एवं विठ्ठलभट्टीयां टिप्पणीं तथा एरी बाळाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री व्यासनकेरे प्रभञ्जनाचार्येभ्यः, तथा पांग्री श्रीनिवासाचार्याणां टिप्पणीं

दत्तवद्भ्यः विद्वद्भ्यः श्री पांग्री लक्ष्मणाचार्येभ्यः, तथा वाक्यार्थरत्नमालाख्यां टिप्पणीं, सत्यनाथतीर्थीयां टिप्पणीं, हुग्गिनामकटिप्पणीं च दत्वा उपकृतवद्भ्यः पंढरपुरीय पूर्णप्रज्ञमतोन्नाहिनीपाठशालाप्रांशुपालेभ्यः विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, तथा वाक्यार्थरत्नमालाटिप्पण्याः प्रतिकृत्यन्तरं दत्तवद्भ्यः विद्वद्भ्यः श्री के. टि. पाण्डुरङ्गि महाशयेभ्यः एवमेव प्रदीपटिप्पणीं दत्तवद्भ्यः मद्रपुरसर्वकारीयग्रन्थालयव्यवस्थापकेभ्यः श्रीमद्भ्यः, श्रीमन्न्यायसुधा-बिन्दुनाम्नीं टिप्पणीं दत्तवद्भ्यः श्रीमद्भ्यः केरलराज्यीय तिरुवाङ्कूरु ग्रन्थभाण्डारव्यवस्थापकेभ्यः, तथा रसरञ्जनी-लघुरसरञ्जनी इति व्याख्यानद्वयं दत्तवद्भ्यः विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, एवं ग्रन्थस्यास्य प्रतिकृतिसंशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः विद्वद्भ्यः श्री कुर्डि सुशीलेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, विद्वद्भ्यः श्री एन्. राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, विद्वद्भ्यः श्री अक्कि राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री बण्डी शामाचार्येभ्यः, विद्वद्भ्यः श्री बाळगारु रोचनाचार्येभ्यः, विद्वद्भ्यः श्री के. वेङ्कटेशाचार्येभ्यः, विद्वद्भ्यः श्री भीमसेनाचार्येभ्यः, विद्वद्भ्यः श्री एल्. कृष्णाचार्येभ्यः, विद्वद्भ्यः श्री बि. मधुसूदनाचार्येभ्यः, विद्वद्भ्यः श्री हेच्. श्रीकान्ताचार्येभ्यः, विद्वद्भ्यः श्री ओडेयर् कनकाचलाचार्येभ्यः, विद्वद्भ्यः डॉ. श्री डि. माधवाचार्येभ्यः, विद्वद्भ्यः गरग जयरामाचार्येभ्यः, विद्वद्भ्यः श्री बि. भास्कराचार्येभ्यः, विद्वद्भ्यः श्री रमेशाचार्येभ्यः, विद्वद्भ्यः श्री जगन्नाथाचार्येभ्यः, विद्वद्भ्यः श्री अर्चक वेदव्यासाचार्येभ्यः, विद्वद्भ्यः श्री श्रीनाथाचार्येभ्यः, विद्वद्भ्यः श्री मोहनाचार्येभ्यः, विद्वद्भ्यः श्री प्रदीपसिंहाचार्येभ्यः, विद्वद्भ्यः श्री पु. वंशी कृष्णाचार्येभ्यः, विद्वद्भ्यः श्री उंडारु पांडुरंग श्रीनिवासमूर्ती आचार्येभ्यः, श्री कुर्डि पवनाचार्येभ्यः, विद्वद्भ्यः श्री पुरोहित वेणुगोपालाचार्येभ्यश्च, एवं विशेषतः अल्पीयस्येव काले महता परिश्रमेण सश्रद्धं ग्रन्थानां प्रतिकृतिसंशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः तथा सर्वाङ्गसौन्दर्येण मुद्राप्य दत्तवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः विद्वद्भ्यः श्री वरखेडकर धनंजयाचार्येभ्यः, तथा ग्रन्थस्यास्य अध्ययनाध्यापनादिकर्तृभ्यः सर्वेभ्यः श्रीभगवान् सीताजानिः श्रीमूलरघुपतिवेदव्यासः आयुरारोग्यै-श्वर्यादीनि चानुगृह्य संरक्षत्विति अनन्यया भक्त्या सम्प्रार्थयामहे।

अत्र मुद्रापितासु टिप्पणीषु काश्चन टिप्पण्यः प्राचीनहस्तप्रतिरूपेण शिथिलाः मध्ये मध्ये त्रुटिताः कदाचिदसमग्रा अपि तेनैव रूपेण पण्डितैः संशोध्य मुद्रापिताः। अत्र प्रकाशितभागे यदि कुत्रचित् स्खलितानि प्राज्ञैर्विद्वद्भिः विलोकितानि चेत् ते अस्मान्प्रति संसूचयेयुः। तेन वयं शुद्धिपत्रिकायाम् अग्रिमसम्पुटेषु वा तत्सर्वं समीकृत्य विदुषां पुरः उपस्थापयितुं शक्नुमः। येषां समीपे अस्माभिरमुद्रितटिप्पण्यः उपलभ्यन्ते ते कृपया तान् ग्रन्थान् अस्मभ्यं प्रेषयन्ति चेत् तत्सर्वमागामिसम्पुटेषु वयं सम्यक् संशोध्य मुद्रापयितुं महता सन्तोषेण स्वीकुर्मः।

इत्थम्।

भवदीयम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्,

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

॥ श्रीमन्मूलरामो विजयते ॥

प्रस्तावना

यत्पदं वेदसंवेद्यं कटाक्षेणापि वीक्षितुम्।
न क्षमन्ते विमतयः तमुपासे श्रियःपतिम् ॥

भूर्भुवस्स्वरादिचतुर्दशभुवनात्मकसङ्ख्यातिगब्रह्माण्डकोटीः रोमकूपे सन्निवेश्य सकललोकजनन्या श्रिया सह सर्पतल्पे शयानेन भगवता सृष्टेषु भूलोकखण्डेष्वन्यतमेऽस्मिन् भरतखण्डे जनिमतामस्माकं महद्भागधेयमिदं यदत्र भगवान् तत्तद्युगेष्ववतीर्य बलकार्यं ज्ञानकार्यं च सम्पाद्य स्वभक्तानन्वग्रहीत् । तत्रापीदमतिशयितं वक्तव्येष्वाद्यं वचनं यदत्र तद्भक्ताग्रणीः पावनः पवमानः अनेकधाऽवतीर्य तत्रापि तृतीयेऽवतारे श्रीमध्वनाम्नाऽत्र प्रकटीभूय सज्जनानुददीधरत् । तदीयभक्तानुग्रहकार्येषु आचन्द्रार्कं दीप्यमानानि बहूनि कार्याणि यद्यपि वक्तव्यानि सन्ति तथाऽपि समस्तशास्त्रार्थसारभूतानां श्रीबादरायणसंज्ञकेन श्रीवेदव्यासमहर्षिणा निर्मितानां ब्रह्मसूत्राणां भाष्य-अणुभाष्य-अनुभाष्य-न्यायविवरण-ग्रन्थानां निर्माणमतितरां सर्वैरपि अध्यात्मविद्यारसिकैः विचारविमर्शकैः प्रशंसनीयं सर्वदा स्मरणीयं कार्यमिति निश्चप्रचं दृढतरं वयं वक्तुं शक्नुमः ।

तत्र च सूत्रसम्बन्धिग्रन्थचतुष्टये ब्रह्मसूत्र-अनुव्याख्यान-ग्रन्थराजः नभसि नक्षत्रपुञ्जमध्ये चन्द्रमा इव चकास्ति । एतादृशस्य ग्रन्थराजस्य इन्द्रावतारभूतैः प्रातःस्मरणीयैः परमपूज्यश्रीजयतीर्थमस्करिवरैः रचितम् अनुव्याख्यानव्याख्यानं न्यायसुधानामकं नैकाभिष्टिप्पणीभिः समलंकृतं श्रीराघवेन्द्रतीर्थगुरुवर्याणां प्रेरणया अनुग्रहेण च इदानीं सम्प्रकाश्य हरिगुरुभक्तानां करकमलयोः समर्पयितुं मोमुद्यते अस्माकं चेतः ।

उपनिषत्प्रस्थान-गीताप्रस्थान-सूत्रप्रस्थाननामकप्रस्थानत्रये सूत्रप्रस्थानमेव अन्तिमं निर्णायकं समस्तैः शिरसा धारणीयं च भवति । किं बहुना समस्तेषु वेदेषु समस्तेषु पुराणेष्वन्यत्राप्यभ्यर्हणीयवैदिकवाङ्मयेषु च उक्तानामर्थानां निर्णयाय सूत्राण्येव अस्माकमवलम्बभूतानि महार्णवे तरतामाधारभूतनौकास्थानीयानि । तेषां सूत्राणां व्याख्यानभूतानुव्याख्यानस्य व्याख्यानरूपा इयं सुधा देवलोकीयसुधातोऽप्यभ्यर्हिततमा जन्ममृत्यु-जरादिकं सर्वमपहृत्य स्वरूपानन्दाविर्भावरूपं मोक्षं दापयितुं समर्था । अस्य ग्रन्थस्य प्रशंसा कथं कार्या, कियती कार्या इत्यादिविषयाः आलोच्यमानाः अस्माकं जिह्वां पुरःसर्तुमेव न मुञ्चन्ति । यतो हि ग्रन्थकाराः श्रीमज्जयतीर्थश्रीमच्चरणाः पूर्वाश्रमे नाममात्रेण गृहस्थाश्रमप्रवेशं लब्ध्वा केनापि अनालोचनीयेन केवलं भगवता क्लृप्तेन घटनाविशेषेण संसारमिमं तुच्छीकृत्य स्वीये तरुणे वयसि संन्यासाश्रमं स्वीकृत्य स्वगुरूणां विद्यारण्यारण्यच्छेदकानां श्रीमदक्षोभ्यतीर्थगुरुवर्याणां सविधे शुकवत् शिक्षिता भूत्वा स्वीयया अलौकिकप्रज्ञया आचार्याणां अनेकग्रन्थानां टीकाः विरचय्य प्रायः अन्ते इमां न्यायसुधां भक्तेभ्यः नाकेन्द्रः सुधां इव प्रादुः । अस्य ग्रन्थस्य माहात्म्यं शेषोऽपि वर्णयितुं नालम् । बाल्यादारभ्य यौवनपर्यन्तं प्रायः संस्कृतभाषायाः वेदादिशास्त्राणां च परिचयहीना अपि केवलं

गुर्वनुग्रहेण शास्त्राण्यभ्यस्य अनन्तरं किञ्चित्समयपर्यन्तं सरस्वतीं संसेव्य तदनुग्रहेण घण्टां (लेखनीं) पूगं च लब्ध्वा लेखनकार्यं प्रारभन्त श्रीमज्जयतीर्थश्रीमच्चरणाः। तत्रापि गुहाया अन्तरुपविश्य पञ्चषशिष्यान् पाठयन्तः स्वयमेव वाणीकृपया लब्धया लेखन्या आचार्याणां ग्रन्थान् व्याख्यास्य, अनन्तरं तदुपरि पूगेन सम्मार्जनमात्रेण तत्सर्वं त्रुटिलेशरहितं भगवत्कृपया आविर्भावयन्तः ते लोके श्रीटीकाचार्याः इत्येव निरुपपदगौरवनाम्ना प्रथिताः बभूवुः।

महानुभावाः श्रीमज्जयतीर्थश्रीमच्चरणाः मठीयवैभवादीन् हित्वा शिष्यैः भिक्षया आनीतेन यावनालान्नेन (भक्करि) जीवनं निरवहन्।

महानुभावाः जयतीर्थश्रीमच्चरणाः गुरुभक्तिविषये अन्यादृशम् आदर्शम् अस्माकं पुरतः उपस्थापयामासुः। तद्यथा—

न शब्दाब्धौ गाढा न च निगमचर्चासु चतुरा
न च न्याये प्रौढा न च विदितवेद्या अपि वयम्।
परं श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं
प्रपन्ना मान्याः स्मः किमपि च वदन्तोऽपि महताम्॥

अनेन श्लोकेन प्रदर्शितः विनयः अनन्यसाधारणः लोकातिशायी सहृदयान् जिज्ञासून् रोमाञ्चयति। एतदपेक्षया अधिकः गुरुप्रवणः गुरोः दासानुदासः लोके यत्र कुत्रापि नोपलभ्येत इत्येवं सर्वैः सर्वथा अनुभूयते एव।

अल्पीयसा अनेहसा स्वकीयप्रखरबुद्धिवैभवेन निर्मितस्य अस्य सुधाग्रन्थस्य वैशिष्ट्यं वर्णयितुं सहस्रवदनः शेषोऽपि नालम्, किमुत अल्पप्रज्ञाः तृणकल्पाः वयम्। एतदीयग्रन्थस्य माहात्म्यं संवर्णयन् कविरेकः एवमुद्गिरति स्म। यथा—

आमूलाग्रनिबद्धतर्कजटिलं शब्दैकजीवातुकं
मीमांसानुनयं च शङ्करवचो हुङ्कारभङ्गप्रदम्।
शास्त्रं तन्त्रचतुष्टयात्मकमिदं निस्स्वप्रतन्त्रान्तराः
व्याख्यास्यन्ति पठन्ति वा कथमहो किं वा कलौ दुर्घटम्॥

'अध्यात्मविद्या विद्यानाम्' इति श्रीकृष्णोक्त्यनुसारेण अद्वितीयाध्यात्मविद्याख्य-सूत्रव्याख्यानरूपा इयं न्यायसुधा नैकाभिष्टिप्पणीभिः सह संयोज्य, संशोध्य, संमुद्र्य अत्र प्रकाशं नीयते। महदिदं साहसकार्यं महापुरुषोत्तमस्य श्रीहरेः अविच्छिन्नभक्ताग्रेसर-श्रीमन्मुख्यप्राणावताराणां श्रीमदानन्दतीर्थभगवत्पादानां परमानुग्रहेणैव सम्पन्नः प्रह्लादावतारभूतानां श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानाम् आराधनासमये तत्करकमलाभ्यामेव श्रीमन्मूलरामचन्द्रदेवस्य पादकमलयोः तद्भक्तवृन्देन सप्रश्रयं सभक्ति समर्प्यतेतमाम्। श्रीकृष्णार्पणमस्तु॥

आचार्याः साणूरु भीमभट्टाः

प्रथमपञ्चदशभागप्रधानसम्पादकाः

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

सम्पुटम् – १९

तृतीयाध्याये द्वितीयः पादः

विषयानुक्रमणिका

विषयः	परिच्छेदः	पुटसङ्ख्या
पराभिध्यानाधिकरणम् ॥ ३-२-२-५ ॥	१-२	९००१-९००५
अ) 'ईशेच्छया'इत्याद्यनुव्याख्यानस्य सप्रयोजनं 'पराभिध्यानात्'इत्यादिसूत्र-तात्पर्यकथनपरतयाऽवतरणं विवरणञ्च	१	९००१
आ) 'सृष्ट्वैव वासनाभिश्च'इत्याद्यनुव्याख्यानस्य सप्रयोजनमेतत्पादीयप्रथमद्वितीये-त्यधिकरणद्वयार्थोपसंहारकतयाऽवतरणं विवरणञ्च	२	९००३
सुषुप्तिबोधमोहाधिकरणानि ॥ ३-२-४,५,७ - ७, ८, १० ॥	३	९००६-९०१०
अ) 'सुषिप्तिबोधमोहाँश्च'इत्याद्यनुव्याख्यानस्य सप्रयोजनं चतुर्थपञ्चमसप्तमे-त्यधिकरणत्रयतात्पर्यकथकतया अवतरणं विवरणञ्च	३	९००६
कर्मानुस्मृत्यधिकरणम् ॥ ३-२-६-९ ॥	४-५	९०११-९०१४
अ) 'नान्यः कर्ताऽस्य कश्चन'इत्यनुव्याख्यानस्य सप्रयोजनं षष्ठाधिकरणतात्पर्य-कथकतयाऽवतरणं विवरणञ्च	४	९०११
आ) व्याख्यानेऽधिकरणक्रमोल्लङ्घनप्रयोजनप्रदर्शनम्	५	९०१३
स्थान(तोऽप्यभे)भेदाधिकरणम् ॥ ३-२-८-११ तः १३ ॥	६-१८	९०१५-९०३४
अ) 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' इति प्रथमसूत्रार्थतया 'न स्थानभेदतोऽप्यस्य..'इत्याद्यनुव्याख्यानस्य विवरणम्	६-१७	९०१५-९०३३
१) एतदधिकरणीयव्याख्यानारम्भकतया 'न स्थानभेदतोऽप्यस्य..' इत्याद्यनुव्याख्यानस्यावतरणिका व्याख्यानञ्च	६-७	९०१५-९०१९

क) एतदधिकरणव्याख्यानारम्भगर्भिताशयापहसितव्यकेचित्कार-पक्षीयव्याख्यानानुवादः तदपहासप्रदर्शनञ्च	६	९०१५
ख) सुरनरादिप्रतिशरीरं दक्षिणाक्ष्यादिस्थानेषु स्थित्वा स्वप्नाद्यवस्थाप्रवर्तक एक एव, न भिन्नः, नापि तत्तद्गतेषु तद्रूपेषु तारतम्यादिः	७	९०१७
२) एतदधिकरणीयप्रथमसूत्रोक्तार्थमाक्षिप्य समाधायकतया 'न भेदात्'इत्यादि द्वितीयसूत्रार्थरूपेण 'तद्विरुद्धं तु'इत्याद्यनुव्याख्यानस्य विवरणम्	८-१६	९०२०-९०३२
क) उक्तार्थविरुद्धप्रमाणानामप्रामाण्यम्	८-१६	९०२०-९०३२
१) उक्तार्थविरुद्धार्थकप्रमाणानां महातात्पर्यविरोधित्वा-त्प्रतीतार्थेऽप्रामाण्यम्	८	९०२०
२) परमेश्वरस्य सकलगुणपरिपूर्णत्वे निरस्तसमस्तदोषत्वे च वेदादीनां महातात्पर्यमित्यर्थसाधनम्	९-१६	९०२२-९०३२
च) मोक्षहेतुत्वेनैव हि वेदवाचः प्रामाण्यम्	९	९०२२
छ) मोक्षश्च प्रसन्नादीशानादेव भवति, ईशस्य प्रसन्नता च गुणोत्कर्षज्ञानान्निर्दोषतापरिज्ञानाच्च भवति	१०-११	९०२४-९०२५
१) मोक्षश्च प्रसन्नादीशानादेव भवति	१०	९०२४
२) ईशस्य प्रसन्नता च गुणोत्कर्षज्ञानान्निर्दोषता-परिज्ञानाच्च साध्या	११	९०२५
ज) उक्तार्थे प्रमाणोदाहरणानि	१२-१४	९०२६-९०३०
१) उक्तार्थे प्रामाण्यबोधकागमवाक्यानि	१२-१३	९०२६-९०२८
२) उक्तार्थे प्रामाण्यबोधकानुमानम्	१४	९०२९
झ) महातात्पर्यविरोधिप्रमाणानामप्रामाण्यप्रतिपादनोपसंहारपूर्वकः परकृतापव्याख्याननिरासेऽप्युक्तयुक्त्यतिदेशः	१५	९०३०
ञ) सकलवेदा(दीनां)न्तानां भगवद्गुणोत्कर्षादौ महातात्पर्य यदुक्तं तन्न केवलमानुमानिकम्, अपि तु वाचनिकमपि	१६	९०३२
३) स्थानभेदानुमाने सूचितदोषोद्घाटनम्	१७	९०३३
आ) अधिकरणार्थोपसंहारः	१८	९०३३

उपमाधिकरणम् ।। ३-२-१०-१८ ।। १९-८१ १०३५-११२१

अ) पादसङ्गतिप्रदर्शनपूर्वकं प्रकारान्तरेणैतदधिकरणप्रतिपाद्यभूतस्य (भास्करमतोक्त)भेदाभेदनिराकरणस्य प्रदर्शनम् १९ १०३५

आ) सूत्रगतदृष्टान्तवचनमात्रं न कस्यचिदर्थस्य साधकं बाधकं वेत्यतः पूर्वपक्षनिषेधपूर्वकं प्रतिज्ञाहेत्वोर्दर्शनम् २०-२२ १०३५-१०३९

१) चेतनत्वाद्यनुमानेन जीवस्य ब्रह्माभेदसाधनं न युक्तम्, श्रुत्या 'जीवस्य ब्रह्माभासत्व'स्य सुस्पष्टप्रतिपादनात् २० १०३५

२) जीवस्य ब्रह्माभासत्वप्रतिपादकश्रुत्युदाहरणम् २२ १०३८

इ) 'अत एव चोपमा'इतिसूत्रांशव्याख्यानम् (चेतनत्वाद्यनुमानबाधकतयोक्ताभासत्वानुमानस्य समर्थनम्) २४-४६ १०४१-१०७७

१) 'अत एव चोपमा'इतिसूत्रांशनिवर्त्यशङ्काप्रदर्शनम् २४-३० १०४१-१०४९

क) आभासत्वानुमाने दोषोद्भावनद्वारा 'चेतनत्वाद्यनुमानेन जीवस्य ब्रह्माभेदसाधने'ऽयुक्तत्वशङ्कापरिहारप्रयासः २४-३० १०४१-१०४९

१) जीवस्य परमात्मन आभासत्वं यन्निर्णीतं तदयुक्तत्वशङ्का द्वेधा २४-३० १०४१-१०४९

च) आभासस्योपाध्यायत्तत्वात् जीवानाञ्चोपाध्यायत्तत्वाभावात् जीवस्य परमेश्वराभासत्वानुपपत्तिशङ्का २४ १०४१

छ) आभासत्वस्य भिन्नत्वेन विरोधाच्च जीवस्य परमेश्वराभासत्वानुपपत्तिशङ्का २५ १०४२

ज) आभासत्वानुमानदूषणसाध्यप्रदर्शनम् २६-२९ १०४३-१०४८

१) आभासत्वानुमाने दुष्टे प्रागुक्तचेतनत्वाद्यनुमानेन मायिविलक्षण-जीवब्रह्माभेद(समुदायैक्य)सिद्ध्या भेदाभेदसिद्धिः २६ १०४३

२) समुदायैक्याङ्गीकारे कारणरूपमायिमतोक्तदोषनिरासप्रदर्शनम् २७ १०४४

३) समुदायैक्यस्य किञ्चित्प्रपञ्चनेन पूर्वोक्तभेदाभेदसमर्थनम् २८-२९ १०४५-१०४८

ट) ईशरूपेष्विवेशरूपसमुदायेऽपीशसंज्ञा २८ १०४५

ठ) भेदस्यौपाधिकत्वाद्देहोपाधेरात्यन्तिकापाये जीवानामीशरूपैः स्वाभाविकसाम्यरूपैक्यप्राप्तिः २९ १०४७

झ) जीवानामुपाध्यायत्तत्वाभावासिद्धिशङ्का तत्परिहारश्च, तेन च आभासत्वासिद्धेः सुस्थितिः ३० १०४८

२) आभासत्वानुमान उद्भावितदोषनिरासपूर्वकं 'चेतनत्वाद्यनुमानेन जीवस्य ब्रह्माभेदसाधन'स्यायुक्तत्वसमर्थनम् ३१-४६ १०५०-१०७७

क) आभासत्वानुमानदूषणनिवर्तकतया सूत्रावयवावतरणम्, व्याख्यानम्, तात्पर्यम्, उपलक्षणञ्च ३१-३८ १०५०-१०६४

१) आभासत्वानुमानदूषणनिवर्तकतया सूत्रावयवावतरणं व्याख्यानञ्च ३१ १०५०

२) आभासत्वानुमानदूषणनिवर्तकतयोक्तसूत्रावयवव्याख्यानस्य तात्पर्यम् ३२-३८ १०५२-१०६४

च) जीवेषु सूर्यकाद्याभासतो विशेषः, तद्विशेषस्य च सूत्रगतातःशब्दाल्लब्धत्वम्, तदर्थश्च तदधीनत्व-तत्सदृशत्वादिरूपाभासत्वमिति प्रदर्शनञ्च ३२ १०५२

छ) 'अत एव चोपमा'इतिसूत्रगतवाक्ययोजना, तदर्थश्च 'प्रकृताभ्यां चित्त्वरूपतदधीनत्वतत्सदृशत्वाभ्यामेव सूर्यकाद्युपमोक्ता न तूपाध्यधीनत्वादिना' इति ३३ १०५४

ज) दृष्टान्ते साध्यसाधनधर्मसाम्यमेव विवक्षितं नातिसाम्यम्, अन्यथा सर्वानुमानोच्छेदप्रसङ्गश्च ३५ १०५७

झ) असुरेतरजीवेषु चित्त्वेतरकिञ्चित्सुखादिसादृश्यस्याप्यस्तित्वम् ३६ १०५८

ञ) समुदायार्थः ३७-३८ १०५९-१०६४

१) भाष्यकारीयदोषाभावोपपादनस्य समुदायार्थः ३७ १०५९

२) भाष्यकारीयदोषाभावोपपादनस्योपलक्षणतया दोषान्तरमाशङ्क्य परिहरणम् ३८ १०६१

ख) 'यदुक्तं तदधीनत्वम्'इत्याद्यनुव्याख्यानोक्तार्थस्य विवरणम् ३९-४६ १०६४-१०७७

१) ब्रह्माभासशब्देन ब्रह्माधीनत्वं ब्रह्मसदृशत्वञ्च न गौण्या वृत्त्याऽपि तु योगेनैव ३९-४० १०६४-१०६९

च) 'भानमस्तित्वमपि चैवासमन्ताद्यतरस्ततः'इत्यनुव्याख्याने यतिभङ्गशङ्का तन्निरासश्च ४० १०६८

२) 'जीवस्य ब्रह्माभासता न जलाद्युपाध्यायत्ता' इत्यर्थस्य विवरणम्, समर्थनञ्च ४१-४२ १०७०-१०७१

च) सिद्धान्ते जीवस्य सोपाधिप्रतिबिम्बत्वाङ्गीकारादत्र निरुपाधिप्रतिबिम्बत्वोक्तिविरोधशङ्का, सिद्धान्ते प्रतिबिम्बस्य स्वरूपबाह्येति द्वैविध्यप्रदर्शनपूर्वकं निरुपाधिप्रतिबिम्बत्वोक्तेर्बाह्योपाध्यधीनत्वाभावःभिप्रायेण तच्छङ्कानिरसनञ्च	४२	१०७०
३) सौत्र'च'शब्दस्यावधारणार्थकत्वे सौत्र'एव'शब्देन पौनरुक्त्यमाशङ्क्य तच्छङ्कानिवारणम्	४४-४६	१०७२-१०७७
च) सौत्रचैवशब्दयोरर्थैक्यभावनया पौनरुक्त्यशङ्का तयोरर्थभेदात्पौनरुक्त्यशङ्कापरिहारश्च	४४	१०७२
छ) उक्तार्थस्याभिप्रायः	४५	१०७४
ज) चैवेतिशब्दयोरवधारणार्थकत्वेऽन्यतरवैयर्थ्यशङ्का, सूचनीयार्थसत्त्वाद्वैयर्थ्यपरिहारश्च	४६	१०७५
ई) चेतनत्वाद्यनुमानबाधकतयोक्ताभासत्वानुमानसमर्थनस्य प्रमाणान्तरोपलक्षणत्वाशयः	४७-६४	१०७७-१०९९
१) ऐक्यबाधकप्रत्यक्षप्रमाणस्य प्रसिद्धत्वम्	४८	१०७८
२) ऐक्यबाधकागमानामुदाहरणस्थलदर्शनम्	४९	१०७९
३) ऐक्यबाधकानुमानान्तरकथनम्	५०-६४	१०८०-१०९९
क) जीवब्रह्मणी नाभेदवती विरुद्धधर्माधिकरणत्वाच्छायातपवदित्यनुमानेनैक्यबाधनम्	५०-६४	१०८०-१०९९
१) विरुद्धधर्माधिकरणत्वानुमानप्रयोगः , तद्धेतोरसिद्धिपरिहारप्रदर्शनञ्च	५०	१०८०
२) 'स्वरूपेण निर्दोषत्वमुपाधितो दोषवत्त्वम्'इति प्रकारभेदेन साध्यासिद्धिशङ्का, स्वातन्त्र्यात्तन्निरासस्तस्याभिसन्धिश्च	५१	१०८१
३) ब्रह्मणो जीवगतदुःखाद्यनुसन्धानाभावरूपप्रकारभेदेन विरोधशान्तिशङ्का, चेतनैक्येऽनुसन्धानस्यैव प्रामाण्यात् अन्यतरगतसुखदुःखाद्यनुसन्धानाभावादेव विरोधतादवस्थ्यम्	५२	१०८३
४) 'चेतनैक्येऽनुसन्धानं प्रमाणम्'इति कथनेन चेतनत्वाद्यनुमानस्य सोपाधिकत्वञ्चोक्तं भवति	५३	१०८६
५) चेतनेष्वनुसन्धानरहितं समुदायैक्यं युज्यत इति शङ्का, तस्य नाममात्रत्वाददोषत्वम्	५४	१०८८

६) मुक्तिकालीनकादाचित्कानुसन्धानेनैक्यसिद्धिशङ्का सर्वज्ञस्यैकतानुसन्धानाभावेन तच्छङ्कानिरासश्च	५६-५७	१०९०-१०९२
७) कालान्तरेऽनुसन्धानेऽज्ञता	६०-६२	१०९४-१०९६
च) 'परमात्मन इदानीमैक्यानुसन्धानाभावेऽप्यागामिनि काले तस्यानुसन्धानमस्ती'तिपक्षे तस्य मिथ्याज्ञानिता	६०	१०९४
छ) विद्यमानानुसन्धानाभावेऽज्ञत्वापत्तिरिति गूढाभिसन्धेरुद्घाटनम्	६२	१०९५
८) 'कालभेदेन विद्यमानाविद्यमानैक्यपक्ष'निरासः	६३	१०९६
९) जीवब्रह्मणोः 'संसारे भेदाभेदौ मोक्षे त्वभेद एव', 'संसारे केवलभेदो मुक्तावत्यन्ताभेदः' इति भेदाभेदमतद्वयदोषातिदेशेन 'अवस्थाद्वयेऽपि भेदाभेदौ'इति तृतीयमतनिराकरणम्	६४	१०९८
उ) परमात्मत्वस्य सीमा(लक्षण)प्रदर्शनम्	६५-६६	१०९९-११०१
१) अशेषगुणोन्नद्धत्वम्, निर्दोषत्वञ्च यावत्तावदीश्वरत्वम्	६५	१०९९
२) यावत्तावदितिप्रयोगेण प्रतीतस्य समुदायैक्यस्य निराकरणम्	६६	११००
ऊ) 'चेतनैक्यस्यानुसन्धानं व्यापकम्'इत्युक्तेः समर्थनम्	६८	११०२
ए) परमेश्वरांशत्वहेतोरसिद्धिः	६९	११०५
ऐ) अनुसन्धानाभावेनांशत्वव्यावृत्तावंशाधिकरणविरोध इति शङ्काया अंशशब्दार्थभेदेन निराकरणम्	७०	११०६
ओ) अत्यल्पस्याप्यंशिन अंशगतसुखदुःखाद्यनुसन्धानं विद्यत एव, तथापि कश्चिद्विशेष ईशकृतो भवेत्	७१	११०७
औ) ईशस्याचिन्त्यशक्तित्वान्नाशक्यं क्वापि विद्यते	७२	११०९
अं) जीवेशैकतायां सेशताया एवानुपपन्नता	७३-८०	१११०-११२१
१) अनीशस्येशतायाः सर्वमानविरुद्धत्वम्	७४	१११०
२) श्रुतिर्यदीशत्वेन विज्ञातमनीशत्वेन तदन्यथा वाऽऽदिशेत्तर्हि सैवोपजीव्यविरोधेनाप्रमाणं भवेत्	७५	११११
३) ईशत्वशक्त्या उपजीव्यविरोधपरिहारशङ्का, जीवैक्यादेव तदभावापादनञ्च	७६	१११४
४) 'जीवैक्येऽपि भेदस्य विद्यमानत्वादीशतोपपत्ति'शङ्कापरिहारः, अघटितघटनकल्पनस्य सीमा, तदर्थस्य स्पष्टीकरणञ्च	७७-७८	१११५-१११८

५) 'अनीशस्येशतेत्येव विरुद्धं सर्वमानतः'इत्युक्त्युपपादनम्	७९	११९८
६) 'ईशत्वेऽनीशभेदेन'इत्यादिनोक्तार्थसमर्थनम्	८०	११९९
अअ) अधिकरणार्थोपसंहारः	८१	११२१
अरूपाधिकरणम् ।। ३-२-९-१४,१५,१६,१७ ।।	८२-८४	११२२-११२७
अ) 'भाष्यप्रतीतार्थेऽनुपपत्ति'शङ्कापरिहारकतयैतदधिकरणीय-चतुःसूत्र्यास्तात्पर्यं सप्रयोजनम्	८२	११२२
१) स देवोऽप्राकृतरूपत्वादरूपः, तस्य रूपञ्च शिरःपाणिपादाद्यात्मकं स्वगुणात्मकम्, अतः स रूपवाँश्च, अतश्च तस्य नानित्यता, नापि सौन्दर्याद्यभावः, न च श्रुतिद्वयविरोधिता, ततश्च भक्तिरुपपन्नेति	८२	११२२
आ) 'प्रकाशवत्'इतिसूत्रावयवस्य भाष्योक्तान्यार्थपरतया 'लोकविलक्षणरूपवत्त्वा-द्रूपवत्त्वश्रुतिवैयर्थ्य'परिहारः	८३	११२५
१) यथा तैजससौरादिलोकरूपप्रसिद्धप्रकाशाभावेऽपि श्रुतिर्जीवस्येशं प्रकाशमाह तथा लोकविलक्षणेऽपि भगवद्रूपे रूपशब्दप्रवृत्तिर्युक्ता, अत्रोपपत्तेर्वक्ष्यमाणत्वञ्च	८३	११२५
इ) अधिकरणक्रमव्यत्यासेन व्याख्याने प्रयोजनम्	८४	११२६
वृद्धिह्रासाधिकरणम् ।। ३-२-१२-२०,२१ ।।	८५	११२८-११२९
अ) भक्तेर्वृद्धिह्रासभाक्त्वम्	८५	११२८
१) यदर्थं भगवन्महिमाऽत्रोच्यते सा भक्तिः पुरुषेषु तारतम्येन तिष्ठतीत्युपपादनम्	८५	११२८
क) ब्रह्मादीनामस्मदादीनाञ्च भगवद्भक्तितारम्येन विमुक्तिगमानन्दादेः श्रौतक्रमानतिरेकेण तारतम्यं भवति	८५	११२८
स्थानविशेषाधिकरणम् ।। ३-२-१७-३५,३६ ।।	८६-८९	११३०-११३५
अ) ब्रह्मादीनामानन्दस्य प्रसिद्धप्रतिबिम्बतुल्यत्वेऽपि साधनभूत-भक्त्याद्युपाधिरूपगुणानां वैचित्र्याद्वैचित्र्यम्	८६	११३०
आ) 'उपपत्तेश्च'इतिसूत्रव्याख्यानरूपेण प्रतिबिम्बतारतम्ये हेत्वन्तरम्	८७	११३१
१) बिम्बशक्त्या प्रतिबिम्बवैचित्र्यं सादृश्यञ्च	८८	११३२
२) तदपेक्षयाऽत्यल्पत्वात्सततं तस्माद्भिन्नः	८९	११३३
३) तदपेक्षयाऽत्यल्पत्वे श्रुत्युदाहरणम्	९०	११३४

पालकत्वाधिकरणम् ।। ३-२-१३-२२ ।।	९०-९१	९१३६-९१३८
अ) भाष्योक्तपूर्वपक्षस्यायुक्तत्वशङ्कानिरसनपूर्वकं पूर्वपक्षविशदनम्	९०	९१३६
आ) तथाविधपूर्वपक्षत्वे सति सिद्धान्तस्यायुक्तत्वशङ्का, तन्निरासकतया सूत्राभिप्रायप्रदर्शनञ्च	९१	९१३७
अव्यक्ताधिकरणम् ।। ३-२-१४-२३ तः २७ ।।	९२	९१३९
अ) अव्यक्तत्वदृश्यत्वयोर्विरोधपरिहारार्थं 'अतोऽनन्तेन तथा हि लिङ्गम्'- इति सूत्रितस्य स्फुटतात्पर्यकथनम्	९२	९१३९
उभयव्यपदेशाधिकरणम् ।। ३-२-१५-२८ तः ३१ ।।	९१-१५८	९१४१-९२३१
अ) साक्षादधिकरणार्थव्याख्यानम्	९३-१२९	९१४१-९१९७
१) एतदधिकरणारम्भप्रयोजकपूर्वपक्षप्रदर्शनम्	९३	९१४१
२) 'उभयव्यपदेशादि'त्यादिसूत्रस्य प्रतिज्ञाप्रदर्शनम् (पारमेश्वरगुणानां नित्याभिन्नत्वेऽपि विशेषशक्त्या गुणगुण्यादिस्थितिः)	९४-९५	९१४१-९१४३
क) उक्तार्थे बाधकपरिहारः	९५	९१४२
१) क्रियाणां गुणानाञ्च श्रौतव्यवहारैरनित्यतयाऽवगतानां भगवताऽत्यन्ता- भेदानुपपत्तिशङ्का, विशेषात्मतया तथा नित्यशक्त्यात्मना तत्परिहारश्च	९५	९१४२
३) उक्तार्थे प्रमाणत्वेन सौत्रस्योभयव्यपदेशादित्यस्य हेतोर्व्याख्यानम्	९८-१२९	९१४६-९१९७
क) भगवतो धर्माणां विशेषत्वेन, भिन्नत्वेन च विज्ञातेर्युक्त उक्तार्थः	९८	९१४६
ख) 'विज्ञातेः'इत्यनुव्याख्यानगतप्रयोगसाधुत्वविचारः	९९	९१४६
ग) सौत्रहेतुव्याख्यानस्य विवरणम्	१००	९१४९
घ) विवृतस्य 'ब्रह्मणा तद्धर्माणामभेदेऽपि विशेषबलाद्धर्मधर्मिव्यवहारो युज्यते' इत्यस्य प्रपञ्चनम्	१०१-१२८	९१५०-९१९४
१) विशेषानङ्गीकर्तॄणां भेद-अभेद-भेदाभेद-इति वादित्रयाणां मतानां पूर्वपक्षत्वेनानुवादः	१०१	९१५०
२) त्रिभिरप्येतैर्वादिभिर्विशेषस्याङ्गीकर्तव्यत्वम्	१०२-१२८	९१५२-९१९४
च) भेदवादिनं विशेषमङ्गीकारयति	१०२-११२	९१५२-९१७०
१) ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदेऽङ्गीक्रियमाणे तस्य भेदस्य भिन्नत्वाभिन्नत्वाभ्यां विकल्प्य प्रश्नः	१०२-११२	९१५२-९१७०

अ-३-घ-२-च-१-

ट) ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदेऽङ्गीक्रियमाणे तस्य भेदस्य भिन्नत्वेऽनवस्थापादनम् १०३ ९१५२

ठ) ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदेऽङ्गीक्रियमाणे तस्य भेदस्याभिन्नत्वेऽपि द्वेधा विकल्प्य दूषणम् १०४-११२ ९१५५-९१७०

१) ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च सविशेषाभिन्नत्वे कल्पनागौरवमपसिद्धान्तश्च १०४ ९१५५

२) ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च निर्विशेषाभिन्नत्वे दूषणानि १०५-११२ ९१५६-९१७०

त) ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च निर्विशेषाभिन्नत्वे तद्भेदतादेरनुपपत्तिः १०५ ९१५६

थ) ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च निर्विशेषाभिन्नत्वे दूषणान्तराणि १०६-११२ ९१५७-९१७०

१) भेदस्य विशेषणत्वादिरूपेण दृश्यमानत्वान्यथानुपपत्त्या स्वरूपभेददूषणानिस्तारः १०६ ९१५७

२) अङ्गीकृतभेदिस्वरूपस्य तदीयत्वादिना प्रतीयमानत्वा-प्रतीयमानत्वाभ्यां व्यवस्थाया अपि दोषः १०७ ९१५८

३) भेदाभेदयोर्भेदिस्वरूपत्वं तयोश्चाविशेषत्वे पर्यायत्व-मप्रामाणिकत्वं प्रमाणविरुद्धत्वञ्च १०८ ९१६०

४) पर्यायत्वपरिहारार्थं भेदाभेदयोर्भेदिना भेदमभेदञ्चाङ्गीकुर्वतां कार्यनिर्वाहार्थं विशेषाङ्गीकरणमनिवार्यम् १०९ ९१६३

५) 'धर्मिणा भेदाभेदयोः सविशेषाभेदेऽपि भेदाभेदयोः परस्परं भेद एव नाभेदविशेषावितिपक्ष'स्य दूषणम्, अन्ततोऽभिन्ने वस्तुनि विशेषो-ऽङ्गीकार्य एव, भेदाभेदयोर्भेदकल्पनायाः कल्पनागौरवञ्चेति ११०-१११ ९१६४-९१६७

प) अनेन 'अभिन्नश्चेत्पुरा न किम्' इत्यनुव्याख्यानस्य विवृतत्वम् १११ ९१६७

६) कल्पनागौरवभयाद्धर्मधर्मिणोरभेदमङ्गीकृत्य भेदव्यवहारार्थं विशेषोऽङ्गीकर्तव्य इति शङ्कानिरासः ११२ ९१६७

प) अभेदप्रतीतावेव भेदव्यवहारार्थं विशेषोक्तिर्नान्यथा ११२ ९१६७

अ-३-घ-२-

छ) अभेदवादिनाऽपि विशेषमङ्गीकारयति	११३-१२७	९१७०-९१९१
१) क्रियादिविषयाणां वाक्यानां मायिकविषयतामङ्गीकुर्वता मायावादिनाऽप्यपर्यायसिद्ध्यर्थं विशेषोऽङ्गीकार्य एव	११३-११६	९१७०-९१७६
ट) अपोहवादाश्रयेण(अतद्व्यावृत्तिरेव शब्दार्थ इति मतमङ्गीकृत्य) अपर्यायत्वावैयर्थ्यशङ्के, एवं कुसृष्टौ कल्पितायामपि न सत्यस्याखण्डतासिद्धिरिति तत्समाधानञ्च	११४-११६	९१७३-९१७६
१) ब्रह्मण्यसत्यत्वादिविशेषणव्यावृत्तिरूपपूर्वपक्षस्य द्वेधा कल्पनम्	११४-११५	९१७३-९१७६
त) असत्यादिपदानामपोहवाचित्वेन अपर्यायत्वावैयर्थ्यशङ्के	११४	९१७३
थ) सत्यादिपदानां सत्यत्वादिपृथगर्थवाचित्वेन अपर्यायत्वावैयर्थ्यशङ्के	११५	९१७४
२) तथात्वेऽपि न ब्रह्मणो निर्धर्मितासिद्धिरिति तत्पक्षखण्डनञ्च	११६	९१७६
ठ) अखण्डत्वखण्डनासिद्धिशङ्का, तत्समाधानञ्च	११७	९१७७
ड) ब्रह्मणो निर्विशेषत्वे कस्यापि पदस्य तत्र प्रवृत्त्यभावोऽपि	११८-१२०	९१८०-९१८२
१) ब्रह्मणः शब्दाभिधेयत्वं विहाय शब्दलक्ष्यत्वाङ्गीकारेऽपि विशेषिता स्यादेव	११९	९१८१
२) लक्ष्यत्वस्यापि लक्ष्यत्वेऽङ्गीक्रियमाणेऽपि विशेषप्राप्तिरपरिहार्यैव, तेनापि लक्ष्यत्वे चानवस्थितिः	१२०	९१८१
ढ) अभावरूपविशेषवत्त्वस्याङ्गीकृतत्वेन निर्धर्मितासाधनप्रयासदूषणम्	१२१-१२६	९१८२-९१९०
१) अभावरूपविशेषवत्त्वस्याङ्गीकृतत्वेन निर्धर्मितासाधनप्रयासरूपः पूर्वपक्षः	१२१	९१८२
२) तथात्वेऽसार्वज्ञ्यादिराहित्यादिधर्माणामङ्गीकृतत्वम्	१२२	९१८४
३) असार्वज्ञ्यराहित्यादिधर्माणामङ्गीकारे च प्रतिषेधद्वयबलात् सार्वज्ञ्यादिधर्माङ्गीकारतादवस्थ्यम्	१२३	९१८४
४) तथाऽनङ्गीकारे बाधकप्रदर्शनम्	१२४-१२६	९१८६-९१९०
त) सार्वज्ञ्यादिपदानामसार्वज्ञ्यादिव्यावृत्तिबोधकत्वानङ्गीकारे ब्रह्मण्यानन्दादिपदैरसुखत्वाद्यव्यावृत्तिप्रसङ्गः	१२४	९१८६
थ) तस्येष्टापत्तित्वे च ब्रह्मण्यसत्यादिधर्माणां तात्त्विकत्वापत्तिः	१२५	९१८६
द) सत्यत्वादेरनृतादिविरोधित्वोक्तौ च अनैश्वर्यादिविरोधित्वनिवारणायोगः	१२६	९१८९

ण) एवमखण्डखण्डनादखण्डवादिनाऽप्यनन्यथागतेः खण्डितेन मनसा विशेषोऽङ्गीकार्य एवेत्युपसंहारः	१२७	९१९१
अ-३-घ-२-		
ज) भेदाभेदवादिनं विशेषमङ्गीकारयति	१२८	९१९१
झ) सौत्रोभयव्यपदेशान्यथानुपपत्त्या भगवद्धर्माणां सविशेषात्यन्ताभेदसाधनस्योपसंहारः	१२८	९१९१
अ-३-		
ङ) उक्तार्थस्य सूत्रकाराभिमतत्वम्	१२९	९१९४
आ) एतदधिकरणानुषङ्गसिद्धार्थकथनम्	१३०-१५६	९१९७-९२३०
१) भगवद्धर्माणां भगवता सविशेषाभेदस्य समर्थितत्वादेवान्विताभिधान-व्यतिरिक्तमतानामनुपपन्नता	१३०-१५६	९१९७-९२३०
क) अभिहितान्वयादिमतानामनुपपन्नत्वम्	१३०	९१९७
ख) अन्विताभिधानस्य तद्गतविशेषस्य च विवरणम्	१३१-१३३	९१९९-९२०७
१) उक्तविशेषस्य तात्पर्यप्रदर्शनम्	१३२	९२०४
२) उक्तार्थस्य जिज्ञासाधिकरणोक्तावप्यत्रोक्तौ विशेषप्रदर्शनम्	१३३	९२०६
ग) प्रतिज्ञातस्यान्विताभिधानस्योपपादनम्	१३४-१३६	९२०७-९२१२
१) अभिहितान्वयादिमतानुपपत्तेरन्विताभिधानोपपत्तेश्च हेतोर्दर्शनम्	१३४	९२०७
२) अन्विताभिधानवादे विशेषान्वयप्रतिपत्तिर्निर्निबन्धनैवेति शङ्का तच्छङ्कानिरासश्च	१३५	९२०८
३) 'सविशेषाभेदसमर्थनेन पदानामन्विताभिधानसाधने' अतिप्रसङ्गादयुक्तत्वशङ्का, अनुभवबलात्तच्छङ्कानिरासश्च	१३६	९२११
घ) अभिहितान्वयादिपक्षाणामयुक्तत्वस्योपपादनम्	१३७-१५६	९२१२-९२३०
१) अन्विताभिधानानङ्गीकारे बाधकप्रदर्शनमुखेन अभिहितान्वयादिपक्षाणामयुक्तत्वोपपादनम्	१३७-१३८	९२१२-९२३०
च) उक्तार्थस्य प्रपञ्चनम्	१३८	९२१३
२) पदाभिहितपदार्थानामन्वयबोधकत्वे दोषदर्शनम्	१४०	९२१५
३) 'वाक्यस्यान्वयबोधकत्वम्' इतिपक्षनिरासः	१४१	९२१६

४) 'तथात्वे वाक्यस्य पदव्यतिरिक्तत्वाङ्गीकारारोप'निरासः	१४२-१४३	९२१८-९२१९
च) उक्तस्य 'जिज्ञासितार्थाभिधानेनैव श्रोतुर्निराकाङ्क्षता स्यात्' इत्यस्योपपादनम्	१४३	९२१९
५) स्फोटवादनिरासः	१४४	९२२०
६) नवीनाभिहितान्वयपक्षनिरासः	१४५-१५२	९२२२-९२२७
च) पदान्येव पदार्थप्रतिपादनावान्तरव्यापाराण्यन्वयं बोधयन्तीतिपक्षे विरम्यव्यापारापत्तिः	१४५-१५२	९२२२-९२२७
१) अचेतनानामपि पदानां विरम्यव्यापाराङ्गीकारेऽनुक्तानामपि पदानां पदार्थादिप्रतिपादने व्यापारापत्तिः	१४५	९२२२
२) अनुक्तौ ज्ञातत्वाभावान्न पुनर्व्यापार इति चेत् उक्तेः प्रागेव पदानि ज्ञाततायै यत्नं कथं न कुर्युः	१४६-१४७	९२२३-९२२४
३) पदानामचेतनत्वात्पदार्थप्रतिपादनादिव्यापारस्य पुरुषोच्चारणाधीनत्वे विरम्यव्यापारस्याप्यनुपपत्तिः	१४८	९२२४
४) अन्वयानभिधायिभिरपि पदैर्यद्यन्वयं प्रतिपद्येत तदा गवादिपदैरश्वादिकमपि प्रतिपद्येत	१५०	९२२६
५) गवादिपदानामश्वादौ शक्त्यभावात्तेन तत्प्रतिपत्त्यभावे अन्वये शक्तिरहितैरेतैः कथमन्वयज्ञानाय यतेत	१५१-१५२	९२२६-९२२७
७) अभिहितान्वयादिपक्षायुक्तत्वोपसंहारः	१५३-१५६	९२२७-९२३०
च) अभिहितान्वयादिपक्षे कल्पनागौरवदोषः अनुभूतिविरोधश्च	१५३-१५६	९२२७-९२३०
१) अभिहितान्वयपक्षे अनुभूतिविरोधस्योपपादनम्	१५४-१५६	९२२८-९२३०
ट) किमिति प्रश्नस्य विशेषजिज्ञासार्थत्वोपपादनम्	१५५	९२२९
ठ) उक्तार्थस्याभिप्रायः	१५६	९२२९
१) उक्तार्थेन विशेषान्विताभिधानपक्षस्यापि परास्तत्वम्	१५६	९२२९
२) अभिहितान्वयादिपक्षाणां त्याज्यत्वेन सर्वशब्दानां सामान्येनान्वितस्वार्थवाचकत्वमेव	१५६	९२२९
इ) एतदधिकरणीयसाक्षात्प्रतिपाद्यार्थोपसंहारः	१५७	९२३१
ई) एतदधिकरणीयानुषङ्गिकार्थोपसंहारः	१५८	९२३१

परानन्दा(परमता)धिकरणम् ।। ३-२-१६-३२ तः ३४ ।।	१५९-१६२	९२३२-९२४०
अ) ईशगुणानां लौकिकगुणाद्वैलक्षण्यम्	१५९	९२३२
१) ईश्वरीयसर्वगुणानामीश्वरेणाभेदः, सर्वलौकिकगुणाद्वैलक्षण्यम्, सर्वगुणात्मत्वम्, सर्वकर्तृत्वम्, सविशेषत्वञ्च	१५९	९२३२
आ) उक्तार्थे बाधकपरिहारः	१६०-१६१	९२३५-९२३९
१) ईश्वरगतलोकविलक्षणगुणानां लौकिकगुणवाचकपदवाच्यत्वेऽनुपपत्तिपरिहारः	१६०	९२३५
क) विद्वद्व्युत्पत्तिबलात्तत्तच्छब्दप्रयोगस्य साधुत्वम्	१६०	९२३५
ख) अविदुषां विद्वदुपदेशबलाद्व्युत्पत्त्युपपत्तिः	१६०	९२३५
ग) अलौकिके विषये लौकिकसादृश्येनोपदेशयोगः	१६०	९२३५
घ) किञ्चित्सादृश्येऽपि निरुपाधिप्रियत्वादिवैलक्षण्यस्य सत्त्वात्पूर्वोत्तरविरोधाभावः	१६०	९२३५
२) विलक्षणगुणेषु विलक्षणशब्दप्रयोगाभावकारणकथनम्	१६१	९२३८
इ) 'अरूपाधिकरण'द्यधिकरणानामपव्याख्यानस्यात्र निराकरणाभावे 'न स्थान(तोऽप्य)भेदाधिकरणे तत्कृतत्वप्रदर्शनम्	१६२	९२३९
फलदानाधिकरणम् ।। ३-२-२०-३९ तः ४२ ।।	१६३-१६९	९२४१-९२५०
अ) प्राणिनां स्वर्गनरकादिफलमीश्वरादेव भवतीति श्रुत्युपपत्तिभ्यामुपपादितार्थे आक्षेपस्तत्परिहारश्च	१६३	९२४१
१) 'धर्मं जैमिनिरि'त्यादिसूत्रोक्ताक्षेपपरिहारकतयोक्ते 'पूर्वं तु'इत्यादिसूत्रोक्तसमाधाने शङ्कापरिहारत्वेन सौत्र'पूर्व'पदव्याख्यानम्	१६३-१६८	९२४१-९२४८
क) 'धर्मं जैमिनिरि'त्यादिसूत्रोक्ताक्षेपप्रदर्शनम्	१६३	९२४१
ख) तदाक्षेपपरिहारकतयोक्त'पूर्वं तु'इत्यादिसूत्रोक्तसमाधानप्रदर्शनम्	१६४	९२४३
ग) तदाक्षेपसमाधानोत्थशङ्कानिवारकतया सौत्र'पूर्व'पदव्याख्यानम्	१६५-१६७	९२४३-९२४६
१) उक्त'पूर्व'पदार्थविवरकतया कर्मस्वरूपप्रपञ्चनम्	१६६	९२४४
२) एवंविधकर्मणां दर्शनादिमत्त्वादीशशक्तेरुत्तमत्वम्	१६७	९२४६
३) कर्मणामेवंविधत्वे प्रमाणोदाहरणम्	१६८	९२४६
आ) पादार्थोपसंहारः	१६९	९२४९-९२५०

।। इति तृतीयेऽध्याये द्वितीयः पादः ।। ३ - २ ।।

* * *

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

अथ तृतीयाध्याये द्वितीयपादे

॥ पराभिध्यानाधिकरणम् ॥

ब्र०सू०— ॐ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॐ ॥ ३-२-२-५ ॥

॥ अथ 'ईशेच्छया'इत्याद्यनुव्याख्यानस्य सप्रयोजनं 'पराभिध्यानात्'इत्यादिसूत्रतात्पर्यकथनपरतयाऽवतरणं विवरणञ्च ॥

१ सु०— परकृतस्य अपव्याख्यानतां प्रतिपादयितुं पराभिध्यानादिति सूत्रतात्पर्यमाह ईशेति ।

अनु०— ईशेच्छयाऽन्तर्दधाति

'सन्ध्यमि'ति शेषः ।

न केवलं स्वप्नः किन्तु तत्तिरोधानमपीश्वरेच्छाधीनमित्येष एवार्थोऽनेन सूत्रेणोच्यते, नान्यः; जीवस्येश्वरांशताया अप्रामाणिकत्वस्य द्वितीयेऽभिहितत्वात् । न च ज्ञानैश्वर्यशक्ती ब्रह्मणस्तात्त्विकतया परेणाङ्गीकृते । किञ्च देहयोगात्तिरोहितमित्येतावताऽलम्,

अन्यदसङ्गतमेव । किञ्च देहयोगश्चेत्तिरोधान(एव)हेतुस्तदा सुप्तिप्रलययोराविर्भावः स्यात् । अविद्याद्युपलक्षणमेतदिति चे(देतदपि त)त् अथ तथैव किं नोक्तमित्यास्तां विस्तरः ।

यदि स्वप्नोऽन्तर्धत्ते कथं तर्हि पुनस्तत्प्रतीतिरित्यत आह व्यज्यते चेति ।

व्यज्यते च पुनस्तया ।

एतेन परकीयं बाधकथनं निरस्तम् ।

परि०— नान्य इति । जीवस्य ब्रह्माभेदेऽपि ज्ञानैश्वर्यसामर्थ्यं तिरोहितमित्यादिरूपोऽर्थो नेत्यर्थः । **ईश्वरांशतायाः** ईश्वरस्वरूपांशतायाः 'अंशो नानाव्यपदेशात्' इत्यत्र अप्रामाणिकत्व-स्याभिधानादिति भावः । ब्रह्मणोऽपि ज्ञानादिशक्तिर्न वास्तवी । येन तदभिन्नजीवस्यापि तदाशङ्क्य तिरोधानं ब्रूयादित्याह **न च ज्ञानैश्वर्येति** । सोऽपि ज्ञानादितिरस्कारोऽपि जीवस्य देहयोगादेवेति परेण सूत्रार्थकथनात् तत्रोपयुक्तांशमुक्त्वा अन्यदयुक्तमित्याह **किञ्च देहेति** ॥ **बाधककथनमिति** । स्वप्ने दृष्टं वस्तु क्षणेनान्यथोपलभ्यत इति बाधककथनमित्यर्थः ।

गु०दी०— सुप्तिप्रलययोराविर्भाव इत्यस्य ज्ञानैश्वर्यशक्त्योराविर्भावः स्यादित्यर्थः । **एतेन परकीय-बाधकथनमि**त्यत्र **एतेन** स्वाप्नपदार्थानां पुनःपुनरनुवर्तिनेत्यर्थः ।

यादु०— ईश्वरांशताया इति । ईश्वरस्वरूपांशताया इत्यर्थः ॥ **अभिहितत्वादिति** । अंशाधिकरण इति शेषः ॥ **एतेन परकीयं बाधकथनमिति** । ईशेच्छया तथा तथा वासना परिणमत इत्यस्यार्थस्यात्र विवक्षितत्वेन 'रथोऽयमिति हि कदाचित्स्वप्ने निर्धारित' इत्यादि परकीयं बाधकथनं निरस्तमित्यर्थः ॥

वं०प०— 'नन्वग्नेरंशस्ये'त्यादिनोक्तमर्थं दूषयति **जीवस्येति** ॥ **द्वितीय इति** । द्वितीयाध्याये 'अंशो नाने'त्यत्रेत्यर्थः । **अन्यत्** सोऽपीत्येतत् ॥ **तिरोधानेति** । ज्ञानैश्वर्यादितिरोधानेत्यर्थः ॥ **स्यादिति** । तिरोधानहेतोर्देहयोगस्य तदानीमभावादिति भावः ॥ **अविद्येति** । सूत्रे देहपदमविद्यारूपप्रतिबन्धकपरम् । तथा च सुप्तिप्रलययोरविद्यारूपप्रतिबन्धकस्य सत्त्वात्तदा नाविर्भाव इत्यर्थः ॥ **तथैवेति** । अविद्यायोगाद्वासोऽपीत्येव कुतो नोक्तमित्यर्थः ।

शे०चं०— ईश्वरांशताया इति । ईश्वरेण भिन्नाभिन्नत्वरूपतदंशताया इत्यर्थः ॥ **द्वितीय इति** । (द्वितीयेऽध्याये) अंशाधिकरणे 'भेदस्य मुक्तौ वचनादपि तत्पक्षनिग्रहः' इत्यादिनेति शेषः ॥ **न चेति** ।

नापीत्यर्थः ॥ **परेणेति** । तत्त्वतो निर्धर्मकब्रह्मवादिनेत्यर्थः । सोपाधिकत्वेन निरुपाधिकब्रह्मस्वरूपताया असम्भवादतिरेके च तात्त्विकाद्वैतभङ्गप्रसङ्गादिति भावः ॥ **एतावताऽलमिति** । तावतैव त्वदुपवर्णितपूर्वपक्षनिरासादिति भावः । **अन्यदिति** । पूर्वसूत्रे पराभिध्यानादित्यादेरुत्तरसूत्रेऽपि वासोऽपीत्यस्य प्रकृतेन सङ्गत्यभावादित्यर्थः । किञ्च देहसम्बन्धमात्रं तिरोधानहेतुरभिमानो वा । नाद्यः । यथा कथञ्चिद्देहसम्बन्धस्य सर्वदा सत्त्वेन कदाऽप्याविर्भावाभावप्रसङ्गादिति भावेन द्वितीयं दूषयति **किञ्चेति** । **देहयोगः** देहाभिमानः । तत्र तिरोधानहेतोर्देहाभिमानस्याभावादिति भावः ॥ **तथैव किं नोक्तमिति** । तथा च स्वायत्तन्यायविरोध इति भावः । अस्वतन्त्रप्रयोगत्वान्न प्रयोजनापेक्षेत्यत आह **आस्तामिति** । तदर्थस्तु तथा सति स्वायत्तन्यायवार्तोच्छिद्येत । सर्वत्राप्यस्वतन्त्रप्रयोगत्वेन प्रयोजनापेक्षत्वस्य वक्तुं शक्यत्वादिति ॥ **एतेनेति** । पुनः पुनर्व्यक्तितिरोधानकथनेनेत्यर्थः । **बाधकथनं** (स्वप्ने दृष्टं क्षणेनान्यथोपलभ्यत इति बाधकथनमित्यर्थः) आद्यन्तयोर्व्यभिचारदर्शनादित्यादिनोक्तम् । अनेन तत्परिणामितामावेदयतीति वक्ष्यत इत्युक्तं विवृतं भवति ।

वा०र०— त्वदुपवर्णितेति । अनुवादावसरे नन्वग्नेरंशस्येत्यादिनोक्तेरित्यर्थः । **उक्तमिति** । यत्तूक्तं रथोऽयमित्यादि तत्परिणामितामेवावेदयति न बाधमिति वक्ष्यत इति मूले उक्तमित्यर्थः ।

स०व्र०— अन्यदसङ्गतमिति । पूर्वसूत्रे पराभिध्यानादित्यस्य उत्तरसूत्रे वासोऽपीत्यस्य प्रकृते सङ्गतेरभावादिति भावः । तथा च 'देहयोगात्तिरोहितमि'त्येव सूत्रं कर्तव्यमिति भावः । किञ्च, देहसम्बन्धमात्रं तिरोधानहेतुरुत देहाभिमानः । नाद्यः, यथाकथञ्चित् सम्बन्धमात्रस्य सर्वदा सत्त्वेन कदाप्याविर्भावो न स्यात् । नान्त्य इत्याह **किञ्चेति** । **देहयोगः** देहाभिमानयोगः । **एतेनेति** । व्यक्तितिरोधानकथनेनेत्यर्थः । **बाधकथनं** आद्यन्तयोर्व्यभिचारदर्शनादित्यादिनोक्तम् । अनेन तत्परिणामितामावेदयतीति वक्ष्यत इत्युक्तं विवृतं भवति ॥

॥ इति 'ईशेच्छया'इत्याद्यनुव्याख्यानस्य सप्रयोजनं 'पराभिध्यानात्'-इत्यादिसूत्रतात्पर्यकथनपरतयाऽवतरणं विवरणञ्च ॥

* * *

॥ अथ 'सृष्ट्वैव वासनाभिश्च'इत्याद्यनुव्याख्यानस्य सप्रयोजनमेतत्पादीयप्रथमद्वितीयेत्यधिकरणद्वयार्थोपसंहारकतयाऽवतरणं विवरणञ्च ॥

२ **सु०— व्यक्तिस्तिरोधानं च न ज्ञायत इत्यतोऽधिकरणद्वयार्थमुपसंहरति सृष्ट्वैवेति** ।

अनु०— सृष्ट्वैव वासनाभिश्च प्रपञ्चं स्वाप्नमीश्वरः ।
वासनामात्रतां तस्य नीत्वाऽन्तर्धापयत्यजः ॥

'एव'शब्देनारोपं वारयति । 'दर्शयित्वे'त्यपि द्रष्टव्यम् । **तस्य च वासनामात्रतां नीत्वा** कृत्वा । अन्यथा द्वितीया स्यात् । **अन्तर्धापयति** अदर्शनं गमयति । **तस्य** जीवस्य वासनाभिरिति वा ॥ तस्यान्तर्धापयतीति वा ॥ ३-२-२ ॥

परि०— नीत्वेत्यनुवादेनार्थमाह **कृत्वेति** । धातूनामनेकार्थत्वादिति भावः । कुत एवं व्याख्येत्यत आह **अन्यथेति** । प्रापणार्थत्वे 'णीञ् प्रापणे' इत्यस्य द्विकर्मकत्वात् सुषुप्त्यादीन् जीवं नयतीत्युत्तरवाक्य इव वासनामात्रतां नीत्वेति द्वितीया स्यात्, तस्येति षष्ठी न स्यादित्यर्थः । नयतेः कृत्यर्थत्वाप्रसिद्धेः प्रकारान्तरेण द्वेधा योजयति **तस्य जीवस्येति** ॥

गु०दी०— **अन्यथा द्वितीया स्या**दित्यत्र 'नीञ् प्रापण' इति धातोः द्विकर्मकत्वात्तस्येति न स्यात् किन्तु तं स्वाप्रमित्येव स्यादित्यर्थः ॥ ३ ॥ २ । २, ३, ४, ५, ६ ॥

यादु०— नीत्वा कृत्वेति । धातूनामनेकार्थत्वादिति भावः ॥ **अन्यथेति** । प्रापणार्थत्व इत्यर्थः । प्रापणार्थस्य नयतेर्यत्कर्म तद्युक्तस्याप्यकथितं चेत्यनेन कर्मसंज्ञायां कर्मणि द्वितीयेत्यनेन द्वितीयाया विहितत्वात् । 'द्वारकामनयद्बन्धूनि'त्यादौ द्वारकादिशब्द इवात्रापि तं वासनामात्रतां नीत्वेति तच्छब्दे द्वितीया स्यादिति भावः ॥ **तस्य जीवस्येत्यादि** । अत्र नयतिः प्रापणार्थ एव । प्रपञ्चमित्यस्यावृत्तिः । तस्यैवाकथितं चेत्यनेन कर्मसंज्ञा, न तच्छब्दस्य, कर्मयोगाभावात् । तथा च प्रपञ्चं वासनामात्रतां नीत्वेति द्विकर्मता तस्योपपद्यत एवेति भावः ॥ ३-२-२ ॥

वं०प०— न ज्ञायते व्यक्तितिरोधानशब्दार्थो न ज्ञायत इत्यर्थः ॥ **अन्यथेति** । नयतेः प्रापणार्थत्वे 'द्वारकामनयद्बन्धून् । अजां ग्राममनयदि'त्यादाविवात्रापि तं वासनामात्रतां नीत्वेति द्विकर्मकतापत्त्या तच्छब्दे द्वितीया स्यान्न षष्ठीत्याशयः ॥ ३-२-२ ॥

शे०चं०— (न ज्ञायते व्यक्तितिरोधानशब्दार्थो न ज्ञायते) ॥ **नीत्वा कृत्वेति** । धातूनामनेकार्थत्वादिति भावः । कुतोऽत्र प्रसिद्धार्थपरित्याग इत्यत आह **अन्यथेति** । प्रापणार्थत्व इत्यर्थः । प्रापणार्थस्य नयतेः यत्कर्म तद्युक्तस्यापि 'अकथितं चे'त्यनेन कर्मसंज्ञाविधानेन 'द्वारकामनयद्बन्धूनि'त्यादाविव उभयत्रापि द्वितीयावश्यम्भावात् तं वासनामात्रतां नीत्वेति तच्छब्देऽपि द्वितीयाप्रसङ्गादिति भावः । नयतेः प्रापणार्थत्वेऽपि न तच्छब्दे द्वितीयाप्रसङ्गः । तस्य वासनाभिरित्यादिपदान्तरेणैव सम्बन्धाभ्युपगमेन नयतिकर्मयोगाभावेनाकथितं चेत्यनेन कर्मत्वाप्रसङ्गात् । न च द्विकर्मकत्वानुपपत्तिः । प्रपञ्चं वासनामात्रतां नीत्वेति प्रपञ्चमित्यस्यावृत्त्याश्रयणेन तदुपपत्तिरित्याशयेनाह **तस्य जीवस्य वासनाभिरिति वेति** । अत्र पक्षे तस्येत्यस्यातिव्यवहितान्वयो भवतीत्यपरितोषात्सन्निहितान्वयमेवाश्रित्यापि द्वितीयाप्रसङ्गं परिहरति **तस्यान्तर्धापयतीति वेति** ॥ ३-२-२ ॥

वा०र०— अनेकार्थत्वादितीति। 'क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः। प्रयोगतोऽनुगन्तव्या अनेकार्था हि धातव' इत्युक्तेरिति भावः। **द्वितीयाप्रसङ्गादितीति**। ततश्च तस्येति षष्ठ्यनुपपत्तेरिति भावः। **तस्येति**। तच्छब्दस्येत्यर्थः। **नयतिकर्मयोगेति**। नयतेर्यत्कर्म वासनामात्रत्वं तद्योगाभावेनेत्यर्थः। द्वितीयाप्रसङ्गं परिहरतीति प्राचीनपक्षे तस्येत्यस्य वासनाभिरित्यनेन सम्बन्धमुपादाय नयतिकर्मयोगाभाव उक्तः। अत्र च अन्तर्भापयतीति पदान्तरेण सम्बन्धमुपादाय तदभाव उच्यते। द्विकर्मत्वाभावादिकं तु प्रागुक्तरीत्यैवेति स्पष्टमिति तदनुक्तिर्न दोषायेति ज्ञेयम्।

स०व्र०— अन्यथेति। प्रापणार्थकत्वे तस्मिन्नर्थे तस्य द्विकर्मकत्वेन तस्येत्यत्र द्वितीया स्यादिति भावः॥ ३-२-२॥

॥ इति 'सृष्ट्वैव वासनाभिश्र'इत्याद्यनुव्याख्यानस्य सप्रयोजनमेतत्पादीयप्रथमद्वितीयेत्यधिकरणद्वयार्थोपसंहारकतयाऽवतरणं विवरणञ्च ॥

॥ इति पराभिध्यानाधिकरणम् ॥

(३-२-२-५)

★ ★ ★

॥ अथ सुषुप्ति-बोध-मोहाधिकरणानि ॥

॥ ३-२-४,५,७-७,८,१० ॥

॥ अथ तत्र 'सुपिप्तिबोधमोहाँश्च'इत्याद्यनुव्याख्यानस्य सप्रयोजनं चतुर्थपञ्चमसप्तमेत्यधिकरणत्रयतात्पर्यकथकतया अवतरणं विवरणञ्च ॥

ब्र०सू०— ॐ तदभावो नाडीषु तच्छ्रुतेरात्मनि ह ॐ ॥ ७ ॥
ॐ अतः प्रबोधोऽस्मात् ॐ ॥ ८ ॥
ॐ मुग्धेऽर्धसम्पत्तिः परिशेषात् ॐ ॥ १० ॥

३ सु०— अत्र यज्जीवब्रह्मणोरेकत्वं परेण वर्णितं तत्सूत्राक्षराप्रतीतं तद्विरुद्धं चोपेक्षणीयमेवेति ज्ञापयितुमधिकरणत्रयस्य तात्पर्यमाह **सुषुप्तीति** ।

अनु०— सुषुप्तिबोधमोहांश्च स्ववशस्तद्वशं सदा ।
जीवं नयति जीवेशो .... ॥

सुषुप्तिबोधादेः कारणान्तरदर्शनात् कथमेतदित्यत उक्तं **स्ववशस्तद्वशमिति** । स्वतन्त्रोऽपीश्वरो लीलया तानि कारणान्युपादाय जीवं तद्वशतां नीत्वा सुषुप्त्यादिकं प्रापयतीत्यर्थः । एतच्च भाष्यादौ स्पष्टम् ॥ ३-२-४,५,७ ॥

परि०— **अत्र यज्जीवब्रह्मणोरेकत्वमिति** । **तदभावः** प्रकृतस्वप्रदर्शनाभावः सुषुप्तिरिति यावत् । **नाडीष्वात्मनि** नाडीद्वारा आत्मनि । 'पुरीतति शेते' इत्यादिश्रुतेः ॥ 'अतः प्रबोधोऽस्मात्' यत आत्मनि सुप्तिः अतः कारणादस्मादेव प्रबोधः ॥ मुग्धे मोहेऽर्धसम्पत्तिः आत्मनीति सूत्रार्थानुक्त्वा आत्मनि सम्पत्तिस्तदैक्यमेव जीवस्येति वर्णितमित्यर्थः ॥ **सूत्राक्षराप्रतीतमिति** । ऐक्याप्रतीतिः व्यक्तैव, विरुद्धत्वं तु आधाराधेयभावादिकथनादिति भावः ॥ **कारणान्तरेति** । कालादिरूपकारणान्तरेत्यर्थः ॥

यादु०— अत्र यज्जीवब्रह्मणोरेकत्वमिति । तदभावो नाडीष्वित्यादिसूत्रजातं परेणैवं व्याख्यातम्— तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानाति । आसु तदा नाडीषु सुप्तो भवतीति क्वचिच्छ्रूयते । अन्यत्र तु नाडीरनुक्रम्य श्रूयते । ताभिः प्रत्यवसृप्य पुरीतति शेत इति । तथाऽन्यत्र सता सोम्य तदा सम्पन्नो भवतीत्यादि । तत्र संशयः । किमेतानि नाड्यादीनि परस्परनिरपेक्षया भिन्नानि सुप्तिस्थानानि । आहोस्वित्परस्परापेक्षयैकं सुप्तिस्थानमिति । तत्र परस्परनिरपेक्षतया भिन्नान्येवैतानि स्थानानि सुषुप्तिरूपैकार्थत्वात् । न ह्येकार्थानां व्रीहियवादीनां क्वचित्परस्परापेक्षत्वं दृश्यते । नाड्यादीनां त्वेकार्थता सुषुप्तौ दृश्यते । नाडीषु सुप्तो भवति, पुरीतति शेते, सति सम्पद्य न विदुरिति तत्र तत्र सप्तमीनिर्देशसाम्यात् । तथा च व्रीहियवादिवद्विकल्प एव सुप्तिस्थानानामिति पूर्वः पक्षः । सिद्धान्तस्तु— नित्यवदाम्नातानां यत्पाक्षिकत्वं तद्गत्यन्तराभावे कल्प्यम् । यथाऽऽहुः । 'एवमेषोऽष्टदोषोऽपि यद्व्रीहियववाक्ययोः । विकल्प आश्रितस्तत्र गतिरन्या न विद्यत' इति । न च प्रकृते गत्यन्तरासम्भवः । समुच्चयेऽपि तथोक्तिसम्भवात् । प्रासादे शेते, पर्यङ्के शेत इत्यादौ समुच्चितानामप्येकविभक्तिनिर्देशस्य दर्शनात् । तथेहापि नाडीषु पुरीतति ब्रह्मणि च स्वपितीत्युपपद्यते समुच्चयः । न च समुच्चये कथमेकस्यानेकस्थानेषु सुप्तिः । नाड्यादिद्वारा ब्रह्म सम्पद्यत इत्यङ्गीकारात् । ततश्चायं सूत्रार्थः । तदभावस्तस्य प्रकृतस्य स्वप्नदर्शनस्याभावः । सुषुप्तं नाडीष्वात्मनि चेति समुच्चयः । कुतस्तच्छ्रुतेः । तथाहि सर्वेषामेव नाड्यादीनां तत्र तत्र सुप्तिस्थानत्वं श्रूयत इति । अतः प्रबोधोऽस्मात् यस्माच्चात्मैव सुप्तिस्थानमत एव कारणान्नित्यवदेवास्मादात्मनः प्रबोधः स्वापाधिकारे शिष्यते । कुत एतदागादित्यस्य प्रश्नस्य प्रतिवचनावसरे यथाऽग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणा इत्यादिना विकल्प्यमानेषु च सुप्तिस्थानेषु कदाचिन्नाडिभ्यः प्रतिबुध्यते कदाचित्पुरीततः कदाचिदात्मन इत्यशाशिष्यत् । तस्मादप्यात्मैव सुप्तिस्थानमिति व्याख्यातम्। 'मुग्धेऽर्धसंपत्तिः परिशेषात्' । चतस्रः खल्ववस्थाः प्रसिद्धाः। जागरणं सुषुप्तिः स्वप्नो मरणं चेति। न तु पञ्चमी काचिदवस्था श्रुत्यादौ प्रसिद्धाः । तस्माच्चतसृणामेवावस्थानामन्यतमा मूर्च्छेत्येवं प्राप्ते ब्रूमः । न तावन्मुग्धो जागरितावस्थो भवितुमर्हति । इन्द्रियैर्विषयेक्षणाभावात् । नापि स्वप्नावस्थो निस्संज्ञकत्वात् । नापि मृतः प्राणोष्मणोर्भावात् । नापि सुप्तः सुषुप्तिमोहयोः प्रयोजनकारणलक्षणानां विलक्षणत्वात् । श्रमापनुत्त्यर्था हि ब्रह्मसम्पत्तिः सुप्तिः । शरीरत्यागार्था तु ब्रह्मसम्पत्तिर्मोहः । श्रमादिनिमित्ता हि सुषुप्तिः । मुसलसम्पातादिनिमित्तो मोहः । प्रसन्नवदनत्वादिलक्षणा सुषुप्तिः । मुखनेत्रादिविकारलक्षणो मोह इति । तस्मात्परिशेषादर्धसम्पत्तिरेव मुग्धतेत्यवगच्छामः । निस्संज्ञकत्वात्सम्पन्नः । उक्तवैलक्षण्यादसम्पन्न इतीति । अत्र सूत्रत्रये जीवस्य ब्रह्मसम्पत्तिर्या परेण वर्णिता सा ब्रह्मैक्यरूपैव । 'ब्रह्माधारत्वमप्यस्य नाधाराधेयभेदाभिप्रायेणोच्यते । किं तर्हि तादात्म्याभिप्रायेणैवे'ति तेनोक्तत्वात् । भामत्यामपि 'जीवस्य ब्रह्मत्वमेव ब्रह्माधारत्वमि'त्युक्तत्वात् । अतः **अत्र यज्जीवब्रह्मणोरेकत्वं परेण वर्णितमि**त्येतदुपपद्यत इति ज्ञातव्यम् ।

तत्सूत्राक्षराप्रतीतमिति । ऐक्यवाचकपदाभावादिति भावः ॥ **तद्विरुद्धं चेति** । आद्यसूत्रे आधारत्वार्थकेनात्मनीत्यनेन, द्वितीयसूत्रे चावधित्वार्थकेनास्मादित्यनेन, तृतीयसूत्रे सम्बन्धबोधकेन सम्पत्तिशब्देन च

विरुद्धम् । तेषां भेदनियतत्वादित्यर्थः ॥ **सुप्तिप्रबोधादेरिति** । सुप्तितत्प्रबोधमोहानामित्यर्थः ॥ **कारणान्तरेति**। सुप्तिकारणस्य श्रमादेस्तत्प्रबोधकारणस्य भेरीताडनादेर्मोहकारणस्य मुसलताडनादेश्च दर्शनादित्यर्थः । ननु प्रतिज्ञामात्रेण कथं पूर्वपक्षोपमर्द इत्यत आह **एतच्च भाष्यादाविति** । आदिपदेन न्यायविवरणं ग्राह्यम् । पूर्वपक्ष्यभिप्रेतदर्शनरूपप्रमाणाच्छादकानि सूत्रसूचितानि प्रमाणानि भाष्ये न्यायविवरणे चाभिहितानीत्यर्थः ॥ ३-२-४ । ५ । ७ ॥

वं०प०— कारणान्तरेति । अतिश्रमभेरीताडनादिरूपेत्यर्थः ॥ ३-२-४ । ५ । ७ ॥

शे०चं०— अत्र यज्जीवब्रह्मणोरेकत्वं परेण वर्णितमिति । यद्यप्यासु तदा नाडीषु सुप्तो भवति, पुरीतति शेते, सति सम्पद्येति जीवस्य सुषुप्तिस्थानतया श्रुतानां नाडीपुरीतदात्मनां किं विकल्पः किंवा समुच्चय इति सन्देहे सर्वत्र सप्तमीश्रुत्या नाड्यादीनामेकनिलयनार्थत्वसिद्धेरेकार्थानां च व्रीह्यादीनां 'एकार्थस्तु विकल्पेरन्' इत्यधिकरणे विकल्पस्य निश्चितत्वादेकार्थानां नाड्यादीनामपि विकल्पेन कदाचित्किञ्चित्स्थानं जीवः स्वापायोपसर्पतीत्येवं प्राप्ते 'एवमेषोऽष्टदोषोऽपि यद् व्रीहियववाक्ययोः । विकल्प आश्रितस्तत्र गतिरन्या न विद्यते' इत्युक्तरीत्या नित्यवदाम्नातानां पाक्षिकत्वस्यागतिकगतित्वेन समुच्चयासम्भव एव कल्प्यत्वात् । प्रासादे शेते, पर्यङ्के शेते इत्येवमादिषु समुच्चयेऽप्येकविभक्तिनिर्देशदर्शनेन तन्मात्रेणैकार्थत्वासिद्धेर्नाड्यादिद्वारा ब्रह्मसम्पत्त्यभ्युपगमेन गङ्गया सागरं गच्छतो गङ्गायामपि गतत्ववन्नाडीद्वारा ब्रह्मोपसर्पतोऽपि नाडीषु सुप्तत्वावश्यम्भावात् । समुच्चयेऽप्येकस्य नाड्यादिरूपानेकस्थानेषु सुप्तिसम्भवात् स्थानतया श्रुतानां नाड्यादीनां समुच्चय इत्याद्यसूत्रे निष्टङ्कितम् । तथा द्वितीयेऽपि कुत एतदागादित्यस्य प्रश्नस्य प्रतिवचनावसरे नाड्यादीनां विकल्पेन सुप्तिस्थानत्वात् । कदाचिन्नाडीभ्यः प्रतिबुद्ध्यते कदाचित्पुरीततः कदाचिदात्मन इत्येव वक्तव्यतया 'यथाऽग्नेः क्षुद्रा विष्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणा' इत्यादिना नित्यवदेवास्मादात्मनः प्रबोधस्य स्वापाधिकारेऽवक्तव्यत्वापत्त्या तदुक्त्यन्यथाऽनुपपत्त्या सुषुप्तिस्थानानां समुच्चय एवेति निष्टङ्कितम् । तृतीये तु जागरणं सुप्तिः मरणं चेति चतसृणामेवावस्थानां श्रुतिप्रसिद्धत्वात् तद्विरोधेन मूर्च्छाया अवस्थाचतुष्टयभिन्नावस्थात्वानुपपत्तेश्चतसृणामेवावस्थानामन्यतमा मूर्च्छेति प्राप्ते, इन्द्रियैर्विषयेक्षणाभावान्मूर्च्छाया जागरावस्थात्वस्य, निःसंज्ञकत्वेन स्वप्नावस्थात्वस्य, प्राणोष्मणोर्भावान्मरणावरणावस्थात्वस्य, सुषुप्तिप्रयोजनकारणलक्षणविलक्षणप्रयोजनकारणलक्षणवत्त्वात् मोहस्य सुषुप्त्यवस्थात्वस्य चासम्भवात् पञ्चम्येवावस्था मूर्च्छेति सिद्धान्तितम् । न तु जीवब्रह्मणोरेकत्वं सूत्रत्रये व्युत्पादितमिति तथोक्तिरयुक्तेत्यापाततो भवति । तथापि 'ब्रह्माधारत्वमस्य नाधाराधेयभेदाभिप्रायेणोच्यते । किं तर्हि तादात्म्याभिप्रायेणैवे'ति भाष्यवचनात् 'जीवस्य ब्रह्मत्वमेव ब्रह्माधारत्वमि'ति भामतीवचनाच्चात्र वर्णिताया ब्रह्मसंपत्तेर्ब्रह्मैक्यरूपत्वस्थित्या तथोक्तिरिति द्रष्टव्यम् ।

सूत्राक्षराप्रतीतमिति । सूत्रे तद्वाचकशब्दाभावादिति भावः ॥ **तद्विरुद्धं चेति** । आद्ये आधारत्वार्थकिनात्मनीत्यनेन, द्वितीये चापादनत्वार्थकिनास्मादित्यनेन, तृतीये च सम्बन्धबोधकेन सम्पत्तिशब्देन विरुद्धम् ।

तेषां भेदाविनाभूतार्थप्रतिपादकतया भेदप्रत्यायकत्वादिति भावः । सुप्तिप्रबोधादेरित्यादिपदेन मोहपरिग्रहः ॥ **कारणान्तरेति** । सुप्तिकारणस्य श्रमादेः प्रबोधकारणस्य भेरीताडनादेः मूर्च्छाकारणस्य मुसलताडनादेः दर्शनादित्यर्थः । ननु न प्रमाणेन विनोक्तिमात्रेणार्थसिद्धिरित्यतः पूर्वपक्ष्यभिप्रेतदर्शनरूपप्रमाणाच्छादकानि 'एष एव सुप्तं प्रबोधयति । एतस्माज्जीव उत्तिष्ठति एष प्रमाता एष परमः', 'मूर्च्छा प्रबोधनं चैव यत एव प्रवर्तते । स ईशः परमो ज्ञेयः परमानन्दलक्षण' इति सूत्रसूचितप्रमाणानां भाष्यन्यायविवरणादावुदाहृतत्वान्नेदं प्रतिज्ञामात्रमित्याशयवानाह **एतच्च भाष्यादाविति** ॥ ३-२-४ । ५ । ७ ॥

वा०र०— तदभावो नाडिष्वित्येतत्सूत्रीय 'तत्रैताः सुषुप्तिविषयाः श्रुतयो भवन्ती'त्यादि शाङ्करभाष्यं 'इह हि नाडीपुरीतत्परमात्मानौ जीवस्य सुषुप्तावस्थायां स्थानत्वेन श्रूयन्ते । तत्र किमेतेषां स्थानानां विकल्पः आहो समुच्चयः' इत्यादि भामती च मनसि निधाय अधिकरणशरीरं सङ्गृह्णाह **आसु नाडिषु सुप्त इत्यादिना। नाडीपुरीतदात्मनामिति** । नाडी च पुरीतच्च आत्मा चेति तेषामित्यर्थः । यथा निरपेक्षा व्रीहियवा इत्यादि भामत्या सूचितमधिकरणसूत्रं स्वयं दर्शितम् । **एकार्थस्तु विकल्पेरन्नित्यधिकरण इति । एवमेवाष्टदोषोऽपीति** । अयमत्र कल्पतरुपरिमलोक्तरीत्या गुरुराजोक्तो दोषविवेकः । प्रथमं व्रीह्यनुष्ठानपक्षे यवशास्त्रस्य प्रतीतप्रामाण्यत्यागः, अप्रतीताप्रामाण्यस्वीकार इति दोषद्वयम् । तथा तत्रैव द्वितीये प्रयोगे यदा यवानुष्ठानं तदा यवशास्त्रस्य प्राक् स्वीकृताप्रामाण्यत्यागः, परित्यक्तप्रामाण्योपादानमिति दोषद्वयम् । तत्रैव प्रयोगे व्रीहिशास्त्रे स्वीकृतप्रामाण्यत्यागः, परित्यक्तप्रामाण्योपादानमिति प्रयोगद्वयं मिलित्वा दोषषट्कम् । पुनस्तृतीयप्रयोगे व्रीह्युपादाने व्रीहिशास्त्रस्य स्वीकृताप्रामाण्यत्यागः, परित्यक्तप्रामाण्यस्वीकार इति प्रयोगत्रयाश्रयणेन व्रीहिशास्त्रे चत्वारो दोषाः यवशास्त्रे चत्वारो दोषाः । इत्येवमष्टदोषदुष्टो विकल्प इत्यर्थ इति । ननु प्रामाण्यपरित्यागो नाम प्रामाण्याभावस्वीकार एव । अन्यानिर्वचनात् । अप्रामाण्यस्वीकारोऽपि स एव । निर्दोषे वेदे विपर्यासरूपाप्रमितिजनकत्वासम्भवेन अप्रामाण्यस्वीकार इत्यत्र अप्रामाण्यशब्दस्य प्रामाण्यभावपरत्वात् । तथा च आद्ययोर्दोषयोर्न भेद इति चेन्न । उभयत्रापि प्रामाण्याभावस्वीकार एव पर्यवसितो दोषः । तस्य च दोषत्वबीजं द्विविधम् । प्रामाण्यस्य निर्दोषत्वादेः असद्भावरूपं, प्रामाण्यभावे प्रमाणस्य प्रामाण्यानुपलम्भस्याभावरूपं चेति । एवं च भावप्रमाणसद्भावोपाधिकतया स आद्यो दोषः, अभावप्रमाणाभावोपाधिकतया स एव द्वितीयो दोष इति उपाधिभेदेन दोषद्वैविध्यं विवक्षितम् । तदेतत् 'प्रमाणं त्वप्रतीतं यदुज्ज्वलं तदपह्नुतम् । एकस्तावदयं दोषः स्यात्प्रमाणविपर्ययात् । तथा तदप्रमाणत्वं यदभावप्रमाणकम् । भावे सत्यप्यभावेन विनैव परिकल्प्यते' इति वार्तिके स्पष्टम् । अत्राद्यश्लोके प्रमाणविपर्ययादित्यनेन प्रामाण्यसद्भावविषयकप्रमाणाविरोधादित्यर्थकेन भावप्रमाणसद्भावमूलकं प्रामाण्याभावस्वीकारस्य दोषत्वं दर्शितम् । द्वितीयश्लोकेन तु अभावप्रमाणभावमूलकं तद्दोषत्वं दर्शितम् । तच्छ्लोकस्य हि अयमर्थः । यथा प्रामाण्यपरित्यागो दोषः तथा तदप्रमाणत्वमपि दोषः । **यत्** यस्मात् हेतोः । अभावप्रमाणकं प्रामाण्यानुपलब्धिरूपाभावप्रमाणग्राह्यं प्रामाण्याभावरूपमप्रमाणत्वम् । भावे सत्यपि प्रामाण्योपलम्भरूपे भावे विद्यमानेऽपि तस्याभावेन विनैव कल्प्यते । ततो हेतोर्द्वितीयदोष इति ।

नाडीपुरीतत्परमात्मसु स्वापविकल्पे इत्यङ्गीकारेऽष्टदोषोपपादनं विस्तरेण भामत्यादौ कृतमस्ति । सामान्येन मिथ्यात्वश्रुतिनिरासे न्यायामृततरङ्गिण्यां च । **समुच्चयेऽपीति** । उपलक्षणं चैतत् । नानार्थेष्वित्यपि द्रष्टव्यम् । नानार्थत्वसमुच्चययोरपीति भाष्योक्तेः । एकार्थत्वस्य निराकार्यत्वेन प्रसक्तत्वाच्च । **एकार्थत्वासिद्धेरिति** । नाडीपुरीतति सतीति च सप्तमीनिर्देशस्य तुल्यत्वेन खलु स्वापरूपैकार्थत्वमानीय व्रीहियववद्विकल्प आश्रयणीयः । न च प्रकृते तुल्यत्वेऽप्येकार्थमायाति । सप्तमीनिर्देशे समानेऽपि प्रासादे शेते पर्यङ्के शेते इत्यादौ शयनार्थपर्यङ्कावस्थानार्थमेव प्रासादस्यापेक्षणेन शयनार्थत्वस्य प्रसादेऽभावेनैकार्थत्वाभावेन सप्तमीनिर्देशस्य व्यभिचारित्वेन तेनैकार्थत्वासिद्धेरित्यर्थः । **द्वितीयेऽपीति** । अतः प्रबोध इति द्वितीयसूत्रेऽपीत्यर्थः । भाष्यमात्रमनुसृत्याह **कुत एतदित्यादि** । सुषुप्तमुत्थाप्यागमनावपि गार्ग्यं प्रत्यजातशत्रुणा पृष्टः कुत एतदागादिति । **एतदागमनं कुतः** आगमनं कुतः कृतवानित्यर्थः । **विकल्पेन सुप्तिस्थानत्वादिति** । यदि विकल्पेन सुप्तिरुच्यते तर्हि तत एव कदाचिन्नाडीभ्य इत्यादेरेव वक्तव्यत्वापत्त्येत्यर्थः । **सर्वे प्राणा इत्यादिनेति** । उपलक्षणं चैतत् । 'सत आगम्य न विदुरि'त्यपि ग्राह्यम् । 'इत्यादिने'त्यनन्तरं 'सत आगम्ये'ति वाक्यस्य भाष्ये उदाहरणात् । **सुषुप्तिस्थानानां समुच्चय एवेति** । 'नित्यवदेवास्मादात्मन' इति पूर्वोपपादनानुसारेण 'तस्मादप्यात्मैव सुप्तिस्थानमि'ति भाष्यानुसारेण चात्मैव सुप्तिस्थानमित्येव फले कथनीये स्थानसमुच्चयाभिधानं पूर्वसूत्रनिर्णयानुसारेणात्मनः स्थानत्वं प्रतिपत्तव्यं न विस्मर्तव्यम् । परम्परया स्थानत्वस्यात्याज्यत्वात् । आत्मैवेति भाष्यमपि साक्षादित्यर्थकतया योज्यमिति ग्रन्थभावं प्रकटीकर्तुं फलतस्तु आत्मैव सुप्तिस्थानं इत्येवार्थ इति सन्तोष्टव्यम् । **तृतीय इति** । मुग्धेऽर्धसम्पत्तिरिति तृतीयसूत्रे । अस्ति मुग्धो नामेत्यादिभाष्यानुसारेण सङ्गृह्याह **जागरणं सुप्तिरित्यादि** । सुप्तिमोहयोरपि प्रयोजनभेदात् कारणभेदादित्यादि भामत्यनुसारेणाह **सुषुप्तिप्रयोजनेति** । **भाष्यवचनादिति** । तदभावो नाडीष्वितिसूत्रीयभाष्यवचनादित्यर्थः । उपपादितं च भाष्ये स्वरूपमापन्नः सुप्तो भवतीत्यर्थ इत्यादिनेति भावः ।

॥ इति 'सुषिप्तिबोधमोहाँश्च'इत्याद्यनुव्याख्यानस्य सप्रयोजनं चतुर्थपञ्चमसप्तमेत्यधिकरणत्रयतात्पर्यकथकतया अवतरणं विवरणञ्च ॥

॥ इति सुषुप्ति-बोध-मोहाधिकरणानि ॥

॥ ३-२-४,५,७-७,८,१० ॥

★ ★ ★

॥ अथ कर्मानुस्मृत्यधिकरणम् ॥
(३-२-६-९)

॥ अथ तत्र 'नान्यः कर्ताऽस्य कश्चन' इत्यनुव्याख्यानस्य सप्रयोजनं षष्ठाधिकरणतात्पर्यकथकतयाऽवतरणं विवरणश्च ॥

ब्र०सू०— ॐ स एव च कर्मानुस्मृतिशब्दविधिभ्यः ॐ ॥९॥

४ **सु०—** केचिदेवं व्याचक्षते 'सुषुप्तौ ब्रह्मसम्पन्नो य एव जीवः (किं) स एवोत्तिष्ठति उत अन्योऽपीति संशये महाजलनिधौ क्षिप्तस्योदबिन्दोरिव ब्रह्मणैकीभूतस्योद्धरणासम्भवादनियम इति प्राप्ते समाधीयते । स एवोत्तिष्ठति, यः सुप्तः । कुतः । कर्मशेषसमापनात्प्रत्यभिज्ञानाच्छब्देभ्यो विधिभ्यश्च । सुप्तस्य मुक्तत्वापत्त्या विध्यनुपपत्तेरि'ति, तदेतदपव्याख्यानमिति सूचनायाधिकरणतात्पर्यमाह **नान्य इति** ।

अनु०— .... नान्यः कर्ताऽस्य कश्चन ॥

स्वप्नादीनां परमेश्वरकृतत्वेऽभिहिते किं देशकालान्तरेऽन्योऽपि कर्ताऽस्त्युतेश्वर एवेति संशये, लौकिकेश्वराणां देशकालव्यवस्थयैश्वर्यदर्शनादयमपि तथाविध इति प्राप्ते, स एव **ईश्वरोऽस्य** स्वप्नादेः **कर्ता** न तु देशकालान्तरे**ऽन्यः कश्चने**त्येष एवार्थोऽत्र प्रतिपाद्यत इति । न हि यः सुप्तः स एवोत्तिष्ठत्यन्यो वेति कस्यचित्संशयोऽस्ति । न च सुप्तस्य ब्रह्मणैक्यं प्रमाणदृष्टमिष्टं वा परस्येति यत्किञ्चिदेतत् ।

परि०— तच्छब्दपरामृष्टं दर्शयति **यः सुप्त इति** ॥ **कर्मशेषेति** । पूर्वेद्युरुपक्रान्तकर्मणो यः शेषः तस्य परेद्युः समापनात्, योऽहं सुप्तः सोऽहं प्रबुद्ध इति प्रत्यभिज्ञानात्, 'प्रतिन्यायं प्रतियोन्या द्रवति बुद्धान्तायैवे'त्यादिशब्देभ्य इत्यर्थः । विधिभ्य इत्येतदस्फुटत्वाद्व्यनक्ति **सुप्तस्येति** । परोक्तं कुतोऽपव्याख्येत्यत आह **न हि यः सुप्त इति** ॥ **इष्टं वेति** । तथात्वे पुनरुत्थानायोगादिति भावः ।

यादु०— कर्मशेषसमापनादिति । यद्धि द्व्यहादिनिर्वर्तनीयमेकस्य पुंसश्चोदितं कर्म तस्य पूर्वेद्युरनुष्ठितस्य परेद्युः शेषसमापनादित्यर्थः । न ह्यनेन असमापितस्य कर्मणः शेषक्रियायामन्यः प्रवर्तितुमुत्सहतेऽतिप्रसङ्गादिति भावः ॥ **प्रत्यभिज्ञानादिति** । यः पूर्वेद्युः सुप्तः सोऽहमस्मीति प्रत्यभिज्ञानादित्यर्थः ॥ **शब्देभ्य इति** । स्वापप्रबोधाधिकारपठितेभ्यः 'पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव सर्वाः प्रजाः अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति त इह व्याघ्रो वा सिंहो वे'त्यादिशब्देभ्यश्चेत्यर्थः । अयनमायो, नियमेन गमनं न्यायः । जीवः प्रतिन्यायं सम्प्रसादे सुषुप्तावस्थायां बुद्धान्तायाद्रवति आगच्छति प्रतियोनि । यो हि व्याघ्रयोनिः सुषुप्तो बुद्धान्तमागच्छन् स व्याघ्र एव भवति न जात्यन्तरम् । तदिदमुक्तं त इह व्याघ्रो ह वा सिंहो वेत्यादीत्येतद्वाक्यार्थस्तत्पक्षे भामत्युक्तोऽवगन्तव्यः । विधिभ्य इत्युक्तं विवृणोति **सुप्तस्येति** । अयं भावः । अन्योत्थानपक्षे हि सुप्तमात्रो मुच्यत इत्यापन्नम् । एवं चेत्किं कालान्तरभाविफलकेन कर्मणा विद्यया वा । ततश्च अनर्थका एव कर्मविद्याविधयः स्युरिति ॥ **प्रमाणदृष्टमिष्टं वेति** । येनोक्तरीत्या पूर्वपक्षोत्थानमुपपन्नं स्यादिति भावः ।

वं०प०— केचित् रामानुजाः । **उत्तिष्ठति** बहिः पुनरागच्छति ॥ **उदबिन्दोरिवेति** । समुद्रे क्षिप्तो य उदबिन्दुः स एव पुनर्नागच्छति । अपि त्वन्यो यथेत्यर्थः । **अनियमः** स वाऽन्यो वेत्यर्थः । **समापनादिति** । तथा च कर्मशेषसमापनार्थं तस्यैवागमनमङ्गीकार्यम् । प्रत्यभिज्ञा तु योऽहं सुप्तः स एवाहमिदानीं जाग्रदस्मीत्येवंरूपा । अन्यस्यैव उत्थाने एवं प्रत्यभिज्ञा न युक्तेत्यर्थः । **शब्देभ्य इति** । स्वापात्प्रबोधप्रकरणे पठितेभ्यः 'प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्ताये'त्यादिशब्देभ्य इत्यर्थः । विधिभ्य इत्युक्तहेतुमुपपादयति **सुप्तस्येति** । यागादिना स्वर्गाद्यभिधायकानां विधीनामनुपपत्तिः । स्वर्गं गन्तुरभावात् । यागं कृत्वा सुप्तौ मुक्तत्वस्यैव प्राप्तेरिति भावः । ब्रह्मणैकीभूतस्योद्धरणासम्भवादित्युक्तपूर्वपक्षोत्थानमेवायुक्तमित्याह **न च सुप्तस्येति** । **परस्य** त्वत्पूर्वपक्षिणो मायावादिनः ॥ **इष्टं वेति** । सुप्त्यवस्थावतो जीवस्याविशिष्टत्वेन तस्य विशिष्टभूतप्रज्ञारूपब्रह्मैक्यं तन्मते नेष्टमित्यर्थः ।

शे०चं०— कर्मेति । यद्धि द्व्यहादिनिर्वर्तनीयमेकस्य पुंसश्चोदितं कर्म तस्य पूर्वेद्युरनुष्ठितस्य परेद्युः शेषानुष्ठानदर्शनादित्यर्थः । न ह्यन्येन समीकृतस्य कर्मणः शेषक्रियां निर्वर्तयितुमन्योऽर्हति । अतिप्रसङ्गात् । तस्मादेक एव द्व्यहादिनिर्वर्तनीयकर्मणः पूर्वेद्युरपरेद्युश्च कर्तेति गम्यत इति भावः ॥ **प्रत्यभिज्ञानादिति** । योऽहमतीतेऽहन्यदोऽद्राक्षं तदिदमिति प्रत्यभिज्ञानं चात्मान्तरोत्थाने नावकल्पते । अन्यदृष्टस्यान्येन स्मर्तुमशक्यत्वादिति भावः ॥ **शब्देभ्य इति** । स्वापप्रबोधाधिकारपठितेभ्यः पुनः 'प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैवाहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति त इह व्याघ्रो वा सिंहो वे'त्यादिशब्देभ्य इत्यर्थः ॥ **विधिभ्यश्चेति** । कर्मविद्याविधिभ्यश्चेत्यर्थः । तदुपपादयति **सुप्तस्येति** । यः सुप्तः स एवोत्तिष्ठतीत्यङ्गीकार्यम् । अन्यथा हि कर्मविद्याविधयोऽनर्थकाः स्युः । अन्योत्थानपक्षे हि सुप्तमात्रं मुच्यत इत्याद्यापद्यते । एवञ्च किं कालान्तरफलकेन कर्मणा विद्यया वा कृतं स्यादिति भावः । परपक्षेऽधिकरणाङ्गसंशयासम्भवमुक्त्वा पूर्वपक्षानुत्थानमप्याह **न च सुप्तस्येति** ॥ **इष्टं वेति** । विशिष्टयोरैक्यस्य परेणानङ्गीकारादिति भावः ।

वा०र०— तथाहि । पूर्वेद्युरनुष्ठितस्येत्यादिभाष्यं यद्वि द्व्यहादिनिवर्तनीयमित्यादिभामतीं च मनसि निधाय व्याचष्टे **यद्वि द्व्यहादीत्यादि** । **प्रतिन्यायमिति** । अयनमायः नियमेन गमनं न्यायः । जीवाः प्रतिन्यायं सम्प्रसाद इत्यादि भामत्यां च कल्पतरौ च श्रुत्यर्थो ज्ञेयः ।

स०व्र०— **कर्मेति** । कर्मशेषानुष्ठानदर्शनात् । स एव उत्थातुमर्हति नान्यः । तथाहि । पूर्वेद्युरनुष्ठितस्य कर्मणो परेद्युः शेषमनुतिष्ठन् दृश्यते । न चान्येन कृतस्य कर्मणोऽन्यः शेषं निर्वर्तयितुमर्हति । अतिप्रसङ्गात् । तस्मादेक एव पूर्वेद्युरपरेद्युश्च एकस्य कर्मणः कर्तेति गम्यते । इतश्च स एवोत्तिष्ठति । यत्कारणमतीतेऽहनि अहमद्राक्षमिति पूर्वानुभूतस्य पश्चात्स्मरणमन्यस्योत्थाने नोत्पद्यते । न ह्यन्यदृष्टमन्येन स्मर्तुमर्हति । सोऽहमस्मीत्यात्मानुस्मरणमात्मान्तरोत्थाने नावकल्पत इति भावेनाह **प्रत्यभिज्ञानादिति** । शब्देभ्यश्च तस्यैवोत्थानमवगम्यते । तथाहि । 'पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव सर्वाः प्रजा अहरहर्गच्छन्तं ब्रह्मलोकं न विदन्ति । त इह व्याघ्रो वा सिंहो वे'त्यादिशब्देभ्यश्चेत्याह **शब्देभ्य इति** ॥ **विधिभ्य इति** । कर्मविद्याविधिभ्यश्चैवमेव गम्यते । अन्यथा हि कर्मविधयोऽनर्थकाः स्युः । अन्योत्थानपक्षे हि सुप्तमात्रो मुच्यते इत्यापद्येतेत्याशयः । सुप्तस्य ब्रह्मणैक्यादेव संशयः स्यादित्यत्राह **न चेति** ।

॥ इति 'नान्यः कर्ताऽस्य कश्चन' इत्यनुव्याख्यानस्य सप्रयोजनं षष्ठाधिकरणतात्पर्यकथकतयाऽवतरणं विवरणञ्च ॥

* * *

॥ अथ व्याख्यानेऽधिकरणक्रमोल्लङ्घनप्रयोजनप्रदर्शनम् ॥

५ **सु०— लाघवार्थं क्रमोल्लङ्घनेन व्याख्यानमिति बो(द्धव्य)ध्यम् । सूत्रकृता च 'स्वप्नादिवन्न मोहः स्वतन्त्रावस्थे'ति ज्ञापनाय व्यवधानं कृतमिति ॥ ३-२-६ ॥**

परि०— **लाघवार्थमिति** । 'मुग्धेऽर्धसम्पत्तिरि'त्यस्य 'स एव चे'त्येतदनन्तरभावित्वेऽपि 'सुषुप्तिप्रबोधमोहांश्च' इति पूर्वमेव तत्सूत्रतात्पर्यवर्णनं 'स एव चे'त्यस्य 'नान्यः कर्ते'ति पश्चादेव तात्पर्यकथनमित्येवं सूत्रकारक्रमोल्लङ्घनं 'सुषुप्तिबोधमोहांश्चे'ति उक्तिलाघवार्थमित्यर्थः ॥ **व्यवधानमिति** । 'स एव चे'त्येतदानन्तर्यं मुग्ध इत्यस्येत्यर्थः ॥

यादु०— **लाघवार्थमिति** । एकेनैव वाक्येनोक्तिलाघवायेत्यर्थः ॥ ३-२-६ ॥

वं०प०— ननु स एव चेत्यधिकरणव्याख्यानानन्तरं मुग्धेऽर्धे सूत्रं व्याख्यातव्यम् । 'अतो मोहांश्चे'ति मुग्ध इति सूत्रमादौ व्याख्याय 'नान्य' इति स एवेति सूत्रं व्याख्यायते । अतः क्रमोल्लङ्घनं कुत इत्यत आह

लाघवेति । भगवतः सुषुप्त्याद्यवस्थाप्रेरकत्वमेकोक्त्या वक्तुमित्यर्थः । सूत्रकारस्यापि **स एव चेति** । सूत्रेण व्यवधानं कृत्वाऽन्ते मुग्ध इति मोहस्य भगवदधीनत्वकथने किं निमित्तमित्यत आह **सूत्रकृता चेति** । यदि व्यवधानमकृत्वा स्वप्नाद्यवस्थानिरूपणान्तरमेव मोहावस्था निरूप्यते । तदा तद्वदेषाऽपि स्वतन्त्रावस्थेति विज्ञायेत । सा मा विज्ञायीति व्यवधानं कृतमित्यर्थः ॥ ३-२-६ ॥

श्रे०चं०— ननु स एवेति पूर्वाधिकरणस्य तात्पर्यमभिधायानन्तरं तदुत्तरस्य मुग्धेऽर्धसम्पत्तिरित्यधिकरणस्य तात्पर्यकथनमुचितम् । तत्कथमनन्तरस्य पूर्वं तात्पर्यमभिधाय पूर्वस्याधिकरणस्य पश्चात्तात्पर्यकथनमिति भाष्यकारीयं क्रमोल्लङ्घनमित्यत आह **लाघवार्थमिति** । एकेन वाक्येनाधिकरणतात्पर्यकथने उक्तिलाघवादिति भावः । एवं तर्हि सूत्रकृताऽप्येवमेवाधिकरणद्वयपौर्वापर्यस्याश्रयितुं शक्यत्वात्किमिति व्यवधानं कृतमित्यत आह **सूत्रकृता चेति** ॥ ३-२-६ ॥

चषकः— **स्वप्नादिवदिति** । प्रथमान्ताद्वतिरुपमेये प्रथमादर्शनात् । स्थानिवदादेशोऽनल्विधाविितिवत् ।

॥ इति व्याख्यानेऽधिकरणक्रमोल्लङ्घनप्रयोजनप्रदर्शनम् ॥

॥ इति कर्मानुस्मृत्यधिकरणम् ॥

(३-२-६-९)

★ ★ ★

॥ अथ स्थान(तोऽप्य)भेदाधिकरणम् ॥
(३-२-८-११ तः १३)

॥ अथ 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' इति प्रथमसूत्रार्थतया
'न स्थानभेदतोऽप्यस्य..'इत्याद्यनुव्याख्यानस्य विवरणम् ॥
॥ अथ तत्र एतदधिकरणीयव्याख्यानारम्भकतया 'न स्थानभेदतोऽप्यस्य..'
इत्याद्यनुव्याख्यानस्यावतरणिका व्याख्यानश्च ॥
॥ अथ तत्रापि एतदधिकरणव्याख्यानारम्भगर्भिताशयापहसितव्यकेचित्कारपक्षीय-
व्याख्यानानुवादः तदपहासप्रदर्शनश्च ॥

ब्र०सू०— ॐ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॐ
॥ ११ ॥

६ सु०— केचिदिदमित्थं व्याचक्षते । द्विरूपं ब्रह्म श्रूयते सर्वकर्मा सर्वकाम इत्यादौ सविशेषमस्थूलमनण्वित्यादौ निर्विशेषम् । तत्र किमुभयरूपं ब्रह्म प्रतिपत्तव्यमुतान्यतररूपम् । यदाऽप्यन्यतररूपं तदा(ऽपि) किं सविशेषमुत निर्विशेषमिति संशये द्विविधश्रुत्यनुरोधादुभयरूपमेव ब्रह्मेति प्राप्ते इदमुच्यते । न तावत् स्वत एव परस्य ब्रह्मण उभयरूपत्वं सम्भवति, विरोधात् । अस्तु तर्हि **स्थानतः** पृथिव्याद्युपाधियोगात् । मैवम् । न हि उपाधिरन्यदन्यथाकरोति किन्त्वविद्योपस्थापिताः पृथिव्याद्युपाधयो भ्रममुपजनयन्ति । अतश्चान्यतरपरिग्रहेऽपि निरस्तसमस्तविशेषमेव ब्रह्म प्रतिपत्तव्यम् । **सर्वत्र** 'अशब्दमस्पर्शमि'त्यादिवाक्येषु तथाभूतमेव **हि** ब्रह्मोपदिश्यते ॥ **न भेदादिति चेन्न प्रत्येकमतद्वचनात्** ॥ १२ ॥ "न निर्विशेषमेव ब्रह्म, 'चतुष्पाद्ब्रह्म षोडशकलं ब्रह्मे'त्यादौ भेदेनोपदेशादि"ति चेन्न, 'यश्चायमस्यां पृथिव्यामि'त्यादिना प्रत्युपाधि भेदाभाववचनात् ॥ **अपि चैवमेके** ॥१३ ॥ 'नेह नानाऽस्ति किञ्चने'त्यादौ भेददर्शननिन्दापूर्वकमभेदमेके शाखिनः समामनन्तीति ।

तदिदं व्याख्यानं सम्यग्व्याख्यानेनैव अपहस्तितं भविष्यति किं पुनः प्रयत्नेनेत्याशयवान् व्याख्यानमेवारभते ।

परि०— स्थानत इति सौत्रपदानुवादः । **पृथिव्याद्युपाधियोगादिति** व्याख्या । नेति सौत्रनञर्थानुवादः **नैवमिति** । सूत्रान्तरं च पठित्वा तदर्थमनुवदति **न भेदादित्यादिना** (भेदेनेति विशेषवाची भेदशब्दः) । **पृथिव्यामित्यादिनेति** । अत्र **आदिशब्दस्य** 'तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शरीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मे'त्यादिनेत्यर्थः (अध्यात्मशरीरः तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमध्यात्मेत्यादिना) । तथा च भेदोपदेशः औपाधिक एव वाच्य इति भावः ।

गु०दी०— न स्थानभेदतोऽप्यस्य भेद इति वदतोभयोर्लिङ्गं ज्ञापकमिति व्युत्पत्त्या उभयलिङ्ग-पदेनैव भेद अभिप्रेत इत्यप्यनुसन्धेयम् ॥ ३ । २ । ८ ॥

यादु०— न निर्विशेषमेवेत्यनन्तरमेकरूपमेवेति शेषः । 'यश्चायमस्यां पृथिव्यामित्यादिने'त्यत्रादिपदेन 'तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मे'त्यादि-वाक्यसङ्ग्रहः । ततश्च भेदोपदेशस्यौपाधिकपरत्ववर्णनमेव न्याय्यमिति भावः ।

वं०प०— अन्यदन्यथेति । तथा च स्वत एकस्योभयरूपत्वमुपाधिरपि न सम्पादयतीत्यर्थः । तर्हि किमुपाधिकृत्यम् ? अत आह **किन्त्विति** ।

शे०चं०— विरोधादिति । एकस्य वस्तुनः स्वत एव रूपादिविशेषवत्त्वतद्राहित्ययोर्विरुद्धत्वादित्यर्थः ॥ **नहीति** । तथा सति स्वतो धवलस्यापि स्फटिकमणेर्लाक्षारसावसेकोपाधिवशादधवलत्वप्रसङ्गादिति भावः ॥ **न निर्विशेषमेव ब्रह्मेति** । किन्तु सविशेषमपीत्यर्थः । तत्र हेतुमाह **चतुष्पादिति** । न च परस्य ब्रह्मणः स्वत उभयरूपत्वं विरुद्धमित्युक्तमिति वाच्यम् । आकारभेदस्योपाधिकृतत्वेन निर्विशेषत्ववत्स्वाभाविकत्वाभावेना-विरुद्धत्वादित्याशयात् ॥ **भेदेनोपदेशादिति** । प्रतिबिम्बं ब्रह्मण उपदिश्यमानाकाराणां भिन्नत्वादित्यर्थः । इत्या-दिनेत्यादिपदेन 'तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शरीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मे'ति वाक्यशेषपरिग्रहः । प्रत्युपाधिभेदमभेदस्यैव शास्त्रेण प्रतिपादनान्न भिन्नाकारयोगो ब्रह्मणि शास्त्रीय इति भावः ।

वा०र०— मूलस्य शाङ्करभाष्यसङ्ग्रहरूपत्वाद्भाष्योक्तरीत्यैव हेतूपपादयति **एकस्य वस्तुन इत्यादिना** । **उपदिश्यमानाकाराणां भिन्नत्वादित्यर्थ इति** । ततश्च सविशेषत्वं प्राप्तमिति केवलनिर्विशेषत्वायोग इति भावः । एतदनन्तरं न च परस्य ब्रह्मण इत्यादीत्याशयादित्यन्तं ग्रन्थपाठः स्वरसः ।

॥ इति एतदधिकरणव्याख्यानारम्भगर्भिताशयापहसितव्यकेचित्कारपक्षीयव्याख्यानानुवादः तदपहासप्रदर्शनञ्च ॥

* * *

।। अथ सुरनरादिप्रतिशरीरं दक्षिणाक्ष्यादिस्थानेषु स्थित्वा स्वप्नाद्यवस्थाप्रवर्तक एक एव, न भिन्नः, नापि तत्तद्गतेषु तद्रूपेषु तारतम्यादिः ।।

७ सु०— सर्वशरीरेषु, प्रतिशरीरं च दक्षिणाक्ष्यादिस्थानेषु, स्थितः परमपुरुषः स्वप्नाद्यवस्थाः प्रवर्तयतीत्युक्तम् । तत्र सर्वत्र स्थितः किमेक एवोत परस्परं भिन्न इति संशये, 'यद्युगपद्भिन्नस्थानं तद्भिन्नं दृष्टम्, यथा घटादि; भिन्नस्थानश्चायमि'त्यतो भिन्न एव भवेत् । भिन्नानां च तारतम्यमनुग्राह्यानुग्राहकभावश्चोपलब्ध इति तत्प्रसङ्गोऽपीति कथं 'स एव चे'त्युक्तमिति प्राप्ते प्रतिविहितं सूत्रकृता **न स्थानतोऽपीति** । तद्व्याचष्टे **नेति** ।

अनु०— न स्थानभेदतोऽप्यस्य भेदः कश्चित्परेशितुः ।

अत्र स्थानशब्दस्तद्भेदस्योपलक्षण इत्युक्तं भवति । सप्तम्यर्थे तसिः, आद्यादिभ्य उपसङ्ख्यानात् । 'भेद' इति वदता 'उभयलिङ्गमि'त्येतद्भिन्नस्वरूपत्वमिति व्याख्यातम् । स्थानानां सुरनरादिशरीराणां, तत्रापि दक्षिणाक्ष्यादीनां, **भेदे** सत्यपि **अस्य** तत्र तत्र स्थितस्य **परेशितुः, कश्चित्** अन्योऽन्याभावलक्षणो, हीनाधिकत्वरूपोऽनुग्राह्यानुग्राहकत्वरूपो वा, **भेदो न** अस्ति ।

कुत इत्यतः 'सर्वत्र ही'त्युक्तं व्याचष्टे **सर्वत्रेति** ।

सर्वत्राशेषदोषोज्झपूर्णकल्याणचिद्गुणः ।।

सर्वत्र स्थानेषु, निर्भेदश्चेत्यपि द्रष्टव्यम् । अशेषदोषोज्झश्चासौ पूर्णकल्याणचिद्गुणश्चेति विग्रहः । **कल्याणा** विनाशादिरहिताः, यद्वा गुणशब्दो दुःखादिष्वपीत्यतः कल्याणेत्युक्तम् । **चिच्छब्दात्परत** आदिपदमध्याहार्यम्, अथवा चिद्रूपा न त्वचेतना इत्यर्थः । 'सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षत' इत्यादौ परमात्मा श्रूयते यत इति शेषः ।

परि०— **सर्वशरीरेष्विति** । 'स एव चे'ति सूत्रार्थपरेण नान्यः कर्ताऽस्य कश्चनेत्यनेन प्राप्तत्वात् । **सर्वशरीरेषु प्रवर्तयति** इत्युक्तमित्युक्तम् । **प्रतिशरीरं दक्षिणाक्ष्यादि** इत्यादि तु 'देहयोगाद्वासोऽपी'त्यादिना जाग्रदाद्यवस्थाप्रेरकत्वोक्त्या प्राप्तम् । 'दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजस' इत्यादेरिति भावः । 'स एव च कर्मानुस्मृतिशब्दविधिभ्यः' इति सूत्रे सार्वत्रिकसार्व-

कालिकसर्वपुरुषेषु स एक एव सर्वावस्थानां प्रवर्तक **इति कथमुक्त**मित्यर्थः ॥ **अत्रेति** । सूत्र इत्यर्थः । **सप्तम्यर्थ इति** । सूत्रे भाष्ये च स्थानभेदे सत्यपीत्यर्थे 'प्रतियोगे पञ्चम्यास्तसिरि'ति सूत्रे आद्यादिभ्य इति वार्तिकेन तसिरित्यर्थः । मूलार्थमाह **स्थानानामित्यादिना** ।

याद०— **सर्वशरीरेष्वित्यादि** । स्वप्नाद्यवस्थाप्रवर्तकत्वोक्त्येदमप्यर्थादुक्तमेवेति भावः ।

वं०प०— **तत्प्रसङ्गोऽपीति** । तारतम्यानुग्राह्यनुग्राहकभावयोः प्रसङ्ग इत्यर्थः । **भेद इतीति** । अयमर्थः । **उभयलिङ्गं** भिन्नस्वरूपं नेत्युक्तौ भिन्नस्थानेषु विद्यमानानां समग्ररूपाणां भेदमात्रनिषेधो विज्ञायते । विशिष्टनिषेधो ह्ययम् । स च विशेष्यबाधे विशेषण एव पर्यवस्यतीति । तत्राप्येकस्मिन् शरीरेऽपि । स्थानत इति तसिः सप्तम्यर्थ इत्युक्तं तद्दर्शयति **भेदे सत्यपीति** । **चिच्छब्दादिति** । अत्र चिच्छब्दो ज्ञानपरः ॥ **सर्वेष्विति** । सर्वेषु भूतेषु स्थितं भगवन्तं ब्रह्मेति पूर्णमित्याचक्षत इत्यर्थः ।

शे०चं०— **सर्वशरीरेष्वित्यादि** । तदभावे स्वप्नाद्यवस्थाप्रवर्तकत्वानुपपत्त्या तदुक्त्यैव सर्वशरीरादिस्थत्वमपि लब्धमेवेति भावेनायमनुवाद इति ज्ञातव्यम् ॥ **उक्तमिति** । 'सन्ध्ये सृष्टिराह ही'त्यादिनेति शेषः । सूत्रानुसारेण स्थानत इत्येव वक्तव्यत्वाद्भाष्ये भेदपदमधिकमित्याशङ्क्य पूर्वपक्षहेतोः स्थानभेदस्य सूत्रोक्तत्वसूचनार्थत्वान्न तदिति भावेन तत्तात्पर्यमाह **अत्रेति** । अप्रयोजकत्वरूपपूर्वपक्ष्युक्तहेतुदूषणस्यापि सूत्रसूचितत्वलाभायाह **सप्तम्यर्थ इति** । प्रतियोगे पञ्चम्यास्तसिरिति पञ्चम्यन्तात्तद्विधानात्कथमत्र सप्तम्यन्तात्तसिरित्यत आह **आद्यादिभ्य इति** । आद्यादेराकृतिगणत्वात्स्थानभेदशब्दस्याप्याद्यादित्वमिति भावः । भाष्ये भेद इत्यंशस्योत्सूत्रत्वपरिहारायाह **भेद इति वदतेति** । अन्योन्याभावरूपस्य भेदस्यैकत्वाद्भाष्ये तन्नानात्वप्रतिपादककश्चिदित्यंशवैयर्थ्यमित्यतस्तस्यैकत्वेऽपि तत्प्रयुक्तस्य तारतम्यादिरूपस्यापि भेदस्य सूत्रारूढत्वोपदर्शनार्थत्वान्न तदिति भावेन तत्तात्पर्यमाह **कश्चिदिति** । भाष्ये निर्दोषत्वादेरिव निर्भेदत्वस्य श्रुतिसिद्धताया अनुक्तेस्तल्लाभायापेक्षितं पूरयति **निर्भेदश्चेत्यपीति** । पूर्वपक्षिणा शङ्कितयोर्दोषित्वाल्पगुणत्वयोः अभावस्य श्रुतिसिद्धत्वलाभाय तदनुरूपं विग्रहमाह **अशेषदोषोज्झश्चेति** । यद्वा 'प्रसन्नता गुणोत्कर्षज्ञानादेव हि केवलम् । निर्दोषतापरिज्ञानादि'त्युत्तरमूलानुसारेण विग्रहमाह **अशेषदोषोज्झश्चेति** । गुणशब्दस्य शुभवचनत्वेन तेनैव शुभरूपतालाभात्तदर्थकल्याणपदानर्थक्यमित्याशङ्क्य विनाशादिराहित्यसमर्पकत्वाद्गुणानां न तदानर्थक्यमित्याशयेन तद्व्याचष्टे **कल्याणा इति** । वस्तुस्थितिमनुरुध्यैव चेदमुक्तम् । सामान्यवानसमवायिकारणमित्यादिपारिभाषिकगुणपरत्वे तु गुणशब्दस्य तेन तदलाभान्न वैयर्थ्यशङ्काऽपीत्याह **यद्वेति** । मूले चिच्छब्दोक्तस्य ज्ञानस्य विशिष्यकल्याणत्वोक्त्या तद्वैषम्याभावलाभेऽपि तदितरगुणानां कल्याणत्वालाभात् तत्प्रत्युक्तवैषम्यशङ्कापरिहारायाह **चिच्छब्दात्परत इति** । अत्र पक्षे आदिपदाध्याहारो भवतीत्यपरितोषात् चिच्छब्दस्य ज्ञानपरत्वमनङ्गीकृत्य चेतनार्थत्वमेव चाङ्गीकृत्य कल्याणपदोक्तविनाशादिराहित्ये चेतनत्वरूपहेतुसमर्पकत्वान्न तद्वैयर्थ्यं नाप्यध्याहारो दोष इत्यभिप्रेत्य चित्पदं प्रकारान्तरेण व्याख्याति **अथवेति** । कुतः सर्वेषु स्थानेषु परमात्मन उक्तरूपत्वमित्यतः

सूत्रे उक्तस्य हीत्यस्याव्याख्यानप्रयुक्तभाष्ये न्यूनतामपेक्षितपूरणेन परिहरति **सर्वेषु भूतेष्वित्यादि** । सर्वेषु भूतेषु चक्षुरादिस्थानेष्वप्येतमेकमेव पूर्णगुणमाचक्षत इत्यर्थः ।

वा०२०— 'सन्ध्ये सृष्टिराह ही'त्यादौ स्वप्नाद्यवस्थाप्रवर्तकत्वमात्रोक्तावपि सर्वशरीरेषु दक्षिणाक्ष्यादिस्थानेषु च तदनुक्तेः कथमयं तत्सूत्रोक्तार्थानुवाद इत्यतस्तत्सूत्रे सर्वशरीरादिस्थत्वस्य वचनतः प्राप्त्यभावे स्वप्नाद्यवस्थाप्रवर्तकत्वान्यथानुपपत्त्यैव प्राप्तिसद्भावान्नानुपपत्तिरित्याह **तदभाव इति** । सर्वशरीरादिस्थत्वाभावादित्यर्थः । तेषु तेषु शरीरेषु स्थितत्वाभावे तत्तच्छरीरेऽवस्थाप्रवर्तकत्वायोगः । दक्षिणाक्ष्यादिस्थानगतजीवस्य जाग्रदाद्यवस्थानां प्रवर्तकस्य तत्स्थानस्थित्यभावेन तत्प्रवर्तकत्वायोग इत्यतः सर्वशरीरादिस्थत्वं लब्धमित्यर्थः । **पूर्वपक्ष्युक्तयुक्तीति** । स्थानभेदरूपयुक्तीत्यर्थः । **पञ्चम्यन्तात्तद्विधानादिति** । तच्छब्देन बुद्धिप्रकृतस्य तसेः परामर्शः । 'प्रतियोग' इति सूत्रे प्रकृततया तसिपरामर्श इत्याहुः । 'आदिमध्यपार्श्वपृष्टादिभ्य उपसङ्ख्यान'मित्यस्य सङ्ग्रहो 'आद्यादिभ्य उपसङ्ख्यानम्' इति ग्रन्थकारैरभिधीयते । आकृतिगणश्चायमिति काशिकोक्तेराद्यादेराकृतिगणत्वमिति भावेनाह **आद्यादेरिति** । **तदनुरूपमिति** । अन्यथा पूर्णत्वादेरिवाशेषदोषोज्झत्वस्यापि गुणविशेषताप्रतीत्या विष्णोर्निर्दोषत्वालाभ इति भावः । **विशिष्य कल्याणत्वोक्त्येति** । कल्याणचिदित्यनेन इत्यर्थः । तद्वैयर्थ्याभावलाभेऽपीति पाठः । मिथ्याज्ञानादित्वव्यावृत्त्यर्थतया तस्य सार्थकत्वादिति भावः । इतरगुणानां कल्याणत्वालाभे हेतुः **विशिष्येति** । **तत्प्रयुक्तेति** । कल्याणत्वाभावप्रयुक्तवैषम्यशङ्कापरिहारायेत्यर्थः । सन्ति तावदितरेऽपि गुणाः । न च ते कल्याणाः । तत्त्वेनात्रानभिधानात् । नाप्यकल्याणाः। नारायणगुणेष्वस्मदादिगुणेष्विव कल्याणत्वरूपवैषम्याभावेनानिष्टस्य वैषम्यस्यापातादित्याशङ्कायाः प्राप्तिरिति भावः । **चिच्छब्दात्परत इतीति** । तथा च कल्याणचिदादिर्गुणो यस्येति कल्याणत्वं चिदादीनामुक्तमिति न वैयर्थ्यं नापि न च वैषम्यप्रसक्तिर्गुणानामिति भावः । क्वचिद्वैषम्याभावेऽपीति पाठः । तत्रापि वैषम्यशब्देन वैयर्थ्यमेवोच्यते ज्ञानोक्तेरिव कल्याणत्वोक्तेरपि सार्थक्येनोक्तिवैषम्यस्य सार्थकत्वनिरर्थकत्वरूपस्याभावलाभ इत्यर्थः । चेतनत्वार्थत्वमेव चाङ्गीकृत्येति पाठः । **विनाशादिराहित्य इति** । गुणानामिति शेषः । अत्र पक्षे चेतनत्वाद्युपेतगुणपदेन ज्ञानादयो गुणा एव प्राप्नुवन्तीति न विशिष्य निर्देश आवश्यक इति मूलटीकयोरभिप्राय इति ज्ञेयम् । **उक्तरूपत्वमिति** । निर्भेदत्वमित्यर्थः । **इत्यतः सूत्र इति** । इत्याशङ्कानिवृत्त्यर्थं सूत्रेऽनुक्तस्य हि शब्दस्येत्यर्थः । **अव्याख्यानेति** । तदुक्तहेतोस्तत्त्वेन कथनाभावादिति भावः । **परिहरतीति** । सौत्रहिशब्दोक्तहेतुसमर्पकतया भाष्यं योजयतीत्यर्थः । 'सर्वेषु भूतेष्वि'ति वाक्यस्य प्रकृतोपयोगार्थं मूलकाराभिप्रेतं वर्णकान्तरमाह **चक्षुरादिस्थानेष्वित्यादि** ।

।। इति सुरनरादिप्रतिशरीरं दक्षिणाक्ष्यादिस्थानेषु स्थित्वा स्वप्नाद्यवस्थाप्रवर्तक एक एव, न भिन्नः, नापि तत्तद्गतेषु तद्रूपेषु तारतम्यादिः ।।

।। इति एतदधिकरणीयव्याख्यानारम्भकतया 'न स्थानभेदतोऽप्यस्य..' इत्याद्यनुव्याख्यानस्यावतरणिका व्याख्यानञ्च ।।

॥ अथ एतदधिकरणीयप्रथमसूत्रोक्तार्थमाक्षिप्य समाधायकतया 'न भेदात्'इत्यादि-द्वितीयसूत्रार्थरूपेण 'तद्विरुद्धं तु'इत्याद्यनुव्याख्यानस्य विवरणम् ॥
॥ अथ तत्र उक्तार्थविरुद्धप्रमाणानामप्रामाण्यम् ॥
॥ अथ तत्रापि उक्तार्थविरुद्धार्थकप्रमाणानां महातात्पर्यविरोधित्वात्प्रतीतार्थेऽप्रामाण्यम् ॥

८ सु०— उक्तमर्थमाक्षिप्य समाधातुं सूत्रं **न भेदादिति** ।

ब्र०सू०— ॐ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॐ ॥ १२ ॥

निर्भेदं सर्वत्र सर्वदोषदूरं सकलगुणपरिपूर्णं ब्रह्मेति नोपपद्यते, 'कार्यकारणबद्धौ तौ' इत्यादिश्रुतिपुराणादिवाक्यैः भिन्नत्वदोषित्वाल्पगुणत्वादेः भेदशब्दोपलक्षितस्योक्तत्वादित्याक्षेपार्थः । नेति परिहारांशं व्याचष्टे **तद्विरुद्धं त्विति** ।

अनु०— तद्विरुद्धं तु यत्तत्र मानं नैव क्वचिद्भवेत् ।

यत्तु वाक्यं तस्योक्तार्थस्य **विरुद्धं** प्रतीयते तत्तत्र उक्तविरुद्धे **क्वचिदर्थे मानं नैव भवेत्** किन्त्वन्य एव तस्यार्थः प्रतिपत्तव्यः ।

कुत इत्यतः 'प्रत्येकमतद्वचनादि'त्युक्तम्, तदनुपपन्नमिवाभाति, सर्वत्र हीत्युक्तस्य प्रतिपक्षचोदनायां पुनस्तन्मात्रोपन्यासस्य व्यर्थत्वात् । अतः तात्पर्यमाह **महातात्पर्येति** ।

महातात्पर्यरोधेन कथं तन्मानमत्र तु ।

सकलस्मृतीतिहासपुराणानां परमेश्वरस्य अशेषदोषदूरत्वे समस्तगुणपरिपूर्णत्वे च **यन्महातात्पर्यं** तद्विरोधेन **तत्** वाक्यं **अत्र** भगवतो दोषित्वादौ **कथं मानं** भवेत् । **तु**शब्दो महावाक्यत्वावान्तरवाक्यत्वलक्षणविशेषार्थः । दृष्टं हि निर्णीतमहावाक्यार्थविरुद्धस्य तदवान्तरवाक्यस्य तत्राप्रामाण्यम्, यथा स्वर्गप्रयोजनाग्निहोत्रपरमहावाक्यार्थविरुद्धस्य 'यद्यमुष्मिँल्लोकेऽस्ति वा न वे'त्यादेस्तदवान्तरवाक्यस्य महावाक्यं हि प्रधानम्, अनन्यार्थत्वात् । अप्रधानं त्ववान्तरवाक्यम्, तदर्थप्रतिपत्तिहेतुत्वात् ।

परि०— 'न भेदादिति चेदि'ति सूत्रं स्वयमेव विवृणोति **उक्तमर्थमित्यादिना** । समग्र-सूत्रस्य परमतानुवादे लिखितत्वात् प्रतीकमात्रमेतत् 'न भेदादि'त्येतावन्मात्रं सूत्रमिति ज्ञेयम् ॥ **इत्यादिश्रुतिपुराणेति** । 'कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ' इति माण्डूकश्रुतौ भागवतादि-पुराणरामायणादिवाक्यैरित्यर्थः । **इत्युक्तमिति** । सूत्रकृतैवेति योज्यम् ॥ **इत्युक्तस्येति** । 'एतमेव ब्रह्मे'ति श्रुतौ सर्वत्र निर्दोषाशेषसद्गुणमेकमेव श्रूयत इत्युक्तस्य 'कार्यकारणबद्धावि'ति श्रुतिपुराणादि-रूपप्रतिपक्षशङ्कायां अतद्वचनाद्भगवद्रूपाणामभेदवचनादिति प्रागुक्ताभेदोक्तिमात्रोपन्यासस्य प्रतिपक्ष-क्षेपणाशक्ततया व्यर्थत्वादित्यर्थः ॥ **तत्राप्रामाण्यमिति** । प्रतीतेऽर्थ इत्यर्थः ॥ **यथेति** । उक्तं हि पूर्वतन्त्रे प्रथमाध्यायद्वितीयपादाद्याधिकरणे 'यद्यमुष्मिन्नि'ति वाक्यस्य पारत्रिकसुखविषयकसन्देह-प्रतिपादकस्य स्वर्गफलकयागविधायकवाक्यविरोधादप्रामाण्यं 'शास्त्रदृष्टविरोधादि'ति पूर्वपक्षसूत्रेण आशङ्क्य 'आकालिकेप्से'ति सिद्धान्तसूत्रेण यज्ञशालायां धूमाकुलितलोचनानां ऋत्विजां तात्का-लिकसुखापेक्षया गवाक्षकरणाय यद्यमुष्मिन्निति परलोकसुखनिन्दावचनं न तु तत्रैव तात्पर्यमित्युक्त-मिति भावः । तत्र युक्तिमाह **महावाक्यं हीति** ॥ **तदर्थेति** । प्रधानवाक्यार्थेत्यर्थः ।

यादु०— **तन्मात्रोपन्यासस्येति** । अभेदमात्रोपन्यासस्येत्यर्थः । यद्यपि प्रत्येकमित्यनेनादरसूचनेन बलवत्त्वलाभान्न व्यर्थत्वम् । तथाऽपि बलवत्त्वप्रापकयुक्त्यनुपन्यासे बलवत्त्वं न ज्ञातुं शक्यमतो वैयर्थ्यमिति भावः ॥ **तात्पर्यमाहेति** । प्रत्येकपदसूचितादरलब्धां तात्पर्यज्ञापिकां बलवत्त्वोपपादकयुक्तिमाहेत्यर्थः ।

वं०प०— **विशेषार्थ इति** । तथा च तत् अवान्तरं महावाक्यं चेत्यर्थः ॥ **तदर्थेति** । महावाक्यार्थ इत्यर्थः ।

शे०चं०— **तन्मात्रोपन्यासस्येति** । यद्यपि प्रत्येकमित्यनेनादरसूचनेनाधिकबलत्वसूचनान्न तन्मात्रो-क्तिरियं तथाऽपि तद्व्युत्पादकयुक्त्यनुपन्यासान्नाधिकबलत्वसिद्धिरित्यभिप्रेत्य वैयर्थ्यादित्युक्तमिति ध्येयम् । **तात्पर्यमाहेति** । तज्ज्ञापिकां युक्तिमाहेत्यर्थः । ननु श्रुत्यादीनां विष्णोरशेषदूरत्वादौ महातात्पर्यविरोधेन तद्दोष-वत्त्वाभिधायकवाक्यानां दोषित्वादावमानत्वमित्येव कुतः कल्प्यम् । नियामकविशेषाभावेन दोषाभिधायक-वाक्यविरोधात् । निर्दोषत्वाभिधायकवाक्यानामेव निर्दोषत्वादौ महातात्पर्याभावस्यापि वक्तुं शक्यत्वादित्यतो दोषाभावाभिधायकवाक्यानां महावाक्यत्वेन प्राबल्यात् । दोषवाक्यानां चावान्तरवाक्यत्वेन दौर्बल्यान्महातात्पर्य-विरोधेन दोषवाक्यानाममानत्वकल्पनमेव युक्तं न तु वैपरीत्यमित्यभिप्रेत्य बाध्यबाधकभावप्रयोजकतयाऽभिमतस्य महावाक्यत्वादिविशेषस्य मूलारूढतासिद्ध्यर्थं तत्समर्पकतया तुशब्दं व्याचष्टे **तुशब्द इति** । नन्वस्त्वेवं महा-वाक्यत्वावान्तरवाक्यत्वाभ्यां वाक्यद्वयस्य वैलक्षण्यं तथाऽपि महावाक्यविरोधेनावान्तरवाक्यस्य बाध इत्येत-त्कुत इत्यतः किमेवंवादिनो महावाक्यविरोधेनावान्तरवाक्यस्य बाधो न दृष्ट इत्यभिमतं किंवा न तत्र नियामक-

मस्तीति विकल्पद्वयं मनसि निधायाद्यं दूषयति **दृष्टं हीति** । तत्र अवान्तरवाक्यस्य स्वार्थेऽप्रामाण्यमिति सम्बन्धः । तस्य हि प्रधानीभूताग्निहोत्रवाक्यानुरोधेन दिक्ष्वतिकाशाः कर्तव्या इत्यत्रैव प्रामाण्याङ्गीकारादिति भावः । धूमपरिहाराय दिक्षु रन्ध्राणि कर्तव्यानीति यावत् । द्वितीयं दूषयति **महावाक्यं हीति** ।

वा०र०— उक्तार्थस्य विरुद्धं प्रतीयत इति मूलम् । निष्ठायोगे षष्ठ्युपपत्तिस्तु 'अनुभवस्य विरुद्धम्' इति जैनाधिकरणीयानुव्याख्यानसम्बन्धिमूलटीकोक्तरीत्या शेषत्वविवक्षया द्रष्टव्या । **तद्दोषवत्त्वेति** । दोषवत्त्वादीत्यर्थः । दोषित्वादावित्युत्तरपदाद्यनुसारात् । दोषाभिधायकेत्याद्युत्तरत्राप्यादिपदान्तर्भावेन व्याख्यानं कार्यम् । वाक्यानामेवेत्येवकारो वा तात्पर्याभावस्यापीत्यपिशब्दो वा नापेक्षितः । एकमात्रेण स्वारस्यात् । तदवान्तरवाक्यस्येत्यस्य साकाङ्क्षत्वपरिहारायाह **तदवान्तरेति** । **तत्राप्रामाण्यमिति** । पूर्वत्र प्रकृतमनुवर्तत इत्यर्थः । अध्याहाराभावसूचनायानुवर्तमानसम्बन्धाभिधानमिति ज्ञेयम् । **प्रधानीभूताग्निहोत्रेति** । एतच्च जन्माधिकरणे उपपादितमस्माभिः । तद्वदत्राप्युपपाद्यम् । दिक्ष्वतिकाशा इत्येतद्व्याचष्टे **धूमेति** ।

स०व्र०— यद्यमुष्मिन् लोक इति । 'यद्यमुष्मिन् लोकेऽस्ति वा न वा को हि तद्वेदे'ति श्रुतिवाक्यमवान्तरवाक्यत्वेन महावाक्यविरोधे स्वार्थं परित्यज्य दिक्षु अतिकाशाः कर्तव्या इत्यत्र तात्पर्यं कल्प्यते तद्वदित्यर्थः । अतिकाशशब्दो रन्ध्रवाची । धूमपरिहारार्थं दिक्षु रन्ध्राणि कर्तव्यानीत्यर्थः । **तच्च वक्ष्यते** 'यो मामशेषाभ्यधिकं विजानाति स एव मामि'त्यादिनेति शेषः ।

।। इति उक्तार्थविरुद्धार्थकप्रमाणानां महातात्पर्यविरोधित्वात्प्रतीतार्थेऽप्रामाण्यम् ।।

* * *

।। अथ परमेश्वरस्य सकलगुणपरिपूर्णत्वे निरस्तसमस्तदोषत्वे च वेदादीनां महातात्पर्यमित्यर्थसाधनम् ।।

।। अथ तत्र मोक्षहेतुत्वेनैव हि वेदवाचः प्रामाण्यम् ।।

९ **सु०— स्यादेवम्** । यदि परमेश्वरस्य सकलगुणपरिपूर्णत्वे निरस्तसमस्तदोषत्वे च वेदादीनां महातात्पर्यमित्यर्थः प्रमाणवान् स्यात्, तदेव तु न पश्याम इत्यत आह **दुःखेति** ।

अनु०— दुःखाप्ययसुखावाप्तिहेतुत्वेनैव वेदवाक् ।
भवेन्मानं

मोक्षहेतुत्वेनेति वक्तव्ये दुःखाप्ययेत्यादिवचनं वादिविप्रतिपत्तेर्मोक्षस्वरूपनिरूपणार्थमात्यन्तिकदुःखनिवृत्तिर्निरतिशयसुखाभिव्यक्तिश्च मुक्तिरिति । यद्वाऽप्रधानप्रयोजन-

स्वर्गादिसङ्ग्रहार्थमिदम् । इत्थम्भूतलक्षणे तृतीया । **दुःखाप्ययसुखावाप्तिहेतुत्वेनैव** तद्धेतुत्वं यथा निर्वहेत् तथैव, **मानं** कस्यचिदर्थस्य प्रतिपादिका **भवेत्** । **वेदवागिति** स्मृत्यादेरुपलक्षणम् ।

एतदुक्तं भवति । शास्त्रेण हि विषयप्रयोजनवता भाव्यम्, प्रमाणत्वात् परार्थत्वाच्च । तत्र यदा विषयः सन्दिग्धः प्रयोजनं च निश्चितं तदा निश्चितेन प्रयोजनेनानिश्चितो विषयो निश्चेतव्यः । न हि शास्त्रं साक्षात् प्रयोजनस्य कारकम्, किन्तु विषयप्रतिपादनद्वारैव । तथाच तत्प्रयोजनं यस्मिन् ज्ञापिते सम्पद्यते स एव विषयोऽवधार्यते, अन्यथा विषयप्रयोजनयोरसम्बद्धत्वेन शास्त्रस्यानुपादेयताऽऽपत्तेः । वेदादेश्च मोक्ष एव प्रधानं प्रयोजनम्, 'तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तत' इत्यादेः, स्वर्गादिकं चाप्रधानम् । अतः स एव विषयः कल्पनीयो यस्मिन्ज्ञा(पि)ते मोक्षादिकं सम्प(द्यत इति)द्येतेति ।

परि०— इत्थम्भूतेति । कञ्चित्प्रकारं प्राप्त इत्थम्भूतः, तल्लक्षणे तज्ज्ञापन इत्युपेत्य व्यनक्ति **दुःखाप्ययेति** । **परार्थत्वादिति** । परं प्रति प्रवृत्तत्वादित्यर्थः ।

वं०प०— कर्तृकरणयोस्तृतीयेत्युक्तत्वेन प्रकृते तयोरर्थयोरयोगादाह **इत्थम्भूतेति** । मानत्वरूपप्रकारप्राप्ताया वेदवाचो दुःखाप्ययसुखावाप्तिहेतुत्वं ज्ञापकमित्यर्थः । कथं ज्ञापकमित्यतस्तद्दर्शयति **तद्धेतुत्वं यथा निर्वहेत्तथैव मानमिति** । ननु शास्त्रस्य साक्षात्प्रयोजनकत्वात्किं विषयप्रतिपादनद्वारेण । येन तत्र विषये महातात्पर्यं वाच्यम्, अत आह **न हीति** ।

शे०चं०— ननु दुःखाप्ययसुखावाप्त्योः संसारदशायामपि सत्त्वात्र तन्मात्रस्य मोक्षत्वमिति कथमस्य मोक्षस्वरूपनिरूपणार्थतेत्यतोऽत्र दुःखाप्ययशब्दस्यात्यन्तिकदुःखनिवृत्तिपरत्वेन दुःखनिवृत्तिमात्रपरत्वस्य, सुखावाप्तिशब्दस्य च निरतिशयसुखाभिव्यक्तिपरत्वेन यत्किञ्चित्सुखावाप्तिपरत्वस्य अभावेन संसारसाधारण्याभावाद्युक्तं मोक्षस्वरूपप्रतिपादकत्वमित्यभिप्रेत्य तत्तात्पर्यमाह **आत्यन्तिकेति** । इदानीं मोक्षस्वरूपनिरूपणस्यापि प्रयोजनविशेषाभावं मन्वानः पक्षान्तरमाह **यद्वेति** । मोक्षहेतुत्वेनेत्युक्ते स्वर्गादिहेतुत्वाभावप्रसङ्गात्तद्धेतुत्वस्यापि ज्ञापनार्थं तथाऽनुक्त्वा दुःखाप्ययसुखावाप्तिहेतुत्वेनेत्येवोक्तमित्यर्थः ॥ **इत्थम्भूतेति** । अर्थविशेषप्रतिपादकत्वरूपं प्रकारान्तरं प्राप्तस्य शास्त्रस्य दुःखाप्ययसुखावाप्तिहेतुत्वं चिह्नमिति तत्र तृतीयेत्यर्थः । दुःखाप्ययसुखावाप्तिहेतुत्वस्यार्थविशेषप्रतिपादकत्वं विनाऽनुपपत्तेस्तच्चिह्नत्वमिति भावः । **प्रमाणत्वादिति** । अत्र प्रमाणत्वाद्विषयवता भाव्यं परार्थत्वाद्विषयप्रयोजनवता भाव्यमिति हेतुहेतुमद्भावो द्रष्टव्यः । ननु शास्त्रसाध्यत्वात्प्रयोजनस्य विषयेण विनाऽपि शास्त्रेणैव निष्पन्नत्वान्न तस्य विषयनिश्चायकत्वमित्यत आह **न हीति** ॥ **विषयप्रतिपादनद्वारैवेति** ।

अन्यथा शास्त्रत्वमेव न स्यात् । वक्तृश्रोत्रोरभिमतमननायासाध्यं फलमधिकृत्य तद्धेतुभूतं प्रमाणान्तराप्राप्तमर्थं प्रतिपादयतां वाक्यानां समूहस्यैव शास्त्रत्वादिति भावः । मोक्षादिकमित्यादिपदेनाप्रधानप्रयोजनस्य स्वर्गादेः परिग्रहः ।

वा०र०— क्वचित्प्रकारं प्राप्त इत्थम्भूतस्तस्य लक्षणम् । तत्र तृतीयेति सूत्रार्थं मनसि निधाय लक्षण-विषयतां दर्शयति **अर्थविशेषप्रतिपादकत्वरूपमिति** । **तत्रेति** । लक्षणाभिधायिहेतुत्वशब्देत्यर्थः । कमण्डलुना छात्रमद्राक्षीदित्यत्र छात्रत्वप्रकारं प्राप्तस्य कमण्डलुर्लक्षणमिति कमण्डलुशब्दे तृतीया यथा तथेति भावः । एतच्च कञ्चित्प्रकारं प्राप्त इत्थम्भूतः तस्य लक्षणं चिह्नमित्यादि जन्माधिकरणीयटीकाव्याख्यावसरे विवृतम् । 'लेशत' इति गीताभाष्याद्यपद्यव्याख्यानटीकाप्रपञ्चे अस्मदीयव्युत्पादनानुसारेण विचारोऽवधेयः । **तच्चिह्नत्वमिति** । तद्गमकत्वमित्यर्थः । तत्त्वनिर्णयटीकानुसारेणाह **वक्तृश्रोत्रोरिति** ।

।। इति मोक्षहेतुत्वेनैव हि वेदवाचः प्रामाण्यम् ।।

* * *

।। अथ मोक्षश्च प्रसन्नादीशानादेव भवति, ईशस्य प्रसन्नता च गुणोत्कर्षज्ञानान्निर्दोषतापरिज्ञानाच्च भवति ।।

।। अथ तत्र मोक्षश्च प्रसन्नादीशानादेव भवति ।।

१० **सु०**— ततः किमित्यत आह **तदिति** ।

अनु०— तदीशानात् प्रसन्नादेव नान्यथा ।

तत् दुःखाप्ययादिरूपं कैवल्यम् । **ईशानात्** विष्णोरेव भवेन्नान्यस्मात् । स हि तस्येष्टे नान्यः । अस्तु तर्हि स एव विषयः किं गुणपूर्णत्वादिनेत्यत उक्तं **प्रसन्नादेव नान्यथा** न ज्ञातमात्रादिति ।

परि०— ईशानपदतात्पर्यमाह स हीति । यद्वा ईशानाद्विष्णोरिति कुतो व्याख्येत्यत आह स हीति ॥

शे०चं०— मूले ईशानादित्यस्य विशेषणस्य प्रयोजनमाह स हीति ॥

।। इति मोक्षश्च प्रसन्नादीशानादेव भवति ।।

* * *

॥ अथ ईशस्य प्रसन्नता च गुणोत्कर्षज्ञानान्निर्दोषतापरिज्ञानाच्च साध्या ॥

११ **सु०— ततोऽपि किमित्यत आह प्रसन्नेति ।**

अनु०— प्रसन्नता गुणोत्कर्षज्ञानादेव हि केवलम् ।
निर्दोषतापरिज्ञानादपि नान्येन केनचित् ।

विष्णोः **प्रसन्नता** च तदीय**गुणोत्कर्षज्ञानादेव केवलं निर्दोषतापरिज्ञानाच्च** भवति । **हि**शब्दः प्रमाणप्रसिद्धिं द्योतयति । तच्च वक्ष्यते । केवलशब्दोऽवधारणार्थः । 'नान्येन केनचिदि'त्येतत्प्रतिरूपेण अल्पगुणत्वादिज्ञानेन कर्मादिना वा नेत्यर्थः । तथा च मोक्षादिप्रयोजनेन शास्त्रेण, तत्साधनभूतं भगवद्गुणोत्कर्षनिर्दोषताज्ञानमेव, जीवानामुत्पादनीयमित्यतः सकलगुणपरिपूर्णे निरस्तसमस्तदोषे नारायण एवाशेषशास्त्रस्य महातात्पर्यमित्यवसीयते ।

परि०— तच्च वक्ष्यत इति । 'यो मामि'त्यादिनोत्तरवाक्य इति भावः ।

यादु०— तच्च वक्ष्यत इति । अनुपदमेवेति शेषः ।

वं०प०— तच्चेति । प्रमाणमित्यर्थः ॥ **अवधारणार्थ इति** । निर्दोषतापरिज्ञानादित्यनेनास्य सम्बन्धो द्रष्टव्यः । परिज्ञानाच्चेत्युक्त्याऽपिशब्दः समुच्चयार्थ इत्युक्तं भवति । ननु कथं द्वयोर्गुणोत्कर्षनिर्दोषतापरिज्ञानयोः समुच्चयः । उभयत्राप्यवधारणसद्भावेन परस्परं व्यावर्तितत्वादित्यतस्तद्व्यावर्त्यं दर्शयितुं नान्येन केनचिदित्युक्तं तस्यार्थमाह **नान्येन केनचिदितीति** । इत्यस्येत्यर्थ इत्यन्वयः ॥ **एतदिति** । एतयोर्गुणोत्कर्षनिर्दोषतापरिज्ञानयोरित्यर्थः । तथा च प्रसन्नता गुणोत्कर्षज्ञानादेव भवति । न त्वल्पगुणत्वज्ञानात् । तथा निर्दोषतापरिज्ञानादेव भवति । न तु दोषित्वपरिज्ञानात् । तथैतदुभयज्ञानव्यतिरिक्तकर्मादिसाधनेन वा न भवतीत्येवमनभिमतव्यावृत्त्यर्थमवधारणमित्यर्थः ।

शे०चं०— तच्च वक्ष्यत इति । 'यो मामि'त्याद्यागमरूपमनुपदमेवोदाहरिष्यमाणमित्यर्थः ।

वा०र०— केवलं निर्दोषतापरिज्ञानाच्चेति मूलम् । केवलशब्दस्यावधारणार्थतया व्याख्यास्यमानत्वान्निर्दोषतापरिज्ञानादेव चेत्यर्थः ।

॥ इति ईशस्य प्रसन्नता च गुणोत्कर्षज्ञानान्निर्दोषतापरिज्ञानाच्च साध्या ॥

॥ इति मोक्षश्च प्रसन्नादीशानादेव भवति, ईशस्य प्रसन्नता च गुणोत्कर्षज्ञानान्निर्दोषतापरिज्ञानाच्च भवति ॥

* * *

।। अथ उक्तार्थे प्रमाणोदाहरणानि ।।

।। अथ तत्र उक्तार्थे प्रामाण्यबोधकागमवाक्यानि ।।

१२ **सु०**— स्यादेतद्यदि तदीशानादित्यादिनोक्तं प्रामाणिकं स्यादित्यतस्तत्रागमवाक्यान्युदाहरति **यो मामिति** ।

अनु०— यो मामशेष दोषोज्झं गुणसर्वस्वबृंहितम् ।
जानात्यस्मै प्रसन्नोऽहं दद्यां मुक्तिं न चान्यथा ।
यो मामशेषाभ्यधिकं विजानाति स एव माम् ।
विजानात्यखिलांस्तस्य दद्यां कामान् परं पदम् ।
यो मामेवमसम्मूढः किं मां निन्दन्ति शत्रवः ।।

बृंहितशब्देन प्रत्येकमपि गुणानामनवधिकत्वमाचष्टे । **अशेषाभ्यधिकं** गुणैर्दोषाभावैश्च सर्वोत्तमम् । **स एव मां विजानाति** अन्यज्ञानस्य मत्प्रसादाहेतुत्वात् ।

'यो मामेवमि'त्यनेन 'कृतकृत्यश्च भारते'त्यन्तं भगवद्वाक्यं सङ्गृह्णाति । **एवं** समस्तैर्गुणैर्दोषाभावैश्च । 'क्षराक्षरोत्तमो हि पुरुषोत्तमः, स सर्वविदि'त्यादिस्तुत्या प्रसन्नता द्योत्यते । **सर्वभावेन** सर्वेण प्रकारेण । अन्यथा व्याघातात् । **कृतकृत्यो** मुक्तः ।

'किं माम्' इत्यनेन 'अभी३ इदमेकमेको अस्मि निष्पाळभी द्वा किमु त्रयः करन्ति । खले न पर्षान्प्रति हन्मि भूरिकिम्मां निन्दन्ति शत्रवोऽनिन्द्रा' (ऋ. १०-४८-७) इति श्रुतिमुपादत्ते ।

इदमेकं विश्वं **अभि** प्रति अहमेको **निष्पाळस्मि** नितरां सहत इति निष्पाट् । **द्वौ** प्रपञ्चाव**भि** प्रति अहमेको निष्पाळस्मि । त्रयोऽपि प्रपञ्चा मम **किमेव** कुर्वन्ति, न किमपि ममानिष्टं कर्तुमीशते । किन्त्वहमेव **खल इव** खलस्थितानि धान्यानीव **भूरि** भूरीन् बहून् बहुवारं वा तान्निष्ठुरान्निन्दकान् **प्रतिहन्मि** । तस्मादनीश्वरास्ते शत्रवो मां किं निन्दन्ती-

त्यर्थः । एतद्भगवतो वाक्यम् । अत्र निन्दकेषु भगवतोऽप्रसादोऽ(नर्थावा)निष्टावाप्तिश्च श्रूयते । निन्दा च दोषज्ञानादिकेति प्रसिद्धमेव ।

परि०— एवमिति गीतापदानुवादः । **समस्तैरित्यादिव्याख्या** । पुरुषोत्तममित्यस्यार्थः **क्षराक्षरेत्यादि** ॥ **स्तुत्येति** । ज्ञानिविषयकभगवत्कर्तृकस्तुत्या भगवतः प्रसन्नता द्योत्यत इत्यर्थः ॥ **अन्यथा व्याघातादिति** । सर्वात्मकत्वार्थत्वे पुरुषोत्तममित्युक्त्वा पुनस्तदात्मकत्वकथने व्याघातादित्यर्थः ॥

गु०दी०— **अन्यथा व्याघाता**दित्यत्र सर्वभावेन सर्वत्वेनेत्यर्थकथने भजतीत्यस्य व्याहतत्वादित्यर्थः । **निष्ठुरानिति** परुषपदस्यार्थकथनम् । परुषानित्यस्य श्लिष्टोच्चारणे पर्षानिति भवतीत्यर्थः । निरुक्तत्वादुकारलोपो वा ।

वं०प०— ननु सर्वभिदेनेत्यर्थ एव किं न स्यादित्यत आह **अन्यथेति** । पुरुषोत्तमं सर्वभिदेन जानातीत्युक्ते व्याघात इत्यर्थः । व्याघातप्रदर्शनार्थमेव पुरुषोत्तमशब्दः समस्तैरित्यादिना व्याख्यातः । पर्षानित्यस्यार्थमाह **निष्ठुरानिति** । 'सम्यग्वचो व्यक्तमुपादत्ते पुमानि'ति वाक्यव्याख्यानरूपम् । 'यतः पर्यङ्कशयन आह विष्णुः सनातन' इति दशमस्कन्धभागवततात्पर्यं हृदि निधायाह **एतद्भगवत इति** । नन्वत्र निन्दाया एव प्रसादहेतुत्वं नेत्युच्यते । न दोषज्ञानस्येत्यत आह **निन्दा चेति** ।

शे०चं०— सर्वस्वशब्देन पौनरुक्त्यं परिहरति **बृंहितशब्देनेति** । 'यो मामशेषाभ्यधिकमि'त्यस्य गुणोत्कर्षज्ञानादेः प्रसादादिहेतुत्वाप्रतिपादकतया प्रकृतानुपयोगमाशङ्क्य तदुपयोगितया व्याचष्टे **अशेषाभ्यधिकमिति** । एवशब्दाभिप्रायमाह **अन्यज्ञानस्येति** । दोषित्वादिना ज्ञानस्येत्यर्थः ॥ **यो मामित्यनेनेति** । उदाहृतांशमात्रस्य विवक्षितार्थप्रतिपादकत्वादिति भावः । ननु यो मामित्यनेन पुरुषोत्तमत्वज्ञानस्य मोक्षसाधनत्वप्रतिपादनेऽपि गुणोत्कर्षज्ञानादेस्तदप्रतिपादनात्प्रकृतानुपयोग इत्यतस्तदुपयोगितया व्याचष्टे **समस्तैरिति** । नन्वत्र ज्ञानस्य मोक्षसाधनत्वोक्तावपि प्रसादस्य तदनुक्तेर्नास्य प्रकृतोपयोगोऽस्तीत्यत आह **स सर्वविदिति स्तुत्येति** । ननु चोदाहृतवाक्ये सर्वभावेनेत्यनेन सर्वात्मकत्वेन ज्ञानस्य मोक्षसाधनत्वोक्तेर्नास्य प्रकृते उपयोगित्वं प्रत्युत तद्विरोधित्वमेवेति कथमस्य प्रमाणतयोपन्यास इत्यतो व्याचष्टे **सर्वेण प्रकारेणेति** । पराभिमतार्थे बाधकमाह **अन्यथेति** । 'भजती'त्युक्तभजनव्याघातात् 'उत्तमः पुरुषस्त्वन्य' इति पूर्ववाक्यविरोधाच्चेत्यर्थः । ननु गुणोत्कर्षज्ञानिनः कृतकृत्यत्वमात्रमनेनोच्यते न तु मुक्तत्वमिति कथमस्य प्रकृतोपयोग इत्यत आह **मुक्त इति** । नेति पदं हि लोके प्रतिषेधार्थ एव वर्तते । स्वाध्याये तु प्रतिषेधार्थे उपमार्थे च वर्तते । येन पदेनान्वीयते तत्पूर्वं प्रयुज्यमानं तत्प्रतिषेधे वर्तते । ततःपरं प्रयुज्यमानं तत्पदार्थप्रतियोगिकसादृश्ये वर्तते । 'नेति प्रतिषेधोऽर्थो, भाषायामुभयमन्वध्यानं नेन्द्रं देवममंसतेति प्रतिषेधार्थी यः पुरस्तादुपचारस्तस्य यत्प्रति-

षेधति, दुर्मदासो न सुरायामित्युपमार्थी य उपरिष्टादुपचारस्तस्य येनोपमीयत' इति यास्कोक्तेस्तथा चोपमेयवाचिनः खलशब्दादुपरिष्टात्प्रयुज्यमानं नेतिपदं खलपदार्थप्रतियोगिकसादृश्यार्थकमित्याशयेनाह **खल इवेति** । 'धान्यानि यद्वत्खलगानी'त्यादिस्मृत्यनुसारेण खलपदं खलस्थितधान्योपलक्षकमित्यभिप्रेत्य वा खलपदात्परतः स्थितधान्यपदाध्याहारं वाऽभिप्रेत्यैतत्तात्पर्यमाह **खलस्थितधान्यानीति** । ये त्वत्र च नशब्दस्य येनान्वीयते ततः पूर्वत्वमभिप्रेत्य क्वचित्पूर्वमपि भवतीत्येतद्वाक्यविषयतामाहुः । तेषामभिप्रायं न विद्मः । ननु निन्दकेषु भगवतोऽप्रसादश्चेद्भवतु निन्दाऽभावस्य प्रसादसाधनत्वं न तु दोषाभावज्ञानस्य प्रसादसाधनत्वमप्यनेनैव सेद्धुमर्हति । दोषज्ञानस्याप्रसादहेतुत्वानभिधानात्कथमस्य प्रकृतोपयोग इत्यत आह **निन्दा चेति** ।

वा०र०— यास्कोक्तेरिति स्वोक्तार्थे सम्मतिमाह **नेति प्रतिषेधार्थ इत्यादि** । **उभयमन्वध्यानमिति** । अत्राध्यायशब्देन वेदमात्रं तथा च वेदमुभयं प्रतिषेध उपमानेत्युभयमित्यर्थः । **यास्कोक्तेरिति** । निरुक्तकारेण ....त्यत्रेति शेषः । **ये त्वित्यादि** । अर्भको न कुमारक इत्येतद्व्याख्यानस्थलीयकर्मनिर्णयटीकारोक्त्याद्यनुसारेण अधिको विचारः पाशुपताधिकरणे द्रष्टव्य इत्याशयः ।

* * *

१३ **सु०— वाक्योदाहरणफलमाह इत्यादीति ।**

अनु०— इत्यादिवेदस्मृतिगवाक्यैरेवावसीयते ।

अवधारणेन प्राबल्यं सूचयति । 'प्रसादेन मुक्तिः सगुणवेदनादि'ति वक्ष्यमाणमत्रापि सम्बध्यते ।

परि०— अत्रापीति । 'इत्यादिवेदस्मृतिगवाक्यैरेवे'त्यत्रापीत्यर्थः । क्षुद्रफलहेतुप्रसादे व्यभिचारनिरासाय 'महाप्रसादत्वादि'ति प्रसादे महत्त्वविशेषणम् ।

वं०प०— सूचयतीति । शब्दादेव प्रमित इतिवदिति भावः ।

शे०चं०— लोकतश्चेत्यादिना प्रमाणान्तरस्याप्यत्राभिधानाद्वाक्यैरेवेत्यवधारणानुपपत्तिरित्यत आह **अवधारणेनेति** ।

।। इति उक्तार्थे प्रामाण्यबोधकागमवाक्यानि ।।

* * *

॥ अथ उक्तार्थे प्रामाण्यबोधकानुमानम् ॥

१४ सु०— अत्रानुमानमप्याह लोकतश्चेति ।

लोकतश्च प्रसादेन मुक्तिः सगुणवेदनात् ।

'इति'शब्दोऽध्याहार्यः । **अवसीयत** इति वर्तते । भगवत्प्रसादेन संसारान्मुक्तिर्भवति, स भगवत्प्रसादस्तद्गुणोत्कर्षवेदनाद्दोषाभाववेदनाच्च भवतीत्ययमर्थो लोकतो लोकदृष्टान्तोपेतानुमानतश्चा(नुमीयते)वसीयते । तथा च प्रयोगः । संसारान्मुक्तिः समर्थ(परमपु)पुरुषप्रसादसाध्या मुक्तित्वान्निगडमुक्तिवत् । न (च) हि भगवतोऽन्यस्तत्र समर्थोऽस्ति । विमतो भगवत्प्रसादो गुणोत्कर्षज्ञानसाध्यो महाप्रसादत्वाद्राजप्रसादवत् । पक्षतुल्यत्वान्न व्यभिचारश्चोदनीयः ।

परि०— ननु 'कामाद्गोप्यो भयात्कंस' इत्यादेर्गोपिकादिमुक्तिहेतुप्रसादे कामादिजन्ये व्यभिचार इत्यत आह **पक्षतुल्यत्वादिति** । ज्ञानपादे तत्तात्पर्यस्य वक्ष्यमाणत्वात् । तत्रापि गुणोत्कर्षज्ञानजन्य एव प्रसाद इति भावः ।

गु०दी०— 'द्वेषाच्चैद्यादयो नृपा' इत्यादिषु द्वेषान्मोक्षकथनात् मुक्तत्वहेतोस्तत्र व्यभिचार इत्यत आह **पक्षतुल्यत्वादिति** । तत्रापि चैद्यादीनां जयविजयरूपत्वेन भक्तत्वात् बहुकालकृतद्वारपरिपालनसर्वोत्तमत्वनिर्दोषत्वज्ञानादिनेषद्द्वेषमुपेक्ष्य, मुक्तिं ददातीत्यर्थस्यैव कथितत्वान्न व्यभिचार इत्यर्थः ।

यादु०— महाप्रसादत्वादिति । अत्र स्वर्गजनके कर्मसाध्येऽधमप्रसादे व्यभिचारवारणाय **म**हेत्युक्तम् । तदर्थश्चोत्तमत्वं मोचकत्वमिति यावत् । 'उत्तमस्त्वेव मुक्तिद' इति वचनात् । ननु चैद्यादिमोचकभगवत्प्रसादेऽस्य हेतोर्व्यभिचार इत्यत आह **पक्षतुल्यत्वादिति** । तत्रापि भगवद्गुणोत्कर्षज्ञानसाध्यत्वमस्तीत्यन्यत्रोपपादितमिति भावः । अथवेन्द्रमहाप्रसादकामः 'अहल्यायै जारे'ति तन्निन्दामेव करोति ततस्तत्र व्यभिचार इत्यत आह **पक्षेति** । अहल्याजारत्वप्रतिपादकं वाक्यमपि 'दोषकृतोऽपि न बहुतरो लेप आसीदि'तीन्द्रगुणोत्कर्षप्रतिपादकतया तत्स्तुतिरूपमेव न निन्दारूपमिति गीताभाष्ये प्रतिपादितमित्यर्थः ॥ ३-२-८ ॥

वं०प०— तत्र संसारान्मोचने ।

शे०चं०— अत्र 'लोकतश्चे'त्युक्तहेतुं प्रति 'प्रसादेन मुक्तिः सगुणवेदनादि'त्यस्य साध्यत्वाप्रतीतेरितिशब्दाध्याहारेण योजयति **इतिशब्द इति** । न च पूर्ववाक्यस्थेतिशब्दानुवृत्त्यैवोपपत्तेः किमध्याहारेणेति

वाच्यम् । अन्यान्वितस्यान्यत्रान्वयानुपपत्त्याऽध्याहारस्यावश्यकत्वात्साकाङ्क्षत्वाद्वाक्याभासतां परिहरति **अवसीयत इति** । लोकस्याप्रमाणत्वादाह **लोकत इति** । समर्थपुरुषेति उद्देश्यसिद्ध्यर्थं विशेषणम् । भगवत्प्रसादसाध्यत्वस्यैवोद्देश्यत्वात् । न चैवं भगवत्प्रसादसाध्येत्येव साध्यतां किं पर्यवसानसापेक्षेणानेनेति वाच्यम् । दृष्टान्ते साध्यवैकल्यपरिहाराय तस्यावश्यकत्वादिति भावः ॥ **महाप्रसादत्वादिति** । कर्मादिसाध्ये भगवत्प्रसादे व्यभिचारवारणाय महत्वेन प्रसादो विशेषितः । तदर्थश्चोत्तमत्वं मोचकत्वमिति यावत् । नन्विन्द्रप्रसादकामः 'अहल्यायै जारे'ति तन्निन्दामेव करोति । अतो भग्नव्याप्तिकमनुमानमित्यतो गीताभाष्यरीत्या 'दोषकृतोऽपि ते तत्फलं बहुतरो लेपो नासीदि'त्यर्थप्रतिपादकतया तद्वाक्यस्योत्कर्षमात्रपरत्वेन पक्षतुल्यत्वान्न तत्र व्यभिचार इत्याह **पक्षतुल्यत्वादिति** । केचित्तु चैद्यादीनां मोक्षसाधनभगवत्प्रसादस्य महाप्रसादत्वेऽपि द्वेषसाध्यत्वेन गुणोत्कर्षज्ञानसाध्यत्वाभावात् तत्र व्यभिचार इत्यत इदमुक्तमित्याहुः ।

वा०र०— 'अहल्यायै जार' इति तद्द्वितीयाध्यायस्थगीताभाष्यटीकानुसारेणाह **नन्विन्द्रप्रसादकाम इत्यादि** । अन्यथाख्यातिकृतोदाहृतं तन्मूलग्रन्थे स्वयमुत्प्रेक्षितं पक्षमनुवदति **केचित्त्विति** । गीताभाष्यरीत्या ग्रन्थप्रवृत्तिपरित्यागेन प्रकारान्तरकल्पनायोग इत्यरुचिं सूचयत्याहुरित्यनेन ।

स०व्र०— ननु चैद्यादीनां भगवत्प्रसादस्य मोक्षसाधनत्वेन महाप्रसादत्वेऽपि द्वेषसाध्यत्वेन गुणोत्कर्षज्ञानसाध्यत्वाभावात् तत्र व्यभिचार इत्यत आह **पक्षतुल्यत्वादिति** ।

॥ इति उक्तार्थे प्रामाण्यबोधकानुमानम् ॥
॥ इति उक्तार्थे प्रमाणोदाहरणानि ॥

* * *

॥ अथ महातात्पर्यविरोधिप्रमाणानामप्रामाण्यप्रतिपादनोपसंहारपूर्वकः परकृतापव्याख्याननिरासेऽप्युक्तयुक्त्यतिदेशः ॥

१५ **सु०**— महातात्पर्यरोधेनेत्यादिनोक्तम् उपसंहरन् परकृतापव्याख्याननिरासेऽप्युक्तां युक्तिमतिदिशति **महातात्पर्येति** ।

अनु०— महातात्पर्यमुख्यस्य विरोधादत एव हि ।
दोषित्वनिर्गुणत्वाल्पगुणत्वादि कथञ्चन ।
नार्थः श्रुतिपुराणादेः

परममहातात्पर्यस्य । **निर्गुणत्वग्रहणमपव्याख्याननिरासार्थम्** । **कथञ्चनेत्युपाधिसम्बन्धादिनेत्यर्थः** ।

परि०— महातात्पर्यमुख्यस्येत्यस्यार्थः **परमेत्यादि** । समासः सुखविशिष्टाभिधानादेवेत्यादाविव ध्येय इति भावः ।

गु०दी०— **निर्गुणत्वग्रहणमपव्याख्याननिरासार्थमि**त्यत्र 'न स्थानतोऽपीत्यत्र यत्परेण निर्गुणत्वापरपर्याये निर्विशेषत्वे तात्पर्यमुक्तम्, तन्निरासार्थमि'त्यर्थः । 'तमिममजमहं शरीरभाजां हृदि हृदि विष्ठितमात्मकल्पितानाम् । प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोह' इति भागवते स्थानभेदात् भगवन्मूर्तीनां भेदमाशङ्क्य सूर्यभेदेन 'विधूतभेदमोह' इति वचनाच्च स्वगतभेदविनिन्दनेनाभेदसमर्थनात् । न स्थानतोऽपीत्यधिकरणमपि समाख्याबलात्तत्समानार्थकमेवेति गम्यते ॥ ३ । २ । ८ ॥

शे०चं०— ननूक्तार्थप्रतिपादकत्वान्महातात्पर्येत्यादिकमनर्थकम् । न चोक्तोपसंहारार्थत्वान्न तदिति वाच्यम् । तथाऽप्यत एवेत्येतद्वाक्यं विनैव तत्सिद्ध्या तद्वैयर्थ्यानिरासादित्यतस्तं विनोक्तोपसंहारसिद्धावपि तस्यांशस्यापव्याख्याननिरासे उक्तन्यायातिदेशार्थवत्त्वसम्भवादित्यभिप्रेत्योक्ताभिप्रायेणोत्तरग्रन्थं सङ्गमयति **महातात्पर्यरोधेनेतीति** । अत्र मूलेऽत एवेत्यस्यायमर्थः । पूर्वपक्ष्युत्प्रेक्षितश्रुत्यर्थनिरासार्थमुपन्यस्तो यो महातात्पर्यनिरोधस्तस्मादेव पराभिप्रेतनिर्गुणे तात्पर्यमपि नेतीति । नन्वत्र भाष्येऽत एवेत्यंशस्यापव्याख्याननिरासे उक्तन्यायातिदेशकत्वे न किञ्चिज्ज्ञापकमिति कथं तत्परत्वमित्यत आह **निर्गुणत्वेति** । अन्यथा दोषित्वाल्पगुणत्वयोरेव पूर्वपक्षिणा शङ्कितत्वात्तदनुसारेण तद्विरुद्धनिर्दोषत्वगुणपूर्णत्वयोरेव श्रुत्यर्थतयोपसंहर्तव्यत्वान्निर्गुणत्वस्य श्रुत्यर्थत्वाभाववर्णनासङ्गतिप्रसङ्गादिति भावः ॥ **कथञ्चनेत्युपाधिसम्बन्धादिनेत्यर्थ इति** । निर्दोषत्वादौ महातात्पर्यात्तद्विरोधेन दोषित्वादेः पारमार्थिकत्वासम्भवेऽप्यौपाधिकस्याविघ्नकस्य वा दोषित्वस्य सम्भवात् तस्य श्रुत्यर्थत्वमस्त्विति न वाच्यमिति कथञ्चनेत्यनेन सूचितमित्यर्थः ।

वा०र०— मूलात्स्पष्टमतिदेशविषयाप्रतीतेस्तद्विषयं दर्शयति **अत्र मूले इति** । अनुव्याख्यान इत्यर्थः ।

॥ इति महातात्पर्यविरोधिप्रमाणानामप्रामाण्यप्रतिपादनोपसंहारपूर्वकः परकृतापव्याख्याननिरासेऽप्युक्तयुक्त्यतिदेशः ॥

* * *

।। अथ सकलवेदा(दीनां)न्तानां भगवद्गुणोत्कर्षादौ महातात्पर्यं यदुक्तं
तन्न केवलमानुमानिकम्, अपि तु वाचनिकमपि ।।

१६ सु०— न केवलमानुमानिकं सकलवेदा(दीनां)न्तानां भगवद्गुणोत्कर्षादौ महातात्पर्यम्, किन्तु वाचनिकं चेत्याह **तद्विरुद्ध इति** ।

अनु०— तद्विरुद्धोऽखिलस्य च ।
अर्थः स्वयं विनिर्णीतो वासुदेवेन सादरम् ।

दोषित्वात् **अविरुद्धः** । **अखिलस्य** शास्त्रस्य । तद्वाक्यं पठति **इति गुह्यतममिति** ।

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ।
इति

इति यन्मया मम पुरुषोत्तमत्वादिकमुक्तं इदं **गुह्यतमं शास्त्रं** तात्पर्येण सर्वशास्त्रैः प्रतिपाद्योऽर्थः । **एतद्बुद्ध्वा** इति प्रशंसया आदरः प्रतीयते ।

शे०चं०— उक्तार्थस्य वाचनिकत्वसिद्ध्यर्थं प्रकृतोपयोगितया व्याचष्टे **इति यदिति** । सादरत्वस्य कथं लाभ इत्यत आह **प्रशंसयेति** ।

।। इति सकलवेदा(दीनां)न्तानां भगवद्गुणोत्कर्षादौ महातात्पर्यं यदुक्तं
तन्न केवलमानुमानिकम्, अपि तु वाचनिकमपि ।।
।। इति परमेश्वरस्य सकलगुणपरिपूर्णत्वे निरस्तसमस्तदोषत्वे च
वेदादीनां महातात्पर्यमित्यर्थसाधनम् ।।

* * *

॥ अथ स्थानभेदानुमाने सूचितदोषोद्घाटनम् ॥

१७ सु०— यदुक्तं स्थानभेदानुमानं तदन्यथासिद्धमिति परेशितुरित्यनेन सूचितम् । यथोक्तम् 'ऐश्वर्याद्रूपमेकं च सूर्यवद्बहुधेयते' इति ।

कालातीतं चेत्याह अत इति ।

अनु०— अतोऽखिलसच्छास्त्रविरुद्धत्वेन नानुमा ।
वर्तते तत्र

तत्र परमेश्वरभेदादौ ।

परि०— यथोक्तमिति । भाष्ये ॥

॥ इति स्थानभेदानुमाने सूचितदोषोद्घाटनम् ॥
॥ इति उक्तार्थविरुद्धप्रमाणानामप्रामाण्यम् ॥
॥ इति एतदधिकरणीयप्रथमसूत्रोक्तार्थमाक्षिप्य समाधायकतया 'न भेदात्'इत्यादि-द्वितीयसूत्रार्थरूपेण 'तद्विरुद्धं तु'इत्याद्यनुव्याख्यानस्य विवरणम् ॥
॥ इति 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' इति प्रथमसूत्रार्थतया 'न स्थानभेदतोऽप्यस्य..'इत्याद्यनुव्याख्यानस्य विवरणम् ॥

* * *

॥ अथ अधिकरणार्थोपसंहारः ॥

१८ सु०— अधिकरणार्थमुपसंहरति तेनेति ।

अनु०— तेनेशो निर्णीतोऽखिलसद्गुणः ॥

'सत्'शब्दो निर्दोषार्थः ।

निर्भेद इत्युपसंहर्तव्ये तत्फलोपसंहारोऽयम् अपव्याख्याननिरासमप्युपसंहर्तुम् ॥ ॥ ३-२-८ ॥

वं०प०— सच्छब्दस्य सन्घट इत्यादाविव सत्तारूपार्थग्रहणे प्रकृतासङ्गतेस्तदर्थमाह **निर्दोषार्थ इति** ॥ **उपसंहर्तव्य इति** । अत एव सङ्क्षेपे सर्वरूपेष्वभेदवानित्युक्तम् । **अपव्याख्यानं** अत्राधिकरणे ब्रह्मणो निर्गुणत्वप्रतिपादनरूपम् ॥ ३-२-८ ॥

शे०चं०— अखिलगुणत्वनिर्दोषत्वयोः पूर्वपक्षिणाऽऽक्षिप्तत्वात्सिद्धान्तिना च समर्थिततत्वात्तदनुरोधेनोभयोऽप्युपसंहर्तव्यत्वात् कथं गुणपूर्णत्वमात्रोपसंहार इत्यत आह **सच्छब्द इति** । ननु स्थानभेदेन भगवति भेदस्यैव साक्षात्परेण शङ्कितत्वात् तदनुषङ्गेणैव दोषित्वादेरापादनात्तदनुरोधेन भाष्यकृताऽपि निर्भेदत्वस्यैवोपसंहर्तव्यत्वात् कथं तदनुपसंहृत्य तदनुषङ्गलब्धस्य निर्दोषत्वादेरेवोपसंहार इत्यत आह **निर्भेद इतीति** ॥ ॥ ३-२-८ ॥

॥ इति अधिकरणार्थोपसंहारः ॥

॥ इति स्थान(तोऽप्य)भेदाधिकरणम् ॥

३-२-८-११ तः १३ ॥

★ ★ ★

॥ अथ उपमाधिकरणम् ॥

॥ अथ तत्र पादसङ्गतिप्रदर्शनपूर्वकं प्रकारान्तरेणैतदधिकरणप्रतिपाद्यभूतस्य (भास्करमतोक्त)भेदाभेदनिराकरणस्य प्रदर्शनम् ॥

ब्र०सू०— ॐ अत एव चोपमा सूर्यकादिवत् ॐ

१९ सु०— इह परमेश्वरे जीवस्यात्यन्तिकभक्तिसिद्धये भेदाभेदमतं निराक्रियते ।

शे०चं०— आपातप्रतीतभाष्यदिशेदमधिकरणमभेदनिरासेन भेदपरमिति प्रतीयते । तच्चायुक्तम् । 'पृथगित्यत्र पूर्णते'ति भेदसमर्थनस्य पृथगधिकरण एव समाप्तत्वाभिधानेन तदुत्तरसूत्राणां भेदपरत्वाभावसिद्धेरिति भावेन पादसङ्गतिं दर्शयन्नेव प्रकारान्तरेणैतदधिकरणप्रतिपाद्यमाह इहेत्यादिना ।

वा०र०— भाष्यदिशेति । चशब्देन भेदं दर्शयतीति आत्यन्तिकभक्तिसिद्धय इत्युक्तिप्रयोजनकथनमेतत् ।

॥ इति पादसङ्गतिप्रदर्शनपूर्वकं प्रकारान्तरेणैतदधिकरणप्रतिपाद्यभूतस्य (भास्करमतोक्त)भेदाभेदनिराकरणस्य प्रदर्शनम् ॥

* * *

॥ अथ सूत्रगतदृष्टान्तवचनमात्रं न कस्यचिदर्थस्य साधकं बाधकं वेत्यतः पूर्वपक्षनिषेधपूर्वकं प्रतिज्ञाहेत्वोर्दर्शनम् ॥

॥ अथ तत्र चेतनत्वाद्यनुमानेन जीवस्य ब्रह्माभेदसाधनं न युक्तम्, श्रुत्या 'जीवस्य ब्रह्माभासत्व'स्य सुस्पष्टप्रतिपादनात् ॥

२० सु०— तथा हि । 'जीवब्रह्मणोर्भेदस्तावत्सिद्धान्तिनाऽङ्गीक्रियत एव, अभेदस्त्वनुमानतः सिद्धः । जीवो ब्रह्माभिन्नश्चेतनत्वाद्ब्रह्मवत्; ब्रह्मांशत्वात्, यो यदंशः स तदभिन्नो यथेश्वरांशो मत्स्यादिस्तदभिन्न इति । अतो भिन्नाभिन्नो ब्रह्मणा जीव' इत्येवं प्राप्ते प्रतिविहितं सूत्रकृता सूर्यकादिवदिति सूत्रखण्डेन । तदेतद्दृष्टान्तवचनमात्रं न कस्यचिदर्थस्य साधकं बाधकं वेत्यतः पूर्वपक्षनिषेधपूर्वकं प्रतिज्ञाहेतू दर्शयति न चेति ।

अनु०— न च चित्त्वादभिन्नत्वं जीवस्येशवदाप्यते ।
यत आभासतामेव श्रुतिरस्य वदत्यलम् ।

'चित्त्वादि'त्यंशत्वस्याप्युपलक्षणम् । **अभिन्नत्वं** ब्रह्मणेति शेषः । **ईशवत्** ब्रह्मवदीश्वरावतारवच्च । **आप्यते** युज्यते । **अस्य** जीवस्य । **अस्य** ब्रह्मण आभासताम् । **एवे**त्यविगानेनालं विस्पष्टम् ।

परि०— क्रमेण हेतुद्वयस्य दृष्टान्तलाभाय 'ईशवदि'त्येतत् द्वेधा व्याचष्टे **ब्रह्मवदीश्वरावतारवच्चेति** । अस्येति पदमावृत्य बिम्बरूपोभयपरत्वेन व्याचष्टे **अस्य जीवस्येत्यादि** । एवकारार्थः **अविगानेनेति** । निस्सन्देह इत्यर्थः ।

यादु०— अंशत्वस्याप्युपलक्षणमिति । 'चेतनत्वेन चांशत्वादि'ति वक्ष्यमाणत्वादिति भावः । भास्करमते ईश्वराज्जीवस्यात्यन्तभेद एवेति वक्ष्यमाणत्वेन साध्यवैकल्यं स्यादित्यत आह **ईशवद्ब्रह्मवदिति** । नन्वेवं द्वितीयहेतौ साध्यवैकल्यमित्यत आह **ईश्वरावतारवच्चेति** ॥

वं०प०— दर्शयतीति । पूर्वार्धेन प्रतिज्ञा उत्तरार्धेन हेतुर्दर्शित इति भावः । अयं चाभासत्त्वरूपहेतुः सौत्रचशब्दसूचित इति ज्ञातव्यम् । सौत्रश्चशब्द आभासत्वसमुच्चयार्थतया व्याख्यात इति वक्ष्यमाणत्वात् । द्वितीयहेतावपि ब्रह्मण एव दृष्टान्तत्वे तत्रांशत्वाभावेन साधनवैकल्यं स्यादित्यतो दृष्टान्तान्तरमाह **ईश्वरावतारवदिति** ।

शे०चं०— ननु 'न च चित्त्वादभिन्नत्वम्' इत्यादिना उत्तरत्र अभेदस्यैवाशङ्क्य निरसनाद्भेदपरत्वमेवास्य सूत्रस्य युक्तम् । न च पौनरुक्त्यं दोषः । वाक्यान्तरद्योतकत्वादित्युक्तरीत्या भेदपरसूत्रान्तरेष्विव तत्परिहारसम्भवात् । तत्कथं भेदाभेदमतनिरासकत्वमस्य स्यादित्यतोऽत्र पूर्वपक्षभाष्ये भेदस्य सिद्धान्तिनाऽङ्गीकृतत्वेन तत्साधने सिद्धसाधनत्वप्रसङ्गादेव तदसाधनम् । न तु भेदस्य स्वानभिमतत्वात् । अतो न दोष इत्याह **भेदस्तावदिति** ॥ **न कस्यचिदिति** । अन्यथा प्रतिदृष्टान्तवचनेन विपरीतस्याप्यर्थस्य सिद्धिप्रसङ्गादिति भावः । **पूर्वपक्षनिषेधपूर्वकमित्यादि** । अनेन 'न च'-इत्यादिपूर्वार्धः पूर्वपक्षनिषेधपरः । चित्त्वादित्यस्य तद्बहिर्भविन तदावृत्त्या प्रतिज्ञोपदर्शनपर इत्युक्तं भवति । 'चेतनत्वेन चांशत्वादि'त्युपसंहारेंऽशत्वस्यापि श्रवणात् तदनुसारेणोपक्रमोक्तं चित्त्वं तदुपलक्षणतया व्याख्याति **चित्त्वादितीति** ॥ **ईशवद्ब्रह्मवदिति** । यद्यप्यत्रेशशब्दवाच्येशस्यापि चेतनत्वाद्ब्रह्माभिन्नत्वाच्चोक्तसाध्यसाधनवत्तया दृष्टान्तत्वसम्भवान्न तत्परित्यागेन ब्रह्मणो दृष्टान्ततया व्याख्यानमुचितम् । तथाऽपि परमार्थभूतमायासम्बद्धस्य ब्रह्मण एव परमते ईशत्वात् तत्र विशेष्यभूतब्रह्ममात्र-

स्योक्तसाध्यसाधनवत्तया दृष्टान्तत्वसम्भवे तत्परित्यागेन विशिष्टब्रह्मभूतस्येशस्य तत्त्वेनोपादानमनुचितमिति भावेन विशेष्यभूतब्रह्ममात्रपरत्वेनेदमीशशब्दव्याख्यानमित्यवधेयम् । ब्रह्मणो ब्रह्मांशत्वाभावेन साधनवैकल्यापत्त्या चेतनत्वानुमान इव ब्रह्मांशत्वानुमाने दृष्टान्तत्वासम्भवात् तद्वेत्यभिप्रायेणेशशब्दतात्पर्यमाह **ईश्वरावतारवच्चेति** । मत्स्यादिरूपब्रह्मांशवदित्यर्थः । भगवदाभासत्ववज्जन्यत्वादेरपि श्रुत्या प्रतिपादनादाभासतामेवेत्यवधारणानुपपत्तिमाशङ्क्य तत्तात्पर्यमाह **अविगानेनेति** ।

वा०र०— अभेदस्यैवेति । न तु भेदस्यापीति भेदाभेदशङ्कातन्निरसनयोरभाव इत्याशयः । **वाक्यान्तरेति** । यद्यपि तदुत्तरसूत्राणां भेदपरत्वासिद्धेरित्युक्तस्य न परिच्छेदोऽनेन भवति । तथापि पूर्वत्र वस्तुस्थितिकथनम् । अत्र तु कथञ्चिद्भेदपरत्वमेवोपपादयितुं शक्यमित्यत्र तात्पर्यात् । अत एव सम्भवादित्युक्तम् । **भेदपरसूत्रान्तरेष्विति** । भेदव्यपदेशाच्चेत्यादिसूत्रेष्वित्यर्थः । **अतो न दोष इति** । न च चित्त्वादभिन्नत्वमित्युत्तरवाक्यस्याभेदमात्राशङ्कानिरासार्थत्वेन भेदमात्रपरत्वाद्भेदाभेदमतनिरासकत्वायोग इत्ययं दोषो नेत्यर्थः । **प्रतिदृष्टान्तेति** । साध्याभाववत्पदार्थदृष्टान्तेत्यर्थः । **अनेन 'न चे'त्यादिपूर्वार्ध इति** । यत आभासतामेवेत्युत्तरार्धेन हेतोरभिधानस्य स्पष्टत्वमभिप्रेत्य च प्रतिज्ञोपदर्शकत्वमस्य व्युत्पादितम् । पूर्वपक्षप्रतिषेधपरोऽपि प्रतिज्ञोपदर्शनपर इति योज्यम् । विशिष्टस्य जीवो ब्रह्माभिन्नो नेति प्रतिज्ञोपदर्शकत्वायोगादुक्तम् **चित्त्वादित्यस्येति** । उपलक्षणं चैतत् । ईशवदाप्यत इत्यस्य चेति बोध्यम् । तथा च चित्त्वादित्यादेस्त्यागे सति न च जीवस्याभिन्नत्वमित्येवमावृत्त्येति सिद्ध्यति । अत्र तद्वहिभविनावृत्त्या त्विति पाठः । तदावृत्त्येति पाठो लेखकागतः । **ब्रह्मांशत्वानुमान इति** । ब्रह्मण इति वर्तते । अत्रैतदितीत्यनन्तरं सूर्यकादिरित्यारभ्य इति वेत्यन्तानन्तरं साकाङ्क्षत्वादित्यारभ्य भवतीत्यन्तो ग्रन्थपाठः ।

चषकः— हेतुद्वयस्य निदर्शनद्वयलाभायेशवदिति पदं तन्त्रताद्याश्रयणेन व्याकुरुते **ब्रह्मवदित्यादि** ।

।। इति चेतनत्वाद्यनुमानेन जीवस्य ब्रह्माभेदसाधनं न युक्तम्, श्रुत्या 'जीवस्य ब्रह्माभासत्व'स्य सुस्पष्टप्रतिपादनात् ।।

* * *

२१ **सु०— एतदुक्तं भवति । न चेतनत्वाद्यनुमानेन जीवस्य ब्रह्माभेदसाधनं युक्तम्, जीवो ब्रह्माभिन्नो न भवति तदाभासत्वाद्यो यदाभासो नासौ तदभिन्नो यथा सूर्यकादिः सूर्यादिनेत्यनुमानविरोधात् । न चासिद्धो हेतुर्विस्पष्टश्रुतिसिद्धत्वादिति ।**

यादु०— सूर्यकादिरिति । सूर्यप्रतिबिम्बादिरित्यर्थः । सूर्यादिप्रतिबिम्ब इति यावत् । अत एव वक्ष्यति भाष्यकारः 'सूर्यादिप्रतिबिम्बोपमत्वत' इति ।

शे०चं०— किमनेन ग्रन्थेनाभेदानुमानस्य दूषणमुक्तं भवतीति न प्रतीयते। आभासत्वस्य श्रुतिसिद्धत्वोक्तेरपि प्रयोजनं न दृश्यत इत्यतस्तदुभयं दर्शयति **एतदिति**। **सूर्यकादिरिति**। सूर्यप्रतिबिम्बादिरित्यर्थः। सूर्यादिप्रतिबिम्ब इत्येवार्थः। अत एव भाष्ये 'सूर्यादिप्रतिबिम्बोपमत्वत' इत्येवोक्तमिति।

वा०र०— **सूर्यप्रतिबिम्बादिति**। इवेति प्रतिकृता ...... प्रतिबिम्बादिरित्युक्ते अन्यप्रतिबिम्बभूतानामपि प्राप्तावपि तेषामिवान्येषां प्रतिबिम्बभूतानामपि ग्रहणं प्रसज्येत। तद्व्यावृत्तये व्याख्यानान्तरमाह **सूर्यादीति**। इत्येवोक्तमिति वेति पाठः।

* * *

।। अथ जीवस्य ब्रह्माभासत्वप्रतिपादकश्रुत्युदाहरणम् ।।

२२ **सु०**— काऽसौ श्रुतिरित्यतस्तामुदाहरति **यथेति**।

अनु०— यथैषा पुरुषे छाया एतस्मिन्नेतदाततम्।

छायाऽऽतता, तथैतस्मिन्परमात्मनि, एतज्जीवजातं, आततं आयत्तमिति यावत्। एतदेव विशदश्रुतिभ्यां दर्शयति **छायेति**।

छाया यथा पुंसदृशी पुमधीना च दृश्यते।
एवमेवात्मकाः सर्वे ब्रह्माद्याः परमात्मनः।
सत्ताप्रतीतिकार्येषु पुमधीना यथेयते।
आभासा एव पुरुषा मुक्ताश्च परमात्मनः।

आत्मका अल्पचेतनाः। **पुरुषाः** संसारिणः। तदधीनत्वादिकमेवाभासत्वमिति वक्ष्यति।

परि०— इति वक्ष्यतीति। 'यदुक्तं तदधीनत्वमि'त्यादिनेति भावः।

वं०प०— आयत्तम् अधीनम्। 'अधीनो निघ्न आयत्त' इत्यभिधानात्। कप्रत्ययार्थः **अल्पेति**। नन्वाभासत्वे इयं श्रुतिः कथं मानम्। अत्र तदधीनत्वस्यैवोक्तेरित्यत आह **तदधीनत्वेति**।

शे०चं०— साकाङ्क्षत्वादपेक्षितं पूरयति **छायाऽऽततेति** । अनेनाततमिति वक्ष्यमाणमिहापि सम्बध्यते । योग्यतावशाच्च लिङ्गविपरिणाम इति सूचितं भवति । श्रुतेः पूर्वमेवोदाहृतत्वाच्छायेत्याद्युत्तरभाष्यवैयर्थ्यमाशङ्क्य परिहरति **विशदेति** । एकश्रुतित्वभ्रमनिरासायाह **श्रुतिभ्यामिति** । अवच्छेदकाभावेऽसङ्कुचितवृत्तिनाऽऽत्मशब्देन रुद्रादीनामिव मत्स्यादीनामपि प्राप्त्या तेषामपि ब्रह्माभासत्वाद्ब्रह्माभेदाभावानुमानं स्यादन्यथा तत्रैवोक्तानुमानस्यानैकान्तिकत्वापातादित्यतः तत्सङ्कुचितवृत्तितामाश्रित्य तत्सङ्ग्राह्यतावच्छेदकमुक्तम् **आत्मका इति** । तद्व्याचष्टे **अल्पचेतना इति** । अनेनात्मशब्दश्चेतनपरः कप्रत्ययश्चाल्पार्थ इत्युक्तं भवति । मुक्तानामपि पुरुषत्वात्कथं तत्प्रतिद्वन्द्वित्वेन पुरुषा इत्युक्तिरित्यतोऽत्र पुरुषपदस्य संसारिपरत्वान्नानुपपत्तिरित्याशयेन तद्व्याचष्टे **संसारिण इति** । उदाहृतवाक्यैर्जीवानां भगवदधीनत्वादिसिद्धावपि कथमाभासत्वसिद्धिरित्यत आह **तदधीनत्वादिकमेवेति** ॥ **वक्ष्यतीति** । 'तावन्मात्रेण चाभासो रूपमेषां चिदात्मनाम्' इत्यादिनेति शेषः ।

वा०र०— **श्रुतेरिति** । श्रुतिरूपप्रमाणस्येत्यर्थः । यथैषेत्यादिना इति शेषः । अवच्छेदकाभावे असङ्कुचितेत्येतच्छब्दः शृङ्गादेरित्यप्रामाणिकोपलक्षणमिति वैशेषिकाधिकरणमूलटीकाप्रपञ्चे निरूपितप्रकारेण व्याख्येयः । **मत्स्यादीनामपि प्राप्त्येति** । ततश्च तेषामपि ब्रह्माभासत्वमुक्तं स्यादिति योज्यम् । **तत्सङ्ग्राह्यतावच्छेदकमुक्तमिति** । 'छाया यथे'ति द्वितीयश्रुताविति शेषः । **संसारिपरत्वादिति** । पुरि शेत इति व्युत्पत्त्या शरीरसम्बन्धवदभिधायकत्वादिति भावः । अत एव .... तथैवोक्तम् । अनुव्याख्यानगतं तदधीनपदं भावप्रधानमिति स्पष्टयितुमुक्तं मूले **तदधीनत्वत इति** ।

स०व्र०— **वक्ष्यतीति** । तदधीनत्वादित्यादिनेति शेषः ॥ अत एवाभासत्वव्याख्यानं **तदधीन इति** ।

॥ इति जीवस्य ब्रह्माभासत्वप्रतिपादकश्रुत्युदाहरणम् ॥

॥ इति सूत्रगतदृष्टान्तवचनमात्रं न कस्यचिदर्थस्य साधकं बाधकं वेत्यतः पूर्वपक्षनिषेधपूर्वकं प्रतिज्ञाहेत्वोर्दर्शनम् ॥

* * *

२३ सु०— परमेश्वराभासत्वं (न सर्वेषां सा) च न साक्षात् किन्तु पारम्पर्येणेति स्वरूपकथनाय श्रुतिद्वयं पठति छाया विष्णोरिति ।

अनु०— छाया विष्णो रमा, तस्याश्छाया धाता, विशेषकौ ।
तस्य, इन्द्रकामौ च तयोः, तयोरन्येऽखिला अपि ।
हरेर्ब्रह्मा,ऽस्य गीः, तस्या विशेषौ, इन्द्र एतयोः ।

मारश्चाभासकाः सर्व एतयोस्तदधीनतः ।
सर्वेऽल्पशक्तयश्चैव पूर्णशक्तिः परो हरिः ।
चेतनत्वेऽपि भिन्नास्ते तस्मादेतेन सर्वदा ।

छायेव **छाया** । **विशेषकौ** गरुडशेषौ । **तस्य** धातुश्छाये । **तयोः** गरुडशेषयोः । पुनस्तयोरिन्द्रकामयोः । **हरेर्ब्रह्मा** । आभास इति सर्वत्र सम्बन्धः । आभासत्वव्याख्यानं **तदधीनत इति** । सर्व इत्यनेन सर्वेषां परमेश्वराभासत्वमुपपादयति । 'च'शब्दो हरिस्त्विति तुशब्दार्थः । आभासत्वे किमित्यत उक्तं **चेतनत्वेऽपीति** । अत्रापि तदंश(त्वस्योप)त्वोपलक्षणम् । **तस्मात्** आभासत्वात् । **सर्वदा** इत्यनेन भिन्ना एवेत्यवधारणं सूचयति । उदाहृतश्रुतीनां फलमाह **इत्यादीति** ।

इत्यादिश्रुतिवाक्येभ्यो ज्ञायते भेद एव हि ।

जीवस्य परमेश्वराभासत्वं ज्ञायते, तेनात्यन्तभेदश्च ज्ञायत इत्यर्थः । न परानुमानयोः सत्प्रतिपक्षत्वमुच्यते, किन्त्वस्मदीयानुमानस्य श्रौतत्वेन प्रबलत्वाद्बाधितत्वमिति भावः ।

वं०प०— अत्रापीति । तथा च चेतनत्वेऽप्यंशत्वेऽपीत्युक्त्या अभेदसाधकतयोक्तयोरनयोर्हेत्वोरप्रयोजकतोक्तेति ज्ञेयम् ॥ **उच्यत इति** । येन जीवस्य ब्रह्मभेदानिश्चय इति भावः ।

शे०चं०— आभासत्वमात्रस्यैवाभेदाभावसाधकत्वात्तत्साधनस्य प्रकृतोपयोगेऽपि साक्षात्वपारम्पर्ययोस्तत्साधनानुपयोगित्वात् तद्व्युत्पादनं भाष्यकारीयमनर्थकमित्यत उक्तं **स्वरूपकथनायेति** । 'सर्वेऽल्पशक्तयश्चैवे'ति चशब्दस्य समुच्चयार्थत्वासम्भवाद्भिन्नक्रमतामाश्रित्य तदर्थमाह **चशब्द इति** । **अत्रापीति** । स्वोक्तस्य समस्तस्यार्थस्य श्रुतिसिद्धत्वज्ञापनायात्र चित्त्वस्यांशत्वोपलक्षणत्वाश्रयणमिति द्रष्टव्यम् । 'चेतनत्वेन चांशत्वादि'ति वक्ष्यमाणत्वात् तदाश्रयणमित्यप्याहुः। पूर्वश्रुतीनामाभासत्वमात्रप्रतिपादकत्वेन भेदाप्रतिपादकत्वात् कथं भेदज्ञापकत्वकथनमित्यत आह **जीवस्येति** । भेद एवेत्येवकारतात्पर्यमाह **अत्यन्तभेदश्चेति** । नन्वाभासत्वस्य श्रुतिसिद्धित्वकथनमात्रेणासिद्धिपरिहारादाभासत्वेन भेदस्य श्रुतिज्ञेयत्ववर्णनमनर्थकमित्यतोऽत्र नास्मदीयानुमानस्य परानुमानप्रतिपक्षत्वे तात्पर्यं येनाभासत्वस्यासिद्धिपरिहारमात्रेण तत्सिद्धेस्तद्वैयर्थ्यं स्यात्किन्त्वस्मदीयानुमानस्य श्रौतत्वेन प्राबल्याद्बाधकत्वमेवेति न तद्वर्णनानर्थक्यमिति भावेन तदुक्तेस्तात्पर्यमाह **न परानुमानयोरिति** ।

वा०र०— भेद एवेत्येवकारेति । भेद एवेत्यत्र विद्यमानैवकारेत्यर्थः । **आभासत्वेन भेदस्येति** । तद्वर्णने ह्यनुमानविषयोऽपि श्रुतिसिद्ध इति प्रतीयते, तद्वर्णनं चानर्थकमिति भावः । **श्रुतिसिद्धत्वकथनेनेति** । श्रुतिरेव वदतीत्येतत्पूर्ववाक्ये प्रतिज्ञातस्य श्रुतिसिद्धत्वस्य कथनायेत्यादिवाक्येभ्य आभासत्वं ज्ञायत इत्येव वक्तव्यत्वेनात्यन्तभेदश्चेति व्यर्थमिति भावः । **श्रौतत्वेन प्राबल्यादिति** । श्रुत्यापि तदर्थस्य प्रतिपादितत्वेन तत्सहकारेणानुमानं प्रबलमिति भावः । **बाधकत्वमेवेति** । तात्पर्यमिति पूर्वेणान्वयः ।

* * *

।। अथ 'अत एव चोपमा' इतिसूत्रांशव्याख्यानम्

(चेतनत्वाद्यनुमानबाधकतयोक्ताभासत्वानुमानस्य समर्थनम्) ।।

।। अथ तत्र 'अत एव चोपमा' इतिसूत्रांशनिवर्त्यशङ्काप्रदर्शनम् ।।

।। अथ तत्रापि आभासत्वानुमाने दोषोद्भावनद्वारा 'चेतनत्वाद्यनुमानेन जीवस्य ब्रह्माभेदसाधने' ऽयुक्तत्वशङ्कापरिहारप्रयासः ।।

।। अथ तत्रापि च जीवस्य परमात्मन आभासत्वं यन्निर्णीतं तदयुक्तत्वशङ्का द्वेधा ।।

।। अथ आभासस्योपाध्यायत्तत्वात् जीवानाञ्चोपाध्यायत्तत्वाभावात् जीवस्य परमेश्वराभासत्वानुपपत्तिशङ्का ।।

२४ **सु०—** इदानीं 'अत एव चोपमे'ति सूत्रावयवं व्याख्यातुं तन्निवर्तनीयामाशङ्कामाह **आभासत्वं हीति** ।

अनु०— आभासत्वं हि निर्णीतं जीवस्य परमात्मनः ।
तन्न युक्तं

यज्जीवस्य परमात्मन आभासत्वं श्रुतिबलेन **निर्णीतं तद्युक्तिविरुद्धम्** । न हि निरवकाशयुक्तिविरुद्धोऽर्थः श्रुत्याऽपि प्रतिपादयितुं शक्यते, तथा सति अभिमान्यधिकरणानारम्भप्रसङ्गात्, अतः सा कथञ्चिद्योजनीयेति ।

कथं न युक्तमित्यत आह **यदिति** ।

यदाभास उपाध्यायत्त ईयते ।

यस्मादाभासः सूर्यकादिर्जलाद्युपाध्यायत्तो ज्ञायते, आभासत्वस्योपाध्यायत्तत्वं व्यापकत्वेन सर्वत्र निश्चितमित्यर्थः ।

तथाऽपि कुतो न युक्तमित्यत आह **उपाधीति** ।

उपाध्यायत्तताभावात्

जीवानामिति शेषः । व्यापकस्योपाध्यायत्तत्वस्य जीवेष्वभावाद्व्याप्यमप्याभासत्वं न युक्तम् । ततो हेतोरसिद्धेर्दुष्टमनुमानम् ।

वं०प०— श्रुतेः प्राबल्याद्युक्तिविरुद्धार्थप्रतिपादने का भीतिरित्यत आह **न हीति** ॥ **अनारम्भेति** । 'दृढयुक्तिविरोधे तु सर्वत्र न्याय ईदृश' इत्युक्तेरिति भावः । **सा** जीवस्य भगवदभासत्वप्रतिपादिका 'यथैषा पुरुषे छाये'त्यादिका श्रुतिः । **कथञ्चित्** उपचारादिना ।

शे०चं०— **ननु** श्रुत्यपेक्षया युक्तेर्दुर्बलत्वात् कथं प्रबलश्रुतिसिद्धाभासत्वापवादकत्वं युक्तेः स्यादित्यत आह **न हीति** । तत्र हेतुमाह **तथा सतीति** । तर्ह्याभासत्वप्रतिपादकश्रुतेः का गतिरित्यत आह **अतः सा यथाकथञ्चिदिति** । तदधीनत्वे सति तत्सदृशत्वरूपसिद्धान्त्यभिमताभासत्वपरित्यागेनाभेदाविरोध्याभासत्वपरतया वर्णनीयेत्यर्थः ॥ **जीवेष्वभावादिति** । उपाध्यायत्तत्वे जीवानां तन्नाशे नाशप्रसङ्गः । उपाधीनामविनाशे प्रत्यक्षादिविरोधः सदा संसारित्वं च स्यादित्युभयथा मोक्षशास्त्रवैयर्थ्यमिति भावः ।

**॥ इति आभासस्योपाध्यायत्तत्वात् जीवानाञ्चोपाध्यायत्तत्वाभावात्
जीवस्य परमेश्वराभासत्वानुपपत्तिशङ्का ॥**

* * *

॥ अथ आभासत्वस्य भिन्नत्वेन विरोधाच्च जीवस्य परमेश्वराभासत्वानुपपत्तिशङ्का ॥

२५ **सु०—** इतश्च दुष्टमित्याह **आभासत्वेति** ।

अनु०— आभासत्वविरोधतः ।

आभासत्वस्य भिन्नत्वेन **विरोधतश्चा**नुमानं दुष्टम् । तथा हि । दर्पणादिना सन्निकृष्टाः प्रतिहताः परावृत्ता नायनरश्मयो मुखेन सन्निकृष्टास्तदेव विषयीकुर्वन्ति, न तु ततोऽन्य आभासो नामास्ति । तत्र व्यवच्छेदः परात्त्वं सव्येतरव्यत्यासश्चेत्यादिकं भ्रान्त्यैव प्रतीयते । सोपाधिकश्चायं भ्रम इति यावदुपाधिसत्त्वं न निवर्तते । एवञ्चाभासत्वस्याभेदेन

व्याप्तत्वाद्भेदसाधने विरुद्धत्वमिति । उपलक्षणं चैतत् । तत्त्वमस्यादिश्रुतिविरुद्धत्वेन कालातीतत्वमपि द्रष्टव्यम् ।

गु०दी०— **सव्येतरव्यत्यास** इत्यत्र इतरदपसव्यम् । प्रतिमुखतया स्थितत्वात् सव्यमपसव्यतया प्रतीयते । अपसव्यं च सव्यतया प्रतीयत इति सव्येतरव्यत्यास इत्यर्थः । इदमपि चिन्त्यम् । सव्येतर-व्यत्यासभ्रान्तिरपि तदा स्यात् । यदि दर्पणान्तरेऽवस्थितं प्रतिमुखं पराङ्मुखतया दृश्येत । दर्पणप्रतिहतं चक्षुस्ततः परावृत्य स्वमुखमेव पश्यति चेत् कुतः सव्येतरभ्रान्तिः । न ह्यन्यत्र गतं भित्तिप्रतिबन्धात् परावृत्य पृष्ठतः स्थितस्यान्यस्य मुखं पश्यत् परकीयं चक्षुस्तन्नयनकर्णादिकं व्यत्यासेन पश्यतीति ।

शे०चं०— आभासत्वविरोधत इत्यस्य पूर्वशेषत्वानुपपत्तेरसङ्गतिमाशङ्क्य परिहरति **इतश्चेति** । किमनेन ग्रन्थेन दूषणमुक्तं भवतीत्यतस्तद्व्याख्यानपूर्वकं तदुपदर्शयति **आभासत्वस्येति** । **दर्पणादिनेति** । 'दर्पणाभिहता दृष्टिः परावृत्य स्वमाननम् । व्याप्नुवन्त्याभिमुख्येन व्यत्यस्तं दर्शयेन्मुखमि'त्यभियुक्तवचनादिति भावः । परात्त्वादिकं भ्रान्त्यैव प्रतीयत इत्ययुक्तम् । प्रत्यक्त्वादविशेषदर्शिने सति भ्रान्तेरयोगात् । योगे वा तदनिवृत्तिरेव स्यान्निवर्तकान्तरस्याभावादित्यत आह **सोपाधिकश्चेति** ।

वा०र०— मुखमित्यभियुक्तेति । ....

।। इति आभासत्वस्य भिन्नत्वेन विरोधाच्च जीवस्य परमेश्वराभासत्वानुपपत्तिशङ्का ।।

* * *

।। अथ आभासत्वानुमानदूषणसाध्यप्रदर्शनम् ।।

।। अथ तत्र आभासत्वानुमाने दुष्टे प्रागुक्तचेतनत्वाद्यनुमानेन मायिविलक्षणजीवब्रह्माभेद-(समुदायैक्य)सिद्ध्या भेदाभेदसिद्धिः ।।

२६ **सु०—** एवमाभासत्वानुमाने दुष्टे किम् इति चेन्निराबाधेन प्रागुक्तानुमानद्वयेनैक्यं सिद्धमित्याह **चेतनत्वेनेति** ।

अनु०— चेतनत्वेन चांशत्वात् समुदायैक्यमापतेत् ॥

'अंशत्वाच्चे'त्यन्वयः । ऐक्यं च साध्यमानं न मायावादिनामिवेत्युक्तं **समुदायेति** । मायावादिनो हि जीवानां प्रत्येकं ब्रह्मणाऽत्यन्ताभेदमङ्गीकुर्वते । न चैवमस्मन्मतम् । समुदायैक्ये भेदस्यापि सत्त्वादिति ।

परि०— प्रागुक्तानुमानद्वयेनेति । चेतनत्वांशत्वरूपानुमानद्वयेनेत्यर्थः । **इत्यन्वय इति** । 'च'शब्दान्वय इत्यर्थः ।

यादु०— समुदायैक्य इति । भास्करमते सकलचेतनसमुदाय एव ब्रह्मसंज्ञा, समुदाये च समुदायिभेदाभेदौ प्रसिद्धावित्यर्थः ।

शे०चं०— अंशत्वस्य हेत्वन्तरत्वज्ञापनाय चशब्दं तदन्विततया योजयति **अंशत्वाच्चेत्यन्वय इति** । **समुदायैक्य इति** । समुदायेन सह जीवानामैक्य इत्यर्थः । न चैवं जीवानां ब्रह्माभेदासिद्धिः । एतन्मते चेतनसमूहस्यैव ब्रह्मशब्दवाच्यत्वेन तदभेदे जीवानां ब्रह्माभेदस्यैव सिद्धिरिति भावः । (भास्करमते सकलचेतनसमुदाये एव ब्रह्मसंज्ञा । समुदाये च समुदायिभेदाभेदौ प्रसिद्धावित्यर्थः) ॥ **भेदस्यापीति** । समुदायिसमुदाययोर्भेदाभेदप्रसिद्धिरिति भावः ।

वा०र०— समुदायस्य ब्रह्मरूपपदार्थेनाभेद इति प्रतीतिनिरासायाह **समुदायेनेति** । 'ईशाख्या समुदाये स्यादि'त्युत्तरमूलानुसारेणेदम् । **प्रसिद्धिरिति** । तन्तुपटादाविति शेषः । बाधादिरूपाभासेति पाठः ।

॥ इति आभासत्वानुमाने दुष्टे प्रागुक्तचेतनत्वाद्यनुमानेन मायिविलक्षण-जीवब्रह्माभेद(समुदायैक्य)सिद्ध्या भेदाभेदसिद्धिः ॥

* * *

॥ अथ समुदायैक्याङ्गीकारे कारणरूपमायिमतोक्तदोषनिरासप्रदर्शनम् ॥

२७ **सु०—** अत्यन्ताभेदं परित्यज्य समुदायैक्यं कुतोऽङ्गीक्रियत इत्यत आह अत इति ।

अनु०— अतः पृथक्त्वमुदितं समुदायांशयोर्भवेत् ।

समुदायैक्याङ्गीकारतो यच्छ्रुत्याद्युक्तं **पृथक्त्वं** तत्समुदायस्य तदंशस्य च जीवस्य भवेत् । समुदायस्य यावंशौ जीवेश्वरौ तयोर्भवेदिति वा ।

एतदुक्तं भवति । यदि जीवस्य ब्रह्मणाऽत्यन्ताभेदः सा(ध्येत)ध्यते तदा भेदश्रुतय उपरुध्येरन्, मायिक(भेद)परत्वाभिधाने चाप्रमाणमापद्येरन् । न चायमस्माकमस्ति दोषः, जीवब्रह्मणोर्जीवेश्वरयोश्च भेदसद्भावेन तद्विषयत्वोपपत्तेरिति ।

एतेन चेतनत्वाद्यनुमानस्याभासोद्धारः कृतो भवति ।

परि०— एतेनेति । समुदायैक्यकथनेनेत्यर्थः । **आभासोद्धार इति** । भेदश्रुतिविरोधोद्धार इत्यर्थः ।

गु०दी०— जीवब्रह्मणोः जीवेश्वरयोरित्यत्र ब्रह्मपदेन शुद्धं ब्रह्मोच्यते । ईश्वरपदेन मायाशबलितं तस्यैव रूपान्तरमुच्यते ।

यादु०— ननु साध्यमानमैक्यं न मायावादिनामिवेति प्रदर्शनस्य प्रकृतानुपयोगादर्थान्तरतेत्यत आह **एतेनेति** । समुदायैक्यमिति वचनेन श्रुतिविरोधपरिहारस्य सूचनादिति भावः । ततश्च पूर्वपक्षी सिद्धान्त्युदीरितानुमानस्याभासत्वं व्युत्पाद्यानेन स्वानुमानयोराभासोद्धारं कृतवानतो नार्थान्तरतेत्युक्तं भवतीति ज्ञातव्यम् ॥

वं०प०— श्रुत्यादीति । द्वा सुपर्णेत्यादीत्यर्थः । **समुदायस्य** ब्रह्मणः । **भवेत्** युक्तमिति शेषः । **अस्माकं** सत्योपाधिकृतसत्यभेदवादिनाम् । **आभासोद्धारो** भेदश्रुतिबाधोद्धारः ।

शे०चं०— जीवब्रह्मणोर्भेदसमर्पकतया वाक्यं व्याख्याय जीवेशयोर्भेदसमर्पकतयाऽपि तद्योजयति **समुदायस्येति** ॥ **एतेनेति** । समुदायैक्याङ्गीकारेणेत्यर्थः । **आभासोद्धार इति** । बाधादिरूपाभासोद्धार इत्यर्थः । समुदायैक्ये भेदस्यापि सत्त्वेन भेदश्रुतीनां तद्विषयत्वान्न बाधकत्वमिति भावः ॥

स०व्र०— आभासोद्धार इति । श्रुतिबाधलक्षण आभासोद्धारः कृत इत्यर्थः ।

॥ इति समुदायैक्याङ्गीकारे कारणरूपमायिमतोक्तदोषनिरासप्रदर्शनम् ॥

* * *

॥ अथ समुदायैक्यस्य किञ्चित्प्रपञ्चनेन पूर्वोक्तभेदाभेदसमर्थनम् ॥
॥ अथ तत्र ईशरूपेष्विवेशरूपसमुदायेऽपीशसंज्ञा ॥

२८ **सु०— समुदायैक्यमित्युक्तम्** । तत्किञ्चित्प्रपञ्चयति **ईशाख्येति** ।

अनु०— ईशाख्या समुदाये स्यात्

'ईश'शब्दो ब्रह्मपरः । **समुदाये** चेतनानाम् ।

एतदुक्तं भवति । ब्रह्मैकमेव स्वभावसिद्धं तत्त्वम्, तत्परमार्थभूतं मायासम्बन्धादीश्वरतामापद्यते । स च सर्वज्ञः सर्वेश्वरो जगज्जननादिकर्ता, जीवास्तु ब्रह्मणोऽशाश्वि-

त्स्वभावा वह्नेरिव विष्फुलिङ्गाः, अत एव ब्रह्मणो भिन्नाभिन्नाः, परस्परमीश्वराच्च भिन्ना एव । ब्रह्म तु सकलचेतनसमुदायात्मकमतिरिक्तं चेति ।

अत्र दृष्टान्तमाह ईशेति ।

ईशरूपेष्विवोदिता ।

यथा भगवद्रूपाणां मत्स्यादीनां समुदाये भगवत्संज्ञा 'न स्थानतोऽपी'त्यादौ सिद्धान्तिनोदिता तथा ।

एतेनात्यन्ताभेदं परित्यज्य भेदाभेदाङ्गीकारे श्रुतिद्वयमिवांशत्वानुमानं चोक्तं भवति ।

परि०— एतेनेति । ईशरूपदृष्टान्तवचनेनेत्यर्थः । **श्रुतिद्वयमिव** भेदाभेदश्रुतिद्वयमिवेत्यर्थः ।

गु०दी०— श्रुतिद्वयमिवेत्यस्य भेदश्रुतिरभेदश्रुतिश्चेत्यर्थः ।

यादु०— अत एवेति । अंशत्वादेवेत्यर्थः । **भगवत्संज्ञेति** । भगवतो मूलरूपस्य संज्ञा ब्रह्मेत्यादिरूपेत्यर्थः । तत्र हि सर्वेषु भूतेष्वक्ष्यादिस्थानेषु च स्थितोऽवतारसमुदाये 'एतमेव ब्रह्मेत्याचक्षते' इत्यादिब्रह्मशब्दः, 'अयं वै हरयोऽयं वै दश चे'त्यादिरिदंशब्दः, 'न स्थानभेदतोऽप्यस्य भेदः कश्चित्परेशितुरि'तीशितृशब्दश्च सिद्धान्तिना प्रयुक्तो न तु भगवच्छब्दः । अतोऽत्र भगवानिति संज्ञा भगवत्संज्ञेति नार्थ इति ध्येयम् ॥ **एतेनेति** । ब्रह्मणः अंशित्वरूपसमुदायत्ववचनेनेत्यर्थः ॥

वं०प०— तन्मते ईशस्यापि जीववत्समुदायान्तर्गतत्वेन समुदाये ईशाख्याया भावादाह **ईशशब्द इति** ॥ **एतेनेति** । जीवा ब्रह्माभिन्ना अंशत्वादित्यनुमाने मत्स्यादेर्दृष्टान्तत्वसम्भवादित्यर्थः । **श्रुतिद्वयं** भेदाभेदश्रुतिद्वयम् ।

शे०चं०— ईशस्य जीववत्समुदायांशत्वात्समुदाये ईशाख्येत्ययुक्तमित्यत आह **ईशशब्द इति** ॥ **अत एवेति** । अंशत्वादेवेत्यर्थः ॥ **अत्र दृष्टान्तमाहेति** । ब्रह्मणः सकलसमुदायत्वमतिरिक्तत्वं चेत्युक्तस्यासम्भावनापरिहारार्थमिति शेषः ॥ **एतेनेति** ब्रह्मणोऽशित्वरूपसमुदायत्ववचनेनेत्यर्थः ॥ **अंशत्वानुमानं चेति** । जीवा ब्रह्मणा भिन्नाभिन्ना ब्रह्मांशत्वाद्यो यदंशः स तेन भिन्नाभिन्नो यथा भगवदंशो मत्स्यादिरित्यनुमानमित्यर्थः ।

॥ इति ईशरूपेष्विवेशरूपसमुदायेऽपीशसंज्ञा ॥

* * *

।। अथ भेदस्यौपाधिकत्वाद्देहोपाधेरात्यन्तिकापाये जीवानामीशरूपैः स्वाभाविकसाम्यरूपैक्यप्राप्तिः ।।

२९ सु०— यदि मत्स्यादयः परमेश्वरस्येव जीवा ब्रह्मणोऽशाः स्युस्तदा मत्स्यादीनामैश्वर्यादिवज्जीवानां निर्दुःखत्वादिकं स्यात्, अंशेष्वंशिसाधर्म्यस्याव्यभिचारात्। किञ्च यदि जीवस्य ब्रह्मणाऽभेदोऽपि परमार्थः स्यात् तदा ब्रह्मैव भवतीत्युक्ता मुक्तिरयुक्ता स्यादित्यत आह अत इति ।

अनु०— अतो देहाद्युपाधीनामपाये समता भवेत् ।
ईशरूपैः

बुद्धिसन्निहितं तदीयसिद्धान्त'मत' इति परामृशति । न जीवानां ब्रह्मणा भेदाभेदौ स्वाभाविकौ, किन्त्वभेदः स्वाभाविको भेदस्त्वौपाधिकः, यथेश्वरांशानां मत्स्यादीनामीश्वरेण । इयांस्तु विशेषः । मत्स्याद्या जगदनुग्रहार्थं लीलाविग्रहोपाधिभिन्ना अतिरस्कृतैश्वर्यादिमन्तः, जीवास्तु अनाद्यविद्याकामकर्मादिनिबन्धनदेहेन्द्रियाद्युपाधिभिन्नाः तिरस्कृतब्रह्मस्वभावा उपाधिनिबन्धनदुःखादिभाजश्चेति । यत एवमौपाधिक एव भेदोऽतो ज्ञानकर्मभ्यां **देहाद्युपाधीनामात्यन्तिकेऽपाये** सति **जीवानामीशरूपैः समता भवेत्** । यथेश्वररूपाणि कार्यावसाने स्वेच्छयैव लीलाविग्रहत्यागेनेश्वरतामापद्यन्ते, तथा जीवा अप्यनुष्ठितज्ञानकर्मसमुच्चयाः प्रारब्धकर्मावसाने देहाद्युपाधिभिरत्यन्तविमुक्ताः स्वाभाविकं ब्रह्मत्वमापद्यन्त इति न कश्चिद्दोषः ।

वं०प०— **परमार्थः** स्वाभाविकः ।

शे०चं०— किं तर्हि मत्स्यादीनां जीवानां च सर्वथाऽविशेष इत्यत आह **इयांस्त्विति** । **अतिरस्कृतैश्वर्यादिमन्त इति** । नन्वत्रातिरस्कृता ऐश्वर्यादयो येषामिति बहुव्रीहिणैव मत्वर्थलाभान्मतुपो 'न बहुव्रीहिनिर्वाह्ये भवन्ति मतुबादयः' इत्येतन्मूलकवैयर्थ्यम् । न च बहुव्रीहिमाश्रित्य मतुप्प्रयोगे वैयर्थ्यदोषेऽप्यतिरस्कृताश्चैते ऐश्वर्यादयश्चेति कर्मधारयमाश्रित्य तत्प्रयोगे शब्दान्तरत्वान्न दोष इति वाच्यम् । तथाऽपि कर्मधारयमत्वर्थीयाद्बहुव्रीहिरेवेष्टव्यो लघुत्वादिति न्यायेन शब्दान्तरत्वाश्रयणेऽपि बहुव्रीहिविवक्षयाऽल्पेन शब्देनाभिमतार्थप्रतिपादनसम्भवेन बहुयत्नाश्रयणस्य दोषत्वाद्बहुव्रीह्यपेक्षया कर्मधारयमत्वर्थीये शब्दगौरवस्थले बहुयत्नाश्रयणं दोषः, न तुशब्दसाम्येऽपि; अन्यथा यद्विकारीत्यत्रापि तत्प्रसङ्गादित्यपि न समाधिरत्र सम्भवति अतिरस्कृतैश्वर्यादिशब्दादतिरस्कृतैश्वर्यादिमच्छब्दे शब्दगौरवस्य स्पष्टत्वात् । तस्मादेतत्कथमिति चेत् । उच्यते । सर्वदिः

त्स्वभावा वह्नेरिव विष्फुलिङ्गाः, अत एव ब्रह्मणो भिन्नाभिन्नाः, परस्परमीश्वराच्च भिन्ना एव । ब्रह्म तु सकलचेतनसमुदायात्मकमतिरिक्तं चेति ।

अत्र दृष्टान्तमाह ईशेति ।

ईशरूपेष्विवोदिता ।

यथा भगवद्रूपाणां मत्स्यादीनां समुदाये भगवत्संज्ञा 'न स्थानतोऽपी'त्यादौ सिद्धान्तिनोदिता तथा ।

एतेनात्यन्ताभेदं परित्यज्य भेदाभेदाङ्गीकारे श्रुतिद्वयमिवांशत्वानुमानं चोक्तं भवति ।

परि०— एतेनेति । ईशरूपदृष्टान्तवचनेनेत्यर्थः । **श्रुतिद्वयमिव** भेदाभेदश्रुतिद्वयमिवेत्यर्थः ।

गु०दी०— श्रुतिद्वयमिवेत्यस्य भेदश्रुतिरभेदश्रुतिश्चेत्यर्थः ।

यादु०— अत एवेति । अंशत्वादेवेत्यर्थः । **भगवत्संज्ञेति** । भगवतो मूलरूपस्य संज्ञा ब्रह्मेत्यादिरूपेत्यर्थः । तत्र हि सर्वेषु भूतेष्वक्ष्यादिस्थानेषु च स्थितोऽवतारसमुदाये 'एतमेव ब्रह्मेत्याचक्षते' इत्यादिब्रह्मशब्दः, 'अयं वै हरयोऽयं वै दश चे'त्यादिरिदंशब्दः, 'न स्थानभेदतोऽप्यस्य भेदः कश्चित्परेशितुरि'तीशितृशब्दश्च सिद्धान्तिना प्रयुक्तो न तु भगवच्छब्दः । अतोऽत्र भगवानिति संज्ञा भगवत्संज्ञेति नार्थ इति ध्येयम् ॥ **एतेनेति** । ब्रह्मणः अंशित्वरूपसमुदायत्ववचनेनेत्यर्थः ॥

वं०प०— तन्मते ईशस्यापि जीववत्समुदायान्तर्गतत्वेन समुदाये ईशाख्याया भावादाह **ईशशब्द इति** ॥ **एतेनेति** । जीवा ब्रह्माभिन्ना अंशत्वादित्यनुमाने मत्स्यादेर्दृष्टान्तत्वसम्भवादित्यर्थः । **श्रुतिद्वयं** भेदाभेदश्रुतिद्वयम् ।

शे०चं०— ईशस्य जीववत्समुदायांशत्वात्समुदाये ईशाख्येत्ययुक्तमित्यत आह **ईशशब्द इति** ॥ **अत एवेति** । अंशत्वादेवेत्यर्थः ॥ **अत्र दृष्टान्तमाहेति** । ब्रह्मणः सकलसमुदायत्वमतिरिक्तत्वं चेत्युक्तस्यासम्भावनापरिहारार्थमिति शेषः ॥ **एतेनेति** ब्रह्मणोऽशित्वरूपसमुदायत्ववचनेनेत्यर्थः ॥ **अंशत्वानुमानं चेति** । जीवा ब्रह्मणा भिन्नाभिन्ना ब्रह्मांशत्वाद्यो यदंशः स तेन भिन्नाभिन्नो यथा भगवदंशो मत्स्यादिरित्यनुमानमित्यर्थः ।

॥ इति ईशरूपेष्विवेशरूपसमुदायेऽपीशसंज्ञा ॥

* * *

।। अथ भेदस्यौपाधिकत्वाद्देहोपाधेरात्यन्तिकापाये जीवानामीशरूपैः स्वाभाविकसाम्यरूपैक्यप्राप्तिः ।।

२९ सु०— यदि मत्स्यादयः परमेश्वरस्येव जीवा ब्रह्मणोऽशाः स्युस्तदा मत्स्यादीनामैश्वर्यादिवज्जीवानां निर्दुःखत्वादिकं स्यात्, अंशेष्वंशिसाधर्म्यस्याव्यभिचारात् । किञ्च यदि जीवस्य ब्रह्मणाऽभेदोऽपि परमार्थः स्यात् तदा ब्रह्मैव भवतीत्युक्ता मुक्तिरयुक्ता स्यादित्यत आह **अत इति** ।

**अनु०— अतो देहाद्युपाधीनामपाये समता भवेत् ।
ईशरूपैः**

बुद्धिसन्निहितं तदीयसिद्धान्त'मत' इति परामृशति । न जीवानां ब्रह्मणा भेदाभेदौ स्वाभाविकौ, किन्त्वभेदः स्वाभाविको भेदस्त्वौपाधिकः, यथेश्वरांशानां मत्स्यादीनामीश्वरेण । इयांस्तु विशेषः । मत्स्याद्या जगदनुग्रहार्थं लीलाविग्रहोपाधिभिन्ना अतिरस्कृतैश्वर्यादिमन्तः, जीवास्तु अनाद्यविद्याकामकर्मादिनिबन्धनदेहेन्द्रियाद्युपाधिभिन्नाः तिरस्कृतब्रह्मस्वभावा उपाधिनिबन्धनदुःखादिभाजश्चेति । यत एवमौपाधिक एव भेदोऽतो ज्ञानकर्मभ्यां **देहाद्युपाधीनामात्यन्तिकेऽपाये** सति जीवानामी**शरूपैः समता भवेत्** । यथेश्वररूपाणि कार्यावसाने स्वेच्छयैव लीलाविग्रहत्यागेनेश्वरतामापद्यन्ते, तथा जीवा अप्यनुष्ठितज्ञानकर्मसमुच्चयाः प्रारब्धकर्मावसाने देहाद्युपाधिभिरत्यन्तविमुक्ताः स्वाभाविकं ब्रह्मत्वमापद्यन्त इति न कश्चिद्दोषः ।

वं०प०— परमार्थः स्वाभाविकः ।

शे०चं०— किं तर्हि मत्स्यादीनां जीवानां च सर्वथाऽविशेष इत्यत आह **इयांस्त्विति** । **अतिरस्कृतैश्वर्यादिमन्त इति** । नन्वत्रातिरस्कृता ऐश्वर्यादयो येषामिति बहुव्रीहिणैव मत्वर्थलाभान्मतुपो 'न बहुव्रीहिनिर्वाह्ये भवन्ति मतुबादयः' इत्येतन्मूलकवैयर्थ्यम् । न च बहुव्रीहिमाश्रित्य मतुप्प्रयोगे वैयर्थ्यदोषेऽप्यतिरस्कृताश्चैते ऐश्वर्यादयश्चेति कर्मधारयमाश्रित्य तत्प्रयोगे शब्दान्तरत्वान्न दोष इति वाच्यम् । तथाऽपि कर्मधारयमत्वर्थीयाद्बहुव्रीहिरेवेष्टव्यो लघुत्वादिति न्यायेन शब्दान्तरत्वाश्रयणेऽपि बहुव्रीहिविवक्षयाऽल्पेन शब्देनाभिमतार्थप्रतिपादनसम्भवेन बहुयत्नाश्रयणस्य दोषत्वाद्बहुव्रीह्यपेक्षया कर्मधारयमत्त्वर्थीये शब्दगौरवस्थले बहुयत्नाश्रयणं दोषः, न तुशब्दसाम्येऽपि; अन्यथा यद्विकारीत्यत्रापि तत्प्रसङ्गादित्यपि न समाधिरत्र सम्भवति अतिरस्कृतैश्वर्यादिशब्दादतिरस्कृतैश्वर्यादिमच्छब्दे शब्दगौरवस्य स्पष्टत्वात् । तस्मादेतत्कथमिति चेत् । उच्यते । सर्वदिः

कर्मधारयादिनिरिति वचनाल्लाघवाश्रयणेन कर्मधारयादिनिरिव न्यायसाम्यान्मतुप्प्रत्ययोऽपि वचनसाध्य एव भविष्यतीति न किञ्चिदेतत् । ईशरूपैः समता भवेदित्युक्तम् । तत्रेशरूपाणां कीदृशी रीतिर्यत्सादृश्यं जीवानामुच्यत इत्यत ईशरूपस्थितिप्रदर्शनपूर्वकं जीवानां स्थितिमुपपादयति **यथेत्यादि** ।

वा०र०— समाध्यन्तरमाशङ्क्य निराकरोति **बहुव्रीह्यपेक्षयेति** । एतच्च 'ईशतज्ज्ञानवेदाक्षजानुमातृपूर्विण' इति 'मायामात्रं त्वि'त्येतत्सूत्रीयानुव्याख्यानसम्बन्धिमूलटीकायां तत्प्रपञ्चे च स्पष्टम् । **वचनादिति** । महाभाष्यवचनादित्यर्थः । **कर्मधारयादिनीवेति** । सर्वधनी सर्वबीजीत्यादाविति शेषः । **वचनसाध्य एवेति** । एतदपि पूर्वत्रैव स्पष्टम् ।

।। इति भेदस्यौपाधिकत्वाद्देहोपाधेरात्यन्तिकापाये जीवानामीशरूपैः स्वाभाविकसाम्यरूपैक्यप्राप्तिः ।।

।। इति समुदायैक्यस्य किञ्चित्प्रपञ्चनेन पूर्वोक्तभेदाभेदसमर्थनम् ।।

।। इति आभासत्वानुमानदूषणसाध्यप्रदर्शनम् ।।

* * *

।। अथ जीवानामुपाध्यायत्तत्वाभावासिद्धिशङ्का तत्परिहारश्च, तेन च आभासत्वासिद्धेः सुस्थितिः ।।

३० **सु०—** यदुक्तमुपाध्यायत्तताभावादिति तदसिद्धम् । जीवानामपि सूर्यकादिवदाभासत्वाङ्गीकारे बाधकाभावादिति भावेनाशङ्कते **अथेति** ।

अनु०— अथाभासा मुख्यतः सूर्यकादिवत् ।

यदा

'अथ'शब्दः शङ्कोपक्रमे पक्षान्तरे वा । **आभासाः** जीवाः । **मुख्यत** इति उपाध्यायत्तत्वेन । सूर्यकादिना तुल्यं वर्तत इति **सूर्यकादिवत्** । उत्तरवाक्ये वाऽस्य सम्बन्धः ।

परिहरति **तदेति** ।

तदोपाध्यायत्तरूपाणां नाशिता भवेत् ।

यदि जीवानामुपाध्यायत्तता स्यात् तर्ह्युपाधिनाशे सूर्यकादीनामिव तेषां नाशिता भवेत्, अथोपाधयोऽविनाशिनस्तदा प्रत्यक्षादिविरोधः, सर्वदा संसारित्वं च स्यादित्युभयथा मोक्षशास्त्रवैयर्थ्यम् । तस्मादुपाध्यधीनत्वेऽङ्गीकर्तुमशक्ये सुस्थैवाभासत्वस्यासिद्धिरिति ।

परि०— पक्षान्तरे वेति । 'समता भवेदि'त्युक्तात् पक्षान्तरे वेत्यर्थः ॥ **जीवा इति** । शेषोक्तिरियम् । 'मुख्यत' इत्यस्य व्याख्या **उपाध्यायत्तत्वेनेति** । 'तेन तुल्यं क्रिया चेद्वतिरि'-त्युक्तवतिप्रत्यय इति भावेनाह **सूर्यकादिनेति** । सूर्यकप्रतिमुखादेर्यथोपाध्यायत्तत्वं तथेत्यर्थः । 'तत्र तस्येवे'ति षष्ठ्यन्ताद्वतिरिति भावेनाह **उत्तरवाक्ये वेति** । सूर्यकादिवदुपाध्यायत्तादिरूपाणामिति सम्बन्ध इत्यर्थः ॥ **उभयथेति** । उपाधीनां नित्यत्वेऽनित्यत्वे चेत्यर्थः ॥

यादु०— पक्षान्तरे वेति । ततश्चाथान्यः पक्षो न पूर्वप्राप्त इत्यर्थः । एवं चायं शङ्क्यमानः पक्षो न पूर्वपक्षिणः किन्तु सिद्धान्तिन इत्युक्तं भवति ॥ **तुल्यं वर्तत इति** । अनेन 'तेन तुल्यं क्रिया चेद्वतिरि'त्यनेनात्र वतिर्भवतीत्युक्तमिति ज्ञातव्यम् ॥ **उत्तरवाक्ये वेति** । तदा 'तत्र तस्येवे'त्यनेनैव वतिरिति भावः ॥

वं०प०— 'तत्र तस्येवे'त्यस्यासम्भवात् 'तेन तुल्यमि'ति क्रियातौल्ये वतिरित्याह **सूर्यकादिनेति** । **तुल्यम्** उपाध्यायत्वेन ॥ **उभयथेति** । उपाध्यायत्वे तन्नाशेन जीवानां नाशापत्त्या निरधिकारितया मोक्ष-शास्त्रवैयर्थ्यम् । तत्परिहारायोपाधीनां नित्यत्वाङ्गीकारे सदा संसारित्वापत्त्या मोक्षशास्त्रवैयर्थ्यमित्युभयथेत्यर्थः ॥

शे०चं०— 'तत्र तस्येवे'त्यस्याप्रसक्तेराह **सूर्यकादिनेति** । अनेन 'तेन तुल्यं क्रिया चेद्वतिः' इत्यनेन वतिरित्युक्तं भवति । यथोपाधिक्रियया प्रतिबिम्बे क्रिया तथा देहोपाधिक्रिययाऽपि प्रतिबिम्बे क्रिया भवतीति क्रियातौल्यादिति भावः ॥ **उत्तरवाक्ये वेति** । तथा च 'तत्र तस्येवे'त्यनेनैवात्र वतिरिति भावः ॥ **प्रत्यक्षादि-विरोध इति** । प्रत्यक्षादिभिरुपाधिनाशस्य सिद्धत्वादिति भावः ॥ **सर्वदेति** । उपाधेः कदाऽप्यनपगमादिति भावः ॥ **उभयथेति** । जीवनाशपक्षे, सर्वदा संसारित्वपक्षे चेत्यर्थः ॥ **सुस्थैवेति** । व्यापकनिवृत्तौ व्याप्य-निवृत्तेरावश्यकत्वादिति भावः ।

वा०र०— वतिरिति भाव इति । सूर्यकादीनामिवेति व्याख्यानादिति भावः ।

स०व्र०— तत्र तस्येवेत्यस्याप्रसक्तेराह **सूर्यकादिनेति** ॥ यथोपाधिक्रियया प्रतिबिम्बे क्रिया तथा देहोपाधिक्रियया प्रतिबिम्बे जीवेऽपि क्रियायाः सत्त्वेन क्रियातौल्यस्य सत्त्वेन युक्तः 'तेन तुल्यमि'त्यनेन वति-रिति भावः ।

॥ इति जीवानामुपाध्यायत्तत्वाभावासिद्धिशङ्का तत्परिहारश्च, तेन च आभासत्वासिद्धेः सुस्थितिः ॥

॥ इति जीवस्य परमात्मन आभासत्वं यन्निर्णीतं तदयुक्तत्वशङ्का द्वेधा ॥

॥ इति आभासत्वानुमाने दोषोद्भावनद्वारा 'चेतनत्वाद्यनुमानेन जीवस्य ब्रह्माभेदसाधने'ऽयुक्तत्वशङ्कापरिहारप्रयासः ॥

॥ इति 'अत एव चोपमा'इतिसूत्रांशनिवर्त्यशङ्काप्रदर्शनम् ॥

* * *

॥ अथ आभासत्वानुमान उद्भावितदोषनिरासपूर्वकं 'चेतनत्वाद्यनुमानेन जीवस्य ब्रह्माभेदसाधन'स्यायुक्तत्वसमर्थनम् ॥

॥ अथ तत्र आभासत्वानुमानदूषणनिवर्तकतया सूत्रावयवावतरणम्, व्याख्यानम्, तात्पर्यम्, उपलक्षणञ्च ॥

॥ अथ आभासत्वानुमानदूषणनिवर्तकतया सूत्रावयवावतरणं व्याख्यानञ्च ॥

३१ सु०— एतदाशङ्कानिवर्तकत्वेन सूत्रावयवमवतारयति इत्याशङ्केति ।

अनु०— इत्याशङ्कानिवृत्त्यर्थमाह वेदाधिपः प्रभुः । अत एवोपमेत्येव च

चशब्दोऽत एव चोपमेति भिन्नक्रमः ।

एतावदेव वाक्यम् एतदाशङ्कानिरासार्थं न पुनरिदं सूत्रस्य प्रतीकग्रहणमिति एवशब्दः । अन्यथा हि सूर्यकादिवदित्यस्यावृत्तिराशङ्क्येत ।

यद्वा एकवाक्यतानिरासेन परकृतस्यापव्याख्यानतामाह; यत एवायमात्मा चैतन्यस्वरूपो निर्विशेषो वाङ्मनसातीतः परप्रतिषेधोपदेश्योऽत एव च अस्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामभिप्रेत्य जलसूर्यकादिवदित्युपमोपादीयते मोक्षशास्त्रेष्विति । यद्यप्येवमेकवाक्यतालाभः तथाऽप्यर्थदोषस्तत्र तत्र व्युत्पादित एव; वतेर्वैयर्थ्यं च, सूर्यकादिरित्येतावता पूर्णत्वात्, इतिशब्दाध्याहारश्चैवं न कर्तव्य इति ।

परि०— अन्यथेति । एवशब्दाप्रयोगे सूत्रस्यैव प्रतीकत्वापत्त्या पूर्वपक्ष(प्राप)ज्ञापकत्वेन प्राप्तस्य 'सूर्यकादिवदि'त्यस्य सिद्धान्तार्थकत्वेनाप्यावृत्तिः शङ्क्येतेत्यर्थः ॥ **एकवाक्येति** । 'अत एव चोपमे'त्यस्य सूर्यकादिवदित्यनेनैकवाक्यतेत्यर्थः ॥ **परकृतस्येति** । एकवाक्यतया परकृतव्याख्यानस्येत्यर्थः ॥ **आहेति** । एवशब्द इत्यनुषङ्गः । किं तद्व्याख्यानं कथं निरास इत्यत आह **यत एवेत्यादि** । 'मोक्षशास्त्रेष्विती'तिशब्दस्य परकृतेति पूर्वेणान्वयः ॥ **अर्थदोष इति** । आत्मनो निर्विशेषत्वे विशेषाणामसत्यत्वे च 'पृथगुपदेशादि'त्याद्यधिकरणव्याख्याने व्युत्पादित इत्यर्थः ॥ **इतिशब्देति** । सूर्यकादिवदित्युपमेति(वाच्यत्वात्)वचनात् । प्रत्युत वतिप्रत्ययः प्रतिकूल एवेति भावः ॥

गु०दी०— सूत्रमवतारयतीत्यत्र एतदाशङ्कानिवृत्तिर्यावता भवति तावन्तं सूत्रावयवमवतारयतीत्यर्थः । **न पुनरिदं सूत्रस्य प्रतीकग्रहणमित्यस्य** प्रतीकग्रहणं चेदत इत्येव ब्रूयात् । **अन्यथा हीत्यत्र अन्यथा** सूत्रप्रतीकग्रहणं चेत् सम्पूर्णसूत्रस्य प्रस्तावितत्वात् प्राक् भेददृष्टान्ततया व्याख्यातस्य सूर्यकादिवदिति सूत्रखण्डस्यात्राप्यावृत्तिराशङ्क्येत । अतः शङ्कानिवृत्त्यर्थं यावान् सूत्रावयवोऽपेक्षितः तावदेवोपात्तमिति भावः । **यद्वा एकवाक्यतानिरासेनेत्यत्र** अत एव चोपमत्येवेति सूत्रावयवं भिन्नार्थपरतया अवतार्य एकवाक्यतानिरासेनेत्यर्थः । **परप्रतिषेधोपदेश्य** इत्यस्य नेतिनेति जगत्प्रतिषेधं कृत्वा उपदेश्य इत्यर्थः । **तथाप्यर्थदोष** इत्यत्र निर्विशेषत्वापारमार्थिकत्वाद्यर्थदोष इत्यर्थः । **इति शब्दाध्याहार** इत्यत्र सूर्यकादिरुपमा उपादीयते इत्येतावता पूर्तेर्वतेर्वैयर्थ्यम् । वतेरभावे च सूर्यकादिवदित्युपमेति इति शब्दोऽपि नाध्याहार्य इत्यर्थः ।

यादु०— अपव्याख्यानतामाहेत्यत्रैवशब्द इत्यनुवर्तते । मोक्षशास्त्रेष्वितीतिशब्दस्य परकृतस्येत्यनेनान्वयः ॥ **अर्थदोष इति** । चैतन्यस्य निर्विशेषत्वरूपेऽर्थे विशेषवत्त्वस्यापारमार्थिकत्वरूपे चार्थे यो दोषः स तत्र तत्र प्रथमाधिकरणादौ व्युत्पादित इत्यर्थः । तथा चैवमेकवाक्यत्वस्यासम्भवाद्वाक्यभेदाश्रयणमेव युक्तमिति भावः ॥

वं०प०— अन्यथेति । समग्रसूत्रप्रतीकग्रहणं चेदाचार्याणां विवक्षितं तर्हि समग्रसूत्रानुवादाय 'अथाभासा मुख्यतः सूर्यकादिवदि'त्यत्रोक्तस्य सूर्यकादिवदित्यस्यानुवृत्तिशङ्का स्यादित्यर्थः ॥ **एवं न कर्तव्य इति** । सूर्यकादिरित्येव कृते सति सूर्यकादिरुपमोपादीयते मोक्षशास्त्रेष्विति सामञ्जस्यादित्यर्थः ।

शे०चं०— प्रतीकग्रहणमेवैतत्किन्न स्यादित्यत आह **अन्यथेति** । एवशब्दस्य प्रयोजनान्तरमाह **यद्वेति** । किं तदपव्याख्यानमित्यतः तदेव दर्शयति **यत एवेति** ॥ **परप्रतिषेधोपदेश्यो**ऽन्यनिषेधमुखवेद्य इत्यर्थः । मोक्षशास्त्रेष्वितीत्यत्रत्यस्येतिशब्दस्य इति परकृतस्येति पूर्वेण सम्बन्धः । **तत्र तत्रेति** । 'निर्विशेषत्वमेतेन मूकोऽहमितिवद्भवेदि'त्यादिना जन्माधिकरणे निर्विशेषत्वदूषणेनेक्षत्यधिकरणे वाङ्मनसातीतत्वपरप्रतिषेधोपदेश्यत्वनिराकरणेन जिज्ञासासूत्रादौ च सार्वज्ञादिविशेषाणामपारमार्थिकत्वनिरासेन निर्विशेषत्वादिरूपेऽर्थे दोषः तत्र तत्र व्युत्पादित एवेत्यर्थः । तथा चार्थदोषेणैकवाक्यत्वस्यात्रासम्भवाद्वाक्यभेदाश्रयणमेव युक्तमिति भावः । एवं वतिपरित्यागे इतिशब्दाध्याहारश्च न कर्तव्य इति सम्बन्धः ।

वा०र०— .... अनुसारेण व्याख्याति **अन्यनिषेधेति** । **निर्विशेषत्वादिरूपेऽर्थ इति** । अनेन मूलस्थं अत्रेति पदं विवृतं भवति । **अर्थदोषेणेति** । एकवाक्यतामाश्रित्य कृतस्य यत एवेत्याद्यर्थस्य निर्विशेषत्वाद्यनुपपत्त्यादिदोषेणानुपपन्नत्वेनेत्यर्थः । एतात्सूत्रीय'यस्मादेवमि'त्यादिभाष्यव्याख्यानरूपतत्त्वप्रकाशिकायां तु वर्णकान्तराभिधानान्न तद्ग्रन्थेनैतन्मूलस्य विरोधः । 'एतत्सर्वं तर्कशास्त्र' इति जिज्ञासाधिकरणभाष्यमूलगतेदंशब्देनेत्येतट्टीकायां एतच्छब्दरूपत्वविचारोऽस्ति । तदनुसारेणाह **एतत्सर्वं तर्कशास्त्र इति** ।

स०व्र०— अपव्याख्यानमेवाह यत एवेति ॥ अर्थदोष इति ॥ ब्रह्मणो निर्विशेषत्वरूपेऽर्थे प्रमाणाभावस्योक्तत्वेन तस्य बाधितत्वादिति भावः ।

॥ इति आभासत्वानुमानदूषणनिवर्तकतया सूत्रावयवावतरणं व्याख्यानञ्च ॥

* * *

॥ अथ आभासत्वानुमानदूषणनिवर्तकतयोक्तसूत्रावयवव्याख्यानस्य तात्पर्यम् ॥
॥ अथ तत्र जीवेषु सूर्यकायाभासतो विशेषः, तद्विशेषस्य च सूत्रगतातःशब्दाल्लब्धत्वम्, तदर्थश्च तदधीनत्व-तत्सदृशत्वादिरूपाभासत्वमिति प्रदर्शनञ्च ॥

३२ सु०— सूत्रखण्डस्य तात्पर्यमाह अन्येति ।

अनु०— अन्याभासविशेषिताम् ।

अन्यस्मात्सूर्यकादेराभासात् जीवानां **विशेषितां** विलक्षणताम्, अनेन सूत्रखण्डेनाह सूत्रकारः ।

तदेतत्तात्पर्यं सूत्राक्षरैः कथं लभ्यत इत्यत एतच्छब्द(इदंशब्द)परामृष्टमर्थं तावत् दर्शयति **यदुक्तमिति** ।

यदुक्तं तदधीनत्वं सर्वावस्थास्वशेषतः ।
जीवस्य सदृशत्वं च चित्त्वमात्रं न चापरम् ।

तदधीनत्वं परमात्माधीनत्वम् । **अशेषतो**ऽशेषेषु व्यापारेषु । सन्ध्ये सृष्टिराह हीत्यादौ । **सदृशत्वं च** परमात्मना, यदुक्तं पुंस्त्वादिवदित्यादौ, किं तत्, सदृशत्वं **चित्त्वमात्रम्** । **न चापरं** स्वातन्त्र्यादिकं; येन हेतोर्विरुद्धता स्यादिति भावः ।

परि०— इदंशब्देति । अत्र सौत्र-'अतः'शब्दस्य 'एतदोऽशि'ति एतच्छब्दस्य तसिल्प्रत्यये परत अश् इत्यादेशे सति 'अत' इतिरूपनिष्पत्तेः 'एतच्छब्दे'ति पाठः साधुः । इदंशब्देति पाठो लेखकदोषमूलः । अयं चासौ शब्दश्चेति समासेन इदंशब्देन अतःशब्द एव गृह्यत इत्यप्याहुः ।

सप्तम्यर्थे तसिरित्युपेत्य सर्वपदेनापौनरुक्त्याय विशेष्याध्याहारेण अर्थमाह **अशेषेषु व्यापारेष्विति** । **इत्यादावित्यादि** 'पराभिध्यानादि'त्यादेः 'मुग्धेऽर्धसम्पत्तिः परिशेषादि'त्यन्तस्य सङ्ग्रहः । 'सर्वावस्थाप्रेरकश्चे'त्यणुभाष्योक्तेः । **पुंस्त्वादिवदिति** । **आदिपदेन** 'अंशो नानाव्यपदेशादि'त्यस्य ग्रहः । 'तद्गुणसारत्वादि'त्यत्र सादृश्यस्य हेतूकरणेऽपि 'पुंस्त्वादिवदि'त्यत्र ज्ञानाद्यात्मकत्वसाधनेन ब्रह्मसा(दृश्यसा)रूप्यसाधनात् **पुंस्त्वादिवदित्यादौ** इत्युक्तम् ॥ **येन हेतोर्विरुद्धतेति** । आभासत्वाजीवो ब्रह्मणोऽत्यन्तभिन्न इत्यत्र स्वतन्त्रत्वादिति हेतुशरीरप्रवेशे सति 'तदनन्यत्वमारम्भणे'तिसूत्रोक्तदिशा ब्रह्मानन्यत्वसाधकतया विरुद्धहेत्वाभासता स्यादित्यर्थः ॥

गु०दी०— इदं शब्देत्यस्य अत इति शब्देत्यर्थः ।

यादु०— इदंशब्देति । अतःशब्दपरामृष्टमित्यर्थः । अत्र यद्वक्तव्यं तत्प्रथमाधिकरण एवोक्तम् ॥ **पुंस्त्वादिवदित्यादाविति** । तत्रास्येत्यनेन तद्गुणसारत्वादित्यत्रोक्तसादृश्यस्य परामर्शात्सदृशत्वमुक्तमिति ज्ञातव्यम् ॥ **हेतोर्विरुद्धतेति** । स्वातन्त्र्यादिना सादृश्यं यद्याभासत्वहेतुशरीरे प्रविष्टं स्यात् तदा तेनेश्वरभेदसाधनं विरुद्धं स्यादित्यर्थः ।

वं०प०— इदंशब्देति । सौत्रातःशब्देत्यर्थः । अस्मादित्यतोऽस्मादिति इत इति च इदंशब्दस्य पञ्चमीति ज्ञेयम् ।

शे०चं०— इदंशब्दपरामृष्टमिति । यद्यपि 'एतदोऽशि'त्युक्तत्वादत इति एतदो रूपमित्येतच्छब्दपरामृष्टमित्येव वक्तव्यं तथाऽपि 'एतदोऽशि'त्यत्र 'इदम् इश्' इत्यनुवृत्तिरस्तीत्याशयेन वाऽयं प्रकृतोऽतइतिशब्द इदंशब्द इत्याशयेन वेदंशब्दपरामृष्टमित्युक्तमिति द्रष्टव्यम् । **अशेषेषु व्यापारेष्विति** । यद्यप्यत्रावस्थागतसाकल्यस्य सर्वशब्देनैवोक्तत्वादशेषशब्दस्य तदर्थकत्वासम्भवेऽप्यशेषाः समस्तजीवा इत्यादाविव सर्वशब्देनैव प्राप्तसङ्कुचितार्थत्वशङ्कानिरासेन तद्विवरणरूपतया अशेषत्वेनैव व्याख्यातुं शक्या तथाऽपि तथा सत्यवस्थामात्रे जीवस्य भगवदधीनत्वलाभेऽप्येकैकस्यामवस्थायामशेषव्यापारेषु तस्य तदधीनताया अवश्यं वक्तव्याया अलाभात्तल्लाभायाद्यादिभ्य उपसङ्ख्यानात् सप्तम्यर्थेऽशेषत इति तसिमाश्रित्य व्यापारेष्विति पदान्तरमध्याहृत्य तच्छेषतयैव व्याख्यानं कृतमित्यवधेयम् । **यदुक्तं पुंस्त्वादिवदित्यादाविति** । तत्रास्येति प्रकृततद्गुणसारत्वपरामर्शादिति भावः ॥ **हेतोर्विरुद्धतेति** । स्वातन्त्र्यादिसादृश्यस्य हेतुशरीरप्रवेशे तस्य भेदाभावव्याप्तत्वेन तेन भेदसाधनं विरुद्धं स्यादिति भावः ।

वा०र०— यद्यपि 'एतदोऽशि'त्युक्तत्वादिति । एतच्च काशिकायाम् । एतदोऽशिति पठित्वा शकारः सर्वदिशार्थ इत्युक्तत्वात् तदनुसारेण शकारान्तसूत्रपाठोपादानम् । भाष्यकारेण तु एतदोऽन् इति नकारान्त

एव पाठ उपात्तः । तत्रानित्यादेशस्यानेकाल्त्वात् सर्वादेशत्वं द्रष्टव्यम् । **एतदो रूपमिति** । इदंशब्दस्य प्राग्दिवीये परत 'इदम इश्' इत्यनेन ईशादेशोऽस्मादिति इतः इत्येवंरूपस्य विद्यमानत्वेन अत इत्यस्येदंशब्द-रूपत्वाभावात् । एतच्छब्दस्य एतदोऽशित्यनेन प्राग्दिशीये तसिलि परतः अशादेशे अत इति रूपस्य जायमान-त्वाच्चेति भावः । **'इदं इश्' इत्यनुवृत्तिरस्तीति** । अयं भावः । एतदोऽशित्यत्र हि एतदः, अश् इति योग-विभागमाश्रित्य 'एदैतौ रथोः' इति पूर्वसूत्रानुवृत्तिं चाश्रित्य एतदः रेफादौ थकारादौ च प्रत्यये परतः एत इत इत्येतावादेशौ भवत इत्याद्ययोगं व्याख्याय एतद इत्येवानुवृत्तिं चाश्रित्य एतदो अश् प्रत्ययो भवति इति द्वितीययोगो व्याख्यायते काशिकादौ । तत्रैवं वक्तव्यं द्वितीययोगे एतद इव इदमोऽशित्यतः प्रकृतस्येदमोऽपि अनुवृत्त्याश्रयणे अशादेशः इदमोऽपि भविष्यति । किं द्वितीययोगे नवीनोक्तरीत्या एत एवेत्यवधारणेन । इदमो-ऽनुवृत्त्या ग्रस्तस्याप्येतेतौ रथोरिति पूर्वसूत्रस्यैतद इति पूर्वयोगेऽनुवृत्त्याश्रयणवत् एतदित्यनुवृत्त्या ग्रस्तेऽपि द्वितीययोगे व्यवहितेदमोऽप्यनुवृत्त्याश्रयणे बाधकाभावात् । न चेदमेतच्छब्दप्रकृतिकयोः रूपयोर्भेदस्तर्हि न स्यादिति वाच्यम् । इष्टापत्तेः । अन्यथा काशिकोक्तसाधुत्वयोरेतर्हि इत्थमित्येतयोः इदंशब्दैतच्छब्दोभय-प्रकृतिकयो रूपयोर्भेदाभावेन तद्रूपयोस्तदुभयप्रकृतिकत्वं न स्यात् । अत एवानुवृत्तिरस्त्वित्युक्तमिति । अत्राद्य-वाशब्दस्तु वैयाकरणैरस्य प्रकारस्य स्पष्टमनभिधानाभिप्रायेण । न त्वनास्थाद्योतनाय । उक्तरीत्या न्यायप्राप्तत्वेन इदमोऽपि अशादेशोपपत्तेः । इदमित्येवंरूपो यः शब्द इति प्रतीतार्थस्येदंशब्दप्रकृतिकत्वे परित्यागाप्रसङ्गाच्चेति ज्ञेयम् । **अशेषाः समस्तजीवा इत्यादाविवेति** । अयं च प्रयोगो द्रष्टव्यः ।

स०व्र०— इदंशब्दपरामृष्टमिति ॥ नन्वेतदोऽशिति तसिलि परतः एतच्छब्दस्याशादेशेऽतःशब्द-निष्पत्तेरतःशब्दस्य एतच्छब्दरूपतयैव प्रसिद्धत्वात् कथमतइत्यस्येदंशब्दरूपत्ववचनं इदंशब्दात् तस्या निष्पत्ते-रिति चेन्न । अयं चासौ शब्दश्चेदंशब्द इति विग्रहमाश्रित्यैतच्छब्दपरामृश्यत्वमेवात्रातःशब्दस्याभिप्रेतं न तु तन्निष्पन्नत्वमित्यत्राभिप्रायात् । यद्वा एतदोऽशिति सूत्रे अश् इति योगविभागात् इदंशब्दस्यापि तदुपपत्तिः ।

॥ इति जीवेषु सूर्यकायाभासतो विशेषः, तद्विशेषस्य च सूत्रगतातःशब्दालब्धत्वम्, तदर्थश्च तदधीनत्व-तत्सदृशत्वादिरूपाभासत्वमिति प्रदर्शनञ्च ॥

* * *

॥ अथ 'अत एव चोपमा'इतिसूत्रगतवाक्ययोजना, तदर्थश्च 'प्रकृताभ्यां चित्त्वरूपतदधीनत्वतत्सदृशत्वाभ्यामेव सूर्यकायुपमोक्ता न तूपाध्यधीनत्वादिना' इति ॥

३३ **सु०— इदानीं 'अत एव चोपमे'ति वाक्यं योजयति तावन्मात्रेण चेति ।**

अनु०— तावन्मात्रेण चाभासो रूपमेषां चिदात्मनाम् ।

तदधीनत्वतत्सदृशत्वमात्रेणैषां चिदात्मनां रूपं स्वरूपमस्माभिराभास इत्युक्तम् । सूर्यकाद्युपमा च तावन्मात्रेण चोपपत्तेरिति चार्थः । 'जीव' इति वक्तव्ये एषां चिदात्मनां रूपमिति वचनं मुक्तेष्विदं द्वयमस्तीति दर्शयितुम् । अनेन 'अत एव प्रकृताभ्यां तदधीनत्वतत्सदृशत्वाभ्यामेव' आभासत्वं सूर्यकाद्युपमा चोक्तेति स्वाभिप्रायप्रकटनं सूत्रार्थ इत्युक्तं भवति ।

परि०— स्वाभिप्रायेति । 'आभास एव चे'त्यादौ स्वोक्तजीवाभासत्वस्य योऽभिप्रायः स्वस्य सूत्रकारस्य तत्प्रकटनमत्र सूत्रखण्डेन कृतमिति स एव सूत्रार्थो न परोक्त इत्यर्थः ।

गु०दी०— सूर्यकाद्युपमा च इत्यत्र उपमापदस्य साकाङ्क्षत्वात् सूर्यकादीति योग्यपदाध्याहार इति सूचयितुं सूर्यकाद्युपमेत्युक्तम् । अन्यथा सूर्यकादिवदित्युपमेत्यवक्ष्यदिति ज्ञेयम् ।

यादु०— उक्तमिति । सौत्रेण चशब्देनेति शेषः ॥ **स्वाभिप्रायेति** । सूत्रकारः स्वाभिप्रायमनेन सूत्रखण्डेन प्रकटितवानित्यर्थः ।

वं०प०— इत्युक्तं सूर्यकादिवदिति दृष्टान्तोक्त्या विवक्षितमित्यर्थः ॥ **स्वाभिप्रायेति** । सूर्यकादिवदितिदृष्टान्तोक्त्याऽऽभासत्वरूपो हेतुः प्राप्तस्तत्राभासत्वे उपाध्यधीनत्वादिना नाशशङ्कायां न तेन साम्यं विवक्षितम् । किन्तु तदधीनत्वादिनैवेति सूर्यकादिवदित्यत्रत्यं स्वस्याभिप्रायं सूत्रकारोऽत एव चोपमेति प्रकटीचकारेत्यर्थः ।

शे०चं०— उक्तमिति । सौत्रोपमाशब्दार्थतयेत्यर्थः ॥ **चार्थ इति** । तावन्मात्रेण चेति भाष्यगतचशब्दार्थ इत्यर्थः ॥ **इदं द्वयमस्तीति** । यद्यपि संसारिष्वपि तदधीनत्वं तत्सदृशत्वं चेति द्वयमस्त्येव तथाऽपि व्यक्तं नास्तीत्यभिप्रायेणेयमुक्तिरिति ध्येयम् ॥ **अनेनेति** । यदुक्तं तदधीनत्वमित्यादिभाष्यग्रन्थेनेत्यर्थः ॥ **स्वाभि-प्रायेति** । सूत्रकाराभिप्रायेत्यर्थः ।

वा०र०— अस्माभिराभास इत्युक्तमिति मूलम् । तत्रायमर्थः । प्राक्सूर्यकादिवदित्येतत्खण्डेनाभास एव सूत्रोक्तस्येति च वक्ष्यमाणमूलानुसारेण दृष्टान्तमात्रकथनमुखेन योग्यतयाऽध्याहृतप्रतिज्ञाहेतुमेलनेन प्रयोगे सूत्रकृतोक्ते सौत्रहेतौ असिद्धिशङ्कायां दृष्टान्तानुपपत्तिशङ्कायां च प्राप्तायां सूत्रकारो ब्रवीति अस्माभिर्यदाभासत्वं हेतुत्वेनोक्तं तत् सूर्यकादिवदित्यनेन तदधीनत्वतत्सदृशत्वाभ्यामेव । उपमा च तावन्मात्रेणोपपत्तेरिति नासिद्ध्यादिप्रसङ्ग इति । अत एवानेनेत्युत्तरवाक्य एवमेव च सूत्रकाराभिप्रायकथनपरतया सूत्रव्याख्यानं वर्णयिष्यतीति ज्ञेयम् । एवं टीकायां पाठः चार्थ इत्युक्त्योपमामात्रोपपादनं सूत्रकारस्य न विवक्षितम् अपि तु प्रागुक्त-

हेतूपपादनमपि । अन्यथा चशब्दं नोपादद्यात् । अत एव वक्ष्यति सौत्रश्चशब्द आभासत्वसमुच्चय इत्यादीति ज्ञेयम् । क्वचित्पुस्तके उक्तमित्यस्य सौत्रचशब्दार्थतयेत्यर्थ इत्यप्याहुरिति पाठः । तत्रान्येषामर्थस्तु प्रतिज्ञाहेतु-प्रदर्शनावसरेऽपि आभास एव चेत्युक्तस्याभासत्वहेतोः कल्पनायां सूत्रकारीयश्चशब्द एव नियामक इति भावेन कथञ्चिन्नेयः । अस्वरसस्तु स्पष्ट एव । अनेनान्यथाख्यातिस्थचशब्देनेति शेष इति व्याख्यानमात्रमपास्तं वेदितव्यम् । सौत्रश्चशब्द आभासत्वसमुच्चयार्थतयेत्युत्तरग्रन्थविरोधश्च । सौत्रोपमाशब्दार्थतयेत्यर्थ इति पाठस्तु लेखकागतः । मूलकोशे चकारस्थाने उपमापदशोधरस्य केनचित्करणादिति ज्ञेयम् । यद्यप्यत्र नाशित्वस्यैवेति पाठः ।

।। इति 'अत एव चोपमा'इतिसूत्रगतवाक्ययोजना, तदर्थश्च 'प्रकृताभ्यां चित्त्वरूपतदधीनत्वतत्सदृशत्वाभ्यामेव सूर्यकाद्युपमोक्ता न तूपाध्यधीनत्वादिना' इति ।।

* * *

३४ सु०— एवशब्दव्यावर्त्यं दर्शयति नेति ।

अनु०— नोपाध्यधीनताद्यैश्च

उपाध्यधीनत्वतन्नाशनश्यत्वजडत्वाद्यैरपि नेत्यर्थः । (इह) बहुवचनप्रयोगा'न्नाशिता भवेदि'त्यापादनमप्युपलक्षणं बोद्धव्यम् ।

परि०— एवशब्देति । सौत्र'एव'शब्देत्यर्थः ।। **इत्याद्यापादनमिति** ।। आभासत्वहेतो-र्विरुद्धत्वापादनादिः **आदिपदार्थः** ।। **उपलक्षणमिति** । जडत्वहिताहितप्राप्तिपरिहारहेत्वनुष्ठानेच्छा-पूर्वप्रवृत्त्यभावादेरुपलक्षणम् । एतदापादनमपि 'उपाध्यायत्तरूपाणां नाशिता भवेदि'ति शङ्काग्रन्थे ध्येयमित्यर्थः । **आदिपदस्याप्युपलक्षणज्ञापकत्वेऽपि** तस्यैकधर्मपरत्वेनाप्युपपत्तेः अनेकधर्मलाभाय निरवकाशबहुवचनमेवोपात्तम् ।।

गु०दी०— नाशिता भवेदित्यापादनमित्यस्य तदोपाध्यायत्तरूपाणां नाशिता भवेदित्यापादने जडत्वादिकमपि भवेदित्यापादनीयमित्यर्थः ।

यादु०— जडत्वाद्यैरित्यत्राद्यशब्देन बिम्बसन्निधिनाशनाश्यत्वादिसङ्ग्रहः । **बहुवचनेति** । यद्यपि तन्नाशनाश्यत्वं जडत्वादिकं चाशब्देनैव गृहीतम् । तथाऽपि तस्य बहुवचनसमभिव्याहाराभावे तथात्वं न तु ज्ञातुं शक्यमित्युपजीव्यत्वाद् बहुवचनप्रयोग एवोपात्त इति ज्ञातव्यम् ।

वं०प०— उपलक्षणमिति । 'नाशिता भवेत्' उपाध्यधीनत्वे सूर्यकादिवज्जडत्वादिकं च भवेदिति द्रष्टव्यम् ॥

शे०चं०— जडत्वाद्यैरित्याद्यपदेन बिम्बसन्निधिनाशनाशित्वादिपरिग्रहः । ननु 'तदोपाध्यायत्तरूपाणां नाशिता भवेदि'त्युपाध्यायत्तत्वेन नाशित्वमात्रस्यैव प्रागापादितत्वादापादकतयोक्तस्योपाध्यायत्तत्वस्यापाद्यतयोक्तस्य नाशित्वस्य चानभिमतत्वात्तयोरेवैवकारव्यावृत्ततया व्याख्यानमुचितं न तु जडत्वादीनाम् । तेषां प्रागनापादितत्वादित्यतो नाशितेत्यस्य तदुपलक्षणत्वान्नाशित्वस्येव जडत्वादेरपि तेन प्रागापादिततया विवक्षासिद्धेर्युक्तमेवकारव्यावृत्ततया तद्व्याख्यानमित्यभिप्रेत्याह **इहेति** । नाशितेत्यस्य जडत्वाद्युपलक्षणत्वे भाष्यकारीयं नियामकमाह **बहुवचनेति** । नाशितेत्यस्य जडत्वानुपलक्षणत्वे 'नोपाध्यधीनताद्यैरि'ति जडत्वादिसङ्ग्राहकबहुवचनानुपपत्तिरिति भावः । यद्यप्यत्र नाशित्वस्येव जडत्वादेरप्याद्यशब्देनैव गृहीतत्वात्तत्सङ्ग्राहकाद्यपदप्रयोग एव नाशितेत्यस्य जडत्वाद्युपलक्षणत्वनियामकतया वक्तुं शक्यते । तथाऽपि बहुवचनासमभिव्याहृतस्य तस्य सावकाशत्वेन तन्नियामकत्वानुपपत्त्या तत्समभिव्याहृतस्यैव नियामकत्वेनानुसरणीयत्वात्प्राप्ताप्राप्तविवेकेन बहुवचननिर्देशस्यैव तत्र नियामकत्वपर्यवसानमित्यभिप्रेत्य बहुवचनप्रयोगादित्येवोक्तमित्यवधेयम् ।

वा०र०— सावकाशत्वेनेति । समभिव्याहृतातिरिक्तयत्किञ्चित्सङ्ग्राहकत्वेनाप्युपपत्त्येत्यर्थः । **बहुवचननिर्देशस्यैवेति** । यद्यप्यनेकेषु तत्सत्तादौ ब्रह्माद्यं जगद्वियदादीत्यादिस्थानेषु तदभावेऽपि सर्वसङ्ग्रहो दृष्ट इति न तस्यैव नियामकता तथापि तावतापि यत्किञ्चिदेकमात्रपरत्वेन सङ्कोचशङ्का पाक्षिकी स्यात् । बहुवचने तु प्रयुक्ते तन्निवृत्तिरिति भावेन तथोक्तिरिति ध्येयम् । यद्यपि च बहुवचनप्रयोगेऽपि विवक्षितसर्वसङ्ग्रहो नियमान्न लभ्यते तृतीयसङ्ग्रहमात्रेण तदुपपत्तेः अतस्तदर्थं न बहुवचनमावश्यकं तथापि तत्प्रयोगो आद्यपदेन विवक्षितस्य सङ्ग्रहे सम्भावकः स्यादिति भावेनेदमित्यादि ध्येयम् ।

* * *

॥ अथ दृष्टान्ते साध्यसाधनधर्मसाम्यमेव विवक्षितं नातिसाम्यम्, अन्यथा सर्वानुमानोच्छेदप्रसङ्गश्च ॥

३५　**सु०— नन्वेवं सति दृष्टान्तदार्ष्टान्तिकभावो न स्यात्, अत्यन्तसाम्ये हि स भवति, अन्यथा प्रमेयत्वादिमात्रसाम्यस्य सर्वत्र सम्भवेन मशकोऽपि मातङ्गस्य दृष्टान्तः स्यादित्यत आह नातिसाम्यमिति ।**

अनु०—　　नातिसाम्यं निदर्शने ।

निदर्श्यते साध्येन साधनस्य व्याप्तिरत्रेति हि निदर्शनम् । अतः साध्यसाधनधर्म-साम्यमेव दार्ष्टान्तिकेन तत्रान्वेष्टव्यम्, न त्वतिसाम्यम्; तथा सति सर्वानुमानोच्छेद-प्रसङ्गात् । मशकादेरपि विवक्षितधर्मसाम्ये दृष्टान्तत्वं नानिष्टमिति ।

परि०— मातङ्गस्येति । गजस्येत्यर्थः ॥ **विवक्षितधर्मसाम्य इति** । मातङ्गोऽभिधेयो मेयत्वान्मशकवदिति विवक्षितसाध्यसाधनधर्मसाम्ये इत्यर्थः ।

शे०चं०— एवं सतीति । तदधीनत्वतत्सदृशत्वमात्रेण सूर्यकाद्युपमोपपादन इत्यर्थः ॥ **तथा सतीति** । अत्यन्तसाम्यस्य विवक्षायामित्यर्थः । धूमानुमाने, प्रकृतसाध्यसाधनवत्तया पर्वतमहानसयोः सत्यपि साम्ये, पर्वतत्वमहानसत्वाभ्यां वैषम्येणात्यन्तसाम्याभावात् दृष्टान्तदार्ष्टान्तिकभावाभावप्रसङ्गादिति भावः । नन्वेवं किञ्चित्साम्यान्मशकोऽपि मातङ्गस्य दृष्टान्तः स्यादित्यत आह **मशकादेरपीति** ॥ **विवक्षितेति** । साध्य-साधनेत्यर्थः ।

॥ इति दृष्टान्ते साध्यसाधनधर्मसाम्यमेव विवक्षितं नातिसाम्यम्, अन्यथा सर्वानुमानोच्छेदप्रसङ्गश्च ॥

* * *

॥ अथ असुरेतरजीवेषु चित्त्वेतरकिञ्चित्सुखादिसादृश्यस्याप्यस्तित्वम् ॥

३६ **सु०—** ननु चित्त्वमात्रमित्यसत्, मुक्तौ सुखाद्यङ्गीकारविरोधात् इत्यत आह **किञ्चिदिति** ।

अनु०— किञ्चित्सुखादिसादृश्यमपीशेनासुरानृते ।

असुरान्विहायान्येषां जीवानामीशेन किञ्चित्सुखादिसादृश्यमप्यस्त्येव । सुखादि-सादृश्यं विद्यमानमप्यसर्वगामित्वान्नोक्तम्, चित्त्वसादृश्यं तु सर्वगामित्वादुक्तमिति भावः । निरवधिकसुखादिव्यवच्छेदाय **किञ्चिदित्युक्तम्**, अन्यथा हि हेतोर्विरुद्धता स्यात् ।

परि०— अन्यथेति । निरवधिकसुखेन सादृश्यस्याभासत्वहेतुशरीरप्रवेश इत्यर्थः । **हेतोः** आभासत्वहेतोः ।

वं०प०— अन्यथा हीति । निरवधिकसुखादिसादृश्यस्याभासत्वहेतुशरीरप्रवेशो तेन जीवब्रह्मभेदसाधनं विरुद्धं स्यादित्यर्थः ।

शे०चं०— ननु यदि सुखादिसादृश्यमस्ति तर्हि वक्तव्यमेव । अन्यथा सतश्चित्त्वस्याप्यवक्तव्यत्वापातात् । विद्यमानत्वाविशेषेऽपि सुखादिसादृश्यस्यावक्तव्यत्वे चित्त्वसादृश्यस्यैव च वक्तव्यत्वे नियामकाभावादित्यत आह **सुखादीति** ॥ **अन्यथेति** । निरवधिकसुखाद्यव्यवच्छेद इत्यर्थः ॥ **विरुद्धतेति** । निरवधिकसुखादिसादृश्यस्य भेदाभावव्याप्तत्वात् तेन भेदसाधनस्य विरुद्धत्वादित्यर्थः ।

वा०र०— निरवधिकसुखाव्यवच्छेद इति । सुखाद्यव्यवच्छेद इत्यर्थः । आदिपदगर्भपाठस्तु सुगम एव ।

स०व्र०— अन्यथा हीति । निरवधिकसुखादिव्यवच्छेदाभाव इत्यर्थः । आभासत्वेन हेतुना अभेदाभावः साध्यते । अत्र निरवधिकसुखादिसादृश्यस्य जीवेषु सत्त्वे तस्याभेदाविनाभूतत्वादाभासत्वहेतोर्विरुद्धत्वं स्यादित्यर्थः ।

॥ इति असुरेतरजीवेषु चित्त्वेतरकिञ्चित्सुखादिसादृश्यस्याप्यस्तित्वम् ॥

* * *

॥ अथ समुदायार्थः ॥

॥ अथ तत्र भाष्यकारीयदोषाभावोपपादनस्य समुदायार्थः ॥

३७ सु०— अयं समुदायार्थः । 'ब्रह्माभासत्वादि'ति हेतोर्ब्रह्माधीनत्वात् तत्सदृशत्वाच्चेत्यर्थो न तु 'सूर्यकादिवत्प्रतिबिम्बत्वादि'ति ॥ न चायमर्थोऽसिद्धः, निपुणतरं प्रागुपपादितत्वात् । न च उपाध्यधीनत्वेन व्याप्तो येन तद्व्यावृत्त्या व्यावर्तेत, उपाध्यधीनतारहितेष्वपि भावात् । न च भागासिद्धिः(द्धः), चिदात्मस्वरूपतया उपपादितत्वात् । नापि विरुद्धः, भिन्नेष्वेव(ष्वपि) भावात् ।

परि०— प्रागुपपादितत्वादिति । 'सन्ध्ये सृष्टिरि'त्यादौ 'पुंस्त्वादिवदि'त्यादौ चेति भावः ॥ **व्याप्त इति** । 'आभासत्वे हेतुरि'त्यनुषङ्गः ॥ **उपाध्यधीनतारहितेष्विति** । सूर्यप्रतिबिम्बेष्विन्द्रचापादिष्विति भावः । 'इन्द्रचापो यथा रवेरि'त्यादेः विण्मूत्राद्यभिमानिषु उक्तरूपपृथिव्यादिदेवताभासत्वस्य सत्त्वेऽप्युपाध्यधीनत्वाभावादिति भाव इत्यप्याहुः ॥ **न च भागासिद्धि-**

रिति । हेतुशरीरप्रविष्टब्रह्मसदृशत्वरूपभागस्यासुरजीवभागे वाऽसिद्धिर्न चेत्यर्थः ॥ **उपपादितत्वादिति** । 'सदृशत्वं च चित्त्वमात्रं न चापरमि'ति ग्रन्थेनेति भावः । 'आभासत्वविरोधतः' इति शङ्काग्रन्थे आभासत्वस्याभेदेनैव व्याप्तत्वमुपेत्य या आभासत्वविरुद्धतोक्ता तामुद्धरति **नापि विरुद्ध इति** ।

गु०दी०— उपाध्यधीनतारहितेष्वपि भावादित्यत्र **उपाध्यधीनतारहितेषु** मुक्तेषु **भावात्** आभासत्वसद्भावादित्यर्थः ।

यादु०— प्रागुपपादितत्वादिति । अनेनातःशब्दप्रयोगे प्रयोजनमुक्तमित्यवधेयम् ॥ **उपाध्यधीनतारहितेष्वपीति** । मुक्तेष्वित्यर्थः । अनेन चिदात्मनां रूपमित्येतल्लब्धार्थो दर्शितः । 'किञ्चित्सुखादिसादृश्यमपीशेनासुरानृत' इत्येतल्लब्धमर्थं दर्शयति **न च भागासिद्ध इति** । सुखेन सादृश्यविवक्षयाऽसुरेषु भागासिद्धिर्नेत्यर्थः । चक्षुराद्यभिमान्यपभ्रष्टदेवेषु सूर्याद्यधीनत्वे सति तत्सादृश्यस्य सत्त्वादित्यर्थः । तेषां जीवत्वेनानादिनित्यत्वात् । न तु बाह्योपाध्यधीनत्वादिकमस्तीत्यवगन्तव्यम् । 'रूपमेषां चिदात्मनामि'त्यनेन लब्धमर्थं दर्शयति **न च भागासिद्ध इति** । मुक्तिदशायामभावेन भागासिद्धिर्न चेत्यर्थः । न चापरमित्यनेन लब्धमर्थं दर्शयति **नापि विरुद्ध इति** ।

वं०प०— न तु सूर्यकादिवदिति । उपाध्यधीनत्वादिनेत्यर्थः । व्याप्तः आभासत्वहेतुः उपाध्यधीनतारहितेष्वपभ्रष्टदेवेष्वप्याभासत्वस्य भावाद्व्यभिचार इत्याह **उपाधीति** । **भिन्नेषु** अपभ्रष्टदेवेषु ॥ (**भागासिद्धिरिति** । मुक्तेष्वभावादिति भावः ॥ **विरुद्ध इति** । आभासत्वस्याभेदव्याप्तत्वादित्यर्थः ॥)

शे०चं०— यदुक्तमित्यादिभाष्येण सूचितमाभासत्वानुमानस्यासिद्ध्यादिदोषपरिहारं तत्तन्निवर्तनीयदोषशङ्काप्रदर्शनपूर्वकमुपपादयितुम् 'अन्याभासविशेषितम्' इत्यादेः 'किञ्चित्सुखादिसादृश्यमपीशेनासुरानृते' इत्यन्तस्य वाक्यसमुदायस्य तात्पर्यार्थमाह **अयं समुदायार्थ इति** । तदधीनत्वं जीवस्य सदृशत्वं चेत्यनेन लब्धमर्थमाह **ब्रह्मेति** । यदुक्तमित्यस्य तात्पर्यमाह **प्रागुपपादितत्वादिति** । 'सन्ध्ये सृष्टिराह ही'त्यादौ ब्रह्माधीनत्वस्य 'पुंस्त्वादिवदि'त्यत्र च सदृशत्वस्योपपादितत्वादित्यर्थः । 'उपाध्यधीनताद्यैर्न्'त्यस्य तात्पर्यमाह **न चेति**। कुतो न तद्व्याप्त इत्यत आह **उपाध्यधीनतारहितेष्वपीति** । चक्षुराद्यभिमान्यपभ्रष्टदेवेषु सूर्याद्यधीनत्वे सति तत्सदृशत्वस्य सत्त्वादित्यर्थः । तेषां च जीवत्वादनादिनित्यत्वेनोपाध्यधीनत्वाभावादिति भावः। 'किञ्चित्सुखादिसादृश्यमपीशेनासुरानृते' इत्यनेन लब्धमर्थमाह **न च भागासिद्ध इति** । सुखादिसादृश्यस्यासर्वगामित्वप्रयुक्तं भागासिद्धत्वं च नेत्यर्थः । **चिदात्मरूपतयेति** । चित्त्वरूपतयेत्यर्थः । न चापरमित्यनेन लब्धमर्थमाह **नापि विरुद्ध इति** ।

स०व्र०— उपाधीति । गगनादिषु ब्रह्माधीनत्वसद्भावेऽपि उपाध्यधीनत्वाभावादित्यर्थः । ननु पक्षीकृतजीवमात्रे ब्रह्माधीनत्वलक्षणाभासत्वसत्त्वेऽपि सुखादिगुणैर्ब्रह्मसदृशत्वलक्षणतत्सदृशत्वहेतोरभावेन हेतोर्भागासिद्धिरित्यत आह न च भागेति ॥ चिदात्मेति । चित्वेनैव सदृशत्वं विवक्षितमिति नासिद्धिः ।

॥ इति भाष्यकारीयदोषाभावोपपादनस्य समुदायार्थः ॥

* * *

॥ अथ भाष्यकारीयदोषाभावोपपादनस्योपलक्षणतया दोषान्तरमाशङ्क्य परिहरणम् ॥

३८ सु०— तथाऽपि विम्बप्रतिबिम्बयोरैक्यात् सूर्यकादिदृष्टान्तः साध्यसाधनविकल इति चेन्न, प्रमाणाभावात् ॥ न तावत् प्रत्यक्षम्, तस्य प्रत्यक्त्वपराक्त्वादिना भेदग्राहित्वात्, प्रत्यभिज्ञानं त्वसिद्धमेव ॥ नाप्यनुमानं लिङ्गाभावात्, अत्यन्तसादृश्यस्य सव्येतरकरादिना व्यभिचारात्, वैधर्म्याभावस्य चासिद्धत्वात्, क्रियासाम्यस्य छायादावनैकान्त्यात्, पृथक्कारणाभावस्य नित्येषु व्यभिचारात्, बिम्बकारणमात्रजन्यत्वस्य सन्दिग्धत्वात् । पृथग्दृष्टकार्यानुरोधेन ह्यदृष्टमपि पृथक्कारणं कल्प्यते, न तु कारणादर्शनेन दृष्टकार्यापलापः, तथा सति बहुविप्लवापत्तेः, ततः कारणमुपाधिरेव कल्प्यते ॥ आगमास्तु प्रत्यक्षादि(क्षवि)-विरोधादुपचरितार्था एव ॥ यदि च जलादिना प्रतिहता नयनरश्मयो मुखमीक्षन्ते तदा शिलादिप्रतिहता अपीक्षेरन् । न च अस्यां प्रक्रियायां स्वच्छतायाः कोऽप्युपयोगोऽस्तीत्यलम् । तत्त्वमस्यादिश्रुतिविरोधस्तु परिहरिष्यते । अतो निर्दोषमेवाभासत्वानुमानमिति ।

परि०— ननु 'ममेदं मुखमि'ति प्रत्यभिज्ञैव प्रमाणमभेद इत्यत आह प्रत्यभिज्ञानं त्विति। 'ग्रीवायामेव मे मुखं न दर्पण' इति प्रतीतेरेव भावेन 'मम मुखमेतदि'ति सारूप्यादुपचार इति भावः। प्रसक्तलिङ्गान्याशङ्क्य निराह अत्यन्तसादृश्यस्येत्यादिना ॥ असिद्धत्वादिति । सव्येतरभेदादेर्दर्शनादिति भावः । कारणान्तरानुपलम्भात् बिम्बकारणमात्रजन्यत्वं निश्चीयत इत्यत आह पृथग्दृष्टेति । अत्र च परात्त्वादिना पृथग्दर्शनमस्तीति भावः । आगमास्त्विति । 'नेक्षेतोद्यन्तमादित्यं ना(स्तयं)स्तंयन्तं कदाचन । नोपरक्तं न वारिस्थं न मध्यं नभसो गतम्' इत्याद्या इत्यर्थः । तत्र वारिस्थेऽप्यादित्यपदप्रयोगादभेदधीर्ध्येया । प्रत्यक्षेति । 'प्रत्यगि'त्यादिना प्रागुक्तभेदग्राहिप्रत्यक्षेत्यर्थः । उपचरितार्था इति । सादृश्यनिमित्ता इत्यर्थः । दर्पणादिस्वच्छद्रव्यमेव प्रतिहतिहेतुः न

शिलादिरित्यत आह **न चास्यामिति** । प्रतिहताः परागवृत्त्य ग्रीवास्थमेव मुखं गृह्णन्तीति प्रक्रियायामित्यर्थः । 'आभासत्वादि'ति भेदसाधकहेतोरसिद्ध्यादेरभावेऽपि श्रुतिविरोधस्तु स्यादित्यत आह **तत्त्वमस्यादीति** । 'ईशत्वेनैव विज्ञातमनीशत्वेन चेच्छ्रुतिरि'त्यादौ परिहरिष्यतेऽग्रेतनग्रन्थ इत्यर्थः ।

गु०दी०— प्रत्यभिज्ञानं त्वसिद्धमेवेत्यत्र तदेवेदं मुखमिति परोदीरितं प्रत्यभिज्ञानमसिद्धम् । किन्तु मम मुखस्येदं प्रतिमुखमित्येव सर्वेषामनुभव इति भावः । आगमास्तु प्रत्यक्षविरोधादुपचरितार्था एवेत्यभ्युपगम्योक्तम् । वस्तुतस्तु बिम्बप्रतिबिम्बैक्यागमाः स्वरूपत एव न सन्तीति द्रष्टव्यम् ॥ **अस्यां प्रक्रियाया**मित्यत्र द्रव्यान्तरोपहननेन परावृत्तिरिति प्रक्रियायां स्वच्छतायाः नोपयोगः । प्रत्युत अभिहन्तरि पदार्थेऽतिद्रढिम्न एवोपयोग इति भावः ।

यादु०— यत्स्वलक्षणं ग्रीवास्थं मुखं प्रतिपन्नं तत्स्वलक्षणमेव दर्पणस्थमपि भातीति प्रत्यभिज्ञानमेव तत्र प्रमाणमित्यत आह **प्रत्यभिज्ञानं त्विति** । आदर्शादौ प्रतीते मुखे परात्त्वसव्येतरव्यत्यासपरिमाणाल्पतादेवैधर्म्यस्यापि भासमानत्वेन तत्स्वलक्षणमेव भातीति प्रत्यभिज्ञानमसिद्धमित्यर्थः । करादिनेत्यत्रादिपदेन यमयोर्ग्रहणम् ॥ **क्रियासाम्यस्येति** । समानक्रियावत्त्वस्येत्यर्थः । यौ समानक्रियावन्तौ तावभिन्नाविति न व्याप्तिः । शरीरतच्छाययोर्व्यभिचारादित्यर्थः । आदिपदेन दीपतत्प्रभयोर्ग्रहणम् । ननु 'नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन । नोपरोक्तं न वारिस्थं न मध्यं नभसो गतमि'त्याद्यागम एवात्र प्रमाणम् । अत्र वारिस्थे प्रतिबिम्बे बिम्बवाचकादित्यशब्दप्रयोगात्तदैक्यसिद्धेरित्यत आह **आगमस्त्विति** । तथा च लिखितसिंहे सिंहशब्दवत् 'यथा दारुमयी योषा यथा चर्ममयो मृगः' इत्यादिवच्च वारिस्थे आदित्यशब्दप्रयोगः सादृश्यनिमित्तक एव नाभेदनिमित्त इति भावः ॥ **परिहरिष्यत इति** । 'ईशत्वे नैव विज्ञातमनीशत्वेन चेच्छ्रुतिरि'त्यादाविति शेषः ।

वं०प०— वैधर्म्येति । सव्येतरकरादौ किञ्चिद्वैधर्म्यमस्त्येवेति भावः ॥ **असिद्धत्वादिति** । अत्रापि प्रत्यक्त्वपरात्त्वादिरूपवैधर्म्यस्य सत्त्वादित्यर्थः । **क्रियासाम्यं** बिम्बचलने प्रतिबिम्बचलनरूपम् ॥ **अनैकान्त्यादिति** । देहतच्छाययोरभेदाभावादिति भावः ॥ **पृथगिति** । प्रतिबिम्बं बिम्बाभिन्नम् । बिम्बरूपकारणव्यतिरिक्तकारणशून्यत्वादित्यर्थः । छायायाश्च देहक्रियया क्रियावत्त्वेऽपि देहरूपकारणातिरिक्तमालोकादिरूपकारणमस्तीति न तत्र व्यभिचार इति भावः । अत एव नान्धकारे छायाप्रतीतिरिति ज्ञातव्यम् ॥ **नित्येष्विति** । सर्वथा नित्यानां कारणशून्यत्वेन निरुक्तो हेतुरस्तीति व्यभिचार इत्यर्थः । निरुक्तहेतोर्नित्येषु व्यभिचारपरिहाराय पर्यवसाने कृते दोषमाह **बिम्बकारणेति** । तद्रूपकारणेत्यर्थः । तदेवोपपादयति **पृथगिति** । प्रतिबिम्बरूपकार्यस्य बिम्बात्पृथग्दर्शनाद्बिम्बातिरिक्तमुपाधिरूपं कारणं वाच्यमिति भावः ॥ **बहुविप्लवेति** । स्पष्टदृष्टकण्टकशौक्ल्यादेरप्यपलापापत्तेरित्यर्थः ॥ **तत इति** । एवं न्यायादित्यर्थः । तथा च प्रकृते आभासत्वविरोधत इत्यत्र 'तथा हि दर्पणादिना सन्निकृष्टाः प्रतिहताः परावृत्ता नयनरश्मय' इत्यादिनोक्तां बिम्बप्रतिबिम्बाभेदसाधकप्रक्रियां दूषयति

यदि चेति । न च स्वच्छत्वास्वच्छत्वाभ्यां विशेषः । प्रतिहतानां परावृत्तिरिति प्रक्रियायां स्वच्छत्वादेरनुपयोगादित्याह **न चेति** ॥ उपलक्षणमेतदित्यादिना तत्त्वमस्यादिश्रुतिविरुद्धत्वेनोक्तं कालातीतत्वं परिहरति **तत्त्वमस्यादीति** ।

शे०चं०— भाष्यकारीयदोषाभावोपपादनमुपलक्षणपरमित्यभिप्रेत्य सम्भावितं दोषान्तरमाशङ्क्य परिहरति **तथाऽपीत्यादिना** । तत्कथमित्यतः किमत्र प्रत्यक्षमभिमतमुतानुमानमागमो वेति विकल्पं मनसि निधायाद्यं निराचष्टे **न तावदिति** । ननु यथा बहिस्थितश्चैत्रो यत्स्वलक्षणः प्रतिपन्नस्तत्स्वलक्षण एव वेश्मान्तः स्थितोऽपि भाति। तथा यत्स्वलक्षणं ग्रीवास्थं मुखं तत्स्वलक्षणमेव दर्पणस्थमपि भाति न तद्वस्त्वन्तरत्वे युज्यते । तस्मादेकमेकदेशस्थं च मुखं भ्रान्त्या भिन्नं भिन्नदेशस्थं च भातीति चेन्न । किमनेन सादृश्यप्रतीतिरुपन्यस्ता प्रत्यभिज्ञा वा । नाद्यः । तथाऽभेदासिद्धेः । अन्यथा गवये गोसादृश्यावगत्या तदभेदसिद्ध्या आपातादित्यभिप्रेत्य द्वितीयं दूषयति **प्रत्यभिज्ञानं त्वसिद्धमेवेति** । अयमर्थः । प्रतिबिम्बो हि बिम्बाद्भिन्नतया साक्षात्क्रियत इति तावदविवादः। अन्यथा त्वयाऽपि कस्य भ्रमत्वमुच्येत । न च भेदं भेदकं च साक्षात्कुर्वन्नभेदमपि साक्षात्कुर्वन्दृष्टः। न चैक्ये साक्षात्कृते सोपाधिकभेदभ्रमोऽपि युक्तः । तदुपादानस्याप्यैक्याज्ञानस्यैक्यज्ञानेन निवृत्तत्वात् । न च उपाधिनिवृत्तिसहकृतमेव ज्ञानमज्ञाननिवर्तकम् । ज्ञाते कदाऽपि न जानामीत्यननुभवेन ज्ञानस्य स्वप्रागभावं प्रतीवाज्ञानं प्रत्यप्यन्यानपेक्षस्यैव निर्वतकत्वात् । न च बिम्बप्रतिबिम्बयोरैक्ये ज्ञातेऽपि तदवच्छिन्नचैतन्यैक्यस्याज्ञानात्तत्र भेदभ्रम इति वाच्यमतिप्रसङ्गात् । न च बिम्बप्रतिबिम्बैक्यज्ञानाभावेऽपि मूलाविद्याकार्योऽयं भेदभ्रमः । तथा सति व्यावहारिकत्वापातात् । न च सोपाधिकभ्रमं प्रति नाज्ञानज्ञाने उपादाननिवर्तके किन्तूपाधिसन्निधानरूपदोषतदपगमाविति वाच्यम् । दोषो निमित्तमात्रं कार्यानुगुणं मिथ्याभूतमज्ञानमेव तूपादानमिति त्वन्मतहानेरन्यथा ह्यज्ञानाकार्यत्वेन ज्ञानानिवर्त्यत्वेन च बिम्बप्रतिबिम्बभेदस्य सत्यत्वापातादिति ।

द्वितीयं दूषयति **नापीति** ॥ **लिङ्गेति** । तत्प्रतिबद्धलिङ्गाभावादित्यर्थः । तत्कथमित्यतस्तद्धि भवत्किमत्यन्तसादृश्यं वैधर्म्याभावो वा क्रियासाम्यं पृथक्कारणाभावो वा बिम्बकारणमात्रजन्यत्वं वेति विकल्पान्मनसि निधायाद्यं दूषयति **अत्यन्तेति** । द्वितीयं प्रत्याह **वैधर्म्याभावस्य चेति** । प्रत्यक्त्वपराक्त्वादिवैधर्म्यस्यैव परिदृश्यमानत्वादिति भावः । न तृतीय इत्याह **क्रियेति** । चतुर्थं प्रत्याह **पृथगिति** । न पञ्चम इत्याह **बिम्बेति** । ननु कारणान्तरस्यादर्शनाद्बिम्बकारणमात्रजन्यत्वनिश्चयो भविष्यतीत्यत आह **पृथगिति** । परिवेषेन्द्रचापच्छायाप्रतिसूर्यादाविवेति शेषः ॥ **तथा सतीति** । भेरीघातादिक्लृप्तहेत्वभावाद्ध्वनावुपरतेऽप्युपलभ्यमानस्य प्रतिध्वनेरपि शब्दान्तरत्वाभावापातादित्यर्थः ।

नन्वस्तु तर्हि 'नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन । नोपरक्तं न वारिस्थं न मध्यं नभसो गतमि'ति शास्त्रीयो व्यवहार एव बिम्बप्रतिबिम्बयोरैक्ये प्रमाणमिति तृतीयः पक्षः । अत्र वारिस्थे प्रतिबिम्बे बिम्बवाच-

त्कादित्यशब्दप्रयोगात्तदैक्यसिद्धेरित्यतश्चित्रिते सिंह इति लोकव्यवहारवत् । 'यथा दारुमयी योषा यथा चर्ममयो मृग' इत्यादिस्मार्तव्यवहारवच्च भेदप्रतीतिबलादेव वारिस्थमादित्यमिति व्यवहारस्य सादृश्यादिनिमित्ततया गौणत्वेनाभेदनिमित्तत्वाभावाद्व्यपदेशमात्रस्यैव प्रत्यक्षबाधकतायां चादित्यो यूप इत्यादावपि तत्प्रसङ्गात्तत्कथमनेनाभेदः सिद्ध्येदित्याशयेनाह **आगमस्त्विति** । पूर्वोक्तमनूद्यातिप्रसङ्गेनापि दूषयति **यदि चेति** । ननु जलादेः स्वच्छत्वात्तत्प्रतिहतानां नायनरश्मीनां स्वमुखग्राहकत्वसम्भवेऽपि शिलादेरस्वच्छत्वान्न तेन प्रतिहतानां तेषां स्वमुखग्राहकत्वमित्यतः प्रतिफलनोपाधित्वपक्षे जलादेः स्वच्छत्वोपयोगसम्भवेऽप्यभिघातकत्वमात्रेणोपयोगपक्षे स्वच्छत्वस्य न कथमप्युपयोगोऽन्यथा विरलावयवस्य जलस्य नेत्राभिघातकत्वे स्वच्छजलान्तर्गतशिलाद्यग्रहणापत्तेरित्याशयेनाह **न चास्यामिति** ।। **परिहरिष्यत इति** । 'ईशत्वेनैव विज्ञातमनीशत्वेन चेच्छ्रुतिः । अनीशत्वेन विज्ञातमीशत्वेनाथवा दिशेत् । उपजीव्यविरोधेन नैव मानत्वमेष्यती'त्यादिनेति शेषः । आभासत्वानुमानमितीत्यत्रत्येतिशब्दस्येत्ययं समुदायार्थ इति पूर्वेणान्वयः ।

वा०र०— न च मिथ्योपाधिकृतो भेदः क्वापि दृष्ट इत्येतत्तत्त्वनिर्णयव्याख्यानरूपम् । 'ननु यथा बहिस्थित' इत्यादिग्रन्थानुसारेण बिम्बप्रतिबिम्बयोरैक्यभङ्गीयन्यायामृतानुसारेण च शङ्कादिकम् । ननु यथेत्यादिना अयमर्थ इति मध्ये शिलाद्यग्रहणापत्तेरित्याशयेनाहेत्यन्तेन । अत्रायं विवेकः । कथमप्युपयोग इत्यन्तेनोपयोगो नास्तीत्यन्तं व्याख्यातम् । अलंपदार्थकथनम् **अन्यथेति** । स्वच्छत्वस्य प्रकृतत्वात् अन्यथेत्युक्तं स्पष्टयति **विरलेति** । अनेनाभिघातकत्वे दोषान्तरमलंशब्दार्थतयोक्तं भवति । एवं चान्यथेत्यस्यासङ्गतिशङ्कानवकाशः । अत एव स्थलान्तर इवान्यत्रालमित्यस्य पृथगवताराभाव इति ज्ञेयम् ।

।। इति भाष्यकारीयदोषाभावोपपादनस्योपलक्षणतया दोषान्तरमाशङ्क्य परिहरणम् ।।

।। इति समुदायार्थः ।।

।। इति आभासत्वानुमानदूषणनिवर्तकतयोक्तसूत्रावयवव्याख्यानस्य तात्पर्यम् ।।

।। इति आभासत्वानुमानदूषणनिवर्तकतया सूत्रावयवावतरणम्, व्याख्यानम्, तात्पर्यम्, उपलक्षणञ्च ।।

* * *

।। अथ 'यदुक्तं तदधीनत्वम्'इत्याद्यनुव्याख्यानोक्तार्थस्य विवरणम् ।।

।। अथ तत्र ब्रह्माभासशब्देन ब्रह्माधीनत्वं ब्रह्मसदृशत्वञ्च न गौण्या वृत्त्याऽपि तु योगेनैव ।।

३९ **सु०**— 'ननु ब्रह्माभासशब्दो जीवस्य ब्रह्माधीनतां ब्रह्मसदृशतां च कया वृत्त्या वक्ति । गौण्येति चेत्, एवं तर्ह्यस्मदायत्ते शब्दप्रयोगेऽवाचकं किमिति प्रयोक्ष्यामह इति प्रयोजनं वाच्यम्' मैवम् । योगाश्रयणादित्याह **तत इति** ।

अनु०— तत आभासते नित्यं तद्वदाभासतेऽपि च ।
भानमस्तित्वमपि चैवासमन्ताद्यतस्ततः ।
जीव आभास उद्दिष्टः सदैव परमात्मनः ॥

तेन परमात्मना निमित्तेन**आभासते** प्रतीतो भवतीति प्रतीतौ तदधीनत्वमुच्यते । **तद्वत्**, ब्रह्मवद**आभासत** इत्यनेन तत्सदृशत्वम् । **अपि चेति** व्याख्यानसमुच्चये ॥ **भानं** ज्ञानम् । **अस्तित्वं** सत्त्वम् । 'अस्ति'शब्दोऽव्ययम्, 'अस्ति स्वती'ति पाठात् । **अपिशब्दो भानास्तित्वयोः** समुच्चये । **चशब्दो** व्याख्यानसमुच्चये । **एवशब्दस्य** 'तत एवे'ति सम्बन्धः । **आ** इत्यनुवादेन **समन्तादिति** व्याख्यानम् । **यतः** कारणात् **ततः परमात्मन एव जीवस्य भवतः** '**ततः** कारणादि'त्यावृत्त्या योज्यम् । भा च आसा च भाऽऽसे, आ सर्वकालवर्तिन्यौ भाऽऽसे आभासे, परमात्माधीने आभासे यस्यासौ परमात्माभासः ।

परि०— **अव्ययमिति** । तिङन्तप्रतिरूपमव्ययमित्यर्थः । तेन 'तस्य भावस्त्वतलावि'ति प्रातिपदिकाद्विहितत्वप्रत्ययोपपत्तिरिति भावः ॥ **इतिपाठादिति** । अव्ययगणपाठादित्यर्थः ॥ **व्याख्यानसमुच्चय इति** । पूर्वव्याख्यानद्वयेनास्य समुच्चय इत्यर्थः ॥ **आवृत्त्येति** । तत इत्यस्येत्यर्थः ।

गु०दी०— **भानं ज्ञानमित्यत्र** स्वकर्तृकघटादिज्ञानमभिप्रेतम् । ततः आभासत इति प्रागुक्तं ज्ञानं स्वविषयकमिति भावः । **अस्तिशब्दोऽव्ययमित्यत्र** अस्तीति तिङन्तप्रयोगे पुनस्त्वप्रत्ययस्यानवकाशादस्तिशब्दोऽव्ययमित्युक्तमिति ज्ञेयम् । **भा च आसा च भासे** इत्यत्र भा ज्ञानं 'अस भुवी'ति धातोः आसा अस्तित्वमित्यर्थः ।

यादु०— **अव्ययमिति** । न तिङन्तं पदं, तेन त्वप्रत्ययोपपत्तिरिति भावः । **परमात्माभास इति** । तथा चोक्तं व्याख्यानं परमात्माभासशब्दस्यैव नाभासशब्दमात्रस्येति ज्ञेयम् ।

वं०प०— **वक्तीति** । योगरूढ्योरभावादिति भावः ॥ **व्याख्यानसमुच्चय इति** । तत आभासते, तद्वदाभासत इत्याभासशब्दव्याख्यानयोः परस्परं समुच्चय इत्यर्थः ॥ **चशब्द इति** । तत आभासत इत्यादिना कृताभासशब्दव्याख्यानद्वयापेक्षया भानमिति क्रियमाणव्याख्यानसमुच्चय इत्यर्थः ।

शे०चं०— कया वृत्त्येति । अभिधानाद्यभावेन रूढेरसम्भवात् । अवयववृत्त्यप्रतिभासेन योगस्याप्यनुपपत्तेर्न तस्य तत्र मुख्यवृत्तिः सम्भवति । नाप्यमुख्यवृत्तिः । तस्याः प्रयोजनसापेक्षत्वेनासति प्रयोजने तदनुपपत्तेरिति गूढाभिसन्धेरियमाशङ्का । आशयमजानानः शङ्कते **गौण्येति चेदिति** । पूर्ववादी स्वाशयमुद्घाटयति **एवं तर्हीति** ॥ **तेन परमात्मनेति** । अनेनाद्यादिभ्य उपसङ्ख्यानात् तेनेति तत इति तृतीयान्तात्तसिरित्युक्तं भवति । **निमित्तेनेति** । जीवकर्तृकप्रतीतावीश्वरस्य कर्तृत्वकरणत्वयोरसम्भवान्न तत्रेयं तृतीया किन्तु निमित्त एवेति भावेनेदमुक्तम् ॥ **तद्वदिति** । 'तत्र तस्येवेति' लक्षणस्य प्रायिकत्वेनाभियुक्तैर्व्याख्यातत्वात्प्रथमान्तादेवात्र वतिरिति भावः ॥ **व्याख्यानसमुच्चय इति** । तत आभासत इति व्याख्यानस्य तद्वदाभासत इति व्याख्यानस्य च समुच्चयेऽपि चेति समुदायरूपो निपात इत्यर्थः । नन्वस्तीत्येषोऽस्तेर्लट् तत्कथं तिङन्तादस्तिशब्दाद्भावप्रत्ययः । 'तस्य भावस्त्वतलावि'ति षष्ठ्यन्तात्समर्थादेव भावे त्वतलोर्विधानादस्य च षष्ठ्यन्तत्वाभावादित्यत आह **अस्तिशब्द इति** । सत्ताविशिष्टकर्तृवाच्यस्तिशब्दो निपातत्वादव्ययमित्यर्थः । ततश्चाव्ययस्य सर्वविभक्त्यन्ततया युक्तः षष्ठ्यन्ताद्विहितस्त्वप्रत्ययोऽस्तिशब्दादपीति भावः । कथमस्य निपातत्वं येनाव्ययत्वमित्यतो 'विभक्तिप्रतिरूपकाश्च निपाता भवन्ती'ति भाष्यं मनसि निधाय तदुपपादयति **अस्ति स्वस्तीति पाठादिति** । विभक्तिप्रतिरूपकेषु पाठादित्यर्थः । यद्यपि स्वरादिपाठादप्यव्ययत्वमस्योपपादयितुं शक्यं तथाऽपि तस्य सत्तामात्रार्थत्वेनास्तीत्येतावतैव सत्तालाभात्तदर्थकत्वप्रत्ययवैयर्थ्यप्रसङ्गात्तदनाश्रयणमिति मन्तव्यम् । **व्याख्यानसमुच्चय इति** । तत आभासत इति पूर्वोक्तव्याख्यानेन भानमस्तित्वमिति व्याख्यानस्य समुच्चय इत्यर्थः । आ समन्तादिति भाष्येऽन्यतरेणान्यतरस्य वैयर्थ्यमाशङ्क्य परिहरति **आ इत्यनुवादेनेति** । भा च आसा च भासे इत्येव मूलपाठः । अत्र भानं भा, असनमसा भा च असा च भासे इति विग्रहो द्रष्टव्यः ॥ **परमात्माभास इति** । यद्यप्यत्र परमात्माभास इति पदं नास्ति तथाऽपि ब्रह्माभासशब्दार्थकथनार्थमस्य वाक्यस्य प्रवृत्तत्वात् तदुपपत्त्यर्थं परमात्माभास इत्युक्तमिति भावः ।

वा०र०— उत्तरव्याख्यानस्य पूर्वव्याख्यानसमुच्चायकतया भानमस्तित्वमपि चेति चशब्दस्य व्याख्यानस्य मानतया भानमित्युत्तरव्याख्यानसमुच्चयार्थत्वायोगात् तत आभासत इत्यादिव्याख्यानद्वयसमुच्चयस्य चान्यतरेणैव सिद्धेः परस्परसमुच्चयस्य चानावश्यकत्वादन्यतरवैयर्थ्यमित्याशङ्कापरिहाराय निपातसमुदायरूपोऽयं निपात एक एवेति न वैयर्थ्यमिति मूलाभिप्रायं स्पष्टयति **समुदायरूपो निपात इति** । तस्येति षष्ठीसमर्थादित्यादिकाशिकोक्तसूत्रार्थानुसारेणाह **तस्य भाव इत्यादि** । समर्थानां प्रथमाद्वेति प्राग्दिशीयपर्यन्तं समर्थाधिकारात् समर्थादेवेत्युक्तम् । तच्च सामर्थ्यं परिनिष्ठितत्वम् । न त्वेकार्थभावरूपमित्यादिकं तत्र समर्थानामिति सम्बन्धार्थानामित्यादिमञ्जर्यादौ स्पष्टम् । **निपातत्वादिति** । स्वरादिनिपातमव्ययमिति सूत्रेण निपातानामव्ययत्वविधानादिति भावः । उक्तं च तदस्यास्त्यस्मिन्निति मतुबिति सूत्रीयमञ्जर्यामस्ति विवक्षायामस्तिमानिति क्वाचित्कवृत्तिग्रन्थव्याख्यानावसरे अस्तिशब्दो विभक्तिप्रतिरूपको निपातः कर्तृविशिष्टसत्तावाची । नैषोऽस्तेर्लट् । प्रयोगान्तरमपि दृश्यते अस्तित्वमस्तितेत्यादि । **विभक्तिस्वरेति** । अत्र विभक्तिस्वरप्रतिरूपकाश्चेति पाठः ।

प्रतिरूपकेष्विति वक्ष्यमाणत्वात् । तदस्यास्तीति सूत्रीयभाष्ये हि तद्धितविधावस्तिग्रहणम् । तद्वै क्रियमाणमपि प्रत्ययविध्यर्थम् । अस्तिमानिति मतुप् यथा स्यात् । किं कारणं न स्यात् । अप्रतिपादकत्वात् । नैष दोषः। अव्ययमेवास्तिशब्दः । नैषोऽस्तेर्लट् । कथमव्ययत्वम् । विभक्तिस्वरप्रतिरूपकाश्च निपाता भवन्तीति निपातसंज्ञा निपातोऽव्ययमित्यव्ययसंज्ञेति प्रतिपादनादिति भावः । **अव्ययमिति** । कर्तृविशिष्टसत्तावाचीति भावः । तथा चास्तित्वमिति भावप्रत्ययप्रयोगोपपत्तिरिति कैयटोक्तिं च मनसि निधायैतद्विभक्तिप्रतिरूपकाः वेलायां मात्राया-मित्यादयः, स्वरप्रतिरूपकाः अइउऋऌ इत्येवमादयः । उपसर्गप्रतिरूपकाणामन्यत्रोक्तं निपातत्वम् । 'यथा दत्तं विदत्तं च प्रदत्तं चादिकर्मणी'त्यादिशेष्यादौ स्पष्टमेतत् । **तदर्थकेति** । सत्तारूपभावार्थकेत्यर्थः । सत्ताविशिष्ट-वाचित्वे तु तद्भावरूपसत्तार्थकतया त्वप्रत्ययवैयर्थ्यमिति भावः । स्वरादिगणे पठितस्यास्तीत्यस्य सत्तायामिति व्याख्यानात् । विभक्तिप्रतिरूपकस्य च सत्ताविशिष्टकर्त्रर्थत्वोक्तेरिति भावः । **ब्रह्माभासशब्दार्थेति** । ब्रह्मा-भासत्वादिति हेतूकरणेन ब्रह्माभासशब्दः प्राक्प्रयुक्त इति भावः । **अस्य वाक्यस्येति** । तत आभासत इति मौलवाक्यस्येत्यर्थः । अनेन परमात्मनः आभास इति व्यस्ततयाऽनुव्याख्याने पदद्वयोपादानात् परमात्माधीने आभासे यस्येति विग्रहप्रदर्शनं मूले अनुपपन्नमिति शङ्का निरस्ता भवति । अस्य सर्वस्य प्राक्प्रयुक्तब्रह्माभास-शब्दार्थकथन एव तात्पर्यात् । पञ्चम्यर्थतयैवाधीनत्वस्य कथनाच्चेति ज्ञेयम् ।

स०ब्र०— ननु तस्य भाव इत्यनेन षष्ठीसमर्थात् भावप्रत्ययस्य विहितत्वेन प्रकृतेऽस्तीत्यस्य क्रिया-पदत्वेन तदभावात् कथमस्तित्वमिति भावप्रत्यय इत्यत आह **अस्तिशब्द इति** ॥ **आ इत्यनुवादेनेति** । अन्यथा एकस्य वैयर्थ्यापत्तिः । **चशब्दो व्याख्यानेति** । भानमस्तित्वमिति व्याख्यानस्य तत आभासत इति व्याख्यानान्तरसमुच्चयार्थमित्यर्थः ॥ **भा चासा चेति** । भानं भा । असनं असा । भा च असा चेति भासे इति समासो द्रष्टव्यः । परमात्माभास इति पदं नास्ति; किन्तु, आभास इत्येव । तथापि ब्रह्माभासशब्दार्थ-कथनार्थमस्य वाक्यस्य प्रवृत्तत्वेन तदर्थं परमात्माभास इत्युक्तमिति द्रष्टव्यम् ।

स०ना०— 'तत आभासते नित्यं तद्वदाभासतेऽपि चे'ति मूलसम्बन्धसुधायां **एवं तर्ह्यस्मदायत्ते शब्दप्रयोग इति** । त्वं च अहं च एते च वयम् । त्यदादिषु यद्यत्परं तच्छिष्यते इति अस्मदः शेषो भवति । अस्माकमायत्तः अस्मदायत्तः । एतेन त्वदायत्ते शब्दप्रयोगे अवाचकं किमिति प्रयोक्ष्य स इति भवितव्यमिति परास्तम् ॥

॥ इति श्रीसत्यनाथतीर्थविरचितायां श्रीमन्न्यायसुधाटिप्पण्यां
तृतीयाध्यायस्य द्वितीयः पादः ॥

चषकः— **इति पाठादिति** । अव्ययगण इति पूरणीयम् ।

* * *

।। अथ 'भानमस्तित्वमपि चैवासमन्तायतस्ततः'इत्यनुव्याख्याने यतिभङ्गशङ्का तन्निरासश्च ।।

४० सु०— 'पूर्वान्तवत्स्वरःसन्धौ क्वचिदेव परादिवत् । द्रष्टव्यो यतिचिन्तायां यणादेशः परादिवदि'ति वचनान्न यतिभङ्गः शङ्कनीयः ।

परि०— 'अपिचैवे'त्यत्र 'एव'शब्दे विच्छेदावगमात् यतिभङ्गमाशङ्क्याह **पूर्वान्तवदिति** । **स्वरः** अकारादिः । अत्रैकाररूपस्वरस्य पूर्वान्तवत्त्वभावान्न दोष इत्यर्थः ।

यादु०— पूर्वान्तवदिति आनन्दमयाधिकरणे व्याख्यातम् ।

शे०चं०— ननु पदमध्ये विरामाद्यतिभङ्ग इत्यत आह **पूर्वान्तेति** । योऽयं पूर्वापरयोरेकादेशः स्वरः सन्धौ सवर्णदीर्घादिः स प्रायः पूर्वान्तवत् क्वचिदेव परादिवच्च द्रष्टव्यः । अत एव 'अन्तादिवच्चे'ति पाणिनिः सस्मार । यणादेशः पूर्वान्तोऽपि परादिवदेव द्रष्टव्यः । अत्र च स्वरस्य परादिवद्भावे व्यञ्जनमपि परादिवद्भवति। तद्भक्तत्वात् । प्रकृते च पूर्वापरयोरेकादेशस्यैकारस्य पूर्वान्तवद्भावान्न यतिभङ्ग इति भावः । **वचनात्** वृत्तरत्नाकरवचनात् । एतच्च यतिभङ्गस्य शास्त्रदोषत्वमङ्गीकृत्योक्तम् । वस्तुतस्तु 'य उपाधिर्लगति साध्ये सम्बन्धविशेषण' इत्याद्यभियुक्तप्रयोगदर्शनान्न तस्य शास्त्रदोषत्वं किन्तु काव्यदोषत्वमेवेति प्रमेयदीपिकायां टीकाकृतोक्तं समाधानमेवात्रावधेयम् ।

वा०र०— पदमध्ये विरामादिति । पदान्ते पदमध्ये विरामादित्यर्थः । अयं भावः । 'अब्धिभूतरसादीनां ज्ञेयाः संज्ञास्तु लोकतः । ज्ञेयः पादश्चतुर्थांशो यतिर्विच्छेदसंज्ञित' इति परिभाषाकथनपरवृत्तरत्नाकरे अब्धयश्चत्वारः । उपलक्षणया वेदा वा । भूतानि पञ्च इन्द्रियाणि वा । रसाः षट् मुनयः सप्तेत्यादिरूपेण समुद्रादीनां या सङ्ख्या तावत्सङ्ख्याकेषु चतुःपञ्चषडाद्यक्षरेषु तत्तत्सङ्ख्याकाक्षराणां समुद्रादिसंज्ञा ज्ञेया । यतिनियतस्थानेषु 'यतिः सर्वत्र पादान्ते श्लोकार्धे तु विशेषत' इत्याद्युक्तेषु समुद्रादिसंज्ञकानि चतुरक्षरादीनि अनुष्टुबादिछन्दस्सु यथासम्भवं ज्ञेयानि । पादश्च यस्य छन्दसो यावदक्षरता ततश्चतुर्थांशः । स च समाक्षर एवेति न नियमः । किन्तु उद्गीथादिछन्दस्सु समो वा विषमो वा अन्यत्रोक्तस्तावानेव पादचरणादिव्यवहारेषु ज्ञेयः । यतिशब्दो विच्छेदे विरामे संज्ञितः परिभाषितः । संज्ञितेति पाठे तु यतिर्विच्छेदसंज्ञिता ज्ञेया । पादान्तादियतिस्थानेषु समुद्रादिसंज्ञिकचतुरक्षरादीनि वस्तुतः सन्तीति प्रतिपादनात् । यतिः सर्वत्रेति नियतस्थानकथनपरवृद्धवाक्येषु समुद्रादिपदान्ते चेति समुद्रादौ पदान्ते च विरतिमभिधाय समुद्रादौ यतेः क्वचित् पदमध्येऽपि समुद्रादौ यतिर्भवेदिति पदमध्येऽपि सत्त्वमभिधाय विशिष्योक्त्या च पदान्ते पदमध्ये विरतिर्नास्तीति प्रतिपादनाच्च यतिर्जिह्वोष्ठविश्रामस्थानं कविभिरुच्यते । 'सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छये'ति छन्दोग्रन्थोक्ते विच्छेदादिशब्दितजिह्वोष्ठविश्रामस्थानरूपयतेः पदान्त एव विधानस्य सिद्ध्या प्रकृते च चै इति पदमध्येऽवसानस्य

सत्त्वात् प्रमाणम् अतः भवबन्धक्लेशनाशाय नारायणचरणसरोजद्वन्द्वमानन्दहेतुमित्यादाविव यतिर्न नियतस्थानेति तद्भङ्गः स्यादिति । वृत्तरत्नाकरनारायणभट्टयनुसारेण व्याख्याति **योऽयं पूर्वापरयोरित्यादि** । स्वरः सन्धौ योऽयं पूर्वापरयोरेकादेशः सवर्णदीर्घादिरिति सम्बन्धः । **अन्तादिवच्चेति पाणिनिरिति** । षष्ठाद्यपाद इति शेषः । अत्र सूत्रे एक इति पूर्वापरयोरिति च वर्तते । तथा च योऽयमेकादेशो विधीयते स पूर्वस्यान्तवद्भवति परस्यादिवद्भवति । यथा तदन्त आदिर्वा तदन्तर्भूतस्तद्ग्रहणेन गृह्यते तद्वदेकादेशोऽपि तद्ग्रहणेन गृह्यत इति सूत्रार्थः ।

ब्रह्मबन्धुरित्यत्र ऊङुत इति सूत्रेणोकारान्तान्मनुष्यजातेः स्त्रियामूङ्विधायकेन ब्रह्मबन्धुशब्दादूङि सवर्णदीर्घे चान्तवद्भावात् पूर्वान्तत्वेन प्रत्ययान्तत्वाभावादर्थवदधातुरप्रत्यय इति सूत्रेण प्रातिपदिकत्वे स्वाद्युत्पत्तिर्भवति । एवं ब्रह्मबन्धु आ इति तृतीयास्थले नोङ्धात्वोरिति विभक्त्याद्युदात्तत्वनिषेधो न भवति । मञ्जर्यां शेष्यादौ च स्पष्टमेतत् । यत्र पदान्ते पदमध्ये विरतिः तत्रैव समुद्ररसादावपि पदविरतिः दोष एव । परन्तु 'क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेदि'ति विशेषात् क्वचिदेव विरतावपि प्रायो विरत्यभाव एवावश्यकः । अन्यत्रापि क्वचिद्विरतिश्चेत् पूर्वान्तवदित्युक्तलक्षणस्थल एव स्वीकार्या नान्यत्रेति निरूपणायेदं प्रवृत्तमिति न यतिः सर्वत्रेत्याद्युक्तस्यैतस्य च विरोधः शङ्कनीय इति द्रष्टव्यम् । एतदुदाहरणानि तु 'अभेदेऽपि विशेषणैवान्य इत्युदितो हरिरि'त्यानन्दमयाधिकरणीयानुव्याख्यानमूलटीकायां स्पष्टानि । वचनादित्यनूद्य व्याचष्टे **वृत्तरत्नाकरेति** । वृत्तरत्नाकरे सम्मतितयोदाहृतवचनादित्यर्थ इति पाठः । आनन्दमयाधिकरणे तथैव टीकापाठात् । वृत्तरत्नाकरवचनादिति पाठेऽपि उक्त एवार्थे तात्पर्यात् न कश्चिद्दोषः । गीताभाष्यटीकाविरोधं परिहर्तुमाह **एतच्च यतिभङ्गस्येति**। यतिस्थाननियमादिकथनस्य काव्यार्थत्वेन उक्तलक्षणस्य श्लोकेषु नियतस्थानपदच्छेदं यतिं विदुरित्युक्तस्य लक्षणस्य च काव्यलक्षणतया तदभावोऽपि काव्यस्यैव दोषो न तु शास्त्रस्य । न चात्र नियामकाभावः। तथा सति शास्त्रेषु तादृशबहुविधप्रयोगानुपपत्तिप्रसङ्गादिति भावः । **अभियुक्तेति** । ....स्तबके कुसुमाञ्जलिप्रयोगेत्यर्थः । एतत्कारिकाव्याख्यानं तु 'तद्विशेषणयुक्तैतदभावा भूस्तु केवले' इति वाक्यशेषसाहित्येन गीताभाष्यटीकाप्रपञ्चे अस्माभिः सङ्क्षेपतो दर्शितम् । तत एव प्रतिपत्तव्यम् । यत्तु तद्ग्रन्थविवरणकारैर्य उपाधिर्लगतीति साध्ये यद्वै विशेषणे इति पाठान्तरं कल्पितं तत् तन्मूलकोशेषु पाठान्तराभावात् उक्तरीत्या यतिभङ्गस्य काव्यदोषत्वेन शास्त्रदोषत्वाभावेन समाधानोपपत्तौ तत्कल्पनानर्थक्याच्चायुक्तमिति स्पष्टमेवेति न तन्निराकृतवान् टीकाकार इति ज्ञातव्यम् । अधिकमानन्दमयनये द्रष्टव्यम् । **प्रमेयदीपिकायामिति** । 'देवं नारायणं नत्वे'ति गीताभाष्यप्रथमपद्यगत-'चानगीते'त्यंशव्युत्पादनावसर इति शेषः ।

स०व्र०— नन्वस्मिन् वाक्ये 'अपि चैवेत्यत्र पदमध्येऽवसानस्य कृतत्वात् यतिभङ्ग इत्यत्राह **पूर्वान्तवदिति** । कृतव्याख्यानमेतदानन्दमयाधिकरणे ।

।। इति 'भानमस्तित्वमपि चैवासमन्तायतस्ततः'इत्यनुव्याख्याने यतिभङ्गशङ्का तन्निरासश्च ।।

।। इति ब्रह्माभासशब्देन ब्रह्माधीनत्वं ब्रह्मसदृशत्वञ्च न गौण्या वृत्त्याऽपि तु योगेनैव ।।

* * *

।। अथ 'जीवस्य ब्रह्माभासता न जलाद्युपाध्यायत्ता' इत्यर्थस्य विवरणम्, समर्थनञ्च ।।

४१ सु०— न जलायत्तसूर्यादिप्रतिबिम्बोपमत्वत इति ।

अनु०— न जलायत्तसूर्यादिप्रतिबिम्बोपमत्वतः ।

सूर्यादिप्रतिबिम्बा यथा जलाद्युपाध्यायत्तास्तथोपाध्यायत्तत्वेनाभासो नेत्यर्थः ।

* * *

।। अथ सिद्धान्ते जीवस्य सोपाधिप्रतिबिम्बत्वाङ्गीकारादत्र निरुपाधिप्रतिबिम्बत्वोक्तिविरोधशङ्का सिद्धान्ते प्रतिबिम्बस्य स्वरूपबाह्येति द्वैविध्यप्रदर्शनपूर्वकं निरुपाधिप्रतिबिम्बत्वोक्ते-र्बाह्योपाध्यधीनत्वाभावाभिप्रायेण तच्छङ्कानिरसनञ्च ।।

४२ सु०— ननु अयमर्थो नोपाध्यधीनताद्यैरित्यनेनैवोक्तः । सत्यम् । 'यदुक्तमि'त्यादि-नोक्त एवार्थस्तत आभासत' इत्यादिना प्रपञ्चित इत्यदोषः । तथाहि । 'रूपमेषां चिदा-त्मनामि'त्युक्तस्य तात्पर्यं 'सदैवे'त्युक्तम् ॥ स्यादेतत् । सूत्रकारेण दृष्टान्तमात्रमुक्तम् । तद्बलात्कश्चिद्धेतुरध्याहर्तव्यः । न च आभासत्वमेवेत्यस्ति नियमः । नाप्याभासपदोपादाने नियामकमस्ति । तस्मादसङ्गतमेतत् । मैवम् । आभास एव चेति सूत्रकारोक्तस्य ब्रह्मा-भासत्वस्यात्र हेतुत्वेन विवक्षितत्वात् । ब्रह्मांशत्वेन आक्षेपे तदधिकरणगतार्थस्यैव (तु) बुद्धिसन्निधानात् तत्र कर्तव्य एवायं चर्चोऽत्र कृत इति न कश्चिद्दोषः ।

यादु०— तथाहीति । तथात्वादेव हीत्यर्थः ॥ **अध्याहर्तव्य इति** । सौत्रचशब्दार्थतयोहितव्य इत्यर्थः । तेन न वक्ष्यमाणविरोध इति ध्येयम् ।

वं०प०— प्रपञ्चनप्रकारं दर्शयति **तथा हीति** ॥ **नियामकमस्तीति** । पूर्वं जीवे सूत्रकारेणाभासपदस्य कुत्राप्यप्रयुक्तत्वादिति भावः । **तदधिकरणेति** । अंशाधिकरणेत्यर्थः ॥ **दोषेति** । तन्नाशेन नाशादिरूपः ॥ **एतदिति** । 'नोपाध्यधीनताद्यैश्च', 'न जलायत्तसूर्यादी'ति कथनमित्यर्थः ॥

शे०चं०— उक्त इति । ततश्च 'तत आभासत' इत्यादिग्रन्थस्य तेन पौनरुक्त्यमिति भावः । 'तत आभासत' इत्यादिग्रन्थस्य 'यदुक्तमि'त्यादिपूर्वग्रन्थप्रपञ्चकत्वमेव कुतो ज्ञायत इत्यत आह **तथाहीति** । तथात्वादेव हीत्यर्थः । पूर्वप्रपञ्चकत्वादेव हीति यावत् । तत इत्यादेराभासत्वहेतुव्याख्यानपरभाष्यस्यासङ्गत-

त्वमाशङ्कते **स्यादेतदिति** ॥ **दृष्टान्तमात्रमिति** । सूर्यकादिवदिति दृष्टान्तमात्रमित्यर्थः । नापीति द्वितीयदोषं परिहरति **आभास एव चेतीति** । न चाभासत्वमेवेत्याद्यदोषमपि परिहरति **ब्रह्मांशत्वेनेति** ।

॥ इति सिद्धान्ते जीवस्य सोपाधिप्रतिविम्बत्वाङ्गीकारादत्र निरुपाधिप्रतिविम्बत्वोक्तिविरोधशङ्का सिद्धान्ते प्रतिविम्बस्य स्वरूपवाह्येति द्वैविध्यप्रदर्शनपूर्वकं निरुपाधिप्रतिविम्बत्वोक्तेर्बाह्योपाध्यधीनत्वाभावाभिप्रायेण तच्छङ्कानिरसनञ्च ॥

॥ इति 'जीवस्य ब्रह्माभासता न जलाद्युपाध्यायत्ता' इत्यर्थस्य विवरणम्, समर्थनञ्च ॥

* * *

४३ **सु०— ननूपाधिमत्त्वेनैव जीवस्य भगवत्प्रतिबिम्बत्वमिति सिद्धान्तः । उपाधेरपि नित्यचेतनत्वेन दोषपरिहारः । यथोक्तम् । 'उपाधेश्चैव नित्यत्वान्नैव जीवो विनश्यति । स्वरूपत्वादुपाधेश्च न भिन्नोपाधिकल्पने'ति । तत्कथमेतत् ॥ इत्थम् । द्विविधो हि जीवोपाधिः, आभ्यन्तरो बाह्यश्च । तत्र स्वरूप(स्वभाव)प्रतिभासहेतुराभ्यन्तरः, स्वभाव-विपरीतावभासहेतुरन्तःकरणादिर्बाह्यः । तदायत्तत्वादिकं चैतन्यस्य नास्तीत्यभिप्रेत्येदमुदि-तम् । तदुक्तम् । 'जीवोपाधिर्द्विधा प्रोक्तः स्वरूपं बाह्य एव च । बाह्योपाधिर्लयं याति मुक्तावन्यस्य तु स्थितिरि'ति । निरुपाधिप्रतिबिम्बवाचोयुक्तिरपि बाह्योपाध्यधीनत्वाभावा-भिप्रायेण नेतव्येति ।**

परि०— यथोक्तमिति । प्रथमस्कन्धतात्पर्ये त्रयोदशोऽध्याये 'जीवोपाधिरि'ति, चतुर्थ-स्कन्धतात्पर्ये एकविंशाध्याये कथितेयं स्मृतिः । वाचोयुक्तिरित्येकं पदम् । 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेष्वि'ति षष्ठ्या अलुक् । 'सोपाधिरनुपाधिश्च प्रतिबिम्बो द्विधेयते । जीव ईशस्यानुपाधि-रिन्द्रचापो यथा रवेः' इत्यादिनिरुपाधित्वव्यवहार इत्यर्थः ।

यादु०— नन्वेवं 'सोपाधिरनुपाधिश्च प्रतिबिम्बो द्विधेयते । जीव ईशस्यानुपाधिरिन्द्रचापो यथा रवेरि'त्यादिवचनायोग इत्यत आह **निरुपाधीति** । वाचोयुक्तिर्योगः प्रयोग इति यावत् ।

शे०चं०— शिष्यः शङ्कते **नन्विति** । नन्वेवं जीवस्य सोपाधिप्रतिबिम्बत्वात् 'सोपाधिरनुपाधिश्च प्रतिबिम्बो द्विधेयते । जीवः परस्यानुपाधिरिन्द्रचापो यथा रवेरि'त्यनुपाधिप्रतिबिम्बोक्तिविरोधः स्यादित्यत आह **निरुपाधीति** ॥ **वाचोयुक्तिरिति** । षष्ठ्या आक्रोश इत्येतत्सूत्रीय-'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेष्वि'ति वार्तिकाद्वाचोयुक्तिरिति षष्ठ्या अलुगिति भावः ।

वा०र०— बाह्योपाध्यधीनत्वाभावाभिप्रायेण नेतव्येति मूलम् । 'स्वयमेवात्र प्रदर्शकः । चित्वात् । नित्यश्चोपाधिः कश्चिदस्ती'त्यादि गीताभाष्यतट्टीकापर्यालोचनया 'यावदात्मभावित्वादि'ति सूत्रीयभाष्यटीका-पर्यालोचनया चायमर्थः स्पष्टः इति भावः ।

नन्वनेन ग्रन्थसमुदायेन अनित्यजडोपाधिनाशेऽपि नित्यचिद्रूपस्वरूपोपाधिर्न नश्यतीति लब्धम् । तत्कथम् । 'बुद्धियुक्तो जहातीहे'तिश्लोकीयपरापव्याख्याननिरासपरगीताभाष्ये नारदादिप्रत्यक्षेण मुक्तानां श्वेतद्वीप-गतानां सशरीरत्वसाधनानन्तरं 'वैलक्षण्यात् तच्छरीराणाम् । अभौतिकानि हि तानि । नित्योपाधिविनिर्मितानी-श्वरशक्त्ये'ति प्रतिपाद्य 'शरीरं जायते तेषां षोडश्या कलयैव त्वि'ति रामकल्पीयं वाक्यं प्रमाणीकृतम् । तट्टीकायां च नित्योपाधिरेव षोडशी कलेति व्याख्याय एतदुक्तं भवतीत्यादिना न ह वै सशरीरस्य प्रियाप्रिययोरुपहति-रस्तीति निषेधवाक्यस्य कर्माधीनजडशरीराभिप्रायकत्वात् । नारदेन दृष्टशरीराणां तु चिन्मात्रत्वेन जडानामपि वा कर्माधीनत्वाभावेन दुःखकारणत्वाभावोपपत्तिरिति न सशरीरत्वे श्रुतिविरोध इति प्रतिपादितम् । तथा च जड-शरीरमङ्गीकृत्य नित्योपाधिनिर्मितत्वं चाङ्गीकृत्येश्वरशक्त्या विनाशाभाव इति लब्धतया बाह्योपाधिनिराकरणा-योगः । एवं 'अभावं बादरिराह ह्येवमि'त्यादिसूत्रेष्वचिद्रूपाण्यपि मुक्तस्य शरीराणि सन्तीति प्रतिपादितं विरु-ध्यते । किं च यावदात्मेति सूत्रीयटीकोक्तरीत्या यदि जडोपाधिनाशेऽपि चेतनोपाधिनाशाभावस्तर्हि नित्योपाधि-विनिर्मितानां कामान्नी कामरूपीत्यादिश्रुत्यनुसारिलीलागृहीतशरीराणां भुक्त्वा त्यागः कदाचनेत्युक्तत्यागायोगः । अथ यदि पितृलोककामो भवतीत्यादिना सङ्कल्पमात्रप्रभवशरीररूपतृतीयं शरीरं च प्राप्यते । नान्तःप्रज्ञं न बहिः-प्रज्ञमित्येतन्माण्डूकोपनिषद्भाष्येण षोडशकालस्वरूपनिरूपणपरषट्प्रश्नीयषष्ठप्रश्नभाष्यादिना गताः कलाः पञ्चदशे-त्याद्यथर्वणभाष्यादिना चायमर्थो विरुद्ध इव प्रतीयते । तत्कथमेतदित्यत एतद्विचार्य शोध्यम् । वाच इति षष्ठीलोपे वाग्युक्तिरित्यापत्त्या वाचोयुक्तिरिति कथमित्यत आह **षष्ठ्या आक्रोश इति** । अनेनात्राक्रोशाभावेन षष्ठ्या आक्रोश इत्यनेन तल्लोपाभावेऽपीत्युक्तं भवति । **वाग्दिगिति** । वाक् दिक् पश्यत् इत्येतेभ्यो यथाक्रमं युक्तिदण्डहरेषु परतः षष्ठ्या लुङ् न भवतीत्यर्थः । वाचोयुक्तिः दिशोदण्डः पश्यतोहर इत्युदाहरणानि ।

चषकः— यथोक्तमिति । प्रथमस्कन्धतात्पर्यत्रयोदशाध्याय इत्यर्थः । **तदुक्तमिति** । चतुर्थ-स्कन्धतात्पर्ये एकविंशाध्याय इत्यर्थः ।

* * *

।। अथ सौत्र'च'शब्दस्यावधारणार्थकत्वे सौत्र'एव'शब्देन पौनरुक्त्यमाशङ्क्य तच्छङ्कानिवारणम् ।।

।। अथ तत्र सौत्रचैवशब्दयोरर्थैक्यभावनया पौनरुक्त्यशङ्का तयोरर्थभेदात्पौनरुक्त्यशङ्कापरिहारश्च ।।

४४ सु०— सौत्रश्चशब्द आभासत्वसमुच्चयार्थतया व्याख्यातः, अवधारणार्थो वा प्रति-पत्तव्यः । एवं तर्हि पुनरुक्तिदोषः, एवशब्दस्याप्यवधारणार्थत्वादित्यत आह तदधीन-त्वमिति ।

अनु०— तदधीनत्वमेवेति किञ्चित्सादृश्यमेव च ।
सम्प्रकाशयतः सूत्रगतौ

एवेतिशब्दस्तदधीनत्वमेवेत्यर्थं, च(श्च)शब्दः किञ्चित्सादृश्यमेवेत्यर्थमि'त्युभावर्थ-द्वयं सम्प्रकाशयत इत्यावृत्त्या योज्यम् । यद्वैवेतिशब्दस्तदधीनत्वम्, चः किञ्चित्सादृश्य-मित्युभावर्थद्वयं सम्प्रकाशयतः अवधारयत इति व्याख्येयम् ।

परि०— व्याख्यात इति । 'अत एवोपमेत्येव चे'ति चशब्देन सह सूत्रांशं गृहीत्वा ताव-न्मात्रेण च 'आभास' इत्यत्र व्याख्यात इत्यर्थः । अन्यथा सूत्रे आभासपदाभावादाभास इत्युक्ति-रनुव्याख्याने उत्सूत्रिता स्यादिति भावः । मूले एवेतीतिपदद्वयस्य किञ्चित्सादृश्यमित्यत्रापि अन्वयं अर्थपदाध्याहारं एव चेत्यत्र एवशब्दात्परमितिशब्दम् इति चेत्यनन्तरं शब्दपदं इत्युभाविति चपद-द्वयमुपेत्य योजयति **एवेतिशब्द इत्यादिना** ॥ **आवृत्त्येति** । एवेतीतिपदद्वयस्येति योज्यम् । 'एवेती'त्यनन्तरं शब्दपदं चशब्दस्यावृत्तिं अध्याहारं वोपेत्याह **यद्वेत्यादिना** । 'एव चे'त्यस्य एव-शब्दचशब्दावित्यर्थमुपेत्याह **इत्युभावर्थद्वयमिति** । इत्यर्थद्वयमुभौ सम्प्रकाशयत इति योजना ॥

गु०दी०— आवृत्त्या योज्यमित्यत्र तदधीनत्वमेवेतीत्यत्रोक्तेतिशब्दस्य किञ्चित्सादृश्यमेव चेत्यत्रा-प्यावर्तनादावृत्त्येत्युक्तमिति ज्ञेयम् ।

यादु०— व्याख्यात इति । 'तावन्मात्रेण चाभास' इत्यत्राभासपदेन सौत्रश्चशब्दोऽनुक्तसमुच्चायक इत्यभिप्रेत्याभासत्वहेतुसमुच्चयार्थतया व्याख्यात इत्यर्थः । अत एव तावन्मात्रेण चेत्यनुव्याख्यानगतश्चशब्दः सौत्रचशब्दार्थभूतहेतुसमुच्चायकतया सूर्यकाद्युपमा च तावन्मात्रेणोपात्तेति चार्थ इति व्याख्यात इति द्रष्टव्यम् । **आवृत्त्येति** । इतिशब्दैवशब्दयोरिति शेषः ।

वं०प०— चश्चशब्द इति । अवधारणार्थक इत्यर्थः । ननु यद्वेत्यादिव्याख्यानेऽन्तिमैवशब्दार्थ-कथनात्तस्यैव वैयर्थ्यमित्यत आह **एवशब्देनेति** । एवशब्देन प्रतिषेधतीति सम्बन्धः । किं प्रतिषेधतीत्यत आह **एकेनेति** । सौत्रचकारार्थभूतेनैवकारेणैकेनैवोभयहेत्ववधारणसम्भवात्किमन्येन सौत्रेणैवकारेणेति शङ्कानिरासार्थो-ऽनुव्याख्यानगतान्तिमैवशब्द इति भावः ।

शे०चं०— ननु तदधीनत्वमेवेत्युत्तरभाष्यखण्डवैयर्थ्यम् । न चावधारणद्वयस्यैकार्थत्वप्रयुक्तपौनरुक्त्य-परिहारार्थमेतदुक्तमिति वाच्यम् । सूत्रेऽवधारणद्वयस्यैवासत्त्वेन तदर्थैकत्वप्रयुक्तपौनरुक्त्यशङ्कानवकाशात् । न च

सौत्रस्य चशब्दस्याप्यवधारणार्थत्वादवधारणद्वयसिद्ध्या युक्तस्तच्छङ्कोदय इति वाच्यम् । 'तावन्मात्रेण चाभास' इति पूर्वग्रन्थे तस्याभासत्वहेतुसमुच्चयार्थत्वस्थित्याऽवधारणार्थत्वायोगादित्यत आभासत्वहेतुसमुच्चायकस्यापि तस्यावधारणार्थत्वस्यापि भाष्यकृदभिप्रेतत्वेनावधारणद्वयसिद्धेर्नानुपपत्तिरित्यभिप्रेत्योक्तानुवादपूर्वकं तस्यावधारणार्थतामाह **सौत्र इत्यादिना** । **व्याख्यात इति** । 'तावन्मात्रेण चाभास' इत्यत्राभासपदेन सौत्रश्चशब्दोऽनुक्तसमुच्चायक इत्यभिप्रेत्याभासत्वहेतुसमुच्चयार्थतया व्याख्यात इत्यर्थः । अत एव तावन्मात्रेण चेत्यनुव्याख्यानगतश्चशब्दः सौत्रचशब्दार्थभूतहेतुसमुच्चायकतया सूर्यकाद्युपमा च तावन्मात्रेणोपात्तेति चार्थ इति व्याख्यात इति द्रष्टव्यम् ॥ **आवृत्त्येति** । इतिशब्दैवशब्दयोरिति शेषः । अत्र पक्षे तदावृत्तिर्भवतीत्यपरितोषात्पक्षान्तरमाह **यद्वेति** ।

वा०र०— व्याख्यात इत्यर्थ इत्यत्र अनुभाष्यकृतेति शेषः । व्याख्यात इतीत्युत्तरत्र टीकायामिति शेषः । अनेन सूत्रकाराभिप्रायवर्णनाभिप्रायेण भाष्य इतिशब्दैवशब्दयोरिति शेष इति । तदधीनत्वमेवेतीत्यस्यैवेतिशब्द इत्यर्थकत्वात् तदधीनत्वमेवेत्यर्थमित्येतावदर्थसमर्पणाय एवशब्देतिशब्दयोरावृत्तिः । किञ्चित्सादृश्यमेव च इत्यत्र चेत्यस्य चशब्द इत्यर्थकत्वात् किञ्चित्सादृश्यमेवेत्यर्थमित्येतावदर्थसमर्पणाय इतिशब्दमात्रस्यावृत्तिरितीतिशब्दैवशब्दयोरावृत्त्येत्यर्थः । एवेतिशब्दयोरित्युक्ते एवशब्दस्य पूर्वत्र इतिशब्दमात्रस्योत्तरत्रावृत्तिरिति ज्ञानप्रसङ्गात् । पूर्वत्रैव एवेतिशब्दस्यावृत्तिमात्राश्रयणेनाप्युपपत्त्या उत्तरत्रेतिशब्दस्य नियमेनावृत्त्यप्रतीतेश्चोक्तविवक्षितार्थप्रतीतिलाभाय इतिशब्दैवशब्दयोरित्युक्तम् । यद्वेतिपक्षे एवशब्दचशब्दयोस्तदधीनत्वतत्सदृशत्वरूपार्थप्रकाशकत्वाभावात् सम्प्रकाशकत्वाभावात् सम्प्रकाशयत इत्येतत् व्याख्यातम् ।

स०व्र०— अवधारयत इति । अत्र पक्षे सादृश्यमेवेति एवकारस्य प्रयोजनं एवशब्देनेति मूलकार एव वक्ष्यति ।

।। इति सौत्रचैवशब्दयोरर्थैक्यभावनया पौनरुक्त्यशङ्का तयोरर्थभेदात्पौनरुक्त्यशङ्कापरिहारश्च ।।

* * *

।। अथ उक्तार्थस्याभिप्रायः ।।

४५ सु०— एतदुक्तं भवति । अत इत्यर्थद्वयं हेतुत्वेनोक्तम् । प्रत्येकं चोपाध्यधीनत्वादिकं व्यावर्तनीयम्, तदधीनत्वादेव तत्सदृशत्वादेवेति । तस्मादुभावपि सार्थकाविति ॥

यादु०— हेतुत्वेनोक्तमिति । अत्र चशब्दस्यावधारणार्थताया उक्तत्वेन हेतुसमुच्चायकत्वाभावादतःशब्देनैव हेतूक्तिरित्यभिप्रेत्यैवमुक्तमिति ज्ञातव्यम् ॥

शे०चं०— तावताऽपि कथं पुनरुक्तिपरिहार इत्यत आह **एतदुक्तं भवतीति** ॥ **अर्थद्वयमिति** । तदधीनत्वं तत्सदृशत्वं चेत्यर्थद्वयमित्यर्थः ॥ **हेतुत्वेनोक्तमिति** । प्रकृतस्य हेतुत्ववाचकत्वादतःशब्दस्यात इत्यत्र प्रातिपदिकेन प्रकृततदधीनत्वतत्सदृश्यत्वयोः परामर्शसम्भवात्तयोराभासतायां हेतुत्वं ततः परया विभ-त्त्योक्तमित्यर्थः । प्रत्येकमुपाध्यधीनत्वादिव्यावृत्तिप्रकारमेव दर्शयति **तदधीनत्वादेवेत्यादि** ॥ **तस्मादिति** । सूत्र इति शेषः । इतीत्यस्येत्येतदिति पूर्वेणान्वयः ।

॥ इति उक्तार्थस्याभिप्रायः ॥

* * *

॥ अथ चैवेतिशब्दयोरवधारणार्थकत्वेऽन्यतरवैयर्थ्यशङ्का, सूचनीयार्थसत्त्वाद्वैयर्थ्यपरिहारश्च ॥

४६ **सु०— एवशब्देनैकेनैवशब्देनोभयावधारणं प्रतिषेधति । नन्वेकेनैवशब्देनार्थद्वय-स्योक्तत्वादेकेनैवावधारणेनालम् । मैवम् । बुद्ध्या विविक्तेनार्थद्वयेन सम्बन्धात् । अथार्थ-द्वयमेकीकृत्य कस्मान्नावधार्यते । अस्त्यत्र सूचनीयोऽर्थः । यदि 'अत एवे'त्येतावदेवोच्येत तदेकस्यैवार्थस्यायं परामर्शो, न द्वितयस्य परामर्शो द्वितयपरामर्शोऽपि मिलितस्य हेतु-त्वमिति ज्ञायेत, अवधारणद्वयप्रयोगे तु तदन्यथाऽनुपपत्त्या प्रत्येकं हेतुभूतार्थद्वयपरामर्शो विज्ञायते । तथा च बाधकस्यानेकत्वेन प्राबल्यं विशेषणकृत्यगवेषणप्रयासनिरसनं च लब्धं स्यात् (प्रयासनिरासोऽपि न स्यात्) ॥ तदिदमुक्तं सूत्रगताविति ।**

परि०— **सूत्रगतावितीति** । सूत्रव्याख्यानप्रस्तावादेव सूत्रीयत्वलाभे सूत्रगतावित्युक्ति-बलादेतावानभिप्रायो ज्ञायत इत्यर्थः ॥ *आभासत्वहेतुसमर्थनम्* ॥

गु०दी०— **एवशब्देनैकेनैवशब्देनोभयावधारणं प्रतिषेधतीत्यत्र** अतः इत्येकपदोक्तहेतुद्वयादुपरि प्रयुक्तैवकारस्यावृत्त्या तदधीनत्वादेव तत्सदृशत्वादेवोपमा न तु उपाध्यायत्तत्वादिनेति उभयत्रापि सम्बन्धः । अन्येनैवशब्देन स्थानद्वये आवृत्त्या अन्वयं विना एकेनैव एवशब्देनोभयावधारणं प्रतिषेधतीति योजनिकान्तर-मिदम् । एवं चास्मदुक्तविधया अत एवेत्येवान्वयः । न त्वन्यथेति पदान्वयोऽप्यनुसन्धेयः । अत एव एव-शब्देनेत्यतःपूर्वं यद्वेत्यध्याहार्यमिति ज्ञेयम् । चशब्दस्य एवार्थतायामियं योजना । यथास्थितवाक्यार्थस्तु अतः-शब्दोदितहेतुद्वयं बुद्ध्या विविच्य तदुपरि प्रयुक्तं एवशब्दं चावृत्त्योभयत्र संयोज्य अत एवोपमेति व्याख्येयम् । चशब्देन हेतुद्वयं समुच्चिनोतीति ।

यादु०— एकीकृत्येति । भेदव्याप्यतया पूर्वमुक्तत्वेनैकीकृत्येत्यर्थः ॥ **सूत्रगताविततीति** । अनेन हि सूत्रेऽवधारणद्वयं प्रयुक्तमस्तीत्युच्यते । तेनोक्तरीत्या हेतुद्वयावधारणं सूत्रकाराभिप्रेतमिति भगवत्पादैरेवोहः कृत इति ज्ञायते । अन्यथा सूत्रगताविति द्विवचनेनावधारणद्वयस्य सूत्रगतत्वोक्तिर्मूले व्यर्था स्यादिति भावः ।

वं०प०— एकेनैव शब्देनेति । एकेनैवातःशब्देनेत्यर्थः ॥ **अर्थद्वयस्येति** । तदधीनत्वतत्सादृश्य-स्वरूपार्थद्वयस्येत्यर्थः । **अलं** सूत्र इति शेषः । तथा च सूत्रे यद्यतःशब्दद्वयं स्यात्तदा तदुभयसम्बन्धायैव-शब्दमपेक्षितं स्यान्न ह्येवमस्ति । अतोऽवधारणार्थकश्चशब्दो व्यर्थः सूत्र इति भावः ॥ **अर्थद्वयेनेति** । एकातः-शब्दोक्तेनापीति शेषः ॥ **एकीकृत्येति** । तदधीनत्वतत्सदृशत्वाभ्यामेवेत्येकीकृत्येत्यर्थः ॥ **सूत्रगताविततीति** । सूचनात्सूत्रं एतौ च यदा तत्रत्यौ तदैतयोरप्युक्तार्थसूचकत्वमस्तीत्यर्थः । अत एवास्त्यत्र सूचनीयोऽर्थ इत्युक्त-मित्यवधेयम् ।

शे०चं०— नन्वावृत्त्या भाष्ययोजनायामवधारणद्वयसार्थक्यलाभेऽपि एवेतिशब्दस्तदधीनत्वं च किञ्चित्सादृश्यमित्युभावप्यर्थद्वयं सम्प्रकाशयतोऽवधारयत इति योजनायां भाष्ये सादृश्यमेवेत्येवकारवैयर्थ्यमित्यत आह **एवशब्देनेति** । (एवशब्देन प्रतिषेधतीति सम्बन्धः) सूत्रगतचैवशब्दयोर्मध्ये येन केनचिच्छब्देनातः-शब्दोक्ततदधीनत्वतत्सदृशत्वरूपहेतुद्वयावधारणप्रतिषेधार्थत्वाद्भाष्ये एवशब्दस्य न वैयर्थ्यमित्यर्थः । **नन्वेकेनैव-शब्देनेति** । एकेनैव सौत्रेणात इतिशब्देनेत्यर्थः । किमत्रार्थद्वयस्यैकेनैवशब्देनोक्ततया विविक्तत्वात् प्रत्येकमव-धारणद्वयसम्बन्ध एवानुपपन्न इत्यभिप्रायः, किंवा सम्भवत्यपि तस्मिन्नर्थद्वयमेकीकृत्य अनवधार्य प्रत्येकमवधारणे किं प्रयोजनमिति विकल्पद्वयं मनसि निधायाद्यं दूषयति **बुद्ध्येति** । एकेन शब्देनोपात्तत्वादर्थद्वयस्य शब्दकृत-विवेकाभावेऽपि बुद्धिकृतविवेकसम्भवान्न तत्सम्बन्धानुपपत्तिरवधारणद्वयस्येति भावः । द्वितीयं शङ्कते **अथेति** ॥ **एकीकृत्येति** । भेदव्याप्ततयेति शेषः । प्रयोजनसद्भावान्नैवमित्यभिप्रेत्य तदाह **अस्त्यत्रेति** ॥ **एकस्यैवेति** । तदधीनत्वतत्सदृशत्वयोरन्यतरस्यैवेत्यर्थः । **द्वितयेति** । द्वाववयवौ यस्येति 'सङ्ख्याया अवयवे तयबि'ति तयप् । ननु चात इत्यनेन परामर्शप्रयोजकीभूतप्रकृतत्वस्योभयत्रापि साम्यादविशेषेणोभयपरामर्श एवायं नान्य-तरपरामर्श इत्यत आह **द्वितयपरामर्शेऽपीति** ॥ **तदन्यथाऽनुपपत्त्येति** । एकस्यावधारणस्य वैयर्थ्यान्यथा-नुपपत्त्येत्यर्थः । किं तद्विज्ञानेनापि सिद्धमित्यत आह **तथा चेति** । (सूत्रगताविति सूचनात्सूत्रमेतौ च यदा तत्रत्यौ एतयोरप्युक्तार्थसूचकत्वमस्तीत्यर्थः । अत एव 'अस्त्यत्र सूचनीयोऽर्थ' इत्युक्तम्) ।

वा०र०— प्रातिपदिकेनेति । इदंशब्दैतच्छब्दयोरन्यतरेणेत्यर्थः । **अवधारणद्वयेति** । तदधीनत्वमेव किञ्चित्सादृश्यमेवेत्यवधारणद्वयेत्यर्थः । एवशब्देन यदवधारणं तत्प्रतिषेधार्थत्वादिति योजना । मूले एकेनैव-शब्देनेत्यत्र कोटिः एवशब्दः, तेनेत्यर्थप्रतीतिनिरासाय व्याचष्टे **एकेनैव सौत्रेणेति** । **भेदव्याप्यतयेति** । अत्र साध्यमानो यो भेदस्तद्व्याप्यतयेत्यर्थः ।

स०व्र०— ननु तदधीनत्वमेवेति भाष्य एवशब्दवैयर्थ्यमित्यत आह **एवशब्देनेति** ॥ **एकेनैव-शब्देनेति** । एकेनैव सौत्रेणात इति शब्देनेत्यर्थः । **न द्वितयपरामर्श इति** । द्वाववयवौ प्रदेशौ यस्यासौ द्वयवयव इति व्युपत्त्या द्वितयशब्देन तदधीनत्वतत्सदृशत्वरूपसमुदायो गृह्यते तस्य परामर्शको न स्यादित्यर्थः । **तदन्यथानुपपत्त्येति** । एकस्यैवकारस्य वैयर्थ्यान्यथानुपपत्त्येत्यर्थः ।

॥ इति चैवेतिशब्दयोरवधारणार्थकत्वेऽन्यतरवैयर्थ्यशङ्का, सूचनीयार्थसत्त्वाद्वैयर्थ्यपरिहारश्च ॥

॥ इति सौत्र'च'शब्दस्यावधारणार्थकत्वे सौत्र'एव'शब्देन पौनरुक्त्यमाशङ्क्य तच्छङ्कानिवारणम् ॥

॥ इति 'यदुक्तं तदधीनत्वम्'इत्याद्यनुव्याख्यानोक्तार्थस्य विवरणम् ॥

॥ इति आभासत्वानुमान उद्भावितदोषनिरासपूर्वकं 'चेतनत्वाद्यनुमानेन जीवस्य ब्रह्माभेदसाधन'स्यायुक्तत्वसमर्थनम् ॥

॥ इति 'अत एव चोपमा'इतिसूत्रांशव्याख्यानम् (चेतनत्वाद्यनुमानबाधकतयोक्ताभासत्वानुमानस्य समर्थनम्) ॥

* * *

॥ अथ चेतनत्वाद्यनुमानबाधकतयोक्ताभासत्वानुमानसमर्थनस्य प्रमाणान्तरोपलक्षणत्वाशयः ॥

४७ **सु०**— एवं चेतनत्वाद्यनुमानस्य बाधकतयोक्तमाभासत्वानुमानं समर्थितम् । तदिदं प्रमाणान्तरोपलक्षणमित्याशयवानाह **अखिलेति** ।

अनु०— अखिलमानतः ।
जीवेशभेददृष्ट्यैव समुदायैकता कुतः ।

न केवलमाभासत्वानुमानेन किन्त्वखिलैरपि मानैः । भेददृष्ट्येत्युक्ते सिद्धसाधनता स्यात्, परेणापि भेदस्याङ्गीकृतत्वात्, अत एवशब्दः । स च समासे गुणभूतेनापि बुद्ध्या विविक्तेन भेदशब्देन सम्बध्यतेऽभेदनिरासेन भेदस्य दर्शनादिति । **कुतः प्रमाणात्सिद्ध्येत्** ।

वं०प०— भेददर्शने मानानां करणत्वेन तृतीयया भाव्यम् । अतः कथं पञ्चम्यर्थकतसेः प्रयोग इत्यत आह **अखिलैरपि मानैरिति** । तसेः सार्वविभक्तिकत्वादिति भावः । **समास इति** । भेददृष्ट्येति समास इत्यर्थः । सम्बन्धे सति लब्धमर्थमाह **अभेदेति** ।

शे०चं०— अखिलेत्याद्युत्तरभाष्यस्यासूत्रार्थकथनरूपत्वादभाष्यत्वमाशङ्क्य परिहरति **एवमिति** । नन्वेवशब्दस्य भेददृष्ट्येत्यनेन नान्वयो वैयर्थ्यानिस्तारात् । नापि वेदशब्देन । तस्य समासे गुणभूतत्वेनैव-शब्देनान्वये विरुद्धयुगपत्प्राधान्याप्राधान्यप्रसङ्गेनासामर्थ्यादित्यत आह **स चेति** । बुद्ध्या विवेकेन भेदशब्दा-न्वयमेव दर्शयति **अभेदनिरासेनेति** ।

वा०र०— **वैयर्थ्यानिस्तारादिति** । सिद्धसाधनतानिरासरूपे एवशब्दप्रयोजने अभिहितेऽपि भेद-दृष्ट्येत्यनेनान्वये सिद्धसाधनतापरिहाराप्रतीतेः वैयर्थ्यानिस्तारादित्युक्तम् । अन्यथा वैयर्थ्यादित्येवावक्ष्यत् । **विरुद्धेति** । विरुद्धे ये युपगत्प्राधान्याप्राधान्ये तत्प्रसङ्गेनेत्यर्थः । भेदस्य दृष्ट्येति विगृह्य भेदस्यैवेत्येवशब्द-सम्बन्धे भेदशब्दस्य दृष्टिं प्रत्यप्रधानत्वम् । तत्पुरुषस्योत्तरपदार्थप्रधानत्वात् । एवेति भेदविशेषणे तु भेदस्या-प्राधान्यं भेदस्यैवेत्येवेत्यनेन केवलभेदस्येत्यस्य प्रतीत्या केवलो भेदो एव भेद इत्यव्ययपूर्वकतापर्यवसानेन पूर्वपदार्थप्राधान्यात् एकस्योभयप्रसङ्ग इति भावः ।

* * *

।। अथ ऐक्यबाधकप्रत्यक्षप्रमाणस्य प्रसिद्धत्वम् ।।

४८ **सु०— तत्रैक्यबाधकं प्रत्यक्षं ताव(त्प्रसिद्ध)त्सिद्धमेव, 'नाहं सर्वज्ञो, निर्दोष' इत्याद्यनुभवात् । यथा हि स्तम्भे कुम्भतादात्म्याभावः प्रत्यक्षस्तथाऽऽत्मनि सार्वज्ञादि-लक्षणब्रह्मतादात्म्याभावः साक्षिणा सिद्ध एव । तदभ्रान्तता च प्रागेवोपपादिता ।**

परि०— कुम्भतादात्म्याभाव इति । कुम्भ इति यत्तादात्म्यं तदभाव इत्यर्थः । **प्रागेव इति** । 'पृथगुपदेशादि'त्यत्रेत्यर्थः ।।

यादु०— तादात्म्याभाव इति । तादात्म्यावच्छिन्नप्रतियोगिकोऽभाव इत्यर्थः । अन्योन्याभाव-प्रत्यक्षत्वेऽधिकरणयोग्यत्वस्य तन्त्रत्वादिति भावः । **प्रागेवेति** । पृथगधिकरण इत्यर्थः ।

शे०चं०— नन्वखिलमानत इति सकलप्रमाणविरोधः प्रतिज्ञातः । तथा च प्रतिज्ञानुरोधेनानुमान-विरोधस्येव प्रत्यक्षागमविरोधस्यापि भाष्यकृतावश्यं व्युत्पादनीयत्वान्न तमव्युत्पाद्यैवानुमानविरोधमात्रव्युत्पादनं भाष्यकारस्य सङ्गतमित्यतस्तदव्युत्पादने निमित्तप्रदर्शनपूर्वकमनुमानविरोधोपपादकतयोत्तरग्रन्थं योजयति **तत्रैक्य-बाधकमित्यादि** । तदेवाभिनयेन दर्शयति **नाहमित्यादि** । आदिपदेनाल्पज्ञोऽल्पशक्तिर्दुःखीत्यादेः परिग्रहः । न वयं सार्वज्ञ्यादिमता सगुणेनेश्वरेण जीवस्यैक्यं ब्रूमः । सार्वज्ञ्यादेः परोपाधिकस्य मायिकत्वेन मिथ्यात्वात् । अतो नाहं सर्वज्ञोऽल्पज्ञ इत्यनुभवविरोधो न दोषाय किन्तु निरनिष्टो निरवद्य इत्यादिश्रुतिप्रतिपादितेन निर्गुणैव

ब्रह्मणा । न च तद्भेदः प्रत्यक्षसिद्ध इति कथं प्रत्यक्षबाध इत्यत उक्तं **नाहं निर्दोष इत्यादीति** । आदिपदेन निर्दुःख इत्यादेः परिग्रहः । अयमाशयः । यदि सगुणेनैव ब्रह्मणा जीवैक्यं तवाभिमतं तदा नाहं सर्वज्ञ इत्यादि-प्रत्यक्षबाधः । यदि च निर्गुणेन तेन तदा नाहं निर्दुःख इत्यनुभवविरोध इति । ननु च सार्वज्ञाद्यभावग्राहकस्य प्रमाणस्य कुतो भेदग्राहकत्वं येनानुमानबाधकता स्यादित्यतो यो हि यमर्थमवगम्य तद्विरुद्धधर्माणं यमर्थ-मध्यक्षीकरोति स तस्मात् तस्य भेदं प्रत्यक्षतः पश्यत्येवेति तावदविवादम् । स्तम्भानुसन्धानवतस्तद्विपरीत-कुम्भदर्शने तद्भेदस्य च प्रत्यक्षत्वदर्शनात् तदिहापि शास्त्रावगतसार्वज्ञादिमदीश्वरस्य पुरुषस्य स्वात्मानं तद्विरुद्धा-ल्पज्ञत्वादिधर्मवन्तं साक्षिणाऽनुभवतस्ततः स्वात्मनो भेदस्याप्यध्यक्षत्वमावश्यकमेवेति युक्तं बाधकत्वं सार्वज्ञ्या-द्यभावविषयकप्रत्यक्षस्येत्याशयेनाह **यथा हीति** । ननु तथाऽपि नोक्तानुभवस्यैक्यानुमानबाधकत्वं सम्भवति । दुःखित्वादिरूपे हि जीवस्य तात्त्विके सति तथा स्यान्न चैवम् । अहं दुःखीत्यादेरनुभवस्य मिथ्यानुभवत्वा-दन्तःकरणगतो हि दुःखादिरनर्थः स्वरूपतो मिथ्याभूतो जपाकुसुमारुणिमेव स्फटिके चैतन्ये चकास्ति । न च भ्रान्तप्रतिपन्नेन भेदकेन वस्तु भिद्यत इत्यतो नाहं दुःखीत्यादिविपरीतप्रमाणाभावादहं दुःखीत्याद्यनुभवः प्रमाण-मेव । यद्यपि च दुःखादिकमन्तःकरणगतं तथाऽपि स्वरूपेण सदेव । जीवात्मनस्तद्भोक्तृत्वेन तद्वत्त्वं च तात्त्विकमेव । अल्पशक्तित्वादिकं तु स्वरूपगतमेवेति तदभ्रान्तत्वस्य 'न दुःखानुभवः क्वापि मिथ्यानुभवतां व्रजेदि'त्यादिना पृथगधिकरणे व्युत्पादितत्वान्नानुपपत्तिरित्याह **तदभ्रान्तितेति** ॥

वा०र०— **शास्त्रावगतसार्वज्ञादिमदीश्वरस्येति** । एतच्च पुरुषविशेषणम् । शास्त्रेणावगतः सार्वज्ञा-दिमान् ईश्वरो येनासौ तथोक्तः तस्य । शास्त्रजनितसार्वज्ञादिमदीश्वरानुसन्धानवत इति यावत् । अत्र सार्वज्ञादि-मदीश्वरस्येति पाठः ।

॥ इति ऐक्यबाधकप्रत्यक्षप्रमाणस्य प्रसिद्धत्वम् ॥

* * *

॥ अथ ऐक्यबाधकागमानामुदाहरणस्थलदर्शनम् ॥

४९ **सु०— आगमास्तु तत्र तत्रोदाहृता द्रष्टव्याः ।**

परि०— तत्र तत्रेति । पृथगधिकरणादाविति भावः ।

शे०चं०— **आगमा इति** । ऐक्यबाधका भेदागमाः पृथगधिकरणादावुदाहृता इत्यर्थः ।

॥ इति ऐक्यबाधकागमानामुदाहरणस्थलदर्शनम् ॥

* * *

।। अथ ऐक्यबाधकानुमानान्तरकथनम् ।।

।। अथ तत्र जीवब्रह्मणी नाभेदवती विरुद्धधर्माधिकरणत्वाच्छायातपवदित्यनुमानेनैक्यबाधनम् ।।

।। अथ तत्रापि विरुद्धधर्माधिकरणत्वानुमानप्रयोगः, तद्धेतोरसिद्धिपरिहारप्रदर्शनश्च ।।

५० **सु०—** अनुमानान्तरं (त्वाह) चाह **अशेषेति** ।

अनु०— अशेषदोषराहित्यं सर्वशक्तित्वतो हरेः ।
सर्वोपेतेति कथितमत ऐक्यं क्व दोषिणा ।

एतदुक्तं भवति । जीवब्रह्मणी नाभेदवती विरुद्धधर्माधिकरणात्, छायाऽऽतपवत् । न च असिद्धो हेतुः, 'सर्वोपेता च तद्दर्शनादि'ति सर्वशक्तित्वेन हेतुना ब्रह्मणोऽशेषदोष-राहित्यस्य समर्थितत्वात्, जीवे दुःखादिदोषाणामनुभवसिद्धत्वात्, विरुद्धधर्माधिकरणयो-रप्यैक्ये स्तम्भकुम्भयोरप्यैक्यं स्यादिति ।

परि०— 'तद्दर्शनादि'त्यनन्तरं सूत्रेणेति योज्यम् ।

गु०दी०— सर्वशक्तित्वेन हेतुनेत्यत्र ब्रह्म सकलदोषशून्यं तज्जिहासुत्वे सति तत्र शक्तत्वादिति हेतुना समर्थितमित्यर्थः ।

शे०चं०— अनुमानविरोधस्य पूर्वमेवोक्तत्वान्न तदुक्तिरपि युक्तेत्यत आह **अनुमानान्तरमिति** । 'अशेषदोषराहित्यमि'त्याद्युत्तरग्रन्थस्यैवानुमानप्रयोगप्रकारत्वभ्रान्तिनिरासायाभिप्रेतानुमानप्रकारप्रदर्शनपूर्वकं तदुपपादकतया तद्भाष्यखण्डं योजयितुमाह **एतदुक्तं भवतीति** । विपक्षे बाधकमाह **विरुद्धेति** । अविशेषादिति भावः ॥

स०व्र०— अनादिनोऽपि तत्प्रवाहस्येति । यद्यप्यनादिनः इत्यस्य नपुंसकत्वेन प्रवाहविशेषणत्व-मनुपपन्नं तथापि स्वरूपेणानादिभूतस्याविद्यानिमित्तस्य प्रवाहेणानादिभूतकर्मप्रवाहस्यापि तदधीनत्वादित्यर्थ-करणाददोष इति द्रष्टव्यम् ।

।। इति विरुद्धधर्माधिकरणत्वानुमानप्रयोगः, तद्धेतोरसिद्धिपरिहारप्रदर्शनश्च ।।

* * *

॥ अथ 'स्वरूपेण निर्दोषत्वमुपाधितो दोषवत्त्वम्'इति प्रकारभेदेन साध्यासिद्धिशङ्का, स्वातन्त्र्यात्तन्निरासस्तस्याभिसन्धिश्च ॥

५१ सु०— 'नन्वस्तु परमात्मा सर्वशक्तिः अशेषदोषरहितश्च, तथाऽप्युपाधिभिन्नस्तदंशो जीवः तन्निमित्तदोषवांश्च भविष्यति को विरोधः, प्रकारभेदस्य विरोधशान्तिहेतुत्वादि'त्यत आह **अशेषेति** ।

अनु०— अशेषशक्तियुक्तश्चेत्स्वातन्त्र्याद्दोषवान् कथम् ।

यद्यशेषशक्तियुक्तः परमात्माऽङ्गीकृतस्तदा तस्योपाधौ तन्निमित्ते च स्वातन्त्र्यात् कथं तन्निमित्तदोषवान् स्यात् ।

अयमभिसन्धिः । भवतु वाऽनेन प्रकारभेदेन विरोधशान्तिर्मा वा भूत् । प्रकारभेद एवायमनुपपन्नः । तथा हि । अन्तःकरणाद्युपाधयोऽविद्यादिनिमित्तानि च स्वशक्त्या परमात्मानं विच्छिद्य तदंशस्य जीवस्य दुःखादिदोषान् कुर्वन्तीति तावन्न युज्यते, परमात्मनः सर्वशक्तिस्वातन्त्र्यहानिप्रसङ्गात् । अतः परमात्मैव सर्वशक्तिः स्वाधीनैरेव तैः स्वात्मानं विच्छिद्य स्वांशं जीवं दुःखादिदोषयोगिनं करोतीति मन्तव्यम्, तच्चायुक्ततरम्, अप्रेक्षावत्त्वप्रसक्तेः, न हि कश्चित्प्रेक्षावानात्मानमात्माधीनैरहिकण्टकादिभिरपुरुषार्थभाजं कुर्वाणो दृष्टः, न च तापसस्येवात्मनो दुःखोत्पादनेन परमात्मनः किञ्चित्प्रयोजनमस्ति, परिपूर्णत्वात्, न चाविद्यादिनोऽनादिताऽत्र समाधानम् अनादिनोऽपि तत्प्रवाहस्य तदधीनत्वात्, न च लीलामात्रमेतदिति साम्प्रतम्, स्वापुरुषार्थहेतोर्लीलायाः प्रेक्षापूर्वकारिभिरनुपादानात् । अतः परमपुरुषस्य न केनापि प्रकारेण दोषसंसर्गो युज्यत इति न दोषिणा जीवेन तस्यैक्यं युक्तमिति ।

परि०— **तन्निमित्तेति** । अन्तःकरणाद्युपाधिनिमित्तदुःखादिदोषवानित्यर्थः । एवमपि दोषित्वादोषित्वयोर्विरोधः स्यादेवेति तादृशधर्मवत्त्वेन भेदः सुसाध एवेत्यत आह **प्रकारभेदस्येति** । दोष इति शेषः । दोषित्वादोषित्वयोरिति च शेषः । औपाधिकत्वानौपाधिकत्वरूपप्रकारभेदस्येत्यर्थः । न हि जपाकुसुमौपाधिकेन लोहिम्ना स्फटिकशौक्ल्यमिव विरुद्धमिति भावः ॥ **तन्निमित्ते चेति** । उपाधिनिमित्ते अज्ञाने चेत्यर्थः ॥ **अनादिनोऽपीति** । अविद्यादिनः इत्यनुषङ्गः ॥ **तत्प्रवाहस्य**

इति । (तत्प्रवाहरूपनिमित्तस्येत्यर्थः । अन्यथा प्रवाहरूपविशेष्यनिघ्नत्वेन पुल्लिङ्गत्वप्रसक्त्या अनादिन इति नपुंसकत्वानुपपत्तेः इति द्रष्टव्यम् ।)

यादु०— तन्निमित्ते चेति । उपाधिनिमित्तेऽविद्यादावित्यर्थः । **अपुरुषार्थभाजं** दुःखभाजम् ।

वं०प०— प्रकारभेदस्येति । एकस्मिन्नेव भूतले नीलपटसद्भावेऽपि पीतपटाभावदर्शनेन नीलत्वपीतत्वादिप्रकारभेदेन पटतदभावयोरविरोधवत् एकस्मिन्नेव चैतन्ये स्वाभाविकत्वौपाधिकत्वरूपप्रकारभेदेन दोषाभावस्तद्वत्त्वं च सम्भवतीत्यर्थः । **तन्निमित्ते च** दोषादौ । **प्रयोजनं** स्वर्गादि ॥ **न चेति** । अविद्यारूपोपाधिसम्बन्धं स्वस्य स्वार्थमिदानीं न करोति येनोक्तदोष इत्यर्थः ।

शे०चं०— प्रकारभेदस्येति । स्वरूपेण निर्दोषत्वमुपाधितो दोषवत्त्वमिति प्रकारभेदस्येत्यर्थः ॥ **उपाधाविति** । अन्तःकरणादावित्यर्थः ॥ **निमित्ते चेति** । उपाधिनिमित्तेऽज्ञानादावित्यर्थः । तत्कथमित्यत आह **न हीति** । **अपुरुषार्थभाजं** दुःखादिभाजम् । दृष्ट इत्यतःपरं येन तथा कुर्वाणोऽपि भगवान् प्रेक्षावान् स्यादिति शेषः । ननु यथा योगिनः स्वेच्छाधीनैरेव नानाविधशरीरैरात्मनो दुःखोत्पादनं तथा परमेश्वरस्यापि स्वाधीनैरेवोपाध्यादिभिरात्मनो दुःखोत्पादनं किन्न स्यादित्यतस्तस्य कर्मक्षयभोगार्थत्वाद्दुःखोत्पादनसम्भवेऽपि भगवतोऽवाप्तसकलकामत्वेन प्रयोजनाभावान्न स्वाधीनैरेवोपाध्यादिभिः स्वस्य दुःखोत्पादनं सम्भवतीत्याह **न च तापसस्येवेति** ॥ **परिपूर्णत्वादिति** । दुःखोत्पादनस्य सप्रयोजनत्वे तद्विरोधः स्यादिति भावः । नन्वविद्यादेरनादिनित्यत्वेनानागन्तुकत्वान्न तत्साध्यदुःखोत्पादादिव्यापारस्यापि प्रयोजनापेक्षत्वम् । आगन्तुकनिमित्तसाध्यव्यापारस्यैव प्रयोजनापेक्षत्वनियमकल्पनात् । तथा च प्रयोजनाभावेऽपि दुःखोत्पादनमीश्वरस्योपपन्नमित्याशङ्कते **न चाविद्यादिन इति** । अविद्यानिमित्तानीति पूर्वप्रकृतनिमित्तरूपविशेष्यनिघ्नत्वादविद्यादिना इति नपुंसकप्रयोग इति ज्ञेयम् ॥ **अनादिन इति** । अनादिनस्तत्प्रवाहरूपनिमित्तस्येत्यर्थः । अन्यथा प्रवाहरूपविशेष्यनिघ्नत्वेन पुल्लिङ्गत्वप्रसक्त्या अनादिन इति नपुंसकानुपपत्तिप्रसक्तेरिति द्रष्टव्यम् ॥ **तदधीनत्वादिति** । अनधीनत्वे स्वातन्त्र्यहानिप्रसक्तेरिति भावः । ननु भगवतः सृष्ट्यादिव्यापारस्येव स्वाधीनैरविद्यादिभिरात्मनो दुःखोत्पादनस्यापि लीलामात्रत्वान्न प्रयोजनापेक्षत्वमित्याशङ्कते **न चेति** ॥ **स्वेति** । तथा च प्रेक्षापूर्वकारित्वानुपपत्तिरिति भावः । **केनापि प्रकारेणेति** । स्वतः परतो वेत्यर्थः ।

वा०र०— मा वा भूदिति मूलम् । भेदस्यौपाधिकत्वेऽपि सत्यत्वेन स्वाभाविकादविशेषात् अत औपाधिकान्ययोः सत्यत्वात् को विशेष इत्यादिना प्रतिपादनात् । तन्निमित्तकस्याज्ञानदुःखादेरपि सत्यत्वान्नानेन प्रकारेणापि विरोधशान्तिरित्याशयेनेदमुक्तम् । उक्तं च 'उपचारश्च कृष्णोऽहम्' इत्यनुव्याख्यानमूले औपाधिकस्यापि सत्यत्वेन स्वाभाविकाविशेषादिति । स्वोक्तव्याख्याने निमित्तमाह **अन्यथा प्रवाहरूपविशेष्येति** । भङ्गापत्त्येत्यर्थः ।

।। इति 'स्वरूपेण निर्दोषत्वमुपाधितो दोषवत्त्वम्'इति प्रकारभेदेन साध्यासिद्धिशङ्का, स्वातन्त्र्यात्तन्निरासस्तस्याभिसन्धिश्च ।।

* * *

।। अथ ब्रह्मणो जीवगतदुःखाद्यनुसन्धानाभावरूपप्रकारभेदेन विरोधशान्तिशङ्का, चेतनैक्येऽनुसन्धानस्यैव प्रामाण्यात् अन्यतरगतसुखदुःखाद्यनुसन्धानाभावादेव विरोधतादवस्थ्यम् ।।

५२ सु०— 'जीवब्रह्मणोरैक्येऽपि ब्रह्मणो जीवगतदुःखाद्यनुसन्धानाभावान्नोक्तदोषानुषङ्गः, तथा चोक्तेन प्रकारभेदेन विरोधशान्तिर्भविष्यती'ति भावेन शङ्कते **अनुसन्धानेति** ।

अनु०— अनुसन्धानरहितमैक्यं चेत्

अनुसन्धानं नाम भोगसमाख्यातः स्वीयतया दुःखादिसाक्षात्कारोऽभिमतः ।

परिहरति **एकतेति** ।

एकता न तत् ।

तत् तर्हि । जीवस्तावत् ब्रह्मस्वरूपं निर्दुःखत्वादिकं नानुसन्धत्त इत्यविवादम्, ब्रह्मापि चेज्जीवगतं दुःखादिकं नानुसन्दध्यात् तदा तयोरेकता नास्तीत्येवोक्तप्रायं स्यात् ।

कथमित्यत आह **चेतनेति** ।

चेतनैक्येऽनुसन्धानं प्रमाणं नैव चापरम् ।

चः हेत्वर्थः ।। अस्त्वैक्येऽनुसन्धानं प्रमाणम्, ततः किम्, एकप्रमाणव्यावृत्तौ प्रमेयव्यावृत्त्यभावात्, मा हि भूद्धूमाभावेऽग्न्यभाव इत्यत उक्तं **नैवापरमिति** ।। नन्वस्ति घटस्य घटेनैक्यं न त्वनुसन्धानं तत्कथमेतदित्यत उक्तं **चेतनेति** ।

एतदुक्तं भवति । चैतन्यावच्छिन्नमैक्यमनुसन्धानैकप्रमाणकम्, आगमादिकं त्वनुसन्धाने सति संवादितया प्रवर्तते । अत एव हि 'ममात्मा भद्रसेन' इति वाक्यमनुसन्धा-

नाभावेन बाध्यते, तथा 'नायं स' इत्यादिवाक्यमनुसन्धानेन । न च प्राग्भवीयदुःखाद्यनुसन्धानमिदानीं नास्त्यस्ति चैक्यमिति व्यभिचारः शङ्कनीयः । न हि वयं सदाऽनुसन्धानं ब्रूमः, किन्तु यश्चेतनो यत्स्वरूपं कदाचिदनुसन्धत्ते स तेनाभिन्नो यो नानुसन्धत्ते स तेन नाभिन्न इति । तदेकप्रमाणकस्य तन्निवृत्तौ निवृत्तिरेव, यथा रूपग्रहणनिवृत्तौ चक्षुर्निवृत्तिः । न च चेतनत्वं शक्यनिवर्तनम्, उभयवादिसिद्धत्वात् । तस्मादेकतैव निवर्तत इति ।

परि०— एकप्रमाणेति । अनुसन्धानरूपप्रमाणव्यावृत्त्या ऐक्यरूपप्रमेयव्यावृत्त्यभावादित्यर्थः । कुत एवमित्यत आह **मा हि भूदिति** । धूमवत्त्वरूपप्रमाणाभावेन अग्निमत्त्वरूपप्रमेयाभावो मा भूदित्येवमर्थम् । अन्यथा सोऽपि भवेदित्यर्थः ॥ **इत्यादिवाक्यमनुसन्धानेनेति** । न बाध्यत इत्यनुषङ्गः ॥

गु०दी०— नायं स इत्यादिवाक्यमित्यत्र पूर्वमागत्य गतस्य पुनरागमने सति नायं स इति केनचित्तस्य चास्य च भेदे कथिते सति सा च भेदप्रतीतिस्तदानीं भुक्तभक्ष्यादिभोगानुसन्धानेन बाध्यत इत्यर्थः । **यश्चेतनो यत्स्वरूपं कदाचिदनुसन्धत्त** इत्युपलक्षणम् । यदाऽस्य प्राग्भवीयदुःखमभूत् तदा तस्यानुसन्धानमप्यभूत् । इदानीमनुभूयमानस्यास्तीदानीमनुसन्धानम् । भविष्यतश्च भविष्यत्काले । एवं चैक्ये सति कुत्राननुसन्धानमुच्यते । इदानीमनुसन्धानं तु दुःखाभावादेव न । दुःखसाक्षात्कारो ह्यनुसन्धानं तच्च दुःखसत्त्व एव स्यान्नान्यदेत्यपि समाधानं द्रष्टव्यम् ।

वं०प०— उक्तेति । अशेषशक्तियुक्तश्चेदित्युक्तरीत्येत्यर्थः ॥ **उक्तेनेति** । उपाध्यवच्छिन्ने दोषस्तदनवच्छिन्ने तु नेत्यर्थः ॥ **मा हि भूदिति** । प्रत्यक्षेणाप्यग्निसिद्धिसम्भवादिति भावः ॥ **न चेति** । चैतन्यावच्छिन्नस्यैक्यस्यानुसन्धानं व्यापकं तन्निवृत्त्या विशिष्टस्य व्याप्यस्य निवृत्तिर्वाच्या । न च तत्र विशेषणीभूतस्य चैतन्यस्य निवृत्तिः सम्भवतीत्यर्थः । एवमुत्तरत्र ।

शे०चं०— नोक्तदोषेति । जीवब्रह्मैक्यस्य 'अशेषदोषराहित्यमि'ति पूर्वोक्तानुमानविरोधरूपोक्तदोषानुषङ्गो नेत्यर्थः । ऐक्यमङ्गीकृत्य ब्रह्मणो जीवगतदुःखाद्यनुसन्धानाभ्युपगमे ब्रह्मणोऽपि भोक्तृत्वेन दोषित्वादनुभवादिसिद्धदोषित्वादोषित्वव्यवस्थाभङ्गेन दोषित्वादोषित्वरूपविरुद्धधर्माधिकरणत्वलक्षणहेतूच्छित्तिरूपविपक्षे बाधकबलेनाप्रयोजकत्वशङ्कानिरासादनाभासैतदनुमानविरोधप्रसक्तावपि ब्रह्मणो जीवगतदुःखाद्यनुसन्धानाभावपक्षे ब्रह्मणोऽभोक्तृत्वेन दोषित्वानापत्त्योक्तप्रमाणसिद्धदोषित्वादोषित्वव्यवस्थोपपत्त्या विरुद्धधर्माधिकरणत्वरूपहेतूच्छित्यभावेन अभेदेऽपि दोषित्वादोषित्वहेतूपपत्तेरप्रयोजकत्वेन तेन भेदसाधनस्याभासत्वान्न जीवब्रह्मैक्यस्योक्तानुमानविरोध इति भावः ॥ **उक्तेन प्रकारभेदेनेति** । स्वतो निर्दोषत्वमुपाधितो दोषवत्त्वमिति प्रकारभेदेनेत्यर्थः ।

ननु जीवगतसुखदुःखादिसाक्षात्काराभावे ब्रह्मणः सार्वज्ञं न स्यादित्यतस्तदभ्युपगमान्न तदनुपपत्तिरित्यभिप्रेत्य कथं तर्ह्यनुसन्धानाभाववर्णनमित्यतस्तदनुसन्धानशब्दार्थमाह **अनुसन्धानं नामेति** ॥ **भोगसमाख्यात इति** । भोगत्वेन परैरभ्युपगत इत्यर्थः । 'स्वसमवेतसुखदुःखान्यतरसाक्षात्कारो भोग' इति तदुक्तेरिति भावः । दुःखादीत्यादिपदेन सुखपरिग्रहः । ततश्च सुखदुःखसाक्षात्कार इत्यर्थः । तत्त्वं च सुखदुःखान्यतरसाक्षात्कारत्वमेवेति न कश्चित्क्षुद्रोपद्रवः । अस्त्वनुसन्धानस्यैक्ये प्रामाण्यं तथाऽपि न तदभावेनैक्याभावापादनं सम्भवतीति शङ्कते **अस्त्विति** । ननु प्रमाणव्यावृत्तौ प्रमेयव्यावृत्तिनियमात् कथमनुसन्धानाभावे ऐक्याभावानापत्तिरित्यतो जीवब्रह्मैक्यस्यानेकप्रमाणकत्वेनानुसन्धानैकप्रमाणकत्वाभावान्न तदभावेन तदभावापादनं सम्भवतीत्याशयेनाह **एकप्रमाणेति** । अनेकप्रमाणके वस्तुनीति शेषः । अस्त्वनेकप्रमाणकेऽपि वस्तुनि तद्व्यावृत्त्या प्रमेयव्यावृत्तिरित्यतोऽतिप्रसङ्गमाह **मा हि भूदिति** । न भवति हीत्यर्थः । अन्यथा सोऽपि स्यादिति भावः । मूले चेतनपदस्यानर्थक्यमाशङ्क्यैक्येऽनुसन्धानैकप्रमाणत्वादिविशेषचिन्तोपयोगितत्प्रामाणिकत्वसम्भावनार्थत्वान्न तदिति भावेन तदसम्भावनाशङ्कामुत्थापयति **नन्विति** ।

नन्वागमाद्यनेकप्रमाणकत्वादैक्यस्यानुसन्धानैकप्रमाणकत्वासिद्धेः, सिद्धेऽपि चेतनत्वव्यावृत्त्याऽप्यवच्छिन्नव्यावृत्त्युपपत्तेर्न तद्व्यावृत्त्यैक्यमात्रव्यावृत्तिसिद्धिरित्यत आह **एतदुक्तं भवतीति** ॥ **अत एवेति** । चैतन्यावच्छिन्नस्यैक्यस्यानुसन्धानैकप्रमाणकत्वादेवेत्यर्थः । अन्यथा धूमाभावेऽपि क्वचिदालोकाद्वह्निसिद्धिवदत्राप्यनुसन्धानाभावेऽपि वाक्यादेवाभेदसिद्ध्यापत्त्याऽनुसन्धानाभावेन वाक्यबाधाभावप्रसङ्गादिति भावः । **तथेति** । अत्राप्यत एवेति योज्यम् ।

वा०र०— **नोक्तदोषेतीति** प्रतीकोपादानम् । **राहित्यमिति पूर्वोक्तेति** । इति पूर्वानुव्याख्यानेत्यर्थः । **भोक्तृत्वेन दोषित्वादिति** । दोषित्वापत्त्येत्यर्थः । **भङ्गेनेति** । भङ्गापत्त्येत्यर्थः । **हेतूच्छितीति** । तद्रूपं बाधकं सिद्ध्यतीति तद्बलेनेत्यर्थः । ब्रह्मणो जीवगतदुःखाद्यनुसन्धानाभ्युपगमेऽनुमानविरोधप्रसक्तावपीति सम्बन्धः । **अभेदेऽपीति** । भेदरूपसाध्याभावेऽपीत्यर्थः । **सुखदुःखान्यतरेति** । सुखान्यत्वे सति यद्दुःखान्यत् तदन्यसाक्षात्कार इत्यर्थः । एवं चान्यतरत्वस्याननुगतत्वमिति शङ्कानवकाश इति ध्येयम् । तत्त्वं चेत्युत्तरवाक्ये एवमेवार्थः । भोगश्च यद्यपि न स्वसमवेतेत्यादिना वैशेषिकाधिकरणे किरणावलीवर्धमानाद्यनुसारेण भोगलक्षणविचारष्टीकाकृता कृतोऽस्ति सोऽप्यवधेयः । कथमनुसन्धानाभावे ऐक्याभाव इति पाठः । मध्ये नकारो लेखकागतः । माङ् योगे लुङः सर्वलकारापवादकत्वाल्लडर्थेऽयं लुङ् इत्याशयेन व्याचष्टे **न हि भवति हीत्यर्थ इति** । **तत्प्रामाणिकत्वेति** । अनुसन्धानप्रमाणकत्वेत्यर्थः । **वाक्यादेवेति** । 'ममात्मा भद्रसेन' इति वाक्यादेवेत्यर्थः ।

॥ इति ब्रह्मणो जीवगतदुःखाद्यनुसन्धानाभावरूपप्रकारभेदेन विरोधशान्तिशङ्का, चेतनैक्येऽनुसन्धानस्यैव प्रामाण्यात् अन्यतरगतसुखदुःखाद्यनुसन्धानाभावादेव विरोधतादवस्थ्यम् ॥

* * *

।। अथ 'चेतनैक्येऽनुसन्धानं प्रमाणम्' इति कथनेन चेतनत्वाद्यनुमानस्य सोपाधिकत्वश्चोक्तं भवति ।।

५३ सु०— एतेन चेतनत्वाद्यनुमानस्य सोपाधिकत्वं चोक्तं भवति । अनुसन्धानं खलु चेतनत्वावच्छिन्नस्यैक्यस्य व्यापकमुपलब्धं देवदत्तादौ, अव्यापकं च चेतनत्वादेः, पक्ष एव तदभावात् । तथाच सुलभः प्रयोगः, जीवब्रह्मणी चेतनत्वे सति परस्परैक्यवती न भवतः परस्य(रस्वरूपानु)रानुसन्धानरहितत्वात् सम्प्रतिपन्नवदिति । न च प्रतिज्ञायां विशेषणं व्यर्थम्, 'शब्दो न स्पर्शवद्विशेषगुण' इत्यादाविव हेतुव्यभिचारपरिहारार्थत्वात् ।

परि०— एतेनेति । चेतनैक्येऽनुसन्धानं प्रमाणमिति कथनेन । जीवब्रह्मणी अन्योन्यमभिन्ने चेतनत्वात् अंशांशिभावापन्नत्वात् इत्यनुमानस्य अनुसन्धानवत्त्वमुपाधिरप्युक्तो भवति । न केवलं बाधादिरित्यर्थः । साध्यव्यापकत्वे सति साधनाव्यापकत्वं व्यनक्ति **अनुसन्धानं खल्विति** । **सम्प्रतिपन्नवदिति** । **घटपटवदिति** । अत्र यद्यत्स्वरूपानुसन्धानरहितं तत्तदैक्यवन्नेति व्याप्तिरभिमता । तथात्वे हि सति हेतुव्यभिचारपरिहारार्थत्वादिति वाक्यं सङ्गतं भवति । स्वेनैक्यवति घट एव व्यभिचारवारकत्वसम्भवात् । साध्ये हेतौ च परस्परेत्युक्तिः पक्षस्य द्वित्वात् प्रकृताभिप्राया । गुणगुण्यादौ व्यभिचारपरिहारार्थत्वादिति भावः । **इत्यादाविवेति** । 'प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वादि'त्यत्र स्तम्भकुम्भसंयोगे व्यभिचारनिरासाय साध्ये यथा 'विशेषे'ति विशेषणम् । तथा अत्र पक्षे विशेषणमित्यर्थः ।

यादु०— चेतनत्वावच्छिन्नस्येति । यद्यपि जीवो ब्रह्माभिन्नश्चेतनत्वादिति पूर्वपक्ष्युक्तानुमाने शुद्धसाध्यव्यापक एवोपाधिः सम्भवति । घटादौ ब्रह्माभेदाभावेन व्यभिचाराभावात् । तथाऽपि जीवब्रह्मणी परस्परमैक्यवती चेतनत्वादित्यैक्यमात्रे साध्ये पराभिप्रेतेऽयमुपाधिरिति ज्ञेयम् । **शब्दो न स्पर्शवद्विशेषगुण इति** । यथा शब्दो न स्पर्शवद्विशेषगुणः प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वादित्यत्र हेतौ कर्मजे स्थाणुश्येनसंयोगादौ व्यभिचारवारणाय साध्ये विशेषपदम् । तथेहापि स्वेनैक्यवति घटेऽनुसन्धानरहिते व्यभिचारवारणाय साध्ये चेतनत्वे सतीति विशेषणम् । तथा च व्यभिचारवारकं विशेषणं हेतावेव देयमिति नियमो नास्तीति भावः ।

वं०प०— अनुमानस्य भेदसाधकस्य । घटादौ साध्याव्यापकत्वाच्चेतनत्वरूपसाधनधर्मावच्छिन्ने साध्येऽनुसन्धानवत्त्वमुपाधिरित्यभिप्रेत्याह **अनुसन्धानं खल्वित्यादिना** ।

शे०चं०— एतनेति । चैतन्यैक्येऽनुसन्धानं प्रमाणमिति कथनेन जीवब्रह्मणी अन्योन्यमभिन्ने चेतनत्वादंशित्वादित्यनुमानस्यानुसन्धानवत्त्वमुपाधिरप्युक्तो भवति । न केवलं बाधादिरित्यपेर्थः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपपादयति **अनुसन्धानमिति** ॥ **चेतनत्वावच्छिन्नस्येति** । यद्यपि जीवो ब्रह्माभिन्नश्चेतनत्वादिति पूर्वपक्ष्युक्तानुमाने शुद्धसाध्यव्यापक एवायमुपाधिः सम्भवति । घटादौ ब्रह्माभेदरूपसाध्यस्यैवासत्त्वेन तत्र व्यभिचाराप्रसङ्गात् । ब्रह्मणि ब्रह्माभेदरूपसाध्यसत्त्वेऽपि ब्रह्मस्वरूपानुसन्धानसद्भावेन तत्रापि तदनवकाशात् । तथाऽपि जीवब्रह्मणी परस्परमैक्यवती चेतनत्वादंशांशिभावापन्नत्वात् सम्मतवदित्यैक्यमात्रसाध्यके पराभिमतानुमाने घटादौ व्यभिचारेण शुद्धसाध्यव्यापकत्वाभावादस्योपाधित्वघटनायेदं विशेषणमिति ध्येयम् ॥ **विशेषणमिति** । चेतनत्वे सतीति विशेषणमित्यर्थः । घटादौ व्यभिचारपरिहारार्थत्वान्न तदिति भावेन हेतुगतविशेषणानामेव व्यभिचारवारकत्वनियमात् साध्ये तद्वारकविशेषणोपादानमसाम्प्रदायिकमित्याशङ्कां तत्प्रदर्शनेन परिहरति **शब्द इति** । प्रत्यक्षत्वे सत्यकारणगुणपूर्वकताया बुद्ध्यादौ सत्त्वेऽपि विशेषगुणत्वस्यैव सत्त्वात् कर्मजन्यस्थाणुसंयोगादौ प्रत्यक्षत्वे सत्यकारणगुणपूर्वकतायाः सत्त्वेऽपि स्पर्शवद्गुणत्वस्यैव सत्त्वात् तत्र तत्र व्यभिचारपरिहाराय स्पर्शवदिति विशेषेति च साध्ये विशेषणोपादानदर्शनान्न वैयर्थ्यमित्यर्थः ।

वा०र०— जीवो ब्रह्माभिन्नश्चेतनत्वादिति प्रागाशङ्कितानुमानेऽस्योपाधितानुपपत्तिमाशङ्क्य तत्प्रयोगप्रकारपरित्यागेन प्रयोगप्रकारविशेषेऽस्योपाधित्वान्न दोषः । अत एवोपाध्याहितसत्प्रतिपक्षप्रकारः तत्प्रकारविशेषानुसारेणैवेत्याशङ्क्य समाधत्ते **यद्यपि जीव इत्यादिना** । शब्दो न स्पर्शवद्विशेषगुण इत्यनुमानं प्रकृत्यधिकरणमूले उदाहृतम् । तट्टीकायां च व्याकृतमिति ज्ञेयम् । **तत्प्रदर्शनेनेति** । साध्ये व्यभिचारवारके विशेषणोपादानस्य प्रयोगविशेषप्रदर्शनेनेत्यर्थः । **तत्र तत्र व्यभिचारेति** । विशेषगुणत्वस्य स्पर्शवद्गुणत्वरूपसाध्याभावस्यैव सत्त्वेन हेतोः साध्याभाववद्वृत्तितया व्यभिचारेत्यर्थः । **परिहारायेति** । बुद्ध्यादौ कर्मजन्यस्थाणुसंयोगादौ च विशेषगुणत्वस्पर्शवद्गुणत्वयोः सत्त्वेन नञर्थविशिष्टसाध्यस्याभावलाभेऽपि विशिष्टसाध्यस्य सत्त्वेन तदभावाभावान्न व्यभिचार इति भवति परिहार इति भावः ।

स०व्र०— न च प्रतिज्ञायामिति । चेतनत्वे सतीति विशेषणमित्यर्थः । घटादौ व्यभिचारपरिहारार्थकत्वान्न वैयर्थ्यमिति । साध्ये व्यभिचारवारकविशेषणोपादानमदृष्टमित्यतो दृष्टान्तप्रदर्शनेनाह **शब्द इति** । अयावद्द्रव्यभावित्वादित्यस्य प्रत्यक्षत्वे सतीति अकारणगुणपूर्वकत्वाद्वा इत्यस्य वा हेतोः कर्मजसंयोगे सत्त्वेन तत्र व्यभिचारपरिहारार्थं प्रतिज्ञायां विशेषपदोपादानवदित्यर्थः ।

॥ इति 'चेतनैक्येऽनुसन्धानं प्रमाणम्' इति कथनेन चेतनत्वाद्यनुमानस्य सोपाधिकत्वञ्चोक्तं भवति ॥

* * *

।। अथ चेतनेष्वनुसन्धानरहितं समुदायैक्यं युज्यत इति शङ्का, तस्य नाममात्रत्वाददोषत्वम् ।।

५४ **सु०— शङ्कते अनुसन्धानेति ।**

अनु०— अनुसन्धानरहितं समुदायैक्यमेव चेत् । चेतनेषु

यतः **समुदायैक्यमेव** मयोच्यते नात्यन्तैक्यम्, अतः **चेतनेष्वपि अनुसन्धानरहितं** तद्युक्तम् ।

अयमभिसन्धिः । समुदायैक्यवादिना हि जीवब्रह्मणोर्भेदाभेदौ स्वीक्रियेते । तत्रानुसन्धानाभावो भेदनिमित्तस्तज्ज्ञापनेनैव चरितार्थो नाभेदं निवर्तयति । तन्तुपटादिषु हि समुदायैक्यस्थलेषु विरुद्धधर्माध्यासो भेदज्ञापनमात्रेण कृतार्थो नाभेदं बाधते, अन्यथा तत्राप्यभेदाङ्गीकारो दुर्घटः स्यात् । तस्मादैक्यं नानुपपन्नमिति ।

शे०चं०— नन्वनुसन्धानस्य चेतनैक्ये प्रमाणत्वाच्च तद्व्यावृत्त्यैक्यव्यावृत्तौ चोदितायां नैतच्छङ्कावकाश इत्यतोऽभिप्रायमाह **अयमभिसन्धिरिति** । प्रमाणाभावेन प्रमेयाभावस्यान्यत्र साधनसम्भवेऽपि न प्रकृतेऽनुसन्धानरूपप्रमाणाभावेनैक्याभावसाधनमुपपद्यते । ऐक्यप्रमाणतयाऽभिमतस्यानुसन्धानस्य विरुद्धधर्माध्यासाभावरूपत्वात् । अतोऽनुसन्धानाभावेनैक्याभावं साधयता विरुद्धधर्माधिकरणत्वेनैक्याभावः साध्यत इत्येव वाच्यम् । तथाच अत्यन्ताभेदस्थले विरुद्धधर्माधिकरणत्वस्यानन्यथासिद्धत्वेनाभेदाभावसाधकत्वसम्भवेऽपि प्रकृते भेदाभेदाङ्गीकारेण विरुद्धधर्माध्यासस्यैक्याभावसाधकत्वं न सम्भवति । भिन्नाभिन्नस्थलेऽपि तस्याभेदाभावसाधकत्वे तत्त्वेन सम्प्रतिपन्ने तन्तुपटादावपि तस्यैक्याभावसाधकत्वापातात् । तत्र भेदाक्षेपकत्वमात्रेण चरितार्थत्वाद्विरुद्धधर्माध्यासस्य नाभेदाभावसाधकत्वमिति यदि मन्यसे तर्हीहापि भेदाक्षेपकतयाऽन्यथासिद्धत्वाद्विरुद्धधर्माध्यासस्य नाभेदाभावसाधकत्वमिति तुल्यमिति नानुसन्धानाभावेनाभेदाभावसिद्धिरिति भावः ।

वा०र०— प्रमाणाभावेनेति । यत्प्रमेयं यदेकप्रमाणकं तदभावेन तत्प्रमेयेत्यर्थः । अतोऽनुसन्धानाभावेनेति पाठः । तथाच अत्यन्ताभेदस्थल इत्येव पाठः । नञनुप्रवेशस्त्वधिकः । **तस्येति** । विरुद्धधर्माध्यासस्येत्यर्थः । **तत्त्वेन** भिन्नाभिन्नत्वेनेत्यर्थः ।

।। इति चेतनेष्वनुसन्धानरहितं समुदायैक्यं युज्यत इति शङ्का, तस्य नाममात्रत्वाददोषत्वम् ।।

* * *

५५ **सु०—** गूढाभिसन्धिः सम्प्रतिपत्तिमुत्तरमाह **अस्तु तदिति ।**

अनु०— अस्तु तत्

सर्वथाऽपि परस्परस्वरूपानुसन्धानरहितं जीवब्रह्मणोरैक्यं भवत्वित्यर्थः ।

विप्रतिपन्नार्थाङ्गीकारे प्रतिज्ञाहानिर्निग्रहस्थानं स्यादित्यत आह **नाममात्रमेवेति ।**

नाममात्रमेव यतस्ततः ।

यतस्तदैक्यं नाममात्रं न वास्तवं **ततस्तदभ्युपगमो** न दूषणम् ।

अयमभिसन्धिः । तन्तुपटाद्यभेदो न विरुद्धधर्माध्यासाभावैकप्रमाणकः, प्रत्यक्षादिना तदभेदस्य सिद्धत्वात् । तथा च विरुद्धधर्माध्यासः कालात्ययापदिष्टत्वभयादभेदबाधनान्निवृत्तो भेदसाधनेनैव कृती भवति । तथा यदि चेतनैक्यं निरवकाशप्रमाणान्तरगम्यं स्यात् तदाऽनुसन्धानाभावोऽभेदमबाधमानो भेदमात्रप्रतिपादनेन चरितार्थः स्यात् । न चैवम्, चेतनैक्यस्य अनुसन्धानव्याप्यतयोक्तत्वात्, व्यापकाभावे च व्याप्यनिवृत्तेः आवश्यकत्वेन ऐक्याभावे पुनस्तद्वचनं निरर्थकमेवेति ।

परि०— गूढाभिसन्धिरिति । उत्तरवाक्ये वक्ष्यमाणाभिसन्धिं गूढं कृत्वेत्यर्थः ॥ **प्रत्यक्षादिनेति** । 'तन्तव एव पटात्मना जाताः' इत्येवंरूपप्रत्यक्षेण गुरुत्वभेदाभावाद्यनुमानेन 'तन्तुभ्योऽन्यः पटः साक्षात् कस्य दृष्टिपथं गतः' इत्याद्यागमेन चेत्यर्थः ॥ **पुनस्तद्वचनमिति ।** 'अनुसन्धानरहितसमुदायैक्यमि'ति वचनमित्यर्थः ॥

गु०दी०— नाममात्रं तदिति वदन्नाचार्य इदमभिप्रैति । पटतन्त्वादिष्वेकसत्त्वेऽपरनाशो हि भेदप्रापको विरुद्धधर्माध्यासः । स च आतानवितानात्मकास्तन्तव एव पट इति निरवकाशप्रबलप्रत्यक्षसिद्धमभेदं न बाधते। इह तु सुखदुःखयोरनुसन्धानाननुसन्धानरूपो विरुद्धधर्माध्यासः भेदं बोधयेत् । अभेदं बाधयेच्च । सत्यभेदेऽनादिकालमारभ्यानुभूतं सुखदुःखादिकमेकैको जीवस्तदा तदाऽनुसन्दधान एव दृष्टः । अभेदमहिम्नैव हि पादगतांशदुःखादिकं हस्तादिगतांशोऽनुसन्धत्ते । अंशी जीवश्चानुसन्धत्ते । कायव्यूहसम्पादनेन प्रारब्धकर्मजं भोगं भुञ्जानाः योगिनोऽपि सत्यभेदेऽनुसन्दधानाः दृष्टाः । एवं चांशानां समुदायस्य चाभेदे सति कथं नानुसन्धानम् । तस्मादभेदव्यापकानुसन्धानाभावे तद्व्याप्यमपि न सिद्ध्येत् । अतो जडदृष्टान्तेन नाजडमन्यथीकर्तुं शक्यत इति । किं

चांशानां जीवानां देहाद्युपाधिना विश्लेषे सति तन्मेलनरूपसमुदायस्यासम्भवात् संसारदशायां ब्रह्माभावप्रसङ्गः ब्रह्मणः उत्पत्तिप्रसङ्गश्चेति यत्किञ्चिदेतत् ।

यादु०— गूढाभिसन्धिरिति । एतदैक्यं नाममात्रं न वास्तवमित्यभिसन्धिरत्र गूढ इति द्रष्टव्यम् ॥ **इत्यत आहेति** । इत्याशङ्कायामभिसन्धिमुद्घाटयतीत्यर्थः ।

वं०प०— अयमभिसन्धिरिति । योगरूढ इत्यर्थः ॥ **एकप्रमाणक इति** । येन विरुद्धधर्मदर्शनिन निवर्ततेति भावः । **विरुद्धेति** । तन्तुपटादिभेदसाधक इत्यर्थः । **कालात्ययापदिष्टेति** । तन्तुपटाद्यभेदसाधक-प्रत्यक्षविरोधभयादित्यर्थः ॥ **कृती** चरितार्थः ॥ **न चैवमिति** । चैतन्यैक्ये निरवकाशं प्रमाणं नास्तीत्यर्थः । तथाऽनुसन्धानमेव तत्र प्रमाणतया वाच्यमिति भावः । **नाममात्रमेवेत्यस्य** तात्पर्यं **निरर्थकमेवेतीति** ।

शे०चं०— विप्रतिपन्नप्रमेयाङ्गीकारे प्रतिज्ञाहानिर्निग्रहस्थानं स्यादित्यत उक्तं **गूढाभिसन्धिरिति** । एतदैक्यं नाममात्रं न वास्तवमित्यभिप्रायोऽत्र गूढ इति ज्ञेयम् । अभिसन्धिमजानानः शङ्कते **विप्रतिपन्नेति** । विप्रतिपन्नस्यैक्यस्याभ्युपगमे 'न च चित्त्वादभिन्नत्वमित्यैक्यनिषेधप्रतिज्ञाहानिः स्यादित्यर्थः । नन्वनुसन्धान-रहितमैक्यं न वास्तवमित्युक्त्याऽनुसन्धानाभावो वास्तवैक्याभावसाधक इत्युक्तं भवति । तच्चायुक्तम् । भेद-मात्रज्ञापनेन चरितार्थस्यानुसन्धानाभावस्यैक्याभावसाधकत्वायोगात् । अन्यथा तन्तुपटादौ विरुद्धधर्माध्यास-स्याप्यभेदाभावसाधकत्वापातादित्यत आह **अयमभिसन्धिरिति** ॥ **तद्वचनमिति** । 'अनुसन्धानरहितसमु-दायैक्यमेव चेदि'त्येतद्वचनमित्यर्थः ।

वा०र०— विप्रतिपन्नस्यैक्यस्याभ्युपगमे न च चित्त्वादभिन्नत्वमित्यैक्येति पाठः । अन्यादृशस्तु लेखकप्रमादात् ।

* * *

॥ अथ मुक्तिकालीनकादाचित्कानुसन्धानेनैक्यसिद्धिशङ्का सर्वज्ञस्यैकतानुसन्धानाभावेन तच्छङ्कानिरासश्च ॥

५६ **सु०—** 'भवत्वनुसन्धानैकप्रमाणकं चेतनैक्यम्, अनुसन्धानं च कादाचित्कमप्यैक्यं साधयति, विद्यते च मुक्तावनुसन्धानमित्यैक्यसिद्धिः, मुक्तस्वरूपस्य दुःखादिदोषदूरत्वेन प्रागुक्तदोषाभावश्चे'त्यत आह **मुक्ताविति** ।

अनु०— मुक्तौ स्यादनुसन्धानमित्यपि स्यात्सुदुष्करम् ।

इत्यपि वचनं सुदुष्करं स्यात्, । प्रमाणाभावेन सन्दिग्धत्वादिति भावः । किञ्च मुक्तावनुसन्धानं भविष्यतीति वदता वक्तव्यमिदानीं कुतोऽनुसन्धानं नास्तीति । अथ ब्रूयादविद्याकामकर्मादि(निमित्त)प्रतिबन्धकसद्भावादिति, तत्र वक्तव्यम्, प्रतिबन्धकसद्भावनिबन्धन एवेदानीमनुसन्धानाभावो न पुनरैक्याभावनिबन्धन इति कुतस्ते निश्चय इति । वयं तु वदामः । ऐक्याभावनिबन्धन एवायमिदानीमनुसन्धानाभावो न अज्ञानादिनिमित्त इति । कुतोऽयं निश्चय इति तत्राह **सर्वज्ञ इति** ।

सर्वज्ञ एकतां नानुसन्धत्ते नैव सा यतः ।

यतः सर्वज्ञ एकतां नानुसन्धत्ते अतः **सा** एकता **नैवेति** सम्बन्धः ।

परि०— प्रागुक्तेति । 'अत ऐक्यं क्व दोषिणे'त्यादिनोक्तेत्यर्थः । **कुतोऽयं निश्चय इति** । सिद्धान्तिनोऽप्ययं निश्चयः कुत इत्यर्थः ।

वं०प०— ननु तर्हीश्वरीयनिर्दुःखत्वाद्यनुसन्धानमपि जीवस्य स्यादित्युक्तमित्यत आह **मुक्तस्वरूपस्येति** । तथा च मुक्तजीवस्य तदनुसन्धानमस्तीतीष्टापत्तिरपि भावः ।

शे०चं०— कादाचित्कमपीति । अन्यथा प्राग्भवीयदुःखाद्यनुसन्धानस्येदानीमभावात् तेन स्वस्यैक्याभावप्रसङ्गादिति भावः ॥ **प्रागुक्तदोषाभावश्चेति** । ब्रह्मणो जीवगतदुःखाद्यनुसन्धानाभावाज्जीवस्य ब्रह्मस्वरूपभूतनिर्दुःखत्वाद्यनुसन्धानाभावात्तयोरेकता नास्तीत्येव प्राप्तमिति प्रागुक्तदोषश्च न । मुक्तस्वरूपस्य दुःखादिदोषरहितत्वेन ब्रह्मस्वरूपनिर्दुःखत्वाद्यनुसन्धानादननुसन्धानासिद्धेरित्यर्थः ।

* * *

॥ अथ उक्तार्थस्याभिप्रायः ॥

५७ **सु०— एतदुक्तं भवति । यद्यज्ञानादिनिबन्धनोऽयमनुसन्धानाभावो भवेत्, भवेत्तदा जीवानामेव, तेषामेवाज्ञानादिसम्बन्धित्वात् । परमात्मा त्वनुसन्दध्यादेव, तस्य सर्वज्ञत्वेन अज्ञानाद्यभावात् । न चासौ अनुसन्धत्ते, यस्मात्क्षरमतीतोऽहमि'त्यादितद्वाक्यैर्भेदानुभवस्यैवावगमात् । तेन निश्चिनुमोऽनुसन्धानाभावो नाज्ञानादिप्रतिबन्धकनिबन्धनः, किन्त्वैक्याभावनिमित्त एवेति ।**

परि०— क्षरमतीत इति । जीवराशिमतिक्रम्य स्थित इत्यर्थः । 'ब्रह्मादिजीवाः सर्वेऽपि शरीरक्षरणात् क्षरा' इत्यादेः । क्षराक्षरोत्तमत्वं च ताभ्यां भेदं विना न घटत इति भेदोऽङ्गीकार्यः । तथा च ईश्वरस्य तदनुभवः स्वीकार्यः । अन्यथा असार्वज्ञप्रसक्तेरिति भावः ।

गु०दी०— भेदानुभवस्यैवेत्युपलक्षणम् । 'सम्भोगप्राप्तिरिति चेन्न वैशेष्यादि'ति सूत्रकृतैव सामर्थ्य-विशेषमहिम्ना स्पष्टं ब्रह्मणोऽनुसन्धानाभावकथनाच्च ।

वं०प०— अयं भवद्भिरुच्यमानः । **तद्वाक्यैः** सर्वज्ञभूतेश्वरवाक्यैः ।

शे०चं०— किमनेन निश्चायकमुक्तमित्यतो विपक्षे बाधकस्तर्क एव तथेत्यभिप्रेत्य तदुपपादकतया मूलं योजयति **एतदुक्तं भवतीति** ॥ **तेनेति** । परमात्मनोऽनुसन्धानप्रसङ्गेनेत्यर्थः ।

॥ इति उक्तार्थस्याभिप्रायः ॥

॥ इति मुक्तिकालीनकादाचित्कानुसन्धानेनैक्यसिद्धिशङ्का सर्वज्ञस्यैकतानुसन्धानाभावेन तच्छङ्कानिरासश्च ॥

* * *

५८ सु०— ईश्वर एवासाविति चेत् । कस्ततोऽन्यः परमात्मा, प्रमाणाभावात्, किञ्च ईश्वरोऽपि सर्वज्ञ एवेति किमनेनेति । अपि चैक्ये प्रमाणसिद्धेऽनुसन्धानाभावः प्रतिबन्ध-कनिबन्धन इति कल्पनोपपद्यते, न च तदस्तीत्युक्तम् ।

परि०— ननु ईश्वरो नैक्यमनुसन्दध्यात् । मायाशबलितत्वात् । शुद्धब्रह्म तु अनुसन्दध्या-देवेति भावेन शङ्कते **ईश्वर एवासाविति** । कृष्ण इत्यर्थः ॥ **किमनेनेति** । अन्यथा कृष्णस्येश्वर-शब्दितस्य सार्वज्ञं न स्यादिति भावः । (**ईश्वर एवेति** । मायोपाधिभेदभिन्न एव न शुद्धं ब्रह्मे-त्यर्थः) ॥ **इत्युक्तमिति** । 'चेतनैक्येऽनुसन्धानमि'त्यादिपूर्ववाक्येनोक्तमित्यर्थः ।

वं०प०— ईश्वर एवासाविति । यस्मात्क्षरमित्यादिबलेन यस्य भेदानुभव उक्तः स ईश्वर एव । तस्योपाध्यादिप्रतिबन्धकयुक्तत्वादैक्यानुसन्धानं नास्त्येव । समुदायरूपं ब्रह्म यदस्त्युक्तप्रतिबन्धकशून्यम् । तस्य त्वैक्यानुसन्धानमस्त्येवेत्यर्थः । **अनेन** ईश्वर एवासाविति वचनेन । तथाच सर्वज्ञतया त्वदङ्गीकृतस्य रामकृष्णा-दिरूपस्यैव जीवपरमात्मैक्यानुसन्धानमापादयाम इति भावः । अन्यथा सार्वज्ञहानेरिति भावः । **ईश्वरो ब्रह्म** ॥

शे०चं०— ननु च कृष्णस्येश्वरत्वेऽपि परमात्मत्वाभावाद्यस्मादित्याद्युक्तवाक्येनेश्वरस्य भेदानुभवाव-गमादेकत्वाननुसन्धानप्राप्तावपि परमात्मनो भेदानुभवानवगमात्तस्यानुसन्धानं भविष्यतीति शङ्कते **ईश्वरोऽसाविति**

चेदिति । प्रमाणाभावेनेश्वरान्यस्य परमात्मन एवाभावादीश्वरवाक्येन तस्य भेदानुभवावगतौ परमात्मन एव तत्प्राप्तेर्न तस्यैवानुसन्धानकल्पना युक्तेत्याह **कस्ततोऽन्य इति** । किञ्च न वयमज्ञानादिप्रतिबन्धनिबन्धनत्वेऽनुसन्धानाभावस्य सर्वज्ञत्वेनाज्ञानादिदोषशून्यस्य परमात्मनोऽनुसन्धानमापादयामो येनोक्तरीत्येष्टापत्तिः शङ्क्येत किन्त्वीश्वरस्यैव । तस्यापि सर्वज्ञत्वेनाज्ञानादिदोषशून्यत्वात् । न चेश्वरस्यैक्यानुसन्धानमस्ति । यस्मादित्यादितद्वाक्यैर्भेदानुभवस्यैवावगमादिति कृष्णस्येश्वरत्वकथनेन न किञ्चिदभिमतं सिध्यतीत्याशयेनाह **किञ्चेति** । ननु जीवेशयोः समुदायांशत्वाभ्युपगमेन समुदायेन भेदाभेदाभ्युपगमेऽपि परस्परमत्यन्तभेदाभ्युपगमादीश्वरस्य जीवाभेद एवासिद्ध इति कथं सर्वज्ञत्वेन तदनुसन्धानापादनमित्यत आह **अपि चेति** ॥ **उक्तमिति** । 'न ब्रह्मता वदेद्भेदो जीवस्ये'त्यादिनेति शेषः ।

वा०र०— 'ईशाख्या समुदाये स्यादि'त्येतत्प्राचीनग्रन्थानुसारेणैतद्दोषोद्धारमाशङ्कते **ननु जीवेशयोरिति** । उभयसमुदायस्यैव ब्रह्मरूपत्वात् तेन जीवस्याभेदेऽपि नेशेनाभेद इति नानुसन्धानप्रसङ्ग इति प्रागुक्तदोषपरिहारे तात्पर्यम् । एतदर्थमित्यत आहेत्येत्यस्वरसं स्यादिति व्याख्येयम् । जीवाभेद एवासिद्ध इति पाठः। सिद्ध इति लेखकप्रमादात् । **इत्यादिनेति शेष इति** । जिज्ञासाधिकरणीयानुव्याख्यानगतेनेति शेषः ।

* * *

५९ **सु०— ननु च दुःखादिकं जीवस्य न चैतन्यस्वरूपानुबन्धि, किन्नाम विशिष्टाकारगतमेव, तत्कथमीश्वरोऽनुसन्दधीतेति दुःखाद्यननुसन्धानेऽप्यैक्यं तावदनुसन्दध्यादेवेत्युक्तम् एकतामिति । अत एव 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यती'त्यादिवाक्यान्यन्यथा योज्यानि । विभेदशब्दो हि विरोधवाची, मित्रभेद इति यथा । तथा च जीवस्य परमात्मना विपरीतमतित्वमज्ञाननिबन्धनम्, तदपाये न भवतीत्यर्थः ।**

परि०— ननु 'न च तदस्तीत्युक्तमि'त्युक्तिरयुक्ता । आगमसिद्धत्वादैक्यस्येत्यत आह **अत एवेति** । सर्वज्ञस्यैकतानुसन्धानाभावादेवेत्यर्थः । अन्यथायोज्यमित्युक्तं व्यनक्ति **विभेदशब्दो हीति** ।

यादु०— ननु 'विभेदजनकेऽज्ञान' इत्यादिश्रुत्यैव जीवानां परस्परमैक्यानुसन्धानाभावोऽज्ञानरूपप्रतिबन्धकसद्भावनिबन्धन इत्युच्यत इत्यत आह **अत एवेति** । अज्ञानविधुरस्येश्वरस्यैक्यानुसन्धानाभावादेवेत्यर्थः ।

वं०प०— **ऐक्यं तावदिति** । चैतन्यस्वरूपानुबन्धित्वादित्यर्थः ॥ **अत एवेति** । सार्वज्ञेनाननुभूयमानत्वेनैक्यस्याभावादेवेत्यर्थः ।

शे०चं०— ननु मूले दुःखानुसन्धानमनापाद्य किमेकत्वानुसन्धानापादनेनेत्यतः शङ्कामुखेन तदनापादने निमित्तमाह **नन्विति** । ननु सर्वज्ञेश्वरेण नानुसन्धीयत इत्येतावता न श्रुतिसिद्धं जीवब्रह्मैक्यमपलपितुं शक्यम् । अन्यथा तत्प्रतिपादकानां 'विभेदजनकेऽज्ञाने' इत्याद्यागमानां निर्विषयतयाऽप्रामाण्यापातादित्यतोऽर्थान्तरपरत्वात्तेषां न तदित्यभिप्रेत्य निमित्तकथनपूर्वकं तेषामर्थान्तरपरतामाह **अत एवेति** । सर्वज्ञेनेश्वरेणाननुसन्धीयमानत्वेनासत्त्वादैक्यस्य तद्विषयत्वानुपपत्तेरित्यर्थः । अन्यथायोजनामेव दर्शयति **विभेदशब्दो हीति** । तत्र नियामकमाह **मित्रेति** ।

* * *

।। अथ कालान्तरेऽनुसन्धानेऽज्ञता ।।

।। अथ तत्र 'परमात्मन इदानीमैक्यानुसन्धानाभावेऽप्यागामिनि काले तस्यानुसन्धानमस्ती'ति पक्षे तस्य मिथ्याज्ञानिता ।।

६० सु०— 'परमात्मन ऐक्यानुसन्धानाभावोऽसिद्धः, यत इदानीमननुसन्दधदपीदमागामिनि कालेऽनुसन्धास्यति, न हि सार्वकालिकमनुसन्धानमैक्यस्य व्यापकमित्याशङ्कते पश्चादिति ।

अनु०— पश्चात्स्यादनुसन्धानं चेत्

'परमात्मनो जीवैक्यस्ये'ति शेषः । अत्र प्रमाणं नास्तीति स्फुटः परिहारः ।

परि०— न हि सार्वकालिकमिति । चैत्रमैत्रादेर्जन्मान्तरीयानुसन्धानस्य सर्वकालमसत्त्वेऽपि स्वस्वरूपैक्यस्य भावादिति भावः ।

शे०चं०— दूषणान्तरं वक्तुं शङ्कितप्रायमेव पुनश्शङ्कते **परमात्मन इति** । उक्तशङ्काया मूलारूढत्वलाभायापेक्षितांशं पूरयति **परमात्मनो जीवैक्यस्येति शेष इति** ।

वा०र०— वक्तुं शङ्कितेति पाठः ।

।। इति 'परमात्मन इदानीमैक्यानुसन्धानाभावेऽप्यागामिनि काले तस्यानुसन्धानमस्ती'तिपक्षे तस्य मिथ्याज्ञानिता ।।

* * *

६१ सु०— गूढाभिसन्धिः परिहारान्तरमाह **मिथ्येति** ।

अनु०— मिथ्याज्ञानिता भवेत् ।

'परमात्मन' इति शेषः । सर्वज्ञो हि यदीदानीं जीवैक्यं नानुसन्धत्ते तदा तदसदेव स्यात् सप्तमरसादिवत् । तथा च आगामिनि काले तदनुसन्धास्यति चेन्मिथ्याज्ञानी प्रसज्येतेत्यभिसन्धिः ।

परि०— गूढाभिसन्धिरित्युक्तोऽभिसन्धिः क इत्यत आह **सर्वज्ञो हीति** ।

यादु०— गूढाभिसन्धिं दर्शयति **सर्वज्ञो हीति** ।

वं०प०— ननु कोऽभिसन्धिर्यो गूढ इत्यत आह **सर्वज्ञो हीत्यादिना** ॥ **तदनुसन्धास्यतीति** । असदैक्यमनुसन्धास्यतीत्यर्थः ।

शे०चं०— नन्वैक्यज्ञानेन मिथ्याज्ञानिता भवेदिति नापादयितुं शक्यम् । ऐक्यस्य विद्यमानत्वेन मिथ्याज्ञानित्वप्रयोजकस्याविद्यमानार्थानुसन्धानस्यालाभादित्यत उक्तं **गूढाभिसन्धिरिति** । कोऽसौ गूढाभिसन्धिरित्यत आह **सर्वज्ञो हीति** ॥ **सप्तमरसादिवदिति** । इदं च चित्ररसानङ्गीकारमतमाश्रित्योक्तम् । तदङ्गीकारमते तु सप्तमरसपदमष्टमरसपरं द्रष्टव्यम् ।

* * *

॥ अथ विद्यमानानुसन्धानाभावेऽज्ञत्वापत्तिरिति गूढाभिसन्धेरुद्घाटनम् ॥

६२ सु०— 'नन्वविद्यमानं विद्यमानतयाऽनुसन्दधानो मिथ्याज्ञानी भवति । न चैक्यमविद्यमानम् । तत्कथं परमात्मनो मिथ्याज्ञानित्वमि'त्यविदिताभिसन्धेराशङ्कामभिसन्धिमुद्घाटयन् परिहरति **विद्यमानेति** ।

अनु०— विद्यमानानुसन्धानं न चेदज्ञत्वमापतेत् ।

यद्यैक्यं विद्यमानं तर्हि तदिदानीमननुसन्दधदसर्वज्ञः स्यात्, न च तद्युक्तम्; अतो नास्त्येव तदिति वाच्यम् । तथा च तदनुसन्धास्यन् कथं मिथ्याज्ञानी न भवेत् । एतेन

ईश्वरस्य इदानीं शरीरसद्भावादननुसन्धानमित्यपि निरस्तम्, सार्वज्ञहानिप्रसङ्गानिस्तारात्, ईश्वरस्य साकारताया नित्यत्वेन न भाविन्यप्यनुसन्धाने प्रत्याशा ।

परि०— अविदिताभिसन्धेरिति । अज्ञातप्रागुक्ताभिसन्धिमत इत्यर्थः ।

वं०प०— न च तद्युक्तमिति । ऐक्यस्य विद्यमानत्वं न युक्तमित्यर्थः । एतेनेत्युक्तं दर्शयति **सार्वज्ञेति** ।

वा०र०— मूले साकारताया नित्यत्वेनेति । ईश्वरशरीरस्य नित्यताया स्वरूपभूतज्ञानानन्दमात्रात्मकत्वेन सिद्धत्वादिति भावः ।

।। इति विद्यमानानुसन्धानाभावेऽज्ञत्वापत्तिरिति गूढाभिसन्धेरुद्घाटनम् ।।
।। इति कालान्तरेऽनुसन्धानेऽज्ञता ।।

* * *

।। अथ 'कालभेदेन विद्यमानाविद्यमानैक्यपक्ष'निरासः ।।

६३ **सु०—** 'यदै(द्यै)क्यमविद्यमानमेव यदि वा विद्यमानमेव तदा उक्तदोषद्वयं स्यात् । न चैवम् । किन्त्विदानीमसदेव पश्चाज्ज्ञानोत्तरकाले भवेत् । तत्रेदानीमसत्त्वान्न परमात्मनस्तदननुसन्धाने सार्वज्ञहानिः, पश्चाद्भावाच्च न तदनुसन्धाने मिथ्याज्ञानित्वम्' इति परिशिष्टं पक्षं कस्यचिन्मतं वा शङ्कते **असदिति** ।

अनु०— असदैक्यं भवेत्पश्चाद्यदि स्यात्ससमो रसः ।

परिहरति **स्यादिति** । तर्हीति शेषः । न ह्यनादौ संसारे यस्य येन नैक्यं तत्तेनैकीभूतमुपलब्धम्; न च तथा भविष्यतीत्यत्र प्रमाणमस्ति, 'परेऽव्यये सर्व एकीभवन्ति', 'यावन्मोक्षं तु भेदः स्याज्जीवस्य परमस्य च । ततःपरं न भेदोऽस्ति भेदहेतोरभावतः' इत्यादिश्रुतिस्मृतीनां स्थानैक्यादिविषयत्वेन सावकाशत्वात् । अतः ससमो रसो भविष्यतीतिवदियं प्रत्याशाऽत्यन्तासम्भावितविषयेति भावः ।

परि०— दोषद्वयमिति । मिथ्याज्ञानित्वाज्ञत्वरूपम् ।

यादु०— तदोक्तदोषद्वयमिति । अत्र तदेत्यनन्तरं तदनुसन्धानेऽननुसन्धाने चेति शेषः । तथा चाद्ये मिथ्याज्ञानित्वं द्वितीये सार्वज्ञहानिरिति दोषद्वयमपीत्यर्थः । ननु परमात्मा स्वांशैः प्रागविद्यमानैक्यवान् अंशित्वात्पटादिवदित्यनुमानसिद्धत्वात् कथमस्य सप्तमरससाम्यमित्यत आह **न ह्यनादाविति** । तथा च पटाद्यंशेष्वपि तन्त्वादिषु पटाद्यैक्यं प्रागपि विद्यमानमेव अतः साध्यवैकल्यमिति भावः । नन्वेतादृशं निदर्शनमुत्तरत्र भविष्यति अतो नोक्तदोष इत्यत आह **न च तथेति** । ननु तथाऽप्यागमसिद्धत्वान्न सप्तमरससाम्यमित्यत आह **परेऽव्यय इत्यादि** ।

वं०प०— दोषद्वयं मिथ्याज्ञानित्वाज्ञानित्वरूपम् ।

शे०चं०— तदोक्तदोषद्वयमिति । अनुसन्धानाननुसन्धानयोरिति शेषः । अनुसन्धाने मिथ्याज्ञानित्वमननुसन्धाने सार्वज्ञहानिरिति पूर्वोक्तदोषद्वयमित्यर्थः । **परिशिष्टमिति** । परिशेषलब्धमित्यर्थः । जीवो न कालान्तरे ब्रह्मणैक्यमापत्स्यते । प्राक्ततोऽत्यन्तभिन्नत्वात् । यः कदाचिद्यतोऽत्यन्तं भिद्यते नासौ कदाचिदैक्यमापद्यते यथा घटः पटेनेत्यनुमानबाधितोऽयं पक्ष इति मनसि निधायास्याभासोद्धारं करोति **न ह्यनादाविति** । येन तत्रानैकान्त्यादसदनुमानमेतत्स्यादिति भावः । न केवलं प्रमाणबाधित इत्येव किन्तु पूर्वं भिन्नस्य जीवस्य पश्चादैक्यं भविष्यतीत्यत्र प्रमाणाभावात् अप्रामाणिकश्चेत्याह **न चेति** । नन्वस्मिन्नर्थे 'परेऽव्यये सर्व एकीभवन्ती'त्यादिश्रुत्यादिकं प्रमाणम् । तत्राभूततद्भावार्थकच्विप्रत्ययेनास्यार्थस्य स्पष्टमवगम्यमानत्वादित्यत आह **परेऽव्यय इति** ॥ **सावकाशत्वादिति** । सावकाशत्वस्य जिज्ञासाद्यधिकरणेषु व्युत्पादितत्वादित्यर्थः ।

वा०र०— श्रुत्यादिकमिति । आदिपदेन स्मृतिपरिग्रहः । **अभूततद्भावार्थकेति** । 'अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विरि'त्यनेनाकृष्णः कृष्णः सम्पद्यते कृष्णीभवतीत्यादाविव एकीभवन्तीत्यत्रापि प्रागनेके एके सम्पद्यन्ते एकीभवन्तीति सम्पद्यतेः कर्तरि वर्तमानात् प्रातिपादिकात् स्वार्थे भूयोगे च्विप्रत्ययेऽस्य च्वावित्यनेनैकशब्दान्त्याकारस्य दीर्घेकारे च्वेः सर्वापहारिलोपे सत्येकीभवन्तीति रूपसिद्धेः तेन पूर्वमनेकेषां पश्चादेकत्वस्योक्तेरित्यर्थः । उपलक्षणमेतत् । 'अतःपरं न भेदोऽस्ती'ति स्मृतावपि पश्चादैक्यं प्रागविद्यमानमस्तीत्यवगम्यत इत्यपि द्रष्टव्यम् । **जिज्ञासाद्यधिकरणेष्विति** । आदिपदेन भोक्त्रापत्तेरित्यधिकरणस्य पृथगधिकरणस्य च परिग्रहः । जिज्ञासाधिकरणे हि 'स्वातन्त्र्ये च विशिष्टत्वे स्थानमत्यैक्ययोरपि । सादृश्ये चैक्यवाक् सम्यक् सावकाशे'त्यनुव्याख्याने सावकाशत्वं प्रतिपादितम् । तथा भोक्त्रापत्तेरित्यधिकरणीय-'नान्यदन्यत्वमापन्नमि'त्यनुव्याख्यानप्रवृत्तिपरग्रन्थेन सावकाशत्वं लब्धम् । पृथगधिकरणे 'स्थानैक्यमैकमत्यं तु मुक्तस्य तु विशेष्यत' इत्यनुव्याख्यानव्याख्यानावसरे तत्र स्थानैक्येनैक्यव्यपदेशो लाक्षणिक' इत्यादिना सावकाशत्वमुपपादितमित्यर्थः ।

स०व्र०— परिशिष्टमिति । परिशेषलब्धमित्यर्थः ।

॥ इति 'कालभेदेन विद्यमानाविद्यमानैक्यपक्ष'निरासः ॥

।। अथ जीवब्रह्मणोः 'संसारे भेदाभेदौ मोक्षे त्वभेद एव', 'संसारे केवलभेदो मुक्तावत्यन्ताभेदः' इति भेदाभेदमतद्वयदोषातिदेशेन 'अवस्थाद्वयेऽपि भेदाभेदौ' इति तृतीयमतनिराकरणम् ।।

६४ **सु०**— जीवब्रह्मणोः संसारे भेदाभेदौ मोक्षे त्वभेद एवेति संसारे केवलभेदो मुक्तावत्यन्ताभेद इति भेदाभेदमतद्वयदोषातिदेशेनावस्थाद्वयेऽपि भेदाभेदाविति तृतीयमतमपाकरोति **समुदायेति** ।

अनु०— समुदायैक्यमेतस्मात् दूरतोऽपाकृतं सदा ।

सदा समुदायैक्यमिति सम्बन्धः । **एतस्मात्**प्रमाणशून्यत्वादाभासत्वादिप्रमाणविरुद्धत्वाच्च । इयांस्तु विशेषः, अभेदकार्यस्यानुसन्धानस्य भेदः प्रतिबन्धकः, तस्मिन्नपगते मुक्तावनुसन्धानं भविष्यतीत्यस्ति पूर्वयोर्मतयोः प्रत्याशा, अत्र तु साऽपि नास्ति, भेदस्य सदातनत्वात्, अनुसन्धानं च चेतनैक्यस्य व्यापकमित्युक्तम् । तदिदमुक्तं **दूरत इति** । देहाद्येवानुसन्धानस्य प्रतिबन्धकमिति चेन्न, कायव्यूहवतां योगिनामनुसन्धानसद्भावस्य वक्ष्यमाणत्वात् ।

परि०— वक्ष्यमाणत्वादिति । 'जीवांशाः सर्व एव च । नियमेनानुसन्धानवन्त' इत्यत्र । टीकायां 'इन्द्रादीनामंशा अर्जुनादय' इत्यादिपदेन सौभर्यादयो ग्राह्या इति भावः ।

वं०प०— सदातनत्वादिति । तथा च मुक्तावपि सत्त्वेन तत्रानुसन्धानं न भविष्यतीत्यर्थः । अनुसन्धानाभावेऽपि किमित्यत आह **अनुसन्धानं चेति** । तथा च व्यापकाभावाद्व्याप्यं निवर्तत एव । तथाच चैतन्यानिवृत्तेरैक्यमेव निवर्तत इति मुक्तावैक्याङ्गीकारोऽयुक्त इति भावः । नन्वस्त्येवानुसन्धानं मुक्तौ । न च तत्प्रतिबन्धकीभूतस्य भेदस्य सत्त्वादभावः । देहादेरेव तत्प्रतिबन्धकत्वेन भेदस्य तत्त्वानङ्गीकारात् । देहादेश्चेदानीं सत्त्वान्नानुसन्धानम् । मुक्तौ त्वभावाद्युक्तमेव तत्रानुसन्धानमित्याशङ्कते **देहाद्येवेति** । देहादेरनुसन्धानप्रतिबन्धकत्वं व्यभिचारादयुक्तमित्याह **कायेति** । **योगिनां** सौभर्यादीनाम् ।

शे०चं०— मुक्तौ त्वभेद एवेति । केवलाभेद एवेत्यर्थः । एवं च्विप्रत्ययो युक्तः । पूर्वं केवलाभेदाभावादिति द्रष्टव्यम् । **संसार इति** । एवञ्च च्विप्रत्ययस्य स्वारस्यम् । उक्तयुक्तिस्तु च्विप्रत्ययश्रुतिबाधितेति भावः । **तृतीयमतमिति** । तत्त्वमसीति इदानीमभेदश्रवणात् तया च्विप्रत्ययश्रुतिबाध इति भावः । दूरत इत्यस्य तात्पर्यमाह **इयांस्त्विति** । नन्वस्त्वस्मिन्मते सर्वथाऽनुसन्धानाभाव इत्यतस्तर्हि चेतनैक्यव्यापकस्यानुसन्धान-

स्याभावात्तद्व्याप्यस्य चेतनैक्यस्यापि निवृत्तिः स्यादिति पूर्वोक्तं स्मारयति **अनुसन्धानमिति** ॥ **उक्तमिति** । 'चेतनैक्येऽनुसन्धानं प्रमाणं नैव चापरमि'त्यादिनेति शेषः ॥ **देहाद्येवेति** । तथा च तस्यासदातनत्वात्तदपगमे मुक्तावनुसन्धानं भविष्यतीत्यस्मिन्मतेऽपि तत्प्रत्याशेति भावः ॥ **वक्ष्यमाणत्वादिति** । 'एक आत्मनः शरीरे भावादि'त्यधिकरणे, तथा 'अंशिनोऽशेषसन्धानमि'त्येतदधिकरणीयोत्तरानुव्याख्याने चेति शेषः । तथा च व्यभिचारान्न देहादेः प्रतिबन्धकत्वमिति न तदपगमेऽप्यनुसन्धानप्रत्याशेति भावः ।

वा०र०— **मोक्षे त्वभेद एवेति** मूलम् । मुक्तौ त्वभेद एवेतीत्यर्थानुवादेन प्रतीकोपादानमिति न दोषः । मोक्षे त्वभेद एवेतीति प्रतीकोपादानपाठस्तु स्वरस एव । **उक्तयुक्तिस्त्विति** । यः कदाचिद्यतोऽत्यन्तं भिद्यते इत्यादिव्याप्तिमूला प्राक्ततोऽत्यन्तभिन्नत्वरूपा न ह्यनादौ संसारे यस्य येनेति मूलोक्ता युक्तिरित्यर्थः । अभेदश्रवणात् तेन च्विप्रत्ययेति पाठः । तयेति पाठे तत्त्वमसीति श्रुतावभेदश्रवणात् तया श्रुतेति योज्यम् ।

॥ इति जीवब्रह्मणोः 'संसारे भेदाभेदौ मोक्षे त्वभेद एव', 'संसारे केवलभेदो मुक्तावत्यन्ताभेदः' इति भेदाभेदमतद्वयदोषातिदेशेन 'अवस्थाद्वयेऽपि भेदाभेदौ'इति तृतीयमतनिराकरणम् ॥

॥ इति जीवब्रह्मणी नाभेदवती विरुद्धधर्माधिकरणत्वाच्छायातपवदित्यनुमानेनैक्यबाधनम् ॥

॥ इति ऐक्यबाधकानुमानान्तरकथनम् ॥

॥ इति चेतनत्वाद्यनुमानबाधकतयोक्ताभासत्वानुमानसमर्थनस्य प्रमाणान्तरोपलक्षणत्वाशयः ॥

* * *

॥ अथ परमात्मत्वस्य सीमा(लक्षण)प्रदर्शनम् ॥

॥ अथ तत्र अशेषगुणोन्नद्धत्वम्, निर्दोषत्वञ्च यावत्तावदीश्वरत्वम् ॥

६५ **सु०— यद्येवं न सकलचेतनसमुदायः परमात्मा तर्हि कियती सीमा परमात्मत्वस्येत्यत आह अत इति ।**

अनु०— अतोऽशेषगुणोन्नद्धं निर्दोषं यावदेव हि । तावदेवेश्वरो नाम

साधकस्यानुसन्धानस्य सर्वत्राभावात् बाधकस्याभासत्वादेर्भावात् इह तु तद्भावाभावाभ्यामित्यर्थः । **अशेषगुणोन्नद्धत्वं निर्दोषत्वं** च प्रत्येकं निर्धारणहेतुत्वेन उक्तम् । स्वमते ब्रह्मण ईश्वरातिरिक्तस्याभावं सूचयितुं सर्वत्रेश्वर इत्याद्युक्तिः । इदं हि ब्रह्मणो लक्षणं श्रुत्यादिसिद्धमिति हिशब्दः ।

परि०— अतःपदार्थमाह **साधकस्येत्यादिना** । **सर्वत्र** सर्वजीवेष्वित्यर्थः ।

यादु०— सर्वत्रेति । जीवेष्वित्यर्थः । **इह त्विति** । भगवद्रूपेष्वित्यर्थः ।

वं०प०— सीमेति । एतादृक् परमात्मस्वरूपमिति परमात्मत्वनिर्धारणोपयुक्तो धर्मः क इत्यर्थः । **साधकस्य** जीवानां ब्रह्माभेदसाधकस्य । **सर्वत्र** जीवजाते । **बाधकस्य** अभेदबाधकस्य । **इह तु** भगवद्रूपेषु ॥ **तद्भावाभावाभ्यामिति** । अभेदसाधकानुसन्धानभावादभेदबाधकस्याभासत्वादेरभावादित्यर्थः । **स्वमते** सिद्धान्तिमते । सर्वत्र ईशाख्येत्यारभ्य बहुषु स्थलेष्वित्यर्थः ॥

शे०चं०— इह त्विति । भगवद्रूपेष्वित्यर्थः । **तद्भावेति** । उक्तसाधकबाधकभावाभावाभ्यामित्यर्थः ॥ **प्रत्येकमिति** । विशिष्टस्य प्रयोजकतायां विशेषणविशेष्ययोरन्यतरवैयर्थ्यप्रसङ्गादिति भावः । **सर्वत्रेश्वर इत्याद्युक्तिरिति** । अत्रादिपदेनेशपरिग्रहः ॥

वा०र०— उक्तसाधकेति । साधकबाधकपदयोर्यथाक्रमं भावाभावपदाभ्यां सम्बन्धः ।

॥ इति अशेषगुणोत्रद्धत्वम्, निर्दोषत्वञ्च यावत्तावदीश्वरत्वम् ॥

* * *

॥ अथ यावत्तावदितिप्रयोगेण प्रतीतस्य समुदायैक्यस्य निराकरणम् ॥

६६ **सु०— तावद्वस्त्वीश्वरो नामेत्युक्ते समुदायैक्यं प्रतीयते तन्निराकरोति तत्रेति ।**

अनु०— तत्र भेदोऽपि न क्वचित् ।

क्वचिदिति । परस्परं परमात्मना चेत्यर्थः । एतेनैतदपि निरस्तं 'ईश(श्वर)रूपेष्विवोदिते'ति यदुक्तं पूर्वपक्षिणा, तत्कुत इत्यत आह **नेहेति** ।

नेह नानाऽस्ति किमपि हरयोऽयमयं हि सः ।
इत्यादिश्रुतिमानेन

अनेन 'नेह नानाऽस्ति किञ्चने'ति श्रुतिमुपादत्ते ॥ **हरय इति** । 'अयं वै हरय इत्यादिकाम् ॥ **अयं हि स इति** 'अयमेव स योऽयमात्मे'त्यादिकाम् ॥ पूर्वेणैवान्वयः ॥ एतासां

श्रुतीनामभेदपरत्वान्न विवक्षितार्थे मानत्वमित्याशङ्कानिरासाय मानेनेत्युक्तम् । आद्यश्रुतावीश्वररूपेषु भेदनिराकरणस्य स्पष्टत्वात् तृतीयायामेवशब्द(स्य)श्रवणात् तदनुसारेण द्वितीयायामपि वैशब्दस्यैवार्थत्वोपपत्तेरेताः श्रुतयो विवक्षितार्थे मानतामापद्यन्त इति भावः ।

परि०— **इति यदुक्तं पूर्वपक्षिणेति** । एतदपि निरस्तमिति पूर्वेणान्वयः ॥ **विवक्षितार्थ इति** । अत्यन्ताभेदरूपार्थ इत्यर्थः ।

गु०दी०— **परस्परमात्मना** चेत्यत्र परस्परं कृष्णरामादिभगवदंशानामात्मना परमात्मना मूलरूपिणा परमात्मना चेत्यर्थः । **अयं वै हरय** इत्यस्यायं मूलरूपी नारायणः हरिनामकावतारा इत्यर्थः । **एतासां श्रुतीनामभेदपरत्वादित्यत्र** **अभेदपरत्वाद**भेदमात्रपरत्वात् । **विवक्षितार्थासिद्धिरित्यत्र** विवक्षितार्थभेदाभाव इत्यर्थः । **मानेनेत्युक्त**मित्यत्रेत्यादिश्रुत्येत्येतावता पूर्तौ पुनर्मानेनेति वदतैतासां श्रुतीनां मानतैव सूचितेति भावः । यद्वा परमेश्वरांशत्वहेतुरसिद्धश्चेत्याह ।

यादु०— **विवक्षितार्थ इति** । अत्यन्ताभेद इत्यर्थः ।

वं०प०— **एतेनेति** । 'तत्र भेदोऽपि न क्वचिदि'ति समुदायैक्यप्रयुक्तभेदमनङ्गीकृत्य मत्स्यादीनां परमात्मनाऽत्यन्ताभेदकथनेनेत्यर्थः । **यदुक्तमिति** । 'यथा भगवद्रूपाणां मत्स्यादीनां समुदाये भगवत्संज्ञा सिद्धान्तिनोदिते'ति यदुक्तं तदेतेन निराकृतं भवति । सिद्धान्तिभिरस्माभिस्तथा नोच्यत यत इत्यर्थः ॥ **तदिति** । 'तत्र भेदोऽपि न क्वचिदि'त्येतत्कुत इत्यर्थः ॥ **पूर्वेणैवेति** । मानेनेत्यस्य 'तत्र भेदोऽपि न क्वचिदि'त्यनेनान्वय इत्यर्थः । **विवक्षितार्थे** तत्र भेदोऽपि न क्वचिदित्यत्र विवक्षिते भेदनिषेधरूपेऽर्थे । एवमुत्तरत्र । तथा चैतच्छ्रुतीनामभेदप्रतिपादकत्वात् तस्य च मयाऽप्यङ्गीकारान्नास्मद्विरोधित्वमित्यर्थः ।

शे०चं०— **समुदायैक्यमिति** । भेदाभेदावित्यर्थः ॥ **एतेनेति** । परस्परं परमात्मना च भेदनिराकरणेनेत्यर्थः । एतदित्युक्तमेव विशदयति **ईशरूपेष्विवोदितेत्यादि** ॥ **पूर्वेणेति** । 'तत्र भेदोऽपि न क्वचिदि'ति पूर्वेणेत्यर्थः ॥ **विवक्षितार्थ इति** । ईश्वररूपाणामत्यन्ताभेद इत्यर्थः ।

॥ इति यावत्तावदितिप्रयोगेण प्रतीतस्य समुदायैक्यस्य निराकरणम् ॥

॥ इति परमात्मत्वस्य सीमा(लक्षण)प्रदर्शनम् ॥

* * *

।। अथ 'चेतनैक्यस्यानुसन्धानं व्यापकम्'इत्युक्तेः समर्थनम् ।।

६८ सु०— चेतनैक्यस्यानुसन्धानं व्यापकमित्युक्तम् क्व तदुपलब्धमिति चेन्न, देवदत्त-सम्बन्धिनः सुखादेर्देवदत्तेनानुसन्धीयमानत्वात् । उपाधिभिन्ने नोपलब्धमिति चेन्न, हस्त-पादाद्युपाधिभिन्नेऽपि दर्शनात् । विश्लिष्टोपाधिभिन्ने न दृष्टमिति चेत्तत्राह **जीवांशा इति** ।

अनु०— जीवांशाः सर्व एव च ।
नियमेनानुसन्धानवन्तो

जीवानामिन्द्रादीनामंशा अर्जुनादयः । एतच्च 'एक आत्मनः शरीरे भावादि'त्यादिना समर्थयिष्यते । **चशब्देनेश्वरांशाः समुच्चीयन्ते** ।

न च (नु) 'आत्मा वै पुत्रनामासीदि'त्यादिवचनात् पितापुत्रयोः सत्यप्यैक्येऽनुसन्धानं नास्तीति कथं तद्व्यापकमित्यत आह **यदीति** ।

यद्येकता स्वतः ।।

तर्ह्यनुसन्धानवन्त इति सम्बन्धः ।

अयं भावः । 'वास्तवस्यैक्यस्यानुसन्धानं व्यापकमभिमतं न तूपचरितस्य । न च अभिमतस्य व्यभिचारोऽस्ति । पितापुत्रैक्यं तूपचरितमेवे'ति न तत्र व्यभिचारो दोषायेति । **स्वतः** वस्तुतः ।

परि०— इन्द्रादीनामंशा अर्जुनादय इत्यत्र सौभर्याद्यंशा आदिपदार्थः । **एतच्च एक आत्मन इति** । उपरितनपादे इत्यादिना सूत्रेण समर्थयिष्यत इत्यर्थः । तदर्थो भाष्ये व्यक्त इति भावः ।

गु०दी०— जीवांशा इतीत्यत्र न वैयधिकरण्यं शङ्क्यम् । यतस्सर्वे जीवांशाः अर्जुनाद्याः अनु-सन्धानवन्तो दृष्टाः, न तथा जीवाः ब्रह्मसुखानुसन्धानवन्तः अतो न तदंशा इत्यत्र तात्पर्यात् ।

यादु०— ननु न प्रतिज्ञामात्रेणार्थसिद्धिरित्यत आह **एतच्चेति** । अंशिकर्मनिर्मितशरीर एवांशस्य भावादिति युक्त्यादिनैतत्समर्थयिष्यत इत्यर्थः ।

वं०प०— शङ्कते **चैतन्यैक्यस्येति** । ननु मया चेतनैक्यमात्रेऽनुसन्धानं प्रयोजकमिति नोच्यते । किन्नामोपाधिभेदाभावविशिष्टे चैतन्यैक्ये तत्प्रयोजकत्वेनोच्यते । अस्ति चैतदेकस्मिन् देवदत्ते न ब्रह्मणि । उपाधिभेदस्यैव सत्त्वादित्याह **उपाधीति** । प्रयोज्यप्रयोजकभावे समव्याप्तिमभिप्रेत्य तत्र व्यभिचारमाह **हस्तेति** । एतद्दोषपरिहाराय शङ्कते **विश्लिष्टेति** । न दृष्टमनुसन्धानम् । स्यादेवं यद्यौपाधिकभेदाभावे सति अभेदमेवानुसन्धाने प्रयोजकं ब्रूमः । किन्तु विश्लिष्टोपाधिकृतभेदाभावे सति । तथा च न व्यभिचारः । औपाधिकभेदसद्भावेऽप्येकस्मिन् शरीरे विश्लिष्टोपाधिकृतभेदाभावात् । न चैतत्प्रयोजकं प्रकृतेऽस्ति । उपाधीनां विश्लेषात् । अतो नानुसन्धानमिति भावः । प्रयोजकान्तराणां व्यभिचारित्वाच्चैतन्यैक्ये त्वनुसन्धानमात्रमेव प्रयोजकमिति यद्भवदभिप्रेतं तदप्ययुक्तमित्याशङ्कते **नन्विति** । **अभिमतस्य** अनुसन्धानव्याप्यभूतस्वाभाविकैक्यस्य ॥ **उपचारितमेवेति** । तद्देहांशानां पुत्रदेहोपादानत्वादिति भावः । उपपादितमेतत्प्रथमाध्याये चतुर्थपादे । स्वतः स्वस्माज्जीवादित्यन्यथाप्रतीतेराह **वस्तुत इति** ।

शे०चं०— क्व तदुपलब्धमिति चेदिति । यत्र चेतनत्वावच्छिन्नमैक्यं तत्रानुसन्धानमित्येवोक्ते कुत्रेदं दृष्टमिति पर्याकुलितमना न तावद्व्याप्तिं प्रत्येति यावन्न दृष्टान्तोपन्यास इति तदभिधानावश्यकतापक्षमाश्रित्येयं शङ्का, न तु दृष्टान्तस्य सार्वत्रिकत्वाभिप्रायेणेति न युक्तिपादीयटीकया विरोधः । ततश्च व्याप्त्यसिद्ध्या मूलशैथिल्यान्न चेतनैक्येनानुसन्धानापादनं वाऽनुसन्धानाभावेनैक्याभावानुमानं वा युक्तमित्यर्थः । देवदत्तेन स्वभावैक्यवतो देवदत्तस्य देवदत्तगतसुखाद्यनुसन्धानदर्शनेन तस्यैव दृष्टान्तत्वसम्भवान्न व्याप्तिवैकल्यमित्याशयेन समादत्ते **देवदत्तेति** । ननु दृष्टान्तस्थलेऽनुसन्धानस्योपाधिभेदाभावः प्रयोजको न स्वरूपैक्यं प्रकृते तूपाधिभेदसद्भावात्कथमनुसन्धानप्रसङ्गः कथं च अन्यनिमित्तस्यानुसन्धानस्याभावात् स्वरूपैक्याभावानुमानमित्याशयेन शङ्कते **उपाधिभिन्न इति** । यद्वा गूढाभिसन्धेरेव पूर्वोक्तावाक्षेपपरिहारावुपाधिभिन्न इति तु पूर्ववाद्यभिप्रायोद्घाटनमित्यवधेयम् । साध्याव्यापकत्वान्नायमुपाधिरित्याशयेन समाधत्ते **हस्तेति** । न वयमौपाधिकभेदाभावे सत्यभेदमेवानुसन्धाने प्रयोजकं ब्रूमः । किन्तु विश्लिष्टोपाधिकृतभेदाभावविशिष्टम् । तथा च न व्यभिचारः । औपाधिकभेदसद्भावेऽप्येकस्मिन् शरीरे विश्लिष्टोपाधिकृतभेदाभावात् । न चैतत्प्रयोजकं प्रकृतेऽस्त्युपाधीनां विश्लेषादतो नानुसन्धानप्रसङ्गः । नापि तदभावेनैक्याभावानुमानमित्याशयेन शङ्कते **विश्लिष्टेति** । ननु च प्रतिज्ञामात्रेणार्थसिद्धिः । अन्यथाऽतिप्रसक्तेरित्यत आह **एतच्चेति** ॥ **समर्थयिष्यत इति** । 'अंशिकर्मनिर्मितशरीर एवांशस्य भावादि'त्यादिनेति शेषः । ननु कथमनेन व्यभिचारपरिहार इत्यत आह **अयं भाव इति** ।

वा०र०— **युक्तिपादीयटीकयेति** । 'उक्तव्याप्तिरेव तु सा स्मृते'त्याद्यनुव्याख्यानव्याख्यानरूपपञ्चावयवनियमनिराकरणपरटीकयेत्यर्थः । विशिष्य स्थलं शोध्यमस्ति । हस्तपादाद्युपाधिभेदेऽपि भोक्तुरेकत्वानुभवादित्येतत् तत्त्वोद्योतवाक्यव्याख्यानरूप'यथा देवदत्तेन स्वगतं सुखादि' इत्यादि ग्रन्थं मनसि निधाय व्याप्तिग्रहणस्थलं स्पष्टयति **देवदत्तेनेति** । उपाधिभेदेऽपीत्येतदवताररूप'ननु दृष्टान्तस्थल' इत्याद्युपाधिखण्डनटीकानुसारेणाह **ननु दृष्टान्तस्थल इति** । क्व तदुपलब्धमिति शङ्कावाक्यस्य दृष्टान्ताभावमात्रशङ्कापरत्वापेक्षयोपाधिभेदे चेतनत्वे

सत्यैक्येऽपि नानुसन्धानमित्याक्षेपपरतया योजनायाः स्वरसत्वम् । तेनानुसन्धाने उपाधिभेदाभावस्य प्रयोजकत्वकथनद्वारोपाधिभेदाभावस्योपाधित्वोक्तिलाभात् । तथा सत्युत्तरवाक्योक्तशङ्कानुदयवारणाय तदभिसन्धेर्गूढत्वम् । तथा 'देवदत्तसम्बन्धिन' इति वाक्यस्योपाधिनिराकरणपरत्वम् । हस्तपादाद्युपाधीत्युत्तरावैयर्थ्याय चाभिसन्धेर्गूढत्वं चाश्रयणीयमिति योजनान्तरमाह **यद्वा गूढाभिसन्धिरेवेति** । **अभिप्रायोद्घाटनमिति** । अनुसन्धानं यत्रास्ति तत्र तत्प्रयोजक उपाधिभेदाभावः ऐक्येनानुसन्धानापादने उपाधिरित्यभिप्रायस्य प्रतीतेरिति भावः । उत्तरवाक्याभिप्रायोपदर्शनेन तद्वाक्यं देवदत्तसम्बन्धिन इति वाक्यस्याभिप्रायोद्घाटनरूपमित्याह **साध्याव्यापकत्वादिति** ।

'उद्यतायुधदोर्दण्डा' इत्येतदवताररूपतत्त्वोद्योतटीकानुसारेण शङ्कितम् **न वयमौपाधिकेति** । अत्र चौपाधिकभेदाभावमात्रविशिष्टमभेदमित्यर्थस्य विवक्षितत्वात् किन्तु विश्लिष्टेत्यधिकांशवचनं विश्लेषरूपोपाधिविशेषणस्याधिकस्य पूर्वत्र प्रवेशयत्वाभिप्रायं न तूत्तरोक्तसम्पूर्णप्रयोजकस्यापि तत्र निवेशाभिप्रायमिति ज्ञातुं शक्यत्वादाधिक्यप्राप्तिः । पूर्ववैयर्थ्यं वेति शङ्कानवकाशः । यद्वा किन्त्विति वाक्येऽभेदमिति बुद्ध्या विविच्यानुवर्तते । तथा च सम्पूर्णस्य पूर्वोक्तस्य त्यागाभिप्रायेणैव न ब्रूम इत्युक्तिः किं त्वन्यदेवेत्यभिप्रायेण तु किन्त्वित्याद्युक्तिरिति विवेकाश्रयणान्न कश्चिद्दोष इति ज्ञेयम् । तत्त्वोद्योतटीकायामप्येवमेव व्याख्येयम् ।

एक आत्मन इत्यादिसूत्रादेवांशत्वस्य स्पष्टमप्रतीतेस्तत्सूत्रीयभाष्यमेवाह **अंशिकर्मेति** । इत्यादिनेत्यादिपदेन ज्ञानादिभेदे विद्यमानेऽपि नांशिनोः पृथग्भाव इत्यादेर्व्यतिरेकस्तद्भावेति सूत्रीयभाष्यस्य सङ्ग्रहः । अत्रेत्यादिनेत्यस्येत्याद्यर्थकेनेति विवक्षणान्न कश्चिद्दोषः । जीवांशाः नियमेनानुसन्धानवत इति प्रतिज्ञायां हेतुप्रतिपादनाय समर्थयिष्यत इत्युक्तानुव्याख्यानकारेणेति शेषपूरणे स्वारस्यं भवतीत्यतो मूलस्थेत्यादिनेत्यस्येत्यादि सूत्रद्वयव्याख्यानेनेत्यर्थकत्वमेव वाच्यमित्याशयेनेत्यादिनेत्येतदित्यादिभाष्यवाक्यपरतया व्याख्यातम् । तत्र 'अंशिनस्तु पृथग्जाता' इत्यादिपरमसंहितावाक्यमुक्तार्थे प्रमाणमभिहितमिति समर्थनविशेषलाभ इति हृदयम् ।

इन्द्रार्जुनयोः साध्यसाधनाभाववत्त्वेनान्वयव्याप्तौ दृष्टान्तत्वायोगाद्यथा चेति समुच्चयायोग इति शङ्कानिरासाय द्वितीयदृष्टान्तस्य व्यतिरेकदृष्टान्तत्वमेव ।

'आत्मा वै पुत्रनामासी'त्यादिवचनादित्येव मूले पाठः । **वचनात्पितापुत्रयोरित्यादि** मूलम् । यद्यपि 'आनङ् ऋतो द्वन्द्वे' इति सूत्रस्य विद्यायोनिसम्बन्धवाचिनामृदन्तानां द्वन्द्वे पूर्वपदस्यानङादेशः स्यादित्यर्थकत्वं होतापोतारौ मातापितराविति तत्रोदाहरणं च समस्यमानपदयोर्द्वयोरपि ऋदन्तत्व एवास्ति । तथा च पुत्रशब्दस्य ऋदन्तत्वाभावात् तत्रानङादेशाप्राप्तिरित्याभाति । तथापि पुत्रेऽन्यतरस्यामिति पूर्वसूत्रात् पुत्र इत्यस्य मण्डूकप्लुतिन्यायेनानुवृत्तिमाश्रित्यानृदन्तपुत्रशब्देन द्वन्द्वेऽपि मातापुत्रावित्यादेः प्रयोगस्य वैयाकरणैरुपपादनात् पितापुत्रयोरित्याद्यपि साधु । पितापुत्रयोर्हि योनिकृतः सम्बन्धो जन्यजनकभावलक्षणोऽस्तीति पूर्वपदस्यानङित्वात् अन्त्यस्यादेशो आकारमात्रादेशपक्षे 'उरण् रपर' इति सूत्रेण रपरत्वं प्राप्नोतीति तद्व्यावृत्त्यर्थतया तकारस्याधिक-

स्योपादानात् तद्बलात् परत्वाभावे पितापुत्रयोरित्यादिरूपोपपत्तिरिति ज्ञातव्यम् । नामासीदित्यादीति दकारस्तु लेखकागतः ।

॥ इति 'चेतनैक्यस्यानुसन्धानं व्यापकम्'इत्युक्तेः समर्थनम् ॥

* * *

॥ अथ परमेश्वरांशत्वहेतोरसिद्धिः ॥

६९ सु०— यद्वा परमेश्वरांशत्वहेतुरसिद्धश्चेत्याह **जीवांशा इति** ।

एतदुक्तं भवति । चैतन्यावच्छिन्नांशत्वस्यानुसन्धानं व्यापकमर्जुनादिषु दृष्टम् । तच्च परमेश्वरजीवयोर्नास्तीत्युपपादितम् । व्यापकाभावे च व्याप्याभावोऽवश्यम्भावी । न च चैतन्यव्यावृत्तिर्युक्तेत्यंशत्वमेव व्यावर्तते । तथा च प्रयोगः । जीवेश्वरौ न चेतनत्वे सत्यंशांशिनौ, परस्परानुसन्धानशून्यत्वात्, यथा घटपटौ यथा चेन्द्रार्जुनाविति ।

ननु पितापुत्रयोरंशांशिभावे सत्यप्यनुसन्धानं नास्तीति कथं तत्तस्य व्यापकमित्यत आह **यदीति** । **एकता** एकदेशतारूपांशता । पितापुत्रयोरंशांशिभावो नैकदेशतादिरूप इति भावः ।

परि०— ननु चैतन्यावच्छि(न्नैक्यस्य)न्नांशित्वस्य व्याप्यत्वे विशेषणव्यावृत्त्याऽपि व्यापकनिवृत्तेरुपपत्तिरस्त्वित्यत आह **न च चैतन्यव्यावृत्तिर्युक्तेति** । बाधादिति भावः ।

गु०दी०— **एकदेशतादिरूप इति भाव** इत्यत्र अर्जुनाद्यंशेषु मत्स्याद्यंशेषु च कार्यवशात् कदाचिद्भिन्नदेशगमनेऽपि कार्यावसाने तदैव ऐकदेश्यमप्यस्ति । पितापुत्रयोस्तु न कदापि । अतो नोक्तनियमभङ्ग इति ज्ञेयम् । तर्हि पितृपुत्रयोर्मास्त्वंशांशिभावः कदाप्यैकदेश्याभावात् । जीवानां तु मुक्तौ तत्सद्भावादंशांशिभावोऽप्यस्त्विति न शङ्कनीयम् । 'हरेरनुव्रता यत्र सुरासुरार्चिता' इति 'मुक्तानां परमा गतिः', 'कृष्णो मुक्तैरिज्यते वीतमोहैः', 'सोऽमृतस्याभयस्येशः', 'भेजे खगेन्द्रध्वजपादमूलम्' इत्यादिस्मृत्या 'अमृतस्यैष सेतुः', 'स तत्र पर्येति', 'उतामृतत्वस्येशानः' इत्यादिश्रुत्या 'मुक्तोपसृप्यव्यपदेशादि'त्यादिसूत्रेण च शेषपर्यङ्कशायिना विष्णुना कस्याप्यैकदेश्याभावात् । अत एव एकदेश्यत्वरूपसमुदायत्वायोगेन च त्वदाशालतामूलस्यैवोन्मूलितत्वात् । 'परेऽव्यये सर्व एकीभवन्ती'ति श्रुतिश्च गोष्ठे गाव एकीभवन्तीतिवत् नाधारभूतपरमात्मन्येकीभावपरा । अतो नैतयाऽपि श्रुत्या त्वदभिलषितसिद्धिरिति सन्तोष्टव्यमायुष्मता ।

यादु०— व्यतिरेकदृष्टान्तमप्याह **यथा चेन्द्रार्जुनाविति** ॥

वं०प०— हेतुः अभेदसाधकतया परोपन्यस्तः ॥ **असिद्ध इति** । अंशत्वव्यापकीभूतधर्मस्यात्राभावेन अंशत्वस्याप्यभावापत्त्याऽसिद्ध इत्यर्थः । अंशांशिभावोपेततन्तुपटादौ व्यभिचारवारणाय चैतन्येति पदम् । अनुमाने तन्तुपटयोर्व्यभिचारवारणाय साध्ये चेतनत्वे सतीत्युक्तमिति ज्ञेयम् । व्यतिरेके दृष्टान्तमाह **यथा वेति** । **तत्** अनुसन्धानम् । **तस्य** अंशत्वस्य । कथं व्यापकत्वं येन तदभावेनांशत्वाभावापत्त्याऽसिद्धिः स्यादिति भावः ॥ **एकदेशतारूपेति** । स्वाभाविकांशत्वरूपेत्यर्थः । नैकदेशतादिरूप इत्यत्रादिपदेन बिम्बप्रतिबिम्बभावग्रहणम् ।

शे०चं०— अन्वयदृष्टान्तमुक्त्वा व्यतिरेकदृष्टान्तमाह **यथा चेति** ।

वा०र०— दृष्टान्तत्वमात्रेण समुच्चयस्याश्रयणाच्च नानुपपत्तिरिति भावेनाह **व्यतिरेकदृष्टान्तमिति** ।

॥ इति परमेश्वरांशत्वहेतोरसिद्धिः ॥

* * *

॥ अथ अनुसन्धानाभावेनांशत्वव्यावृत्तावंशाधिकरणविरोध इति शङ्काया अंशशब्दार्थभेदेन निराकरणम् ॥

७० **सु०— नन्वनुसन्धानाभावेनांशत्वव्यावृत्तावंशाधिकरणविरोधः स्यात् । न स्यात् । अंशशब्दो हि तदेकदेशार्थस्तत्सदृशाद्यर्थश्च । तत्र (तच्च) द्वितीयमंशत्वमंशाधिकरणप्रतिपाद्यं न निराक्रियते, तस्यानैकान्त्यप्रसङ्गेन परेण हेतूकर्तुमशक्यत्वात् । आद्यस्यासिद्धिव्युत्पादने न कोऽपि दोषः ।**

परि०— परेण एतदेवांशत्वं हेतूकृतं कथं निरस्यत इत्यत आह **तस्यानैकान्त्येति** । सव्येतरहस्तादौ सत्यप्यस्मिन्नभेदाभावादिति भावः ॥

यादु०— **तस्यानैकान्त्येति** । सूर्याग्निंशेष्वपभ्रष्टदेवेष्विति शेषः ॥

वं०प०— **न निराक्रियते** व्यापकीभूतानुसन्धानाभावेनेति शेषः । ननु यदि तदधीनत्वे सति तत्सदृशत्वरूपं तदंशत्वं न निराक्रियते तर्हि तदेवांशत्वं जीवाभेदेऽस्मन्मते हेतुरस्तु । भवदङ्गीकृतत्वेनासिद्ध्यभावादित्याशङ्क्याऽपभ्रष्टदेवतासु व्यभिचार इत्याह **तस्येति** ।

शे०चं०— **विरोधः स्यादिति** । अत्र महता प्रबन्धेनांशत्वसमर्थनादिति भावः । **द्वितीयमिति** । तत्सदृशत्वादिकमित्यर्थः । **अनैकान्त्येति** । सूर्याद्यपभ्रष्टदेवेष्विति शेषः । अनैकान्त्यप्रसङ्गो विरुद्धत्वप्रसङ्गस्याप्युपलक्षकः । तदधीनत्वादेरभेदाभावव्याप्यत्वेन तेनाभेदसाधनस्य विरुद्धत्वादिति भावः । **आद्यस्येति** । तदेकदेशत्वस्येत्यर्थः । **न कोऽपीति** । अंशाधिकरणविरोधादिप्रसङ्गरूप इत्यर्थः ।

वा०र०— 'सदृशत्वं च चित्त्वमात्रं न चापरमि'त्येतत्पूर्वग्रन्थव्याख्यानानुसारेण विरुद्धत्वोपलक्षणमाह **विरुद्धत्वप्रसङ्गस्यापीति** । सदृशादिति मूलगतादिपदेन तदधीनं गृह्यत इति सूचयितुमादिपदोपात्तमेव प्रथमं कीर्तयन् विरोधमुपपादयति **तदधीनत्वादेरिति** । विकल्पितपक्षद्वयोक्तदोषाभावपरं न कोऽपीत्येतदित्याह **अंशाधिकरणविरोधादीति** ।

।। इति अनुसन्धानाभावेनांशत्वव्यावृत्तावंशाधिकरणविरोध इति शङ्काया अंशशब्दार्थभेदेन निराकरणम् ।।

* * *

।। अथ अत्यल्पस्याप्यंशिन अंशगतसुखदुःखाद्यनुसन्धानं विद्यत एव, तथापि कश्चिद्विशेष ईशकृतो भवेत् ।।

७१ **सु०**— 'नन्विन्द्रादीनामनुसन्धानसद्भावे कथमिन्द्रानभिमतं खाण्डववनदाहादिकमर्जुनः कृतवान्, कथं च इन्द्रोऽर्जुनानभिमतं दहनशमनादिकम्, न हि हस्तादावनुसन्धाने सतीदं दृष्टमि'त्यत आह **अंशिन इति** ।

अनु०— अंशिनोऽशेषसन्धानमत्यल्पस्यापि विद्यते ।
भुवि जातेन चांशेन सुखदुःखादि तद्गतम् ।
अनुभूयते विशेषस्तु कश्चिदीशकृतो भवेत् ।

अत्यल्पस्याप्यंशिनोऽशगताशेषानुसन्धानं विद्यत एव । तथाऽपि **कश्चिद्विशेषः** अंशानभिमतकरणादिः **ईशकृतो भवेत्** । अंशकीर्त्याद्यर्थम् ईश्वरप्रेरितेन अंशिना क्रियत इत्यर्थः ।। **अल्पस्यापीति** स्वरूपसङ्कीर्तनम् । **भुवि जातेनांशेन चांशिगतं सुखदुःखाद्येवानुभूयते** न तु सर्वम् । सत्यप्यैक्ये कश्चित्सर्वाननुसन्धानरूपो **विशेषस्तु ईशकृतो भवेत्** । भूम्याद्यपकृष्टदेशं, गर्भवासाद्यवस्थां, मानुषान्नोपभोगादिकं च निमित्तीकृत्येश्वरेण

क्रियते । अतोऽशस्यांशयनभिमतकरणादिकं युज्यते । न ह्यशेषानुसन्धानमस्माभिश्चेतनैक्यादेर्व्यापकमुक्तम्, किन्त्वनुसन्धानमात्रमिति भावः ।

परि०— अत्यल्पस्यापीति । उत्क्रान्तिनयन्यायेन अत्यन्ताणोरित्यर्थः ।

गु०दी०— अत्यल्पस्याप्यंशिन इत्यस्यात्यन्तमणोरप्यंशिन इत्यर्थः ।

यादु०— अत्यल्पस्यापीति । ब्रह्माद्यपेक्षया स्वरूपेणातिनीचस्यापीत्यर्थः । **अंशिगतं सुखदुःखाद्येवेति** । अत्र सुखदुःखपदे सदसत्स्वरूपसुखदुःखमात्रपरे, न सर्वसुखदुःखपरे । 'अल्पे ज्ञानादावनुसन्धानाभावेऽपी'ति तत्त्वप्रकाशिकाविरोधप्रसङ्गात् । ततश्चायमर्थः । अर्जुनादिभिः सद्भिरंशैरंशिगतं तत्कृतप्रधानसाधनोपासनादिनाऽभिव्यक्तं यत्स्वरूपसुखादिकं तदेवानुभूयते स्वरूपस्यैकत्वात् । तथा दुर्योधनादिभिरसद्भिरंशैरंशिगतं तत्कृतहरिद्वेषादिप्रधानसाधनाभिव्यक्तं यत्स्वरूपदुःखादिकं तदेवानुभूयते न तु तत्सर्वं तत्तदंशिकृताल्पसाधनजन्यं बाह्यं सुखं दुःखं ज्ञानादिकं वेति । यद्वा सुखदुःखपदे प्रधानसाधनफलभूतसुखदुःखमात्रपरे न सर्वसुखदुःखपरे, उदाहृततत्त्वप्रकाशिकाविरोधात् । ततश्चांशिगतं तत्कृतोपासनादिप्रधानसाधनफलभूतं यन्महासुखं यच्च तद्गतं तत्कृतप्रधानपापफलं महादुःखं तदेवांशेनानुभूयते न तु सर्वमल्पसाधनजन्यं सुखदुःखादिकमित्यर्थः ।

वं०प०— ननु चैतन्यैक्येऽशेषानुसन्धानस्य व्यापकतया सिद्धान्त्यभिप्रेतत्वेनेन्द्रार्जुनादौ तदभावाच्चैतन्यैक्यं न स्यादित्यत आह **न हीति** । स्वानभिमतमित्यत्र स्वशब्देन जीवो ग्राह्यः ।

शे०चं०— अत्यल्पस्यापीति । ब्रह्माद्यपेक्षया स्वरूपेणातिनीचस्यापीत्यर्थः । **अंशिगतं सुखदुःखाद्येवेति** । अंशिकृतप्रधानसाधनोपासनादिजन्यं सुखाद्येवेत्यर्थः ॥ **न तु सर्वमिति** । अंशिकृताल्पसाधनजन्यं सुखदुःखादि नानुसन्धीयत इत्यर्थः । यद्यप्यत्र सुखदुःखादिति सामान्यमेवोक्तं तथाऽपि 'तत्साधनोत्तमस्यांशेन भुज्यमानत्वादि'ति न्यायविवरणानुसारेणेह टीकायामियं व्यवस्था सूचिता । भाष्यटीकायां तु 'अल्पज्ञानानुसन्धानाभावेऽपि प्रधानसाधनोपासनाफलानुसन्धानादि'त्युक्तव्यवस्थोदाहृतन्यायविवरणानुसारेण स्पष्टमेवोक्तेति द्रष्टव्यम् । नन्वेवमिन्द्रार्जुनादीनां सत्यपि स्वाभाविकैक्ये परस्परगताशेषसुखदुःखाद्यननुसन्धानेन तत्र व्यभिचारापत्त्या व्याप्यव्यापकभावो न स्यादित्यत आह **न हीति** ।

वा०र०— अत्यल्पस्यापीत्यपिशब्दः तथापीत्यर्थको आवर्तनीयः । विशेषस्तु कश्चिदित्यादिकमाकृष्यते इति भावेन विशिष्टवाक्यार्थकथनं मूले **तथापि कश्चिदित्यादि** ।

स्वरूपकीर्तनमिति मूलम् । ब्रह्माद्युत्तमांशिनो नीचत्वप्रतिपादनस्य प्रयोजनाभावादिति भावः । साधनोत्तमस्य ह्युदाहरिष्यमाणन्यायविवरणानुसारितत्त्वप्रकाशिकानुसारेण सुखदुःखाद्येवेत्येतत्सङ्कोचेन व्याख्याति **अंशिकृतप्रधानेति** । साधनोत्तमस्येत्यत्रोत्तमत्वं प्रधानत्वमित्याशयेन साधनेषूत्तमं साधनोत्तममिति विग्रह-

लब्धार्थकथनं **प्रधानसाधनेति** । **अत्रेति** । एतदधिकरणीयानुव्याख्यान इत्यर्थः । **सामान्यमेवेति** । न तूत्तमसाधनोपासनादिजन्यमित्युक्तमित्यवधारणार्थः । **इति न्यायविवरणेति** । 'एक आत्मनः शरीरे भावादि'ति तृतीयपादीयसूत्रीयन्यायविवरणेत्यर्थः । अत्र साधनोत्तमस्यांशिकृतस्यांशेन भुज्यमानत्वादिति न्यायविवरणपाठः । प्रधानप्रमेयानुवादाय प्रवृत्तेरंशिकृतेति नोक्तमित्यप्याहुः । **इयं व्यवस्थेति** । उत्तमसाधनसाध्यमंशिगतमंशेन अनुभूयते न तु सर्वमितीयं व्यवस्थेत्यर्थः । कुतस्तस्या अत्र सूचितत्वं व्याख्येयम् । सुखदुःखाद्यतिरिक्तमेव सर्वमित्यनेन व्यावर्त्यं किं न स्यादित्यतस्तथा सत्युदाहृतन्यायविवरणानुसारितत्त्वप्रकाशिकाविरोधः स्यात् । न्यायविवरणादौ सर्वसुखादेरनुसन्धानाभावः । प्रधानसाधनोपासनादिसाध्यसुखादेरेवानुसन्धानमित्यस्य प्रतिपादितत्वादित्याशयेनाह **भाष्यटीकायां त्विति** । एक आत्मन इत्येतदधिकरणीयटीकायामित्यर्थः । ज्ञानादावनुसन्धानेति उपासनादीति च पाठः । अल्पज्ञानादावित्यादिपदेन सुखादेः फलपदेन च ज्ञानादेरप्यभिप्रेतत्वाद्यथाश्रुतार्थमङ्गीकृत्य ज्ञानादावनुसन्धानाभावः सुखादौ त्वनुसन्धानमिति तत्त्वप्रकाशिकाव्याख्यानायोग एवेति प्रकृतेऽपि सुखादावनुसन्धानम् । सर्वपदोक्तज्ञानादौ तन्निषेधोऽर्थ इति कल्पनामात्रं भ्रान्तिमूलमिति भावः ।

।। इति अत्यल्पस्याप्यंशिन अंशगतसुखदुःखाद्यनुसन्धानं विद्यत एव, तथापि कश्चिद्विशेष ईशकृतो भवेत् ।।

* * *

।। अथ ईशस्याचिन्त्यशक्तित्वान्नाशक्यं क्वापि विद्यते ।।

७२　सु०— नन्वीश्वरोऽपि कथं स्वानभिमतं कारयति, कथं चाभिन्नेऽनुसन्धानं प्रतिबध्नातीत्यत आह **ईशस्येति** ।

अनु०— ईशस्याचिन्त्यशक्तित्वान्नाशक्यं क्वापि विद्यते ।

दृश्यन्ते खल्वघटितं घटयन्त्येश्वरशक्त्या प्रेरिताः कामक्रोधादिपरवशा ऐहिकामुष्मिकदुःखहेतुं स्वशिरश्छेदं पातकं च कुर्वाणा इत्याशयः ।

वं०प०— **प्रतिबध्नातीति** । अंशस्याशेषानुसन्धानानङ्गीकारादिति भावः ।

शे०चं०— **स्वानभिमतमिति** । इन्द्रादिरूपांश्यनभिमतमित्यर्थः ।

स०व्र०— **स्वानभिमतमिति** । इन्द्रादिलक्षणां(रूपां)श्यनभिमतमित्यर्थः ।

।। इति ईशस्याचिन्त्यशक्तित्वान्नाशक्यं क्वापि विद्यते ।।

।। अथ जीवेशैकतायां सेशताया एवानुपपन्नता ।।

७३ **सु०—** 'नन्वेवं तर्हि मयाऽपि शक्यते वक्तुम् । यथाऽर्जुनस्यैक्ये सत्यपीन्द्रगताशेषानुसन्धानमचिन्त्यया ईशशक्त्या प्रतिबद्ध्यते, तथा जीवपरमात्मनोरभेदेऽपि तयैवानुसन्धानप्रतिबद्धो भविष्यति । अपकृष्टदेशादिकमिव देहाद्युपाधयो निमित्ततामापत्स्यन्ते । तथा च अनुसन्धानाभावादैक्याभाव इत्यनुपपन्नम् । अनुसन्धानस्यैक्यव्यापकत्वं च असति प्रतिबन्ध इति कल्प्यत' इत्यत आह **सेति** ।

सेशताऽनुपपन्नैव यदि जीवैकताऽस्य हि ।

सा अघटितघटनारूपा । **अस्य** परमात्मनः । भवेदेतद्यदि भवन्मते परमात्मनोऽचिन्त्यशक्तिमत्तारूपेशता भवेत् (स्यात्) । जीवेनाभिन्नस्य **सेशतैवानुपपन्ना**, कुतस्तयाऽनुसन्धानप्रतिबन्धकल्पनादिकमिति । **हि**शब्देन 'यो जीवेनाभिन्नो नासावचिन्त्यशक्तिरूपेशतोपेतो यथा देवदत्त' इति व्याप्तिं सूचयति ।

वं०प०— तयैवेति । ईश्वरशक्त्यैवेत्यर्थः । ननु तर्ह्यनुसन्धानस्यैक्यव्यापकत्वं भग्नमिति चेत्तत्राह अनुसन्धानस्येति ॥

।। इति जीवेशैकतायां सेशताया एवानुपपन्नता ।।

* * *

।। अथ अनीशस्येशतायाः सर्वमानविरुद्धत्वम् ।।

७४ **सु०—** जीवेनैकीभूतोऽपि परमात्माऽस्त्वीशतोपेतः, किं विपक्षे बाधकमित्यत आह **अनीशस्येति** ।

अनु०— अनीशस्येशतेत्येव विरुद्धं सर्वमानतः ।

जीवस्तावदनीश इत्यनुभवसिद्धम् । तदभेदे परमात्माऽप्यनीश इत्युक्तमेव । तथा च **अनीशस्येशता**ऽस्त्विति शङ्कितं स्यात् । एतच्च सर्वप्रमाणैर्विरुद्धं स्वव्याहतं च । न चैवंविधमनुन्मत्तः शङ्कते । शङ्काया एवानुदये कुतो बाधकोपन्यासावसर इत्येवशब्दः(र्थः) ।

परि०— **स्वव्याहतमिति** । ईशत्वाङ्गीकारविरुद्धमित्यर्थः ।

वं०प०— **शङ्कया एवेति** । व्याघातावधिराशङ्केति वचनादित्यर्थः ।

शे०चं०— ननु मायाजीवेनाभिन्नस्य परमात्मन जीवत्वमस्त्वित्येव शङ्क्यते । न त्वनीशस्येशत्वमिति कथं सर्वमानविरोध इत्यत आह **जीवस्तावदिति** ।

।। इति अनीशस्येशतायाः सर्वमानविरुद्धत्वम् ।।

* * *

।। अथ श्रुतिर्यदीशत्वेन विज्ञातमनीशत्वेन तदन्यथा वाऽऽदिशेत्तर्हि सैवोपजीव्यविरोधेनाप्रमाणं भवेत् ।।

७५ **सु०**— स्यादेतत् । 'सेशताऽनुपपन्नैवेके'ति तर्कोऽनुमानं वा । नाद्यः, ऐक्यस्य श्रुतिसिद्धत्वेन विपर्ययपर्यवसानानुपपत्तेः । न द्वितीयः, जीवैकताया भवतामसिद्धत्वात्, यदिपदवैयर्थ्याच्चेति । मैवम् । यस्य जीवैक्यं सिद्धं (स्यात्) तस्यानीशताविषयस्वार्थानुमानापादनस्य अभिमतत्वात् । तर्कपक्षेऽपि न दोषः श्रुतीनामैक्यपरत्वाभावादित्याशयवानाह **ईशत्वेनैवेति** ।

अनु०— ईशत्वेनैव विज्ञातमनीशत्वेन चेच्छ्रुतिः ।
अनीशत्वेन विज्ञातमीशत्वेनाथ वाऽऽदिशेत् ।
उपजीव्यविरोधेन नैव मानत्वमेष्यति ।।

त्रैविध्यं खल्वत्र सम्भवति । काचित् **श्रुतिः** प्रमाणान्तरेण **ईशत्वेनैव विज्ञातं** परमात्मानमुद्दिश्य **अनीशत्वेन** प्रमितानीशत्वजीवभावेन **आदिशेत्** । काचिदनीशत्वेन प्रमितं जीवमुद्दिश्य **ईशत्वेन** प्रमितेशभावपरमात्मत्वेन उपदिशेत् । काचिदुभावपि तथा प्रमितावुद्दिश्यैक्यमुपदिशेदिति । सर्वथाऽप्युपजीव्यविरोधप्रसङ्गेन नैक्ये प्रामाण्यमभुत इति ।

यदत्र वक्तव्यं तत् 'कथं ब्रह्मेति तज्ज्ञेयमि'त्यादिना वक्ष्यते ।

'चेच्छ्रुतिरि'ति द्वितीयार्धेऽपि ग्राह्यम् । 'आदिशेदि'ति प्रथमार्धेऽपि । तृतीयः प्रकारोऽप्यध्याहार्यः । 'तर्ही'तिपदम् उपजीव्येत्यतःपूर्वम् ।

परि०— धर्मिस्वरूपमात्रोपजीवनात् नोपजीव्यविरोध इत्यत आह **यदत्रेति** । तथात्वे धर्मिस्वरूपज्ञानमशक्यमिति ज्ञानपादे वक्ष्यत इत्यर्थः ॥ **तृतीय इति** । उभावुद्दिश्यैक्यं चेच्छ्रुतिरुपदिशेदिति तृतीयः प्रकार इत्यर्थः ।

गु०दी०— **यस्य जीवैक्यं सिद्धमित्यत्र** यस्य मायावादिनः ।

यादु०— **ऐक्यस्येति** । आपादकरूपस्येत्यर्थः । ननु सर्वाऽपि श्रुतिर्जीवेश्वरगतासाधारणाकारं विना स्वरूपमात्रमुपजीव्य प्रवर्तते चेन्नोपजीव्यविरोध इत्यत आह **यदत्र वक्तव्यमिति** । स्वरूपमात्रस्य बुद्ध्यावनारोहाद् ब्रह्माहमस्मीत्यभिमतबोधायासाधारणाकारविशिष्टमेवोपजीव्यैक्यश्रुतिः प्रवर्तत इति वाच्यमिति ज्ञानपादे वक्ष्यत इत्यर्थः ।

वं०प०— **तर्क इति** । यदि परमात्मनो जीवैक्यं स्यात् तदा ईशत्वं न स्यादिति तर्क इत्यर्थः ॥ **अनुमानं वेति** । परमात्मा नेशतोपेतो जीवाभिन्नत्वात् । यो जीवेनाभिन्नो नासावीशतोपेतः । यथा स्वेनाभिन्नो देवदत्तो नेशतोपेत इत्यनुमानमित्यर्थः ॥ **भवतामिति** । तथा चान्यतरासिद्धिरिति भावः ॥ **यदीति** । तर्कत्वज्ञापकस्य यदिपदस्यानुमानत्वपक्षे वैयर्थ्यादित्यर्थः । **दोषो** विपर्ययापर्यवसानरूपः । **तथा** ईशत्वेनानीशत्वेन च । द्वितीयार्धेऽनीशत्वेन विज्ञातमीशत्वेन चेच्छ्रुतिरादिशेदित्यत्रेत्यर्थः ॥ **प्रथमार्ध इति** । अनीशत्वेन चेच्छ्रुतिरादिशेदित्यत्रेत्यर्थः ॥ **तृतीय इति** । ईशत्वानीशत्वोपेततया प्रमितावीशजीवौ अनूद्यैक्यमात्रं चेच्छ्रुतिरादिशेदिति तृतीयः पक्षोऽध्याहार्य इत्यर्थः । पूर्वं लिङ्गविपरिणामेनाध्याहार्यमित्यनुवर्तते ।

शे०चं०— (**तर्क इति** । यदि परमात्मनो जीवैक्यं स्यात्तदेशत्वं न स्यादिति तर्कः ॥ **अनुमानं वेति** । 'परमात्मा नेशतोपेतो जीवाभिन्नत्वाद्यो जीवेनाभिन्नो नासावीशतोपेतो यथा स्वेनाभिन्नो देवदत्तो नेशतोपेत' इत्यनुमानमित्यर्थः । **दोषो** विपर्ययापर्यवसानरूपः) ॥ **यस्येति** । यद्यपि तर्कपरतामेवाश्रित्य तत्रोक्तदोषः परिहर्तुं शक्यस्तथाऽपि 'अत एवेशतासिद्धेरि'त्युत्तरग्रन्थेऽनुमानपक्षस्याभ्युपेतत्वात्तदनुसारेणेदं समाधानमिति द्रष्टव्यम् । ऐक्यश्रुतिरुपजीव्यविरोधेन नैव मानत्वमेष्यतीत्येव वक्तव्ये ईशत्वेनैव विज्ञातमित्यादेराधिक्यादानर्थक्यमित्याशङ्क्यैक्यागमस्य अनेकविधत्वसूचनार्थत्वान्न तदिति भावेन तत्सूचितमनेकत्वं दर्शयति **त्रैविध्यं खल्विति** ॥ **काचिदिति** ।'क्षेत्रज्ञं चापि मां विद्धी'त्यादिकेत्यर्थः । **काचिदिति** । 'तत्त्वमसी'त्यादिकेत्यर्थः । **काचिदुभावपीति** । 'नेह नानाऽस्ती'त्यादिकेत्यर्थः । न च नेह नानेतिश्रुतौ चैतन्ये भेदो नास्तीत्येवोक्तेः कथं तत्रोभयोरुद्देश्यतेति वाच्यम् । उभयानुस्यूतचैतन्यस्यैव तत्रेहेतीदंशब्दार्थत्वश्रवणात्तदुपपत्तेरिति भावः । ननु जीवेश्वरगतेशत्वादिरूपविरुद्धाकारोपजीवनेन श्रुतेः ऐक्यबोधकत्वे भवेदुपजीव्यविरोधः । विरुद्धाकारपरित्यागेन स्वरूपमात्रमुपजीव्य तदभेदबोधकत्वाङ्गीकारे तु कथं श्रुतेरुपजीव्यविरोध इत्यत आह **यदत्रेति** । सर्वज्ञत्वादेर्ब्रह्मलक्षणत्वेन तदनुपादाने ब्रह्मणो बुद्ध्यावनारोहेण बोध्यस्य ब्रह्माहमस्मीति बोधानुदयप्रसङ्गात्तदर्थं सार्वज्ञ्यादि-

विशिष्टस्यैव उपजीवनेनैक्यबोधकतयाऽवश्यमनुसरणीयत्वादुपजीव्यविरोधोऽवर्जनीय इत्येतत्प्रमेयं ज्ञानपादे वक्ष्यत इत्यर्थः । **तृतीयः प्रकार इति** । उभावप्युद्दिश्यैक्यमात्रं बोधयतीति तृतीयः प्रकार इत्यर्थः ।

वा०र०— परिहर्तुं शक्य इति । तर्कपक्षेऽपीत्युत्तरग्रन्थानुसारेणेति शेषः । **समाधानमिति** । स्वार्थानुमानापादनपरत्वेन समाधानमित्यर्थः । **'क्षेत्रज्ञं चापि मां विद्धी'त्यादिकेत्यर्थ इति** । अत्र क्षेत्रज्ञं चापि मां विद्धीति वाक्यमादिर्यस्येत्यतद्गुणसंविज्ञानबहुव्रीहिणा 'तद्योऽहं सोऽसौ योऽसौ सोऽह'मित्यादि वाक्यं गृह्यते । लक्षणया वा तद्ग्रहणम् । लक्षणाप्रयोजनं च प्रकृते श्रुतेरेव ग्रहणेन 'क्षेत्रज्ञं चापि', 'अहं हरिः सर्व'मित्यादिस्मृतिगतिप्रतिपादनालाभप्रसङ्गशङ्कानिरासः । तावता हि क्षेत्रज्ञं चापीति ईश्वरमनूद्य तस्य जीवाभेदप्रतिपादकस्मृतेरपि तद्योऽहमिति श्रुतिसमानायाः उपजीव्यविरोधसूचनलाभात् । स्मृतिग्रहणस्य तत्त्वमसीत्येतत्समानविषय-'अहं हरिः सर्वमिदं जनार्दन' इत्यादिवाक्यस्यापि द्वितीयविधानत्वेनोक्तिलाभाच्च युक्तस्तच्छङ्कानिरासः । अत एव न्यायामृते क्षेत्रज्ञं चापि मां विद्धीत्येतद्वाक्यं अहंब्रह्मास्मीत्यादिश्रुत्यर्थे भगवत्परत्वेन व्याख्यातम् । जिज्ञासाधिकरणे सार्वज्ञादिगुणं जीवाद्भिन्नमित्यनुव्याख्यानसम्बन्धिमूले जीवमनूद्य तस्य ब्रह्मत्वं प्रतिपादयन्तीनां तत्त्वमस्यादिश्रुतीनामिति या ब्रह्मानुवादेन तस्य जीवैक्यं विदधाति तासां तद्योऽहं सोऽसौ योऽसौ सोहमित्यादीनामिति । एतेन जीवब्रह्मस्वरूपानुवादेन तदैक्यमात्रपराणां परेऽव्यये सर्व एकीभवन्तीत्यादिवाक्यानामित्यादि चोक्तावपि पृथगधिकरणीयमूले 'पौराणानि च वाक्यानी'त्यनुव्याख्यानानुसारेण तत्त्वमसीत्याद्यद्वैतश्रुतीनामहं हरिरित्यादिस्मृतीनां च का गतिरित्यादि तद्गुणसारत्वादित्येतत्प्रवृत्तिवर्णनावसरेऽभिहितमिति द्रष्टव्यम् ।

एतेनैतदपि निरस्तम् । क्षेत्रज्ञं चापि मामिति न तावच्छ्रुतिः । गीतावाक्यत्वात् । न च गीतावाक्यसमानाकारं शाखान्तरस्थं श्रुतिवाक्यमेवेति वाच्यम् । वेदे हि तत्तदृषिवाक्यान्येव । अहमादिपदान्यपि तत्तदृषिपराण्येव । प्राणो वा अहमस्म्यृष इत्यादौ तथात्वस्य सर्वसम्मतेः । सोऽकामयत बहु स्यां प्रजायेयेति इत्यादौ त्वन्यदीयोऽनुवाद एव । न तु भगवद्वाक्यम् । अन्यथा सः तदित्यादि अन्यदीयप्रयोगायोगात् इति । उक्तरीत्या लक्षणाश्रयणेन दोषाभावात् । शाखान्तरस्थत्वेऽपि न दोषः । लक्ष्मीसूक्ते 'अहं रुद्राय धनुरातनोमी'त्याद्यहमादिपदानां लक्ष्मीपरत्वस्यैव सत्त्वात् । 'अहं भुवं वसुनः पूर्व्यस्पतिरि'त्यादौ परःसहस्रावधिकाहमादिप्रयोगस्य भगवद्विषयत्वाङ्गीकाराच्च । अत एव 'यो मामेवमसम्मूढः किं मां निन्दन्ति शत्रवः' इति न स्थानतोऽपीत्येतदधिकरणीयानुव्याख्यानमूले 'अहं भुवमि'त्यादिप्रकरणगत'इदमेकमेको अस्मि निष्पाळभी'त्येतद्वाक्यं व्याख्याय एतद्भगवतो वाक्यमिति प्राक् प्रतिपादितम् । एवं 'अहं भूमिमददादर्यमाय । अहमनुरभवं सूर्यश्चे'त्यादि वाक्यगताहमादिपदानामन्तर्यामिविवक्षया वा तदेवप्रयुक्तत्वमित्यादि प्राणस्तथानुगमादित्यधिकरणादौ प्रकारान्तरं चोक्तमित्यलम् । अनुमानेन ह्यनुवादित्वपक्षे ईश्वरो बोद्धव्य इत्येतत्तत्त्वनिर्णयटीकायां ईश्वरं विषयीकृत्य वा तस्य जीवाभेदः 'क्षेत्रज्ञं चापि मां विद्धी'त्युक्तम् । तदेकवाक्यता कार्या । परग्रन्थे ....एतदुदाहरणमनुसृत्येदमित्युक्ते तु न कश्चिद्दोषः । अहं **ब्रह्मास्मीति** बोधेति । कथं ब्रह्मेत्युत्तरानुव्याख्यानव्याख्यावसरे

तत्त्वमस्यादिवाक्यमित्यादिपदेनाहं ब्रह्मास्मीत्यस्योपादानान्न दोषः । **ज्ञानपादे वक्ष्यत इत्यर्थ इति** । अनेन वक्ष्यत इति मूले ज्ञानपाद इति शेष इत्युक्तम् ।

स०व्र०— काचिदुभाविति । नेह नानेति श्रुतिरित्यर्थः । न च नेह नानेति श्रुतौ चैतन्येऽभेदो नास्तीत्यस्य प्रतीयमानत्वेन कथमुभयोरुद्देश्यतेति वाच्यम् । उभयानुस्यूतचैतन्यस्यैवेहशब्दार्थत्वेन गृहीतत्वादुभयोरुद्देश्यत्वोपपत्तिरिति भावः ।

।। इति श्रुतिर्यदीशत्वेन विज्ञातमनीशत्वेन तदन्यथा वाऽऽदिशेत्तर्हि सैवोपजीव्यविरोधेनाप्रमाणं भवेत् ।।

* * *

।। अथ ईशत्वशक्त्या उपजीव्यविरोधपरिहारशङ्का, जीवैक्यादेव तदभावापादनञ्च ।।

७६ **सु०— ननु परमात्मनोऽघटितघटनस्वरूपया शक्त्यैवेशतानीशतयोः (विरुद्धयोरपि) एकत्र समावेशो भविष्यति, तत्कथमुपजीव्यविरोध इत्यत आह अत एवेति ।**

अनु०— अत एवेशता(ऽ)सिद्धेर्न किञ्चिच्छक्यमस्य च ।

जीवैक्यादेवेत्यर्थः । **ईशता** उक्तरूपा शक्तिः । **किञ्चित्** ईशताऽनीशतयोरेकत्रावस्थानम् । **अस्य च** परमात्मनोऽपि । जीवैक्येनेशताऽभावानुमानमशक्यम्, ईशतायाः **'पराऽस्य शक्तिः'** इत्यादिश्रुतिसिद्धत्वात् ।

परि०— उक्तरूपेति । ननु परमात्मन इत्यादिनोक्तरूपेत्यर्थः ।

वं०प०— कुतोऽशक्यमिति चेत् श्रुतिबाधादित्याह **ईशताया इति** ।

शे०चं०— नन्वघटितघटनस्वरूपया शक्त्यैव विरुद्धयोरप्येकत्र समावेशे शङ्किते तन्निरासाय तादृशशक्त्यभाव एव वाच्यः । ईशतासिद्धिकथनस्य तु प्रकृते नोपयोग इत्यतः प्रकृतोपयोगितयेशतेत्यनूद्य व्याचष्टे **ईशतोक्तरूपा शक्तिरिति** ।

।। इति ईशत्वशक्त्या उपजीव्यविरोधपरिहारशङ्का, जीवैक्यादेव तदभावापादनञ्च ।।

* * *

।। अथ 'जीवैक्येऽपि भेदस्य विद्यमानत्वादीशतोपपत्ति'शङ्कापरिहारः, अघटितघटनकल्पनस्य सीमा, तदर्थस्य स्पष्टीकरणञ्च ।।

७७ सु०— किञ्च जीवैक्येऽपि भेदस्य विद्यमानत्वादीशतोपपद्यत इत्याशङ्कां परिहरन् तर्हि कियती सीमा परमात्मशक्त्याऽघटितघटनकल्पनस्येति मन्देन जिज्ञासिते सत्याह **ईशत्व इति** ।

अनु०— ईशत्वेऽनीशभेदेन श्रुत्या सम्यक् प्रकाशिते ।
अयुक्तमपि चान्यत्र युक्तं भवति तद्बलात् ।
अतोऽन्यत्रापि यद्दृष्टं तदीशेनैव कल्प्यते ।
श्रुत्याभासासमपि न हीशत्वपरिपन्थि यत् ।

अत्र **अनीशभेदेनाङ्गीकृतेनैव** ईशत्वं **श्रुत्या सम्यक् प्रकाशितं** भवतीति वदता श्रुतिविरोधः परिहृतः । तथा हि । यदि जीवपरमात्मैक्यं तात्त्विकं तदा निरवकाशानुमानविरुद्धा श्रुतिरुपचरितार्था भवन्ती नेशत्वं व्यवस्थापयेदिति सुस्थः स्वार्थानुमानप्रसङ्ग इति । **सम्यग्** अनीशभेदेन न तु भेदमात्रेणेति वा । तथा च भेदेनेशतोपपत्स्यत इति निरस्तम्, अनीशताहेतोः अभेदस्य विद्यमानत्वात् । किमभेदेनानीशताऽस्तु उत भेदेन मा भूदिति सन्देहानिवारणात् । **अन्यत्र** ईश्वरात् । **अयुक्तं** परस्परपरिहारेण वर्तमानमपि, **युक्तं भवति** ईश्वर इति शेषः । **तद्बलात्** ईशत्वबलात् । 'दृष्टमि'ति अत्रापि सम्बध्यते । **अतः** परमेश्वरात् । **ईशेनेति** भावप्रधानो निर्देशः । **कल्प्यते** युक्ततयेति शेषः । उक्तस्यापवादः **श्रुतीति** । आभासत्वं च वस्तुवृत्तापेक्षया । **हीति** तत्रोपपत्तिः ।

परि०— **मन्देनेति** । यावत्प्रमाणसिद्धं विरुद्धमिवोपलभ्यते तावदेवेति विमर्शकारिणः सुज्ञानत्वात् 'मन्देन' इत्युक्तम् । **निरवकाशानुमानेति** । 'सेशताऽनुपपन्नैव यदि जीवैकताऽस्य हि' इत्यादौ यस्य जीवैक्यं सिद्धं स्यात् तस्यानीशताविषयस्वार्थानुमानापादनस्येत्युक्तानुमानविरुद्धेत्यर्थः ।। **सम्यगनीशभेदेनेति** । अभेदं विना कृतभेदेनेत्यर्थः ।। **वस्तुवृत्तेति** । सा श्रुतिः प्रतीयमानेऽर्थे आभासभूतैवेति तथोक्तमित्यर्थः ।

यादु०— मन्देनेति । पूर्वग्रन्थपर्यालोचनया यावत्प्रमाणसिद्धं विरुद्धमिव दृश्यतेऽथ च कल्पकेशत्वाविरोधि तावदेवाघटितघटकेश्वरशक्त्या कल्पनीयमिति सुज्ञेन ज्ञातुं शक्यमिति भावः । **सुस्थ इति** । श्रुतिविरोधाभावादिति भावः ॥ **सम्यगनीशेति** । अत्यन्तमनीशभेदेनेत्यर्थः ॥ **वस्तुवृत्तेति** । यद्यपि श्रुत्या आपाततः प्रतीतमपीत्येवात्र वक्तव्यम् । तथाऽपि सा श्रुतिः प्रतीयमानेऽर्थे वस्तुतोऽऽभासभूतेति प्रदर्शनाय आभासत्वमुक्तमित्यर्थः ।

वं०प०— अप्रयोजकतां चाह **किञ्चेति** । प्रामाणिकं यावदघटितं तदेवेश्वरशक्त्या घटनायुक्तं भवतीति बुद्धिमतां ज्ञातुं शक्यत इत्यतो मन्देनेत्युक्तम् । **इति वदता** अनीशजीवभेदप्रतिपादनपूर्वकमीशत्वं भगवतः पराऽस्येति श्रुतिः प्रतिपादयतीति वदतेत्यर्थः । **श्रुतिविरोधः** अनुमानस्य पराऽस्येत्यादिश्रुतिविरोधः । **निरवकाशानुमानं** तात्त्विकाभेदसाधकत्वेन प्रबलमभेदानुमानम् । **श्रुतिः** जीवभेदपूर्वकं भगवत ईशत्वप्रतिपादिका । **व्यवस्थापयेत्** इत्यनन्तरं यदा भेदपूर्वकमेव सम्यगीशत्वं श्रुतिः प्रकाशयतीत्युक्तं तदाऽस्माकं 'पराऽस्य शक्तिरि'ति श्रुतिविरोधाभावेन जीवैक्येनेशताभावविषयस्वार्थानुमानं तवैव स्यादिति सेशताऽनुपपन्नेत्युक्तं युक्तमिति भावः । किञ्चेत्युक्ताप्रयोजकतापरिहारायाह **सम्यगिति** । तथा च अनीशादत्यन्तभेदेनैवेत्यर्थः । **भेदमात्रेण** अभेदसहितेन । तथाच इत्यनन्तरं जीवैक्येऽपीति पूरणीयम् । कुत इत्यत आह **अनीशतेति** । ततोऽपि किमित्यत आह **किमभेदेनेति** । **अत्रापीति** । तथाच अन्यत्रायुक्तं दृष्टमयुक्ततया परस्परपरिहारेण वर्तमानतया दृष्टमपि चेदीश्वरे प्रमाणेन प्रमितं तर्हि युक्तं भवति इति तद्बलादित्यर्थः । **उक्तस्येति** । अन्यत्रायुक्तत्वेन दृष्टं श्रुतिप्रमाणप्रमितं चेदङ्गीकार्यमित्युक्तस्येत्यर्थः । **वस्तुवृत्तेति** । वास्तवार्थापेक्षयेत्यर्थः ।

श०चं०— मन्देनेति । पूर्वग्रन्थपर्यालोचनया यावत्प्रमाणसिद्धं विरुद्धमिव दृश्यते अथ च कल्पकेशत्वाविरोधि तावदेवाघटितघटकेश्वरशक्त्या कल्पनीयमिति सुज्ञेन ज्ञातुं शक्यत्वान्मन्देनेत्युक्तमिति भावः ॥ **निरवकाशानुमानविरुद्धेति** । जीवैक्यहेतुकानीशत्वानुमानविरुद्धेत्यर्थः ॥ **सुस्थ इति** । 'पराऽस्य शक्तिर्विविधैव श्रूयत' इति श्रुतिविरोधाभावादिति भावः । किञ्चेत्युक्तदोषपरिहारायोपयोगितया सम्यगनीशभेदेनेत्यप्यन्वयमङ्गीकृत्य तत्तात्पर्यमाह **सम्यगनीशभेदेनेति** । तर्हि परमेश्वरादन्यत्र परस्परपरिहारेण वर्तमानमप्रमितमपीश्वरे युक्तं स्यादित्यतिप्रसङ्गपरिहारायाह **दृष्टमित्यत्रापीति** । अनेन परमेश्वरादन्यत्रायुक्तमपि दृष्टं परमेश्वरे युक्तं भवतीति योजना सूचिता भवति । यथाश्रुतसम्बन्धोऽप्यस्तीत्यभिप्रायेणापिपदम् ॥ **अतः परमेश्वरादिति** । क्वचित्परस्परपरिहारेण वर्तमानमप्यतः परमेश्वरादन्यत्रार्जुनादावपि यद्दृष्टम् अंश्यनभिमतकरणादिकं तदपीशेनेशत्वेनैव युक्ततया कल्प्यत इति मूलयोजना सूचिता भवति ॥ अतोऽन्यत्रापीति पूर्वग्रन्थाविरोधायाह **उक्तस्यापवाद इति** । (अन्यत्रायुक्तत्वेन दृष्टं श्रुतिप्रमाणप्रमितं चेदङ्गीकार्यमित्युक्तस्येत्यर्थः) । नन्वत्र श्रुत्याऽऽपाततः प्राप्तमित्येव वक्तव्यत्वात्तदाभासत्वकथनमधिकत्वादनर्थकमित्यतः श्रुतेरापातप्रतिपन्नेऽर्थे वस्तुत आभासत्वमिति वस्तुस्थितिप्रदर्शनार्थं तदाभासत्वकथनमित्याह **आभासत्वमिति** ॥ **तत्रोपपत्तिरिति** । श्रुत्याऽऽपाततः प्रतिपन्नस्येशत्वेन युक्ततयाऽकल्पनीयत्वे कल्पकविघातकत्वरूपा युक्तिर्हिशब्देनोच्यत इत्यर्थः ।

वा०र०— अयुक्तमपि दृष्टमिति । अत्र च दृष्टत्वं प्रमाणसिद्धत्वम् । तथैवोत्तरत्र मूले वक्ष्यमाणत्वादित्यतो न प्रत्यक्षसिद्धत्वार्थकत्वमाश्रित्य तदनुपपत्तिशङ्कावकाशः । अनेन क्वचित्परस्परेति पाठः । क्वचित्परस्परपरिहारेणेत्येव पाठेऽपि अनेनेति पूर्वग्रन्थानुसाराद्ध्याहार्यमनेनेति पदम् । अनुवर्तते तदित्यप्याहुः । **श्रुत्या आपातत इति** । ईशत्वेन युक्तत्वादिन्द्रार्जुनादौ दृष्टम् अंशयनभिमतकरणादिकमिव श्रुत्या आपाततः प्रतिपन्नमपीशत्वेन युक्तत्वान्न स्वीकार्यमित्यर्थः । **कल्पकेति** । ईशत्वरूपेत्यर्थः । अभेदादिरूपस्य श्रुत्याभासप्राप्तस्याङ्गीकारे अनीशाभेदेनेशत्वाभावप्राप्तेरिति भावः ।

* * *

७८ सु०— अयमर्थः । यत्किंचिद्विरुद्धमिव प्रतीयमानमपीश्वरे तदितरत्र वा प्रमाणसिद्धमीश्वरैश्वर्यविरोधि च न भवति, यथाऽणुत्वमहत्त्वयौगपद्यादि, यथा वाऽर्जुनादीनामशेषानुसन्धानाभावः, तत्सर्वमीश्वरैश्वर्यबलेन घटत इत्यङ्गीकार्यम्, न तु निराकार्यम् । यत्पुनरप्रमितं तदीश्वरैश्वर्याविरुद्धमपि न कल्पनीयम्, शशविषाणादिकल्पनापत्तेः । यच्च प्रमितमपि ईश्वरैश्वर्यविरोधि तन्न कल्पनीयमेव । कल्पकविघातकत्वात्, किन्तु तस्य प्रमाणस्य यथायोगमाभासत्वं वर्णनीयम्, यथा प्रकृतमिति ।

परि०— स्फुटमप्रतीतेराह **अयमर्थ इति** । 'हि'शब्दसूचितयुक्तिमाह **कल्पकेति** । ईशत्वरूपकल्पकविघातकत्वादित्यर्थः ॥ **यथायोगमिति** । श्रुतेः प्रतीतार्थत्यागरूपमन्यस्याप्रामाण्यरूपमित्यर्थः ॥ **प्रकृतमिति** । समुदायैक्यपरत्वेनोदाहृतम् 'एकीभवन्ती'त्यादिकमित्यर्थः ॥ अत्र मूले श्रुतिपदमुपलक्षणमित्युपेत्य पूर्ववाक्ये 'तस्य प्रमाणस्ये'त्युक्तमिति भावः ।

यादु०— 'अतोऽन्यत्रापि यद्दृष्टमि'त्यस्योदाहरणमाह **यथा वेति** ॥ **प्रतीतमपीति** । प्रमाणेनापाततो विषयीकृतमपीत्यर्थः । अनेन मूले श्रुतिपदं प्रमाणमात्रोपलक्षकमिति सूचितमिति ज्ञातव्यम् । हिशब्दसूचितामुपपत्तिं दर्शयति **कल्पकेति । यथायोगमिति** । श्रुतिश्चेत्प्रतीतार्थ एवाभासत्वमन्यच्चेत्सर्वथैवाभासत्वं वर्णनीयमित्यर्थः ।

वं०प०— ईशत्वपरिपन्थीत्यस्य भावमाह **कल्पकेति** । ईशत्वेत्यर्थः ॥ **यथा प्रकृतमिति** । तत्त्वमसीति श्रुत्याभासप्रतीतमपि जीवैक्यमीशत्वविरोधित्वान्नाङ्गीकार्यमित्यर्थः ।

शे०चं०— एतावताऽपि परमेश्वरशक्त्यघटितघटकत्वकल्पनस्य कियती सीमोक्तेति न ज्ञायत इत्यत आह **अयमर्थ इति** ॥ **प्रमाणसिद्धमिति** । अनेन मूले दृष्टपदं प्रमितमात्रपरं न तु प्रत्यक्षदृष्टपरमित्युक्तं भवति ॥ 'अयुक्तमपि चान्यत्र युक्तं भवती'त्यस्य उदाहरणं **यथेति** । 'अतोऽन्यत्रापि यद्दृष्टमि'त्यस्योदाहरणं

यथा वेति । ननु प्रमाणसिद्धत्वेश्वरैश्वर्याविरोधित्वयोरन्यतरदेवास्तु तत्र प्रयोजकं, किमुभयप्रयोजकत्वकल्पनयेत्यतः प्रमितत्वस्यावश्यकतां तदनभ्युपगमेऽतिप्रसङ्गकथनेनोपदर्शयति **यत्पुनरिति** । ईश्वरैश्वर्याद्यविरोधित्वस्यापि तामुपदर्शयति **यच्चेति** ॥ **प्रमितमपीति** । प्रमाणेनापाततः प्रतिपन्नमपीत्यर्थः । अनेन मूले श्रुतिपदं प्रमाणमात्रपरमित्युक्तं भवति ॥ **यथायोगमिति** । श्रुतेः प्रतीतार्थ एवाभासत्वम् । न तु सर्वथा । अन्यस्य तु सर्वथेत्येवं यथायोगमित्यर्थः ॥ **यथा प्रकृतमिति** । यथा जीवेश्वरैक्यमित्यर्थः । (तत्त्वमसीति श्रुत्याऽऽभासप्रतीतमपि जीवैक्यमीशत्वविरोधित्वान्नाङ्गीकार्यमित्यर्थः) । इतिशब्दस्येत्ययमर्थ इति पूर्वेणान्वयः ।

स०व्र०— प्रमाणप्रमितमिति । श्रुतिप्रतीतमित्यर्थः ॥ **यथायोगमिति** । श्रुतिरूपत्वे तदर्थप्रच्यावनमात्रं, श्रुत्यतिरिक्तत्वे सर्वथाप्रामाण्यमित्येवं यथायोगमित्यर्थः ।

॥ इति 'जीवैक्येऽपि भेदस्य विद्यमानत्वादीशतोपपत्ति'शङ्कापरिहारः, अघटितघटनकल्पनस्य सीमा, तदर्थस्य स्पष्टीकरणञ्च ॥

* * *

॥ अथ 'अनीशस्येशतेत्येव विरुद्धं सर्वमानतः'इत्युक्त्युपपादनम् ॥

७९ **सु०—** 'अनीशस्येशतेत्येव विरुद्धं सर्वमानतः' इत्युक्तम्, तदुपपादयितुं स्मृतिमेत्र पठति **ईश इति** ।

अनु०— ईशोऽनीशो जगन्मिथ्या दुःखी मुक्तो भिदा न हि ।
इति प्रतिज्ञाव्याघातः सर्वदोषाधिकाधिकः ।
इति हि ब्रह्मतर्कोक्तिः

द्विविधो हि प्रतिज्ञाविरोधः, प्रमाणस्ववाक्यविरोधभेदात् । तत्र **'ईशोऽनीशो', 'दुःखी मुक्त'** इति स्ववाक्यविरोधस्योदाहरणद्वयम् । **'जगन्मिथ्या', 'भिदा न ही'**ति प्रमाणविरोधस्य ।

यद्वा 'ईशोऽनीशो', 'दुःखी मुक्त' इति स्ववाक्यविरोधोदाहरणे । 'जगन्मिथ्ये'ति स्वन्यायविरोधस्य, जगतो मिथ्यात्वे तन्न्यायेन मिथ्यात्वस्यापि मिथ्यात्वापत्त्या सत्यत्वप्रसङ्गात् । 'भिदा न ही'ति स्वक्रियाविरोधस्य, अनया हि प्रतिज्ञाक्रियया साध्यधर्मधर्मिणोर्भेदस्तावत् प्राप्यत इति । **सर्वदोषेष्वधिकाधिको**ऽत्यन्ताधिकः ।

स्मृत्युदाहरणस्य साध्यमाह **अतिहेयमिति** ।

अतिहेयमतोऽखिलैः ।
बुभूषुभिर्मतमिदं जीवेशाभेदवादिनः ।

इदम् ईशस्य अनीशत्वम् ।

वं०प०— मुक्तो दुःखान्मुक्तः ॥ **स्ववाक्यगतेति** । स्ववाक्यविरोधोऽपसिद्धान्तजातिभेदेन द्विविधः । जातिश्च स्ववचनस्वक्रियास्वन्यायविरोधभेदेन त्रिविधा । तथा च ईशोऽनीशो दुखी मुक्त इति द्वयं स्ववाक्यगतो यो विरोधः स्ववचनविरोधस्तस्योदाहरणमित्यर्थः ।

शे०चं०— ईशोऽनीश इत्याद्यनेकोदाहरणेन सूचितमर्थमाह **द्विविध इति** ॥ **यद्वेति** । ईशोऽनीश इति स्ववाक्यविरोधोदाहरणम् । दुःखी मुक्त इति मानविरोधोदाहरणमित्यर्थः । स्वन्यायविरोधमुपदर्शयति **जगदिति** । स्वक्रियाविरोधमुपपादयति **अनया हीति** ।

स०व्र०— स्ववाक्यविरोधस्येति । यद्यपीशस्यानीशत्वं सर्वप्रमाणविरुद्धं तथापीशानीशपदयोर्विरोधस्य प्रथममेव स्फुरणात् स्ववाक्यविरुद्धमित्यर्थः । **यद्वेति** । पूर्वं जगन्मिथ्येत्यस्य प्रमाणविरुद्धत्वमङ्गीकृतम् । आद्ययोस्तु स्ववाक्यविरुद्धत्वम् । इदानीं तु त्रयमपि स्ववाक्यविरोधस्यैवोदाहरणमिति भेदः । (जगन्मिथ्येति स्वन्यायविरोधस्य, भिदा न हीति स्वक्रियाविरोधस्येति भेदः ।)

॥ इति 'अनीशस्येशतेत्येव विरुद्धं सर्वमानतः' इत्युक्त्युपपादनम् ॥

* * *

॥ अथ 'ईशत्वेऽनीशभेदेन' इत्यादिनोक्तार्थसमर्थनम् ॥

८० **सु०—** ईशत्वेनीशभेदेन इत्यादिनोक्तेऽर्थे स्मृतिमप्याह **नायुक्तमिति** ।

अनु०— नायुक्तमीशितुः किञ्चिदीशत्वस्याविरोधि यत् ।
यदीशत्वविरोधि स्यात्तदेवायुक्तमञ्जसा ।
ईशत्वस्याविरोधेन योजयित्वाऽखिलाः प्रमाः ।

सिद्धेशत्वेन चायुक्तमपि हीशेन योजयेत् ।
मानतः प्राप्तमखिलं नामानं योजयेत् क्वचित् ।
इति हि ब्रह्मतर्कोक्तिः

यस्मान्नायुक्तमीशितुः किञ्चिदित्यादि तस्मादीशत्वस्याविरोधेनेत्यादि । सिद्ध-मीशत्वं यस्यासौ तथोक्तः, तेनेशेन संयोजयेत् ईश्वरेऽस्तीति जानीयात् । **अपिपदादन्येनापि ॥ सिद्धेन ईशत्वेन निमित्तेनेति वा ।**

परि०— कर्मधारयमाश्रित्याह **अन्येनापीति** । अखिलप्रमाणानां ईशत्वाविरोधेन योजनया सिद्धेनेशत्वेनेति, वा प्रमाणान्तरेणापि सिद्धेनेति वेत्यर्थः ।

गु०दी०— **यस्मान्नायुक्तमीशितुः** । **किञ्चिदित्यादी**त्यत्र यस्मान्नायुक्तमीशितुः किञ्चिदित्यादि-सिद्धम्, तस्मादीशित्वस्याविरोधेनेत्यादिकमङ्गीकार्यमित्यर्थः ।

यादु०— **अन्येनापीति** । अन्यस्मिन्नप्यस्तीति जानीयादित्यर्थः ॥ ३-२-१० ॥

वं०प०— **अपिपदादिति** । अयुक्तमपीशसामर्थ्येनान्येनापि योजयेदन्यस्मिन्नप्यस्तीति जानीयात् । यथाऽर्जुनादाववश्यानभिमतकरणादिरूपम् ॥ ३-२-१० ॥

शे०चं०— सिद्धेशत्वेनेत्यस्य ईशेनेत्यनेन सामानाधिकरण्यानुपपत्तेस्तदुपपत्त्यर्थमाह **सिद्धमिति** ॥ **अन्येनापीति** । अन्येन संयोजयेदन्यस्मिन्नस्तीति जानीयादित्यर्थः । अन्यपदार्थप्राधान्येन बहुव्रीहेर्जघन्यत्वान्न सति गत्यन्तरे तदाश्रयणमुचितमित्याशयेन पक्षान्तरमाह **सिद्धेनेति** । अनेन सिद्धं च तदीशत्वं चेति समानाधि-करणसमास इत्युक्तं भवति । तृतीयार्थकथनं **निमित्तेति** । अधिकरणार्थमुपसंहरति **तस्मादिति** ॥ ३-२-१० ॥

॥ इति 'ईशत्वेऽनीशभेदेन' इत्यादिनोक्तार्थसमर्थनम् ॥

* * *

॥ अथ अधिकरणार्थोपसंहारः ॥

८१ सु०— स्मृत्युदाहरणस्य प्रयोजनमाह अत इति ।

अनु०— अतो युक्तमिहोदितम् ॥

तस्मादत्यन्तभिन्न एव ब्रह्मणा जीव इति स्थितम् ॥ ३-२-१० ॥

॥ इति अधिकरणार्थोपसंहारः ॥

॥ इति उपमाधिकरणम् ॥

॥ ३-२-१०-१८ ॥

★ ★ ★

॥ अथ अरूपाधिकरणम् ॥

॥ ३-२-९-१४ तः१७ ॥

॥ अथ 'भाष्यप्रतीतार्थेऽनुपपत्ति'शङ्कापरिहारकतयैतदधिकरणीयचतुःसूत्र्यास्तात्पर्यं सप्रयोजनम् ॥
॥ अथ तत्र स देवोऽप्राकृतरूपत्वादरूपः, तस्य रूपश्च शिरःपाणिपादाद्यात्मकं स्वगुणात्मकम्,
अतः स रूपवाँश्च, अतश्च तस्य नानित्यता, नापि सौन्दर्याद्यभावः,
न च श्रुतिद्वयविरोधिता, ततश्च भक्तिरुपपन्नेति ॥

ब्र०सू०— ॐ अरूपवदेव हि तत्प्रधानत्वात् ॐ ॥

८२ सु०— "अत्राधिकरणे 'प्रथमसूत्रेण ब्रह्मणो रूपराहित्यमुपपाद्य प्रकाशवच्चावैयर्थ्यमि'ति (द्वितीय)सूत्रेण रूपवत्त्वविषयाणां श्रुतीनां वैयर्थ्यमाशङ्क्य विलक्षणरूपवत्त्वाङ्गीकारेण परिहृतम्; विलक्षणरूपवत्त्वं च, **'आह च तन्मात्रं'**, **'दर्शयति चाथोऽपि स्मर्यत'** इति सूत्रद्वयेन समर्थितमि'ति भाष्येण प्रतीयते । तदनुपपन्नम् । अन्ततो रूपवत्त्वाङ्गीकारे 'अरूपवदेव हि तदि'त्यस्यावक्तव्यत्वापातात्, प्रयोजनाभावाच्चास्य विचारस्य" इत्यतः चतुःसूत्र्याः तात्पर्यमाह **स चेति** ।

अनु०— स चाप्राकृतरूपत्वादरूपः स्वगुणात्मकम् ।
रूपमस्य शिरःपाणिपादाद्यात्मकमिष्यते ।

स परमात्मा । 'प्रकृति'शब्दोऽन्येषामपि तत्त्वानामुपलक्षकः । **अप्राकृतरूपत्वात्** प्राकृतरूपरहितत्वात् । 'गुणात्मकमि'त्युक्ते सत्त्वादीनां प्रतीतिः स्यात्, तन्निरासार्थं **स्व**शब्दः, ये परमात्मनः स्वरूपभूता गुणा आनन्दाद्यास्तदात्मकमिति । **'रूप'**शब्देन च शुक्लादिगुणप्रतीतिः स्यात्, अतः **शिरःपाणी**ति विवरणं कृतम्, अतो रूपवांश्चे'ति शेषः ।

विचारप्रयोजनं दर्शयति **अत** इति ।

अतो नानित्यता नैव श्रुतिद्वयविरोधिता ।

अनित्यता जन्ममरणवत्ता । 'नापि सौन्दर्याद्यभाव' इति च द्रष्टव्यम् । तथा च तस्मिन् भक्तिरुपपन्नेति शेषः ।

परि०— **रूपराहित्यमिति** । देहराहित्यमित्यर्थः ॥ सूत्राणामर्थः *तन्त्रदीपिकायां* व्यक्तः । भौतिकदेहवत्त्वमस्तीति प्रतीतिनिरासायाह **प्रकृतिशब्दोऽन्येषामिति** । अप्राकृतेत्यत्रत्यप्रकृतिशब्द इत्यर्थः । नञ्व्यत्यासेन अर्थमाह **प्राकृतेति** । स्वशब्दकृत्यमाह **गुणेति** ॥

गु०दी०— **रूपशब्देन च शुक्लादिगुणप्रतीतिः स्यादित्यत्र** शुक्लभास्वररूपवत्त्वस्य 'रूपोपन्यासाच्च' इति सूत्रेणैवोक्तत्वात् अत्रापि पुनः कथने पौनरुक्त्यमिति भावः । न ब्रह्मादीनामानन्दस्य तारतम्यमुपपद्यत इति आनन्दतारतम्यनिषेधस्य प्रसक्तिपूर्वकत्वात् 'वृद्धिह्रासभाक्त्वमि'ति तत्प्रसञ्जकमिदं विषयोपस्थापकमित्युच्यते ॥ ॥ ३ । २ । ९, १० ॥

यादु०— प्रकृत्यन्यतत्त्वात्मकरूपप्रसक्तिवारणायाह **प्रकृतिशब्द इति** । प्राकृतशब्दान्तर्गतः प्रकृतिशब्द इत्यर्थः । रूपवत्त्वादरूप इति व्याहतम्, अत आह **प्राकृतरूपेति** ।

वं०प०— अरूपित्ववचनस्य गतिकथनार्थं प्राकृतरूपशून्यत्वादिति वाच्यम् । अप्राकृतरूपत्वादिति कथमुक्तम् । न ह्यप्राकृतरूपवत्त्वमरूपित्ववचनार्थ इत्यत आह **प्राकृतरूपरहितत्वादिति** ॥

शे०चं०— प्रकृतिशब्दस्य सत्त्वरजस्तमोरूपाव्यक्ततत्त्वपरत्वान्मूलेऽप्राकृतरूपत्वोक्त्याऽव्यक्ततत्त्वात्मकत्वालाभेऽपि तदन्यतत्त्वात्मकत्वाभावानुक्तेस्तदात्मकत्वप्राप्तिमाशङ्क्य प्रकृतिपदस्यात्र लक्षणया तत्त्वमात्रपरत्वेनाव्यक्ततत्त्वमात्रपरत्वाभावान्न तत्प्राप्तिरिति भावेन प्रकृतिशब्दं तदुपलक्षणतया व्याचष्टे **प्रकृतिशब्द इति** । प्राकृतशब्दान्तर्गतः प्रकृतिशब्द इत्यर्थः । एतच्च 'अव्यक्ताद्याः पृथिव्यन्ताः सर्वाः प्रकृतयः स्मृताः' इत्यादिप्रमाणमनाश्रित्य द्रष्टव्यम् । तदाश्रयणे तु मुख्यवृत्त्यैव प्रकृतिशब्देन तत्त्वमात्रलाभाल्लक्षणाश्रयणानर्थक्यमिति केचित् । वस्तुतो निरवकाशैतद्ग्रन्थानुरोधेन प्रकृतिशब्दस्य मुख्यामुख्यवृत्तिसाधारण्येन तत्त्वमात्रपरताया एवैतत्प्रमाणार्थत्वान्नानुपपत्तिरिति द्रष्टव्यम् । अप्राकृतरूपवत्त्वस्य रूपवत्त्वव्यवहारनिमित्तत्वेऽप्यरूपवत्त्वव्यवहारनिमित्तत्वाभावात्प्राकृतरूपराहित्यस्यैव च तन्निमित्तत्वात्तदेवेह भाष्ये हेतुतया वक्तव्यम् । अप्राकृतरूपवत्त्वोक्तिस्तु कथं युज्यत इत्यतः प्राकृतरूपराहित्यार्थतया हेत्वंशं व्याचष्टे **अप्राकृतेति** । मूले स्वशब्दस्यानर्थक्यमाशङ्क्य परिहरति **गुणेति** । कथमनेनोक्तप्रतीतिनिरास इत्यतस्तदुपयोगितया व्याचष्टे **यत इति** । अनेन कर्मधारयषष्ठीतत्पुरुषौ द्वावपि तन्त्रेणोपात्तावित्युक्तं भवति । मूले साध्यानुक्तेर्न्यूनतामाशङ्क्योत्तरवाक्यस्थस्यात इत्यस्यात्राप्यनुकर्षमभिप्रेत्य ततःपरमपेक्षितं शेषमाह **अत इति** । देहवतोऽपि जीवस्यानित्यत्वाभावे तेन तदप्रस-

त्त्योक्तविधदेहत्वादनित्यत्वाभावसाधनमप्रयोजकमित्यत आह **अनित्यतेति** । अरूपत्वरूपवत्त्वविचारप्रयोजनप्रदर्शनार्थं प्रवृत्तेऽत्र वाक्ये नानित्यतेत्यरूपत्वप्रयोजनोक्तिवद्रूपवत्त्वप्रयोजनस्याप्यवश्यं वक्तव्यत्वात्तदनुक्तिरयुक्तेत्याशङ्क्य नानित्यतेत्यस्या अरूपत्वप्रयोजनोक्तेरेवात्र वाक्ये लक्षणया रूपवत्त्वप्रयोजनसमर्पकत्वान्न तदनुक्तिरपीत्याशयेन तत्प्रयोजनं दर्शयति **नापीति** । आदिपदेन सालक्षण्यादिपरिग्रहः । अनित्यत्वाद्यभावोऽपि न विचारस्य मुख्यं प्रयोजनं किन्त्ववान्तरमेवेति भावेनानित्यत्वाद्यभावसमर्थनस्यापि प्रयोजनमाह **तथा चेति** ।

वा०२०— प्रयोजनाभावाच्चेति मूलम् । रूपस्य भक्तावुपयोगाप्रतीतेरिति भावः । वक्ष्यति च 'तथा च तस्मिन् भक्तिरुपपन्नेती'ति । **अप्राकृतरूपवत्त्वस्येति** । अप्राकृतं यद्रूपं तद्वत्वस्येत्यर्थं विवक्षित्वा शङ्क्येयम्। निमित्तत्वेऽपीत्यनेन तस्य च स्वगुणेत्यनेन लाभात् पुनरभिधानवैयर्थ्यम् । अज्ञेयत्वव्यवहारनिमित्तानुक्तिश्च भवतीति सूचितम् । **अरूपवत्त्वव्यवहारेति** । ततश्च विरुद्धत्वमिति भावः । **कर्मधारयषष्ठीतत्पुरुषाविति** । स्वरूपभूतावित्यस्य लाभार्थं स्वे च ते गुणाश्चेति कर्मधारयः । परमात्मसम्बन्धित्वलाभाय स्वस्य गुणा इति षष्ठीतत्पुरुषश्चेत्यर्थः । **रूपवत्त्वविचारेति** । स्वगुणात्मकमित्यादिना तदुपपादनादिति भावः । अत्राधिकरणे परमात्मनो विलक्षणशरीरवत्वात् सशरीरत्वं प्राकृतशरीरराहित्याच्छरीरराहित्यं च युज्यत इति प्रतिपाद्यम् । रूपशब्देन च शुक्लादिगुणप्रतीतिः स्यात् अतः शिरःपाणीति विवरणं कृतमिति मूलानुसारेणात्राधिकरणे रूपशब्देन शरीरविवक्षायाः स्पष्टत्वात् । जैनाधिकरणे तु आत्मनः स्वप्रभवत्वनिराकरणावसरे आत्मनः प्रभवत्वे प्रदीपादिवद्रूपस्पर्शापत्तावुक्तायां तत एवानित्यत्वे चापादिते प्राप्ता या आशङ्का, आत्मनोऽप्यस्ति रूपादिमत्त्वं स्वमते, यद्रूपादिमत् तदनित्यमिति व्याप्तिश्च, रूपादिमत्त्वाच्च विपर्यय इत्युक्तत्वादिति, तत्परिहारतया 'भौतिकं त्वेव रूपादि व्याप्तं नाशेन नो मत' इत्यनुव्याख्यानमवतार्य रूपादिमात्रमनित्यत्वव्याप्तं न, किन्तु भौतिकमेव तदिति सङ्कोचो व्याख्यातः । ततश्च रूपवत्त्वमस्य नास्तीति प्रतिपादनात् तन्न्यायेनेशस्यापि तादृशं रूपादीति सिद्धम्। अत एव वैशेषिकाधिकरणे रूपादीति सूत्रव्याख्यानदशायां रूपादिमत्त्वस्येश्वरे व्यभिचारमाशङ्क्य 'भौतिकत्वेन तद्विशेषणात् यद्वक्ष्यति भौतिकं त्वेवंरूपादी'त्याद्युक्तम् । तथा च तत्र रूपपदेन गुणग्रहणमिति सिद्धेरेतदधिकरणपूर्वाधिकरणयोः प्रमेयविशेषोऽतो न जैनाधिकरणैतदधिकरणयोरैक्यवैयर्थ्यम् । **शुक्लादिगुणेति** । गुणभूतशुक्लनीलपीतादिलक्षणरूपावान्तरभेदप्रतीतिः स्यादिति योजना ।

।। इति स देवोऽप्राकृतरूपत्वादरूपः, तस्य रूपश्च शिरःपाणिपादाद्यात्मकं स्वगुणात्मकम्,
अतः स रूपवाँश्च, अतश्च तस्य नानित्यता, नापि सौन्दर्याद्यभावः,
न च श्रुतिद्वयविरोधिता, ततश्च भक्तिरुपपन्नेति ।।

।। इति 'भाष्यप्रतीतार्थेऽनुपपत्ति'शङ्कापरिहारकतयैतदधिकरणीयचतुःसूत्र्यास्तात्पर्यं सप्रयोजनम् ।।

* * *

।। अथ 'प्रकाशवत्'इतिसूत्रावयवस्य भाष्योक्तान्यार्थपरतया 'लोकविलक्षणरूपवत्त्वाद्रूपवत्त्वश्रुतिवैयर्थ्य'परिहारः ।।
।। अथ तत्र यथा तैजससौरादिलोकरूपप्रसिद्धप्रकाशाभावेऽपि श्रुतिर्जीवस्येशं प्रकाशमाह तथा लोकविलक्षणेऽपि भगवद्रूपे रूपशब्दप्रवृत्तिर्युक्ता, अत्रोपपत्तेर्वक्ष्यमाणत्वञ्च ।।

८३ **सु०**— यद्यस्ति परमात्मनो रूपं कथं तर्हि तस्य प्रसिद्धवैलक्षण्यमात्रेणारूपत्वव्यवहार इत्याशङ्कापरिहारार्थत्वेन 'प्रकाशवदि'ति सूत्रावयवो भाष्ये व्याख्यातः । इदानीं 'यदीश्वररूपं लोकविलक्षणं तदा तत्र रूपशब्द(प्र)वृत्तिर्दुर्घटा स्यात्, सम्बन्धग्रहणानुपपत्तेः, तथा च रूपवत्त्वश्रुतीनां वैयर्थ्यं दुष्परिहरमि'त्याशङ्कापरिहारार्थत्वेनापि व्याचष्टे **यथा हीति** ।

अनु०— यथा हि तैजसस्यैव प्रकाशस्योज्झितावपि ।
आत्मैव ज्योतिरित्याह जीवस्येशं श्रुतिस्तथा ।।

'तैजसस्यैव प्रकाशस्ये'त्येतत्तैजस एव हि सौरादिरालोकः प्रकाशशब्दवाच्यः प्रसिद्धस्तस्येति व्याख्येयम् । **उज्झितावपि** परमेश्वरस्य तत्त्वाभावेऽपीति यावत् । 'आत्मैवास्य ज्योतिर्भवती'ति श्रुतिर्जीवस्येशं प्रकाशमाहेत्यर्थः । **तथा** 'लोकविलक्षणेऽपि भगवद्रूपे रूपशब्दप्रवृत्तिर्युक्ते'ति शेषः । उपपत्तिस्तु 'परमत' इत्यत्र वक्षमाणाऽत्रा(प्य)नुसन्धेया इति ।

परि०— **उपपत्तिस्त्विति** । अलौकिके शब्दशक्तिग्रहणोपायस्तु 'विद्वद्व्युत्पत्तितोऽपि च । तैस्तैः शब्दैश्च भण्यन्ते युज्यन्ते चोपदेशतः' इति वक्ष्यमाणरूपेत्यर्थः ।

यादु०— **भाष्ये व्याख्यात इति** । 'यथा चक्षुरादिप्रकाशे विद्यमानेऽपि वैलक्षण्यादप्रकाशादिव्यवहार' इति व्याख्यात इत्यर्थः ।। **उपपत्तिस्त्विति** । वाच्यवाचकभावसम्बन्धग्रहणोपपत्तिस्त्वित्यर्थः ।। **वक्ष्यमाणेति** । 'विद्वद्व्युत्पत्तितोऽपि च । तैस्तैः शब्दैश्च भण्यन्ते युज्यन्ते चोपदेशत' इत्यादिना वक्ष्यमाणेत्यर्थः ।

वं०प०— **तत्त्वाभावेऽपीति** । तैजसप्रकाशत्वाभावेऽपीत्यर्थः ।। **प्रकाशमाहेति** । ज्ञानसाधनमाहेत्यर्थः ।

शे०चं०— व्याख्यात इति । यथा चक्षुरादिप्रकाशे विद्यमानेऽपि वैलक्षण्यादप्रकाशादिव्यवहार इति व्याख्यात इत्यर्थः । **शब्दवृत्तिः** शब्दप्रवृत्तिः । तत्र हेतुमाह **सम्बन्धेति** । अतीन्द्रियत्वेन तत्रोपदेशाद्युपायाभावेन सादृश्यानुमानस्यैवानुसरणीयत्वात् तस्य च असिद्धत्वान्न व्युत्पत्तिरिति भावः । माऽस्तु व्युत्पत्तिरित्यतोऽव्युत्पन्नशब्दस्यार्थानवगमकत्वेन तत्प्रतिपादकत्वासम्भवात् श्रुतिवैयर्थ्यमित्याह **तथा चेति** ॥ **तत्त्वाभावेऽपि** तैजसत्वाभावेऽपि ॥ **उपपत्तिरिति** । (अलौकिकशब्दशक्तिग्रहणोपायस्तु) निरुपाधिप्रियत्वादिरूपानुकूल्यादेः प्रवृत्तिनिमित्तस्य सत्त्वात् तदाश्रयणेन व्युत्पत्तेरपि सम्भवात् आनन्दादिशब्दप्रवृत्त्युपपत्तिरित्यादिरूपेत्यर्थः ॥ **वक्ष्यमाणेति** । 'विद्वद्व्युत्पत्तितोऽपि च । तैस्तैः शब्दैश्च भण्यन्ते युज्यते चोपदेशतः' इत्यादिनेति शेषः ।

॥ इति यथा तैजससौरादिलोकरूपप्रसिद्धप्रकाशाभावेऽपि श्रुतिर्जीवस्येशं प्रकाशमाह तथा लोकविलक्षणेऽपि भगवद्रूपे रूपशब्दप्रवृत्तिर्युक्ता, अत्रोपपत्तेर्वक्ष्यमाणत्वञ्च ॥

॥ इति 'प्रकाशवत्'इतिसूत्रावयवस्य भाष्योक्तान्यार्थपरतया 'लोकविलक्षणरूपवत्त्वाद्रूपवत्त्वश्रुतिवैयर्थ्य'परिहारः ॥

* * *

॥ अथ अधिकरणक्रमव्यत्यासेन व्याख्याने प्रयोजनम् ॥

८४ सु०— नन्वेतदधिकरणम् 'अत एव चे(चोपमे)'ति सूत्रात्पूर्वम्, तत्कथं पश्चाद्व्याख्यातम् । उच्यते । अत एवे(चे)ति सूत्रं 'न स्थानतोऽपी'त्यधिकरणेन सङ्गतमिति ज्ञापनाय क्रमभेदः, तत्सिद्धमर्थमुपजीव्य पूर्वपक्षोत्थानात्, तथा च भाष्यं 'यस्मादेवम्' इत्यादि, अत्रापि 'ईशरूपेष्वि'त्यादि । अथ तदनन्तरमेव किन्न कृतम् अरूपवत्त्वाधिकरणार्थस्य 'अत एव चे'ति सूत्रार्थं प्रति हेतुत्वेनोपोद्घातलक्षणया सङ्गत्या वर्णितस्याव्यवधायकत्वात् । हेतुत्वमपि प्रपञ्चयितुमाचार्येण 'स चाप्राकृतरूपत्वादि'ति चशब्दो निबद्धः, कालत्रयेऽप्यशरीरात्परमात्मनो जीवस्य अत्यन्तभेद एव ह्युपपन्न इति ॥ ३-२-९ ॥

परि०— तत्सिद्धमर्थमिति । भगवद्रूपाणां भगवदभेदरूपमित्यर्थः । **अरूपवत्त्वाधिकरणार्थस्य** सर्वथा प्राकृतशरीरराहित्यस्य । **सूत्रार्थं प्रति** जीवेश्वरयोरत्यन्तभेदं प्रति । हेतुत्वमपीत्यत्र 'अरूपत्वस्ये'ति शेषः ।

यादु०— तत्सिद्धमर्थमिति । भगवद्रूपाणां भगवदभेदरूपमित्यर्थः । **अरूपवत्त्वाधिकरणार्थस्य** सर्वथा प्राकृतशरीरराहित्यस्य । **सूत्रार्थं** प्रति जीवेश्वरयोरत्यन्तभेदं प्रति । **हेतुत्वमपी**त्यत्रारूपत्वस्येति शेषः ॥ ॥ ३-२-९ ॥

वं०प०— **तदनन्तरं** न स्थानत इत्यनन्तरम् । अरूपवदित्यतः पूर्वमेव अत एवेत्यधिकरणं सूत्रकारेण किमर्थं न कृतमित्यर्थः ॥ **हेतुत्वमपीति** । न केवलमरूपः किन्नाम रूपवांश्चेति समुच्चयमेव द्योतयितुमुपनिबद्ध इत्यर्थः । कथं हेतुत्वमित्यत आह **कालत्रयेऽपीति** । जीवस्य च मुक्तावशरीरत्वेऽपि न कालत्रयेऽप्यशरीरत्व-मिति भेद इत्यर्थः ॥ ३-२-९ ॥

शे०चं०— प्रयोजनविशेषात्पूर्वस्याप्यधिकरणस्य पश्चाद्व्याख्यानमित्याह **उच्यत इति** । भवेदेतद्यत एवेत्यस्य न स्थानत इत्यनेन सङ्गतिः स्यात्, सैव तु कथमित्यत आह **तत्सिद्धमिति** । भगवद्रूपाणां भगव-दभेदरूपत्वमित्यर्थः । कुत एतदित्यतोऽस्मिन्नर्थे भाष्यानुव्याख्यानसम्मतिं क्रमेण दर्शयति **तथा चेत्यादि** ॥ **अथेति** ॥ उक्तरीत्या सङ्गतिविशेषलाभादिति भावः । अरूपवत्त्वाधिकरणार्थस्य सर्वदा प्राकृतविग्रहराहित्यस्य । सूत्रार्थं प्रति जीवेश्वरयोरत्यन्तभेदं प्रति ॥ **हेतुत्वमपीति** । अरूपवत्त्वस्येति शेषः । हेतुहेतुमद्भावमेव दर्शयति **कालत्रयेऽपीति** ॥ ३-२-९ ॥

॥ इति अधिकरणक्रमव्यत्यासेन व्याख्याने प्रयोजनम् ॥

॥ इति अरूपाधिकरणम् ॥

॥ ३-२-९-१४ तः१८ ॥

★ ★ ★

॥ अथ वृद्धिह्रासाधिकरणम् ॥

॥ ३-२-१२-२० तः २१ ॥

॥ अथ भक्तेर्वृद्धिह्रासभाक्त्वम् ॥
॥ अथ तत्र यदर्थं भगवन्महिमाऽत्रोच्यते सा भक्तिः पुरुषेषु तारतम्येन तिष्ठतीत्युपपादनम् ॥
॥ अथ तत्रापि ब्रह्मादीनामस्मदादीनाञ्च भगवद्भक्तितारम्येन विमुक्तिगमानन्दादेः श्रौतक्रमानतिरेकेण तारतम्यं भवति ॥

ब्र०सू०—

ॐ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॐ

८५ **सु०—** यदर्थं भगवन्महिमाऽत्रोच्यते सा भक्तिः पुरुषेषु तारतम्येन तिष्ठतीत्येतदिहोपपाद्यते । तथा हि । अस्ति भक्तेर्वृद्धिह्रासभाक्त्वम् । कुतः । ब्रह्मादीनामस्मदादीनां च भक्तत्वेऽन्तर्भावात् । एवं भक्तितारतम्येऽङ्गीकृते एवेश्वरस्योभयान्प्रति सामञ्जस्यसम्भवादिति ॥ तदेतदसङ्गतम् । युक्तेः प्रतिज्ञातार्थेन सह सम्बन्धाप्रतीतेरि(त्यत)ति तत्र आह **तद्भक्तीति** ।

अनु०— तद्भक्तितारतम्येन तारतम्यं विमुक्तिगम् ।
ब्रह्मादीनां च सर्वेषामानन्दादेर्यथाक्रमम् ॥

ब्रह्मादीनां चशब्दादस्मदादीनामित्येवं **सर्वेषां यथाक्रमं** श्रौतक्रमानतिरेकेण यत् **विमुक्तिगं** आनन्दादेः **तारतम्यं** तत् भगवद्-**भक्तितारतम्येनैव** भवतीत्यर्थः । एतदुक्तं भवति । साधितं तावन्मौक्तस्यानन्दादेः फलस्य भक्तिसाध्यत्वं 'अम्बुवदग्रहणात्तु न तथात्वमि'ति सूत्रेण । तच्च 'अथात आनन्दस्य मीमांसे'त्यादिश्रुत्या तारतम्यवदवगम्यते, साध्यतारतम्ये (च) साधनतारतम्यमावश्यकम्, अन्यथा तस्य आकस्मिकत्वप्रसङ्गात्, फलदातुरीश्वरस्यासामञ्जस्यप्रसक्तेश्च । न चैवम् । अतोऽस्ति भक्तेर्वृद्धिह्रासभाक्त्व(मिति)म् ॥ ३-२-१२ ॥

परि०— युक्तेरिति । सूत्रोक्तपञ्चम्यन्तद्वयोक्तयुक्तेरित्यर्थः । जातावेकवचनम् । अन्तर्भावादित्यस्य फलतारतम्योपेताऽऽधिकारिकत्वादिति फलितार्थमुपेत्याह **तच्च अथात इति** । द्वितीयामपि युक्तिं सङ्गमयति **फलदातुरिति** । फलदातृत्वं च 'फलमत उपपत्तेरि'ति नयसिद्धमिति भावः ॥

यादु०— युक्तेरिति । भक्तत्वेऽन्तर्भावादिति हेतोरित्यर्थः ॥ **प्रतिज्ञार्थेन** साध्येन भक्तितारतम्येन । **सम्बन्धाप्रतीतेरिति** । हेतुहेतुमद्भावरूपसम्बन्धाप्रतीतेरित्यर्थः ॥ **साध्यतारतम्ये चेति** । तथा च भक्तत्वेऽन्तर्भावादित्यनेन तदानन्दतारतम्यमुपलक्ष्यत इति भावः ॥ ३-२-१२ ॥

वं०प०— आनन्दादेः फलस्य तद्रूपफलस्य । दर्शनाच्चेत्युत्तरसूत्रार्थमाह **तच्चेति** । मौक्तमानन्दादिरूपं फलमित्यर्थः । साध्यतारतम्ये च सति ॥ **अन्यथेति** । साधनतारतम्याभावेऽपि चेत्साध्यतारतम्यमित्यर्थः । **तस्य** साध्यतारतम्यस्य । **असामञ्जस्यं** वैषम्यादिरूपो दोषः ॥ ३-२-१२ ॥

शे०चं०— युक्तेरिति । भक्तत्वेऽन्तर्भावाख्ययुक्तेरित्यर्थः ॥ **प्रतिज्ञातार्थेनेति** । **साध्येन** भक्तितारतम्येनेत्यर्थः ॥ **सम्बन्धेति** । हेतुहेतुमद्भावरूपसम्बन्धाप्रतीतेरित्यर्थः । यद्यपि भाष्योदाहृतात् 'साधनस्योत्तमत्वेने'त्यादिप्रमाणादेव युक्तेः प्रतिज्ञातार्थेन सह सम्बन्धोपपादनान्नैतच्छङ्कावकाशस्तथाऽपि स्ववाक्येन तदनुक्तेरित्यभिप्रायेणेयं शङ्केति द्रष्टव्यम् । ननु मौक्तस्य ब्रह्माद्यानन्दस्य भक्तिसाध्यत्वमेव तावदसिद्धम् । सिद्धत्वेऽपि वा तस्य नानन्दतारतम्येन भक्तितारतम्यं साधयितुं शक्यम् । आनन्दतारतम्यस्यासिद्धत्वात् । सिद्धत्वेऽपि वाऽप्रयोजकत्वादित्यतस्तदुपपादयति **एतदुक्तं भवतीति** ॥ **साध्यतारतम्ये चेति** । तथा च भक्तत्वेऽन्तर्भावादित्यनेन ब्रह्माद्यानन्दतारतम्यमुपलक्ष्यत इत्युक्तं भवति **असामञ्जस्येति** । वैषम्यनैर्घृण्यरूपेत्यर्थः ॥ ॥ ३-२-१२ ॥

वा०र०— तस्येति । सिद्धत्वेऽपि वेति सम्बन्धः ।

॥ इति ब्रह्मादीनामस्मदादीनाञ्च भगवद्भक्तितारम्येन विमुक्तिगमानन्दादेः श्रौतक्रमानतिरेकेण तारतम्यं भवति ॥

॥ इति यदर्थं भगवन्महिमाऽत्रोच्यते सा भक्तिः पुरुषेषु तारतम्येन तिष्ठतीत्युपपादनम् ॥

॥ इति भक्तेर्वृद्धिह्रासभाक्त्वम् ॥

॥ इति वृद्धिह्रासाधिकरणम् ॥

॥ ३-२-१२-२० तः २१ ॥

★ ★ ★

॥ अथ स्थानविशेषाधिकरणम् ॥

॥ ३-२-१७-३५ तः ३६ ॥

॥ अथ तत्र ब्रह्मादीनामानन्दस्य प्रसिद्धप्रतिबिम्बतुल्यत्वेऽपि साधनभूतभक्त्याद्युपाधिरूपगुणानां वैचित्र्याद्वैचित्र्यम् ॥

ब्र०सू०— ॐ स्थानविशेषात्प्रकाशादिवत् ॐ ॥

(ॐ उपपत्तेश्च ॐ)

८६ **सु०—** यद्यपि एतदधिकरणं 'परमत' इत्यतोऽनन्तरम्, तथाऽपि तेनेव अनेनापि सङ्गतिरस्य । अनेन विषयोपक्षेपात्, तेन पूर्वपक्षोपपत्तिदर्शनात् । यद्वाऽनेन पूर्वपक्षयुक्त्यु-त्थानात्, तेन विषयोपक्षेपात् । तथा हि । न ब्रह्मादीनामानन्दस्य तारतम्यमुपपद्यते, भगव-दानन्दप्रतिबिम्बत्वाभ्युपगमात्, बिम्बे च तारतम्याभावस्य 'न स्थानतोऽपी'त्युक्तत्वात्, अन्यथा आकस्मिकत्वप्रसङ्गादिति । यद्वा न ब्रह्मा(द्या)दीनामानन्दो भगवदानन्दप्रतिबिम्बः, परस्परं विभिन्न(चित्र)त्वात्, बिम्बाभिमते च वैचित्र्याभावादिति ।

परि०— अनेन वृद्धिह्रासेत्यधिकरणेन । 'दर्शनाच्चे'ति सूत्रे आनन्दतारतम्यरूपविषयस्योप-क्षेपादुपस्थापनादित्यर्थः ॥ **तेनेति** । 'परमत' इत्यनेनेत्यर्थः । तत्र 'सम्बन्ध'पदेन प्रतिबिम्बत्वोक्ते-रिति भावः । द्वयं व्यनक्ति **तथाहीत्यादिना** । **अनेन** वृद्धिह्रासेति नयेन । पूर्वपक्षयुक्त्युत्थापना-दित्येतद्व्यनक्ति **परस्परं विचित्रत्वादिति** । 'वृद्धिह्रासभाक्त्वमि'त्यत्र तस्य समर्थनादिति भावः । **तेन विषयेत्युक्तस्य** व्यक्तीकरणं **न ब्रह्माद्यानन्द इति** ॥ **वैचित्र्याभावादिति** । 'न स्थानत' इत्यत्र तथा समर्थनादिति भावः ।

गु०दी०— यद्वेत्यनेन वृद्धिह्रासभाक्त्वप्रतिपादकमिदमेवाधिकरणम् । अविचित्रभगवदानन्दप्रतिबिम्बता कथं ब्रह्माद्यानन्दस्य घटते । अस्य वृद्धिह्रासभाक्त्वादिति पूर्वपक्षयुक्त्युपस्थापकत्वं च दर्शयति । 'परमत' इत्यधिकरणं च भगवदानन्दस्य लौकिकानन्दविलक्षणत्वकथनात् ब्रह्मादीनामानन्दस्यापि लौकिकानन्दत्वेन तत्र वैचित्र्यं स्यादपीत्यापाततो विषयोपस्थापकं च जायते । विमर्शे क्रियमाणेऽस्तु तेषां प्राकृतानन्दवैचित्र्यम् । स्वरूपानन्दस्य त्वविचित्रभगवदानन्दप्रतिबिम्बत्वात् कथमानन्दवैचित्र्यमिति पूर्वपक्षयुक्त्युपस्थापकं जायत इति स्वयमेवोह्यम् ।

यादु०— **अनेन** विषयोपक्षेपादित्युक्तं दर्शयति **न ब्रह्मादीनामिति** । तेन पूर्वपक्षोपपत्तिप्रदर्शनादित्युक्तं दर्शयति **भगवदानन्देति** । 'परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्य' इत्यत्र सम्बन्धपदेन बिम्बप्रतिबिम्बभावसम्बन्धस्योक्तत्वादिति भावः । यद्वेत्युक्तद्वितीयपक्षे **तेन विषयोपक्षेपादित्युक्तं** दर्शयति **यद्वा न ब्रह्माद्यानन्द इति** । **अनेन पूर्वपक्षेत्युक्तं** दर्शयति **परस्परमिति** ॥ **विचित्रत्वात्** तारतम्योपेतत्वात् ।

वं०प०— **अनन्तरमिति** । तथा च वृद्धिह्रासेत्यनन्तरं कस्माद्व्याख्यायत इत्यर्थः ॥ **तेनैवेति** । परमत इत्यधिकरणेनैवेत्यर्थः ॥ **अनेनापीति** । वृद्धिह्रासेत्यधिकरणेनापीत्यर्थः । कथमित्यत आह **अनेनेति** । वृद्धीत्यधिकरणेन स्थानेत्यधिकरणविषयप्रसञ्जनस्य अनेन कृतत्वादित्यर्थः ॥ **तेनेति** । परमत इत्यनेनेत्यर्थः ॥ **अनेनेति** । वृद्धिह्रासेत्यधिकरणेनेत्यर्थः । वृद्धीत्यनेन विषयोपक्षेपप्रकारं दर्शयति **न ब्रह्मादीति** । आनन्दतारतम्यस्य तत्रोक्तत्वादेतदधिकरणविषयस्तेनोपक्षिप्तः प्रसञ्जितः प्रापित इत्यर्थः । परमत इत्यनेन पूर्वपक्षोपपत्तिप्रदर्शनप्रकारं दर्शयति **भगवदिति** । प्रतिबिम्बत्वस्य परमत इति सूत्रे सम्बन्धपदेनोक्तत्वात् । **बिम्बे** भगवदानन्दे ॥ **अन्यथेति** । बिम्बभूते भगवदानन्दे तारतम्याभावेऽपि तत्प्रतिबिम्बे ब्रह्माद्यानन्दे तारतम्याङ्गीकार इत्यर्थः । **आकस्मिकत्वेति** । ब्रह्माद्यानन्दतारतम्यस्येति शेषः । यद्वेत्युक्तपक्षे परमत इत्यनेन विषयोपक्षेपादित्युक्तं तदादौ दर्शयति **यद्वेति** । ब्रह्माद्यानन्दस्य भगवदानन्दस्य भगवदानन्दप्रतिबिम्बतायाः सम्बन्धपदेनोक्तत्वादेतदधिकरणविषयो ब्रह्माद्यानन्दस्य प्रतिबिम्बत्वं परमत इत्यनेनोपक्षिप्तं भवतीत्याशयः । वृद्धिह्रासेत्यनेन पूर्वपक्षयुक्त्युत्थानादित्युक्तं दर्शयति **परस्परमिति** । ब्रह्माद्यानन्दादेस्तारतम्यरूपवैचित्र्यं वृद्धिह्रासेत्यनेन स्पष्टमुपपादितमेवास्तीति भावः ॥ **बिम्बाभिमत इति** । भगवदानन्द इत्यर्थः ।

शे०चं०— **अनेनेति** । वृद्धिह्रासभाक्त्वमित्यनेनेत्यर्थः ॥ **विषयेति** । तारतम्यरूपेत्यर्थः । **तेनेति** । परमत इत्यनेनेत्यर्थः । अनेन विषयोपक्षेपात् तेन पूर्वपक्षोपपत्तिप्रदर्शनादित्याद्यं पक्षमुपदर्शयति **न ब्रह्मादीनामिति** ॥ यद्वेति द्वितीयपक्षमुपदर्शयति **यद्वेति** ।

॥ इति ब्रह्मादीनामानन्दस्य प्रसिद्धप्रतिबिम्बतुल्यत्वेऽपि साधनभूतभक्त्याद्युपाधिरूपगुणानां वैचित्र्याद्वैचित्र्यम् ॥

* * *

॥ अथ 'उपपत्तेश्च' इतिसूत्रव्याख्यानरूपेण प्रतिबिम्बतारतम्ये हेत्वन्तरम् ॥

॥ अथ तत्र बिम्बशक्त्या प्रतिबिम्बवैचित्र्यं सादृश्यञ्च ॥

॥ अथ तत्रापि तदपेक्षयाऽत्यल्पत्वात्सततं तस्माद्भिन्नः ॥

॥ अथ तत्रापि च तदपेक्षयाऽत्यल्पत्वे श्रुत्युदाहरणम् ॥

८७ **सु०**— अतोऽत्रेदं विशदयति **प्रतिबिम्बवदिति** ।

अनु०— प्रतिबिम्बवदप्येषामानन्दोऽन्यगुणा यथा ।

यद्यप्येषां ब्रह्मादीनामा**नन्दः प्रतिबिम्बवत्,** प्रसिद्धप्रतिबिम्बैस्तुल्यं वर्तते, भगवदानन्दप्रतिबिम्बो भवतीति यावत्, तथाऽपि परस्परं विचित्रो भवतीति शेषः । कथम् । अन्येषां साधनभूतानामुपाधिगुणानां भक्त्यादीनां वैचित्र्यानतिक्रमेण । तत्र दृष्टान्तः **प्रतिबिम्बवदिति** । यथा सूर्यादिप्रतिबिम्बानां सूर्यकान्तजलादिगतानां सूर्यादिबिम्बवैचित्र्याभावेऽपि सूर्यकान्तादिस्थानगुणवैचित्र्याद्वैचित्र्यं तथेत्यर्थः ।

परि०— उपाधिगुणानां स्वरूपोपाधिगुणानाम् । **स्थानगुणेति** । प्रतिबिम्बनोपाधिगुणवैचित्र्यादित्यर्थः ।

यादु०— उपाधिगुणानामिति । स्वरूपभूतोपाधिगुणानामित्यर्थः । **स्थानगुणेति** । उपाधिगुणवैचित्र्यादित्यर्थः ।

शे०चं०— 'तत्र तस्येव' इत्यस्य प्रकृतेऽप्रसङ्गात् 'तेन तुल्यं क्रिया चेद्वतिः' इत्यनेन वतिरित्याह **प्रसिद्धेति** ॥ **उपाधीति** । स्वरूपभूतोपाधीत्यर्थः । मूले गुणा इति प्रथमा षष्ठ्यर्थ इति भावेनोक्तं **गुणानामिति** ॥ **वैचित्र्याद्यनतिक्रमेणेति** । अत्रानतिक्रमार्थत्वेऽपि यथाशब्दस्य वैचित्र्यसापेक्षतया असमर्थत्वादसमासो युक्तः । अन्यथा असादृश्यार्थकतया 'यथाऽसादृश्य' इति नित्यसमासप्रसङ्गादिति ध्येयम् ।

वा०र०— अत्रेति । 'अन्यगुणा यथा' इत्यनुव्याख्यान इत्यर्थः । **असमास इति** । समासे हि यथा अन्यगुणमिति भवेदिति भावः ।

* * *

८८ **सु०— वैचित्र्ये हेत्वन्तरमाह नारायणेति ।**

अनु०— नारायणगुणाधीनश्च

बिम्बशक्त्या च विचित्र इत्यर्थः । स्थानगुणस्य बिम्बसामर्थ्यस्य च प्रयोजकत्वं न्यायविवरणे व्युत्पादितम् । अनेन उपपत्तेश्चेति सूत्रं व्याख्यातं भवति ।

परि०— ननु द्वयमपि किमर्थमित्यत आह **स्थानगुणस्येत्यादि** ॥ **न्यायविवरण इति** । 'न च ब्रह्माद्यानन्दवैचित्र्येऽपि विष्णवानन्दवैचित्र्यमि'त्यादिन्यायविवरणे इत्यर्थः । सूर्यकान्तादौ प्रतिबिम्बनेन अग्निजन्म न जलादाविति स्थानगुणस्यावश्यकत्वं, सूर्यदेरेव प्रतिबिम्बनात् अग्निजन्म नान्यस्य पाषाणादेरिवेति बिम्बशक्तिरप्यावश्यकीति व्युत्पादितमित्यर्थः ।

यादु०— नन्वन्यतरेणैवोपपत्तौ किं समुच्चयेनेत्यत आह **स्थानगुणस्येत्यादि** । न हि सूर्यकान्तप्रतिबिम्बस्याग्निजनकत्वशक्तिर्न जलगतस्येत्येतावता सूर्ये वैचित्र्यम् । आधिक्यं हि तत्र निमित्तम् । सूर्यचन्द्रादिप्रतिबिम्बं विनाऽन्यत्र तथा विशेषादृष्टेरिति न्यायविवरण उपपादितमित्यर्थः । सूर्यकान्तादिगतस्य चन्द्रादिप्रतिबिम्बस्य नाग्न्यादिजनकत्वम्, अतो बिम्बसामर्थ्यमप्यावश्यकमिति न्यायविवरणाभिप्रायः ।

शे०चं०— ननु स्थानवैचित्र्यबिम्बशक्त्योरन्यतरस्यैव नियामकत्वसम्भवादुभयोपपादनमनर्थकमित्यत आह **स्थानगुणस्येति** । बिम्बसामर्थ्यस्यैव प्रयोजकतायां सूर्यकान्तगतसूर्यप्रतिबिम्बस्य दाहकत्ववजलादिगततत्प्रतिबिम्बस्यापि तत्प्रसङ्गात्स्थानवैचित्र्यमावश्यकम् । तावन्मात्रस्यैव प्रयोजकत्वे च सूर्यकान्तगतसूर्यप्रतिबिम्बस्येव तद्गतचन्द्रप्रतिबिम्बस्यापि दाहकत्वप्रसङ्गाद्बिम्बसामर्थ्यमप्यावश्यकमिति स्थानगुणस्य बिम्बसामर्थ्यस्य च प्रयोजकत्वम् । न हि सूर्यकान्तगतप्रतिबिम्बस्याग्निजनकत्वशक्तिर्न जलगतस्यैतावता सूर्ये वैचित्र्यमाधिक्यं तत्र निमित्तम् । सूर्यचन्द्रादिप्रतिबिम्बं विनाऽन्यत्र तथा विशेषादृष्टेरिति न्यायविवरणे उपपादितमित्यर्थः ।

स०ना०— **न्यायविवरण इति** । जलगतसूर्यप्रतिबिम्बस्य दाहकत्वं नास्ति । सूर्यकान्तप्रतिबिम्बस्यैव दाहकत्वम् । अतः स्थानस्य प्रयोजकत्वं, तथा सूर्यकान्तगतसूर्यप्रतिबिम्बस्य दाहकत्वेऽपि मुखप्रतिबिम्बस्य तदभावात् बिम्बसामर्थ्यमप्यङ्गीकार्यमित्यर्थः ।

* * *

८९ **सु०**— **बिम्बप्रतिबिम्बयोरैक्यं केचिदिच्छन्ति । अतः प्रतिबिम्बत्वं व्याख्या(तं)ति नारायणेति । गुण** आनन्दः । चशब्देन तत्सदृशश्चेति ग्राह्यम् ।

बिम्बाभिन्न एव किं न भवतीत्यत आह **अत्यल्प** इति ।

अनु०— अत्यल्पस्तदपेक्षया ।
तस्माद्भिन्नश्च सततमन्यज्ज्ञानं परस्य च ।

चः हेतौ । यस्मात् **तदपेक्षयाऽत्यल्पः तस्मात् सततं भिन्न** इति ।

तदपेक्षयाऽत्यल्पत्वं कुत इत्याकाङ्क्षां परिहरन्नत्र श्रुतिमाह **अन्यदिति** ।

अन्यज्ज्ञानं तु जीवानामन्य आनन्द ईशता ।
मुख्येशता परेशस्य गौणी जीवस्य सा यतः ।
इति श्रुतेः .... ॥

अन्य आनन्दः परस्य जीवानां चेति सम्बन्धः । **एवमीशतेत्यपि** योज्यम् । **मुख्येशतेत्युपलक्षणया** हेतुमाह । **इति श्रुतेरिति पूर्वेण** सम्बन्धः ॥ ३-२-१७ ॥

परि०— चो हेताविति । भिन्नश्चेति चशब्द इत्यर्थः । **एवमीशतेत्यपीति** । अन्येशता परेशस्य जीवानां चान्येशतेति योज्यमित्यर्थः ॥ **उपलक्षणयेति** । मुख्यं ज्ञानं मुख्य आनन्द इत्यपि ज्ञेयमित्यर्थः ॥ **हेतुमाहेति** । कुत इति प्रश्नस्योत्तरत्वेनेति योज्यम् ॥

गु०दी०— मुख्येशतेत्युपलक्षणयेत्यत्र परमात्मनः मुख्येशत्वेन निरवधिकानन्दत्वादिति हेतोरुप-लक्षणयेत्यर्थः ॥ ३ । २ । ११, १७ ॥

यादु०— उपलक्षणयेति । तथा च ज्ञानानन्दयोरन्यत्वेऽपि मुख्यत्वामुख्यत्वरूपहेतुरनेनैवोक्त इत्यव-धेयम् ॥ ३-२-१७ ॥

वं०प०— एवं 'परस्येशता अन्या' जीवस्येशता चान्येत्यर्थः । **उपलक्षणयेति** । भगवत आनन्दोऽपरिच्छिन्नत्वान्मुख्यो जीवानन्दस्त्वतादृशत्वादमुख्यस्तथा परं ज्ञानं सर्वविषयत्वान्मुख्यं जीवज्ञानं तु अतादृशत्वादमुख्यमिति द्रष्टव्यम् ॥ **पूर्वेणेति** । इति श्रुतेः अत्यल्पस्तदपेक्षया तस्माद्भिन्नश्च सततं इति पूर्वेण सम्बन्धः ॥ ३-२-१७ ॥

शे०चं०— एवमीशतेत्यपीति । परस्येशताऽन्या जीवस्येशताऽन्या चेति योज्यमित्यर्थः । जीवेश-त्वस्य भगवदीशत्वस्य चान्यत्वमेवोत्तरत्रोच्यते ज्ञानानन्दादेस्तु नेति कथं तत्रान्यत्वसिद्धिरित्यत आह **मुख्ये-शतेत्युपलक्षणयेति** । तथा चेशतयोरन्यत्वे हेतुतयोक्ते मुख्यत्वामुख्यत्वे तज्ज्ञानानन्दयोरप्यन्यत्वे हेतुत्वेनोप-लक्षणतया विवक्षिते इति न पृथगुक्तिरावश्यकीति भावः ॥ ३-२-१७ ॥

वा०र०— परस्येशताऽन्येति पाठः ॥

स०ना०— **एवमीशतेत्यपीति** । परस्येशताऽन्या जीवस्येशता चान्येति योज्यमित्यर्थः । ननु जीवभगवदीशतयोरेवान्यत्वं मुख्येशतेत्यनेनोच्यते । ज्ञानानन्दयोस्तु कुतो नोपपादनमित्यतस्तयोरुपलक्षणत्वान्न दोष इत्याह **मुख्येशतेति** ॥

॥ इति तदपेक्षयाऽत्यल्पत्वे श्रुत्युदाहरणम् ॥

॥ इति तदपेक्षयाऽत्यल्पत्वात्सततं तस्माद्भिन्नः ॥

॥ इति बिम्बशक्त्या प्रतिबिम्बवैचित्र्यं सादृश्यञ्च ॥

॥ इति 'उपपत्तेश्च'इतिसूत्रव्याख्यानरूपेण प्रतिबिम्बतारतम्ये हेत्वन्तरम् ॥

॥ इति स्थानविशेषाधिकरणम् ॥

॥ ३-२-१७-३५ तः ३६ ॥

★ ★ ★

॥ अथ पालकत्वाधिकरणम् ॥

॥ ३-२-१३-२२ ॥

॥ अथ तत्र भाष्योक्तपूर्वपक्षस्यायुक्तत्वशङ्कानिरसनपूर्वकं पूर्वपक्षविशदनम् ॥

ब्र०सू०— ॐ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॐ ॥

९० **सु०—** अत्र पूर्वपक्षप्रदर्शनपरं भाष्यं 'सृष्टिसंहारकर्तृत्वमेवास्य न पालकत्वम्, स्वतःसिद्धेरि'ति । तदयुक्तम् । सृष्टिसंहारकर्तृत्वाभ्युपगमस्य व्यर्थत्वात् । 'स्वतःसिद्धेः' इत्यत्र 'अस्ये'त्यप्रतीतेश्च । स्थितेरित्यध्याहारेऽपि स्वभाववादाश्रयणस्य सृष्टिसंहारयोरपि साम्येन तत्कर्तृत्वाभ्युपगमानुपपत्तेरित्यतः पूर्वपक्षं विशदयति **सृष्टीति** ।

अनु०— सृष्टिनाशौ तदधीनावितीरिते ।
स्वभावत्वात्स्थितेर्नैतदपेक्षा

इति ईरिते सिद्धान्तिनाऽभ्युपगते सति । ततश्चायमर्थः । ईश्वरस्य पालकत्वं नोपपद्यते, स्थितेस्तत्प्रयोजनत्वात्, तस्याश्च स्वभावसिद्धत्वेनेश्वरानपेक्षत्वात् । ईश्वर एव हि विश्वस्य सृष्टिसंहारयोः कर्ता नान्य इत्यभ्युपगतम् । तथा च सृष्ट्वा यावन्न संहरेत्तावत्स्थितिः स्वभावसिद्धैव न परव्यापारमपेक्षते । यदि खलु सृष्टिसंहारयोः कर्ताऽन्यः स्यात्, तदोदासीनस्य तस्य सृष्टौ प्रेरणाद्यर्थं संहारे प्रवृत्तस्य निवारणार्थं च स्थितावीश्वरापेक्षा सम्भवेत् । न च तदस्ति । अतः संहारोदासीनत्वातिरिक्तं पालकत्वं नोपपद्यत इत्येवमत्र पूर्वपक्ष इति ।

परि०— **व्यर्थत्वादिति** । पूर्वपक्षे तदुपयोगाप्रतीतेरिति भावः ॥ **स्थितेरिति** । उत्तरकालमपि सत्त्वरूपक्षेमार्थस्य स्थितेरिति पदस्येत्यर्थः । सृष्ट्यादिकर्तृत्वाङ्गीकारस्योपयोगं व्यनक्ति

ईश्वर एव हीति ॥ **प्रेरणाद्यर्थमिति** । सामग्रीसम्पादनादिः **आदिपदार्थः** । आत्मलाभरूपसृष्टिलक्षणयोगाभावे क्षेमरूपस्थितेरयोगात् 'सृष्टौ प्रेरणाद्यर्थमि'त्युक्तम् ॥

यादु०— सृष्टिसंहारकर्तृत्वाभ्युपगमस्येत्यत्र पूर्वपक्षिण इति शेषः ॥ **प्रेरणाद्यर्थमिति** । असृष्टस्य स्थितेः कर्तुमशक्यत्वात् स्थितिकर्तुरीश्वरस्योदासीनप्रेरणं सृष्टावावश्यकमिति भावः ।

वं०प०— अस्येतीति । कस्य स्वतःसिद्धिरित्यपेक्षायामेतादृशस्येत्यप्रतीतेरित्यर्थः ॥ **तत्कर्तृत्वेति** । पूर्वपक्षिण ईश्वरस्य सृष्ट्यादिकर्तृत्वाभ्युपगमानुपपत्तेरित्यर्थः ॥ **तत्प्रयोजनत्वादिति** । पालनप्रयोजनत्वादित्यर्थः । तस्याः स्थितेः उदासीनस्य सृष्टिकारणात् प्रेरणे सृष्ट्यभावे स्वस्य स्थितिकर्तृत्वानुपपत्तेस्तदर्थमुदासीनस्य सृष्ट्यादौ प्रेरणमावश्यकमिति भावः ॥ ३-२-१३ ॥

शे०चं०— व्यर्थत्वादिति । पूर्वपक्षिण इति शेषः ॥ **प्रेरणाद्यर्थमिति** । असृष्टस्य रक्षारूपपालनायोगात्पालनकर्तुरित्यस्योदासीनप्रेरणं सृष्टावावश्यकमिति भावः ॥ संहर्तुरिति शेषः । ततश्च पालकत्वाभावेन महामहित्वाभावान्न तत्र भक्तिर्युक्तेति भावः ।

वा०र०— उदासीनप्रेरणमिति । सृष्टावुदासीनो योऽन्यकर्ता तत्प्रेरणमित्यर्थः ।

॥ इति भाष्योक्तपूर्वपक्षस्यायुक्तत्वशङ्कानिरसनपूर्वकं पूर्वपक्षविशदनम् ॥

* * *

॥ अथ तथाविधपूर्वपक्षत्वे सति सिद्धान्तस्यायुक्तत्वशङ्का, तन्निरासकतया सूत्राभिप्रायप्रदर्शनश्च ॥

९१ **सु०—** 'एवं तर्हि सिद्धान्तो न युक्तः, स्वभावत्त्वयुक्तेरपरिहृतत्वात्'; इत्यतः सूत्राभिप्रायमाह **इति नेति** ।

अनु०— इति न युज्यते ।

यतस्स्वभावोऽप्यखिल ईशायत्तोऽखिलस्य च ॥

परानपेक्षतया प्रतीयमानं स्वरूपं धर्मो वा **स्वभाव** इत्युच्यते । स सर्वेषां पदार्थानाम् । (स) सर्वोऽ**पीशायत्त** एव, अन्यथा तेषां स्वातन्त्र्यप्रसङ्गेनास्येशत्वानुपपत्तेः, 'सर्वं खल्वि'त्यादिश्रुतिविरोधापत्तेश्च । अन्नदानादौ व्यापारश्च स्फुट एवेति ॥ ३-२-१३ ॥

परि०— स सर्वोऽपीति । उक्तद्विविधरूपोऽपीत्यर्थः ॥ **श्रुतीति** । तत्र सर्वसत्तादेरीशायत्तत्वाभिप्रायेण 'राजा राष्ट्रमि'तिवत् सर्वात्मकत्वोक्तेस्तद्विरोधादित्यर्थः ॥ **स्फुट एवेति** । सृष्टिसंहारातिरिक्तः पालनरूपो धर्मः अन्नदानादिव्यापाररूपः स्पष्ट एवेत्यर्थः । तेन संहारोदासीनत्वादन्यत्पालनं नेति प्रागुक्तमपास्तं ध्येयम् ।

गु०दी०— परानपेक्षया प्रतीयमानमित्यत्र स्वस्वरूपावस्थाने स्वधर्मावस्थाने च परापेक्षा यथा नास्ति तथा प्रतीयमानम् । यथा वा वने मृगः तस्य तृणादनं च ॥ ३ । २ । १३, १४ ॥

यादु०— सर्वोऽपीति । उक्तोभयरूपोऽपीत्यर्थः । चशब्दसूचितमर्थमाह **सर्वं खल्विति** । संहारोदासीनत्वातिरिक्तं पालकत्वं नोपपद्यत इत्युक्तं दूषयति **अन्नदानादाविति** ॥ ३-२-१३ ॥

शे०चं०— परानपेक्षतयेति । प्रतिमुखादिवदागन्तुककारणानपेक्षतयेत्यर्थः ॥ **स सर्वोऽपीति** । उक्तोभयरूपोऽपीत्यर्थः । तत्कुत इत्यतो भाष्ये ईशशब्दसूचितां युक्तिमाह **अन्यथेति** । तत्रैव चशब्दसूचितां तामाह **सर्वमिति** । अत्र सर्वनियामकत्वादेव सर्वत्वो(राजा राष्ट्रमितिवत्)क्तिरिति भावः । अभ्युपेत्य चेदमुदितम् । वस्तुतस्तु संहर्तुरीश्वरस्य संहारोदासीनत्वातिरिक्तं रक्षारूपं स्पष्टमेव पालकत्वमस्तीति महामहिमत्वाद्युक्ता तत्र भक्तिरित्यभिप्रेत्याह **अन्नेति** । **स्फुट एवेति** । सृष्टिसंहारातिरिक्तः पालनरूपो धर्मः अन्नदानादिव्यापाररूपः स्पष्ट एवेत्यर्थः । तेन संहारोदासीनत्वादन्यत्पालनं नेति प्रागुक्तमपास्तं ध्येयम् ॥ ३-२-१३ ॥

वा०र०— स इत्यस्य सर्वेऽपीत्यनेन व्यवधानेऽपि सम्बन्धाद्विशिष्टप्रतीकोपादानम् । क्वचिन्मूले सर्वोऽपि सर्वेषां पदार्थानामीशेति पाठः इत्यप्याहुः ।

॥ इति तथाविधपूर्वपक्षत्वे सति सिद्धान्तस्यायुक्तत्वशङ्का,
तन्निरासकतया सूत्राभिप्रायप्रदर्शनञ्च ॥

॥ इति पालकत्वाधिकरणम् ॥

॥ ३-२-१२-२० तः २१ ॥

★ ★ ★

॥ अथ अव्यक्ताधिकरणम् ॥

॥ ३-२-१४-२३ तः २७ ॥

॥ अथ तत्र अव्यक्तत्वदृश्यत्वयोर्विरोधपरिहारार्थं 'अतोऽनन्तेन तथा हि लिङ्गम्' इति सूत्रितस्य स्फुटतात्पर्यकथनम् ॥

ब्र०सू०— ॥ ॐ तदव्यक्तमाह हि ॐ ॥

९२ सु०— अत्र परमात्मनोऽव्यक्तत्वमादौ विस्तरेण समर्थितम्, ततस्तर्हि भक्त्यादि-साधनवैयर्थ्यमित्याशङ्क्य 'प्रकाशश्च कर्मण्यभासादि'ति दृश्यत्वं चोक्तम्, तदेतदुभयं विरुद्धमित्याशङ्क्य **अतोऽनन्तेन तथा हि लिङ्ग**मिति सूत्रितम्, अत्र विरोधशान्तिः न स्फुटा प्रतीयत इत्यतस्तस्य तात्पर्यमाह **अव्यक्तोऽपी**ति ।

अनु०— अव्यक्तोऽपि स्वशक्त्यैव भक्तानां दृश्यते हरिः ॥

भक्तानामव्यक्तोऽपीत्यन्वयः । **भक्तानां** 'अनुग्रहाय' इत्यध्याहारो वा । जीव-शक्त्यपेक्षया **अव्यक्तोऽपि स्वशक्त्यैव दृश्यत** इत्यविरोध इति ॥ ३-२-१४ ॥

परि०— सूत्राणामर्थः *तन्त्रदीपिकायां* व्यक्तः । क्रियान्वये सति भक्तैरिति भाव्यम्, अत आह इत्यन्वय इत्यादि ॥

यादु०— कथमनेन विरोधशान्तिः स्फुटतयाऽऽप्रतीतेरित्यत आह **जीवशक्त्यपेक्षये**ति ॥ ३-२-१४ ॥

वं०प०— ननु भक्तैः दृश्यत इति कर्तरि तृतीयया भाव्यम्, अतो भिन्नक्रमेण सम्बन्धं दर्शयति **भक्तानामि**ति ॥ ३-२-१४ ॥

शे०चं०— विस्तरेणेति । त्रिसूत्र्येत्यर्थः । 'परमात्माऽपरोक्ष्यं तत्प्रसादादेव, न जीवशक्त्येति वक्तु-मुच्यत' इति सम्बन्धभाष्यस्य च, 'युज्यते च तस्यानन्तशक्तित्वादि'ति व्याख्यानरूपस्य च भाष्यस्य पर्या-लोचनया विवक्षितार्थलाभः सम्भवत्येवेत्यत उक्तं **स्फुटे**ति । यद्यपि 'नित्याव्यक्तोऽपि भगवानीक्ष्यते निज-

परि०— स सर्वोऽपीति । उक्तद्विविधरूपोऽपीत्यर्थः ॥ **श्रुतीति** । तत्र सर्वसत्तादेरीशायत्तत्वाभिप्रायेण 'राजा राष्ट्रमि'तिवत् सर्वात्मकत्वोक्तेस्तद्विरोधादित्यर्थः ॥ **स्फुट एवेति** । सृष्टिसंहारातिरिक्तः पालनरूपो धर्मः अन्नदानादिव्यापाररूपः स्पष्ट एवेत्यर्थः । तेन संहारोदासीनत्वादन्यत्पालनं नेति प्रागुक्तमपास्तं ध्येयम् ।

गु०दी०— परानपेक्षया प्रतीयमानमित्यत्र स्वस्वरूपावस्थाने स्वधर्मावस्थाने च परापेक्षा यथा नास्ति तथा प्रतीयमानम् । यथा वा वने मृगः तस्य तृणादनं च ॥ ३ । २ । १३, १४ ॥

यादु०— सर्वोऽपीति । उक्तोभयरूपोऽपीत्यर्थः । चशब्दसूचितमर्थमाह **सर्वं खल्विति** । संहारोदासीनत्वातिरिक्तं पालकत्वं नोपपद्यत इत्युक्तं दूषयति **अन्नदानादाविति** ॥ ३-२-१३ ॥

शे०चं०— परानपेक्षतयेति । प्रतिमुखादिवदागन्तुककारणानपेक्षतयेत्यर्थः ॥ **स सर्वोऽपीति** । उक्तोभयरूपोऽपीत्यर्थः । तत्कुत इत्यतो भाष्ये ईशशब्दसूचितां युक्तिमाह **अन्यथेति** । तत्रैव चशब्दसूचितां तामाह **सर्वमिति** । अत्र सर्वनियामकत्वादेव सर्वत्वो(राजा राष्ट्रमितिवत्)क्तिरिति भावः । अभ्युपेत्य चेदमुदितम् । वस्तुतस्तु संहर्तुरीश्वरस्य संहारोदासीनत्वातिरिक्तं रक्षारूपं स्पष्टमेव पालकत्वमस्तीति महामहिमत्वाद्युक्ता तत्र भक्तिरित्यभिप्रेत्याह **अन्नेति** । **स्फुट एवेति** । सृष्टिसंहारातिरिक्तः पालनरूपो धर्मः अन्नदानादिव्यापाररूपः स्पष्ट एवेत्यर्थः । तेन संहारोदासीनत्वादन्यत्पालनं नेति प्रागुक्तमपास्तं ध्येयम् ॥ ३-२-१३ ॥

वा०र०— स इत्यस्य सर्वेऽपीत्यनेन व्यवधानेऽपि सम्बन्धाद्विशिष्टप्रतीकोपादानम् । क्वचिन्मूले सर्वोऽपि सर्वेषां पदार्थानामीशेति पाठः इत्यप्याहुः ।

॥ इति तथाविधपूर्वपक्षत्वे सति सिद्धान्तस्यायुक्तत्वशङ्का,
तन्निरासकतया सूत्राभिप्रायप्रदर्शनञ्च ॥

॥ इति पालकत्वाधिकरणम् ॥

॥ ३-२-१२-२० तः २१ ॥

★ ★ ★

॥ अथ अव्यक्ताधिकरणम् ॥

॥ ३-२-१४-२३ तः २७ ॥

॥ अथ तत्र अव्यक्तत्वदृश्यत्वयोर्विरोधपरिहारार्थं 'अतोऽनन्तेन तथा हि लिङ्गम्' इति सूत्रितस्य स्फुटतात्पर्यकथनम् ॥

ब्र०सू०— ॥ ॐ तदव्यक्तमाह हि ॐ ॥

९२ सु०— अत्र परमात्मनोऽव्यक्तत्वमादौ विस्तरेण समर्थितम्, ततस्तर्हि भक्त्यादिसाधनवैयर्थ्यमित्याशङ्क्य 'प्रकाशश्च कर्मण्यभासादि'ति दृश्यत्वं चोक्तम्, तदेतदुभयं विरुद्धमित्याशङ्क्य **अतोऽनन्तेन तथा हि लिङ्गमिति** सूत्रितम्, अत्र विरोधशान्तिः न स्फुटा प्रतीयत इत्यतस्तस्य तात्पर्यमाह **अव्यक्तोऽपीति** ।

अनु०— अव्यक्तोऽपि स्वशक्त्यैव भक्तानां दृश्यते हरिः ॥

भक्तानामव्यक्तोऽपीत्यन्वयः । **भक्तानां** 'अनुग्रहाय' इत्यध्याहारो वा । जीवशक्त्यपेक्षया **अव्यक्तोऽपि स्वशक्त्यैव दृश्यत** इत्यविरोध इति ॥ ३-२-१४ ॥

परि०— सूत्राणामर्थः *तन्त्रदीपिकायां* व्यक्तः । क्रियान्वये सति भक्तैरिति भाव्यम्, अत आह **इत्यन्वय इत्यादि** ॥

यादु०— कथमनेन विरोधशान्तिः स्फुटतयाऽऽप्रतीतेरित्यत आह **जीवशक्त्यपेक्षयेति** ॥ ३-२-१४ ॥

वं०प०— ननु भक्तैः दृश्यत इति कर्तरि तृतीयया भाव्यम्, अतो भिन्नक्रमेण सम्बन्धं दर्शयति **भक्तानामिति** ॥ ३-२-१४ ॥

शे०चं०— **विस्तरेणेति** । त्रिसूत्र्येत्यर्थः । 'परमात्माऽपरोक्ष्यं तत्प्रसादादेव, न जीवशक्त्येति वक्तुमुच्यत' इति सम्बन्धभाष्यस्य च, 'युज्यते च *तस्यानन्तशक्तित्वादि*'ति व्याख्यानरूपस्य च भाष्यस्य पर्यालोचनया विवक्षितार्थलाभः सम्भवत्येवेत्यत उक्तं **स्फुटेति** । यद्यपि 'नित्याव्यक्तोऽपि भगवानीक्ष्यते निज-

शक्तितः' इति भाष्योदाहृतप्रमाणवाक्ये स्पष्टमेव विवक्षितार्थप्रतिपादनमस्ति । तथाऽपि स्ववाक्येनाप्रतिपादनात् पुनरारम्भ इति भावः । ननु भक्तानां दर्शनं प्रति कर्तृतया 'कर्तृकरणयोस्तृतीये'ति तृतीयायां भक्तैरिति भाव्यम् । भक्तानां दृश्यत इति षष्ठी तु कथमित्यतो नात्र यथाश्रुतसम्बन्धोऽभिमतः किंतु योग्यत्वाद्भक्तानामव्यक्त इत्येवेति नोक्तानुपपत्तिरित्याशयेनाह **भक्तानामव्यक्तोऽपीत्यन्वय इति** ॥ **भक्तानामिति** । अत्र पक्षे ततोऽप्यर्थातिशयलाभ इति द्रष्टव्यम् । यद्वा विरोधपरिहारोपयोगिनो जीवशक्त्याऽव्यक्तत्वस्य मूलारूढतासिद्ध्यर्थमाह **भक्तानामव्यक्तोऽपीत्यन्वय इति** । तावताऽपि कथं विरोधपरिहार इत्यत आह **जीवेति** । पुरुषप्रयत्नापेक्षयाऽव्यक्तोऽपीत्यर्थः ॥ ३-२-१४ ॥

॥ इति अव्यक्तत्वदृश्यत्वयोर्विरोधपरिहारार्थं 'अतोऽनन्तेन तथा हि लिङ्गम्' इति सूत्रितस्य स्फुटतात्पर्यकथनम् ॥

॥ इति अव्यक्ताधिकरणम् ॥

॥ ३-२-१-२३ तः २७ ॥

★ ★ ★

॥ अथ उभयव्यपदेशाधिकरणम् ॥

॥ ३-२-१५-२८ तः ३१ ॥

॥ अथ तत्र साक्षादधिकरणार्थव्याख्यानम् ॥

॥ अथ तत्रापि एतदधिकरणारम्भप्रयोजकपूर्वपक्षप्रदर्शनम् ॥

ब्र०सू०— ॐ उभयव्यपदेशात्त्वहिकुण्डलवत् ॐ ॥

९३ सु०— 'यदीश्वरस्य गुणक्रियादयो धर्माः ततो भिन्नाः तदा समवायस्य निराकृतत्वात् तद्वत्त्वमनुपपन्नम्, यदि च अभिन्नाः तदा ज्ञानादिमत्त्वमानन्दादिभोक्तृत्वमित्याद्ययुक्तमित्युभयथा तत्र भक्त्यनुपपत्तिरि'ति पूर्वपक्षप्राप्ताविदमारभ्यते ।

परि०— भक्त्यनुपपत्तिरिति । गुणवत्येव स्नेहादिरूपभक्तेरुदयादिति भावः ।

शे०चं०— निराकृतत्वादिति । वैशेषिकपरीक्षायां 'समवायाभ्युपगमाच्च साम्यादनवस्थितेरि'त्यत्रेति शेषः । संयोगस्य च द्रव्यमात्रवृत्तितया गुणक्रियादिभिरनुपपत्तेरिति भावः ॥ तद्वत्त्वमनुपपन्नमिति । असम्बद्धयोरपि धर्मधर्मिभावे हिमविन्ध्ययोरपि तत्प्रसङ्गादिति भावः ॥ ज्ञानादिमत्त्वमित्यादि । तद्वत्तादेर्भेदव्याप्तत्वादिति भावः ॥

॥ इति एतदधिकरणारम्भप्रयोजकपूर्वपक्षप्रदर्शनम् ॥

* * *

॥ अथ 'उभयव्यपदेशादि'त्यादिसूत्रस्य प्रतिज्ञाप्रदर्शनम्
(पारमेश्वरगुणानां नित्याभिन्नत्वेऽपि विशेषशक्त्या गुणगुण्यादिस्थितिः) ॥

९४ सु०— तत्र हेतुदृष्टान्तावेव सूचितौ, न तु पक्षपरिग्रहरूपा प्रतिज्ञा, अध्याहारोऽपि हेतुदृष्टान्तबलेन भेदाभेदपक्षपरिग्रहस्येति प्रतिभाति, अतः प्रतिज्ञां दर्शयति तदभिन्ना इति ।

अनु०— तदभिन्ना गुणा नित्यमपि सर्वे विशेषतः ।
गुणत्वेन गुणित्वेन भोक्तृभोग्यतया स्थिताः ॥

नित्यशब्दो नियमार्थः । पारमेश्वराः सर्वे गुणा धर्मा नित्यं तदभिन्नाः तेन अत्यन्ताभिन्नाः तथाऽपि विशेषशक्त्या गुणगुण्यादिभावेन स्थिताः ।

परि०— पक्षपरिग्रहरूपा पक्षवचनरूपेत्यर्थः । यद्वा रूपशब्दो ज्ञापकपरः । पक्षपरिग्रहज्ञापिकेत्यर्थः । गुणशब्दो भावाभावरूपधर्ममात्रपर इत्युपेत्याह **गुणा धर्मा इति** । यद्वा क्रियाग्रहणाय धर्मा इति व्याख्या । 'अपी'त्यस्यार्थः **तथापीति** । **विशेषशक्त्या** इत्यादिः विशेषत इत्यादेः तात्पर्य इत्यर्थः ।

यादु०— पक्षपरिग्रहरूपेति । पक्षस्य परिग्रहं स्वीकारं रूपयति प्रतिपादयतीत्यर्थः ॥ **नियमार्थ इति** । अवधारणार्थ इत्यर्थः ।

वं०प०— दृष्टान्तेति । अहिकुण्डलस्थले भेदाभेदयोरुभयसम्प्रतिपत्तेरिति भावः ।

शे०चं०— पक्षपरिग्रहरूपेति । पक्षस्य परिग्रहं स्वीकारं रूपयति प्रतिपादयतीति प्रतिज्ञायाः पक्षपरिग्रहणरूपत्वं बोध्यम् ॥ **हेतुदृष्टान्तबलेनेति** । तयोर्भेदाभेदविषयत्वादिति भावः ॥ **प्रतिभातीति** । तथा चापसिद्धान्त इति भावः । नित्यशब्दस्य सदातनत्वार्थतायां गुणानामत्यन्ताभिन्नत्वप्रतिज्ञाया मूलारूढत्वालाभात्तल्लाभायाह **नियमार्थ इति** । अवधारणार्थ इत्यर्थः । गुणपदस्य सामयिकगुणपरत्वे क्रियादीनामत्यन्ताभिन्नत्वप्रतिज्ञाया अलाभप्रसङ्गात् तल्लाभाय गुणपदं धर्ममात्रपरतया व्याचष्टे **गुणा धर्मा इति** ॥ **विशेषशक्त्येति** । विशेषस्य भेदप्रतिनिधित्वात् तदभावेऽपि विशेषबलेनैव तद्वत्त्वाद्युपपत्तिरिति भावः ।

वा०र०— प्रतिज्ञाया वचनतया परिग्रहज्ञापकत्वेऽपि तद्रूपत्वायोगादाह **पक्षस्य परिग्रहमिति** ।

* * *

॥ अथ उक्तार्थे बाधकपरिहारः ॥

॥ अथ तत्र क्रियाणां गुणानाञ्च श्रौतव्यवहारैरनित्यतयाऽवगतानां भगवताऽत्यन्ताभेदानुपपत्तिशङ्का, विशेषात्मतया तथा नित्यशक्त्यात्मना तत्परिहारश्च ॥

९५ **सु०— स्यादेतत् । परिमाणादीनां यावद्द्रव्यभाविनां भवतु नाम भगवताऽत्यन्ताभेदः, क्रियाणां (ज्ञानादि)गुणानां च 'अस्राक्षीत् सृजति स्रक्ष्यति व्यज्ञासीज्जानाति ज्ञास्यती'त्यादिश्रौतव्यवहारैरनित्यतयाऽवगतानां तु न युज्यत इत्यत आह विशेषात्मतयेति ।**

अनु०— विशेषात्मतया तेषां नित्यशक्त्यात्मना तथा ।
नित्यं स्थितेर्न धर्माणां क्रियादीनामनित्यता ॥

तेषां परमेश्वरसम्बन्धिनां क्रियादीनां धर्माणां नित्यशक्त्यात्मना नित्यं स्थितेस्तथा विशेषात्मतया व्यक्तिरूपेण व्यवहारविषयतोपपत्तेर्नानित्यतेति योजना । प्रपञ्चस्तु प्रागेव कृतः ।

परि०— प्रागेवेति । लिङ्गपादे 'अत्ता चराचरे'ति नय इत्यर्थः ।

यादु०— प्रपञ्च इति । शक्तिव्यक्तिशब्दार्थकथनेन क्रियानित्यत्वे साधकबाधकाभावकथनेन च प्रपञ्चो लिङ्गपाद एव कृत इत्यर्थः ।

शे०चं०— विशेषात्मतया तथा नित्यशक्त्यात्मना नित्यं स्थितेस्तेषां क्रियादीनां धर्माणां नानित्यतेति यथाश्रुतयोजनायां विशेषात्मत्वनित्यशक्त्यात्मत्वयोरन्यतरेणैव विवक्षितसिद्धावन्यतरस्य वैयर्थ्यम् । असिद्धौ च तदुपपादनमनर्थकम् । अद्राक्षीदित्यादिव्यवहारविषयत्वानुपपादनप्रसङ्गश्च भवतीत्यभिप्रेत्यापेक्षिताध्याहारेण नित्यत्वव्यवहारविषयत्वोपपादकतया वाक्ययोजनामाह **तेषामित्यादिना** । विशेषात्मतयेत्यस्य व्याख्यानं **व्यक्तिरूपेणेति** । भवेदेतदेवं यदि क्रियादीनां परमेश्वरधर्माणां नित्यत्वं शक्तिव्यक्तिरूपत्वं च सिद्धं स्यात् तदेव कुत इत्यत आह **प्रपञ्चस्त्विति** । अनित्यत्वे पराभिमतप्रमाणनिरासेन नित्यत्वे साधकप्रमाणकथनेन बाधका-भावव्युत्पादनेन च शक्तिव्यक्तिशब्दार्थकथनपूर्वकं तदुभयसमर्थनेन च प्रपञ्चोऽत्तृत्वाधिकरणे 'सविशेषोऽपि क्रियाशक्त्यात्मना स्थिर' इत्यादिना कृत इत्यर्थः ।

वा०र०— असिद्धौ चेति । विवक्षितस्येति बुद्ध्या विवेकेन वर्तते । **नित्यत्वव्यवहारविषय-त्वेति** । नित्यत्वव्यवहारविषयत्वयोरुपपादकतयेत्यर्थः ।

स०व्र०— प्रागेवेति । अत्तृत्वाधिकरणे 'सविशेषोऽपि क्रियाशक्त्यात्मना स्थिरः' इत्यादिना कृत इत्यर्थः ।

* * *

९६ **सु०— ननु च क्रियादीनां या व्यक्तता सा तावदनित्यैव, अन्यथोक्तव्यवहाराणां निरालम्बनत्वापातात्; ततः तस्या भगवद्धर्मभूताया अपि न अत्यन्ताभेदोपपत्तिरित्यत आह न विशेषेति ।**

अनु०— न विशेषात्मता चेयमनित्या

इयं व्यवहारालम्बनत्वेनोक्ता ।

कुत इत्यत आह शक्तीति ।

शक्तिरूपता ।

सैव यत्

यत् यस्मात् सा विशेषात्मता शक्तिरूपतैव, शक्तिश्च नित्येत्युक्तं, तस्मादित्यर्थः ।

नन्वेवं तर्हि शक्तिर्व्यक्तिरिति व्यवहारविशेषो न स्यात्, उक्तव्यवहाराणां निरालम्बनत्वं च न परिहृतं स्यादित्यत आह सविशेषेति ।

सविशेषा स्यात्

नेयं व्यक्तिः शक्त्या निर्विशेषाभिन्ना, येनोक्तदोषः स्यात्, किन्तु सविशेषाभिन्नैव ।

गु०दी०— सविशेषाभिन्नैवेत्युपलक्षणम् । सा व्यक्तिरपि फलकाले व्यक्तिरूपेणैव तिष्ठति । अन्यथा सविशेषाभिन्नयोस्तयोरुभयोरपि सत्त्वे सदा कार्यं स्यादित्यपि द्रष्टव्यम् ।

वं०प०— अन्यथेति । यदि क्रियादीनां व्यक्तिरपि नेत्यर्थः । **उक्तव्यवहाराणाम्** अस्राक्षीदित्यादिकादाचित्कानाम् । एवमुत्तरत्रापि । **तस्याः** व्यक्तेः । **विशेषात्मता** व्यक्तता ॥ **एवं तर्हीति** । शक्तिव्यक्त्योरभेद इत्यर्थः स्यात् । व्यक्त्यभिन्नशक्तेः सर्वदा सत्त्वादित्यर्थः ।

शे०चं०— उक्तव्यवहाराणां अस्राक्षीदित्याद्युक्तव्यवहाराणाम् ॥ **उक्तमिति** । 'ज्ञानं नित्यं क्रिया नित्या बलं शक्तिः परात्मन' इत्यादिनाऽऽत्तृत्वाधिकरण इति शेषः । **न स्यादिति** । तयोरभेदादिति भावः ॥ **उक्तदोष इति** । शक्तिर्व्यक्तिरिति व्यवहारविशेषानुपपत्त्यादिरूप इत्यर्थः ॥ **सविशेषाभिन्नैवेति** । तथा च शक्तिव्यक्त्योरभेदेऽपि भेदप्रतिनिधिविशेषसद्भावात् तद्बलेन शक्तिर्व्यक्तिरिति व्यवहारविशेषादिकमुपपन्नमिति भावः ।

स०व्र०— उक्तव्यवहाराणां स्रक्ष्यतीत्यादीनां निरालम्बनताव्यक्तेर्नित्यत्वादिति भावः ।

९७　**सु०—** यद्ययं सर्वनिर्वाहहेतुर्विशेषो भगवतो भिन्नस्तदा सर्वेषां तद्धर्माणां तेनात्यन्ताभेद इति प्रतिज्ञा भज्येत, अभिन्नश्चेद्विशेषता तस्य न स्यात्, स्वरूपमात्रपर्यवसानेन सोऽपि न स्यादित्यत आह **विशेष इति** ।

अनु०—　विशेषोऽन्यो न चाप्ययम् ।
स्वनिर्वाहकताहेतोस्तथाऽपि स्याद्विशेषता ।

च: अवधारणे । **अयं विशेषोऽपि** भगवतो **नैव भिन्नस्तेन** न प्रतिज्ञाहानिः । **तथाऽपि** तस्य **विशेषता स्यात्** । कथम् । न ह्ययमभिन्नो भवन्निर्विशेषः । एवं तर्हि विशेषपरम्परयाऽनवस्था स्यात् । न स्यात् । कुतः विशेषस्य **स्वनिर्वाहकताहेतोरिति** ।

यादु०— विशेषतेति । धर्मतेत्यर्थः । एवं भगवद्विशेषत्वेनेत्यत्रापि भगवद्धर्मत्वेनेत्यर्थो ज्ञातव्यः ।

वं०प०— विशेषता धर्मता । स्वरूपेति । यदा भगवत्स्वरूपेणात्यन्ताभेदस्तदा तत्स्वरूपमात्रमेवोर्वरितमित्यर्थः । सोऽपि विशेषोऽपि । तथाऽपि भगवता भिन्नत्वेऽपि ।

शे०चं०— **न स्यादिति** । विशेषविशेषिभावस्य भेदसापेक्षत्वादिति भावः ॥ **प्रतिज्ञेति** । भगवद्धर्माणां भगवताऽत्यन्ताभेद इति प्रतिज्ञेत्यर्थः । तर्ह्यभिन्नत्वाद्विशेषताद्यनुपपत्तिरित्यत आह **तथाऽपीति** । अभेदे विशेषविशेषिभावः कथमिति पृच्छति **कथमिति** । तदुपपादकस्य भेदस्याभावादिति भावः । भेदाभावेऽपि तत्प्रतिनिधिविशेषबलाद्विशेषविशेषिभावोपपत्तिरिति समाधत्ते **न हीति** ॥ **एवं तर्हीति** । धर्मधर्मिभावोपपादकतया स्वीकृतविशेषस्यापि सविशेषत्व इत्यर्थः । क्रियादीनां भगवतश्च धर्मधर्मिभावोपपादकतयाऽभ्युपगतस्य विशेषस्य तेषां धर्मधर्मिभावोपपादकत्ववत्स्वस्मिन्विशेषविशेषिभावोपपादकत्वेन विशेषे विशेषान्तरानङ्गीकारान्नानवस्थेत्याशयेन समाधत्ते **न स्यादित्यादिना** ।

॥ इति क्रियाणां गुणानाञ्च श्रौतव्यवहारैरनित्यतयाऽवगतानां भगवताऽत्यन्ताभेदानुपपत्तिशङ्का, विशेषात्मतया तथा नित्यशक्त्यात्मना तत्परिहारश्च ॥

॥ इति उक्तार्थे बाधकपरिहारः ॥

॥ इति 'उभयव्यपदेशादि'त्यादिसूत्रस्य प्रतिज्ञाप्रदर्शनम्

(पारमेश्वरगुणानां नित्याभिन्नत्वेऽपि विशेषशक्त्या गुणगुण्यादिस्थितिः) ॥

* * *

।। अथ उक्तार्थे प्रमाणत्वेन सौत्रस्योभयव्यपदेशादित्यस्य हेतोर्व्याख्यानम् ।।

।। अथ तत्र भगवतो धर्माणां विशेषत्वेन, भिन्नत्वेन च विज्ञातेर्युक्त उक्तार्थः ।।

९८ **सु०**— एवं प्रतिज्ञा दर्शिता । तत्र बाधकानि परिहृतानि । अत्र चोदना, स्यात् एवम्, यद्येतेष्वर्थेषु प्रमाणं स्यात्, न च तत्पश्याम' इत्यतः सौत्रमुभयव्यपदेशादिति हेतुं व्याचष्टे **विशेषत्वेनेति** ।

अनु०— विशेषत्वेन विज्ञातेः प्रमाणैरखिलैरपि ।

अखिलैः उभयविधैः **प्रमाणैः** वेदवाक्यैर्ज्ञानादिधर्माणां भगवद्विशेषत्वेन, अपि-शब्दात् तदभिन्नत्वेन च **विज्ञातेर्विज्ञानादित्यर्थः** ।

परि०— अत्र चोदनेति । शङ्केत्यर्थः ।। **भगवद्विशेषत्वेनेति** । भगवद्धर्मत्वेनेत्यर्थः ।

वं०प०— एवं प्रतिज्ञेति । सूत्रे हेतुदृष्टान्तयोरेवोक्तेरन्तदभिन्ना इत्यनेनाचार्यैः प्रतिज्ञा दर्शितेत्यर्थः ।

शे०चं०— भगवद्विशेषत्वेनेति । भगवदतिशयत्वेनेत्यर्थः ।

।। इति भगवतो धर्माणां विशेषत्वेन, भिन्नत्वेन च विज्ञातेर्युक्त उक्तार्थः ।।

* * *

।। अथ 'विज्ञातेः'इत्यनुव्याख्यानगतप्रयोगसाधुत्वविचारः ।।

९९ **सु०**— ननु विज्ञातेरिति कथम् । 'आतश्चोपसर्ग' इत्यङः क्तिन्बाधकत्वात् । 'क्तिन्नाबादिभ्यश्चे'ति वचनाद्भविष्यति ।।

परि०— आतश्चोपसर्ग इति । तृतीयस्य तृतीयपादे 'षिद्भिदादिभ्योऽङ् चिन्तिपूजिकथि-कुम्बिचर्चश्च आतश्च' इति सूत्रक्रमे पूर्वस्मादङित्यनुवर्त्य उपसर्गे उपपदे आकारान्ताद्धातोरङ्प्रत्ययो भवतीत्यर्थकथनात्, पूर्वस्य ज्ञाधातोरङ्प्रत्यये 'स्त्रियां क्तिन्' इति स्त्र्यधिकारात् 'अजाद्यतष्टाप्' इति टाप्प्रत्यये सति विज्ञेति रूपेण भाव्यम् । ननु क्तिनि प्रत्यये सत्यस्तु विज्ञातिरित्यपि रूपमित्यत आह **इत्यङः क्तिन्बाधकत्वादिति** । क्तिनोऽपवाद इति वृत्त्यादावुक्तेरिति भावः ।। **क्तिन्नाबादिभ्य**

इति । वार्तिकविहितक्तिनोऽबाधकत्वात् । अबादयः प्रयोगतोऽनुसर्तव्या इति वृत्त्यादावुक्तेराप्ति-रित्यादिवत् 'विज्ञातिरि'त्यादि साध्विति भावः ।

गु०दी०— आतश्चोपसर्ग इत्यत्र आकारान्ताद्धातोरुपसर्गे सति क्तिन्न स्यादित्यत उपसर्गस्य क्तिन्-बाधकत्वादित्यर्थः । **क्तिन्नाबादिभ्यश्चे**त्यत्र अबादिभ्यः उपसर्गेभ्यः क्तिन् स्यादिति प्रतिप्रसवादित्यर्थः ।

यादु०— आतश्चोपसर्ग इति । आकारान्तेभ्यो धातुभ्यः उपसर्ग उपपदे स्त्रियामङ्प्रत्ययो भवतीति सूत्रार्थः । उदाहरणं च प्रदा उपदा उपधेत्यादि द्रष्टव्यम् । एवं च ज्ञाधातोराकारान्तत्वाद्विज्ञाया इत्येव वक्तव्य-मिति भावः । **क्तिन्बाधकत्वादिति** । क्तिनोऽपवाद इति काशिकायामुक्तत्वादिति भावः ॥ **क्तिन्नाबादिभ्य इति** । अस्य वार्तिकस्य क्तिनपवादबाधकतया तस्य प्रतिप्रसवार्थत्वादिति भावः । अबादयः प्रयोगतोऽनुसर्तव्या इति काशिकायामुक्तत्वादस्याबादिगणे पाठाभावात् कथमिदं समाधानमिति चोद्यानवकाशः ।

वं०प०— आतश्चेति । विपूर्वकात् ज्ञाऽवबोधनेऽस्मात् स्त्रियां क्तिनिति सूत्रेण क्तिन्प्रत्यये नकार-ककारयोर्लोपे विज्ञातिरिति रूपं तस्य पञ्चमी विज्ञातेरिति भवतीति हि स्थितिः । तदुपरि शङ्का विज्ञा इति स्थिते 'स्त्रियां क्तिनि'ति प्राप्तक्तिन्बाधकत्वेनातश्चेति सूत्रेणाङ्प्रत्ययविधानादत्राङ्प्रत्यये ङकारलोपे विज्ञा अ इति स्थिते सवर्णदीर्घे उपधा इतिवद्विज्ञा इत्येव स्यात् । तथा च विज्ञाया इत्येव वक्तव्यमित्यर्थः । उत्तरमाह **क्तिन्नाबा-दिभ्य इति** । तथा चास्य वार्तिकस्य स्त्रियां क्तिनिति क्तिन्बाधकाङ्प्रत्ययबाधकत्वेनापवादस्यापवादे पुनरुत्सर्ग-स्यैव स्थितिरिति न्यायेन क्तिन्प्रत्यये विज्ञातेरिति साधुः ।

शे०चं०— नन्वातश्चोपसर्ग इत्यस्य क्तिन्नपवादकतया विपूर्वात् ज्ञाधातोः स्त्रियां क्तिन्निति प्राप्त-क्तिन्बाधेनाकारान्तत्वादातश्चोपसर्ग इत्यनेन स्त्रियामङि प्रदेत्यादिवन्निष्पन्नविज्ञाशब्दस्य पञ्चम्येकवचनं विज्ञाया इति भवितव्यम् । विज्ञातेरिति तु कथमित्याक्षिपति **नन्विति** । 'क्तिन्नाबादिभ्यश्चेति वक्तव्यमि'ति वार्तिककृता अबादिभ्यो धातुभ्यः क्तिनोऽभ्यनुज्ञानादबादेश्च 'अबादयः प्रयोगतोऽनुगन्तव्या' इत्याकृतिगणत्वादस्यापि तत्रोप-सङ्ग्रेयत्वात् आप्तिर्दीप्तिर्लब्धिरित्यादाविवात्रापि क्तिनि सति विज्ञातेरित्यस्योपपत्तेरित्याशयेन समाधत्ते **क्तिन्निति**। ननु क्तिन्नाबादिभ्यश्चेति क्तिनमुपसङ्ख्याय निष्ठायां वा सेटोऽकारवचनात्सिद्धमिति ब्रुवतो वार्तिककारस्य गुरोश्च हल इत्यकारप्राप्तावेवाबादिभ्यश्चेति क्तिन्नभिमत इति गम्यते तत्कथमत्रातश्चोपसर्ग इत्यक्तिन्विषयेऽपि क्तिन् व्याख्यायत इति चेन्न । तथा सति लब्धिरित्यत्रापि क्तिन्नाबादिभ्यश्चेत्यनेन क्तिन्प्रत्ययानुपपत्तिप्रसङ्गात् । तस्य षित्वेन षिद्भिदादिभ्योऽङित्यङ्विषयत्वेन 'गुरोश्च हल' इत्यकारविषयत्वाभावात् । यदि 'चोपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता' इति न्यायेन अबादेराकृतिगणत्वं स्वीकृत्य बाहुलकलभ्योऽपि लब्धिरबादिकुक्षौ निक्षिप्यत इति मन्यसे तर्हुक्तन्यायेन बाहुलकलभ्योऽपि विज्ञातिरबादिकुक्षौ निक्षिप्यत इत्यस्तु । यदि च लब्धेर्लब्धि-रित्यादिप्रयोगबाहुल्याद्गुरोश्च हल इत्यकारविषय इव षिद्भिदादिभ्योऽङित्यङ्विषयेऽप्यबादिभ्यश्चेति क्तिन्नभिमत

एव वार्तिककारस्येति मन्यसे तर्हि विज्ञातेरित्यादिश्रौतस्मार्तप्रयोगबाहुल्यादातश्चोपसर्ग इत्याङ्विषयेऽपि क्तिन्नभिमत एव तस्येति युक्त एवैतदङ्विषयेऽपि क्तिन्विधायकतयाऽस्योपन्यास इति तुल्यमित्याशयः । केचित्तु वृत्तिकृता क्तिन्नाबादिभ्यश्चेति वचनं पुरस्कृत्य सर्वमेतत्समाहितमिति तन्मतमेवेह टीकायामुपन्यस्तमित्याहुः ।

वा०र०— आतश्चोपसर्ग इत्यस्येति । अत्र षिद्भिदादिभ्योऽङित्यङ्प्रकरणस्थं तृतीयाध्यायतृतीयपादस्थमातश्चोपसर्ग इत्येतत्सूत्रमेव विवक्षितम् । तत्स्थलीयस्यैवोपसर्ग उपपदे आकारान्तधातुभ्यः क्तिनोऽपवादेनाङ्प्रत्ययविधायकत्वात् । न तूक्ताध्यायप्रथमपादस्थमत्र विवक्षितम् । तस्येगुपधज्ञाप्रीकिरः कः इत्यतः क इत्यनुवृत्तावाकारान्तधातुभ्य उपसर्गे उपदेशेयाद्व्यधेति सूत्रेणाकारान्तेभ्यो विहितणप्रत्ययस्यापवादेन कप्रत्ययविधायकतया अङ्विधायकत्वाभावादिति बोध्यम् । **क्तिन्नपवादकतयेति** । स्त्रियां क्तिन्नित्यनेन भावादौ धातोर्विहितक्तिन्नपवादकतयेत्यर्थः । 'क्तिन्नाबादिश्च वक्तव्यः । प्रयोगतोऽनुसर्तव्य' इति स्त्रियां क्तिन्निति सूत्रीयकाशिकानुसारेणाह **क्तिन्नाबादिभ्यश्चेति** । रमाकृता 'षिद्भिदादिभ्योऽङि'ति सूत्रे 'मधुसुरभिमुखाब्जगन्धलब्धेरि'ति माघप्रयोगं, 'प्रेक्षोपलब्धिरि'त्यमरप्रयोगं चाक्षिप्यानर्थकास्तु प्रतिवर्णमर्थानुपलब्धेरिति भाष्यवार्तिकप्रयोगाद्बाहुलकाद्वा क्तिन्नपि बोध्यः । एतेन ज्ञप्तिरुपास्तिरित्यादयोऽपि व्याख्याता इत्यभिधाय वृत्तिकृता त्वित्यादिना क्तिन्नाबादिभ्यश्चेति वचनपुरस्कारेणोपलब्धेरित्यादिसमाहितत्ववचनमित्यभिधाय तदभिधानस्य स्त्रियां क्तिन्नित्येतत्सूत्रीय 'ननु निष्ठायां वा सेटोऽकारवचनात् सिद्धमि'त्यादि मञ्जरीमनुसृत्य भाष्यविरोधेनायुक्तत्वं प्रतिपादितम् । तदनूद्य दूषयति **ननु क्तिन्नाबादिभ्यश्चेत्यादिना । निष्ठायां वा सेट इति** । कीर्णिरित्यादौ तकारस्य नत्वार्थं ऋल्वादिभ्यः क्तिन्निष्ठावद् ज्ञेय इति वचनात् निष्ठाभूतक्तिनि सेट एवाकारप्रत्यय इति नियमनादाप्तिरित्यत्रानिड्वादेवाकाराभाव इत्युक्त्याऽङ्विषय एवेत्यादि लभ्यत इति भावः । **लब्धिरित्यत्रापीति** । इत्यादावपीत्यर्थः । **विषयत्वेनेति** । डुलभष् प्राप्ताविति धातोरिति भावः । **बाहुलकलभ्योऽपि विज्ञातिरिति** । श्रौतादिप्रयोगसत्त्वाद्बाहुलकात् क्तिन्प्रत्ययान्तविज्ञातिरित्यर्थः । एवं रमोक्तं दूषणं तदुक्तरीत्यैवापाकृत्य 'न पदान्तसूत्रस्थभाष्ये कण्डूतिरित्युदाहृत्य नैतदस्ति प्रयोजनं कण्डूयेत्येव भवितव्यमित्यादिप्रतिपादनात् ब्राह्मणकण्डूतिरित्यत्र क्तिच्प्रत्ययेनैव साधुत्वाभिधानेनैतद्विरोधात् क्तिनि कण्डूतिरित्युदाहरणायोग इति तदीयं दूषणमत्रासङ्गतमेव । वृत्त्यादौ तदुदाहरणात् तदंशस्य दुष्टत्वेऽपि विशिष्टांशस्योक्तरीत्या निर्दुष्टत्वमेवेति मन्वानो ननु निष्ठायामिति शङ्किते दोषपरिहाररूपसत्यं प्रयोगबाहुल्यादिदमपि गम्यत इति मञ्जरीमनुसृत्य प्रकारान्तरेण परिहारं परमुखेन वाचयितुमाह **यदि च लब्धेर्लब्धिरित्यादीति** । लब्धेरिति प्रागुदाहृतो माघप्रयोगः । लब्धिरिति त्वमरस्थः प्रागुदाहृतः । आदिपदेनानुपलब्धिरित्यादिन्यायभाष्यवार्तिकादिप्रयोगपरिग्रहः । **तुल्यमितीति** । अत एवाप्तिरिति प्रथमोदाहरणे एवं च युज्विषयेऽपि क्तिन् प्रयुज्यते आप्तिरिति । अत एवाबादयः प्रयोगतोऽनुसर्तव्या इत्युक्तमिति मञ्जरीकृतोक्तम् । तेन ण्यासश्रन्थो युजिति स्वार्थणिजन्तादाप्धातोर्युचि कारणेत्यादिवदायनेत्येवापत्तिरिति युज्विषयेऽपि क्तिन् प्रयुज्यत इति लाभादन्यविषयेऽप्यन्यप्रवृत्तिर्युक्तेति ज्ञेयम् । केचित्त्विति पक्षस्तु वृत्तिकृता त्विति रमोक्त एवानुदितः । अत्र केचित् वृत्तिकृता क्तिन्नाबादिभ्यश्चेति वचनादिति पाठः । वृत्तिकृतेत्यस्याभावो लेखक-

दोषात् । अत्राहुरित्यस्वरससूचनम् । तद्वीजं तूक्तरीत्याऽङ्विषयस्य क्तिन्विषयत्वानुपपत्तिशङ्कापरिहारस्य वृत्तिग्रन्थादावलाभादावश्यकाधिकांशोपपादनपरित्यागेन वृत्तिकृता समाहितत्वमात्रोक्तेरयोग इति सकलमवदातम् ।

स०व्र०— ननु 'विज्ञातेरि'त्ययुक्तम् । आतश्चोपसर्गे इत्यनेनाङः क्तिन्बाधकत्वात् अङि सति प्रतिज्ञाया इतिवत् विज्ञाया इति भवेदिति शङ्कते **ननु विज्ञातेरितीति** ॥ क्तिन्नाबादिभ्य इति अबादयश्च प्रयोगतोऽनुसर्तव्या इत्युक्तत्वेन तत्रास्याप्युपसङ्ख्येयत्वमिति भावः । नन्वातश्चोपसर्गे इत्यनेनाऽऽप्लृव्याप्तौ दीपी दीप्तौ डुलभष् प्राप्तौ इत्येतेषामाकारान्तत्वाभावेन दीप्तिर्लब्धिरित्यत्राऽऽङोऽप्राप्तत्वेन क्तिन्नाबादिभ्य इत्यनेन कथं तद्बाध इति वाच्यम् । आप्तिः दीप्तिरित्यत्र 'गुरोश्च हल' इत्यनेनाप्रत्ययप्राप्तेः लब्धिरित्यत्र च षिद्भिदादिभ्योऽङित्यनेन अङः प्राप्तेः तद्बाधकत्वोपपत्तेः ।

चषकः— **आतश्चोपसर्ग इति** । षिद्भिदादिभ्योऽङित्यनुवर्त्य प्रदा उपदा उपधेत्यादावाकारान्ताद्धातोरुपसर्गे उपपदेऽङ्प्रत्ययो भवतीत्यङो विहिततया तादृशविपूर्वस्य जानातेरङ्प्रत्ययो स्त्रियामित्यधिकृत्य विहितेऽजाद्यतष्टाबिति टापि च सति विज्ञायाः इति न्यायेन भवितव्यतया विज्ञातेरिति न्यासौचिती दुरुपपादेत्याह **क्तिन्बाधकत्वादिति** । क्तिनोऽपवाद इति वामनः काशिकायामभ्यधादिति भावः । **क्तिन्नाबादिभ्यश्चेति** । एतद्वार्तिकस्य क्तिन्नपवादभूताङो बाधकतया तत्प्रतिप्रसवार्थत्वादिति भावः । अबादयः प्रयोगतोऽवगन्तव्या इति काशिकायामाकृतिगणत्वाभिधानादाप्तिदीप्तिलब्धीत्यादिवद्विज्ञातेरित्यस्यापि सूपपादत्वादिति भावः ।

॥ इति 'विज्ञातेः'इत्यनुव्याख्यानगतप्रयोगसाधुत्वविचारः ॥

* * *

॥ अथ सौत्रहेतुव्याख्यानस्य विवरणम् ॥

१०० **सु०**— एतदेव विवृणोति **ससर्जेति** ।

अनु०— **ससर्ज सञ्जहारेति विशेषो ह्यवगम्यते ।**
श्रुत्यैव स स एवेति तदभेदश्च गम्यते ॥

'स इदं सर्वमसृजते'त्यादिश्रुतिं **ससर्जे**त्यनेनोपादत्ते । 'तत्तदत्तुमध्रियते'त्यादिकां **सञ्जहारे**त्यनेन, **स** आनन्दादिः **सः** परमात्मैवेत्यनेन 'आनन्दो ब्रह्मे'त्यादिश्रुतिम् ।

तदयमर्थः । 'स इदं सर्वमसृजत, उक्षा स द्यावापृथिवी बिभर्ति, तत्तदत्तुमध्रियत, स ऐक्षत सोऽकामयत, आनन्दं ब्रह्मणो विद्वानि'त्यादिश्रुत्या सर्जनादिकं ब्रह्मणो **विशेषः**

अतिशयः न ब्रह्ममात्रमिति **अवगम्यते**, तन्मात्रत्वे क्रियाकर्तृभावादेरनुपपत्तेः । 'आनन्दो ब्रह्मेति व्यजानात्; सत्यं ज्ञानमनन्तं ब्रह्म; एकधैवानुद्रष्टव्यमि'त्यादिश्रुत्यैव तस्य तेन **अभेदश्च अवगम्यते** । तदेवमुभयव्यपदेशान्यथाऽनुपपत्त्या सकलमिदं कल्प्यते । सर्वेषां ब्रह्मधर्माणां ब्रह्मणा सविशेषोऽत्यन्ताभेदः, क्रियादीनां नित्यता, शक्तिव्यक्तिरूपता, व्यक्तिरूपस्यापि नित्यता, शक्तिरूपाभिन्नता, सविशेषता, विशेषस्याप्यभेदः, स्वनिर्वाहकता च इति । न हि एतेष्वर्थेष्वन्यतमस्याप्यकल्पनायामुदाहृतोभयव्यपदेशविरोधशान्तिर्भवतीति ।

एतदेव प्रपञ्चयितुं 'निदर्शनत्रयेण' इत्यतः प्राक्तनो ग्रन्थसन्दर्भः ।

परि०— एतदेवेति । ईशनिष्ठत्वमीशाभिन्नत्वं च धर्माणां प्रमाणैर्ज्ञायत इत्येतदेवेत्यर्थः ॥ **उक्षेति** । उक्षा = अभीष्टसेचकः । **स** भगवान् **बिभर्ति द्यावाभूमिस्थान्** जनानित्यर्थः । **विशेष** इत्यनुवादः । **अतिशयित** इति व्याख्या । धर्म इत्यर्थः ।

यादु०— अतिशय इति । धर्म इत्यर्थः ।

वं०प०— अतिशयो धर्मः ॥ **क्रियेति** । ससर्जेति सर्जनादिक्रियाकर्तृत्वानुपपत्तेः । इदं किमित्यत आह **सर्वेषामित्यादिना** । स्वनिर्वाहकता चेतीदं सकलं कल्प्यत इत्यन्वयः ।

शे०चं०— विवृणोतीति । ततश्च न पौनरुक्त्यमिति भावः । सकलमिदमित्युक्तमेव विशदयति **सर्वेषामिति** । इदं सकलमिति सम्बन्धः ॥

॥ इति सौत्रहेतुव्याख्यानस्य विवरणम् ॥

* * *

॥ अथ विवृतस्य 'ब्रह्मणा तद्धर्माणामभेदेऽपि विशेषबलाद्धर्मधर्मिव्यवहारो युज्यते' इत्यस्य प्रपञ्चनम् ॥

॥ अथ तत्र विशेषानङ्गीकर्तृणां भेद-अभेद-भेदाभेद-इति वादित्रयाणां मतानां पूर्वपक्षत्वेनानुवादः ॥

१०१ **सु०—** अथ मतम् । भेद एव ब्रह्मधर्माणां ब्रह्मणाऽस्तु, समवायेन विशेषणविशेष्यभावो भविष्यति । समवायदूषणानि च श्रुतिविरोधेनाभासतां यास्यन्ति । समवायाभावेऽपि वा धर्मधर्मिणोरेव स कोऽपि महिमा कल्प्यते । न च अभेदश्रुतिविरोधः, अनागन्तुकत्वेनोपचारोपपत्तेः । अतः किमभेदमादाय विशेषाद्यङ्गीकारेणेति ।

अपर आह अखण्डमेव ब्रह्म, न तु तत्र कश्चिद्विशेषः । न च अपरश्रुतिविरोधः, क्रियादिविषयाणां सगुणविषयत्वात्, तस्य च मायामयत्वेन अविचारितरमणीयत्वात् । 'आनन्दं ब्रह्मण' इत्यादीनां च 'राहोः शिर' इत्यादिवदुपचरितत्वोपपत्तेरिति । 'अन्यस्त्वाह' भेदाभेदाभ्यामेवोभयव्यपदेशसामञ्जस्योपपत्तेः किमनया सविशेषाभेदकल्पनयेति ।

परि०— स कोऽपि महिमेति । **स** ज्ञानी सुखीत्यादिविशिष्टधीहेतुः स्वरूपसम्बन्धरूपोऽतिशय इत्यर्थः ॥ **न चापरश्रुतीति** । धर्मधर्मिभावबोधकश्रुतिविरोध इत्यर्थः ।

यादु०— महिमेति । सम्बन्धान्तरमन्तरेण विशिष्टप्रत्ययजनकत्वरूपं स्वरूपसम्बन्धत्वमित्यर्थः । **अनागन्तुकत्वेनेति** । युतसिद्धत्वाभावेनेत्यर्थः ॥ **न चापरश्रुतीति** । विशेषप्रतिपादकश्रुतिविरोधेनेत्यर्थः ।

वं०प०— श्रुतिविरोधेन । 'आनन्दं ब्रह्मण' इत्यादिभेदप्रतिपादकश्रुतिविरोधेनेत्यर्थः । **अखण्डं** निर्विशेषम् । **अपरश्रुतीति** । ब्रह्मणो निर्विशेषत्वे ब्रह्मणि क्रियादिविशेषप्रतिपादकश्रुतिविरोध इत्यर्थः । नन्वथाऽपि श्रुतीनां सगुणब्रह्मविषयत्वे सत्यभूतं ब्रह्माखण्डं निर्गुणमित्येतद्गतमित्यत आह **तस्य चेति** । सगुणब्रह्मण इत्यर्थः ॥ **राहोरिति** । अमृतसम्बद्धशिरस एव राहुग्रहत्वस्य स्मृतिसिद्धत्वेन राहोः शिर इत्येतदुपचारितं यथा तथा ब्रह्मण एवानन्दरूपत्वेन ब्रह्मण आनन्द इत्येतदुपचारितमित्यर्थः ।

शे०चं०— नन्वेवमसम्बद्धहिमविन्ध्ययोरिव विशेषणविशेष्यभावावगतिर्न स्यादित्यतोऽत्र सम्बन्धसद्भावेन वैषम्यान्नानुपपत्तिरित्याह **समवायेनेति** । ननु समवायस्य वैशेषिकपरीक्षायां दूषितत्वान्न तेन तदुपपत्तिरित्यत आह **समवायेति** ॥ **महिमेति** । सम्बन्धान्तरमन्तरेण विशिष्टप्रत्ययजनकत्वरूपं स्वरूपसम्बन्धत्वमित्यर्थः ॥ **न चाभेदेति** । 'नेह नानाऽस्ति', 'एकधैवानुद्रष्टव्यमि'त्यादिश्रुत्या ब्रह्मधर्माणां ब्रह्मणाऽभेदसिद्धेरिति भावः । **अनागन्तुकत्वेनेति** । अनादित्यादिना ब्रह्मसादृश्यात्तदभेदव्यपदेशो धर्माणां गौण इति भावः ॥ **न चापरेति** । विशेषप्रतिपादकश्रुतिविरोधो न चेत्यर्थः । **राहोः शिर इत्यादिवदिति** । शिरस एव राहुत्वेन तयोरभेदेऽपि यथा सम्बन्धव्यवहारस्तद्वदित्यर्थः । आदिपदेन वृक्षस्य शाखेत्यादिपरिग्रहः ।

स०व्र०— राहोः शिर **इत्यादिवदिति** । शिरोविशिष्टस्यैव राहुत्वेन तयोरभेदेऽपि यथा सम्बन्धव्यवहारस्तद्वदित्यर्थः । ततश्च भेदोऽपीति सम्बन्धिनोः धर्मधर्मिणोरभावात् सम्बन्धिकपदार्थस्याभाव इति भावः ।

॥ इति विशेषानङ्गीकर्तॄणां भेद-अभेद-भेदाभेद-इति वादित्रयाणां मतानां पूर्वपक्षत्वेनानुवादः ॥

* * *

।। अथ त्रिभिरप्येतैर्वादिभिर्विशेषस्याङ्गीकर्तव्यत्वम् ।।
।। अथ तत्र भेदवादिनं विशेषमङ्गीकारयति ।।
।। अथ ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदेऽङ्गीक्रियमाणे तस्य भेदस्य भिन्नत्वाभिन्नत्वाभ्यां विकल्प्य प्रश्नः ।।

१०२ सु०— 'मैवम् । त्रिभिरप्येतैरन्ततोऽभिन्ने विशेषस्याङ्गीकर्तव्यत्वात् । ततो वरमादित एव तदङ्गीकरणमि'त्याशयवान् भेदवादिनं तावद्विशेषमङ्गीकारयितुमाह **भेद इति** ।

अनु०— भेदो यदि विशेषस्य स भेदो भेदिना कथम् ।

विशेषस्य ज्ञानादेर्ब्रह्मधर्मस्य, यदि ब्रह्मणो भेदोऽङ्गीक्रियते तदा पृच्छामः । **स भेदो, भेदिना** ब्रह्मणा ज्ञानादिना च सह, **कथं** किं प्रकारः, प्रतिपत्तव्यः । किं भिन्नः, किंवाऽभिन्न इति ।

परि०— त्रिभिरप्येतैरिति । वादिभिरित्यर्थः ।

वं०प०— आदित एवेति । भगवतस्तद्धर्माणां चाभेदमङ्गीकृत्य तत्र विशेषाङ्गीकरणमेव वरमित्यर्थः ।

।। इति ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदेऽङ्गीक्रियमाणे तस्य भेदस्य भिन्नत्वाभिन्नत्वाभ्यां विकल्प्य प्रश्नः ।।

* * *

।। अथ ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदेऽङ्गीक्रियमाणे तस्य भेदस्य भिन्नत्वेऽनवस्थापादनम् ।।

१०३ सु०— आद्ये दोषमाह **भिन्नश्चेदिति** ।

अनु०— भिन्नश्चेदनवस्था स्यात्

यदि भेदो भेदिभ्यां **भिन्नस्तदा** सोऽपि भेदस्तथेति **अनवस्था स्यात्** ।। विशेषणविशेष्यभावादिप्रतिपत्तये खलु धर्मधर्मिणोर्भेदोऽभ्युपगम्यते । स च प्रतीयमान एव तद्धेतुः । तत्प्रतीतिश्च विशेषणादिभावेनैवेत्युत्तरोत्तरभेदप्रतीतिरवश्यमपेक्षितैवेति सुस्थाऽनवस्था ।

परि०— अनवस्थायाः ज्ञप्तिप्रतिबन्धकत्वेन दुष्टतां व्यनक्ति **विशेषणविशेष्यभावादीति** । सुखवान् ज्ञानवानित्यादिप्रतीतिसिद्ध्यर्थमित्यर्थः ॥ **विशेषणादिभावेनेति** । घटादिवद्भेदोऽयमित्यप्रतीतेर्भिन्नोऽयमिति वाऽस्य भेद इति वा तस्य प्रतीतेरिति भावः ॥ **सुस्थेति** । प्रथमज्ञप्तिप्रतिबन्धादिति भावः ।

यादु०— ननूत्पत्तिज्ञस्यप्रतिबन्धकत्वात् कथमियमनवस्था दूषणमित्यत आह **विशेषणविशेष्यभावेति** ॥ **स च प्रतीयमान एवेति** । अन्यथा दण्डपुरुषयोः कदाऽप्यभेदभ्रमो न स्यात् । सर्वदा विशेषणविशेष्यभावेनैव ज्ञानं स्यात् । न स्याच्च कदाचिदभिन्नयोरपि विशेषणविशेष्यभावभ्रम इति भावः ॥ **विशेषणादिभावेनैवेति** । भेदः प्रतीयमानो न भेद इत्येव प्रतीयते किन्त्विमौ भिन्नाविति विशेषणतयाऽनयोर्भेद इति विशेष्यतया वेति भावः ।

वं०प०— **स च** भेदः । **तद्धेतुः** विशेषणविशेष्यभावप्रतीतिहेतुः । **तत्प्रतीतिश्च** भेदप्रतीतिश्च ॥ **सुस्थाऽनवस्थेति** । ननु विशेषणीभूतप्रतीतेरावश्यकत्वेऽपि न तद्गतं भेदान्तरमपि प्रत्येतव्यम् । न हि विशेषणीभूतो भेदोऽपि भिन्नोऽयं भेद इति प्रतीयते । येन तद्गतभेदान्तरस्यापि विशेषणतया तत्प्रतीतेरप्यावश्यकत्वेनानवस्था किन्त्वनयोर्भेद इति । तथा च कथमनवस्थेति चेन्न । विशेषणीभूतभेदस्येतरसङ्कीर्णतया ज्ञाने विशेषणत्वस्यानयोर्भेद इत्यसङ्कीर्णव्यवहारस्य चायोगेनासङ्कीर्णतया ज्ञातत्वे वाच्ये भिन्नत्वेनैव ज्ञानस्य प्राप्तत्वात् । भिन्नत्वातिरिक्तासङ्कीर्णताया अभावादित्यभिप्रेतत्वात् । 'न तृतीयेऽनवस्थापत्तेरि'ति भेदाभेदयोर्भेदान्तराङ्गीकारेऽनवस्थान्तरं तत्रोच्यते । तत्राप्येवमेवोपपादनं द्रष्टव्यम् । तथाहि । विशषणीभूतभेदाभेदगतं भेदाभेदान्तरमप्यवश्यं ज्ञातव्यम् । न हि सङ्कीर्णतया ज्ञातस्य विशेषणत्वम् । नाप्यत्यन्तविविक्ततया ज्ञातस्य मेरोरपि मन्दरविशेषणत्वप्रसङ्गात् । दण्डसम्बन्धस्यैव देवदत्तविशेषणत्वात् । अतो विशेषणत्वान्यथाऽनुपपत्त्यैव भेदाभेदवत्त्वेन ज्ञानमावश्यकमिति तत्राप्यनवस्था दुष्परिहरेति ।

शे०चं०— ननु धर्मधर्मिणोर्भेदस्यापि भेदिभ्यां भेद एवं तस्य तस्यापीति भेदपरम्परामात्रेण नानवस्था । उत्पत्तिज्ञस्यन्यतरप्रतिबन्धकत्वाभावादित्यतोऽत्र ज्ञप्तिप्रतिबन्धकत्वात् स दूषणमेवेत्यभिप्रेत्य तदुपपादयति **विशेषणेति** । **स च प्रतीयमान एवेति** । अन्यथा दूरस्थयोर्दण्डदेवदत्तयोरपि विशेषणविशेष्यभावग्रहणापत्त्या अभेदभ्रमाभावप्रसङ्गात् । न च दूरादिदोषात् तत्र विशेषणविशेष्यभावाग्रहणम् । अभेदभ्रमश्च भविष्यतीति वाच्यम् । भेदस्य स्वरूपसत्तयैव विशेषणविशेष्यभावादिप्रतीत्युपयोगपक्षे दोषस्याकिञ्चित्करत्वादित्याशयात् ॥ **तत्प्रतीतिश्चेति** । इमौ भिन्नाविति विशेषणतया अनयोर्भेद इति तद्विशेष्यतया वा प्रतीयते न तु चिद्भेद इत्येवं स्वतन्त्रो भेदः प्रतीयत इत्यर्थः । एकस्यैव भेदस्य द्विष्ठत्वपक्षे भेदद्वयाङ्गीकारेणान्यतरमात्राश्रयत्वेऽपि धर्मिप्रतियोगिभावमनपेक्ष्य सम्बन्धमात्रापेक्षायां गत्यन्तराभावादिति भावः । अस्त्वेवं विशेषणविशेष्यभावेनैव धर्मधर्मि-

भेदस्य प्रतिभास इत्यतो दण्ड्यादौ तद्भावप्रतिभासस्य यो विशेषणविशेष्यभूतयोर्दण्डदेवदत्तयोर्भेदग्रहस्तत्पूर्वकत्वदर्शनेन तद्भेदभेदिनोर्विशेषणविशेष्यभावग्रहणात्प्रागेव भेदान्तरग्रहणपूर्वकत्वस्यावश्याश्रयणीत्वाद्भेदान्तरग्रहणस्यापि विशेषणविशेष्यभावेन तत्प्रतिभासतया तद्भेदभेदिनोर्विशेषणविशेष्यभावग्रहणात्पूर्वभाविभेदान्तरग्रहणपूर्वकत्वम् । एवं तस्य तस्यापीत्यनवस्था । न च मूलक्षतेरभावान्नेयमनवस्था दूषणम् । विशेषणविशेष्यभावग्रहणहेतोः पूर्वपूर्वग्रहणस्यासिद्धौ तदसिद्ध्या मौलिकभेदासिद्ध्या मूलक्षयसद्भावादित्याशयेनाह **इत्युत्तरोत्तरेति** ।

वा०र०— 'स्वरूपवस्तुनो भेदो यत्र तस्ये'ति शून्याधिकरणीयानुव्याख्यानमूलानुसारेणाह **अन्यथा दूरस्थयोरित्यादि** । उक्तमूलानुसारेण भेदो हि न तावत्स्वतन्त्रः प्रतिभासते । किन्तु घटपटौ भिन्नौ इति घटपटविशेषणतया वा घटपटयोर्भेद इति तद्विशेष्यतया वेत्यादि तत्त्वनिर्णयटीकानुसारेण च व्याख्याति **भेदो हीमौ भिन्नावितीति** । अत्र भेदो हीमाविति पाठः । भेदस्य विशेषणविशेष्यभावेन प्रतीतिपक्षे वक्ष्यमाणानवस्थाप्रसरेऽप्यस्यास्माद्भेद इति धर्मिप्रतियोगिभावापेक्षया तत्प्रतीतिपक्षे तदप्रसर इत्यतो विशेषणविशेष्यभावेन प्रतीतिनियममुपपादयति **एकस्यैव भेदस्येति** । अत्रैकस्यैव भेदस्य द्विष्ठत्वपक्षे गत्यन्तराभावादित्यनेनैकस्य भेदस्य द्विष्ठत्वाङ्गीकारे भेदसम्बन्धिनोरुभयोरपि धर्मित्वस्यैवापत्त्या धर्मिप्रतियोगिभावस्याभावेन तदपेक्षया प्रतीतेरसम्भावितत्वान्न प्रकारान्तरसम्भव इत्युक्तं भवति । भेदद्वयाङ्गीकारेणेत्यादिना समस्तवाक्येन तु भेदस्यान्यतरमात्राश्रितत्वपक्षे यदा धर्मिप्रतियोगिभावस्य सतोऽप्यविवक्षया सम्बन्धमात्रस्यैवापेक्षा तदाप्यस्यास्माद्भेद इति धर्मिप्रतियोगिभावापेक्षया प्रतीत्यसम्भवान्न प्रकारान्तरसम्भव इत्युक्तं भवति । तत्त्वनिर्णयटीकाव्याख्यानावसरे टीकाकृता स्पष्टीकृतमेतत् । भेदस्यान्यतरमात्राश्रितत्वेऽपि धर्मिप्रतियोगिभावापेक्षेति पक्षस्य निराकरणमप्यत्र मूले उपलक्षणतया अभिप्रेतम् । धर्मित्वं प्रतियोगित्वं प्रतीत्य हि भेदः प्रत्येतव्यः । भेदान्तरप्रतीत्यपेक्षा च धर्मित्वप्रतियोगित्वप्रतीतिः । तद्भेदान्तरप्रतीतिरपि धर्मित्वप्रतियोगित्वान्तरप्रतीतिसापेक्षेत्यनवस्थेति ज्ञातुं शक्यत्वात् । मुखतस्तत्पक्षनिराकरणाभावस्तु मायावादिना विशेषणविशेष्यभावप्रतीतिपक्ष एवानवस्थाभिधानेन तदनुसारात् । अत एवैतेन विशेषणविशेष्यभावप्रतीतेरित्यादिना तत्त्वनिर्णयटीकायां विशेषणविशेष्यभावप्रतीतिपक्ष एव परोक्तानवस्थाया निराकृतत्ववचनमित्यादिकं मनसि निधाय भेदस्यान्यतरमात्राश्रितत्वं धर्मिप्रतियोगिभावापेक्षा चेति पक्षे गत्यन्तरभावकथनाभाव इति ज्ञातव्यम् । एतेन विशेषणविशेष्यभावप्रतीतेर्भेदप्रतीत्यधीनत्वस्य दण्डादौ दर्शनेन भेदप्रतीतिपरम्परयाऽनवस्थाप्रसङ्गोऽपि निरस्त इति तत्त्वनिर्णयटीकामपि विवृण्वन्नस्यभावत्वे तु न तावदयं स्वतन्त्रः प्रतिभातीत्यादि प्रमाणमालास्थानन्दबोधोक्तिं तट्टीकां च मनसि निधाय तदनुसारेण पराभिप्रेतमनवस्थाप्रसङ्गं विवृणोति **दण्डादौ तद्भावेत्यादिना इत्याशयेनाहेत्यन्तेन** ।

।। इति ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदेऽङ्गीक्रियमाणे तस्य भेदस्य भिन्नत्वेऽनवस्थापादनम् ।।

* * *

।। अथ ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदेऽङ्गीक्रियमाणे तस्य भेदस्याभिन्नत्वेऽपि द्वेधा विकल्प्य दूषणम् ।।

।। अथ ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च सविशेषाभिन्नत्वे कल्पनागौरवमपसिद्धान्तश्च ।।

।। अथ ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च निर्विशेषाभिन्नत्वे दूषणानि ।।

१०४ सु०— अभिन्नत्वेऽपि वक्तव्यं सविशेषाभिन्न उत निर्विशेषाभिन्न इति ।

प्रथमे दोषमाह **अभिन्नश्चेदिति** ।

अनु०— अभिन्नश्चेत्पुरा न किम् ।

पुरा न किमिति । धर्माणां धर्मिणा सविशेषाभेदः किं नाङ्गीक्रियते अङ्गीकार्य एवेत्यर्थः । भेद इव विनाऽपि भेदेन विशेषेणैवोपपत्तावपि वृथा परम्पराकल्पनायां गौरवं स्यात्, ततो धर्माणामेव सविशेषाभेदाङ्गीकारः श्रेयानिति भावः ।

अस्त्वेवमित्यत आह **विशेष इति** ।

विशेषोऽभिन्न एवेति तेन नाभ्युपगम्यते ।

विशेषो धर्मोऽभिन्न इत्येव तावत्, **तेन** भेदवादिना **नाभ्युपगम्यते**, दूरे सविशेषत्वमित्यतोऽपसिद्धान्तः स्यात् । समीहितं च नः (न) सिद्ध्येदित्याशयः ।

परि०— यदि धर्मधर्मिणोरभेदः तर्हि धर्मिव्यवहारः कथं तत्कारणस्य भेदस्याभावादित्यत आह **भेद इवेति** । भेद इति सप्तमी । यथा भेदभेदिभ्यां सह भेदाभावेऽपि विशेषबलेन भेदभेदिव्यवहार आशास्यते तद्वद्धर्मधर्मिणोरभेदेऽपि विशेषेणैव व्यवहारो भविष्यतीति भेदं प्रकल्प्य तस्य भेदिभ्यां सविशेषाभेदाङ्गीकारो गौरवग्रस्त इति भावः ।

यादु०— निर्विशेषाभिन्न इति । घटकरीरादिवदिति भावः ।

वं०प०— भेद इवेति । यथा भेदो ब्रह्मज्ञानरूपभेदिभ्यामभिन्नस्तद्वदित्यर्थः । **विनाऽपि भेदेन** ज्ञानब्रह्मरूपधर्मधर्मिणोः । **उपपत्तौ** (धर्मधर्मिभावस्य) विशेषणविशेष्यभावस्येति भावः । **परम्परेति** । 'धर्म-

धर्मिणोर्भेद एव' स च भेदे धर्मधर्मिरूपभेदिभ्यामभिन्न इति परम्परेत्यर्थः । अङ्गीकारो धर्मिण इति शेषः । तटस्थः शङ्कते **अस्त्वेवमिति** । धर्माणां धर्मिणा सविशेषाभेदोऽस्त्वित्यर्थः ।

शे०चं०— ननु भेदस्य भेदिभ्यामादावेव भेदाभ्युपगमात्पुरा न किमिति रिक्तं वच इत्यतस्तथोक्तेरभिप्रायमाह **पुरेति** । कथं धर्मधर्मिणोर्भेदं विना विशेषणविशेष्यभावप्रतीतिरित्यतो यथा भेदस्य भेदिभ्यां भेदाभावेऽपि तत्र विशेषणविशेष्यभावादेर्विशेषेणैवोपपत्तिस्तथा धर्मधर्मिणोरसत्यपि भेदे विशेषेणैव विशेषणविशेष्यभावादेरुपपत्तौ भेदपरम्पराङ्गीकारे कल्पनागौरवापत्तेर्न भेदाङ्गीकारो युक्त इत्याह **भेद इवेति** ॥

वा०र०— **कथं धर्मेति** । धर्माणां धर्मिणा सविशेषाभेदाङ्गीकारे विशेषणविशेष्यभावनिर्वाहकभेदाभावात् कथं तत्प्रतीतिरित्यर्थः । ततश्च तत्प्रतीत्यन्यथानुपपत्त्या भेदमङ्गीकृत्य तस्य सविशेषाभेद एवाश्रयणीय इति शेषः । विशेषणविशेष्यभावादित्यादिपदेनान्यतरपरिशेषाभावादिपरिग्रहः । **भेदपरम्परेति** । धर्मधर्मिणोर्भेदः स च धर्मिणा भिन्नः । विशेषणं च विशेषणविशेष्यभावादीति परम्परेत्यर्थः ।

॥ इति ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च सविशेषाभिन्नत्वे कल्पनागौरवमपसिद्धान्तश्च ॥

* * *

॥ अथ ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च निर्विशेषाभिन्नत्वे तद्भेदतादेरनुपपत्तिः ॥

१०५ **सु०— द्वितीयं दूषयति अभिन्न इति ।**

अनु०— अभिन्नो निर्विशेषश्चेद्भेदस्तद्भेदता कुतः ।

भेदो यदि भेदिभ्याम**भिन्नो निर्विशेष**श्च स्यात् तदा तस्य **तद्भेदता** तयोरयं भेद इत्येवम्भावः **कुतो** न कुतोऽपि, तदीयताया भेदेन विशेषेण वा विनाऽनुपपत्तेः । तन्मात्रत्वे च धर्मधर्मिणावेव स्तो न भेद इति स्यात्, तथा च धर्मधर्मिणावित्यपि न स्यात्, भेद एवास्ति न धर्मधर्मिणाविति वा भवेत्, ततश्च भेदोऽपि न स्यादिति ।

परि०— ततश्चेति । भेदिनोरभावतश्चेत्यर्थः ।

यादु०— ततश्च भेदोऽपीति । भेदिनोरभावे भेदस्याप्यनुपपत्तेरिति भावः ।

वं०प०— **अनुपपत्तेरिति** । तयोश्च त्वयाऽनङ्गीकारादिति भावः । एकतरपरिशेषश्च स्यादित्याह **तन्मात्रत्व इति** । तस्य भेदस्य धर्मधर्मिमात्रत्वे धर्मधर्मिभ्यां निर्विशेषात्यन्ताभेदे सतीत्यर्थः । **न स्यादिति** । द्वित्वस्य भेदव्याप्तत्वादिति भावः ।

शे०चं०— **तदीयताया इति** । अभेदाभ्युपगमात्र भेदेन तदीयतानिर्वाहः । तस्य च निर्विशेषत्वाभ्युपगमात्र विशेषेणापि तदुपपत्तिरिति भावः । भेदस्य धर्मिणा निर्विशेषाभेदाभ्युपगमेऽन्यतरमात्रपरिशेषश्च स्यादित्याह **तन्मात्रत्वे चेति** । इष्टापत्तिं परिहरति **तथा चेति** । द्वित्वस्य भेदाविनाभूतत्वादिति भावः । प्रकारान्तरेणान्यतरावशेषमुपदर्शयति **भेद एवेति** । अत्रापीष्टापत्तिं परिहरति **ततश्चेति** । सम्बन्धिनोरभावे ससम्बन्धिकपदार्थाभावनियमादिति भावः ।

।। इति ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च निर्विशेषाभिन्नत्वे तद्भेदतादेरनुपपत्तिः ।।

* * *

।। अथ ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च निर्विशेषाभिन्नत्वे दूषणान्तराणि ।।

।। अथ भेदस्य विशेषणत्वादिरूपेण दृश्यमानत्वान्यथानुपपत्त्या स्वरूपभेददूषणानिस्तारः ।।

१०६ सु०— भेदस्य भेदिस्वरूपत्वमङ्गीकृत्य विशेषमनङ्गीकुर्वाणं प्रति दूषणान्तरमाह **अनेनेति** ।

अनु०— **अनेनानेन भिन्नोऽयमिति यत्सविशेषतः ।**
भेद एवैष बहुधा दृश्यते तत्किमुत्तरम् ।

भिन्नोऽयं घट इति स भेद एव विशेषतः विशेषणत्वेन दृश्यते न तु घटः, किन्तु विशेष्यत्वेन ।। तथा **अनेनानेन** । व्यत्ययो बहुलमिति पञ्चम्यर्थे तृतीया । सहयोगे वा । पटाद्भिन्नस्तम्भाद्भिन्नो घट इत्येष **भेद एव सविशेषतः** प्रतियोगिविशेषसाहित्येन **दृश्यते** । तथाऽयं पदार्थोऽनेन वक्रत्वेनानेन कोटरवत्त्वेन पुरुषाद्भिन्न इति **स एष भेद विशेषतो** व्यावर्तकधर्मेण **दृश्यते** । पदार्थस्त्वक्षसन्निकर्षमात्रेण ।। तथा अस्मात्पटादस्मात्स्तम्भादस्मात्कुड्याद्भिन्नोऽयं घट इत्येष **भेद एव सविशेषतः** प्रतियोगिविशेषसाहित्येन निमित्तेन **बहुधा दृश्यते** । घटस्त्वेकधैव ।। अतो न भेदो घटस्य स्वरूपमिति यत्स्वरूपभेदस्य दूषणं परैरुच्यते, **तत्तस्य किमुत्तरं** त्वयाऽभिधास्यते, यदि विशेषो नाङ्गीक्रियते, इत्यर्थः ।

यदि विशेषो नाङ्गीक्रियते तदा भेदो भेदिनाऽभिन्न इत्यपि नाङ्गीकर्तुं शक्यते, भेद-भेदिनोर्भेदसाधकानामनेकेषां भावात् । विशेषेणैव हि तेषामन्यथासिद्धिं व्युत्पाद्य प्रतीति-बलेन भेदस्य भेदिनाऽभेदो वक्तव्यो नान्यथेति भावः ।

परि०— 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्त' इति अन्यशब्दार्थयोगे पञ्चमीविधा-नात् कथं तृतीयेत्यत आह **व्यत्ययो बहुलमिति** । अस्यापि छन्दस्तुल्यत्वादेवमुक्तम् । **सहयोगे वा इति** । 'सहयुक्तेऽप्रधान' इति सूत्रे सहपदाप्रयोगेऽपि तदर्थविवक्षायां तृतीया भवतीति युक्तग्रह-णेन ज्ञापितत्वादिति भावः ॥ **पटाद्भिन्न इति** । घट इत्याकृष्यते, साहित्येनेति प्रकारे तृतीया । 'धर्मेण' इत्यत्र ज्ञापकेनेति ज्ञेयम् । अभिन्न इत्यपीति पदविभागः ।

वं०प०— न तु घटो विशेषणत्वेन दृश्यत इत्यनुवर्तते । सहयोगे तृतीयेत्येतदुपपादयति **तथेति** ॥ **व्यावर्तकधर्मेणेति** । व्यावर्तकधर्मानुमेयत्वेनेत्यर्थः । **अनेकेषां** तदीयत्वादिहेतूनाम् ।

शे०चं०— मूले भिन्न इति ॥ **अनेनेति** ॥ **सविशेषत इति** । बहुधेत्याद्यनेकविशेषणवैयर्थ्यमित्या-शङ्क्य तत्तदर्थविशेषसूचकत्वान्न तस्य वैयर्थ्यमित्याशयेन तदुपदर्शयन्नेव वाक्यं खण्डशो व्याचष्टे **भिन्न इत्यादिना** । मूले विशेषपदं विशेषणपरम् । तच्च भावप्रधानम् । आद्यादित्वात्तृतीयान्तात्तसिरित्यभिप्रेत्य विशेषत इत्यनूद्य व्याचष्टे **विशेषतो विशेषणत्वेनेति** । अस्मिन्पक्षे छान्दसत्वं कल्पनीयं भवतीत्यपरितोषात्प्रकारान्तरेण तृतीयोपपत्तिमाह **सहयोगे वेति** । तात्पर्यमाह **यदीति** ॥ **अनेकेषामिति** । तदीयत्वादीनामित्यर्थः ।

वा०र०— अस्मिन्पक्षे छान्दसत्वमिति । व्यत्ययो बहुलमिति सूत्रे छन्दसि शायजपीति पूर्वसूत्रा-च्छान्दसीत्यस्यानुवृत्तेस्तेन सूत्रेण छन्दस्येव सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरेत्यादिवृत्त्युदाहृतबहुलग्रहण-सङ्ग्राह्यसुवादिव्यत्ययविधानात् । भाष्यवाक्यस्य छान्दसत्वाश्रयणाभावे तेन व्यत्ययाप्राप्तेः पूर्ववाक्ये छान्दस-त्वमाश्रितमिति सिद्धवत्कृत्यैतदुक्तमिति ज्ञातव्यम् ।

॥ इति भेदस्य विशेषणत्वादिरूपेण दृश्यमानत्वान्यथानुपपत्त्या स्वरूपभेददूषणानिस्तारः ॥

* * *

॥ अथ अङ्गीकृतभेदिस्वरूपस्य तदीयत्वादिना प्रतीयमानत्वाप्रतीयमानत्वाभ्यां व्यवस्थाया अपि दोषः ॥

१०७ सु०— 'तदीयत्वेन विशेषणत्वेन सप्रतियोगित्वेन लिङ्गित्वेन बहुत्वेन च प्रतीय-मानोऽन्योन्याभावादिरूपो भेदो न भेदिस्वरूपतयाऽङ्गीक्रियते, यस्तु स्वरूपतयाऽङ्गीक्रियते

नासौ तदीयत्वादिना प्रतीयत' इति तस्योत्तरं ब्रूम इति चेन्न, अस्यैव प्रसिद्धत्वादन्यस्य तदभावात्, अन्यथा स्वरूपस्यैव भेद इति पारिभाषिकं नामान्तरमुक्तं स्यात्। न चाद्वैतवादिनः स्वरूपं नाङ्गीकुर्वते, तत्किमनेन भेदेन। तददिमुक्तं स एष इति प्रसिद्धिद्योतकाभ्याम्। तदीयत्वादिरुपचार इति चेन्न, प्रतीतेः स्फुटत्वात्, बाधकाभावेनाभ्रान्तित्वाच्च। तदिदमप्युक्तं दृश्यत इति।

परि०— शङ्कामुखेन प्रागुक्तं सर्वं निष्कृष्यानुवदति **तदीयत्वेनेत्यादिना**। 'तद्भेदता कुत' इत्यस्यानुवादः **तदीयत्वेनेति**। 'अभिन्नश्चेदनवस्थे'त्यत्र प्रतीयमानो भेदो विशेषणादिभावेनैवेत्युक्तमनुवदति **विशेषणत्वेनेति**। 'अनेनानेन' इति श्लोकस्य योजनात्रयेण लब्धमर्थमनुवदति **सप्रतियोगित्वेनेत्यादिना**॥ **लिङ्गित्वेन** वक्रकोटरत्वादिलिङ्गानुमेयत्वेनेत्यर्थः॥ **अस्यैवेति**। अन्योन्याभाववैधर्म्यादिरूपस्यैवेत्यर्थः। **तदभावात्** प्रसिद्ध्यभावादित्यर्थः। **अद्वैतवादिन इति**। भेदस्य भेदिना निर्विशेषाभेदवादिन इत्यर्थः॥ **उपचार इति**। तथा व्यवहार एव न प्रतीतिरित्यर्थः॥ **स्फुटत्वादिति**। पटाद्घटो भिन्न इति जानामीति प्रतीतत्वस्य साक्ष्यनुभवसिद्धत्वादित्यर्थः।

गु०दी०— **न चाद्वैतवादिन** इत्यत्र **अद्वैतवादिनः** धर्मधर्मिणोरैक्यवादिन इत्यर्थः।

यादु०— 'तद्भेदता कुत' इत्युक्तानुवादः **तदीयत्वेनेति**। **विशेषणत्वेनेत्यादिस्तु** अनेन भिन्नोऽयमित्यादिनोक्तानुवाद इति ज्ञातव्यम्॥ **लिङ्गित्वेनेति**। व्यावर्तकधर्मानुमेयत्वेनेत्यर्थः। अन्योन्याभावादिरूप इत्यत्रादिपदेन पृथक्त्वसङ्ग्रहः। **अद्वैतवादिनो** भेदाभाववादिनः॥ **उपचार इति**। तथा व्यवहारमात्रं न प्रतीतिरस्तीति भावः। **स्फुटत्वात्** साक्षिसिद्धत्वात्।

वं०प०— **तदीयत्वेनेत्यादि**। तदीयत्वेन भेदप्रतीतिस्तद्भेदतेत्यनेनोक्ता। विशेषणत्वेन प्रतीतिश्च **अनेनेत्यनेन** उक्ता। **भिन्नोऽयमित्यारभ्य विशेष्यत्वेनेत्यन्तेनोपपादिता**। सप्रतियोगिकत्वेन प्रतीतिश्चाप्य**नेनेत्यनेनोक्ता**। तथा **अनेनेत्यारभ्य दृश्यत** इत्यन्तेन उपपादिता। **लिङ्गित्वेन** व्यावर्तकधर्मानुमेयत्वेन प्रतीतिश्चाप्यनेनेत्यनेनोक्ता। तथाऽयं पदार्थोऽनेन वक्रत्वेनेत्यारभ्य सन्निकर्षमात्रेणेत्यन्तेनोपपादिता। बहुत्वेन प्रतीतिश्च बहुधेत्यनेनोक्ता। तथैवेत्यारभ्यैकधैवेत्यन्तेनोपपादिताऽनुसन्धेया। **अन्योन्याभावादीत्यादिपदेन** पृथक्त्वम्। **यस्त्विति**। स्वरूपभेद इत्यर्थः। पृथक्त्वाभावतद्रूपान् भेदांस्त्वीनहं कल्पयामीति भावः। **अस्यैव** अन्योन्याभावरूपभेदस्यैव। प्रसिद्धत्वात्। भेदशब्दार्थतयेति शेषः। **अन्यस्य** स्वरूपभेदस्य। **तदभावात्** भेदशब्दार्थत्वेन प्रसिद्ध्यभावात्॥ **अन्यथेति**। स्वरूपभेदस्यैव भेदशब्दार्थत्वे येऽद्वैतवादिनः स्वरूपमङ्गीकृत्य भेदं नाङ्गीकुर्वन्ति तान्प्रति हि भेदस्त्वया साधनीयः। स्वरूपस्यैव भेदशब्दार्थत्वे तादृशभेदसाधनं तान्प्रति

त्वत्क्रियमाणमयुक्तम् । कुत इत्यत आह **न चेति** । असद्विलक्षणस्वरूपाङ्गीकारादिति भावः ॥ **उपचार इति** । तदीयत्वव्यवहारमात्रमेव । न तद्विषयिणी प्रतीतिरस्ति । अस्ति चेत्सा भ्रमरूपैव न प्रमारूपा । तथा चोभयथाऽपि न तदीयत्वादिप्रतीतीनां भेदसाधकत्वमिति भावः ।

शे०चं०— स एष इत्येतद्व्यावर्त्यमाशङ्कते **तदीयत्वेनेति** । अयं च तद्भेदता कुत इत्यस्यानुवादः । विशेषणत्वेनेत्यादिस्तु अनेनानेन भिन्नोऽयमित्यादिनोक्तस्येति द्रष्टव्यम् ॥ **लिङ्गित्वेनेति** । व्यावर्तकधर्मानुमेयत्वेनेत्यर्थः । अन्योन्याभावादिरूप इत्यादिपदेन पृथक्त्वपरिग्रहः ॥ **अस्यैवेति** । विशेषणत्वादिना प्रतीयमानस्यान्योन्याभावस्यैव भेदत्वेन प्रसिद्धत्वादित्यर्थः ॥ **अन्यस्येति** । अन्योन्याभावातिरिक्तभेदस्य भेदत्वेन प्रसिद्ध्यभावादित्यर्थः ॥ **अन्यथेति** । अन्योन्याभावातिरिक्तस्वरूपस्यैव भेदत्वाङ्गीकार इत्यर्थः । किमत इत्यत आह **न चाद्वैतवादिन इति** । तथा च स्वरूपमात्रस्याद्वैतवादिनाऽप्यङ्गीकारान्नैतादृशभेदसमर्थनं तं प्रत्यर्थवदिति भावः । दृश्यत इत्येतद्व्यावर्त्यं शङ्कते **तदीयत्वादिरिति** । उपचार इति कोऽर्थः । तथा व्यवहारमात्रमेवास्ति न प्रतीतिरिति वा किंवाऽस्त्येव प्रतीतिः किन्तु सा भ्रान्तिरिति वेति विकल्पद्वयं मनसि निधायाद्यमनुभवविरोधेन दूषयति **प्रतीतेरिति** । द्वितीयं प्रत्याह **बाधकाभावेनेति** ।

वा०र०— **इत्यादिनोक्तस्येति** । अनुवाद इत्यनुवर्तते । **लिङ्गित्वेनेतीति** प्रतीकोपादानपाठः । अन्योन्याभावभेदौ च पृथक्त्वं चेति वैशेषिकाधिकरणीयानुव्याख्यानानुसारेणाह **आदिपदेन पृथक्त्वेति** । **स्वरूपस्यैवेति** । प्राभाकररीत्या स्वरूपस्यापि भेदत्वात् । उक्तं च अदृश्यत्वाधिकरणीयमूले 'भेदस्त्रिविधोऽस्माभिरभ्युपगम्यते' इत्यादि ।

स०व्र०— **अस्यैव प्रसिद्धत्वादिति** । विषाणत्वादिना प्रतीयमानस्यान्योन्याभावस्यैव भेदत्वेन प्रसिद्धत्वादित्यर्थः ॥ **अन्यस्येति** । अन्योन्याभावातिरिक्तस्येत्यर्थः । **तदभावात्** भेदत्वेन प्रसिद्ध्यभावात् ।

॥ इति अङ्गीकृतभेदिस्वरूपस्य तदीयत्वादिना प्रतीयमानत्वाप्रतीयमानत्वाभ्यां व्यवस्थाया अपि दोषः ॥

* * *

॥ अथ भेदाभेदयोर्भेदिस्वरूपत्वं तयोश्चाविशेषत्वे पर्यायत्वमप्रामाणिकत्वं प्रमाणविरुद्धत्वञ्च ॥

१०८ **सु०—** दूषणान्तरमाह **अभेदेति** ।

अनु०— अभेदभेदयोश्चैव स्वरूपत्वं हि भेदिनः ।

न केवलं भेदस्य । किन्त्वभेदस्य च **भेदिनः स्वरूपत्वमेवेति** योजना । यो भेदस्य भेदिना घटेनाभेदमङ्गीकरोति, तेन तस्याभेदस्यापि घटस्वरूपत्वमेवाङ्गीकरणीयम्, भेद-समानन्यायत्वादिति हिशब्दार्थः ।

ततः किमित्यत आह **तयोरपीति** ।

तयोरपि

अभेदोऽङ्गीकार्य इति शेषः ।

अस्त्वेकेन घटेनात्यन्ताभिन्नयोरभेदभेदयोरभेदस्ततोऽपि किमित्यत आह **अविशेषत्व** इति ।

अविशेषत्वे पर्यायत्वं हि शब्दयोः ।

अभेदभेदयोरत्यन्ताभेदे विशेषे चासत्यभेदभेदशब्दयोः **पर्यायत्वं** स्यात्, एकार्थ-वाचित्वाद्घटकलशशब्दवदिति **हिशब्दार्थः** ।

अस्त्वित्यत आह **अभेदेति** ।

अभेदभेदशब्दौ च पर्यायाविति को वदेत् ।

को वदेत् न कोऽपि । प्रत्युतापर्यायावित्येव वदति सर्व इत्यप्रामाणिकं प्रमाणविरुद्धं चैतदिति ।

एतदुक्तं भवति । भेदो भेदिनोऽभिन्नस्तन्न्यायेन सोऽभेदोऽपि ततस्तावन्योन्यम-प्यभिन्नाविति तावत् तत्त्वम् । तथा च भेदाभेदशब्दयोः पर्यायत्वप्राप्तौ विशेषबलेनैव हि तत्परिहरणीयम् । तस्य चानङ्गीकारे दुष्परिहरं तदापद्येतेति ।

ननु भेदभेदिशब्दयोरपि पर्यायत्वमापादयितुमुचितम् । सत्यम् । शिष्यैरूह्यतामिति नोक्तम् ।

परि०— 'च'शब्दस्यार्थो **न केवलमिति** । एवशब्दान्वयं दर्शयति **स्वरूपत्वमेवेति** । भेदाभेदयोरिति च शेषः ।

गु०दी०— **तयोरप्यविशेषत्व** इत्यत्र तयोर्धर्मिणा सहात्यन्ताभिन्नयोर्भेदाभेदयोरपि परस्परमभेदेऽङ्गीकरणीय इत्यर्थः ।

यादु०— **योजनेति** । बुद्ध्या विवेकेन योजनेत्यर्थः ।

वं०प०— मूले **तयोरपीत्यस्याभेदभेदयोरपीत्यर्थः** । द्वयोरप्येकेन घटेनात्यन्ताभिन्नत्वाद्यद्यदभिन्नाभिन्नं तत्तेनाभिन्नमिति व्याप्तेरिति भावः ॥ **उचितमिति** । तथा च भेदाभेदशब्दयोः पर्यायत्वापादनं किमर्थमाचार्यैः कृतमित्यर्थः ।

शे०चं०— यथाश्रुते विरुद्धार्थयोश्चैवशब्दयोरेकत्रान्वयानुपपत्तेः समुच्चेयालाभाच्च वाक्यस्य यथावद्योजनामाह **न केवलमिति** ॥ **योजनेति** । यद्यप्यभेदयोश्चेति समस्तं पदं तथाऽपि बुद्ध्या विवेकेन योजनेति द्रष्टव्यम् ॥ **भेदसमानेति** । येन न्यायेन भेदस्य भेद्यभिन्नत्वमङ्गीकृतं तेनैव न्यायेनाभेदस्यापि भेद्यभिन्नत्वमेव वाच्यम् । भेदपक्षेऽनवस्थानादित्यर्थः ॥ **अभेदोऽङ्गीकार्य इतीति** । यद्यदत्यन्ताभिन्नेनात्यन्ताभिन्नं तत्तेनात्यन्ताभिन्नमिति व्याप्तेरिति भावः ॥ **पर्यायत्वमिति** । क्रमेण प्रयोज्यत्वमित्यर्थः । एकस्मिन्वाक्ये प्रयोगानर्हत्वमिति यावत् । प्रमाणविरुद्धस्यापि लाभाय मूलमुपलक्षणतया योजयति **प्रत्युतेति** । समुदायार्थमाह **एतदिति** ॥ **सोऽभेदोऽपीति** । भेदिना घटेनाभिन्न इति वर्तते ॥ **तत इति** । एकेन घटेन भेदाभेदयोरत्यन्तभिन्नत्वादित्यर्थः । **तौ** भेदाभेदौ ॥ **आपादयितुमुचितमिति** । भेदभेदिनोरप्यत्यन्ताभिन्नत्वेन भेदभेदिशब्दयोरप्येकार्थत्वादिति भावः ।

वा०र०— **भेद्यभिन्नत्वमिति** । भेदेनाऽभिन्नत्वमित्यर्थः । एवमुत्तरत्रापि । कुतोऽङ्गीकार्य इत्यत आह **यद्यदत्यन्ताभिन्नेनेति** । अंशिनोंशैरभेदोऽयमित्यादौ बुद्ध्या विवृतमेतत् । **एकस्मिन्वाक्य इति** । 'पर्यायेणैव ते शब्दा वदन्त्यर्थान्न संहताः । पर्यायत्वं ततस्तेषां पर्यायाणां व्यवस्थितमि'ति प्रागुदाहृतवचनादिति भावः ।

॥ इति भेदाभेदयोर्भेदिस्वरूपत्वं तयोश्चाविशेषत्वे पर्यायत्वमप्रामाणिकत्वं प्रमाणविरुद्धत्वञ्च ॥

* * *

।। अथ पर्यायत्वपरिहारार्थं भेदाभेदयोर्भेदिना भेदमभेदञ्चाङ्गीकुर्वतां कार्यनिर्वाहार्थं विशेषाङ्गीकरणमनिवार्यम् ।।

१०९ **सु०— शङ्कते भेद इति ।**

अनु०— भेदोऽन्योन्यमभेदश्च भेदिना चेत्

यद्यपि भेदाभेदयोः **भेदिना** घटेन सह **अभेदः** तथाऽपि तयोः **अन्योन्यं भेदः** अस्ति इति न तच्छब्दयोः पर्यायत्वं प्रसज्यते । तत्किं विशेषेणेति । परिहरति **विशेषितेति** ।

विशेषिता ।

एवमङ्गीकुर्वाणेनाप्यभिन्ने वस्तुनि **विशेषिता** अङ्गीकरणीयैवेत्यर्थः ।

तत्कथमित्यत आह **अविशेष इति** ।

अविशेषे कथं भेदो भेदिनैकस्तथाऽभिदा ।
पुनस्तयोर्विभेदश्च भेदिमात्रत्वतो भवेत् ।

विशेषाभावे **भेदो भेदिना एकः** अभिन्नः **तथाऽभिदा भेदिना** = घटेनाभिन्ना, **पुनस्तयोः** भेदाभेदयोः परस्परं **भेदश्चेति** कथमुपपन्नं भवेत् । कुतो न भवेत् । भेदाभेदयोः **भेदिमात्रत्वतः** । अन्यथा घटस्यापि स्वतो भेदः स्यात् । घटेनाभिन्नयोर्भेदाभेदयोः परस्परं भेद(कार्य)निर्वाहार्थं घटेन सविशेष एवाभेदोऽङ्गीकार्य इति भावः ।

परि०— चशब्दः यद्यपि तथाऽपीत्यर्थे इत्युपेत्य वाक्यं योजयति **यद्यपीत्यादिना** । भेदिनेत्यनुवादः । घटेनेति व्याख्या ।

वं०प०— भेदिना घटेनेत्यत्र भेदिनेत्युपलक्षणम् । अभेदिनेत्यपि द्रष्टव्यम् ॥ **अन्यथेति** । भेदाभेदयोर्घटाभिन्नत्वेऽपि पुनर्भेदाङ्गीकार इत्यर्थः । ननु कथमनेन विशेषाङ्गीकारः प्राप्त इत्यतो मूलाभिप्रायमाह **घटेनेति** ॥ **अन्योन्येति** । भेदभेदिनोरभेदिनोश्चाङ्गीकृतौ यौ अभेदभेदविशेषौ तयोरन्योन्यसमुच्चयार्थावित्यर्थः ॥

परस्परमिति । भेदस्याभेदस्य च धर्मिणा सविशेषाभेदेऽपि भेदाभेदयोः परस्परं भेद एवाङ्गीक्रियते । न त्वभेदो नापि विशेष इत्येवं सविशेषाभेदव्यावृत्त्यर्थावित्यर्थः ।

शो०चं०— न तच्छब्दयोरिति । उक्तयुक्तेरप्रयोजकत्वेन भेदाभेदयोरभेदासिद्धेर्न तच्छब्दयोरेकार्थ-वाचित्वमिति न पर्यायत्वमिति भावः ॥ **भेदिमात्रत्व इति** । भेदिना घटेन निर्विशेषाभिन्नत्वादित्यर्थः । युक्तेरप्रयोजकत्वं परिहरति **अन्यथेति** । अविशेषादिति भावः । (भेदाभेदयोर्घटाभिन्नत्वेऽपि पुनर्भेदाङ्गीकार इत्यर्थः) । वाक्यतात्पर्यमाह **घटेनेति** ।

॥ इति पर्यायत्वपरिहारार्थं भेदाभेदयोर्भेदिना भेदमभेदश्चाङ्गीकुर्वतां कार्यनिर्वाहार्थं विशेषाङ्गीकरणमनिवार्यम् ॥

* * *

॥ अथ 'धर्मिणा भेदाभेदयोः सविशेषाभेदेऽपि भेदाभेदयोः परस्परं भेद एव नाभेदविशेषाविति पक्ष'स्य दूषणम्, अन्ततोऽभिन्ने वस्तुनि विशेषोऽङ्गीकार्य एव, भेदाभेदयोर्भेदकल्पनायाः कल्पनागौरवश्चेति ॥

११० **सु०**— शङ्कते **भेदिनश्चेति** ।

अनु०— भेदिनश्चैव भेदस्य विशेषो यदि गम्यते । अभेदाभेदिनोश्चैव

चशब्दावन्योन्यसमुच्चयार्थौ । **एवशब्दौ** परस्परं सविशेषाभेदव्यावृत्त्यर्थौ । **गम्यते** अभ्युपगम्यते । **भेदस्य भेदिनश्च** घटस्याभेदो **विशेषश्च** मयाऽभ्युपगम्यते । तथाऽ**भेदस्य अभेदिनश्च** तस्य सविशेषोऽभेदोऽ**भ्युपगम्यते** । तथा च भेदाभेदयोर्घटतन्मात्रत्वाभावेन परस्परं भेदोपपत्तेः न शब्दयोः पर्यायत्वम् । ततश्च भेदाभेदयोः परस्परमभेदो विशेषश्च अङ्गीकार्य इत्यसदिति भावः ।

एवमपि धर्मधर्मिणोर्भेदमभ्युपगच्छता अन्ततोऽभिन्ने वस्तुनि विशेषोऽङ्गीकर्तव्य इत्यभिमतं यद्यपि सिद्धमेव, तथाऽप्युक्तं तत्त्वं न परित्याज्यमित्याशयवान् परिहरति **किमिति** ।

किं भेदोऽभेदभेदयोः ।

एवञ्चेद् **अभेदभेदयोर्भेदः** कस्मात्कल्प्यते । तयोरपि सविशेषाभेद एवाङ्गीकर्तव्यः । तत्रोपपत्तिमाह **विशेषेणैवेति** ।

विशेषेणैव सर्वत्र यदि व्यवहृतिर्भवेत् ।
कल्पनागौरवायैव किं भेदः कल्प्यते तदा ।

सर्वत्र भेदभेदिनोरभेदाभेदिनोश्चाभेदेऽपि **विशेषेणैव** तन्मात्रताभावनिबन्धना **व्यवहृतिर्भवेत्** इत्यङ्गीकृतं चेद् भेदाभेदयोः तर्हि **भेदः किं कल्पनागौरवायैव कल्प्यत** इति सोल्लुण्ठवचनम् । भेदाभेदयोर्घटिनेव परस्परमपि सविशेषत्वेनैव सर्वस्योपपत्तौ भेदकल्पने कल्पनागौरवं स्यात्, अनेकपदार्थकल्पनात्, द्विधा कल्पनाच्चेति भावः ।

परि०— सोल्लुण्ठवचनमिति । सोपहासवचनम् ।

गु०दी०— अनेकपदार्थकल्पनादित्यत्र भेदः घटः तयोरभेदः अभेदो घटः तयोरभेदः भेदाभेदयोस्तु पुनर्भेद इत्यनेकपदार्थकल्पनादित्यर्थः ।

वं०प०— घटतन्मात्रत्वाभावेनेति । यदि भेदोऽभेदो वा भेदिनाऽभेदिना वा घटेन घटकलशादिवन्निर्विशेषात्यन्ताभिन्नः स्यात्तदैव यो भेदोऽभेदेन निर्विशेषात्यन्ताभिन्नघटेनाभिन्न इत्यभेदेनाप्यभिन्नः स्यात् । न ह्येवमङ्गीक्रियते । किन्तु सविशेषाभेद एव । उक्तव्याप्तिश्च निर्विशेषात्यन्ताभेदस्थलनिष्ठैवातो न पर्यायत्वं भेदाभेदशब्दयोरित्यर्थः । **उक्तं तत्त्वमिति** । तयोरपीत्यनेन भेदाभेदयोरपि परस्परं सविशेषाभेद एवाङ्गीकार्य इति यत्तत्त्वमुक्तमस्माभिस्तन्न त्याज्यमित्यर्थः । (**शब्दयोः** भेदाभेदशब्दयोः ॥) **तन्मात्रताभावेनेति** । घटकलशादिवन्निर्विशेषात्यन्ताभेदाभावेनेत्यर्थः । **व्यवहृतिः** अपर्यायव्यवहारः **सोल्लुण्ठवचनं** सोपहासवचनम् । **सविशेषत्वेनैव** सविशेषाभेदवत्त्वेनैव ॥

शे०चं०— अन्योन्येति । पूर्वोत्तरार्धयोरिति शेषः (भेदभेदिनोरभेदाभेदिनोश्चाङ्गीकृताविमावभेदविशेषौ तयोरन्योन्यसमुच्चयार्थावित्यर्थः) ॥ **परस्परमिति** । भेदाभेदयोरिति शेषः । (भेदस्याभेदस्य च धर्मिणा सविशेषाभेदेऽपि भेदाभेदयोः परस्परभेद एवाङ्गीक्रियते न त्वभेदो नापि विशेष इत्येवं सविशेषाभेदव्यावृत्त्यर्थावित्यर्थः) ॥ **अभेदो विशेषश्चेति** । अनेन भेदिनश्चेत्यादि चशब्दद्वयं न केवलमन्योन्यसमुच्चयार्थमित्येव किन्तु

विशेषश्चेत्यपि सम्बन्धनीयम् । तत्र चशब्दावनुक्तस्याभेदस्य समुच्चयार्थावित्यपि द्रष्टव्यमित्युक्तं भवति ॥ **अभेदिनश्च तस्येति** । घटस्येत्यर्थः । यद्यपि भेदिमात्रत्वत इति पूर्वग्रन्थानुरोधेनाभेदभेदिनोरित्येव मूले, तथा अभेदस्य भेदिनश्च तस्येत्येव टीकायां च वक्तुमुचितं तथाऽपि भेदसम्बन्धित्वाद्घटस्य भेदित्ववदभेदसम्बन्धित्वादभेदित्वमप्यस्तीति ज्ञापयितुमेवमुक्तम् । अर्थस्तु पाठद्वयेऽपि घटस्येत्येव द्रष्टव्यम् ॥ सविशेषो भेदोऽभ्युपगम्यत इति विशेषश्चेत्यस्यानुवृत्तिः पूर्ववदर्थश्चेत्युक्तं भवति ॥ **शब्दयोरिति** । भेदाभेदशब्दयोरित्यर्थः ॥ **असदिति भाव इति** । ततश्च नैतच्छङ्कायाः प्रकृतासङ्गतिरिति भावः ॥ **उक्तं तत्त्वमिति** । भेदाभेदयोः सविशेषाभेद इत्येवंरूपमित्यर्थः । (तयोरपीत्यनेन भेदाभेदयोरपि परस्परं सविशेषाभेद एवाङ्गीकार्य इति यत्तत्त्वमुक्तमस्माभिस्तन्न त्याज्यमित्यर्थः ॥) **भेदभेदिनोरिति** । भेदघटयोरित्यर्थः ॥ **अभेदभेदिनोश्चेति** । अभेदघटयोरित्यर्थः ॥ **तन्मात्रताभावेति** । घटकलशादिवन्निर्विशेषात्यन्ताभेदाभावेत्यर्थः ॥ (व्यवहृतिः अपर्यायव्यवहारः । तदीयत्वादिव्यवहृतिरित्येवार्थः) **सोल्लुण्ठेति** । सोपहासमित्यर्थः ॥ अभिप्रायमाह **भेदाभेदयोरिति** । **अनेकपदार्थकल्पनादिति** । भेदाभेदयोर्भेदाभ्युपगमे भेदाभेदरूपपदार्थद्वयकल्पनादित्यर्थः ॥ **द्विधेति** । भेदाभेदयोर्भेदं कल्पयता भेदाभेदस्थले भेदस्योक्तव्यवहारनिर्वाहकत्वं कल्पनीयम् । भेदाभेदयोर्भेदिना घटेनाभेदेऽपि विशेषबलेनोक्तव्यवहारनिर्वाहकत्वेन क्वचिद्भेदस्य क्वचिद्विशेषस्य च कल्पनादिति भावः ।

वा०र०— पूर्वोत्तरार्धयोरिति शेष इति । तदर्थयोरित्यर्थः । अत्र पूर्वश्चोत्तरार्धश्चेति पूर्वार्धोत्तरार्धार्थ इत्यनयोः समुच्चयो विवक्षितः । न तु सम्पूर्णोत्तरार्धस्य । किं भेदाभेदयोरित्युत्तरार्धे द्वितीयभागस्य शङ्काकोटौ निवेशाभावादिति ज्ञेयम् । परस्परमित्येतद्भेदभेदिनोर्वाऽभेदाभेदिनोर्वा परस्परमित्यर्थकं चेद्व्याघात इत्यत आह **भेदाभेदयोरिति शेष इति** । **विशेषश्चेत्यपीति** । पूर्वार्धगतविशेषपदमुत्तरार्धेऽप्यनुवृत्ततया मूलकृता स्वीकृत्य व्याख्यानादुत्तरार्धेऽपि विशेषपदस्थित्या तस्य चशब्दसम्बन्धाभिधानमित्यभिप्रेतत्वात् स्थलद्वयगतचशब्दद्वयस्य विशेषपदद्वयेन सम्बन्धः कर्तव्य इत्यर्थः । **चशब्दावनुक्तस्येति** । पूर्वोत्तरार्धयोर्विशेषमात्रोक्तावप्यभेदोक्त्यभावात् सविशेषाभेदरूपविशिष्टार्थप्रतिपादनं न लभ्यत इत्यतश्चशब्दौ स्थानद्वयगतावभेदार्थकावित्यर्थः । यद्यपि पूर्वार्धगतविशेषपदस्येव चशब्दोक्ताभेदस्याप्यनुवृत्तिरित्याश्रयणेऽप्युत्तरार्धे सविशेषाभेदप्रतिपादनलाभः सम्भवतीति नोत्तरार्धगतचशब्दस्याभेदार्थकत्वमावश्यकम् । तथापि तद्गतचशब्देनैव पूर्वार्धगतेनेवाभेदसमर्पणसम्भवे किमभेदस्याप्यनुवृत्त्याश्रयणेनेति भावेन चशब्दस्योत्तरार्धेऽप्यभेदार्थकत्वमुक्तमिति ज्ञातव्यम् । **विशेषश्चेत्यस्येति** । अत्र विशेष इत्यस्येति वक्तव्ये अनुवृत्तविशेषपदस्य चशब्देन सम्बन्धोऽपि पूर्वोक्तोऽस्तीति भावेन विशेषश्चेति विशिष्टानुवादः । न तु चशब्दस्याप्यनुवृत्तिरत्राभिप्रेता । चशब्दद्वयमित्यादिपूर्वग्रन्थविरोधापातादिति ज्ञेयम् । **एतच्छङ्काया इति** । भेदिनश्चेत्यादिशङ्काया इत्यर्थः । **भेदाभेदस्थल इति** । भेदाभेदरूपस्थलविशेष इत्यर्थः । **व्यवहारेतीति** । भेदाभेदभेद्यभेदिरूपस्थलविशेषस्य व्यवहारनिर्वाहकत्वं कल्पनीयमित्यर्थः ।

* * *

॥ अथ अनेन 'अभिन्नश्चेत्पुरा न किम्'इत्यनुव्याख्यानस्य विवृतत्वम् ॥

१११ सु०— अस्त्वेवं ततः किमायातं प्रकृत इत्यत आह **विशेषेणैवेति** । भेदस्य भेदिनाऽभेदेऽपि तदीयत्वादिव्यवहृतिर्भेदाभेदयो(श्च)र्घटेनाभेदेऽप्यपर्यायशब्दव्यवहृतिर्यदि **विशेषेणैव भवेत् तदा धर्मधर्मिणोरपि भेदः किं** कल्पनागौरवायैव **कल्प्यते** । धर्मधर्मिणोर्भेदमङ्गीकृत्याप्यन्ततो विशेषोऽङ्गीकार्यः, ततो वरमादित एव तदङ्गीकरणम्, अन्यथा कल्पनागौरवप्रसङ्गात् इति । एतेन 'पुरा न किमि'ति विवृतं भवति ।

परि०— तदेव वाक्यं प्रकारान्तरेणापि योजयति **अस्त्वेवं ततः किं प्रकृत** इत्यादिना । *गुणगुणिभेदवादिना विशेषाङ्गीकारः ॥*

वं०प०— **भेदाभेदयोश्चेति** । भेदस्य भेदिना घटेनाभेदेऽप्यभेदस्याभेदिना घटेनाभेदेऽपीत्यर्थः ।

शे०चं०— **इत्यत आहेति** । इत्यतोऽप्याहेत्यर्थः ॥ **अन्यथा कल्पनेति** । धर्मधर्मिणोर्भेदाभ्युपगमे धर्मधर्मिरूपपदार्थद्वयकल्पनाद्धर्मधर्मिस्थले भेदस्योक्तव्यवहारनिर्वाहकत्वं, भेदाभेदस्थले विशेषस्येति द्विधा कल्पनाद्गौरवं स्यादित्यर्थः ॥ **विवृतमिति** । ततो न पौनरुक्त्यमिति भावः ।

वा०र०— पूर्वमवतारितस्य पुनरवतारादपिपदेन भाव्यमित्यतोऽध्याहारेण व्याचष्टे इत्यतोऽपीति ।

॥ इति अनेन 'अभिन्नश्चेत्पुरा न किम्'इत्यनुव्याख्यानस्य विवृतत्वम् ॥
॥ इति 'धर्मिणा भेदाभेदयोः सविशेषाभेदेऽपि भेदाभेदयोः परस्परं भेद एव नाभेदविशेषाविति पक्ष'स्य दूषणम्, अन्ततोऽभिन्ने वस्तुनि विशेषोऽङ्गीकार्य एव, भेदाभेदयोर्भेदकल्पनायाः कल्पनागौरवश्चेति ॥

* * *

॥ अथ कल्पनागौरवभयाद्धर्मधर्मिणोरभेदमङ्गीकृत्य भेदव्यवहारार्थं विशेषोऽङ्गीकर्तव्य इति शङ्कानिरासः ॥
॥ अथ अभेदप्रतीतावेव भेदव्यवहारार्थं विशेषोक्तिर्नान्यथा ॥

११२ सु०— यदि कल्पनागौरवभयाद्धर्मधर्मिणोरभेदमङ्गीकृत्य व्यवहारविशेषार्थं विशेषोऽङ्गीक्रियते, तर्हि गवाश्वयोरपि तथा कल्प्यताम्, अविशेषात्, तथा च भेद एव जगति न स्यादित्यत आह **ऐक्येति** ।

अनु०— ऐक्यप्रतीत्यभावेन भेद एव गवाश्वयोः ।

भेद एव स्वीक्रियते न विशेषः । गवश्वयोरिति प्रमादपाठः, मूलकोशेष्वदर्शनात् । ऐक्यप्रतीत्यभावेऽपि कुतो विशेषो नाङ्गीक्रियत इत्यत आह **स एवेति** ।

स एवेति प्रतीतौ हि विशेषो नाम भण्यते ।

धर्मधर्मिप्रतिबन्द्या हि गवाश्वयोर्विशेषः परेणापादनीयः । न च तत्र अविशेषः, अभेदप्रतीत्या तत्र तदङ्गीकारात्, इह च तदभावात्, भेदस्य प्रतीतिसिद्धत्वेन कल्पना-(गौरवाभावाच्चेति)भावादिति ।

परि०— यथाश्रुतमूलानुवादेन वा 'गवाश्वप्रभृतीनि चे'त्येकवद्भावमनाश्रित्य 'गवाश्वयोरि'-त्युक्तम् । मूले तु 'व्यत्ययो बहुलमि'ति समाधिः प्रागुक्ता ज्ञेया इति भावः ।

वं०प०— प्रमादपाठ इति । ननु कथं प्रामादिकत्वम् । गोऽश्वेति स्थिते ओकारस्यावादेशे गवअश्व गवश्वेति भविष्यतीति चेत् । सत्यम् । विशेषविधानपर्यालोचनयैतत्पाठस्य प्रामादिकत्वम् । तथाहि । 'अवङ्स्फोटायनस्य' अचि परे गोरवङ् वा स्यात् । गो अग्रं गवाग्रमिति दर्शनात् । प्रकृतेऽपि गो अश्वेति स्थितेऽचि परे गोरवङादेशे ङकारलोपे गव अश्वेति जाते अकः सवर्णदीर्घे गवाश्वेति रूपसिद्धिः । न च गोरवङादेशस्य विकल्पविधानाद्गवश्वमित्यपि भविष्यतीति कथं प्रामादिकत्वमिति वाच्यम् । स्वमते विकल्पत्वेऽपि स्फोटायनमते तु तस्य नित्यत्वमेवेति न दोषः ॥ (**तथा कल्प्यतामिति** । अभेदमङ्गीकृत्य भेदव्यवहारनिर्वाहाय विशेषः कल्प्यतामित्यर्थः ॥) **विशेष इति** । अभेदमङ्गीकृत्य विशेष आपादनीय इत्यर्थः । तदापादनयुक्तमिति गावः । कुतो न युक्तमविशेषादित्युक्तमिति चेत्तत्राह **न च तत्रेति** । **अविशेषः** साम्यम् ।

शे०चं०— तथेति । अभेदमङ्गीकृत्य विशेषेणैव व्यवहारविशेषनिर्वाहः कल्प्यतामित्यर्थः । प्रसङ्ग-मूलभूतव्याप्त्यभावात्तदाभासतामाशङ्क्य विशेषव्याप्त्यभावेऽप्यविशेषलक्षणसामान्यव्याप्तेः सत्त्वान्न प्रसङ्गाभासते-त्याह **अविशेषादिति** । इष्टापत्तिं परिहरति **तथा चेति** । उक्तन्यायेन घटपटादावप्यभेदमङ्गीकृत्य विशेषेणैव व्यवहारविशेषनिर्वाहसम्भवादिति भावः ॥ **गवाश्वयोरिति** । न च गवाश्वप्रभृतीनि चेति सूत्रे प्रभृतीनीति शब्द-रूपापेक्षनपुंसकनिर्देशानुरोधेन गणपाठे यादृशानि शब्दरूपाणि पठितानि तादृशानां साधुत्वमात्रस्यात्र विधानाद्गणे च गवाश्वप्रभृतीनां शब्दरूपाणां कृतावङादेशानां कृतैकवद्भावानामेव च पठितत्वेन गवाश्वमित्येव भाष्यतट्टीकयो-र्वक्तव्यत्वाद्गवाश्वयोरित्यकृतैकवद्भावप्रयोगः कथमिति वाच्यम् । गणपाठे पठितशब्दरूपाणां कृतैकवद्भावत्वस्य

प्रायिकत्वेन कृतावङादेशत्ववत्तस्यानियततया तथाप्रयोगसम्भवात् । अत एव 'अथासत्यपि सामान्ये स्यादपोहस्य कल्पना । गवाश्वयोरयं कस्मादगोपोहो न कल्प्यते ।' इत्यपोहवादस्थश्लोकवार्तिकस्थप्रयोगस्तट्टीकाकृता तस्य प्रायिकत्वाभ्युपगमेन समाहित इति द्रष्टव्यम् । यद्वा गोश्चाश्वश्चेति गवाश्वशब्दद्वन्द्वस्य कृतावङादेशस्य कृतैकवद्भावस्य साधुताया अनेन विधानात्तादृशद्वन्द्वपक्षे गवाश्वयोरित्यस्यानुपपत्तिप्रसक्तावपि गवश्वश्च गवाश्वौ इति गवाश्वशब्दद्वन्द्वस्यानेन तथाऽसाधुत्वाविधानाद्धटयोरितिवद्गवाश्वयोरिति निर्देशस्योपपन्नत्वात् । गवश्वयोरिति पाठस्य प्रमादपतितत्वे युक्तिमाह **मूलकोशेष्विति** । उपलक्षणं चैतत् । 'अवङ्स्फोटायनस्ये'ति यदवङ् न प्रवर्तते तदा 'एङः पदान्तादती'ति पूर्वरूपप्रसङ्गेन पशुद्वन्द्वविभाषया गोऽश्वस्य गोऽश्वयोरित्येव, सर्वत्र विभाषा गोरिति प्रकृतिभावपक्षे गोअश्वस्य गोअश्वयोरित्येव प्रयोगप्रसङ्गेनावादेशमाश्रित्य तथा पाठस्यासम्भवदुक्तिकत्वादित्यपि द्रष्टव्यम् ॥ **प्रतिबन्द्या हीति** । आपादकान्तराभावादिति भावः ॥ **तत्रेति** । धर्मधर्मिणोरित्यर्थः । **इहेति** । गवाश्वयोरित्यर्थः ॥ **भेदस्येति** । ततश्च भेदस्य प्रतीतिसिद्धत्वासिद्धत्वप्रयुक्तकल्पनागौरवभावाभावाभ्यामपि विशेषसद्भावान्न प्रसङ्गतन्मूलभूताविशेषसिद्धिरिति भावः ।

वा०२०— तदाभासतामिति । तदाभासतेत्याशङ्क्येत्यर्थः । गवाश्वप्रभृतीनि चेति सूत्रीयवृत्तिं प्रभृतीनीतिशब्दरूपापेक्षे नपुंसकनिर्देश एवेत्यादिशेष्यादिकं च मनसि निधाय सूत्रार्थनिष्कर्षेण दर्शयन् गवाश्वयोरिति द्विवचनानुपपत्तिमाशङ्कते **न च गवाश्वेति** । **साधुत्वमात्रस्येति** । गणपाठे पूर्वोत्तरशब्दनिर्देशमात्रे तात्पर्यं नास्ति, किन्तु तथा पठितानां रूपमपि गणपाठे विवक्षितम् । तथा च कृतैकवद्भावान्येव तत्र पठितानीति नैकवद्भावविधानार्थमेतत्सूत्रम् । किन्तु साधुत्वमात्रप्रतिपादनार्थमिति भावः । तदुक्तं मञ्जर्यां साधुत्वमात्रं विधीयते न त्वेकवद्भाव इत्याहेत्यादि । **कृतावङादेशानामिति** । अवङ्स्फोटायनस्येत्यनेन कृतावङादेशानामेवेत्यर्थः । स्फोटायनग्रहणस्य विकल्पार्थत्वेन पूजार्थत्वाभावादवङादेशाभावपक्षे विभाषावृक्षेत्यनेन पशुद्वन्द्वविभाषयैकवद्भावविकल्पे सत्यश्ववडवम् । अश्ववडवा इतिवद्गोश्वौ गोश्वा इत्येव रूपसद्भावादिति भावः । अवङादेशपक्ष एवैकवद्भाव इति नियममनुसृत्यैव गणपाठे पाठात्कृतावङादेशानां कृतैकवद्भावानामित्युभयं विशेषणम्, अत एव वृत्तौ यथोच्चारितं द्वन्द्ववृत्तमित्युक्तम् । व्याख्यातं च हरदत्तेन । गणे यादृशा कृतावङादेशाः पठितास्तादृशानामेव द्वन्द्ववृत्तं द्वन्द्वकार्यमेकवद्भावलक्षणं भवतीति । श्लोकवार्तिकस्थप्रयोग इति । ....धिकरणीयभाट्टवार्तिकस्थ इत्यर्थः । **तट्टीकाकृतेति** । राणककृतेत्यर्थः । **तथा साधुत्वेति** । कृतैकवद्भावत्वेन साधुत्वेत्यर्थः । न च पशुद्वन्द्वेत्युत्तरग्रन्थानुसारेण विभाषावृक्षेति प्राप्तविकल्पनिरासाय प्रवृत्तगवाश्वेत्यत्र गोशब्दः सास्नादिमत्पर इति तत्परित्यागेन पृथिव्यादिरूपार्थोत्तरपरिग्रहे एकवद्भावनियमाप्राप्त्या व्यक्तिद्वय एव गवाश्वयोरित्यस्योपपत्तिरिति न सकलगवाश्वसङ्ग्रहाभिप्रायकल्पनया गवाश्वशब्दद्वयाश्रयणमावश्यकमिति वाच्यम् । गवाश्वप्रभृतीनि यथाश्रुतान्येव साधूनीत्यादि तत्सूत्रीयव्याख्यानपर्यालोचनया अर्थान्तरे तत्प्रयोगाभावस्य सिद्धेः । अन्यथा अश्वगवावित्याद्युपपत्तिवदेतदप्युपपन्नमिति सूत्रानर्थक्यप्रसङ्गः । प्रायिको व्यवहारस्तु सास्नादिमन्तमादायैवाश्वस्येति ज्ञेयम् । ननु गवीश इत्यादाविवावङभावपक्षे 'एचोयवायाव' इत्यनेनावादेशे गवाश्वयोरित्यपि युज्यत एवेति कुतस्तत्पाठस्य

प्रमादत्वाश्रयणं मूल इत्यतस्तत्पक्षानुपपत्तिं दर्शयति **उपलक्षणं चैतदिति** । **अवङिति** । अवङ्पक्षे उक्तरीत्या गवाश्वयोरित्येव प्रसङ्गो निवारयितुं शक्यत एव । अवङभावपक्षे तु विभाषावृक्षेत्यनेन विभाषया पशुग्रहणगृहीत-गवाश्वशब्दयोरेकवद्भावविधानात् पक्षद्वयेऽप्येङः पदान्तादतीत्यनेन पूर्वरूपे सति गोऽश्वस्य गोऽश्वयोरित्येव रूपं स्यात् । यदि च 'सर्वत्र विभाषा गोः' इत्यनेन प्रकृतिभावः पररूपापवादेनाश्रीयते तदापि गो अश्वस्य गो अश्वयोरित्येव प्रयोगः स्यात् । न तु गवाश्वयोरिति प्रयोगोपपत्तिरिति योजना । **पशुद्वन्द्वविभाषयेति** । विभाषा-वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणामिति सूत्रेण वृक्षादीनां द्वन्द्वो विभाषयैकवद्भवतीति विधानात् पशुद्वन्द्वभूतगोमहिषं गोमहिषावित्यत्रेव तादृशगवाश्वशब्दद्वन्द्वस्याप्येकवद्भावविकल्पेनेत्यर्थः । इत्येव च प्रयोगेति चशब्दयुक्तः पाठः स्वरसः । चशब्दाभावपक्षे तदर्थान्तर्भावेन व्याख्यानं ज्ञातव्यम् । आत्मतत्त्व-विवेकेऽपि गवाश्वयोरिति प्रयोगोऽस्ति । विद्यैवेत्यधिकरणीय 'भिद्यते हृदयग्रन्थिरि'त्येतद्भाष्यमूलस्थ-'कर्मणां बहुतरत्वादि'त्येतट्टीकायां बहुतरं चेत्याद्युक्तम् । तद्वद्गवाश्वं च गवाश्वं चेत्यादिकमिति ज्ञेयम् । **ततश्च भेद-स्येति** । गवाश्वयोर्भेदस्य प्रतीतिसिद्धत्वेन तमङ्गीकृत्य अन्ततो विशेषाङ्गीकारे कल्पनागौरवाभावः । धर्म-धर्मिणोस्तु तदप्रतीत्या भेदमङ्गीकृत्य अन्ततो विशेषाङ्गीकारे कल्पनागौरवमित्यर्थः । अयमितीदंशब्दो हि प्रकृत-परामर्शकः ।

।। इति अभेदप्रतीतावेव भेदव्यवहारार्थं विशेषोक्तिर्नान्यथा ।।

।। इति कल्पनागौरवभयाद्धर्मधर्मिणोरभेदमङ्गीकृत्य भेदव्यवहारार्थं विशेषोऽङ्गीकर्तव्य इति शङ्कानिरासः ।।

।। इति ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च निर्विशेषाभिन्नत्वे दूषणान्तराणि ।।

।। इति ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदेऽङ्गीक्रियमाणे तस्य भेदस्याभिन्नत्वेऽपि द्वेधा विकल्प्य दूषणम् ।।

।। इति भेदवादिनं विशेषमङ्गीकारयति ।।

* * *

।। अथ अभेदवादिनाऽपि विशेषमङ्गीकारयति ।।

।। अथ तत्र क्रियादिविषयाणां वाक्यानां मायिकविषयतामङ्गीकुर्वता मायावादिनाऽप्यपर्यायसिद्ध्यर्थं विशेषोऽङ्गीकार्य एव ।।

११३ **सु०—** अधुनाऽभेदवादिनाऽपि विशेषमङ्गीकारयति **सच्चिदादेरिति** ।

अनु०— सच्चिदादेरपर्यायसिद्ध्यर्थं मायिनाऽपि हि ।
अङ्गीकार्यो विशेषोऽयं

मायिनाऽपीति । क्रियादिविषयाणां वाक्यानां मायिकविषयतामङ्गीकुर्वताऽपि इति यावत् । तत्र हेतुः **सच्चिदादेः** पदसमूहस्य **अपर्यायत्वसिद्ध्यर्थमिति** । **अयमिति** अपर्यायशब्दप्रवृत्तिहेतुः । विशेषस्य तथाभावः प्रमित इति हिशब्दः ।

एतदुक्तं भवति । सन्तु तावत् क्रियादिविषयाणि वाक्यान्यसत्यविषयाणि तथाऽपि 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादीनि तावत् सत्यविषयाणि परेणाङ्गीकृतान्येव । तेषां चाखण्डार्थनिष्ठत्वे सत्यज्ञानादिपदानामेकार्थत्वेन पर्यायत्वं स्यात् । न च तद्युक्तम् सहप्रयोगदर्शनात् । न च भेदोऽङ्गीकर्तुं शक्यः, एकमेवाद्वितीयमित्यादिश्रुतिविरोधात् । अतः सत्येऽपि विशेषोऽङ्गीकार्यः । तस्य अपर्यायशब्दप्रवृत्तिहेतुता चानयैवार्थापत्त्या सिद्धा, तथात्वेनैव तत्कल्पनादिति ।

परि०— 'मायिनाऽपी'त्युक्तिस्वारस्यमाह **क्रियादीति** ॥ **अखण्डार्थनिष्ठत्व इति** । निर्धर्मकब्रह्मरूपार्थबोधकत्व इत्यर्थः ॥ **अनयैवेति** । सहप्रयोगदर्शनभेदनिषेधश्रुत्युभयान्यथानुपपत्तिरूपार्थापत्त्येत्यर्थः ।

यादु०— **अखण्डार्थनिष्ठत्व इति** । ब्रह्मप्रातिपदिकार्थमात्रनिष्ठत्व इत्यर्थः ।

वं०प०— **तथात्वेनैवेति** । अपर्यायशब्दव्यवहारनिर्वाहहेतुत्वेनैव विशेषस्य कल्पनादित्यर्थः ।

शे०चं०— **तत्र हेतुरिति** । विशेषाङ्गीकारे हेतुरित्यर्थः । सच्चिदादेरित्यस्यार्थपरत्वे पर्यायत्वाप्रसक्तेस्तत्प्रसञ्जकतया शब्दपदार्थतया व्याचष्टे **सच्चिदादेः पदसमूहस्येति** । सत्यं ज्ञानमित्यादिपदसमूहस्येत्यर्थः ॥ मूलेऽपर्यायेति भावप्रधान इति भावेनोक्तम् **अपर्यायत्वेति** ॥ धर्मधर्म्यभिन्नस्य तच्छब्दयोरपर्यायत्वनिर्वाहकस्य पूर्वप्रकृतस्य विशेषस्य सच्चिदादिशब्दपर्यायत्वाद्यनिर्वाहकत्वेनायमिति तत्परामर्शानुपपत्तेराह **अयमितीति** ॥ **तथाभाव इतीति** । अपर्यायशब्दप्रवृत्तिहेतुत्वमित्यर्थः ॥ ननु सत्यत्वादीनां परस्परं भेदेनैव तच्छब्दानामपर्यायत्वनिर्वाहान्न तदर्थं विशेषोऽङ्गीकार्यः । अङ्गीकृतेनापि विशेषेण कथमपर्यायत्वनिर्वाहः । किञ्च विशेषस्याप्यपर्यायशब्दप्रवृत्तिहेतुत्वसाधकं प्रमाणमित्यत आह **एतदुक्तं भवतीति** ॥ **अखण्डार्थनिष्ठत्व इति** । ब्रह्मप्रातिपदिकार्थमात्रनिष्ठत्व इत्यर्थः । **एकार्थत्वेन** ब्रह्मस्वरूपमात्रप्रतिपादकत्वेनेत्यर्थः । **पर्यायत्वं** वाक्यभेदेन प्रयोज्यत्वम् । **सहप्रयोगेति** । सत्यं ज्ञानमनन्तमित्येकवाक्यप्रयोग इत्यर्थः ॥ **अत इति** । सत्यत्वादीनां निर्भेदत्वं तच्छब्दानामपर्यायत्वं चेत्येतदुभयान्यथाऽनुपपत्तेरित्यर्थः ॥ **अनयैवेति** । सत्यत्वादीनां निर्भेदत्वं तच्छब्दानामपर्यायत्वं चेत्येतदुभयान्यथाऽनुपपत्त्यैवेत्यर्थः । ननूक्तार्थापत्तेः स्वरूपमात्रग्राहकत्वात् कथमनया-

प्रमादत्वाश्रयणं मूल इत्यतस्तत्पक्षानुपपत्तिं दर्शयति **उपलक्षणं चैतदिति** । **अवङिति** । अवङ्पक्षे उक्तरीत्या गवाश्वयोरित्येव प्रसङ्गो निवारयितुं शक्यत एव । अवङभावपक्षे तु विभाषावृक्षेत्यनेन विभाषया पशुग्रहणगृहीत-गवाश्वशब्दयोरेकवद्भावविधानात् पक्षद्वयेऽप्येङः पदान्तादतीत्यनेन पूर्वरूपे सति गोऽश्वस्य गोऽश्वयोरित्येव रूपं स्यात् । यदि च 'सर्वत्र विभाषा गोः' इत्यनेन प्रकृतिभावः पररूपापवादेनाश्रीयते तदापि गो अश्वस्य गो अश्वयोरित्येव प्रयोगः स्यात् । न तु गवाश्वयोरिति प्रयोगोपपत्तिरिति योजना । **पशुद्वन्द्वविभाषयेति** । विभाषा-वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणामिति सूत्रेण वृक्षादीनां द्वन्द्वो विभाषयैकवद्भवतीति विधानात् पशुद्वन्द्वभूतगोमहिषं गोमहिषावित्यत्रेव तादृशगवाश्वशब्दद्वन्द्वस्याप्येकवद्भावविकल्पेनेत्यर्थः । इत्येव च प्रयोगेति चशब्दयुक्तः पाठः स्वरसः । चशब्दाभावपक्षे तदर्थान्तिभवेन व्याख्यानं ज्ञातव्यम् । आत्मतत्त्व-विवेकेऽपि गवाश्वयोरिति प्रयोगोऽस्ति । विद्यैवेत्यधिकरणीय 'भिद्यते हृदयग्रन्थिरि'त्येतद्भाष्यमूलस्थ-'कर्मणां बहुतरत्वादि'त्येतट्टीकायां बहुतरं चेत्याद्युक्तम् । तद्वद्गवाश्वं च गवाश्वं चेत्यादिकमिति ज्ञेयम् । **ततश्च भेद-स्येति** । गवाश्वयोर्भेदस्य प्रतीतिसिद्धत्वेन तमङ्गीकृत्य अन्ततो विशेषाङ्गीकारे कल्पनागौरवाभावः । धर्म-धर्मिणोस्तु तदप्रतीत्या भेदमङ्गीकृत्य अन्ततो विशेषाङ्गीकारे कल्पनागौरवमित्यर्थः । अयमितीदंशब्दो हि प्रकृत-परामर्शकः ।

॥ इति अभेदप्रतीतावेव भेदव्यवहारार्थं विशेषोक्तिर्नान्यथा ॥
॥ इति कल्पनागौरवभयाद्धर्मधर्मिणोरभेदमङ्गीकृत्य भेदव्यवहारार्थं विशेषोऽङ्गीकर्तव्य इति शङ्कानिरासः ॥
॥ इति ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदमङ्गीकृत्य तस्य भेदस्य च निर्विशेषाभिन्नत्वे दूषणान्तराणि ॥
॥ इति ज्ञानादेर्ब्रह्मधर्मस्य ब्रह्मणा भेदेऽङ्गीक्रियमाणे तस्य भेदस्याभिन्नत्वेऽपि द्वेधा विकल्प्य दूषणम् ॥
॥ इति भेदवादिनं विशेषमङ्गीकारयति ॥

* * *

॥ अथ अभेदवादिनाऽपि विशेषमङ्गीकारयति ॥
॥ अथ तत्र क्रियादिविषयाणां वाक्यानां मायिकविषयतामङ्गीकुर्वता मायावादिनाऽप्यपर्यायसिद्ध्यर्थं विशेषोऽङ्गीकार्य एव ॥

११३ सु०— अधुनाऽभेदवादिनाऽपि विशेषमङ्गीकारयति **सच्चिदादेरिति** ।

अनु०— सच्चिदादेरपर्यायसिद्ध्यर्थं मायिनाऽपि हि ।
अङ्गीकार्यो विशेषोऽयं

मायिनाऽपीति । क्रियादिविषयाणां वाक्यानां मायिकविषयतामङ्गीकुर्वताऽपि इति यावत् । तत्र हेतुः **सच्चिदादेः** पदसमूहस्य **अपर्यायत्वसिद्ध्यर्थमिति** । **अयमिति** अपर्यायशब्दप्रवृत्तिहेतुः । विशेषस्य तथाभावः प्रमित इति **हि**शब्दः ।

एतदुक्तं भवति । सन्तु तावत् क्रियादिविषयाणि वाक्यान्यसत्यविषयाणि तथाऽपि 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादीनि तावत् सत्यविषयाणि परेणाङ्गीकृतान्येव । तेषां चाखण्डार्थनिष्ठत्वे सत्यज्ञानादिपदानामेकार्थत्वेन पर्यायत्वं स्यात् । न च तद्युक्तम् सहप्रयोगदर्शनात् । न च भेदोऽङ्गीकर्तुं शक्यः, एकमेवाद्वितीयमित्यादिश्रुतिविरोधात् । अतः सत्येऽपि विशेषोऽङ्गीकार्यः । तस्य अपर्यायशब्दप्रवृत्तिहेतुता चानयैवार्थापत्त्या सिद्धा, तथात्वेनैव तत्कल्पनादिति ।

परि०— 'मायिनाऽपी'त्युक्तिस्वारस्यमाह **क्रियादीति** ॥ **अखण्डार्थनिष्ठत्व इति** । निर्धर्मकब्रह्मरूपार्थबोधकत्व इत्यर्थः ॥ **अनयैवेति** । सहप्रयोगदर्शनभेदनिषेधश्रुत्युभयान्यथानुपपत्तिरूपार्थापत्त्येत्यर्थः ।

यादु०— **अखण्डार्थनिष्ठत्व इति** । ब्रह्मप्रातिपदिकार्थमात्रनिष्ठत्व इत्यर्थः ।

वं०प०— **तथात्वेनैवेति** । अपर्यायशब्दव्यवहारनिर्वाहहेतुत्वेनैव विशेषस्य कल्पनादित्यर्थः ।

शे०चं०— **तत्र हेतुरिति** । विशेषाङ्गीकारे हेतुरित्यर्थः । सच्चिदादेरित्यस्यार्थपरत्वे पर्यायत्वाप्रसक्तेस्तत्प्रसञ्जकतया शब्दपदार्थतया व्याचष्टे **सच्चिदादेः पदसमूहस्येति** । सत्यं ज्ञानमित्यादिपदसमूहस्येत्यर्थः ॥ मूलेऽपर्यायेति भावप्रधान इति भावेनोक्तम् **अपर्यायत्वेति** ॥ धर्मधर्म्यभिन्नस्य तच्छब्दयोरपर्यायत्वनिर्वाहकस्य पूर्वप्रकृतस्य विशेषस्य सच्चिदादिशब्दपर्यायत्वाद्यनिर्वाहकत्वेनायमिति तत्परामर्शानुपपत्तेराह **अयमितीति** ॥ **तथाभाव इतीति** । अपर्यायशब्दप्रवृत्तिहेतुत्वमित्यर्थः ॥ ननु सत्यत्वादीनां परस्परं भेदेनैव तच्छब्दानामपर्यायत्वनिर्वाहान्न तदर्थं विशेषोऽङ्गीकार्यः । अङ्गीकृतेनापि विशेषेण कथमपर्यायत्वनिर्वाहः । किञ्च विशेषस्याप्यपर्यायशब्दप्रवृत्तिहेतुत्वसाधकं प्रमाणमित्यत आह **एतदुक्तं भवतीति** ॥ **अखण्डार्थनिष्ठत्व इति** । ब्रह्मप्रातिपदिकार्थमात्रनिष्ठत्व इत्यर्थः । **एकार्थत्वेन** ब्रह्मस्वरूपमात्रप्रतिपादकत्वेनेत्यर्थः । **पर्यायत्वं** वाक्यभेदेन प्रयोज्यत्वम् । **सहप्रयोगेति** । सत्यं ज्ञानमनन्तमित्येकवाक्यप्रयोग इत्यर्थः ॥ **अत इति** । सत्यत्वादीनां निर्भेदत्वं तच्छब्दानामपर्यायत्वं चेत्येतदुभयान्यथाऽनुपपत्तेरित्यर्थः ॥ **अनयैवेति** । सत्यत्वादीनां निर्भेदत्वं तच्छब्दानामपर्यायत्वं चेत्येतदुभयान्यथाऽनुपपत्त्यैवेत्यर्थः । ननूक्तार्थापत्तेः स्वरूपमात्रग्राहकत्वात् कथमनया-

ऽपर्यायशब्दप्रवृत्तिहेतुता विशेषस्य सिद्ध्येदित्यतोऽनुपचरितभेदव्यवहारनिमित्तत्वस्यैव विशेषस्वरूपत्वेन युक्तं स्वरूपग्राहकस्यापि तत्साधकत्वमित्याशयेनाह **तथात्वेनैवेति** । स्वरूपग्राहिण्योक्तार्थापत्त्या भेदकार्यनिर्वाहकत्वेन विशेषस्य सिद्धत्वान्न तत्र प्रमाणान्तरापेक्षेत्याशयः ॥ इतीत्यस्येत्येतदिति पूर्वेणान्वयः ।

वा०र०— धर्मधर्मिणोर्भेदपक्षे प्रसञ्जितानवस्थादिदोषपरिहाराय भेदमङ्गीकृत्य अङ्गीकृतो यो धर्मधर्मिणोर्विशेषः स एव प्रकृतः । न च तस्य सच्चिदादिपदसमूहापर्यायत्वसाधकत्वं भवति । तस्य धर्मधर्मिणोर्घटरूपादिलक्षणापर्यायशब्दप्रवृत्तिसाधकत्वेऽपि स्थलान्तरीयापरपर्यायशब्दस्य प्रवृत्तिहेतुत्वायोगादित्याशयेनायमित्येतदवतारयति **धर्मधर्म्यभिन्नस्येति** । **तच्छब्दयोरपर्यायत्वेति** । यद्यपि धर्मधर्मिणोरभेदे ज्ञानादिमत्त्वमानन्दादिभोक्तृत्वमित्याद्ययुक्तमिति । विशेषशक्त्या गुणगुण्यादिभावेन स्थिता इति तदभिन्ना इत्येतत्सम्बन्धिमूलानुसारेण धर्मधर्मिणोरभेदमङ्गीकृत्य व्यवहारविशेषार्थं विशेषोऽङ्गीक्रियत इत्यव्यवहितपूर्वमूलानुसारेण च धर्मधर्मिणोरङ्गीकृतो विशेषो व्यवहारनिर्वाहकत्वेनैव इति तयोर्व्यवहारविशेषनिर्वाहकस्येत्येव वक्तुमुचितमिति तच्छब्दयोरपर्यायत्वेऽपि कथमुक्तम् । भेदाभेदशब्दयोरपर्यायत्वनिर्वाहकतया विशेषो भेदाभेदयोरङ्गीकर्तव्य इत्येव प्रागुक्तावपि धर्मधर्मिशब्दयोस्तन्निर्वाहाय तदङ्गीकारानुक्तेश्चेत्याभाति । तथापि भेदस्य भेदिनोऽभेदेऽपि तदीयत्वादिव्यवहृतिभेदाभेदयोर्घटनाभेदेऽप्यपर्यायशब्दस्य व्यवहृतिरिति व्यवहारविशेषप्रदर्शनपरमूलानुसारेण व्यवहारविशेषपदस्य तच्छब्दापर्यायत्वपरत्वस्यापि सम्भवात् 'तदभिन्न' इत्यनुव्याख्यानसम्बन्धिमूलस्य चोपलक्षणया प्रवृत्तेः प्रागपि धर्मधर्मिणोरङ्गीकृतविशेषस्य गुणगुण्यादिभावरूपव्यवहारनिर्वाहकत्वेनैव तच्छब्दयोरपर्यायत्वनिर्वाहकत्वेनापि प्रकृतत्वाद्युक्तमेव तच्छब्दयोरपर्यायतेति वचनम् । तर्हि व्यवहारान्तरनिर्वाहकत्वमपि प्रागुक्तत्वात् वक्तव्यमिति तदनुक्तिर्दोष इति चेन्न । सच्चिदादेः पदसमुदायस्यापर्यायत्वसिद्ध्यर्थमङ्गीकारयिष्यमाणविशेषस्य 'सच्चिदादेरपर्यायें'त्यनुभाष्यानुसारेण अपर्यायत्वनिर्वाहकत्वेनैव प्रस्तुततया वक्तव्यत्वेनाधिकांशस्यानावश्यकतया तदनुक्तेर्दोषित्वाभावादित्यवधेयम् । अपर्यायत्वादीत्युत्तरत्रादिपदं तु लेखकागतम् । उत्तरानुसारेण पूर्वत्रोपलक्षणेत्यप्याहुः । तन्न । अणुभाष्याननुसारात् । उत्तरत्र मूले व्यवहारान्तरस्याप्रसक्तेश्च ।

अनिर्वाहकत्वेनेति । अन्यगतविशेषस्यान्यत्र कार्यनिर्वाहकतेति प्रसङ्गादिति भावः । **आहेति** । नोक्तविशेषस्य धर्मधर्मिशब्दयोरपर्यायत्वे निर्वाहकत्वरूपेणायमिति परामर्शः । किन्त्वपर्यायशब्दप्रवृत्तिहेतुत्वस्योभयानुगतत्वात् तद्रूपेणैवेति न दोष इत्याहेत्यर्थः । **किं च विशेषस्येति** । साधकप्रमाणं च किमिति सम्बन्धः । **वाक्यभेदेनेति** । भिन्नभिन्नवाक्य एव प्रयोगार्हत्वम् । न त्वेकस्मिन् प्रयोगार्हत्वमित्यर्थः । 'पर्ययेणैव ते यस्मात् वदन्त्यर्थान्न संहताः । पर्यायत्वं ततस्तेषां पर्यायाणां प्रतिष्ठितमि'ति न्यायमकरन्दोदाहृतवचनस्य जिज्ञासाधिकरणमूले प्रागुदाहृतत्वादिति भावः । **न च भेदोऽङ्गीकर्तुं शक्य इति** मूलम् । सत्यादिपदार्थे प्रातिपदिकमात्रे भेदो नाङ्गीकर्तुं शक्यः । येनार्थभेदात् सत्यादिपदानां पर्यायत्वं स्यादिति भावः । **एकमेवेति** मूलम् । एकमेवेति श्रुत्या ब्रह्मणि भेदाभावप्रतिपादनात् सत्यादिपदवाच्यप्रातिपदिकार्थभेदो नास्तीति पर्यायत्वमनिवार्यमिति भावः ।

सत्यादीनां निर्भेदत्वमिति । सत्यादिपदानि प्रातिपदिकार्थमात्रनिष्ठानीत्युक्ते सत्यज्ञानादिपदार्थानां ब्रह्ममात्ररूपत्वं तच्च सत्यज्ञानादिरूपं ब्रह्म निर्भेदमिति तेषां निर्भेदत्वमिति लब्धं भवतीति भावेन पदार्थानां निर्भेदत्वमुक्तम् । अन्यथा सत्यादिरूपस्य निर्भेदत्वमित्येकवचनप्रयोगापातः । सत्यादिपदैः सत्यत्वादेः ब्रह्मण्यनर्पणेऽपि ब्रह्म वस्तुतः सत्यादिरूपमिति भावेन सत्यादित्वेन ब्रह्मकीर्तनम् । फलतस्तु सत्यादिपदार्थस्य सत्यादिरूपब्रह्मण इत्यर्थः । सत्यज्ञानादिकेऽप्येवमिति जन्माधिकरणीयभाष्यव्याख्यानावसरे सत्यज्ञानादिकमित्युक्तेश्च । अदृश्यत्वाधिकरणमूलटीकयोः सत्यज्ञानानन्दादौ वाचकत्वे शक्तिमतामित्यादेरेव प्रयोगाच्च । सत्यत्वादीनामिति भावप्रत्ययपाठस्त्वदृश्यत्वाधिकरणीयसत्यत्वादीनामिति क्वाचित्कमूलपाठानुसारेण लेखकागतः । तन्मूलेऽपि सत्यादेरेवार्थतया स्पष्टमुक्तेः । एवमुत्तरत्रापि सत्यादीनां निर्भेदत्वमित्यत्र विचारो बोध्यः ।

* * *

।। अथ अपोहवादाश्रयेण(अतद्व्यावृत्तिरेव शब्दार्थ इति मतमङ्गीकृत्य) अपर्यायत्वावैयर्थ्यशङ्के, एवं कुसृष्टौ कल्पितायामपि न सत्यस्याखण्डतासिद्धिरिति तत्समाधानञ्च ।।

।। अथ तत्र ब्रह्मण्यसत्यत्वादिविशेषणव्यावृत्तिरूपपूर्वपक्षस्य द्वेधा कल्पनम् ।।

।। अथ तत्रापि असत्यादिपदानामपोहवाचित्वेन अपर्यायत्वावैयर्थ्यशङ्के ।।

११४ सु०— अपोहवादाश्रयेण शङ्कते यदीति ।

अनु०— यद्यसत्यविशेषणम् ।
पृथक् पृथग्वारयितुं शब्दान्तरमितीष्यते ।

सत्यादिपदानां विधिवाचित्वे विधीयमानानां सत्यत्वादिविशेषणानां ब्रह्मण्यभावात् स्वरूपमात्रस्य चैकत्वात् पर्यायत्वं स्यात् । न चैवम् असत्यत्वाद्यपोहवाचित्वात् । न चैवं सति वैयर्थ्यम्, ब्रह्मण्यसत्यत्वादीनां विशेषणानां भ्रान्तिकल्पितत्वेन तन्निवारणार्थत्वात् । सन्ति हि 'नास्ति ब्रह्म', सदपि न ज्ञानं परिच्छिन्नं (चे)वेत्यादिप्रतीतयः प्राणिनाम् । न च सत्यपदमज्ञानस्याप्यपोहं वक्ति, येनैकेनैवालमिति स्यात् । तस्मान्न पर्यायत्वं वैयर्थ्यं चेति ।

परि०— अपोहवादेति । पटादिपदानां घटादिव्यावृत्तिवाचित्वमेव न तु पटत्वाद्यर्थकत्वमिति यो वादस्तदाश्रयेणेत्यर्थः ।। असत्यत्वाद्यपोहेति । असत्यत्वाज्ञानत्वपरिच्छिन्नत्वराहित्यवाचित्वादित्यर्थः ।

यादु०— अपोहवादेति । घटादिपदैरघटादिव्यावृत्तिरेव वाच्या न घटत्वादिरिति मताश्रयणेत्यर्थः ।

शे०चं०— यद्यसत्यविशेषणमित्यादिशङ्काया अपसिद्धान्तपराहततानिरासायाह **अपोहेति** । अतद्व्यावृत्तिरेव शब्दार्थ इति मतमङ्गीकृत्येत्यर्थः । नन्वस्मिन्पक्षे पर्यायत्वाप्रसङ्गेऽपि वैयर्थ्यं स्यादेव । असत्यत्वादिव्यावृत्तिप्रतिपादनप्रयोजनानुपलब्धेरित्यत आह **न चेति** । नन्वेवमपि सत्त्वपदेनैव भ्रान्तिकल्पितस्यासत्त्वस्येव तत्कल्पिताज्ञानादीनामपि व्यावृत्तेः सिद्धत्वाज्ज्ञानादिपदान्तरवैयर्थ्यमित्यत आह **न चेति** । किन्त्वसत्त्वस्यैव । तथा च भ्रान्तिकल्पिताज्ञानादिव्यावर्तकत्वान्न ज्ञानादिपदवैयर्थ्यमिति भावः ।

वा०र०— इति मतमिति । बौद्धमतमित्यर्थः । **तत्कल्पिताज्ञानादीनामिति** । अज्ञानत्वादीनामित्यर्थः । अज्ञानस्यापोहमिति मूलानुसारेण भावप्रत्यययोगाभावः । मूले तु भावप्रधाननिर्देशाभिप्रायेणाज्ञानेत्येवोक्तम् । सत्यपदं चासत्त्वं ज्ञानपदं चाज्ञानत्वमात्मपदं चानात्मत्वमिति वक्ष्यमाणमूलानुसारादिति स्पष्टमिति नोक्तमिति ज्ञातव्यम् । एवमुत्तरत्रापि ।

।। इति असत्यादिपदानामपोहवाचित्वेन अपर्यायत्वावैयर्थ्यशङ्के ।।

* * *

।। अथ सत्यादिपदानां सत्यत्वादिपृथगर्थवाचित्वेन अपर्यायत्वावैयर्थ्यशङ्के ।।

११५ सु०— यद्वा सत्यादिपदानि सत्यत्वादिपृथगर्थवाचीन्येवेति न पर्यायतामापद्यन्ते । ब्रह्मणि तु लक्षणया प्रवर्तन्त इति न तत्र विशेषणानि समर्पयन्ति, न हि गङ्गापदं तीरे गङ्गात्वमर्पयति । न चैवमेकेनैव लक्षितत्वादितरेषां वैयर्थ्यमिति वाच्यम्, आरोपितानामसत्यत्वादिविशेषणानां प्रत्येकं निवारणेन सार्थक्यात् । न च सङ्गतिग्रहणविषयाभावाल्लक्षणानुपपत्तिः, शबले गृहीतसङ्गतिकानां सत्यब्रह्मलक्षकत्वोपपत्तेः । अतो न पर्यायत्वं नापि वैयर्थ्यमिति शङ्कार्थः ।

असत्यविशेषणम् असत्यत्व(ादि)विशेषणम् । आरोपितं विशेषणमिति वा । **इति यदीष्यत** इत्यन्वयः ।

वं०प०— पृथगर्थेति । परापरजातिरूपेत्यर्थः ।। **विषयेति** । धर्मीत्यर्थः । तथा च वाच्यार्थद्वारत्वाल्लक्षणाया वाच्यार्थो वाच्य एवेत्यर्थः ।

शे०चं०— सत्यत्वादिपृथगर्थेति । सत्यत्वज्ञानत्वादिविशिष्टभिन्नभिन्नार्थवाचीन्येवेत्यर्थः ।। **न पर्यायतामापाद्यन्त इति** । वाच्यार्थभेदेनैकार्थ्याभावादिति भावः । तथात्वे तद्वाच्यत्वाद्ब्रह्मणोऽनेकविशेषण-

विशिष्टत्वेन सखण्डतया निर्विशेषत्वादिरूपाखण्डत्वव्याघात इत्यतो भवेदेतदेवं यदि ब्रह्मणस्तद्वाच्यत्वं स्यात् । न चैतदस्तीत्याह **ब्रह्मणीति** । अस्तु लक्ष्येऽपि ब्रह्मणि विशेषार्पकत्वं सत्यादिपदानामित्यतः तथा सत्यविशेषाद्गङ्गापदस्यापि तीरे विशेषार्पकत्वं स्यादिति भावेनाह **न हीति** ॥ **न चेति** । अधिकलक्षणायां चाखण्डार्थत्वहानिरिति भावः । लक्ष्यार्थभेदाभावान्नाखण्डार्थताहानिरित्यभिप्रेत्य परिहरति **आरोपितानामिति** । ननु ब्रह्मणोऽन्यस्य सङ्गतिग्रहणविषयस्याभावेन ब्रह्मण एव सत्यादिपदसङ्गतिग्रहणविषयता वाच्या । तथा च वाच्यत्वमपि तस्यैव युक्तम् । तत्कथं लक्ष्यत्वान्नाखण्डत्वहानिरित्युच्यत इत्याशयेन शङ्कते **न चेति** । लक्ष्यत्वेनाभिमताच्छुद्धब्रह्मणोऽन्यस्य सगुणब्रह्मण एव सङ्गतिग्रहणविषयत्वाभ्युपगमेन शुद्धस्य तदभावान्न तस्य लक्ष्यत्वहानिरिति भावेन परिहरति **शबल इति** । अत एव च सत्यत्वादिविशिष्टगुणब्रह्मवाचिनामिति शेषः । ततश्च वाच्यार्थभेदान्न पर्यायत्वं लक्ष्यार्थभेदाभावान्नाखण्डत्वहानिरपीत्याशयः । अत एव सगुणब्रह्मवाचिनामिति पूर्वटीकाऽपि शबले गृहीतसङ्गतिकत्वात् सत्त्वादिगुणविशिष्टसगुणब्रह्मवाचिनामिति, शबले गृहीतसङ्गतिकानामिति तत्त्वोद्योतटीकाऽप्यत एव सत्त्वादिगुणविशिष्टब्रह्मवाचिनामित्येव व्याख्येयेति न टीकाग्रन्थानां परस्परं विसंवादः । अत एवैतत्पक्षतात्पर्यं न्यायामृते एतेनेत्यादिग्रन्थेनैवमेवाभिहितमिति ध्येयम् । नन्वसत्यत्वमेव विशेषणम् । न त्वसत्यं तत्कथमुच्यतेऽसत्यविशेषणमित्यतो व्याख्याति **असत्यत्वविशेषणमिति** । अस्मिन्पक्षे धर्मिवाचकस्य शब्दस्य धर्मे लक्षणाऽऽश्रयणीया भवतीत्यपरितोषादाह **आरोपितमिति** ।

वा०र०— धर्मप्रतिपादनमात्रेण न शब्दः कृती भवति किन्तु धर्मिसंसृष्टतयैव । तथा च सत्यत्वादीत्येतत्सत्यत्वादिविशिष्टार्थकमित्याह **सत्यत्वज्ञानत्वादिविशिष्टेति** । **अधिकेति** । स्वरूपातिरिक्तपदार्थलक्षणायामित्यर्थः । स्वरूपातिरिक्तधर्मानङ्गीकारादङ्गीकारे वाऽखण्डार्थत्वहानिरिति भावः । **अत एव चेति** । शबले गृहीतसङ्गतिकत्वादेवेत्यर्थः । अनेन सङ्गतिकानामित्येतद्धेतुगर्भं शबले गृहीतसङ्गतिकत्वात् सत्यब्रह्मलक्षकत्वोपपत्तिरितीत्युक्तं भवति । ब्रह्मलक्षकत्वोपपादकतया वाच्यार्थ भेदस्य तदुपपादकसङ्गतिग्रहणोपपादकशबले गृहीतसङ्गतिकत्वस्य प्रकृततया तेन सत्यत्वादिविशिष्टसगुणब्रह्मवाचितया एव वाच्यत्वादिति भावेन शेषं पूरयति **सत्यत्वादीति** ।

उक्तार्थस्य शबले गृहीतेत्यनेन वाक्येनोक्तत्वादेव प्रागुक्तदोषद्वयपरिहारः सिद्धो भवतीति भावेन आह **ततश्च वाच्यार्थभेदादिति** । अवश्यं च विशिष्टार्थवर्णनेन दोषाभाववर्णनम् । अन्यथा शबले गृहीतसङ्गतिकत्वादित्येव वक्तव्यं मूले स्यादिति ज्ञेयम् । **पूर्वटीकाऽपीति** । 'सत्यज्ञानादिकेऽप्येवमि'त्यनुभाष्यसम्बन्धी जन्माधिकरणटीकेत्यर्थः । **शबल इति** । तस्य सगुणब्रह्मवाचित्वोपपादकत्वात् तेन हेतुना सगुणब्रह्मवाचिनामिति योजितम् । इति व्याख्येयेत्युत्तरेण सम्बन्धः । **अत एव सत्त्वादीति** । शबले गृहीतसङ्गतित्वादेवेत्यर्थः । एवं योजने नियामकं चाह **अत एवेति** । सत्यादिपदानि सत्यत्वादिविशिष्टपृथक्पृथगर्थवाचितया शबले गृहीतसङ्गतिकतया च न पर्यायाणीत्यादि शङ्कितपक्षेत्यर्थः । **एतेनेत्यादीति** । न्यायामृते हि 'न च कुम्भाद्यनुगतसत्तापरजातिरि'त्यादिना परापरसामान्यवाचितापक्षं कल्पतरूक्तं निराकृत्य एतेन सत्यत्वादिविशिष्टशबल-

ब्रह्मवाचिनां सत्यादिशब्दानां शुद्धब्रह्मणि लक्षणेति न पर्यायत्वमिति निरस्तमित्यनेनैतन्मूलगतपक्षतात्पर्यकथना- दित्यर्थः । विशेषणमितीत्यत इति पाठः स्वरसः । एकेतिशब्दमात्रपाठे विशेषणमिति कथमुच्यत इति पूर्वत्रेत्यत इत्युत्तरत्र च सम्बध्यते । यद्वेतिशब्दस्य पूर्वत्रैवान्वयः । अतो व्याख्यातीत्येवोत्तरभाग इति ज्ञेयम् ।

चषकः— शबले सविशेषे । गृहीतसङ्गतिकानाम् अधिगतशक्तिकानाम् ।

।। इति सत्यादिपदानां सत्यत्वादिपृथगर्थवाचित्वेन अपर्यायत्वावैयर्थ्यशङ्के ।।
।। इति ब्रह्मण्यसत्यत्वादिविशेषणव्यावृत्तिरूपपूर्वपक्षस्य द्वेधा कल्पनम् ।।

* * *

।। अथ तथात्वेऽपि न ब्रह्मणो निर्धर्मितासिद्धिरिति तत्पक्षखण्डनञ्च ।।

११६ सु०— परिहरति **मायेति** ।

अनु०— मायाविशेषराहित्यविशेषणविशेषिता ।
सत्यस्यापि भवेत्

मायाशब्देन आरोपितत्वमाचष्टे । एवं कुसृष्टौ कल्पितायामपि न सत्यस्याखण्डता- सिद्धिः । कल्पितासत्यत्वादिविशेषराहित्यलक्षणविशेषणविशेषिताया अवर्जनीयत्वात् इत्यर्थः ।

परि०— न सत्यस्याखण्डतासिद्धिरिति । निर्धर्मतासिद्धिरित्यर्थः ।

यादु०— अखण्डतासिद्धिरिति । निर्विशेषतासिद्धिरित्यर्थः ।

शे०चं०— कल्पितेति । कल्पितं यदसत्यत्वादिविशेषणं तद्राहित्यलक्षणं यद्विशेषणं तद्विशिष्टत्व- स्येति योजना ।

।। इति तथात्वेऽपि न ब्रह्मणो निर्धर्मितासिद्धिरिति तत्पक्षखण्डनञ्च ।।
।। इति अपोहवादाश्रयेण(अतद्व्यावृत्तिरेव शब्दार्थ इति मतमङ्गीकृत्य) अपर्यायत्वावैयर्थ्यशङ्के, एवं कुसृष्टौ कल्पितायामपि न सत्यस्याखण्डतासिद्धिरिति तत्समाधानञ्च ।।
।। इति क्रियादिविषयाणां वाक्यानां मायिकविषयतामङ्गीकुर्वता मायावादिनाऽप्यपर्यायसिद्ध्यर्थं विशेषोऽङ्गीकार्य एव ।।

* * *

॥ अथ अखण्डत्वखण्डनासिद्धिशङ्का, तत्समाधानश्च ॥

११७ सु०— शङ्कते सा चेति ।

अनु०— सा च तथा चेत्

भवेदखण्डत्वखण्डनं यद्यारोपितविशेषराहित्यरूपविशेषणविशेषिता सत्या स्यात् । न चैवम् । अपि तर्हि साप्यसत्यत्वादिवदारोपितैव । न हि आरोपितेन रूपेण गगनस्य नीरूपता विहन्यत इत्यर्थः । परिहरति **अनवस्थितिरिति** ।

अनवस्थितिः ।

वाक्यार्थस्येति शेषः । एवं तर्हि न कोऽपि वाक्यार्थो व्यवस्थितः स्यात्, सत्यत्वादिविशेषवत्तया असत्यत्वादिव्यावृत्तिमत्तया च अप्रतिपादितत्वात् । न हि संसर्गभेदौ विहाय वाक्यार्थोऽस्ति । ब्रह्मैव वाक्यार्थ इति चेन्न, तस्य स्वप्रकाशत्वात् । व्यावृत्तेश्च असत्यत्वादिति ।

यद्वा प्रतीता **सा च** स्वाभावव्यावर्तकत्वेनैव व्यवतिष्ठते न ब्रह्मविषयत्वेन येन अखण्डता व्याहन्यत इति शङ्कार्थः । एवमपि तदभावव्यावृत्तिरूपविशेषणविशिष्टताया अपरिहारादखण्डत्वहानिरेव । **साऽपि तथा चेत् अनवस्थितिः** ब्रह्मज्ञानस्याव्यवस्थैवेति परिहारार्थः ।

परि०— **न हि संसर्गभेदौ विहायेति** । क्वचिद्धर्मिणि धर्मसंसर्गं वा अतद्व्यावृत्तिरूपभेदं वा विनेति प्रकृताभिप्रायेणोक्तम् । क्वचित् 'संसर्गभेदौ विहाये'ति पाठः । तदा तु सोऽयमित्यादौ तादात्म्यस्यापि वाक्यार्थत्वादभेद इत्युक्तमिति ज्ञेयम् । ब्रह्मणः स्वप्रकाशतया वाक्याबोध्यत्वेऽपि असत्यादिव्यावृत्तिर्वाक्यार्थोऽस्त्वित्यत आह **व्यावृत्तेश्चेति** ॥ **स्वाभावव्यावर्तकत्वेनेति** । असत्यत्वादिव्यावृत्त्यभावव्यावर्तकत्वेनेत्यर्थः ॥ **साऽपीति** । उक्तरूपविशिष्टताऽपि । तथा चेत् स्वाभावव्यावर्तकत्वेनैवावतिष्ठते न ब्रह्मविशेषणत्वेनेति चेदित्यर्थः । स्वाभावव्यावृत्तिविशेषणविशिष्टता स्यादेवेति साऽपि तथा चेदनवस्थितिरित्यर्थः ।

यादु०— न हि संसर्गभेदाविति । भेदोऽतद्व्यावृत्तिः । अपोहवादिमतानुसारेणेदमुक्तमिति ज्ञातव्यम् ॥ **ब्रह्मैवेति** । ब्रह्मस्वरूपमात्रं वाक्यतात्पर्यविषयोऽर्थ इत्यर्थः । ब्रह्मैवेत्यत्रापि तात्पर्यविषयीभूतोऽर्थः किं ब्रह्मस्वरूपमुतावधारणार्थभूतेतरव्यावृत्तिरिति विकल्पं मनसि निधायाद्यं दूषयति **तस्येति** ॥ **स्वप्रकाशत्वात्** प्रमाणावेद्यत्वात् । द्वितीयं दूषयति **व्यावृत्तेश्चेति** । ततश्चातत्त्वावेदकत्वमागमस्य स्यादिति भावः । व्यावृत्तिविशिष्टब्रह्मस्वरूपं वाक्यार्थ इति पक्षस्तु प्रागेव दूषित इत्यवगन्तव्यम् ॥ **तथा चेदिति** । स्वभावव्यावर्तकत्वेनैव व्यवतिष्ठते न ब्रह्मविशेषत्वेनेति चेदित्यर्थः ।

वं०प०— सा चेति । असत्यत्वादिव्यावृत्तिः । **अखण्डता** निर्विशेषता ।

शे०चं०— नन्वस्त्वारोपितयाप्यारोपितविशेषणराहित्यरूपविशेषणविशेषितया ब्रह्मणोऽखण्डत्वखण्डनमित्यतः तथा सत्यविशेषादारोपितरूपेणापि गगनस्यापि नीरूपत्वखण्डनं स्यादिति भावेनाह **न हीति** । प्रसिद्धानवस्थितेः प्रकृतेऽप्रसरादनवस्थाशब्दोऽव्यवस्थापर इत्यभिप्रेत्य कस्येति तन्निरूपकजिज्ञासायामाह **वाक्यार्थस्येति शेष इति** । वाक्यार्थस्याव्यवस्थितत्वे हेतुमाह **सत्यत्वादीति** । सत्यत्वादिविशेषवत्तयाऽसत्यत्वादिव्यावृत्तिमत्तया च अप्रतिपादितत्वमात्रेण कुतो वाक्यार्थस्याव्यवस्थितत्वमित्यत आह **न हीति** ॥ **वाक्यार्थोऽस्तीति** । यदर्थप्रतिपत्त्यर्थं वाक्यं प्रयुज्यते स एव हि वाक्यस्यार्थः । संसर्गभेदयोरन्यतरप्रतिपत्त्यर्थमेव वाक्यं प्रयुज्यतेऽतस्तदुभयान्यतरदेव वाक्यार्थ इत्यर्थः ।

ननु नायमस्ति नियमः यत्संसर्गभेदप्रतिपत्त्यर्थमेव वाक्यप्रयोगात् तयोरेव वाक्यार्थत्वमिति । स्वरूपमात्रस्यापि तन्मात्रप्रतिपत्त्यर्थं प्रयुज्यमानलक्षणवाक्यार्थत्वदर्शनात् । तथा च चन्द्रस्वरूपमात्रस्य तत्स्वरूपमात्रप्रतिपत्त्यर्थं प्रकृष्टप्रकाशादिवाक्यार्थत्ववद्ब्रह्मस्वरूपमात्रस्यापि तत्स्वरूपप्रतिपत्त्यर्थं प्रयुज्यमानसत्यज्ञानादिवाक्यार्थत्वमुपपन्नमेवेत्यभिप्रेत्य शङ्कते **ब्रह्मैवेति** । नित्यसिद्धत्वान्न ब्रह्मणो वाक्यार्थत्वमित्याह **तस्येति** । न हि प्रकाशमानमेव वाक्यप्रतिपाद्यं भवितुमर्हति । तथा सति तस्यार्थस्य सिद्धत्वेन तत्प्रतिपादकवाक्यस्य वैयर्थ्यप्रसङ्गादिति भावः । यद्वाऽवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वं ब्रह्मणः परेणाङ्गीकृतम् । तथा च स्वप्रकाशं च वाक्यप्रतिपाद्यं चेति न युज्यते व्याघातात् । न चावेद्यत्वं फलाव्याप्यत्वं न वृत्त्यव्याप्यत्वमिति न व्याघात इति वाच्यम् । पराभिमतफलस्याप्रामाणिकताया अन्यत्र व्युत्पादितत्वात् । घटादेरपि फलाव्याप्यत्वापत्त्या स्वप्रकाशत्वप्रसङ्गादिति भावः ॥ ननु ब्रह्मस्वरूपं स्वप्रकाशतया सिद्धमपि सङ्कीर्णतयैव न तु व्यावृत्तमिति नाव्यावृत्तस्य ब्रह्मणो वाक्यार्थत्वमुपपन्नमित्यतः किमत्र व्यावृत्तिमद्ब्रह्मस्वरूपं तथाऽभिमतमुत स्वतन्त्राव्यावृत्तिरेव । नाद्यः । अखण्डार्थत्वभङ्गप्रसङ्गादिति भावेन द्वितीयं दूषयति **व्यावृत्तेश्चेति** । ततश्च तत्त्वावेदकत्वव्याघात इति भावः । यद्यप्यत्र व्यावृत्तेः पदार्थत्वान्न वाक्यार्थत्वमपदार्थस्यैव सर्वत्र वाक्यार्थत्वादन्यथा वाक्यवैयर्थ्यादित्येव वक्तुमुचितम् । तथाऽपि पदार्थस्यापि संसर्गस्य वाक्यार्थत्ववद्व्यावृत्तेरपि तदुपपत्तिशङ्कानिरासाय तदभिधानम् । यदि च वाक्येन विना संसर्गविशेषाप्रतिपत्तेर्न वाक्यवैयर्थ्यमिति तत्राभिमतं तर्हि वाक्यं विना व्यावृत्तिविशेषाप्रतिपत्तेस्तत्प्रतिपत्त्यर्थतया न वाक्यवैयर्थ्यमिति तुल्यमिति भावः ॥ केचित्त्वस्तु संसर्ग-

भेदयोरेव वाक्यार्थत्वं तथाऽपि सत्यत्वादिविशेषवत्तयाऽसत्यत्वादिव्यावृत्तिमत्तया चाप्रतिपादितत्वात् संसर्गस्य व्यावृत्तिमत्त्वस्य च सत्यज्ञानादिवाक्यार्थत्वासम्भवेऽपि स्वतन्त्रव्यावृत्तेस्तदर्थत्वं भविष्यतीत्यत आह **व्यावृत्तेश्चेतीत्याहुः** ।

प्रतीता सा चेति । सत्यपदेन प्रतीता सत्त्वव्यावृत्तिश्चेत्यर्थः ॥ **स्वाभावेति** । स्वस्या असत्यत्वव्यावृत्तेरभावेऽसत्यत्वं तद्वच्छेदकत्वेनेत्यर्थः ॥ **तदभावेति** । तस्य असत्यत्वव्यावृत्तेरभावोऽसत्यत्वं तस्या या व्यावृत्तिस्तद्रूपविशेषणविशिष्टताया अपरिहारादित्यर्थः ॥ **साऽपि तथा चेदिति** । तदभावव्यावृत्तिरपि स्वाभावव्यावर्तकत्वेनैवावतिष्ठते न ब्रह्मनिष्ठत्वेनेति चेदित्यर्थः ॥ **अव्यवस्थैवेति** । सत्यत्वादिधर्माणामिवासत्यत्वादिव्यावृत्तेरपि ब्रह्मणि कल्पितत्वेन वेदजन्यब्रह्मज्ञानस्य मिथ्याभूतसत्यत्वादिधर्मवैशिष्ट्यानवगाहित्ववत् मिथ्याभूतोक्तविधव्यावृत्तिवैशिष्ट्यानवगाहित्वप्रसङ्गाद्वेदजन्यब्रह्मज्ञानमेवंरूपमिति निर्णयासम्भवादिति भावः ।

वा०र०— आरोपितविशेषणेति । आरोपितं यद्विशेषणं तद्राहित्यरूपं यद्विशेषणं तेन या विशेषिता तयेति योजना । **यत्संसर्गभेदप्रतिपत्त्यर्थमेवेति** । संसर्गभेदप्रतिपत्त्यर्थमेव वाक्यप्रयोग इति नियमो नास्ति । तदभावादेव तन्नियमप्रयुक्तस्तयोरेव वाक्यार्थत्वमिति नियमोऽपि नास्तीत्यर्थः । कुतस्तदभाव इत्यत आह **स्वरूपमात्रस्यापीति** । **तन्मात्रेति** । स्वरूपमात्रप्रतिपत्त्यर्थं प्रयुज्यमानं यल्लक्षणवाक्यं प्रकृष्टः प्रकाशश्चन्द्र इत्यादिकं तदर्थत्वेत्यर्थः । **चन्द्रस्वरूपमात्रस्येति** । चन्द्रादिस्वरूपमात्रस्येत्यर्थः । प्रकाशादिवाक्येत्युत्तरानुसारात् । लक्षणवाक्यमात्रसाधारणत्वाच्च स्वरूपमात्रपरत्वोपायस्येति ज्ञेयम् । अनेन चन्द्रादिस्वरूपमात्रं लक्षणवाक्यार्थो भवितुमर्हति । चन्द्रादिस्वरूपमात्रप्रतिपत्त्यर्थं लक्षणवाक्यस्य प्रयुज्यमानत्वादिति व्यधिकरणस्यादोषत्वेन प्रयोगः सिद्ध्यति । सामानाधिकरण्यस्यावश्यकत्ववादिनं प्रति स्वमात्रप्रतिपत्त्यर्थं प्रयुज्यमानतद्वाक्यत्वादिति प्रयोगो ज्ञेयः । **अन्यत्र व्युत्पादितत्वेनेति** । मिथ्यात्वखण्डनटीकादौ व्युत्पादितत्वेनेत्यर्थः । देवदत्तादिस्वरूपमात्रस्य सिद्धत्वान्न स्वरूपमात्रे प्रश्न इति तत्त्वोद्योतवाक्यव्याख्यानानुसारेण शङ्कामुत्थाप्य तन्निरासादिकं करोति । **ननु ब्रह्मस्वरूपमिति** । ....सारेणाह **यद्यप्यत्र व्यावृत्तेरिति** । **पदार्थस्यापि संसर्गस्येति** । अन्विताभिधानवादसत्त्वेन संसर्गस्य पदार्थत्वादिति भावः । **तदुपपत्तिशङ्केति** । तदुपपत्तिरिति या शङ्का तन्निरासाय तदप्रसक्तय इत्यर्थः । न तु प्राप्तशङ्कानिरासोऽनभिधानेनेति भ्रमितव्यम् ।

स०व्र०— न हि संसर्गेति । अपोहवादिना तद्व्यावृत्तिरूपभेदस्यैव वाक्यार्थत्वेनाङ्गीकारात् तदभिप्रायेण भेदग्रहणं कृतम् । अत एव पूर्वं असत्यत्वादिव्यावृत्तिः सत्यादिपदार्थ इत्युक्तम् । यद्वा प्रतीतासत्यत्वादिव्यावृत्तिरित्यर्थः ॥ **स्वाभावेति** । असत्यत्वव्यावर्तकत्वेनेत्यर्थः । **अव्यवस्थेति** । सत्त्वादिधर्माणां ब्रह्मण्यनङ्गीकृतत्वेन तेन रूपेण ब्रह्मज्ञानं वेदेनोत्पद्यत इति वक्तुमशक्यत्वेनेत्यसत्यत्वादिव्यावृत्तिविशिष्टब्रह्मज्ञानमुत्पद्यत इति वक्तव्यम् । तथा च व्यावृत्तिरपि ब्रह्मणि यद्यसंत्या स्यात् तदा एतादृशं ब्रह्मज्ञानं वेदेन भवतीति निर्णयो न स्यादिति भावः ।

॥ इति अखण्डत्वखण्डनासिद्धिशङ्का, तत्समाधानञ्च ॥

॥ अथ ब्रह्मणो निर्विशेषत्वे कस्यापि पदस्य तत्र प्रवृत्त्यभावोऽपि ॥

११८ **सु०— न केवलं ब्रह्मणो निर्विशेषत्वे पदानां पौनरुक्त्यादि(कं) किन्नामैकस्यापि पदस्य तत्र प्रवृत्तिर्न भवेदित्याह यदीति ।**

अनु०— यदि सत्ये विशेषो न न तदुक्तिर्भवेत्तदा ।

गुणकर्मादिनिमित्तमनालम्ब्य कस्यापि शब्दस्य प्रवृत्त्यभावादिति भावः ।

परि०— पौनरुक्त्यादिकमिति । आदिपदेनोक्तरूपानवस्थितिग्रहः ।

यादु०— पौनरुक्त्यादीति । एकेनैव पदेन लक्षितत्वात् पदान्तरं व्यर्थमित्युपपादितत्वात् पौनरुक्त्यमुक्तमेवेति ज्ञातव्यम् ।

वं०प०— गुणकर्मादीति । तथा च यदि **सत्ये** ब्रह्मणि शब्दप्रवृत्तिनिमित्तभूतो गुणक्रियादिरूपो विशेषो न, तदा तेषां गुणक्रियादिवाचिशब्दानाम् उक्तिः ब्रह्मणि प्रवृत्तिरिति यावत्, न भवेदिति मूलयोजना द्रष्टव्या ।

शे०चं०— ब्रह्मणि वचनवृत्तिं वदन् प्रष्टव्यः । किं गुणकर्मजातिनिमित्तमालम्ब्य तत्र वचनवृत्तिः किंवा तदनालम्ब्य । नाद्यः । ब्रह्मणो गुणकर्मजातिरहितत्वाङ्गीकारेण तन्निमित्तकवचनवृत्तेस्तत्रायोगात् । न च डित्थादिशब्दवद्यदृच्छानिमित्ता प्रवृत्तिर्ब्रह्मण्यपि सम्भवतीति वाच्यम् । वैदिकानां शब्दानामसाङ्केतिकत्वेन तदयोगादिति भावेन द्वितीयं दूषयति **गुणकर्मादिनिमित्तमनालम्ब्येति** ॥ **कस्यापि शब्दस्येति** । वाचकशब्दस्येत्यर्थः ।

वा०र०— पूर्वं सत्यादिपदेषु लक्षणाविचारः यदि सत्ये विशेषो नेत्यादिना तुशब्दमात्रप्रवृत्त्यभावप्रतिपादनमित्याशयेन न केवलं ब्रह्मण इत्यादि मूलं प्रवृत्तमित्याशयेन तत्परतया योजयति **ब्रह्मणि वचनवृत्तिमिति** । अनेन मूलस्थप्रवृत्तिपदं वचनवृत्तिपरमित्युक्तं भवति । लक्षणापक्षनिराकरणं लक्ष्यते चेदित्युत्तरेण भवतीति वचनवृत्तिनिरास एव यदीति पूर्वभाष्यार्थ इत्यपि प्रतिपादितमनेनेति ज्ञेयम् । एतच्च 'वचनवृत्तिश्च द्रव्यगुणक्रियाजातिनिमित्ते'ति ईक्षत्यधिकरणीयमूलतट्टीकयोः अन्यत्रापि तत्र तत्र स्पष्टम् । तत्त्वनिर्णयटीकायां तु चतुष्टयी हि वाचकानां शब्दानां गतिः । जातिशब्दाः गुणशब्दाः क्रियाशब्दाश्चेति । तत्र जातिनिमित्ताः शब्दाः यथा ब्राह्मण इति । गुणनिमित्ताः यथा शुक्लो दण्डीति । क्रियानिमित्ता यथा पाचक इति । द्रव्यशब्दा यदृच्छानिमित्ताः यथा डित्थादय इति । तत्र न तावदाद्यप्रकारत्रयं ब्रह्मणि सम्भवति । जातिगुणक्रियारहितत्वाङ्गीकारात् । वैदिकशब्दानामसाङ्केतिकत्वान्न चतुर्थोऽपि प्रकार इत्युक्तम् । तदनुसारेणाह **न च डित्थादीति** ।

।। अथ ब्रह्मणः शब्दाभिधेयत्वं विहाय शब्दलक्ष्यत्वाङ्गीकारेऽपि विशेषिता स्यादेव ।।

११९ **सु०— शङ्कते लक्ष्यते चेत्तेनेति ।**

अनु०— लक्ष्यते चेत्तेन

स्यादयं दोषो यदि ब्रह्म शब्दाभिधेयं स्यात् । न चैवम् । किन्तु तेन शब्देन **लक्ष्यत** एव । न हि लक्षणा गुणक्रियाद्यपेक्षा । तथात्वे खल्वभिधैव स्यादिति ।

परिहरति **लक्ष्यमिति** ।

लक्ष्यमित्यपि स्याद्विशेषिता ।

एवमङ्गीकारेऽपि ब्रह्मणो **लक्ष्यमिति विशेषिता स्यात्** । लक्ष्यत्वं तावदपरिहार्यमित्यर्थः । उपलक्षणं चैतत् । मुख्यार्थयोगादिनाऽपि विशेषिता स्यादेव ।

शे०चं०— अपरिहार्यमिति । तथा च लक्ष्यत्वरूपविशेषवत्त्वान्निर्विशेषत्वरूपाखण्डत्वभङ्ग इति भावः ॥ स्यादेवेति । तस्य लक्षणाबीजत्वेन तदभावे लक्षणाया एवानिर्वाहादिति भावः ।

।। इति ब्रह्मणः शब्दाभिधेयत्वं विहाय शब्दलक्ष्यत्वाङ्गीकारेऽपि विशेषिता स्यादेव ।।

* * *

।। अथ लक्ष्यत्वस्यापि लक्ष्यत्वेऽङ्गीक्रियमाणेऽपि विशेषप्राप्तिरपरिहार्यैव,
तेनापि लक्ष्यत्वे चानवस्थितिः ।।

१२० **सु०— ननु लक्ष्यत्वमपि ब्रह्मणो नास्त्येव, लक्ष्यमित्यपि लक्षणयैवोच्यते नाभिधानवृत्त्येति चेन्न, अत्रापि वाक्ये परेण लक्ष्यपदस्य प्रयोगाल्लक्ष्यत्वविशेषप्राप्तेः ।**

तेनापि लक्ष्यमेवेति चेत् तत्राह **पुनरिति** ।

अनु०— पुनः पुनर्लक्षणायामपि स्यादनवस्थितिः ।

लक्षणायामाश्रितायां सत्यामिति शेषः ।

वं०प०— अत्रापीति । लक्ष्यपदेनापि ब्रह्म लक्ष्यमिति वाक्येऽपि ब्रह्मणि लक्ष्यपदस्य प्रयोगाल्लक्ष्यत्वरूपो विशेषः प्राप्त इत्यर्थः ।

शे०चं०— ब्रह्मणो लक्ष्यत्वाभावे कथं लक्ष्यशब्दवाच्यत्वं तस्येत्यतो लक्ष्यशब्देनापि लक्ष्यत्वाभ्युपगमेन वाच्यत्वाभावान्नानुपपत्तिरित्याह **लक्ष्यमित्यपीति** ॥ **लक्ष्यत्वविशेषप्राप्तेरिति** । तथा च अखण्डत्वभङ्ग इति भावः ॥ **तेनापीति** । तथा च लक्ष्यपदावाच्यत्वेन लक्ष्यत्वाप्राप्तेर्नाखण्डत्वभङ्ग इति भावः ॥ **लक्षणायामिति** । अत्रापि वाक्ये परेण लक्ष्यपदप्रयोगाल्लक्ष्यत्वरूपविशेषप्राप्तेरखण्डत्वभङ्गः । तेनापि लक्ष्यमिति तत्राप्येवमेवेत्यनवस्थैवेति भावः ।

॥ इति लक्ष्यत्वस्यापि लक्ष्यत्वेऽङ्गीक्रियमाणेऽपि विशेषप्राप्तिरपरिहार्यैव, तेनापि लक्ष्यत्वे चानवस्थितिः ॥
॥ इति ब्रह्मणो निर्विशेषत्वे कस्यापि पदस्य तत्र प्रवृत्त्यभावोऽपि ॥

* * *

॥ अथ अभावरूपविशेषवत्त्वस्याङ्गीकृतत्वेन निर्धर्मितासाधनप्रयासदूषणम् ॥
॥ अथ तत्र अभावरूपविशेषवत्त्वस्याङ्गीकृतत्वेन निर्धर्मितासाधनप्रयासरूपः पूर्वपक्षः ॥

१२१ **सु०—** शङ्कते **यदीति** ।

अनु०— यद्यभावविशेषित्वं स्यादङ्गीकृतमेव ते ।

ते मते इति शेषः । तृतीयार्थेऽव्ययं वा ॥ यदुक्तं 'मायाविशेषराहित्यविशेषणविशेषिता सत्यस्यापि भवेदि'ति, तन्नानिष्टम्, अभावरूपविशेषवत्त्वस्य मयाऽङ्गीकृतत्वात् । 'नेह नानाऽस्ती'ति श्रुतिः 'इह भूतले घटो नास्ती'तिवदभावं ब्रह्मण्यङ्गीकरोत्येव ॥ यच्चोक्तं 'न तदुक्तिर्भवेत्तदा' इति, तदप्यसत्, भावनिमित्ताभावेऽप्यभावनिमित्तेन पदप्रवृत्त्युपपत्तेः, अभावधर्मवत्त्वस्य च अङ्गीकृतत्वात्, एतेन लक्ष्यमित्येतदपि निरस्तम् । लक्ष्यपदस्याप्यपोहवाचित्वोपपत्तेरिति भावः ।

परि०— 'न लोकाव्ययनिष्ठे'ति निष्ठायोगे षष्ठीनिषेधादाह **ते मत इति शेष इत्यादि** ॥ **लक्ष्यपदस्याप्यपोहवाचित्वेति** । लक्ष्यमित्युक्तेरलक्ष्यं नेत्यर्थकत्वोपपत्तेरित्यर्थः ।

यादु०— अपोहवाचित्वेति । अलक्ष्यव्यावृत्तिवाचित्वोपपत्तेरित्यर्थः ।

वं०प०— अपोहेति । अलक्ष्यव्यावृत्तीत्यर्थः ।

शे०चं०— ननु 'कर्तृकरणोस्तृतीये'ति प्राप्तां तृतीयां बाधित्वा 'कर्तृकर्मणोः कृती'ति प्राप्तायाः षष्ठ्या 'न लोकाव्यये'ति पुनः प्रतिषेधाद्देवदत्तेन भुक्तमितिवत् त्वयाऽङ्गीकृतमिति तृतीयया भवितव्यम् । तत्कथं त इति षष्ठीप्रयोग इत्यतो, नात्र तेऽङ्गीकृत इति यथाश्रुतसम्बन्धो येनोक्तानुपपत्तिः, किन्त्वध्याहृतेन सप्तम्यन्तमत-शब्देनैवेति नानुपपत्तिरित्यभिप्रेत्यापेक्षितं पूरयति **ते मत इति शेष इति** । एतच्च न लोकेति निषेधस्य षष्ठीमात्रनिषेधकत्वं कारकषष्ठीनिषेधकत्वेऽपि निषेधस्य नित्यत्वं चाश्रित्यैवोक्तं न वस्तुत इत्यन्यत्र विस्तरः । अत्र पक्षे मत इति शेषपूरणं भवतीत्यपरितोषात् प्रकारान्तरमाह **त इति तृतीयार्थेऽव्ययं वेति** । लक्ष्यमित्यपि स्याद्विशेषितेत्यव्यवहितपूर्वप्रकृतलक्ष्यत्वरूपविशेषप्रसङ्गपदं क्वचिदस्तिक्वचिन्नास्तिमात्रनिरासकत्वप्रतीतिनिरासाय शङ्काभाष्यस्य तात्पर्यमाह **यदुक्तमित्यादिना** ॥ **अभावविशेषवत्त्वस्येति** । ब्रह्मण इति शेषः । नन्वेवं नेह नानेति श्रुतिविरोधः । तया ब्रह्मणि विशेषमात्रनिषेधादित्यतो भवेदेवं यदि श्रुतेर्धर्ममात्रनिषेधकत्वं स्यान्न चैत-दस्ति । निषेधकप्रमाणस्य स्वप्रतिपाद्याभावानिषेधकत्वेन तदयोगादिति भावेन निषेधकप्रमाणस्य तदनिषेधकत्वं दृष्टान्तदर्शनेनोपपादयति **नेह नानेति श्रुतिरिति** । ननु ब्रह्मणो निर्धर्मकत्वान्नाभावरूपधर्मनिमित्तमवलम्ब्यापि ब्रह्मणि पदप्रवृत्तिः सम्भवतीत्यत आह **अभावधर्मवत्त्वस्येति** । ब्रह्मणो मयेति शेषः । एवं तर्हि नेह नानेति श्रुतिविरोधः । तया ब्रह्मणि धर्ममात्रनिषेधादित्यतोऽप्याह **अभावेति** । श्रुत्येति शेषः । नेह नानेति श्रुत्या इह भूतले घटो नास्तीतिवद्ब्रह्मण्यभावाभ्युपगमान्न तन्निषेधकत्वं तस्या इति न तद्विरोध इति भावः ॥ **एतेनेति** । ब्रह्मणोऽभावधर्मवत्त्वोपपादनेनेत्यर्थः । ननु लक्ष्यपदलक्ष्यत्वस्य पूर्ववदनवस्थाग्रस्तत्वे वक्तुमशक्यत्वाद्ब्रह्मण-स्तद्वाच्यत्वमेव वाच्यम् । तथा च लक्ष्यत्वरूपभावधर्मवत्त्वाद्ब्रह्मणो निर्विशेषत्वभङ्गः स्यादेवेति कथमनेन लक्ष्य-मित्यपि स्याद्विशेषतेत्युक्तदोषनिरास इत्यत आह **लक्ष्यपदस्येति** । **अपोहेति** । अलक्ष्यव्यावृत्तेरित्यर्थः । ततश्च लक्ष्यपदस्यालक्ष्यव्यावृत्तिवाचकत्वात्तस्याश्चाभावरूपत्वाद्ब्रह्मणि सत्त्वं नानुपपन्नमिति समुदायार्थः ।

वा०र०— अन्यत्र विस्तर इति । 'ततच्छक्तिप्रबोधक' इति सर्वगतत्वाधिकरणमूलटीकादौ तत्र तत्र पूर्वत्र 'सृष्टिबन्धनमोक्षादिकर्तृत्वस्ये'ति तृतीयपादीयानुभाष्यव्याख्यानस्थलीयविचारावसरे चेत्यर्थः ।

॥ इति अभावरूपविशेषवत्त्वस्याङ्गीकृतत्वेन निर्धर्मितासाधनप्रयासरूपः पूर्वपक्षः ॥

* * *

॥ अथ तथात्वेऽसार्वज्ञादिराहित्यादिधर्माणामङ्गीकृतत्वम् ॥

१२२ सु०— अत्र वक्तव्यं परमसिद्धान्तमखण्डत्वं परित्यज्याभावधर्मवत्त्वं कस्मादङ्गीकरोषीति । अथ ब्रूयात् । 'सत्यं ज्ञानमनन्तं' 'विज्ञानमानन्दमि'त्यादिपदानि तावद्ब्रह्मणि श्रूयन्ते । न च तेषां विधिरूपोऽर्थः स्वीकर्तुं शक्यः, 'नेह नानाऽस्ती'त्यादिश्रुतिविरोधात् । अभावधर्माङ्गीकारे च न विरोध इत्युक्तमिति । तत्राह **असार्वज्ञादीति** ।

अनु०— असार्वज्ञादिराहित्यमप्येवं ते भविष्यति ।

ते अङ्गीकार्यमिति शेषः । **यथा** हि सत्यज्ञानादिपदानि ब्रह्मणि श्रूयन्ते, **एवं** 'एष सर्वज्ञः', 'एष सर्वेश्वरः', इति सार्वज्ञादिपदान्यपि । तथा च यथा तान्यनृतत्वाद्यभाववाचीन्येवमेतान्यपि असर्वज्ञत्वाद्यभाववाचितया (त्वया) अङ्गीकर्तव्यान्येव । ततश्च सत्यज्ञानादिवाक्यं तत्त्वावेदकं सार्वज्ञादिवाक्यं मायाशबलपरमिति विभागो न युक्त इति भावः ।

यादु०— अखण्डत्वमिति । सर्वविशेषराहित्यरूपमित्यर्थः ।

वं०प०— अखण्डत्वं सर्वथा भावाभावरूपसर्वविशेषशून्यत्वरूपम् ।

शे०चं०— अखण्डत्वमिति । सर्वविशेषराहित्यरूपमित्यर्थः । नन्वेवमभावधर्मवत्त्वमपि नाङ्गीकार्यं स्यात् । निषेधरूपस्याप्यर्थस्य श्रुतिविरुद्धत्वादित्यत आह **अभावेति** । **उक्तमिति** । नेह नानेति श्रुत्येह भूतले घटो नास्तीतिवदभावस्य ब्रह्मण्यङ्गीकारान्न तस्य श्रुतिविरुद्धत्वमिति भावः । असार्वज्ञ्यादिराहित्यमित्याद्युक्तप्रसङ्गस्य तदङ्गभूतव्याप्तिवैकल्यात् आभासत्वमित्याशङ्क्य विशेषव्याप्त्यभावेऽपि अविशेषलक्षणसामान्यव्याप्तेः सत्त्वान्न तदिति भावेनाविशेषमुपपादयति **यथा हीति** । तथाऽपीष्टापादनत्वादाभासत्वमित्याशङ्क्य तस्यानिष्टतामुपदर्शयति **ततश्चेति** ।

॥ इति तथात्वेऽसार्वज्ञादिराहित्यादिधर्माणामङ्गीकृतत्वम् ॥

* * *

॥ अथ असार्वज्ञराहित्यादिधर्माणामङ्गीकारे च प्रतिषेधद्वयबलात् सार्वज्ञादिधर्माङ्गीकारतादवस्थ्यम् ॥

१२३ सु०— मा भूदयं विभागोऽसार्वज्ञाद्यभावोऽपि ब्रह्मण्यङ्गीक्रियत एवेत्यत आह **तदेति** ।

अनु०— तदा सार्वज्ञमेव स्याद्भावार्थत्वान्नञोर्द्वयोः ।

ब्रह्मण्यसार्वज्ञाद्यभावेऽङ्गीकृते (सति) सार्वज्ञादिभावधर्मा दुर्निवारा एव । कुतः । द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत इति न्यायादित्यर्थः । एतच्च चतुर्थे स्पष्टयिष्यते ।

परि०— एतच्चेति । विरुद्धयोरेकस्याभावे परस्य सत्यत्वमित्येतच्चतुर्थाध्यायाद्यपादे 'एकस्य सत्यतायां हि द्वयोरेव विरुद्धयोः । अन्यस्य सत्यतैव स्यादिति केन निवार्यत' इत्यादिना स्पष्टयिष्यत इत्यर्थः ।

यादु०— ननु स्वप्नेऽत्र घट इति नात्र घट इत्यपि पश्यति । तत्र घटस्तदभावश्चेति द्वयमपि मिथ्या न तु घटः सत्योऽत उक्तन्यायस्य तत्र व्यभिचार इत्यत आह **एतच्चेति** । 'न स्वप्नेऽपि द्वयं मिथ्या तत्रैकं सत्यमेव ही'त्यादिना स्पष्टयिष्यत इत्यर्थः ।

शे०चं०— मूले 'तदा सार्वज्ञ्यमेव स्यादि'ति प्रसङ्गान्तरकथनस्य वैयर्थ्यमित्याशङ्क्य पूर्वप्रसङ्गे प्रसक्तेष्टापत्तिपरिहारार्थत्वात् तस्य नानर्थक्यमिति भावेन तत्परतयोत्तरभाष्यखण्डं योजयितुं पूर्वप्रसङ्गे इष्टापत्ति-शङ्कामुत्थापयति **मा भूदिति** ॥ **सार्वज्ञ्यादिभाव इत्यादि** । असर्वज्ञं न भवतीति निषेधविशिष्टसार्वज्ञ्यनिषेधस्य विशेषणीभूतनिषेधविषयकत्वस्य लाघवमूलकसविशेषणे हीति न्यायसिद्धत्वान्निषेधनिषेधरूपातिशयलाभाय च नञ्द्वयसार्थक्यसम्भवान्निषेधनिषेधे सार्वज्ञ्यविधिरेव सिद्धो भवतीत्याशयः । ननु निषेधविशिष्टस्य यो निषेधः तस्य विशेषणीभूतनिषेधविषयतायाः क्वाप्यदृष्टत्वात् कथं निषेधविशिष्टसार्वज्ञ्यादिनिषेधस्य विशेषणीभूतनिषेध-विषयकत्वमित्यत आह **एतच्चेति** । निषेधविशिष्टवस्तुनिषेधस्य विशेषणीभूतनिषेधविषयत्वं च 'असत्यं नोक्तमित्युक्ते सत्यमुक्तमिति प्रजाः । जानन्ति' इत्यादिना चतुर्थे दृष्टान्तोपदर्शनेन स्पष्टयिष्यत इत्यर्थः ।

वा०र०— मूल इत्यनन्तरं तदा सार्वज्ञ्यमेव स्यादिति प्रसङ्गान्तरेति पाठः । मूलकोशे मूले तदेतीत्येव पाठं दृष्ट्वा तत्पूरणीयं लेखकेन । तदा सार्वज्ञ्यमेव स्यादित्येवं पुस्तकान्तरे पूरितमपि परित्यज्य स्यादसत्त्वादिकं तदेतीति पूरितमिति ज्ञेयम् । व्याहतिरस्थलीयजिज्ञासाधिकरणोक्तरीत्याह **लाघवमूलकेति** । 'अन्यत्सदसतो-र्विश्वमिति च व्याहतेरमे'ति स्वप्नाधिकरणीयानुभाष्यमूलतट्टीकादौ उत्तरपादीयविद्यैवेत्यधिकरणे च अधिकोऽपि विचारो ज्ञेयः ।

॥ इति असार्वज्ञराहित्यादिधर्माणामङ्गीकारे च प्रतिषेधद्वयबलात् सार्वज्ञादिधर्माङ्गीकारतादवस्थ्यम् ॥

* * *

॥ अथ तथाऽनङ्गीकारे बाधकप्रदर्शनम् ॥

॥ अथ तत्र सार्वज्ञादिपदानामसार्वज्ञादिव्यावृत्तिबोधकत्वानङ्गीकारे ब्रह्मण्यानन्दादिपदैरसुखत्वाद्यव्यावृत्तिप्रसङ्गः ॥

१२४ सु०— 'असार्वज्ञादिराहित्यमप्येवं ते भविष्यती'त्युक्तानङ्गीकारे बाधकमाह **यदीति**।

अनु०— यदि नैतादृशं ग्राह्यम्

सर्वज्ञादिपदं ब्रह्मणि श्रूयमाणमसार्वज्ञादिनिवृत्तिं बोधयतीत्येतादृशं प्रमेयं यदि न ग्राह्यं 'तदाऽऽनन्दपदमप्यसुखत्वं न निवर्तयेत्, सत्यपदं चासत्यत्वम्, ज्ञानपदं चाज्ञानत्वम्, आत्मपदं चानात्मत्वम्, अविशेषादि'ति वाक्यशेषः।

परि०— इति वाक्यशेष इति। असुखत्वानिवर्तनादित्यतःपूर्वं 'तदानन्दपदमपी'त्यादिवाक्यशेषोऽध्याहार्य इत्यर्थः।

वं०प०— असत्त्वमज्ञानत्वमनात्मत्वमित्यत्र सर्वत्रापि न निवर्तयेदित्यनुवर्तते। **अविशेषादिति।** पदत्वाविशेषादित्यर्थः।

शे०चं०— यदि नैतादृशमित्याद्युत्तरग्रन्थस्य तदा सार्वज्ञ्यमेव स्यादिति सन्निहितपूर्वोक्तार्थानुपपादकत्वेन तत्सङ्गतत्वासम्भवात् आनर्थक्यमित्याशङ्क्य सन्निहितेन सङ्गत्यभावेऽप्यसार्वज्ञ्यादिराहित्यमित्यादि नोक्तार्थानभ्युपगमे बाधककथनेन तद्वाक्योक्तार्थोपपादकतया तत्सङ्गतत्वालाभान्नानर्थक्यमिति भावेन व्यवहितग्रन्थसङ्गततयोत्तरग्रन्थं योजयति **असार्वज्ञ्यादीति।** नन्वस्य तद्वाक्योक्तार्थानभ्युपगमे बाधककथनपरत्वं न प्रतीयत इति कथं तत्परत्वमित्यतोऽपेक्षिताध्याहारेण तत्परतया योजयति **सार्वज्ञ्यादिपदमित्यादिना।** असत्त्वमित्यादौ न निवर्तयेदिति पूरणीयम्। व्याप्तिवैकल्यात् तर्काभासत्वमित्याशङ्क्य परिहरति **अविशेषादिति।**

॥ इति सार्वज्ञादिपदानामसार्वज्ञादिव्यावृत्तिबोधकत्वानङ्गीकारे ब्रह्मण्यानन्दादिपदैरसुखत्वाद्यव्यावृत्तिप्रसङ्गः ॥

* * *

॥ अथ तस्येष्टापत्तित्वे च ब्रह्मण्यसत्यादिधर्माणां तात्त्विकत्वापत्तिः ॥

१२५ सु०— मा भूत् आनन्दादिपदानामसुखत्वादिव्यावर्तकत्वम्। को दोष इत्यत आह **असुखत्वेति।**

अनु०— असुखत्वानिवर्तनात् ।
असत्त्वाज्ञानतादेश्च स्यादसत्त्वादिकं तदा ।

असत्त्वाज्ञानतादेश्चानिवर्तनादिति सम्बन्धः ॥ अयं भावः । ब्रह्मणि तावदसत्त्वादिकं प्रसक्तम् । तद्व्यावर्तनाय सत्यज्ञानादिवाक्यानां प्रवृत्तिः । तान्यपि चेन्न तद्व्यावर्तयन्ति तदा ब्रह्मणोऽसत्त्वादिकं तात्त्विकमेवेत्यापन्नमिति ।

यद्वा यदि नैतादृशमित्यध्याहारेण विनैकमेव वाक्यं बुद्ध्या विविच्य तु योज्यमिति ।

परि०— **यदि नैतादृशमित्यादीति** । एकमेव वाक्यं योज्यमित्यन्वयः । कथमित्यतः 'तदे'त्यादिप्रागुक्त'अध्याहारेण विनैवे'ति । **बुद्ध्या विविच्येति** । 'अनिवर्तनादि'ति समस्तपदस्यासत्त्वाज्ञानतादेश्चानिवर्तनादित्यप्यन्वयायेति भावः । यद्वा यदि नैतादृशं ग्राह्यं सार्वज्ञादिपदं ब्रह्मणि श्रूयमाणं नासार्वज्ञादिनिवृत्तिं बोधयतीत्येतादृशं प्रमेयं न ग्राह्यं तदा एतादृशं आनन्दादिपदमसुखत्वादिव्यावृत्तिं बोधयतीत्येतादृशं प्रमेयमपि न ग्राह्यम् । तथा च असुखत्वनिवर्तनादित्यादि योज्यमित्यर्थः ।

गु०दी०— **यद्वा यदि नैतादृशमित्यत्र** पूर्वयोजनिकायां यद्येतादृशमज्ञत्वादिव्यावृत्तिरूपं यदि न ग्राह्यं तदा आनन्दपदादिकमसुखत्वादिकमपि न निवर्तयेदित्यापाद्याध्याहारः । एतादृशपदेन च पूर्वोक्तासार्वज्ञादिव्यावर्तनमेवार्थतयाऽङ्गीकृतमित्यध्याहारः वाक्यभेदश्चाङ्गीकृतः । अधुना एतादृशमसुखत्वादिनिवृत्तिरूपमपि न ग्राह्यं चेदसुखत्वादेरनिवर्तनादसुखत्वादिकं ब्रह्मणि स्यादिति योजना क्रियते, तदाऽध्याहारोऽपि नास्ति वाक्यभेदोऽपि नास्तीति भावः । 'भेदो यदि विशेषस्य स भेदो भेदिना कथम्' इत्यादेरयं समुदायार्थः । ब्रह्मधर्मभूतज्ञानादीनां ब्रह्मणि भेदमङ्गीकुर्वन् प्रष्टव्यः । सप्रतियोगिकब्रह्मधर्मिकभेदस्यापि ब्रह्मणि भेदोऽङ्गीक्रियते वा अभेदो वा । आद्ये तस्यापि भेदस्य भेद एवेति भेदपरम्परयाऽनवस्था स्यात् । अन्ततः अनवस्थापरिहाराय कस्यचिद्भेदस्याभेदमङ्गीकृत्य विशेषबलात् तदीयत्वादिनिर्वाहश्चेत् प्राक्तनभेद एव तदङ्गीक्रियताम् । किं दूरगमनेन । नापि द्वितीयः । सप्रतियोगिकस्याभावरूपस्य जीवाद्भेदः जडाद्भेदः इत्यादिना अनेकप्रतियोगिकतया अनेकस्य निष्प्रतियोगिके भावरूपे एकस्मिन् ब्रह्मणि चाभेदाङ्गीकारात् वरं ज्ञानादिधर्माणामेव ब्रह्मण्यभेदाङ्गीकारः । ईदृशभेदस्याप्यभेदाङ्गीकारे तस्यैव भेदस्य ब्रह्मीयत्वमपर्यायशब्दवाच्यत्वं धर्मधर्मिभावादिकं च किं बलात् । भेदान्तरादिति निरस्तम् । तूर्ष्णी चेदकारणकार्योत्पत्तिप्रसङ्गः । विशेषबलाच्चेत् 'विज्ञानमानन्दं ब्रह्मे'त्यादिश्रुतिसिद्धं ज्ञानानन्दादिगुणाभेदमेवाङ्गीकृत्य विशेषबलादेव धर्मधर्मिभावादिकं कुतो न निरूप्यते । प्रथमातिक्रमणे कारणा-

भावात् । किञ्च भेदस्य धर्मिस्वरूपत्वे तन्न्यायेनाभेदस्यापि धर्मिस्वरूपत्वावश्यम्भावात् तयोः स्वधर्मिणाऽन्योन्यं च कथं भेदव्यवहारापर्यायशब्दवाच्यत्वादिकं स्यात् । धर्मिण्यभेदः परस्परं तु भेद इति चैकधर्मिण्यत्यन्ताभिन्नयोरस्तयोर्न वक्तुमुचितः । उभयोरप्यैकविध्यसम्भवे प्रकारद्वयकल्पनायां कल्पनागौरवं च स्यात् । अथ धर्मिणाऽन्योन्यं चाभेदमेवाङ्गीकृत्य विशेषबलाद्भेदकार्यनिर्वाहश्चेत् तर्हि अनादिधर्माणामेवाभेदमङ्गीकृत्य तवाप्यावश्यकविशेषेणैव सर्वस्यापि निर्वाहः कुतो न क्रियते । अतो भेदे भेदोऽपि नाङ्गीक्रियते अभेदोऽपि नाङ्गीक्रियते । किन्तु स्वरूपभेदेनैव भेदकार्यनिर्वाहश्चेत् कोऽयं स्वरूपभेदो नाम । वस्तुवत् स्वरूपभूतोऽपि कश्चिद्भेदो भेदस्वरूपभूतोऽपि कश्चिद्भेद इति वा वस्तुस्वरूपं चास्ति भेदस्वरूपं चास्ति ताभ्यामेव भेदकार्यनिष्पत्तिरिति वा । आद्ये वृश्चिकभयात्पलायमानस्याशीविषमुखे निपात इव एकभेदाद्भीतेन परेण भेदद्वयस्याङ्गीकृतत्वादत्यन्तमकौशलम् । तयोरपि तदीयत्वादि कथमिति चोद्यं निरुत्तरं स्यात् । न द्वितीयः । ज्ञानादिगुणधर्मिणि भेदकार्यनिर्वाहकत्वादर्शनेन कल्पनागौरवप्रसङ्गात् । यदि च भवतां स्वनिर्वाहकविशेष इव भेद एव स्वनिर्वाहकत्वाद्गुणगुण्यादिष्वपि भेदकार्यं करोति । स्वस्मिन्नपि भेदकार्यं करोतीति मतम् । तदपि न । गुणे गुणिनि च विद्यमानो विशेषस्तयोर्भेदकार्यं निर्वहति । स्वाभिन्ने धर्मिणि धर्मे च स्वस्यापि भेदकार्यं करोतीति विशेषस्वनिर्वाहकवादिनो मतम् । तव भेदस्तु वस्तुना सह नाभिन्नः । भेदस्याभावात् । न सम्बन्धान्तरेणापि तदीयः । एवमपि ब्रह्मणि स्वस्य तदीयत्वं निर्वहति चेत् घटेऽपि कुतो न स्वकीयत्वं निर्वहेत् । एवमपि भेदाभावस्य सम्बन्धाभावस्योभयत्र साम्यात् । यदि च भेदपरम्परयाऽनवस्थातो भीतः स्वनिर्वाहकत्वेनाभिमतस्यापि भेदस्य धर्मिण्यभेदमेवाङ्गीकरोषि, तदा भेदस्य धर्मिण्यभेदाङ्गीकारेण भेदे स्वमतानभिमतस्वनिर्वाहकत्वाङ्गीकारे च द्वेधाऽप्यपसिद्धान्तः । त्वयाऽपि ह्यन्योन्यसदृशपरमाणूनां व्यावर्तकत्वेनाभिमतविशेषाख्यपदार्थे व्यावर्तकपरम्परयाऽनवस्थाभिया स्वनिर्वाहकत्वमङ्गीक्रियते नान्यत्र । अन्यथा परमाणुष्वपि स्वनिर्वाहकभेदसद्भावात् तेनैव सर्वकार्यनिर्वाहे विशेषकल्पनैव न स्यात् । तस्मादभिन्नतयाऽङ्गीक्रियते । भेदेऽपि विशेषबलादेव निर्वाहो वाच्यः । एवं च गुणगुणिनोः सविशेषाभेदमेवाङ्गीकृत्य विशेषबलाद्भेदकार्यनिर्वाहस्तवाप्युचितः । अत्राप्यभिन्नतया प्रमितगुणगुणिनोर्भेदकार्यनिर्वाहाय कल्प्यमाने विशेषे धर्मिग्राहकमानादेव भेदकार्यकारित्वसिद्धेः । दीपस्य स्वप्रकाशनाय दीपान्तरानपेक्षावत् त्वदीयविशेषवच्च विशेषत्वादेव स्वनिर्वाहकत्वस्यापि सिद्धेर्नापूर्वं किञ्चित्कल्प्यत इति स्वयमेव सर्वगुरुर्भगवान् भाष्यकारः न कल्पनायामपि गौरवं सहत इति ।

यादु०— बुद्ध्या विविच्येति । यद्येतादृशमसर्वज्ञादिराहित्यं सार्वज्ञादिपदबोध्यमित्येतादृशं प्रमेयं न ग्राह्यं तदाऽसुखत्वनिवर्तनमसत्त्वाज्ञानतादेश्च निवर्तनमेतादृशं सुखादिपदबोध्यमिति प्रमेयमपि न ग्राह्यं स्यात् । ततश्चासुखाद्यनिवर्तनादसुखत्वादेरेव सदा सत्त्वं स्यादिति योज्यमित्यर्थः ।

शे०चं०— तद्ग्रन्थेनैवोक्तार्थस्योपपादितत्वादसुखत्वेत्याद्युत्तरभाष्यानर्थक्यमित्याशङ्क्य प्रागुक्तप्रसङ्गस्येष्टापादनत्वशङ्कानिरासार्थत्वान्न तदिति भावेन तत्परतयोत्तरग्रन्थं योजयितुं प्रागुक्तप्रसङ्गे इष्टापादनत्वशङ्का-

मुत्थापयति **मा भूदिति** ॥ **सम्बन्ध इति** । यद्यप्यनिवर्तनादित्यसुखत्वपदेन समस्तं तथाऽपि बुद्ध्या विवेकेन अन्येनापि सम्बन्धनीयमिति भावः । मूलेऽसत्त्वाद्यनिवृत्तेरसत्त्वादिप्रसङ्गस्य च प्रयोज्यप्रयोजकभावाप्रतीतेस्तमाह **अयं भाव इति** । वाक्यभेदेन यदीत्यादिग्रन्थयोजनायामरुचिबीजमुपदर्शयन्नेवैकवाक्यतया योजनामाह **यद्वेति** । नन्वेवमसुखत्वानिवर्तनादित्यादिपञ्चम्यन्तानामनन्वयप्रसङ्गो दोषः । तेन विनैव यदि नैतादृशं ग्राह्यं तर्ह्यसत्त्वादिकं स्यादिति प्रसङ्गोक्तौ चाप्रयाजकत्वं स्यादसत्त्वादिकं तदेत्युक्तप्रमेयं प्रत्यापादकतया तदन्वयाङ्गीकारे चापादकासिद्धिर्दोषः । तत्कथमेकवाक्यतया योजनेत्यतोऽसिद्धस्यैव सिद्धवन्निर्देशान्यथाऽनुपपत्त्या पूर्ववाक्योक्तं प्रत्यापाद्यत्वेनोत्तरवाक्योक्तं प्रति चापादकत्वेनान्वयसम्भवान्नासङ्गतिरित्यभिप्रायेणाह **बुद्ध्या विविच्य त्विति** । (यद्येतादृशमसार्वज्ञ्यादिराहित्यं सार्वज्ञ्यपदबोध्यमित्येतादृशं प्रमेयं न ग्राह्यं तदाऽसुखत्वनिवर्तनमसत्त्वाज्ञानतादेश्च निवर्तनमेतादृशं सुखादिपदबोध्यमिति प्रमेयमपि न ग्राह्यं स्यादित्येवमेतादृशमित्यस्यार्थं बुद्ध्या विविच्योक्ता । ततश्चासुखत्वाद्यनिवर्तनादसुखत्वादेरेव सदा सत्त्वं स्यादिति योज्यमित्यर्थः) ।

वा०र०— **अरुचिबीजमिति** । अध्याहाररूपमिति शेषः । **तेन विनैवेति** । अध्याहारेण विनैवेत्यर्थः ।

॥ इति तस्येष्टापत्तित्वे च ब्रह्मण्यसत्यादिधर्माणां तात्त्विकत्वापत्तिः ॥

* * *

॥ अथ सत्यत्वादेरनृतादिविरोधित्वोक्तौ च अनैश्वर्यादिविरोधित्वनिवारणायोगः ॥

१२६ **सु०**— शङ्कते **अनृतादीति** ।

अनु०— अनृतादिविरोधित्वं यद्यस्याभ्युपगम्यते ।

अस्य सत्यत्वादेः अयमर्थः । सत्यादिपदानि तावदापाततः सत्यत्वादिविशेषणानि **समर्पयन्ति** । तदनन्तरं तत्तद्विरोध्याकारनिवर्तकत्वेन **पर्यवस्यन्ति** । यथोक्तं 'प्रतिपा(प)द्यपदार्थं हि विरोधात्तद्विरोधिनः । पश्चादभावं जानाति वध्यघातकवत्पदादि'ति । सत्यत्वादिविशेषणानां चानृतत्वादिविरोधित्वं सुप्रसिद्धमिति कथं न तद्व्यावृत्तिरिति । सममेतत् प्रकृतेऽपीत्याह **अनैश्वर्येति** ।

अनैश्वर्यविरोधित्वमप्येवं किं निवार्यते ।

सर्वेश्वरादिपदसमर्पितस्यैश्वर्यादेरिति शेषः ।

परि०— सुरेश्वरवार्तिकं संवादयति **यथोक्तमिति** । **पदात्** सत्यज्ञानादिपदात् सत्यत्वादि-पदार्थं ब्रह्मणि **प्रतिपाद्य** विज्ञाय पश्चात् **तद्विरोधिनः** अनृतत्वादेरभावं **जानाति** पुमान् । कुतः **विरोधात्** सत्यत्वानृतत्वादेः यथाऽवध्यानां मूषकादीनां सङ्कुलं दृष्ट्वा तद्विरोधिनो मार्जारादेरभावं जानाति तथेत्यर्थः ॥ *मायिनो विशेषाङ्गीकारः* ॥

यादु०— **यथोक्तमिति** । तैत्तरीयकवार्तिके सुरेश्वरेणेति शेषः । **पदात्सत्यादेः पदार्थं** सत्यत्वादिकं ब्रह्मणि **प्रतिपाद्य** ज्ञात्वा तेन विरोधाद्धेतोः **तद्विरोधिनः** अनृतादेरभावं **जानाति** । तत्र निदर्शनं **वध्यघातकवदिति** । यथा खलु विश्रब्धाखुभूयिष्ठां भूमिं दृष्ट्वा मार्जाराभावोऽवगम्यत एवमिति तदीयश्लोकार्थः ।

वं०प०— **तदनन्तरं** इत्यनन्तरं नेह नानेति श्रुतिविरोधभीत्येति शेषः ॥ **किं निवार्यत** इति मूलस्य तथा च सत्यादिवाक्यं तत्त्वावेदकम्, एष सर्वेश्वर इत्यादिवाक्यं च मायाशबलपरमिति विभागो न युक्त इति भावो ज्ञेयः ।

शे०चं०— यदेतद्विरोधिनिवृत्त्यर्थमेव तत्तदाकारविधानं विरोधिनिवृत्तेश्चाशाब्दत्वमुक्तं (तैत्तिरीयवार्तिके) तत्सुरेश्वराचार्यवचनसंवादेन द्रढयितुं तद्वाक्यमुदाहरति **यथेति** । सत्यज्ञानादिवाक्यव्याख्यानावसर इति शेषः ॥ **प्रतिपद्येति** । पदात्सत्यं ज्ञानमित्यादिशब्दात्पदार्थं सत्यत्वादिकं ब्रह्मणि प्रतिपाद्य ज्ञात्वा तेन विरोधाद्धेतोस्तद्विरोधिनोऽनृतादेरभावं जानाति । तत्र निदर्शनं **वध्येति** । यथा खलु विस्रब्धाखुभूयिष्ठां भूमिं दृष्ट्वाऽर्थान्मार्जाराभावोऽवगम्यत इत्यर्थः । अत्र च 'मानान्तरादपोहस्तु न शाब्दस्तेन स स्मृत' इत्युत्तरग्रन्थानुसारात् पदादित्यस्य पदार्थं प्रतिपद्येत्यनेनैव सम्बन्धः । न त्वभावं जानातीत्यनेनैवेति युक्त एव विरोधनिवृत्तेरार्थिकत्वे संवादतयाऽस्य वाक्यस्योपन्यास इति ध्येयम् ।

वा०र०— **सुरेश्वराचार्यवचनेति** । ....ध्याभाष्यस्थवचनेनेत्यर्थः । सुरेश्वरवार्तिकं नाम सुरेश्वराचार्येण उषा वा अश्वस्येति बृहदारण्यकतृतीयाध्यायमारभ्याष्टमाध्यायान्तोपनिषद्व्याव्याख्यानं वार्तिकरूपेण कृतमस्ति तदवधेयम् । तदानन्दगिरिलक्षणविज्ञानानुसारेण व्याचष्टे **पदात्सत्यं ज्ञानमित्यादिशब्दादित्यादि** । **मानान्तरादिति** । अपोहस्तु मानान्तरात्प्रतीयते अतः स न शाब्द इत्यर्थः । पदादित्यस्य पदार्थमित्यनेनैवेति पाठः ।

॥ इति सत्यत्वादेरनृतादिविरोधित्वोक्तौ च अनैश्वर्यादिविरोधित्वनिवारणायोगः ॥

॥ इति तथा(सार्वज्ञादिधर्माङ्गीकारतादवस्थ्या)ऽनङ्गीकारे बाधकप्रदर्शनम् ॥

॥ इति अभावरूपविशेषवत्त्वस्याङ्गीकृतत्वेन निर्धर्मितासाधनप्रयासदूषणम् ॥

* * *

।। अथ एवमखण्डखण्डनादखण्डवादिनाऽप्यनन्यथागतेः खण्डितेन मनसा विशेषोऽङ्गीकार्य एवेत्युपसंहारः ।।

१२७ सु०— उपसंहरति **अखण्डेति** ।

अनु०— अखण्डखण्डनादेवं विशेषोऽखण्डवादिना ।
खण्डितेनापि मनसा स्वीकार्योऽनन्यथागतेः ।

ए(यस्मादे)वं **अखण्डखण्डनादखण्डवादिना**ऽपीत्यन्वयः । **अनन्यथागते**र्हेतोः, **खण्डितेन** उत्तरोत्प्रेक्षारहितेन ।

।। इति एवमखण्डखण्डनादखण्डवादिनाऽप्यनन्यथागतेः खण्डितेन मनसा विशेषोऽङ्गीकार्य एवेत्युपसंहारः ।।

।। इति अभेदवादिनाऽपि विशेषमङ्गीकारयति ।।

* * *

।। अथ भेदाभेदवादिनं विशेषमङ्गीकारयति ।।

।। अथ तत्र सौत्रोभयव्यपदेशान्यथानुपपत्त्या भगवद्धर्माणां सविशेषात्यन्ताभेदसाधनस्योपसंहारः ।।

१२८ सु०— इदानीं भेदाभेदवादिनं विशेषमङ्गीकारयति **अखण्डेति** ।

अनु०— अखण्डखण्डवादिभ्यां खण्डाखण्डेन चैव तत् ।
महादरेण शिरसि विशेषो धार्य एव हि ।

यस्मात् एवं **अखण्डखण्डवादिभ्यां विशेषो**ऽङ्गीकार्यः **तत्** तस्मात् **एव हि खण्डाखण्डेन** खण्डाखण्डवादिना च **विशेषो**ऽङ्गीकार्य एव । 'कुन्ताः प्रविशन्ती'तिवदुपलक्षणया 'अर्श आदिभ्योऽजि'ति वा खण्डाखण्डेनेति साधु ।

तथा हि । धर्मधर्मिणोर्भेदाभेदाविति वदता तौ किं ताभ्यामत्यन्तं भिन्नावङ्गीक्रियेते उतात्यन्ताभिन्नावथ भिन्नाभिन्नौ । नाद्यः, भेदानवस्थापत्तेः । भेदस्य स्वरूपत्वे च विशेषानङ्गीकारे तदीयत्वाद्यनुपपत्तेः । भेदाभेदयोरत्यन्तभिन्नयोः सम्बन्धाभावेन तदीयत्वानुप-

पत्तेश्च ॥ न द्वितीयः, तदीयत्वाद्यनुपपत्तेरेव, भेदाभेदशब्दयोः पर्यायत्वापत्तेश्च । न तृतीयः, अनवस्थापत्तेः, क्वचिद्भेदाभेदयोरभेदे पूर्वदोषानुषङ्गात् ॥ तस्माद्भेदाभेदवादिनाऽपि क्वचिद्विशेषोऽङ्गीकार्य इति ।

तदेवमुभयव्यपदेशान्यथाऽनुपपत्त्या भगवद्धर्माणां सविशेषोऽत्यन्ताभेद एव इति सिद्धम् ।

परि०— अखण्डखण्डवादिभ्यामिति । 'अखण्डवादी'ति हि मायावादी 'खण्डवादी' तु गुणगुण्यादेर्भेदवादी ताभ्यामेवं 'सच्चिदादेरि'त्यादिना 'भेदो यदि विशेषस्ये'त्यादिनोक्तप्रकारेण विशेषोऽङ्गीकार्य इत्यर्थः । **खण्डाखण्डवादिना चेति** । गुणगुण्यादेर्भेदाभेदवादिना चेत्यर्थः । ननु खण्डाखण्डेनेति पदं तद्वादिपरं कथमित्यत आह **कुन्ता इति** । कुन्तशब्द आयुधविशेषवाचीति, तेषां जडत्वेन स्वतःप्रवेशायोगेन कुन्तधारिण इति लक्षणया अर्थः उच्यते । तद्वदित्यर्थः ॥ **अर्श आदिभ्योऽजिति** । अर्शःप्रभृतिशब्देभ्यो मत्वर्थेऽच्प्रत्ययविधानादत्रापि खण्डाखण्डशब्दात् मत्वर्थे अकारप्रत्यये 'यस्ये'त्यन्त्यलोपे खण्डाखण्डवतेत्यर्थलाभात् । वक्तृवाक्यभावरूपसम्बन्धेन तद्वत्त्वात् । खण्डाखण्डवादिनेति व्याख्यानेऽप्ययं शब्दः साधुरित्यर्थः । वादिद्वयाङ्गीकृतत्वं कथमेतद्वादिना अङ्गीकार्यत्वे हेतुरित्यतो व्यनक्ति **तथाहि इत्यादिना** ॥ **ताभ्यामिति** । धर्मधर्मिभ्यामित्यर्थः ॥ **तदीयत्वाद्यनुपपत्तेरिति** । भेदस्य यत्स्वरूपत्वमुच्यते तदीयो भेद इति व्यवहारादिर्न स्यात् । **आदिपदेन** च भेदाभेदयोर्धर्मधर्मिभूतभेदाभेदिना च यो भेदः तस्य तत्स्वरूपत्वे धर्मधर्मिणावेव स्तः न भेदाभेदाविति वा, भेदाभेदौ स्तो न धर्मधर्मिणाविति वा स्यात् । तच्छब्दयोः पर्यायत्वं स्यादिति प्रागुक्तदोषग्रहः । ताभ्यामत्यन्तं भिन्नाविति प्रागुक्तपक्षे दोषान्तरमाह **भेदाभेदयोरिति** । धर्मधर्मिभ्यामिति योज्यम् । एतत्सम्बन्धाभावेनेत्यत्रापि योजनीयम् ॥ **तदीयत्वाद्यनुपपत्तेरेवेति** । धर्मधर्मिसम्बन्धित्वस्य भेदाभेदयोरनुपपत्तेरित्यर्थः । **आदिपदेनान्यतरपरिशेषादिग्रहः** ॥ **पर्यायत्वेति** । भेदाभेदयोरेकवस्तुस्वरूपत्वे अन्योन्यमभेदस्यापि प्राप्तेरिति भावः ॥ **पूर्वदोषानुषङ्गादिति** । 'अभिन्नश्चेत्पुरा न किमि'ति पूर्वोक्तदोषानुषङ्गादित्यर्थः । यद्वा 'भेदस्य स्वरूपत्व' इत्यादिनोक्तो यो दोषस्तदीयत्वाद्यनुपपत्तिरूपस्तदनुषङ्गादित्यर्थः ॥ *भेदाभेदवादिनोऽपि विशेषाङ्गीकारः ॥*

यादु०— कुन्ता इति । यथा कुन्तशब्देन तद्वन्तो लक्ष्यन्ते एवं भेदाभेदपरेण खण्डाखण्डशब्देन तद्वादी लक्ष्यते अत इदं वाक्यं साधु अबाधितार्थकमित्यर्थः ॥ **अत्यन्ताभिन्नयोरिति** । धर्मधर्मिभ्यामिति शेषः ।

वं०प०— अखण्डखण्डवादिभ्याम् अभेदभेदवादिभ्याम् । ननु खण्डाखण्डशब्दस्य भेदाभेदवाचित्वात्कथं तदङ्गीकारिपुरुषपरत्वमित्यतोऽत्र समाधानद्वयमाह **कुन्ता इति** । यथा भल्लवाचिकुन्तशब्दस्य तद्वत्पुरुषलक्षकत्वं तथा भेदाभेदवाचिखण्डाखण्डशब्दस्यापि तदङ्गीकारिपुरुषलक्षकत्वमित्यर्थः ॥ **इति वेति** । मत्वर्थीयाच्प्रत्ययान्तो वेत्यर्थः । **तौ** भेदाभेदौ । **ताभ्यां** धर्मधर्मिभ्याम् । तौ ताभ्यामत्यन्तभिन्नाविति पक्षे दोषान्तरमाह **भेदाभेदयोरिति** ॥ **सम्बन्धेति** । धर्मधर्मिभ्यामित्यर्थः । न हि मेरुर्मन्दरीय इत्युच्यत इति भावः । **अभेदे** अङ्गीक्रियमाणे सति । अनवस्थापरिहारायेति शेषः ॥ **पूर्वदोषेति** । 'अभिन्नश्चेत्पुरा न किमि'-त्युक्तदोषेत्यर्थः । आदावेव भेदाभेदौ धर्मधर्मिभ्यामभिन्नाविति कुतो नाङ्गीक्रियत इति भावः ।

शे०चं०— ननु च अखण्डवादिनेत्यादिवत् खण्डाखण्डवादिनेत्येव वक्तव्यम् । खण्डाखण्डेनेति तु कथमुच्यते । न च खण्डाखण्डशब्दस्य भेदाभेदपरत्वेन तत एव तल्लाभात् तथाऽनुक्तिर्न दोष इति वाच्यम् । भेदाभेदमात्रशक्ततया तस्य तद्वादिपरत्वासम्भवादित्यतो मुख्यवृत्त्या तत्परत्वासम्भवेऽपि कुन्ताः प्रविशन्तीत्यादौ लक्षणया कुन्तशब्दस्य तद्वत्पुरुषपरत्ववत् खण्डाखण्डशब्दस्यापि लक्षणयैव तद्वादिपरत्वसम्भवात् युक्तं तेन भेदाभेदवादिनो ग्रहणमित्याशयेनाह **कुन्ताः प्रविशन्तीतिवदिति** । न च स्वायत्तन्यायविरोधः । रूढलक्षणात्वेन प्रयोजनानपेक्षणात् । अत एव दृष्टान्तकथनं सङ्गच्छते । अन्यथोपलक्षणयेत्येवावक्ष्यदिति भावः । अस्मिन्पक्षे लक्षणाऽऽश्रयणीया भवतीत्यपरितोषान्मुख्यवृत्त्यैव खण्डाखण्डशब्दस्य तद्वादिपरतामुपदर्शयति **अर्श-आदिभ्योऽजिति वेति** । खण्डाखण्डौ विद्येते अस्येति मत्वर्थीये अच्प्रत्यये यस्येति चेत्यकारलोपे निष्पन्न-खण्डाखण्डशब्दस्य तद्वादिपरत्वं मुख्यवृत्त्यैवेत्यर्थः । न चार्श आदिगणेऽस्यापाठात् कथमत्र तेनाच् स्यादिति वाच्यम् । तस्याकृतिगणतया यत्रादन्तशब्देन तद्वतोऽभिधानं तस्य सर्वस्याप्यर्शआदित्वस्याकरे स्थितत्वादस्यापि तत्त्वोपपत्तेरित्याशयात् ।

भेदानवस्थेति । भेदाभेदयोर्धर्मधर्मिभ्यां यो भेदस्तस्यापि भेदिभ्यां भेद एवं तस्य तस्यापीत्यपर्यवसितभेदपरम्पराप्रसङ्गादित्यर्थः । न च भेदस्य भेदान्तरमित्येतावता नानवस्था, उत्पत्तिज्ञप्तिप्रतिबन्धकत्वाभावादिति वाच्यम् । विशेषणप्रतीतिमन्तरेण विशिष्टप्रत्ययानुपपत्त्या ज्ञप्तिप्रतिबन्धकत्वादित्याशयात् । क्वचिद्भेदस्य भेदिस्वरूपत्वाभ्युपगमेनापर्यवसितपरम्पराया अप्रसङ्गान्नानवस्थेत्यत आह **भेदस्य स्वरूपत्वे चेति** । क्वचिद्भेदस्य भेदिस्वरूपत्वमेवेत्यर्थः ॥ **तदीयत्वेति** । भेदस्य भेदिस्वरूपत्वेन तदीयत्वनिर्वाहकभेदस्याभावान्न तेन तदीयत्वनिर्वाहः । नापि विशेषेण । तदनभ्युपगमात् । अभ्युपगमे वा सिद्धं नः समीहितमिति भावेनोक्तं **विशेषानङ्गीकार इति** ॥ **अत्यन्तभिन्नयोरिति** । धर्मधर्मिभ्यामिति शेषः ॥ **सम्बन्धाभावेनेति** । असम्बद्धयोरपि तद्भावे मेरुमन्दरयोरपि तद्भावप्रसक्तेरिति भावः । **तदीयत्वेति** । तन्निर्वाहकयोर्भेदविशेषयोरभावादिति भावः । **भेदाभेदशब्दयोरिति** । यद्यपि भेदाभेदयोर्धर्मधर्मिभ्यामत्यन्ताभिन्नत्वात् तच्छब्दानामेवैकार्थवाचित्वात् पर्यायत्वमापादयितुं शक्यं न तु भेदाभेदशब्दयोर्भेदाभेदयोरभेदाभावेन तच्छब्दयोरेकार्थवाचित्वाभावात् ।

तथाऽपि धर्मधर्मिभ्यामत्यन्ताभिन्नत्वे भेदाभेदयोः परस्परमत्यन्ताभेदोऽवर्जनीयः । यद्यदत्यन्ताभिन्नात्यन्ताभिन्नं तत्तेनात्यन्ताभिन्नमिति नियमादिति भावेन युक्तमेव तच्छब्दयोरिदं पर्यायत्वापादनमिति द्रष्टव्यम् । यद्यप्यत्र धर्मधर्मिभेदाभेदशब्दानामेकार्थवाचित्वात् पर्यायत्वमप्यापादयितुं शक्यम् । तथाऽपि तच्छिष्यैरेव सुज्ञानमिति स्वयं नापादितमिति ध्येयम् । **अनवस्थेति** । भेदाभेदयोर्धर्मधर्मिभ्यां यौ भेदाभेदौ तयोरपि भेदाभेदिभ्यां भेदाभेदावेवं तयोरपीत्युत्तरोत्तरापर्यवसितभेदाभेदपरम्पराप्रसङ्गादिति भावः । न चोत्पत्त्याद्यप्रतिबन्धकत्वाद्दूषणत्वम् । दत्तोत्तरत्वादित्याशयात् । ननु क्वचिद्भेदाभेदयोर्भेदाभेदिस्वरूपत्वाभ्युपगमेनापर्यवसितभेदाभेदपरम्पराया अभावान्नानवस्थेत्यत आह **क्वचिदिति** ॥ **पूर्वदोषेति** । तदीयत्वानुपपत्त्यादिरूपेत्यर्थः ।

वा०र०— यद्वत्परत्ववदिति पाठः । **कुन्ताः** दीर्घा वंशयष्टयः । **विद्येते यस्येति** । अत्रास्येति वक्तव्ये अन्यपदार्थत्वाविशेषाद्यस्येत्युक्तम् । अस्येति पाठस्तु स्वरस एव । **तस्याकृतिगणतयेति** । अत्र वाक्ये यत्राभिन्नशब्देन तद्वतोऽभिधानं तस्य सर्वस्येति पाठः । यत्राभिन्नशब्देन तद्वतोऽभिधानं तत्सर्वमिह द्रष्टव्यमिति काशिकानुवादरूपत्वात् । यत्रादन्तेति क्वाचित्कपाठेऽप्यच्प्रत्ययान्तस्य अदन्तत्वनियमात् अदन्तत्वं स्वरूपसङ्कीर्तनम् । अभिन्नेत्येवार्थ इत्यप्याहुः । **विशेषणप्रतीतिमन्तरेणेति** । एतच्च धर्मधर्मिभेदवादिना विशेषाङ्गीकरणप्रस्तावे स्पष्टमिति ज्ञेयम् । **दत्तोत्तरत्वादिति** । 'अभिन्नश्चेत् पुरा न किम्' इत्यादिव्याख्याने विशेषणप्रतीत्यन्तरेण विशिष्टप्रतीत्यनुपपत्तिरिति दत्तोत्तरत्वादित्यर्थः ।

स०व्र०— **कुन्ताः प्रविशन्तीति** । एकदेशवाचिकुन्तशब्दो यथा कुन्तधारिपरः तथा खण्डाखण्डशब्दोऽपि भेदाभेदवादिपर इत्यर्थः ॥ **पूर्वदोषेति** । तदीयत्वानुपपत्त्यादिरूपेत्यर्थः ।

॥ इति सौत्रोभयव्यपदेशान्यथानुपपत्त्या भगवद्धर्माणां सविशेषात्यन्ताभेदसाधनस्योपसंहारः ॥

॥ इति भेदाभेदवादिनं विशेषमङ्गीकारयति ॥

॥ इति त्रिभिरप्येतैर्वादिभिर्विशेषस्याङ्गीकर्तव्यत्वम् ॥

॥ इति विवृतस्य 'ब्रह्मणा तद्धर्माणामभेदेऽपि विशेषबलाद्धर्मधर्मिव्यवहारो युज्यते' इत्यस्य प्रपञ्चनम् ॥

* * *

॥ अथ उक्तार्थस्य सूत्रकाराभिमतत्वम् ॥

१२९ सु०— 'ननु नायं सूत्रकाराभिप्रायो भवितुमर्हति, तेनानेवंविधानामहिकुण्डलादीनां निदर्शनानामुपात्तत्वात् । अहेरवयवानामन्योन्यसंयोगविशेषो हि अहिकुण्डलमित्युच्यते, स तावदहिना नात्यन्ताभिन्नः । प्रकाशश्च द्रव्यान्तरं न सूर्याभिन्न इत्यतः प्रकाशाश्रयवद्वेति निदर्शनमपि नात्यन्ताभेदोपयुक्तम् । कालस्य पूर्वत्वं नाम प्रध्वस्तक्रियासम्बन्ध इति न पूर्ववद्वेत्यपि प्रकृतानुगुणमि'त्यत आह **निदर्शनेति** ।

अनु०— निदर्शनत्रयेणातो भगवानत्यभिन्नताम् ।
गुणानामादरेणाह

यत एवमर्थापत्त्या भगवद्गुणानां भगवता सविशेषोऽत्यन्ताभेदः सिद्धोऽत इत्यर्थः । अत्यभिन्नतां सविशेषाम् । निरवकाशप्रमाणानुसारेण निदर्शनत्रयमपि सविशेषाभेदोपयुक्तत्वेन सूत्रकारस्याभिमतं ज्ञातव्यमित्याशयः ।

तत्राहिकुण्डलं यद्यपि भेदाभेदवत्तथाऽपि मन्दानामभेदे बुद्धिमवतारयितुमुपात्तम्, यथा 'पृथिव्यामोषधयः सम्भवन्ती'ति यथा । प्रकाशशब्देन च भास्वरं रूपं विवक्षितम्, तच्च यावद्द्रव्यभावित्वात् सूर्यमण्डलेनात्यन्ताभिन्नमेव । पूर्वत्वं च पूर्वकालसम्बन्ध इति सकललोकसिद्धमिति ॥ नन्वेकेनैव निदर्शनेनालं किं त्रयेणेत्यत उक्तम् आदरेणेति ।

परि०— **निदर्शनानामिति** । उभयव्यपदेशात्त्वहिकुण्डलवत्, प्रकाशाश्रयवद्वा तेजस्त्वात्, पूर्ववद्वा, इत्येवम्भूतानामित्यर्थः ॥ **प्रध्वस्तक्रियासम्बन्ध इति** । इदानीन्तनध्वंसप्रतियोगी यस्तरणिपरिस्पन्दः तेन सह तत्समवायि(भूततरणि)संयोगरूपसम्बन्ध इत्यर्थः ॥ **अर्थापत्त्येति** । उभयव्यपदेशान्यथानुपपत्तिरूपार्थापत्त्येत्यर्थः ॥ **यथा पृथिव्यामोषधयस्सम्भवन्तीति यथेति** । आथर्वणे हि 'अक्षरात्सम्भवतीह विश्वमि'ति हरेर्जगत्कर्तृत्वरूपकारणत्वे यथा पृथिव्यामित्युपादानकारणपृथिवी दृष्टान्तिता तथेत्यर्थः ॥ **पूर्वकालसम्बन्ध इति** । स च विशेषो भेदरूप एव । तरणिपरिस्पन्दोपाधिकत्वं तु समयपादे निरस्तमिति भावः ।

गु०दी०— **यथा पृथिव्यामोषधय** इत्यस्य यथा पृथिव्यन्तर्गतौषधिबीजे पृथिव्येकदेशभूतक्षेत्रे वा बुद्धिमवतारयितुं पृथिव्यामिति वदन्ति तथेत्यर्थः ।

यादु०— **प्रध्वस्तक्रियेति** । प्रध्वस्ताऽतीता या तरणिक्रिया तत्सम्बन्ध इत्यर्थः । सोऽपि न कालेनात्यन्ताभिन्न इति भावः ॥ **यथा पृथिव्यामोषधय इति** । यथा पृथिव्यामोषधयः सम्भवन्तीत्यत्रौषध्युपादानतया भिन्नाभिन्ना अपि पृथिवी विश्वं प्रति निमित्ततयाऽत्यन्तभिन्नस्य भगवतो नियतपूर्वभावितया कारणत्वमात्रेण मन्दानां विश्वभेदे बुद्धिमवतारयितुमुपात्ता तथैवेत्यर्थः । इयांस्तु विशेषः । तत्र भेदे बुद्धिमवतारयितुं भिन्नाभिन्नं वस्तु निदर्शितम्, अत्र त्वभेद इति ।

वं०प०— कालस्य पूर्वत्वं न प्रध्वस्तक्रियासम्बन्धो येन कालेनात्यन्ताभिन्नो न स्यात्किन्चित्यत आह **पूर्वत्वं चेति** ॥ **सिद्धिमेवेति** । तथा च स्वस्मिन्पूर्वकाले सम्बन्धरूपं पूर्वत्वं यावद्द्रव्यभावित्वादत्यन्ताभिन्नमिति प्रसिद्धमित्यर्थः ।

शे०चं०— **स तावदिति** । अवयवानामन्योन्यं संयोगविशेषस्यायावद्द्रव्यभावित्वेन भिन्नाभिन्नत्वादिति भावः । **द्रव्यान्तरमिति** । रूपित्वात्सूर्यं विहायान्यत्र वृत्तेः क्रियावत्त्वाच्च तत्सिद्धेरिति भावः । **प्रध्वस्तेति** । अतीततरणिपरिस्पन्दसम्बन्ध इत्यर्थः । सोऽप्ययावद्द्रव्यभावित्वात्कालेन भिन्नाभिन्न एवेति भावः । ननु वैषम्ये कथं दृष्टान्तदार्ष्टान्तिकभाव इत्यतो यथा पृथिव्यामोषधयः सम्भवन्तीति वाक्येऽक्षरपृथिव्योर्जगदत्यन्तभिन्नत्वतद्भिन्नाभिन्नत्वाभ्यां जगन्निमित्तत्वतदुपादानत्वाभ्यां वा वैषम्येऽपि भिन्नत्वमात्रेण वा कारणत्वमात्रेण वा साम्यादस्ति दृष्टान्तदार्ष्टान्तिकभावस्तथा ब्रह्माहिकुण्डलयोरत्यन्ताभिन्नत्वभिन्नाभिन्नत्वाभ्यां वैलक्षण्येऽप्यभिन्नत्वमात्रेण साम्याद्युक्त एव दृष्टान्तदार्ष्टान्तिकभाव इत्याशयेनाह **यथा पृथिव्यामिति** ॥ **भास्वरं रूपमिति** । अयं भावः । प्रकाशो न द्रव्यं मानाभावात् । न तावद्रूपित्वं तत्र मानम् (न्यायमतेऽपि) नीलघटसम्बद्धबालार्कप्रभादौ प्रतीयमानारुण्यादेः प्रकाशनिष्ठत्वाभावेन तेन घटादिरूपस्यैव प्रतीयमानत्वेन प्रकाशनिष्ठरूपप्रतिभासाभावेन तस्यासिद्धत्वात् । किञ्च गुणादिपञ्चकस्य निर्गुणताया वैशेषिकपरीक्षायां निरस्तत्वात् । गुणेषु च चतुर्विंशतित्वसङ्ख्यावत्समवायादावेकत्वसङ्ख्यावद्रूपं स्पर्शात्पृथगिति पृथक्त्ववत्प्रकाशस्य भास्वररूपत्वेऽपि तत्र रूपस्य सम्भवेनाप्रयोजकत्वम् । नापि सूर्यं विहायान्यत्र वृत्तिः प्रमाणम् । 'व्यतिरेको गन्धवदि'त्यधिकरणे गुणस्यापि गन्धस्य द्रव्यं विहायान्यत्र वृत्तेरुक्तत्वात् । नापि क्रियावत्त्वेनालोकस्य द्रव्यत्वम् । दीपे गच्छति प्रभाया अपि गतिदर्शनादिति युक्तम् । घटे गच्छति तद्रूपस्यापि गतेरवश्यम्भावात् । अन्यथा श्येने चलत्यचलस्थाणोरिव रूपस्यापि तत्रैवावस्थित्यापातात् । तथाऽपि कुतस्तद्गुणत्वमिति चेत् । तदनुविधानेनेति ब्रूमः । न च छायायां व्यभिचारः । भित्यादावचलेऽपि छायायाः सूर्यप्रतिलोम्येन चलनात् । लोके माणिक्यप्रभादौ तद्गुणव्यवहाराच्च तत्सिद्धिः । 'तेजोबलैश्वर्यमहावबोधसद्वीर्यशक्त्यादिगुणैकराशिरि'ति स्मार्तगुणत्वव्यवहाराच्च तत्सिद्धिरित्यास्तां प्रपञ्चः । अस्तु भास्वररूपमेव प्रकाशः तथाऽपि तस्य कुतः सूर्यमण्डलेनात्यन्ताभेद इत्यत आह **तच्चेति** ॥ **पूर्वकालसम्बन्ध इति** । विशेषणत्वविशेष्यत्वरूप इत्यर्थः । तथा च कालस्वरूपत्वात् कालेनात्यन्ताभेद एवेत्यर्थः । ननु ध्वस्तक्रियासम्बन्ध एव पूर्वत्वं किन्न स्याद्विनिगमकाभावादित्यतोऽस्य सकललौकिकानुभवसिद्धत्वात् पूर्वपक्षिणोत्प्रेक्षितस्य च तदभावान्न विनिगमकाभाव इत्याह **इति सकललोकेति** ।

वा०र०— नन्वालोकस्य द्रव्यत्वात् कथं गुणत्वमुच्यत इत्याशङ्क्य तद्द्रव्यत्वे मानाभावादित्यादिना तन्निराकरणं 'गुणाद्वाऽलोकवदि'त्यधिकरणीयतत्त्वप्रकाशिकायां कृतम् । नीलघटादीत्यादिना किञ्चिच्चन्द्रिकायामुपपादितं च । तदुभयानुसारेण प्रकाशस्य गुणत्वं समर्थयते । अयं भावः प्रकाशो न द्रव्यमित्यादि । **तेनेति** । रूपावगाहिप्रत्ययेनेत्यर्थः । **प्रतीयमानत्वेन** विषयीकृतत्वेनेत्यर्थः । सम्भवेनाप्रयोजकत्वादित्येव पाठः । अप्रयोजकत्वाच्चेति चशब्दो लेखकागतः । चेत्यनुवादेन किं चेति व्याख्यानाश्रयणान्न वैयर्थ्यं चशब्दस्येत्यप्याहुः ।

अक्षराधिकरणीय'किं चाकाशस्ये'त्यादि व्यभिचाराच्चेति मूलटीकोक्तरीत्या किञ्चेति निपातमाश्रित्य तस्य चेत्यनेन सम्बन्धेऽन्यच्चेत्यर्थलाभ इति वा । अन्यत्र वृत्तेरुक्तत्वादिति पाठः । चन्द्रिकाग्रन्थपाठानुसारेण वक्ष्यमाणत्वादिति पाठो लेखकागतः । स्मार्तगुणत्वव्यवहाराच्चेति पाठः । एतदनुसारेणैव 'शुद्धानन्दोरुसंविद्युतिबलबहुलौदार्ये'ति तत्त्वप्रकाशिकायां आनन्दादिसमकक्ष्यतया गुणत्वमुक्तमित्यपि चन्द्रिकोक्तं ज्ञेयम् । 'द्रव्यत्वे चालोकः कार्यमकार्यं वे'त्यादितत्त्वप्रकाशिकानुसारेणाधिकविचारकर्तव्यतां मनसि निधायाह **आस्तामिति** ।

स०व्र०— **यथा पृथिव्यामिति** । यथा भगवतो निमित्तकारणत्वे पृथिव्या औषध्युपादानत्वेऽपि कारणत्वसामान्याभिप्रायेणायं दृष्टान्त उपादीयते तद्वदयमित्यर्थः । **पूर्वकालसम्बन्ध इति** । यथैकस्य कालस्य स्वसम्बन्धः प्रतीयते तथा परमात्मनो गुणानामभेदेऽपि सम्बन्धव्यवहारः स्यादिति भावः ।

चषकः— **यावद्द्रव्यभावित्वादिति** । स्वाश्रयद्रव्यनिरूपितकालिकसम्बन्धावच्छिन्नाधिकरणतात्वावच्छिन्नव्यापकतावच्छेदकतत्सम्बन्धावच्छिन्नाधिकरणतात्वकत्वादित्यर्थः ।

।। इति उक्तार्थस्य सूत्रकाराभिमतत्वम् ।।

।। इति उक्तार्थे प्रमाणत्वेन सौत्रस्योभयव्यपदेशादित्यस्य हेतोर्व्याख्यानम् ।।

।। इति साक्षादधिकरणार्थव्याख्यानम् ।।

* * *

।। अथ एतदधिकरणानुषङ्गसिद्धार्थकथनम् ।।

।। अथ भगवद्धर्माणां भगवता सविशेषाभेदस्य समर्थितत्वादेवान्विताभिधानव्यतिरिक्तमतानामनुपपन्नता ।।

।। अथ अभिहितान्वयादिमतानामनुपपन्नत्वम् ।।

१३० **सु०— एवं साक्षादधिकरणार्थं व्याख्यायेदानीमनुषङ्गसिद्धमर्थं दर्शयति तच्चेति ।**

अनु०— तच्च नाभिहितान्वयः ।

तस्मादेव भगवद्धर्माणां भगवता सविशेषाभेदस्य समर्थितत्वादेव, पदाभिहितैः पदार्थैरन्वयबोध इत्येतन्मतं 'नेति लभ्यत' इति शेषः । अभिहितान्वयग्रहणमुपलक्षणम्, वक्ष्यमाणान्विताभिधानव्यतिरिक्तानां सर्वेषामपि मतानामनुपपन्नत्वात् ।

परि०— **साक्षादधिकरणार्थमिति** । धर्माणां भगवता सविशेषाभेदरूपमित्यर्थः ।। **अनुषङ्गेति** । उक्तार्थोपजीवनेनार्थात्सिद्धमित्यर्थः । तच्चेत्यस्यार्थः **तस्मादेवेति** । तद्विवरणं **भगवदित्यादि** ।

गु०दी०— भगवद्धर्माणां भगवता सविशेषाभेदस्य समर्थितत्वादित्यादेरयं समुदायार्थः । यथा घटमानयेति वाक्ये घटमिति घटपदमात्रोक्तावपि किमानयामि उत नयामि उत भिनद्मीति तद्योग्यनानाक्रिया-स्वाकाङ्क्षा जायते । सा च घटपदेन सामान्यतो योग्येतरपदार्थान्वयानभिधाने न स्यात् । सामान्यतो ज्ञाते हि विशेषजिज्ञासा नान्यथा । विशिष्यान्वयबोधेऽपि न सा स्यात् । पदान्तरवैयर्थ्यं च । अतो घटपदेनैव सामान्यतो योग्येतरान्वयोऽपि बोध्यते । नो चेत् प्रत्यक्षजज्ञानस्य साक्षात्कारत्ववल्लिङ्गजज्ञानस्यानुमितित्ववच्छब्दजान्वय-बोधस्य शाब्दत्वमपि न स्यात् । बोधकान्तराभावेनाकारणकार्योत्पत्तिप्रसङ्गाच्च । तथा ब्रह्मशब्देनापि योग्येतरा-न्वयबोधोऽवश्यम्भावी । स चान्वयः अन्यवाचकपदस्यान्यबोधकत्वासम्भवात् तस्यान्वयस्य ब्रह्मात्मकता-मप्यपेक्षते । स च गुणगुणिनोरभेद एव स्यात् । अभेदेऽपि गुणगुणिभावनिर्वाहाय विशेषोऽपि वाच्यः । एवं तर्ह्यन्वयविशेषस्यापि ब्रह्मात्मकत्वात् सोऽपि कुतो न भासत इति न शङ्कनीयम् । सति फले प्रयोजकानुसरणं न तु प्रयोजकमस्तीति सर्वत्रापि फलापादनम् । सिद्धे ह्यङ्कुरे तत्प्रयोजकतया बीजं कल्प्यते । न तु बीज-मस्तीत्येतावता सर्वत्रापि फलकल्पना । शिलादौ तददर्शनात् । पदान्तरप्रयोगे तु तदाहितशक्त्या तान्येव पदानि विशिष्यान्वयमपि बोधयन्ति । यथा हि । नरावेशाहितशक्त्याऽर्जुनस्य कार्यविशेषकारित्वम् । तथा पूर्वपदाहित-शक्त्योत्तरपदमुत्तरपदाहितशक्त्या पूर्वपदमपीति सर्वाण्यपि पदानि विशिष्यान्वयं बोधयन्तीति सर्वानुभवसिद्ध-त्वाच्चास्य प्रमेयस्य न कश्चित्क्षुद्रोपद्रव इति ।

यादु०— एवं साक्षादिति । भगवद्धर्माणां भगवता सविशेषाभेदरूपमित्यर्थः **अनुषङ्गसिद्धमिति** । तत्सिद्ध्युपजीव्यसिद्धिकमित्यर्थः ।

वं०प०— तच्चेत्यत्र तच्छब्दस्य तस्मादित्यर्थश्चशब्दोऽवधारणार्थ इत्यभिप्रेत्य व्याचष्टे **तस्मादेवेति** ॥

शे०चं०— साक्षादधिकरणार्थमिति । ब्रह्मधर्माणां ब्रह्मणा सविशेषात्यन्ताभेदरूपमित्यर्थः ॥ **अनुषङ्गसिद्धमिति** । (तत्सिद्ध्युपजीव्यसिद्धिकम्) अधिकरणसिद्धान्ततया सिद्धमित्यर्थः ॥ **तस्मादेवेति** । अनेन तच्चेति चशब्दोऽवधारणार्थ इत्युक्तं भवति । तस्मादेवेत्यस्यैव विवरणं **भगवद्धर्माणामित्यादि** । नन्वभिहितान्वयग्रहणमभिहितान्वयमात्रपरमेवास्तु । तत्किमुपलक्षणत्वाश्रयणेनेत्यत आह **वक्ष्यमाणेति** । अनुपदमेवेति शेषः ।

॥ इति अभिहितान्वयादिमतानामनुपपन्नत्वम् ॥

* * *

।। अथ अन्विताभिधानस्य तद्गतविशेषस्य च विवरणम् ।।

१३१ **सु०—** यदि तर्ह्यभिहितान्वयवादोऽनुपपन्नः, कः पन्थाः सूत्रकारस्याभिमतः, न हि निरुपायमन्वयज्ञानमिति सम्भवति । अन्विताभिधानमिति ब्रूमः । तत्राप्यस्ति विशेष इत्याशयेनाह **यदेति** ।

अनु०— यदाऽशेषविशेषाणामुक्तिः सामान्यतो भवेत् ।
पदैकेनाप्युत्तरेण विशेषावगतिर्भवेत् ।

यदाशब्दो यद्यर्थः । **यद्यप्यशेषविशेषाणा**मित्यशेषविशेषान्वितस्येत्यर्थः । **एक**शब्दो मुख्यार्थः । पदेष्वेकं **पदैकमा**(द्ये न)द्यपदेनेत्यर्थः । कर्मधारयत्वे तु 'पूर्वकालैके'त्येकपदस्य पूर्वनिपातः स्यात् । **अपि** तथाऽपि । **उत्तरेण** पदजातेनान्वय**विशेषावगतिः** ।

परि०— **पूर्वकालैकेति** । द्वितीयस्याद्यपादे 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' (पा.सू. २-१-४९(७२६)) इति सूत्रे पूर्वकालएकसर्वेत्यादिसुबन्तशब्दाः समानाधिकरणेन सुबन्तेन समस्यन्त इति तत्पुरुषविधायकसूत्रे एकपदस्य प्रथमानिर्दिष्टतया 'प्रथमानिर्दिष्टं समास उपसर्जनमि'ति सूत्रेण समासविधायकशास्त्रे प्रथमानिर्दिष्टस्योपसर्जनसंज्ञायां उपसर्जनं पूर्वमिति सूत्रेण पूर्वनिपाते एकशाटी एकभिक्षेतिवत् एकपदेनेति स्यादित्यर्थः ।

यादु०— **पूर्वकालैकेति** । पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेनेत्यत्र एकशब्दस्य प्रथमानिर्दिष्टत्वात् तस्य च 'प्रथमानिर्दिष्टं समास उपसर्जनमि'त्युपसर्जनसंज्ञायामुपसर्जनं पूर्वमित्यनेन पूर्वनिपातः स्यादित्यर्थः ।

शे०चं०— कालार्थत्वहेत्वर्थत्वयोरसम्भवादाह **यद्यर्थ इति** ॥ **मुख्यार्थ इति** । 'एके मुख्यान्यकेवलाः' इति स्मरणादिति भावः । पदेष्वेकमिति सप्तमीति योगविभागात् समास इति भावः । नन्वेकपदस्य सङ्ख्यार्थकस्यैकं च तत्पदं चेति समानाधिकरणसमाससम्भवे किमिति मुख्यार्थतामाश्रित्य सप्तमीतत्पुरुषाश्रयणमित्यत आह **कर्मधारये त्विति** । सङ्ख्यार्थतामाश्रित्येति शेषः ॥ **पूर्वकालैकेतीति** । पूर्वकालैकेतीति निर्देशेनेत्यर्थः । सङ्ख्यार्थकस्यैकशब्दस्य पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेनेति समासशास्त्रे प्रथमानिर्दिष्टत्वेन 'प्रथमानिर्दिष्टं समास उपसर्जनमि'ति तस्योपसर्जनसंज्ञायामुपसर्जनं पूर्वमिति पूर्वनिपातः स्यादित्यर्थः । ननु भवेदेतदेवं यदि पूर्वकालैकेति सूत्रं सङ्ख्यार्थैकशब्दस्यैव समासविधायकं स्यात् तदेव

कस्मादिति चेत् । उच्यते । विशेषणं विशेष्येण बहुलमिति विशेषणवाचकशब्दस्य विशेष्यवाचकशब्देन समासे विहिते विशेषणविशेष्यशब्दयोः सम्बन्धिशब्दत्वादेकेनैव परस्परसमासविज्ञानसम्भवात् पदान्तरवैयर्थ्यमित्याशङ्कायां तेनैव विशेष्येण समासो यदि तद्विशेष्यं विशेषणमपि स्यादिति परस्परविशेषणविशेष्यभावस्थल एव अनेन समासोऽत एव नीलोत्पलमित्यत्र नीलशब्दस्य पीतादिव्यच्छेदकत्वादुत्पलशब्दस्य नीलभ्रमरादिव्यवच्छेदकत्वादेतादृशस्थल एव अनेन समास इतीममर्थं द्योतयितुं पदद्वयोपादानमिति प्रत्युक्ते तर्ह्युभयोरपि प्रथमानिर्दिष्टत्वात् पूर्वनिपातानियमः स्यादित्याशङ्कायामुपसर्जनसंज्ञाया अन्वर्थत्वेनाप्रधानपरत्वान्नीलोत्पलमिति द्रव्यगुणवाचकशब्दयोर्गुणवाचकस्याप्रधानत्वेन पूर्वनिपातनियमसम्भवात्, क्रियाद्रव्यवाचकयोश्च क्रियावाचकस्य पूर्वनिपातनियमसम्भवाद्गुणवाचकयोरेव खञ्जकुब्जशब्दयोः क्रियावाचकयोरपि पाचकपाठकशब्दयोरुभयोरप्यप्रधानत्वेन पूर्वनिपातनियमस्येष्टत्वात्, द्रव्यवाचकयोरपि शिंशुपावृक्षशब्दयोरुभयोः प्रधानत्वेऽपि वृक्षत्वस्यान्यत्रापि वृत्त्या वृक्षशब्दस्य बहुविषयत्वेन प्रधानत्वादल्पविषयस्य शिंशुपाशब्दस्यैव पूर्वनिपात इति न पूर्वनिपातानियम इति प्रत्युक्तेऽपि स्नातानुलिप्त इत्यादिक्रियावाचकशब्दयोः पूर्वनिपातानियमप्राप्ते दिक्सङ्ख्ये संज्ञायामित्यनेन दिग्वाचकसङ्ख्यावाचकयोः संज्ञायामेव समासस्य नियमितत्वेनैकशाटीत्यादेश्च संज्ञात्वाभावादसमासत्वे च प्राप्ते एकशब्दस्य समानाधिकरणेन समासविधानार्थं स्नातानुलिप्त इत्यादौ पूर्वनिपातनियमार्थं च प्रवृत्तेन 'पूर्वकालैके'ति सूत्रेण सङ्ख्यार्थैकशब्दस्यैव समासविधानसिद्धेरित्याशयः ।

वा०र०— मूले पदैकेनाप्युत्तरेणेत्यपिपदं यद्यर्थकयदेत्यनेन सम्बध्यते इति भावेनोक्तं **यद्यपीति** । अत एवोत्तरत्रापिपदं **तथापीति** व्याख्यास्यतीति ज्ञेयम् । अशेषविशेषाणामित्यस्यार्थकथनायाह **अशेषविशेषाणामिति मूलम्** । एकशब्दस्य मुख्यार्थत्वाङ्गीकारनिमित्तं तु उत्तरत्र वक्ष्यत इति मूलाशयस्य स्पष्टत्वात् तमनभिधायैव मुख्यार्थत्वसाधकमाह **एके मुख्येति इति स्मरणात्** । ....स्मरणादित्यर्थः । ननु सङ्ख्यार्थस्यैकशब्दस्य समानाधिकरणशब्देन समाश्रयणे वक्ष्यमाणरीत्या पूर्वनिपातप्रसङ्गवन्मुख्यार्थस्याप्येकशब्दस्य विशेषणं विशेष्येण बहुलमित्यनेन समानाधिकरणसमासे विशेषणमित्येवं प्रथमानिर्देशेन मुख्यार्थैकेति पदविशेषणस्य पूर्वनिपातप्राप्त्या मुख्यार्थत्वेऽपि पदैकेति प्रयोगायोग एव । उपसर्जनसंज्ञाया अन्वर्थत्वेनाप्रधानपरत्वादिति वक्ष्यमाणटीकोक्तरीत्या शिंशुपावृक्षशब्दयोरिव पदत्वस्य मुख्यामुख्यसाधारणत्वेन बहुविषयत्वात् पदपदस्य प्रधानत्वादल्पविषयमुख्यार्थैकपदस्य च अप्रधानतया वा नीलोत्पलमित्यत्रेव धर्मिपदभूतपदपदस्य प्रधानत्वादप्रधानधर्मवाचकमुख्यार्थैकपदस्याप्रधानतया वा पूर्वनिपाते सत्येकपदेनेत्येवापत्तेरित्यतो भवेदेवं यद्यत्र सङ्ख्यार्थेऽस्य समानाधिकरणसमासं परित्यज्य मुख्यार्थेऽस्य समानाधिकरणसमास एव विवक्षितः स्यात् । न चैवम्, किन्तु पदेष्वेकं पदैकमिति सप्तमीसमास एव । तथा च विशेषणमित्येवं प्रथमानिर्देशेनोपसर्जनत्वस्याप्रधानरूपतया वा प्रधानत्वेन मुख्यार्थैकपदस्योपसर्जनतया पूर्वनिपातस्य सप्तमीसमासे प्रसङ्गाभावान्नानुपपत्तिरित्याशयेनाह **मूले पदेष्वेकं पदैकमिति** । किं तन्मुख्यत्वमित्यतोऽत्र विवक्षितं मुख्यत्वमाद्यत्वमित्याह **मूले आद्येनेति** । पदेष्विति महिम्ना मुख्यं पदमित्यर्थलाभ इत्याशयेन अनुभाष्यस्थतृतीया योजिता **आद्येन**

पदेनेति । वक्ष्यमाणरीत्या यत्पदस्यान्विताभिधायकत्वं स्वीकृत्य समभिव्याहृतपदान्तराणां विशेषान्वयोपसिद्ध्यर्थत्वं स्वीक्रियते तत्पदमाद्यत्वेन विवक्षितम् । तच्च घटमानयेत्यादौ घटमिति वा आनयेति वा वक्तृश्रोतृबुभुत्सानुसारेण ज्ञेयम् । न तु प्रथमोच्चारितमेवेति नियम इति स्पष्टम् । अत एव सङ्ख्यार्थतामाश्रित्य सप्तमीसमासो नाश्रितः । अत एव च ब्रह्मपदमित्यादिकमुत्तरमूले । पूर्वोक्तविवक्षिताद्यत्वरूपार्थालाभादिति ज्ञेयम् ।

एवं मुख्यार्थत्वपक्षे समानाधिकरणसमासस्य सप्तमीसमासाश्रयणेनैव परिहारसूचनात् प्रकारान्तरेण पूर्वनिपातप्रसक्त्यभावं सिद्धवत्कृत्य मुख्यार्थत्वसप्तमीसमासाश्रयणानर्थक्यमात्रमाशङ्क्य तन्निरासपरतयोत्तरमूलमवतारयति **नन्वेकपदस्येत्यादिना** । एतेन मुख्यार्थत्वपक्षेऽपि कर्मधारयाभावप्रतिपादनाय मुख्यार्थत्वेऽपि समानाधिकरणसमासे सम्भवत्यपि वक्तव्यत्वात् तदभावेन न्यूनतेति शङ्का गर्भस्रावेणैव परिहृता । तत्पक्षे समानाधिकरणसमासप्रयुक्तपूर्वनिपाताशङ्कावारणायैव सप्तमीसमासाश्रयणस्य पूर्वोक्तरीत्याऽवगन्तुं शक्यत्वात् । **कर्मधारयत्वे त्विति** मूले पूर्वकालैकेतीत्युक्त्यनुसारेण सङ्ख्यार्थकैकशब्देनैव कर्मधारयपक्ष इत्यर्थसिद्ध्या तत्पक्षस्यैवानुवादात्पूर्वकालैकेत्यादिनिर्देशप्रयुक्तपूर्वनिपातस्य तत्पक्ष एव प्राप्तेर्मुख्यार्थत्वपक्षानुवादतद्दूषणयोरुभयोरप्युत्तरवाक्यासंस्पर्शेन तच्छङ्काया उत्तरवाक्यावतारावसरेऽनुत्थापनीयत्वाच्च ।

केचित्तु अत्र टीकायां मुख्यार्थत्वपक्षेऽपि समानाधिकरणसमाससम्भव इत्युपलक्षणया विवक्षितम् । तथा सङ्ख्यार्थत्वेऽपि सप्तमीसमाससम्भव इत्यपि विवक्षितम् । मुख्यार्थतामाश्रित्येत्यनेन सङ्ख्यार्थतानाश्रयणीयपक्षस्येव सप्तमीतत्पुरुषाश्रयणमित्यनेन सङ्ख्यार्थत्वपक्ष एव समानाधिकरणसमासानाश्रयणपक्षस्येव च सङ्ख्यार्थत्वेऽपि सप्तमीसमासानाश्रयणपक्षस्य मुख्यार्थत्वेऽपि समानाधिकरणसमासानाश्रयणपक्षस्य च मुख्यार्थतामाश्रित्येत्यादिपदमहिम्नैव कैमुत्योक्तिलाभात् । कर्मधारयत्वे त्वित्युत्तरमूलेऽपि सङ्ख्यार्थतामाश्रित्येति शेष इत्युत्तरटीकानुसारेण सङ्ख्यार्थकत्वसमानाधिकरणसमासपक्षस्येव मुख्यार्थतामाश्रित्येति शेषपूरणेन तत्पक्षीयसमानाधिकरणसमासानुवादस्य मुख्यत एव सम्भवात् । सङ्ख्यार्थे सप्तमीसमासपक्षस्य चोपलक्षणयाऽनुवादलाभात् । पूर्वकालैकेऽस्तीत्यस्य च तत्सूत्रप्रवृत्तिमूलभूतविशेषणं विशेष्येण बहुलमित्येतत्सूत्रोपलक्षणत्वसम्भवेन तत्सूत्रे प्रथमानिर्देशप्रयुक्तपूर्वनिपातापातादिति तद्दूषणस्यापि लाभात् सङ्ख्यार्थत्वेऽपि सप्तमीसमासदूषणस्य चोपलक्षणयैव ज्ञातुं शक्यत्वाभिप्रायकल्पनोपपत्तेर्न कश्चिद्दोष इत्यप्याहुः । कर्मधारयत्वपक्षेऽपि यद्येकं पदं न सङ्ख्यार्थकं किन्तु सङ्ख्यातिरिक्तैकोऽन्यार्थे प्रधाने चेत्यमरोक्ताष्टस्वर्थेषु मध्ये समानादिरूपकिञ्चिदर्थकं तदा पूर्वकालैकेति समासो न प्राप्नोतीति तत्प्रयुक्तपूर्वनिपातप्रसङ्ग इत्यतः सङ्ख्यार्थत्वपक्ष एव कर्मधारयत्व इत्यर्थो विवक्षितः । न च सङ्ख्यार्थत्वपक्ष इत्येतत्सम्पर्काभावः । सङ्ख्यार्थतामाश्रित्येति शेषपूरणस्याभिप्रेतत्वेन दोषाभावादित्याशयेन तथा शेषं पूरयति **सङ्ख्यार्थतामिति** । एकपदस्येति वर्तते । पूर्वकालैकेति सूत्रस्य पूर्वादिशब्दानां समानाधिकरणशब्देन समासविधायकत्वेऽपि पूर्वनिपातविधायकत्वात् पूर्वकालैकेति पूर्वनिपात इति यथाश्रुतायोग इत्यतः पूर्वकालैकेत्यतः परं निर्देशेनेति पूरणेन निर्देशस्य च पूर्वनिपातनिमित्तत्वोपपत्तेः न अनुपपत्तिरित्याशयेनार्थमाह **निर्देशेनेत्यर्थ इति** । अत एव शास्त्रैकसमधिगम्यत्वादिति न्यायविवरणटीकायां शास्त्रं च तदैकमसहायं चेति

शास्त्रैकविशेषणविशेष्यभावस्य कामचारित्वात् । सङ्ख्यावचनस्यैवैकशब्दस्य पूर्वकालैकेति समासविधानादिति स्पष्टमुक्तमिति भावः । एतन्निर्देशोऽपि न साक्षात् पूर्वनिपातनिमित्तमपि तु परम्परयेत्याह **सङ्ख्यार्थकस्येति** । तथा चैकपदस्य सङ्ख्यार्थत्वे पदैकपदस्य च कर्मधारयत्वे पूर्वकालैकेति निर्देशप्रयुक्तैकपदपूर्वनिपातापत्तिरूप-बाधकादेकपदस्य सङ्ख्यार्थत्वपरित्यागेन मुख्यार्थत्वोक्तिः सप्तमीसमासाश्रयणं चेत्युक्तं भवति । उक्तकर्मधारयत्वे विवक्षिताऽऽद्यत्वलाभाभावश्चोपलक्षणया बोध्यः । यद्यपि पूर्वनिपातपरिहारः सङ्ख्यार्थत्वमात्रपरित्यागेन वा सप्तमीसमासमात्राश्रयणेन वा भवतीति तदुभयाश्रयणमनर्थकं भाति । तथापि प्रागुक्तरीत्या मुख्यार्थत्वपक्षेऽपि कर्मधारयाश्रयणे विशेषणं विशेष्येतिसूत्रीयविशेषणमिति निर्देशप्रयुक्तः पूर्वनिपातः स्यादेवेति तत्परिहाराय तत्पक्षे सप्तमीसमासाश्रयणं युक्तम् । तथा सङ्ख्यार्थत्वेऽपि सप्तमीसमासाङ्गीकारमात्रेऽपि विवक्षितपूर्वोक्ताद्यत्वलाभः । इदमेकं इदं द्वितीयमित्यादौ एकपदेनाद्यत्वप्रतीतावपि वक्ष्यमाणरीत्या विवक्षितत्वेन पूर्वोक्ताद्यत्वालाभात् । ततस्तल्लाभाय मुख्यार्थत्वाश्रयणं युक्तम् । एवं च सङ्ख्यार्थत्वपरित्यागविशिष्टसप्तमीसमासाश्रयणमावश्यकमिति ज्ञेयम् ।

एतावता हि सङ्ख्यार्थैकशब्दस्य समानाधिकरणसमासाङ्गीकारे पूर्वकालैकेति पूर्वनिपातप्रसङ्गभयेन मुख्यार्थत्वस्वीकारः । तत्स्वीकारेऽपि कर्मधारयानुपपत्त्या सप्तमीसमासाश्रयणमिति प्रतिपादितं भवति । न च तद्युक्तम् । पूर्वकालैकेति सूत्रेण सङ्ख्यार्थैकशब्दस्यैव समानाधिकरणशब्देन समासो विधीयते । न तु सङ्ख्या-तिरिक्तसमानाद्यर्थैकशब्दस्येत्यत्र नियामकाभावेन तेन सूत्रेणार्थान्तरे समासविधानपक्षे प्रकृते एकशब्दस्य सङ्ख्यार्थत्वेऽपि तत्सूत्रेण समासप्राप्तेः पूर्वनिपातप्रसक्त्यभावेन तद्व्यावृत्त्यर्थं मुख्यार्थत्वाश्रयणस्यानावश्यकतया तत्पक्षे प्राप्तानुपपत्तिपरिहाराय सप्तमीसमासाश्रयणस्य चाकर्तव्यत्वादिति भावेन तत्सूत्रस्योक्तसमासविधायक-त्वेऽपि नियामकाभावमाशङ्कते **ननु भवेदेवमिति** । एवमिति पूर्वोक्तप्रनाडिकपरामर्शः । पदं च तदेकं चेति विशेषणसमास एव कथञ्चित्स्वीकार्य इति शङ्कितुर्हृदयम् । पूर्वकालैकेति सूत्रप्रकृतिप्रकारनिरूपणेन तस्योक्त-समासविधायकत्वं सम्भवतीति समाधत्ते **उच्यत इत्यादिना** । विशेषणं विशेष्येण बहुलमित्येतत्सूत्रीयमञ्जर्यनु-सारेणोक्तं **विशेषणं विशेष्येणेत्यादि । विशेष्यवाचकशब्देनेति** । अत्र च विपूर्वात् शिष्लृ शेषण इत्य-स्माद्धातोर्विशिष्यतेऽनेनेति करणे ल्युटि विशेषणपदस्य निष्पन्नत्वात् साधारणाकारेण प्रतिपन्नस्य बहुप्रकारस्य वस्तुनः प्रकारान्तरेभ्यो व्यवच्छेदकं सदेकस्मिन्प्रकारे व्यवस्थापकं यत्तद्विशेषणमित्युच्यते । व्यवस्थाप्यमानं वस्तु विशेष्यमित्युच्यते । तथा चोक्तविशेषणवाचकशब्दस्य विशेष्यवाचकशब्देन समास इत्यर्थः । मञ्जर्यां तत्पदं विशेषणभेदकमिति चोच्यत इति अत्र हि नीलार्थो भ्रमरादिसाधारणरूपेण प्रतिपन्नः उत्पलार्थेनोत्पले व्यवस्था-प्यते इति च शब्दार्थयोरविशेषेण व्यवस्थाप्यव्यवस्थापकभाववचनं तु नार्थयोरेव वा शब्दार्थयोरेव वा समासा-भिप्रायम् । शब्दयोरेव समासात्, किन्तु शब्दार्थयोरवान्तरविशेषप्रतिपादनाभिप्रायम् । तथाहि । धर्मो हि साक्षात् अवस्थापकः । सति चैवं शब्दो व्यवस्थापकतयोच्यमानोऽर्थप्रतीतिजननद्वारेणैवेति तत्र विशेषणत्वं परम्परया । अर्थस्तु साक्षादेवेति । तत्र विशेषणत्वमपि साक्षादेव । तथा च व्यवस्थापकव्यवस्थाप्यत्वसाक्षात्त्वपुरस्कारेणार्थो

विशेषणादिपदैरुच्यते । समासस्य शब्दाश्रयणत्वात् पारम्परिकव्यवस्थापकत्वरूपविशेषणत्वादिकमाश्रित्य विशेषणविशेष्यपदाभ्यां शब्दावप्युच्येते इति । एवं पारम्परिकविशेषणत्वाश्रयणेनात्र शब्दाभिधानं समासलाभेनेति युक्तम् । विशेषणादिवाचकशब्दयोः समासाभिधानं पीतादिनीलभ्रमरादीत्युत्तरटीकास्थमभिधानं च युक्तमिति । भेदकं विशेषणं भेद्यं विशेष्यमित्यभिधाय विशेषणवाचि सुबन्तं विशेष्यवाचिनेति काशिकोक्तेरपीयमेव गतिः ।

कुतः परस्परविशेषणविशेष्यभावस्थल एव अनेन समास आश्रीयत इत्यत एतदुदाहरणभूतनीलोत्पलमित्यत्र तथात्वस्य दृष्टत्वादित्याह **एवं नीलोत्पलमित्यत्रेति** । नीलोत्पलमित्यत्रैतादृशस्थल एव अनेन समास इति सम्बन्धः । तत्स्थलस्यैतादृशत्वमुपपादयितुमुक्तं **नीलशब्दस्येत्यादि** । व्यवच्छेदकत्वादित्यनन्तरं परस्परविशेषणविशेष्यभाववत्त्वमितीति पूर्णीयम् । तत्रत्येतिशब्दो हेतौ । इत्यतो हेतोरेतादृशस्थल एव नीलोत्पलमित्यत्र अनेन समास इति योजना । एतादृशस्थल एवेत्यनेन अतादृशतक्षकः सर्पा इत्यादौ नानेन समास इति सूचयति । तत्तु प्रत्युदाहरणमेव । तथा हि । यद्यपि सर्प इत्युक्ते सर्पसामान्यप्रतीतावपि तद्विशेषाप्रतीत्या सर्पविशेषतक्षकस्यान्यव्यावृत्तस्य प्रतीतिस्तक्षक इति विशेषणेन भवतीति तक्षको विशेषणं सर्पस्तु विशेष्य इत्येवं विशेषणविशेष्यभावोऽस्ति । तथापि तक्षक इत्युक्ते सर्पातिरिक्तव्यक्त्यन्तरोपस्थित्यभावेन तक्षकस्य सर्पत्वाव्यभिचारेण तक्षको न सर्पस्य विशेष्य इति परस्परविशेषणविशेष्यभावाभावोऽयुक्तः । ननु तक्ष्णोतीति तक्षक इति क्रियानिमित्तकस्य तक्षकशब्दस्य सर्पत्वव्यभिचारेण तक्षक इत्युक्ते तस्यानेकप्रकारवत्तया प्रकारान्तरव्यवच्छेदाय सर्प इति वक्तव्यमेवेति सर्पं प्रति तक्षकस्य युक्तं विशेष्यत्वमिति परस्परविशेषणविशेष्यभावसत्त्वात् कुतः समासाभाव इति चेत् सत्यम् । सर्पस्य हि तक्षक इति नामधेये नामधेयस्य तक्षकशब्दस्यावयवप्रसिद्धिमनपेक्ष्य समुदायप्रसिद्ध्या सर्पबोधकत्वेन क्रियाशब्दार्थविषयापेक्षया एवाभावेन नामधेयत्वपरित्यागेन क्रियाशब्दत्वाश्रयणानुपपत्त्या तदाश्रयणेन विशेष्यत्वोपपादनायोगात् । तदुक्तं कारिकया मञ्जर्याम् । 'न त्वसौ गाहते नामधेये न तुल्यकक्ष्यताम् । द्रागेव रूढौ प्रमितिक्रियाशब्दे विलम्बिनेती'त्यवधेयम् । तत्त्वबोधिन्यादौ कैलासाद्रिरित्याद्युदाहरणे समासविचारादिकं शोध्यम् । **प्रथमेति** । विशेषणं विशेष्येणेति समासशास्त्रे विशेषणमिति प्रथमानिर्दिष्टत्वादित्यर्थः । **पूर्वनिपातेति** । नीलोत्पलं उत्पलनीलमित्युभयथाप्रयोगप्रसङ्गादित्यर्थः । **अन्वर्थत्वेनाप्रधानपरत्वादिति** । उभयोरपि प्राधान्ये परस्परानुपकारितयाऽसम्बन्धयोरेकत्र प्रयोगस्यैवाभावापत्त्या द्वयोरप्यप्राधान्ये परस्परापेक्षावत्तया परस्परोपकारित्वाभावापत्त्या एकत्र प्रयोगानुपपत्तेरेकस्यैव प्राधान्यमितरस्याप्राधान्यमित्यवश्यं वक्तव्ये यत्प्रधानं तत्परित्यागेनाप्रधानमेवोपसर्जनमङ्गीकार्यम् । उपसर्जनसंज्ञाया अन्वर्थत्वेन साक्षात्क्रिया सिद्धा उपयुज्यमानस्याश्रयभूतस्य च द्रव्यस्य तथात्वायोगेन द्रव्यावच्छेदद्वारेण क्रिया सिद्धा उपयुज्यमानस्याश्रितस्य च गुणादेरेवाप्रधानस्योपसर्जनत्वात् । पूर्वकायो नाभेदः । अर्धपिप्पलीत्यादौ क्वचित्प्रधानस्यापि पूर्वनिपातदर्शनेऽपि प्रायोऽन्वर्थत्वस्यैव सत्त्वात् । तथा च प्रधानस्यैव पूर्वनिपातसिद्धिरिति भावः । अत्र चाप्रधानत्वमर्थधर्मः । शब्दोऽपि तद्वाचकत्वादप्रधानमिति ज्ञेयम् । **द्रव्यगुणवाचकेति** । द्रव्यस्य

प्राधान्यात् प्रथमतो निर्देशः । निर्देशक्रमानुसरणे गुणद्रव्यवाचकयोरिति स्यात् । अत एव क्रियाद्रव्यवाचकयोरित्येव वक्ष्यति । तत्र च पाचकब्राह्मणशब्दयोरिति शेषः ।

नन्वस्त्वेवं यत्र द्रव्यवाचकगुणादिवाचकयोः समासस्तत्र पूर्वनिपातव्यवस्था । तत्र द्रव्यस्य प्राधान्यादप्रधानगुणादिवाचकस्य पूर्वनिपात इति प्रतिपादनसम्भवात् । यत्र पुनरुभयोरप्यप्राधान्यं तत्र कथमुक्तव्यवस्था उभयोरपि तदापातादित्यतस्तत्रापि पूर्वपक्षिणा आपाद्यमानस्य पूर्वनिपातनियमस्येष्टत्वान्न दोष इत्याह **गुणवाचकयोरेवेत्यादि** । पाचकपाठकशब्दयोरित्यनन्तरं गुणक्रियावाचकयोः खञ्जपाचकशब्दयोश्चेति उपलक्षणया ज्ञेयम् । **तथापाठस्तु** स्वरस एव । ननु तथापि यत्रोभयोरपि द्रव्यवाचकता तत्रोभयोरपि प्राधान्यात् कथमुक्त व्यवस्थेत्यत आह **द्रव्यवाचकयोरपीति** । **वृक्षत्वस्यान्यत्रापि सत्त्वेनेति** । यद्यपि वृक्षत्वं शिंशुपावृक्षादन्यत्र पलाशादिष्विव शिंशुपात्वमपि परस्परविशेषणत्वेन वृक्षादन्यत्र फलेऽस्तीति बहुविषयत्वोपपत्त्याऽन्यत्र सत्त्वं बहुविषयत्वापादकम् । तथापि अन्यत्र बहुषु सत्त्वमेव बहुविषयत्वप्रयोजकत्वेनेहाभिप्रेतम् । अत एव मञ्जर्यां व्यापकत्वमेव प्राधान्यसाधकतयाऽभिधाय तदुपपादनाय महाविषयत्वं दूरात् प्रथमत एवोपलभ्यमानत्वं चोक्तम् । तदनुसारेणेहापि दूरात् प्रथमत उपलभ्यमानत्वं चोपलक्षणतया प्राधान्योपपादकतया ग्राह्यम् । विशिष्टं मञ्जर्यादौ । **पूर्वनिपातानियम इति** । उभयोरप्राधान्ये तथाङ्गीकारादिति शेषः । समासे च प्राप्त इति पाठः । अत एव पूर्वनिपातनियमार्थं चेति शब्दस्योत्तरत्र पाठात् । एकशब्दस्य समानाधिकरणेनेत्येतत्पूर्वत्रापि योग्यतया सम्बन्धनीयम् । **इत्याशय इति** । उपलक्षणं चैतत् । सङ्ख्यार्थैकशब्दस्यैव समासविधायकमित्यनङ्गीकारे पूर्वकालैकेति सूत्रेण केवलार्थैकशब्दस्य समानाधिकरणदोषशब्देन समासे एकदोषेत्याद्यापत्त्या दोषैकदृक्पुरोभागीत्यमरस्थप्रयोगस्य ह्लादैकमयीमित्यादि काव्यप्रकाशस्थप्रयोगस्य चानुपपत्तिप्रसङ्ग इत्यपि तत्त्वनिर्णयटीकोक्तरीत्या समाधानमवधातव्यम् ।

स०व्र०— सङ्ख्यार्थमेवैकं पदं किं न स्यादित्यत्राह **कर्मधारये त्विति** । एकपदस्य सङ्ख्यार्थत्वमङ्गीकृत्य कर्मधारयाङ्गीकरण इत्यर्थः । **पूर्वनिपातः** । सङ्ख्यार्थैकपदस्यैव पूर्वनिपातादिति भावः । यद्यपि मुख्यार्थैकपदेन कर्मधारयः कर्तुं शक्यते । तथापि निर्धारणे सप्तमीसमासेन मुख्यत्वस्य स्पष्टलाभात् सप्तमीसमास आदृत इति ध्येयम् ।

* * *

।। अथ उक्तविशेषस्य तात्पर्यप्रदर्शनम् ।।

१३२ सु०— एतदुक्तं भवति । 'सत्यं ज्ञानमनन्तं ब्रह्म', 'यः सर्वज्ञः स सर्वविदि'त्यादिब्रह्मप्रतिपादकवाक्यगतानि सकलान्यपि पदान्यन्वितार्थाभिधायीनि । तत्र ब्रह्मपदं सत्यत्वसर्वज्ञत्वाद्यशेषविशेषान्वितं ब्रह्म प्रतिपादयति । न चैवं सत्यादिपदानां वैयर्थ्यम्, यतः

सामान्यत एव अन्विताभिधाने शक्तिः पदानां नान्वयविशेषाभिधाने । अतो ब्रह्मपदेन सामान्यतः समस्तयोग्यधर्मान्विते ब्रह्मणि प्रतीते सत्यत्वेनान्वितं ज्ञानत्वेनान्वितमिति विशेषान्वयप्रतिपत्त्यर्थानि सत्यादिपदानीति ।

शे०चं०— नन्वेवं ब्रह्मशब्दस्याशेषविशेषान्वितस्वार्थाभिधायकत्वप्राप्तावपि वाक्यस्थाशेषपदानां तदप्राप्तेः पदमात्रमन्वितस्वार्थाभिधायीति सिद्धान्तभङ्ग इत्याशङ्कां परिहरन्नेव मूले सामान्यत इत्यादिविशेषण-व्यावर्त्यप्रदर्शनपूर्वकं तत्तात्पर्यमाह **एतदुक्तं भवतीति** ॥ **सकलपदानीति** । ततश्च न पदमात्रस्यान्वितार्था-न्वितार्थाभिधानवादभङ्ग इति भावः । सामान्यत इत्येतद्व्यावर्त्यदोषमुत्थाप्य परिहर्तुं तत्प्रसञ्जकं दर्शयति **तत्रेति** । नन्वेवं ब्रह्मेत्यनेनैव सत्यत्वाद्यशेषविशेषान्वितब्रह्मप्रतिपादनात्पदान्तरवैयर्थ्यम् । न च सत्यादिपदैः सत्यतादावभिहिते सत्येव तदर्थान्वितस्वार्थस्य ब्रह्मपदेनाभिधानात् सत्यत्वाद्यभिधायकत्वात् पदान्तरस्य न तद्वै-यर्थ्यमिति वाच्यम् । तथा सति सत्यादिपदानां स्वार्थमात्राभिधायकत्वेनानन्विताभिधायित्वप्राप्त्याऽन्विताभिधान-वादभङ्गप्रसङ्गात् । न च सत्यादिपदैरपि ब्रह्मपदार्थान्वितस्वार्थप्रतिपादनाभ्युपगमान्न तद्भङ्ग इति वाच्यम् । तथा सति यावद्ब्रह्मपदं स्वार्थं नाभिदत्ते तावदुत्तरपदस्य पूर्वपदार्थान्वितस्वार्थाभिधायकत्वं नास्ति । यावच्चोत्तरपदं स्वार्थं नाभिदत्ते तावत्पूर्वपदस्योत्तरपदार्थान्वितस्वार्थाभिधायकत्वं नास्तीत्यन्योन्याश्रयत्वमित्याशयेन शङ्कते **न चेति** । स्यादिदं विशेषान्विताभिधानवादिनां दूषणम् । नास्माकमित्यभिप्रेत्य तद्विलक्षणं स्वाभिमतमन्विताभिधानवादं दर्शयति **यत इति** । शब्दशक्त्यवधारणोपायस्य वृद्धव्यवहारादेः पदार्थस्वरूपमात्रविषयकत्वानुपपत्त्या पदार्था-न्तरान्वितार्थविषयकत्वाद्विशेषाणां व्यभिचारेण त्यागेऽपि सामान्यस्याव्यभिचारित्वेन त्यागायोगात्सङ्गतिग्रहण-समये पदानां सामान्यान्विताभिधाने शक्तेर्गृहीतत्वादभिधानस्य च शक्तिग्रहणानुरोधित्वात् सामान्यान्विताभिधान एव पदानां शक्तिर्न विशेषान्विताभिधान इति भावः ।

वा०र०— सामान्यत एवान्विताभिधानशक्तिरित्यादि मूले तट्टीकायां च शक्तिपदप्रयोगः । शक्ति-पदार्थस्तु 'शक्तिश्चैवान्विते स्वार्थे' इति जिज्ञासाधिकरणीयानुभाष्यमूलटीकादौ द्रष्टव्यः । जिज्ञासाधिकरणीय-शक्तिश्चैवान्विते स्वार्थे इत्यनुव्याख्यानव्याख्यानस्थलीय 'ननु यदि गामानये'त्यादि वाक्ये गामितीत्यादि मूलानुसारेणोपयुक्तं शङ्काशयमाह **नन्वेवं ब्रह्मेत्यनेनैवेति** । उक्तानुव्याख्यानमूलगतोऽयमर्थः । वृद्धव्यवहारा-दिनेत्यादिकं सङ्गृह्णाह **शब्दशक्त्यवधारणेति** । एतट्टीकाग्रन्थव्याख्यानं प्राचीनोक्तस्थलीयास्मद्व्याख्यानवद् द्रष्टव्यम् । अवकाशानुसारेणात्रापि व्याख्येयमस्ति ।

॥ इति उक्तविशेषस्य तात्पर्यप्रदर्शनम् ॥

* * *

॥ अथ उक्तार्थस्य जिज्ञासाधिकरणोक्तावप्यत्रोक्तौ विशेषप्रदर्शनम् ॥

१३३ सु०— नन्वभिहितान्वयादिवादानामनुपपन्नत्वमन्विताभिधानस्योपपन्नत्वं च प्रथमसूत्रे सूत्रकारेणोक्तमेव । तत्किमत्राधिकरणसिद्धान्ततया तद्वर्णनेन । उच्यते । अतःशब्देन ह्यन्वयबोधेऽस्त्युपाय इत्येतावन्मात्रं प्रतीयते, न पुनः पदान्येव न पदाभिहितार्थादीनीति विशेषः । तत्र व्याख्यातारं प्रति कुतोऽयं सूत्रकृतोऽभिप्राय इति भवत्येव परिचोदना, तत्समाधानाय च अधिकरणसिद्धान्तवर्णनमुपपन्नमेव ।

यद्यप्युपपन्नः सूत्रकाराभिप्राय इति शक्यते वक्तुम्, तथाऽप्यधिकरणसिद्धान्तवर्णनमिषेण तत्र सङ्क्षेपतो व्युत्पादितोपपत्तीनां प्रपञ्चाय प्रयत्नोऽयमित्यदोषः ।

परि०— प्रथमसूत्र इति । 'शक्तिश्चैवान्विते स्वार्थे शब्दानामनुभूयते' इति अनुव्याख्यानं सौत्रातःपदस्य वर्णकान्तरपरमिति जिज्ञासाधिकरणे तत्र सुधायामेवोक्तेरिति भावः । **अधिकरणेति** । सिद्धान्तस्याधिकरणाभ्युपगमादिभेदेन चातुर्विध्यादधिकरणसिद्धान्ततयेत्युक्तम् । आनुषङ्गिकसिद्धस्यैवाधिकरणसिद्धान्तत्वात् ।

यादु०— अधिकरणसिद्धान्ततयेति । प्रकृतविचारप्रमेयसिद्धौ तदनुषङ्गेण योऽर्थः सिद्ध्यति सोऽधिकरणसिद्धान्तः । यथाऽऽह 'अनुमेयस्य सिद्ध्याऽर्थो योऽनुषङ्गेण सिद्ध्यति । स स्यादाधारसिद्धान्तो जगत्कर्ता यथेश्वरः' इति । अत्रानुषङ्गो नाम तदुपजीवनमेव न तु तद्व्याप्तत्वम् । यथाऽऽह हरिदीक्षितः 'अतोऽविनाभावादन्य एवानुषङ्गः' इति । तथा च प्रकृतस्य धर्मधर्मिणोः सविशेषाभेदस्य वक्ष्यमाणान्विताभिधानेनाभिहितान्वयादिवादानामयुक्तत्वेन वा व्याप्त्यभावात् कथमेतदिति शङ्काऽनवकाशः । वक्ष्यमाणान्विताभिधानादेः सविशेषाभेदव्यापकत्वाभावेऽपि वक्ष्यमाणरीत्या तत्सिद्ध्यधीनसिद्धिकत्वेनोक्तानुषङ्गशब्दार्थसद्भावात् । वस्तुतस्तु यद्यधोदेशे नदीपूरतदूर्ध्वदेशे वृष्टिरित्यादाविवात्रापि यदि धर्मधर्मिणोः सविशेषाभेदः तर्हि तद्वाचकशब्दे वक्ष्य-माणान्विताभिधानमिति व्याप्तिसम्भवादनुषङ्गशब्दस्य व्याप्त्यर्थकत्वेऽपि नानुपपत्तिरिति ध्येयम् ।

शे०चं०— अधिकरणसिद्धान्ततयेति । एकस्य प्रमेयस्य सिद्धावनुषङ्गेण सिद्ध्यर्थतयेत्यर्थः । 'अनुमेयस्य सिद्ध्याऽर्थो योऽनुषङ्गेण सिद्ध्यति । स स्यादाधारसिद्धान्तः' इत्युक्तेरिति भावः । **विशेषः** प्रतीयत इति पूर्वेणान्वयः । **अधिकरणसिद्धान्तवर्णनमिति** । अधिकरणसिद्धान्ततया वर्णनमित्यर्थः ॥ **तत्रेति** । प्रथमसूत्र इत्यर्थः ।

वा०र०— **सिद्ध्यर्थतयेति** । सिद्ध्यंशश्चासौ अर्थश्च सिद्ध्यदर्थः तस्य भावस्तत्ता तयेत्यर्थः । उक्तार्थकत्वं वरदराजीयं संवादयति **अनुमेयस्य सिद्ध्येति** ।

।। इति उक्तार्थस्य जिज्ञासाधिकरणोक्तावप्यत्रोक्तौ विशेषप्रदर्शनम् ।।

।। इति अन्विताभिधानस्य तद्गतविशेषस्य च विवरणम् ।।

* * *

।। अथ प्रतिज्ञातस्यान्विताभिधानस्योपपादनम् ।।

।। अथ अभिहितान्वयादिमतानुपपत्तेरन्विताभिधानोपपत्तेश्च हेतोर्दर्शनम् ।।

१३४ **सु०**— तदिति परामृष्टं हेतुं दर्शयति **यत इति** ।

अनु०— यतोऽशेषविशेषाणां वस्तुनाऽस्त्येव चैकता ।
अतः

वस्तुना ब्रह्मणा । **च**शब्दाद्विशेषश्च । **अतो** 'नाभिहितान्वयादिवादाः, किन्नामोक्तविधान्विताभिधानमि'ति शेषः । **तथा हि** । सत्यत्वादिधर्माणां तावद्ब्रह्मणाऽत्यन्ताभेदः समर्थितः, ततो ब्रह्मवाचकस्य ब्रह्मपदस्य सत्यत्वादिवाचकत्वमावश्यकमेव, किन्त्वभेदेऽन्वय एव नास्ति कुतस्तदभिधानं, विशेषतोऽभिधानप्रसङ्गश्चे'त्यवशिष्यते । तत्र सविशेषत्वाङ्गीकार एव समाधिः, अभेदेऽपि विशेषशक्त्याऽन्वितत्वस्य विशेषानभिधानस्य च उपपत्तिरिति ।

परि०— **तदिति परामृष्टमिति** । तच्चेत्यत्र तत्पदपरामृष्टमित्यर्थः । यत इत्यादेर्हेतुहेतुमद्भावं व्यनक्ति **तथा हि इत्यादिना** ।

गु०दी०— **यतोऽशेषविशेषाणामित्यत्र** विशिष्यते एभिः परमात्मेति विशेषाः सार्वज्ञादिधर्माः ।

यादु०— उक्तमधिकरणसिद्धान्तलक्षणं प्रकृते दर्शयितुमाह **तथाहि सत्यत्वादिति** । अभेदसिद्ध्या सिद्ध्मर्थं प्रदर्श्य विशेषसिद्ध्या सिद्ध्मर्थं दर्शयितुमाह **किन्त्वभेद इति** । तथा चैतदधिकरणप्रमेयस्य ब्रह्मधर्माणां ब्रह्मणा सविशेषाभेदस्य सिद्ध्या तद्वाचकाद्यस्य ब्रह्मादिपदस्य सामान्यत इतरपदार्थान्वितत्वार्थबोधकत्वं विशेषा-

नभिधानं चेत्येतादृशं प्रमेयं सिद्ध्यति । अत इदमधिकरणसिद्धान्ततयाऽत्राभिप्रेतमिति भावः । नन्वेवं भगवत्तद्धर्मवाचकपदेष्वेवान्विताभिधानं सिद्ध्यति न परस्परभिन्नार्थकेषु नदीतीरे पञ्चफलानीत्यादिपदेषु । तत्र सविशेषाभेदाभावात् । अतस्तत्रान्वयबोधो निर्निबन्धन आपन्न इति चेन्न । तत्रान्विताभिधानस्य जिज्ञासाधिकरणोक्तन्यायेनैव सिद्धतयाऽन्वयबोधस्य निर्निबन्धनत्वाभावात् । न चैवमत्रापि तेनैवान्विताभिधानसिद्धौ तदर्थं सविशेषाभेदोपादानं व्यर्थमिति वाच्यम् । उक्तान्विताभिधानं सूत्रकृदभिप्रेतमित्येतज्ज्ञापनायैव सविशेषाभेदोपादानं न तु सर्वत्रोक्तान्विताभिधानसाधकतया, येन (न) नदीतीरादिपदेषु कथमन्विताभिधानसिद्धिरित्यादिशङ्का स्यादिति ।

वं०प०— तदितीति । तच्चेत्यत्र तेन तस्मादित्यर्थकेन तच्छब्देनेत्यर्थः । सत्यत्वादिवाचकत्वं सत्यत्वाद्यभिन्नस्वार्थवाचकत्वम् ॥ **अन्वय एव नास्तीति** । तस्य भेदगर्भत्वादिति भावः । तदभिधानम् । **विशेषाभिधानप्रसङ्गश्च** इत्यत्राभेद इत्यनुवर्तते ।

शे०चं०— कथमन्विताभिधानवादस्याधिकरणसिद्धान्तत्वमित्यतस्तल्लक्षणवत्तामुपदर्शयितुं साक्षादधिकरणप्रतिपाद्यमर्थं तावद्दर्शयति **तथाहीति** । **अत्यन्ताभेद** इत्युपलक्षणम् । सविशेषश्चेत्यपि द्रष्टव्यम् । तत्राभेदसिद्ध्या सिद्धमर्थं दर्शयति **ततो ब्रह्मेति** । विशेषसिद्ध्या सिद्धमर्थं दर्शयितुं विशेषाभ्युपगमे निमित्तं तावदाह **किन्त्विति** । तथा च एतदधिकरणप्रमेयस्य ब्रह्मधर्माणां ब्रह्मणा सविशेषात्यन्ताभेदस्य सिद्ध्या तद्वाचकस्य ब्रह्मादिपदस्य सामान्यत इतरपदार्थान्वितस्वार्थबोधकत्वं विशेषानभिधानं चेत्येतादृशप्रमेयस्य सिद्धेर्भवत्यस्यार्थस्याधिकरणसिद्धान्ततेति भावः ।

वा०र०— एतदधिकरणप्रमेयस्येति पाठः ।

॥ इति अभिहितान्वयादिमतानुपपत्तेरन्विताभिधानोपपत्तेश्च हेतोर्दर्शनम् ॥

* * *

॥ अथ अन्विताभिधानवादे विशेषान्वयप्रतिपत्तिर्निर्निबन्धनैवेति शङ्का तच्छङ्कानिरासश्च ॥

१३५ सु०— 'स्यादेतत् । अस्मिन्नन्विताभिधानवादे विशेषान्वयप्रतिपत्तिर्निर्निबन्धनैवापद्यते, सकलपदानां सामान्यतोऽन्विताभिधाने सामर्थ्यात् । न चाद्यं पदं सामान्यतोऽन्विताभिधाय्युत्तरं तु विशेषत इति वाच्यम्, आद्यत्वादेरव्यवस्थितत्वात्, वेदवाक्येऽपि हि क्वचिद्ब्रह्मपदमाद्यं क्वचिदुत्तरमि'त्यत आह सामान्यत इति ।

अनु०— सामान्यतो ज्ञातः पदान्तरबलात्पुनः ।
भवेद्विशेषतो ज्ञातस्तेन स्यादन्वितोक्तिता ।

एकैकशः 'पदैः **सामान्यतो**ऽन्विततया **ज्ञातो**ऽर्थः **पुनः** पदान्तरसन्निधानाहित-शक्तिबलाद्विशेषतोऽन्वितत्वेन **ज्ञातो भवेत्** । **तेन** कारणेन पदाना**मन्वितोक्तिता**ऽन्विता-भिधायिता **स्या**दुपपन्नेति शेषः ।

परि०— वेदपदानि व्यवस्थितानीत्यत आह **वेदवाक्येऽपीति** । **ब्रह्मपदमाद्यमिति** । 'ब्रह्म पुरस्ताद्ब्रह्म दक्षिणतः' इत्यादावादौ, 'सत्यं ज्ञानमि'त्यादावुत्तरमित्यर्थः । **पदान्तरसन्निधाना-हितबलादि**त्येवमादीनि तत्र तत्रोक्तवाक्यानि तर्कताण्डवेऽन्विताभिधानवादे व्याख्याततात्पर्यकाणि ।

यादु०— ननु नियतानुपूर्वीके वेदवाक्ये आद्यत्वादिकं नाव्यवस्थितमित्यत आह **वेदवाक्येऽपीति** ॥ **पदान्तरसन्निधानाहितबलादिति** । पदान्तरसमभिव्याहाररूपसहकारिसामर्थ्यनाहितशक्त्यन्तरादित्यर्थः । अत्र च पदान्तरसमभिव्याहारो हि सामान्यस्य विशेषपर्यवसान एव हेतुर्न पुनरविद्यमानशक्त्याधान इति जिज्ञासाधि-करणीयसुधया यथा न विरोधस्तथा तत्रैवोक्तम् ।

वं०प०— **आहितबलात्** पर्यवसानबलात् ।

शे०चं०— ननु नियतानुपूर्वीकत्वाद्वेदस्य न तत्राद्यत्वादेरव्यवस्थितत्वमित्यत आह **वेदवाक्ये-ऽपीति** ॥ **ब्रह्मपदमाद्यमिति** । ब्रह्म पुरस्ताद्ब्रह्म दक्षिणत इत्यादौ, सत्यं ज्ञानमित्यादावुत्तरमित्यर्थः ॥ **पदा-न्तरसन्निधानाहितशक्तिबलादिति** । पदान्तरसन्निधानलब्धविशेषविषयताकसामान्यविषयकशक्तिबलादित्यर्थः । न चैवं पदान्तरसन्निधानाहितशक्त्यन्तराणीति पद्धतिविरोधः । तत्रापि पदान्तरसन्निधानेनाहितं पर्यवसितं शक्त्य-न्तरं शक्तिविशेषो येषां तानीति पदान्तरसन्निधानप्राप्तविशेषविषयताकसामान्यशक्तिमत्त्वस्यैवाभिमतत्वात् । यत्तु पदान्तरसन्निधानाहितशक्त्यन्तराणीति पद्धत्यनुसारेणैतट्टीकायामपि पदान्तरसन्निधानरूपसहकारिसामर्थ्यनाहित-शक्त्यन्तरमेवाभिमतमित्येकार्थत्वादविरोध इति, तन्न । तथा सति पदान्तरसमभिव्याहारो हि सामान्यस्य विशेष-पर्यवसानहेतुः, न पुनरविद्यमानशक्त्याधान इति पूर्वग्रन्थविरोधापातात् । न च तस्य पदान्तरसमभिव्याहारात्पूर्व-मन्वयसामान्ये शक्तिर्नेत्येतत्तन्निषेधपरत्वान्न तद्विरोध इति वाच्यम् । तथाऽपि गौरवं कल्पनेऽन्यथेत्युक्तशक्ति-द्वयकल्पनागौरवापरिहारात् । पूर्वं विशेषपर्यवसान एव हेतुरित्यस्वारस्यापाताच्चेति ।

वा०२०— एकैकश इति मूलम् । एकमेकमित्येकैकशः । सङ्ख्यैकवचनाच्च वीप्सायामित्यनेन सङ्ख्यावाचिप्रातिपदिकभूतात्प्रथमान्तादेकशब्दाद्वीप्सायां द्योत्यायां शस्प्रत्यये एकैकश इति भवति ।

ननु नित्यवीप्सयोरित्यनेन वीप्सायां द्विर्वचनविधानेनैकशब्दे एकैकेति द्विर्भवि प्राप्त एव सङ्ख्यैकवचनाच्चेति सूत्रेण शस्प्राप्तो भवतीति येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधक इति न्यायेन द्विर्वचनापवादेनैव शस्प्रत्यय इति भाष्यादौ स्थितत्वात् प्रकृतेऽपि प्राप्तद्विर्वचनापवादेन प्रवृत्तशसैव वीप्सायाः प्रतिपादनादेकैकेति द्विर्वचनमयुक्तमिति चेदत्र ब्रूमः । तान्येकवचनद्विवचनबहुवचनान्येकश इति सूत्रकारनिर्देशात् सर्वस्य द्वे इत्येतत्सूत्रीयैकैकशो ददातीति भाष्यकारीयप्रयोगाच्चोभयं साध्विति । न च येन नाप्राप्तन्यायेन प्रथमप्राप्तद्विर्वचनबाध एव शस् स्यादिति वाच्यम् । तथा सति भाष्यप्रयोगायोगप्रसङ्गेन शसस्तद्बाधकत्वनियमाभावमाश्रित्य शसि द्विर्वचनं विकल्पेन भवतीत्यस्यैवाङ्गीकर्तव्यत्वात् । ननु यत्र तद्धितेनानुक्ता वीप्सा भवति तत्र द्विर्वचनमित्युपक्रम्य तद्यथा एकैकशो ददातीति भाष्ये उदाहृतम् । व्याख्यातं च कैयटेन । केचिदाहुः । अल्पार्थोऽप्येकशब्दोऽस्ति तस्य वीप्सायां द्विर्वचने बह्वल्पार्थादिति शस्प्रत्यय इति । न चात्रैकशब्दस्याल्पार्थत्वमिति न भाष्यप्रयोगप्रतिबन्धा समाधानं सम्भवति । अत एव सुप इति सूत्रीयैकैकश इति क्रियाकारीयप्रयोग एवमेव रमाकृता निराकृत इति चेन्न । तथा सत्येकशब्दस्यार्थान्तराश्रयणेन कैयटोक्तरीत्या समाधानेन भाष्यप्रयोगः समर्थनीय इत्युक्तं स्यात् । तर्हि शसि विकल्पेन द्विर्वचनाश्रयणेन किमपराद्धम् । गौणत्वस्य कथञ्चित्समाधानद्वयेऽप्यविशेषात् । अथवा प्रकृते स्वार्थिकशस्प्रत्ययाङ्गीकारे तद्धितेन वीप्साया अनुक्तत्वाद्युक्तं द्विर्वचनमिति ब्रूमः । प्रायश इत्यादावत्यन्तस्वार्थिकशस्प्रत्ययोपलम्भेन समूलत्वात् । अन्ततो भाष्यप्रयोगोऽप्यस्मदुक्तसमाधानेनैव समाधेयः । प्रकृतिमुख्यार्थत्यागाभावात् । प्रत्ययार्थमात्रगौणत्वप्राप्तेः । अत एव कैयटेऽल्पार्थकैकशब्दाश्रयणेन समाधानं केचिदाहुरित्यन्यदीयत्वेनैवोक्तम् एवमेवैकैकश इत्यादि । ....स्वयं ग्रन्थप्रयोगा उपपादनीया इति तृप्यन्तु विद्वत्कौतुकविदः । अन्विताभिधाने उदयनोक्तबाधकदशकोद्धारीयतर्कताण्डवगतं या शक्तिः पदान्तरेत्यादिकमेतदेवाभिप्रेत्योक्तं पद्धतावित्यादि चास्ति तन्मनसि निधायाह **पदान्तरसन्निधानलब्धेति** । **पूर्वग्रन्थेति** । 'शक्तिश्चैवान्वित' इत्यनुभाष्यसम्बन्धिमूलग्रन्थेत्यर्थः । केचित्त्विति तर्कताण्डवे उक्तं केषाञ्चिन्मतं स्वयमनूद्य तत्रोक्ताहुरित्यनेन सूचितमस्वरसं स्वयं दर्शयति **यदित्यादिना** । **शक्तिर्नेत्येतदिति** । शक्तिर्नेत्येतन्निषेधे कृते पदान्तरे समभिव्याहारात्प्राक्सामान्यशक्तिः समभिव्याहारे सति तु विशेषशक्तिरित्युक्तमनेन भवति । **इत्युक्तशक्तिद्वयेति** । यद्यप्येवंविधशक्तिद्वयपरतया नैतद्योजितं मूले । तथापि तर्कताण्डवस्थां द्वितीययोजनामाश्रित्यानुवादोऽयमित्यदोषः । इतिशब्दो दूषणसमाप्तौ ।

॥ इति अन्विताभिधानवादे विशेषान्वयप्रतिपत्तिर्निर्निबन्धनैवेति शङ्का तच्छङ्कानिरासश्च ॥

* * *

॥ अथ 'सविशेषाभेदसमर्थनेन पदानामन्विताभिधानसाधने' अतिप्रसङ्गादयुक्तत्वशङ्का, अनुभवबलात्तच्छङ्कानिरासश्च ॥

१३६ सु०— 'सविशेषाभेदसमर्थनेनोक्तप्रकारं पदानामन्विताभिधानं सिद्धमित्ययुक्तम्, अतिप्रसङ्गात् । रूपस्य हि घटेनाभेद इति त्वचा तस्मिन् गृहीते तदपि गृह्येत । अथ विशेषेण प्रतिबद्धं तद्ग्रहणमित्युच्यते, तर्ह्यत्रापि प्रतिबन्धः स्यात् । विशेषाभिधानं प्रतिबद्धमेवेति चेत्, सामान्याभिधानमपि कुतो न प्रतिबद्धम् । अथ सम्भावनैवैषोक्तेति मतं, तदा नायमधिकरणसिद्धान्तः, एकस्य सिद्धावनुषङ्गी योऽर्थः सिद्ध्यति सोऽधिकरणसिद्धान्तो, न हि सम्भावनासिद्धिरित्यत आह **स्वार्थ एवेति** ।

अनु०— स्वार्थ एवान्वितो यस्मात्केनचित्तद्विशेषतः ।
अनेनेति तदुक्त्यैव ज्ञायतेऽनुभवेन हि ।

यस्मात्केनचिदन्वित एव पदानां **स्वार्थ इति, अनेन** सत्यत्वेन ज्ञानत्वेन वाऽन्वित **इति, तद्विशेषतो** धर्मविशेषेण अन्वयः **तदुक्त्यैव** सत्यादिपदोक्त्यैव **ज्ञायत** इत्यनुभ(**वेन**)वसिद्धम् । 'तस्मादुक्तं युक्तमि'ति शेषः । प्रत्येकं पदानि सामान्यतोऽन्विताभिधायीनि, विशेषतोऽन्वितार्थप्रतीतिस्तु परस्परसन्निधानाहितशक्तिभिः पदैर्भवतीत्येतदनुभवसिद्धमित्यर्थः ।

एतदुक्तं भवति । अभेदेन तावद्विशेषाभिधानं प्राप्तं, न च तदस्त्यनुभवविरोधात् । अतस्तत्प्रतीतिबन्धकत्वेन विशेषः कल्पनीयः । स च यथाऽनुभवमेव स्वीकार्य इति नातिप्रसङ्गः कश्चिदिति ।

परि०— **सम्भावनैवैषोक्तेति** । 'उभयव्यपदेशादि'ति नये धर्माणां ब्रह्मणा सविशेषाभेदेऽभिहिते सति अन्विताभिधानं सम्भाव्यत इति सम्भावनोक्ता न तु सिद्धमित्युच्यते इत्यर्थः ॥ **न हि सम्भावनासिद्धिरिति** । सम्भावना न हि सिद्धिरित्यर्थः । 'इति'पदस्य हेत्वर्थतया वृत्तिमुपेत्य योजयति **यस्मादित्यादिना** ॥ **सन्निधानाहितशक्तिभिरिति** । परस्परसन्निधानान्येवाहितशक्तयो न तु शक्त्यन्तरमिति व्याख्यातार्थमेतद्वाक्यं तर्कताण्डवे ॥ **नातिप्रसङ्ग इति** । 'रूपस्य ही'त्यादिना प्रागुक्तातिप्रसङ्गो नेत्यर्थः ॥ *अन्विताभिधानोपपादनम्* ॥

गु०दी०— स्वार्थ एवान्वितो यस्मादित्यत्र केनचिदिति सामान्यान्वयस्य निरूपणम् । अनेन सत्यादिपदबोधितेन सत्यत्वेन ज्ञानत्वेनानन्तत्वेन चेति विशिष्यान्वयकथनम् । टीकायामपि वाशब्दश्चशब्दार्थः ।

यादु०— ननु तर्हि सामान्याभिधानप्रतिबन्धकत्वमपि विशेषे स्वीकार्यं स्यादित्यत आह **स चेति** ।

वं०प०— तत्प्रतिबन्धकत्वेन विशेषाभिधानप्रतिबन्धकत्वेन । एवं तर्हि सामान्यान्वयाभिधानमपि कुतो न प्रतिबद्धमित्यतिप्रसङ्ग इति चेत् तत्राह **स चेति** । विशेष इत्यर्थः ॥ **यथानुभवमिति** । सत्यपदेन विशेषान्वयप्रतिपत्तेरननुभूयमानत्वेन तत्प्रतिबन्धकतयैव विशेषोऽङ्गीकार्यः न तु सामान्यान्वयाभिधानप्रतिबन्धकत्वेन । सत्यपदं सामान्यतो योग्येतरान्वितं स्वार्थं बोधयतीत्यनुभवसिद्धत्वादिति । एवं तर्हि घटे त्वचा प्रतीते सति अभेदाद्रूपमपि प्रतीयेतेति चेत् । सत्यम् । सामान्यतो घटत्वेन रूपेण प्रतीयत एव । शुक्लत्वादिविशेषाकारेणाप्रतीतिस्तु विशेषबलादिति न दोष इति ध्येयम् ।

शे०चं०— सम्भावनैवेति । उभयव्यपदेशादिति नये धर्माणां ब्रह्मणा सविशेषाभेदेऽभिहिते सत्यन्विताभिधानं सम्भाव्यत इति सम्भावनोक्ता न तु सिद्धमित्युच्यत इत्यर्थः ॥ **न हीति** । उत्कटैककोटिकसंशयस्यैव सम्भावनात्वादिति भावः । **स्वार्थ** इतीत्यस्यानुभवसिद्धमिति वक्ष्यमाणेनान्वयः । तात्पर्यमाह **प्रत्येकमिति** ॥ **परस्परेति** । परस्परसन्निधानाल्लब्धविशेषविषयताकसामान्यशक्तिभिरित्यर्थः । ननु तथाऽपि कथमुक्तप्रतिबन्द्या परिहार इत्यत आह **इदमुक्तं भवतीति** ॥ **कश्चिदिति** । विशेषाभिधानप्रसङ्गरूपः सामान्यानभिधानप्रसङ्गरूपो वेत्यर्थः ।

वा०र०— अनुभवेन सिद्धमिति वक्ष्यमाणेनेति पाठः । शक्तिद्वयकल्पनाभिप्रायकत्वमस्येति भ्रान्तिनिरासाय प्राग्व्याचष्टे **परस्परसन्निधानेति** ।

॥ इति 'सविशेषाभेदसमर्थनेन पदानामन्विताभिधानसाधने' अतिप्रसङ्गादयुक्तत्वशङ्का, अनुभवबलात्तच्छङ्कानिरासश्च ॥

॥ इति प्रतिज्ञातस्यान्विताभिधानस्योपपादनम् ॥

* * *

॥ अथ अभिहितान्वयादिपक्षाणामयुक्तत्वस्योपपादनम् ॥

॥ अथ अन्विताभिधानानङ्गीकारे बाधकप्रदर्शनमुखेन अभिहितान्वयादिपक्षाणामयुक्तत्वोपपादनम् ॥

१३७ **सु०—** एवं प्रतिज्ञातमन्विताभिधानमुपपाद्य यदुक्तमभिहितान्वयादिपक्षाणामयुक्तत्वं तदन्विताभिधानानङ्गीकारे बाधकप्रदर्शनमुखेनोपपादयति **यदीति** ।

अनु०— यद्यनन्वितमेवैतत्पदं स्वार्थं वदेदिह ।
तथाऽन्यान्यपि सर्वाणि कः कुर्यादन्वयं पुनः ।

एतद्ब्रह्मादिकमाद्यं **पदम्** । **इह** सत्यज्ञानादिवाक्ये । **अन्यान्युत्तरा(ण्यपि)णि** पदा(नि)**न्यपि तथा** यद्यनन्वितानेव स्वार्थान्वदेयुस्तर्ह्यन्वयमन्वयज्ञानं तु **कः कुर्यात्** । आद्यं पदमलब्धसहायं प्रथमं सामान्यतोऽन्वितमभिधत्ते, उत्तराणि त्वादित एव लब्धसहायानि विशेषत एवान्विताभिधायीनि । तदिदं वैलक्षण्यं सूचयितुमेतदन्यानीति विभागेन ग्रहणम् । अन्यथा यदि वाक्यस्थानि समस्तानि पदानि नान्विताभिधायीनि किन्त्वनन्वितानेव स्वार्थानभिदधतीति, तर्ह्यन्वयज्ञानं निर्निबन्धनमापद्येतेत्यवक्ष्यत् ।

परि०— **एतदन्यानीति** । विभागेन ग्रहणमित्यत्र एतदिति अन्यानीति च विभागेन इत्यर्थः ।

वं०प०— अन्विताभिधानाङ्गीकारे नायं दोष इत्याह **आद्यं पदमिति** ॥ **सूचयितुम्** अस्मन्मत इति शेषः । आदितः पदात् । उत्तरपदान्याद्यं पदं सहकारीकृत्येति यावत् ।

* * *

॥ अथ उक्तार्थस्य प्रपञ्चनम् ॥

१३८ सु०— एतदेव प्रपञ्चयति **व्यापार इति** ।

अनु०— व्यापारो न हि शब्दस्य परः स्वार्थप्रकाशनात् ।
पुमानप्येकवारोक्त्या कृतकृत्यो यदा भवेत् ।
अन्वयस्य कथं ज्ञानं शब्दार्थत्वं यदाऽस्य न ।

यदा यद्यस्यान्वयस्य **शब्दार्थत्वं** पदाभिधेयत्वं **न** स्यात् तर्ह्यन्वयस्य **ज्ञानं कथं** न कथञ्चित्, उपायान्तराभावात् । तथा हि । अन्वयज्ञानात्पूर्वभावित्वेन वादिभिरङ्गीकृतत्वेन वा प्रसक्तानि तावदेतानि पदानि वा वक्ता पदैरभिहिताः पदार्था वा वाक्यं वा वाक्यान्त्य-

वर्णो वा वर्णमाला वा स्फोटो वा श्रोता वेति । तत्र तावदन्विताभिधानानङ्गीकारे पदाना-मुपायत्वं नोपपद्यत इत्येतद्व्यापारो न हीत्यर्धेनाह ।

शब्दस्य पदस्य, स्वार्थप्रकाशनादन्यो व्यापारो नास्तीति तावत्सुप्रसिद्धम् । अन्वयश्च न पदाभिधेयः । तत्कथं पदस्य तज्ज्ञानोपायत्वम् ।

वं०प०— **तज्ज्ञानोपायत्वम्** अन्वयज्ञानोपायत्वम् । पदानामिति शेषः ।

शे०चं०— स्फोटेतरपदाद्यभिप्रायेणाह **पूर्वभावित्वेनेति** । स्फोटसाधारण्येनाप्याह **वादिभिरङ्गीकृतत्वेनेति** । पदानामन्वयबोधे उपायत्वस्य सिद्धान्तेऽप्यभ्युपगमात् तन्निरासेऽपसिद्धान्तः स्यादित्यत उक्तम् **अन्विताभिधानानङ्गीकार इति** ।

वा०र०— अव्ययानामनेकार्थकत्वमाश्रित्याह **यदा यदीति मूलम्** । **स्फोटेतरपदादीति** । आदिपदेन स्फोटपदातिरिक्तश्रोत्रन्तानां ग्रहणम् । स्फोटस्य वाक्यार्थतुल्यतया पदैरभिव्यङ्ग्यत्वेन वाक्यार्थज्ञानात्पूर्वभावित्वाभावादिति भावः । वाद्यङ्गीकृतत्वस्य पदादौ सर्वत्र सद्भावादाह **स्फोटसाधारण्येनापीति** ।

* * *

१३९ **सु०— वक्तुरपि तन्नास्तीत्याह पुमानपीति ।**

यदा यस्मात् 'तस्मात् सोऽपि नोपाय' इति शेषः । 'एकवार'ग्रहणं तस्यात्यन्तव्यवहितत्वद्योतनार्थम्, सकृदुच्चारण एव तस्योपक्षीणत्वादिति ।

गु०दी०— **तस्यात्यन्तव्यवहितत्वद्योतनार्थमि**त्यत्र तस्य वक्तुः ।

वं०प०— **व्यवहितत्वेति** । पदानामिव वाक्यान्तर्गतत्वाभावादिति भावः । तदेवाह **सकृदिति** ।

शे०चं०— **यस्मादिति** । 'यदाशब्दस्तु हेत्वर्थे कालार्थे चापि भण्यत' इति स्मरणादिति भावः ।

।। इति उक्तार्थस्य प्रपञ्चनम् ।।

।। इति अन्विताभिधानानङ्गीकारे बाधकप्रदर्शनमुखेन अभिहितान्वयादिपक्षाणामयुक्तत्वोपपादनम् ।।

* * *

॥ अथ पदाभिहितपदार्थानामन्वयबोधकत्वे दोषदर्शनम् ॥

१४० **सु०**— पदाभिहितानां पदार्थानामन्वयबोधकत्वपक्षे दोषमाह **यदैवेति** ।

अनु०— यदैवानन्वितार्थस्य वचनं तैः पदैर्भवेत् ।
अनन्वितः स्याच्छब्दार्थो

अनन्वितार्थस्यैवेति सम्बन्धः । जातावेकवचनम् । **तैः** वाक्यस्थैः । यदि पदानि **अनन्वितानेव** स्वार्थान् प्रतिपाद्य निवर्तन्ते, ततः पदार्था एवाकाङ्क्षादिमन्तोऽन्वयं बोधयन्ति । **तर्ह्यनन्वित एव शब्दार्थः स्यात्**, अन्वयस्य शाब्दत्वं न स्यादिति यावत् । पदार्थाख्यं प्रमाणान्तरं चाप(द्येत)द्यते ।

भवेदेतत् । यदि पदार्थानामेवान्वयबोधकत्वं ब्रूमः । न चैवम् । किन्नाम पदैरभिहितानाम् । तत्कथमन्वयस्याशाब्दत्वमित्यत आह **नेति** ।

न तदर्थो हि सोऽन्वयः ॥

स पदार्थैः प्रतिपादितः, **अन्वयः**, तेषां पदानामर्थो, **न** हीत्यर्थः । तथा सति प्रत्यक्षावगतधूमप्रतिपादितस्याग्नेः प्रत्यक्षप्रमेयत्वं स्यादिति भावः ।

वं०प०— प्रमाणान्तरमिति । पदार्थानां संसर्गरूपान्वयप्रमितिकरणत्वेन प्रमाणलक्षणाक्रान्तत्वादिति भावः । **धूमप्रतिपादितस्य** धूमजन्यज्ञानविषयस्य ।

शे०चं०— पदैरित्यनुरोधेनान्वितार्थानामिति बहुवचनस्यैव प्रयोक्तव्यत्वादनन्वितार्थस्येत्येकवचनप्रयोगस्यानुपपत्तिमाशङ्क्याह **जातावेकवचनमिति** । उक्ततात्पर्यमेतत् ॥ **पदार्थाख्यमिति** । अन्वयप्रमितिकरणत्वात् प्रामाण्यं प्रत्यक्षाद्यनन्तर्भूतत्वाच्च प्रमाणान्तरत्वमिति भावः ।

वा०र०— पदैरित्येतदनुरोधेनेति पाठः । पदैरिति बहुवचनानुरोधेनेत्यर्थः । **उक्ततात्पर्यमिति** । अन्वितार्थानामनेकत्वेऽपि जातेरेकत्वात् तद्विवक्षयैकवचनमित्येवंरूपेण तात्पर्यम् । वैराग्यपादीय-'सिद्धान्तस्यैव साधका' इत्यनुव्याख्यानमूलव्याख्यानावसरे उक्तप्रायमित्यर्थः ।

॥ इति पदाभिहितपदार्थानामन्वयबोधकत्वे दोषदर्शनम् ॥

।। अथ 'वाक्यस्यान्वयबोधकत्वम्' इतिपक्षनिरासः ।।

१४१ सु०— अस्तु तर्हि वाक्यस्यान्वयबोधकत्वमिति पक्ष इत्यत आह **निराकाङ्क्षेति** ।

अनु०— निराकाङ्क्षपदान्येव वाक्यमित्युच्यते बुधैः ।

पदानामन्विताभिधानसामर्थ्यमनङ्गीकुर्वता वाक्यस्य अन्वयबोधकत्वमङ्गीकर्तुमशक्यम्, यतः **पदान्येव वाक्यमिति बुधैरुच्यते** । पदव्यतिरिक्तस्य वाक्यस्याभावादित्यर्थः । केचित्पदातिरिक्तमेव वाक्यं प्रतिपन्नास्तद्व्युदासाय **बुधैरि**त्युक्तम् । तच्च निराकरिष्यते । गौरश्वः पुरुषो हस्तीत्यादिपदानां वाक्यत्वं मा भूदिति **निराकाङ्क्षे**त्युक्तम् । सन्निधानाभावे निराकाङ्क्षत्वमेव न निर्वहतीति निराकाङ्क्षत्वेनैव सन्निधानस्य लब्धत्वान्न पृ(तत्पृ)थगुक्तम् । अग्निना सिञ्चेदित्यादौ योग्यताऽभावेऽप्यन्वयप्रतीतेः प्रकृतानुपयोगाद्योग्यताऽपि नोक्ता ।

परि०— निराकरिष्यत इति । उत्तरवाक्य इति भावः ।। **निराकाङ्क्षेत्युक्तमिति** । समभिव्याहृतपदानामन्योन्यमाकाङ्क्षावत्त्वेऽप्यन्यपदे साकाङ्क्षत्वराहित्यं निराकाङ्क्षत्वम् । तेन गौरश्व इति सङ्गच्छत इति ज्ञेयम् । उक्तं हि । 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादि'ति जैमिनिसूत्रे यत्पदोद्धारे साकाङ्क्षं पदं भवति । तस्मिन् सन्निहिते सति निराकाङ्क्षं तद्वाक्यमिति ।। **प्रकृतानुपयोगादिति** । अन्वयबोधकत्वमात्रस्याधुना विचार्यमाणत्वेन प्रमापकत्वाविचारादिति भावः ।

गु०दी०— निराकाङ्क्षेत्युक्तमित्यस्य गवादिपदानां परस्परमन्वयाभावेऽपि गौः किं अश्वः किमित्यादिप्रकारेणाकाङ्क्षाया जायमानत्वान्न तेषां निराकाङ्क्षत्वम् । आकाङ्क्षापूरकत्वं हि निराकाङ्क्षत्वम् । तच्च न तेषामिति भावः । **प्रकृतानुपयोगा**दित्यत्र अन्वयबोधकं किमिति विचार्यते । न तु प्रमाणम् । बोधे च योग्यताया नोपयोग इत्यर्थः ।

यादु०— निराकरिष्यत इति । अनुपदमेवेति शेषः । **निराकाङ्क्षेत्युक्तमिति** । अत्र निराकाङ्क्षत्वं नाम पर्यवसिताकाङ्क्षत्वमेवेति ज्ञातव्यम् ।। **न निर्वहतीति** । प्रहरे प्रहरे उच्चारितेषु गामानयेत्यादिष्वाकाङ्क्षापर्यवसानस्यादर्शनादिति भावः । पद्धत्याद्युक्तवाक्यलक्षणप्रविष्टाकाङ्क्षा तु न पर्यवसिता विवक्षिता किन्त्वन्यैवेति न तत्र सन्निधिपदं व्यर्थमित्यवगन्तव्यम् । **प्रकृतानुपयोगादिति** । वाक्येऽन्वयबोधकत्वमेवेदानीं विचार्यतया प्रकृतं न तत्प्रमापकत्वमपि येन तदर्थं योग्यतापेक्षा स्यादिति भावः । योग्यतान्तर्भाविन वाक्यलक्षणकथनं तु प्रमाणवाक्यस्यैव लक्ष्यत्वाभिप्रायेणेति मन्तव्यम् ।

वं०प०— वाक्यं स्फोटाख्यम् ।। **न निर्वहतीति** । प्रहरे प्रहरे उच्चार्यमाणेष्वाकाङ्क्षापूर्तिरूपं निराकाङ्क्षत्वमेव नास्तीत्यर्थः ।

शे०चं०— **निराकरिष्यत इति** । तत्तदर्थाभिधानेनेत्येतद्व्याख्यानावसर इति शेषः ॥ **निराकाङ्क्षेत्युक्तमिति** । यद्यपि पूर्वपदसञ्जाताकाङ्क्षापूरकत्वरूपाकाङ्क्षाविरहाद्गौरश्वः पुरुषो हस्तीत्यादिपदादावपि निराकाङ्क्षत्वमस्त्येवेति न तेन तन्निरासः । तथाऽपि स्वस्मिन्नेव परिपूर्णाकाङ्क्षत्वेनान्यत्र निराकाङ्क्षत्वस्यैवेह निराकाङ्क्षपदेन विवक्षितत्वात् तेषां च तदभावाद्युक्तस्तेन तन्निरास इति भावः ॥ **न निर्वहतीति** । प्रहरे प्रहरे उच्चारितेषु गामानयेत्यादिपदेष्वाकाङ्क्षापर्यवसानस्यादर्शनादिति भावः ॥ **प्रकृतानुपयोगादिति** । अन्वयप्रमायां तदुपयोगेऽपि तस्या इहाप्रकृतत्वात् प्रकृततत्प्रतीतौ (अन्वयप्रतीतौ) चानुपयोगादित्यर्थः । न चैवं पद्धत्याद्युक्तवाक्यलक्षणेऽपि सन्निधिपदं योग्यतापदं च न ग्राह्यं स्यादिति वाच्यम् । तदुक्तलक्षणप्रविष्टाया आकाङ्क्षायाः पर्यवसितत्वरूपत्वाभावेन सन्निधानाभावेऽपि तत्र विवक्षिताकाङ्क्षाया निर्वाहादाकाङ्क्षायाः सन्निधानस्यालाभात् सन्निधिपदस्य प्रमाणवाक्यस्यैव लक्ष्यत्वाभिप्रायेण योग्यतापदस्य च उपपन्नत्वादित्याशयात् ।

वा०र०— निराकाङ्क्षं नाम आकाङ्क्षारहितमिति मन्दप्रतीतिपराकरणाय तद्विवक्षितार्थं दर्शयितुमापातप्रतिपन्नार्थमादायातिव्याप्त्युद्धाराभावमाशङ्कते **यद्यपि पूर्वपदेति** । न तेन निरास इत्युपलक्षणम् । वाक्यत्वेनाभिमते घटमानयेत्यादावाकाङ्क्षावत्त्वस्य सम्मत्या लक्ष्ये निराकाङ्क्षत्वस्यासम्भवश्चेत्यपि ज्ञेयम् । **विवक्षितत्वादिति** । साकाङ्क्षत्वस्य वाक्यलक्षणतायाः सिद्धत्वेन गामानयेत्यादिसाकाङ्क्षवाक्येषु निराकाङ्क्षत्वाभावेनासम्भवः स्याल्लक्षणेनेतरभेदासिद्ध्या वाक्याभाससाधारणलक्षणप्रणयनवैयर्थ्यं च स्यादित्यतः तदुभयपरिहाराय आपातप्रतीतार्थत्यागेनोक्तार्थान्तरविवक्षाया आवश्यकत्वादिति भावः । यथा ह्याकाङ्क्षाया वाक्यलक्षणत्वेऽपि केवलस्य पचतीत्यादेः किमित्याद्याकाङ्क्षावत्त्वेनानिवृत्ताकाङ्क्षतया साकाङ्क्षत्वमिति व्यवहारो वाक्यलक्षणभूतपूर्वपदसञ्जाताकाङ्क्षापूर्वकत्वाभावविवक्षया । तथा वाक्ये निराकाङ्क्षपदेनोक्तविधाकाङ्क्षापूर्वकत्वरूपाकाङ्क्षायां सत्यां किमित्याकाङ्क्षायां निवृत्तिरूपं निवृत्ताकाङ्क्षत्वमेव प्रतिपाद्यत इति निराकाङ्क्षत्वव्यवहारोऽपि स्वस्मिन्परिपूर्णाकाङ्क्षत्वविवक्षयैव । तथाभिप्रायेणैव साकाङ्क्षत्वस्य दोषत्वेन पचतीत्यादिमात्रस्य वा गौरश्व इत्यादेर्वा साकाङ्क्षत्वेन वाक्याभासत्वमित्यादिरूपोक्तिर्मण्यादिबहुग्रन्थेषु स्पष्टा । तदैतावतोऽर्थस्य प्रतिपादनायैव तस्मिन्नेव परिपूर्णाकाङ्क्षत्वेनेत्यनेन वाक्यलक्षणभूतमाकाङ्क्षावत्त्वं प्रतिपाद्य आकाङ्क्षापूर्वाभावरूपसाकाङ्क्षत्वशब्दोक्तदोषाभावप्रतिपादनमन्यत्र निराकाङ्क्षत्वस्येति कृतम् । वक्ष्यति चाकाङ्क्षापर्यवसानस्य अदर्शनादिति । तथा च जिज्ञासितार्थानभिदधति जिज्ञासां निवर्तयतीत्यादि मूले च स्पष्टयिष्यतीति ज्ञातव्यम् । **तत्र विवक्षिताकाङ्क्षाया इति** । यत्पदं यत्पदव्यतिरेकप्रयुक्तस्वार्थान्वयाननुभावकं तस्य तेनाकाङ्क्षेति विवक्षिताया आकाङ्क्षाया इत्यर्थः । उक्तरूपाकाङ्क्षायाश्च सन्निधानाभावेऽपि निर्वाह एव । पर्यवसिताकाङ्क्षत्वरूपनिराकाङ्क्षत्वरूपत्वे हि सन्निधानलाभः स्यान्न चैवमिति भावः । सन्निधिपदस्येत्यस्योपपन्नत्वादित्युत्तरेण सम्बन्धः ।

॥ इति 'वाक्यस्यान्वयबोधकत्वम्'इतिपक्षनिरासः ॥

* * *

।। अथ 'तथात्वे वाक्यस्य पदव्यतिरिक्तत्वाङ्गीकारारोप'निरासः ।।

१४२ **सु०—** नन्वेवं वदता भवतैव पदव्यतिरिक्तं वाक्यमङ्गीकृतम् । यथा खलु तन्तूनां विक्रियाविशेषः पटो न तन्तुमात्रम् । तथा पदानां यो निराकाङ्क्षतालक्षणो विक्रियाविशेषः स वाक्यं, पदातिरिक्तमेवेत्यत आह **तत्तदिति** ।

अनु०— तत्तदर्थाभिधानेन स्यान्निराकाङ्क्षता च सा ।

न तन्तूनां पट इव पदानां **निराकाङ्क्षता** विक्रिया, येन पदातिरिक्तं वाक्यं स्यात्, किन्नाम श्रोतृपुरुषधर्म एव । जिज्ञासा खल्वाकाङ्क्षा, निराकाङ्क्षता च निवृत्तजिज्ञासत्वम् । **सा च निराकाङ्क्षता** पदैः स्यादिति पदानि निराकाङ्क्षाणीत्युच्यन्ते । निराकाङ्क्षताकारित्वं च न पदानां विक्रियाविशेषः, जिज्ञासितार्थाभिधानमात्रेण तद्धेतुत्वात्, तस्य च स्वभावत्वात् । तथा च जिज्ञासितार्थानभिदधति जिज्ञासां निवर्तयन्ति पदानि निराकाङ्क्षाणीत्युक्तं भवति ।

परि०— **तद्धेतुत्वादिति** । निराकाङ्क्षताहेतुत्वादित्यर्थः ॥ **तस्य चेति** । अभिधानस्य चेत्यर्थः ।

यादु०— **तस्य चेति** । अभिधानस्य च पदशक्तिरूपत्वेन तदनागन्तुकधर्मत्वादित्यर्थः ।

वं०प०— **एवं वदतेति** । निराकाङ्क्षपदान्येवेति पदानां निराकाङ्क्षतालक्षणविक्रियाविशेषस्य वाक्यत्वं वदतेत्यर्थः । **विक्रियाविशेषो** व्यतिषङ्गविशेषरूपः । **न तन्तुमात्रम्** । व्यतिषङ्गविशेषरहिततन्तूनां पटत्वाभावादिति भावः ॥ **स वाक्यमिति** । स वाक्यमित्युच्यते तच्च पदातिरिक्तमेवेति योज्यम् । **पटो** व्यतिषङ्गविशेषरूपः । **उच्यन्ते** उपचर्यन्ते । एवं तर्हि निराकाङ्क्षपदानि पुरुषनिराकाङ्क्षताकारीणि पदानि वाक्यमित्युक्त्या पुरुषनिराकाङ्क्षताकारिताख्या विक्रिया वाक्यरूपा पदेष्वतिरिक्ता प्राप्तैवेत्यत आह **निराकाङ्क्षते(तैव)ति** । यदि पुरुषनिराकाङ्क्षताकारिता न पदनिष्ठा विक्रिया कथं तर्हि पुरुषनिराकाङ्क्षताहेतुत्वं पदानामित्यत आह **जिज्ञासितेति** ॥ **तद्धेतुत्वादिति** । श्रोतुर्निराकाङ्क्षताहेतुत्वादित्यर्थः । ननु तर्हि जिज्ञासितार्थाभिधानमेव पदनिष्ठा विक्रिया सा च पदभिन्नैवेति तदाख्यं वाक्यं पदभिन्नमेवेत्यत आह **तस्य चेति** । अर्थाभिधायकत्वस्येत्यर्थः । तथा च नेदं विक्रियारूपमागन्तुकम् । येन पदाद्भिन्नं स्यादिति भावः । निराकाङ्क्षाणीत्युक्तं भवतीत्यत्र निराकाङ्क्षाणीत्यनन्ततान्येव वाक्यमित्युच्यन्त इति शेषः ।

शे०चं०— तस्य चेति । जिज्ञासितार्थाभिधानस्येत्यर्थः । तस्य पदशक्तिरूपत्वेन तदनागन्तुकधर्मत्वादिति भावः ।

वा०र०— पदशक्तिरूपत्वेनेति । पदे विद्यमानो यः शक्त्याख्योऽनागन्तुको धर्मः तद्रूपत्वेनेत्यर्थः ।

* * *

।। अथ उक्तस्य 'जिज्ञासितार्थाभिधानेनैव श्रोतुर्निराकाङ्क्षता स्यात्' इत्यस्योपपादनम् ।।

१४३ **सु०— जिज्ञासितार्थाभिधानेनैव श्रोतुर्निराकाङ्क्षता स्यादित्येतदुपपादयति अपूर्तेरिति ।**

अनु०— अपूर्तेस्तावदर्थानामाकाङ्क्षा पूर्वमिष्यते ।

आनयेत्येवोक्ते, गवादिपदप्रयोगात्पूर्वं, या किमि(त्यादि)तिजिज्ञासा (वर्तते) सा, **तावतां** जिज्ञासितानाम**र्थानां** कर्मादीनाम**पूर्ते**र्गवादिपदैरनभिधानादिति यावत् ।

एतदुक्तं भवति । शाब्दी जिज्ञासा यावत्पदानि जिज्ञासिता(न)र्थान्नाभिदधति तावन्न निवर्तते, निवर्तते च पदैस्तेष्वभिहितेष्वित्यतोऽन्वयव्यतिरेकाभ्यां विज्ञायते तत्तदर्थाभिधानेनैव निराकाङ्क्षता स्यादिति ।

वाक्यान्त्यवर्णो वर्णमालेति पक्षद्वयमतिमन्दमिति न दूषितम् । तथा चोक्तं पुरस्तात् ।

परि०— तथा चोक्तं पुरस्तादिति । जिज्ञासानये 'शक्तिश्चैवान्विते स्वार्थे' इति श्लोके 'गौरवं कल्पनेऽन्यथे'त्येतत्पदव्याख्यावसरे अतिमन्दत्वं तन्मतद्वयस्योक्तमित्यर्थः ।

यादु०— पुरस्तादिति । जिज्ञासाधिकरण इत्यर्थः ।

वं०प०— शाब्दीति । शाब्दी ह्याकाङ्क्षा शब्देनैव शाम्यतीति न्यायादिति भावः ॥ **अतिमन्दमिति** । गामानयेत्यत्र य-इत्यन्त्यवर्णश्रवणे गौरश्व इत्यादिवर्णमालाश्रवणे चान्वयबोधाजननादिति भावः ।

शे०चं०— पुरस्तादिति । जिज्ञासाधिकरणे 'गौरवं कल्पनेऽन्यथे'त्येतद्व्याख्यानावसरेऽतिमन्दत्वं (गामानयेत्यत्र य-इत्यन्त्यवर्णश्रवणे गौरश्व इत्यादिवर्णमालाश्रवणे चान्वयबोधाजननादिति मन्दत्वम्) व्युत्पादितमित्यर्थः ।

।। इति उक्तस्य 'जिज्ञासितार्थाभिधानेनैव श्रोतुर्निराकाङ्क्षता स्यात्' इत्यस्योपपादनम् ।।

।। इति 'तथात्वे वाक्यस्य पदव्यतिरिक्तत्वाङ्गीकारारोप'निरासः ।।

।। अथ स्फोटवादनिरासः ।।

१४४ **सु०**— 'अस्तु तर्हि निरस्तवर्णपदविभागं स्फोटाख्यं वाक्यमेवान्वयस्य प्रतिपादकम्, पदानि तु तदभिव्यञ्जकतयोपयुज्यन्त इति पक्षः' इत्यत आह **कर्मेति** ।

अनु०— कर्मकर्तृक्रियाणां तु पूर्तौ कोऽन्योऽन्वयो भवेत् ।

अत्र कर्मादिग्रहणमुपलक्षणम्, जिज्ञासितानां पदार्थानामित्यर्थः, अन्योन्यसंसृष्टानामिति शेषः । **पूर्ताव**भिधाने सति पदैरिति शेषः । **अन्वयो भवेत्** प्रतिपादनीय इति शेषः ।

एतदुक्तं भवति । स्फोटमन्वयस्य प्रतिपादकं वदता तत्सद्भावे प्रमाणं वाच्यम् । अन्वयप्रतीत्यन्यथाऽनुपपत्तिरिति चेन्न, पदानामेव संसृष्टार्थप्रतिपादकत्वसम्भवात् । न च तदतिरिक्तोऽन्वयो नामास्ति प्रतिपादनीयो यदर्थं स्फोटान्वेषणमिति ।

एवमनङ्गीकारे बाधकमाह **अपूर्तिरिति** ।

अपूर्तिश्चेत्पदैरुक्तैः किं नृभृङ्गेण पूर्यते ।

अन्वयस्यापूर्तिरनभिधानम् । **उक्तै**रिति पदानां प्रमितत्वमभिप्रैति । **नृशृङ्गेण** स्फोटेनेति तस्याप्रामाणिकत्वम्, नृशृङ्गतुल्येनेति **पूर्यते**ऽभिधीयतेऽन्वय' इति शेषः । इदमुक्तं भवति । पदवादिनः कल्पनालाघवं, प्रमितानां पदानामन्विता(र्था)भिधानस्य कल्पनात् । स्फोटवादिनस्तु गौरवम्, यतो निष्प्रमाणकः स्फोटस्तस्यान्वयप्रतिपादकत्वं च इति द्वयं कल्पनीयमिति ।

वं०प०— उपलक्षणे कोऽर्थः सम्पन्न इत्यत आह **जिज्ञासितानामिति** ।। **पदानामेवेति** । तथा च पदैरेवान्वयस्योपपत्तिरित्यर्थापत्तिरयुक्तेत्यर्थः । **तदतिरिक्तः** अर्थसंसर्गातिरिक्तः ।

शे०चं०— यद्यपि ताल्वादिस्थानोद्भववायवीयध्वनिविशेषाभिव्यक्तवर्णात्मकपदैः स्वसमवेतवाक्यस्फोटोऽभिव्यज्यते स च व्यक्तो वाक्यार्थं प्रत्याययतीति सखण्डवाक्यस्फोटोऽपि पराभिमतस्तथाऽप्यखण्डवाक्यस्फोटपक्षस्य मुख्यत्वेन तदभिमतत्वात् तमेवोपादत्ते **निरस्तेति** । निरस्तमारोपितवर्णपदविभागं निरवयवमिति यावत् । उपलक्ष्यतावच्छेदकं धर्मं वदन्नेव तत्पदार्थमप्याह **जिज्ञासितानामिति** । पदार्थानां सिद्धत्वान्न

जिज्ञासाविषयत्वम् । नापि पदैरभिधानमित्यतोऽसिद्धेन रूपेण तेषां तदुभयोपपत्तिं वक्तुमपेक्षितं शेषं पूरयति **अन्योन्येति** । नन्वभिधानान्यथाऽनुपपत्त्या स्फोटं कल्पयन्तं परं प्रत्यभिधानान्यथासिद्धेरेव वक्तव्यत्वात् पूर्तेरन्यथासिद्धत्ववर्णनमसङ्गतमित्यतः पूर्तिपदमभिधानपरतया व्याचष्टे **पूर्ताविभिधान इति** । नन्वन्योन्यसंसृष्टानां जिज्ञासितानामर्थानामभिधानस्यैव स्फोटं विनाऽसिद्धेस्तदन्यथाऽनुपपत्त्यैव स्फोटसिद्धिः स्यादित्यतोऽभिधानस्यान्यथासिद्धत्वान्न तत्साधकत्वमिति भावेन तस्यान्यथासिद्धतां वक्तुं शेषं पूरयति **पदैरिति शेष इति** । नन्वन्वयप्रतिपत्त्यन्यथाऽनुपपत्त्या स्फोटं साधयन्तं प्रत्यन्वयप्रतिपत्त्यभावस्यैव वक्तव्यत्वादन्वयाभावकथनमसङ्गतमित्याशङ्क्यात्रापि तत्प्रतिपत्त्यभावस्यैवोच्यमानत्वान्नासङ्गतिरिति भावेन तल्लाभाय शेषं पूरयति **प्रतिपादनीय इति शेष इति** ।

किमनेनोक्तं भवतीत्यत आह **एतदुक्तं भवतीति** । यद्यप्येकं वाक्यं शब्दादर्थं प्रत्येतीत्येकार्थावलम्बनप्रत्यक्षस्यापि सत्त्वात् तदेव वक्तुमुचितमिति न तत्परित्यागेनान्यथाऽनुपपत्तिपर्यन्तधावनं युक्तम् । तथाऽप्येकदेशावस्थानेन निमित्तेनानेकेषु तरुष्वेकं वनमिति प्रतीतिवदनेकेष्वपि पदेष्वेकार्थप्रत्यायकत्वेनोपाधिनैकत्वं सम्भवतीत्यन्यथासिद्धिशङ्काकलङ्कितत्वात् तदर्थतयाऽप्यन्ततोऽन्वयरूपैकार्थप्रतीत्यन्यथाऽनुपपत्तेरेवानुरसरणीयत्वाद्द्रमादित एव तदनुसरणमिति भावेन प्रत्यक्षमनादृत्य अन्वयप्रतीत्यन्यथाऽनुपपत्तिमेव तत्र प्रमाणत्वेनाशङ्कते **अन्वयेति** । ननु पदैः संसृष्टार्थप्रतिपादनेऽप्यन्वयस्याप्रतिपादनात् तत्प्रतिपादनाय स्फोटोऽभ्युपगमनीय एवेत्यतो भवेदेतदेवं यदि संसृष्टपदार्थातिरिक्तोऽन्वयः स्यान्न चैतदस्ति । गुणप्रधानाभावेनान्योन्यान्विताः पदार्था वा तदन्वयो वा वाक्यार्थ इति प्रामाणिकैरभ्युपगतत्वात् । ततश्च संसृष्टार्थप्रतिपादने वाक्यार्थभूतान्वयस्यैव प्रतिपादनान्न तदन्यथाऽनुपपत्तिरस्तीति न तया स्फोटसिद्धिरित्याह **न चेति** ।

पदैरन्वयाभिधानस्य पूर्वेणैव सिद्धेरपूर्तिश्चेदुत्तरग्रन्थवैयर्थ्यमित्याशङ्क्यानङ्गीकारे बाधककथनेन प्रागुक्तायाः पदानामन्विताभिधायकताया उपपादनार्थत्वान्न तदिति भावेन तदुपपादकतयोत्तरग्रन्थं योजयति **एवमनङ्गीकार इति** । अप्रामाणिकत्वमित्यत्राप्यभिप्रैतीति वर्तते । स्फोटस्य नृशृङ्गत्वाभावात्तथोक्तिरनुपपन्नेत्यतस्तत्सादृश्यात्ताच्छब्द्यमित्याह **नृशृङ्गतुल्येनेति** । नन्वत्र प्रमितानां पदानामन्वयानभिधायकत्वेऽप्रामाणिकस्य स्फोटस्यान्वयानभिधायकत्वमात्रमुच्यते । न तु पदानामन्वयानभिधायकत्वे किमपि बाधकमिति कथमस्योक्तानङ्गीकारे बाधकोक्तितयाऽवतार इत्यत आह **इदमुक्तं भवतीति** ।

वा०र०— सखण्डस्फोटोऽपीत्यादि । एतच्च जिज्ञासाधिकरणीयस्फोटनिराकरणमूलानुसारेण । तद्विवरणं चोक्तस्थलीयटीकातदीयास्मत्कृतप्रपञ्चयोरवधेयम् । **निरवयवमितीति** । अद्वैत्यभिमतब्रह्मतुल्यत्वादिकं प्रागुक्तरीत्या प्रतिपत्तव्यम् । **तत्पदार्थमपीति** । स चासौ पदार्थश्चेति विग्रहः । उपलक्ष्यपदार्थमप्याहेत्यर्थः । अनेन पदार्थ एवात्रोपलक्ष्यपदार्थभूताः । तेषां च सर्वेषां प्रसक्तिनिवृत्त्यर्थं जिज्ञासितत्वमुपलक्ष्यतावच्छेदकतयोक्तम् । तथा च जिज्ञासितपदार्थोपलक्षणं कर्तृकर्मादिपदमिति मूलं व्याख्यातं भवतीति द्रष्टव्यम् । **पदा-**

र्थानामिति । पदार्थस्वरूपमात्राणामित्यर्थः । पदैरिति शेष इतीति प्रतीकोपादानम् । **तदर्थतयापीति** । अत्रार्थ-शब्द आवर्तनीयः आद्यस्य निवृत्तिरर्थः । द्वितीयस्य तु प्रयोजनम् । तथा च तन्निवृत्तिप्रयोजकतयेत्यर्थलाभ इति बोध्यम् ।

वरमादित एवेति । आदित एव तदनुसरणं वरमिति सम्बन्धः । तत्सादृश्यादिति गौणोऽयं व्यपदेश इति भावः ।

।। इति स्फोटवादनिरासः ।।

* * *

।। अथ नवीनाभिहितान्वयपक्षनिरासः ।।
।। अथ पदान्येव पदार्थप्रतिपादनावान्तरव्यापाराण्यन्वयं बोधयन्तीतिपक्षे विरम्यव्यापारापत्तिः ।।
।। अथ अचेतनानामपि पदानां विरम्यव्यापाराङ्गीकारेऽनुक्तानामपि पदानां पदार्थादिप्रतिपादने व्यापारापत्तिः ।।

१४५ **सु०—** अस्तु तर्हि नवीनाभिहितान्वयपक्षः । यदि हि 'पदानि पदार्थान् प्रतिपाद्यैव निवर्तन्ते, पदार्था एवान्वयं बोधयन्ती'ति मतं तदा स्यादेवोक्तदोषः । न चैवम् । किन्तु पदान्येव पदार्थप्रतिपादनावान्तरव्यापाराण्यन्वयं बोधयन्तीति । मैवम् । तथा सति पदानां विरम्यव्यापारप्रसङ्गात् । ततः को दोष इत्यत आह **व्यापारश्चेदिति** ।

अनु०— व्यापारश्चेत्पुनस्तेषामनुक्तावपि किन्न सः ।

अचेतनानामपि पदानां यदि **पुनर्व्यापारो** विरम्यव्यापारोऽङ्गीक्रियते तदा पृच्छामो-ऽनुक्तानामपि पदानां पदार्थादिप्रतिपादने व्यापारः कुतो **न** भवतीति ।

परि०— **उक्तदोष इति** । 'यदैवानन्वितार्थस्ये'तिश्लोकोक्तोऽन्वयस्य शाब्दत्वाभावरूप-पदार्थाख्यमानान्तरतापत्तिरूपश्च दोष इत्यर्थः ।

यादु०— **उक्तदोष इति** । अन्वयस्याशाब्दत्वं पदार्थानां प्रमाणान्तरतापत्तेश्चेत्युक्तदोष इत्यर्थः ।

२४६ **वं०प०—** **कुतो न भवतीति** । अनुक्तान्यनुच्चारितान्यपि पदानि पदार्थप्रतिपादनद्वाराऽन्वयं कुतो न बोधयन्तीत्यर्थः ।

शे०चं०— उक्तदोष इति । अन्वयस्याशाब्दत्वं पदार्थाख्यप्रमाणान्तरापत्तिश्चेत्युक्तदोष इत्यर्थः ॥ **विरम्येति** । अनेकशक्तियुक्तस्यापि पुरुषस्य क्रमेण कार्यद्वयकारितावत्पदार्थान्वयबोधेन शक्तानामपि पदानां क्रमेण पदार्थतदन्वयबोधकत्वापातात् । न च सोपपद्यते । पदानामचेतनत्वादिति भावः । अप्रयोजकतामाशङ्कते **ततः क इति** ।

॥ इति अचेतनानामपि पदानां विरम्यव्यापाराङ्गीकारेऽनुक्तानामपि पदानां पदार्थादिप्रतिपादने व्यापारापत्तिः ॥

* * *

॥ अथ अनुक्तौ ज्ञातत्वाभावान्न पुनर्व्यापार इति चेत् उक्तेः प्रागेव पदानि ज्ञाततायै यत्नं कथं न कुर्युः ॥

१४६ **सु०— उत्तरमाशङ्कते उक्त इति** ।

अनु०— उक्ते बुद्धिस्थताहेतोर्यदि व्यापार इष्यते ।

भावे क्तप्रत्ययः । **बुद्धिस्थता** बुद्धिविषयता । पदानि हि ज्ञातकरणानि, न तु चक्षुरादिवत् सत्तामात्रेण, उक्तिस्तु(श्च) (तज्ज्ञा)ज्ञानोपायः, इत्यतोऽनुक्तौ ज्ञातत्वाभावान्न **व्यापार** इत्याशयः । इति **यदीष्यत** इति सम्बन्धः ।

परि०— भावे क्त इति । उक्तौ सत्यामिति तस्यार्थ इति भावः । इतिपदशेषेण योजयति **इति यदीष्यत इति सम्बन्ध इति** ।

वं०प०— भाव इति । तथा चोक्ते उच्चारणरूपायामुक्तौ सत्यामित्यर्थः ॥ **न व्यापार इति** । पदार्थप्रतिपादनेऽन्वयप्रतिपादने चेति शेषः ।

शे०चं०— ननूक्तेर्बुद्धिस्थत्वहेतुत्वात् तत्साधकत्वेनोक्तावित्येव वक्तव्यम् । उक्त इति तु कथमित्यतोऽत्र उक्तिरुक्तमिति भावव्युत्पत्त्योक्तशब्दस्योक्तिपरत्वेन कर्मव्युत्पन्नत्वानाश्रयणान्नानुपपत्तिरित्याशयेनाह **भावे क्तप्रत्यय इति** । घटादेर्भूतलादाविव पदानां बुद्ध्याश्रितत्वासम्भवमाशङ्क्य विषयतासम्बन्धेन तदाश्रयत्वाभ्युपगमान्नानुपपत्तिरित्याह **बुद्धिविषयतेति** । किं पदानां बुद्धिविषयत्वेनापीत्यत आह **पदानि हीति** ।

* * *

१४७ सु०— पुनः सिद्धान्ती पृच्छति **बुद्धिस्थत्वायेति** ।

अनु०— बुद्धिस्थत्वाय यत्नं न कथं कुर्युः पुरैव च ।

पदार्थबोधनादिव्यापाराय यत्पदानां ज्ञातत्वमावश्यकम्, तदर्थं तानि पदान्युक्तेः प्रागेव यत्नं कथं न कुर्युरिति च त्वां पृच्छामः । उक्तिं विनाऽपि बुद्धिविषयतायै कुतो यत्नं न कुर्युरिति प्रश्नार्थः । यद्वा बुद्धिविषयत्वाय यदुच्चारणं तदर्थं तूष्णीं स्थितं कुतो न प्रेरयन्तीति ।

गु०दी०— **प्रागेव यत्नं कथं न** कुर्युरित्यत्र भुक्तेः प्राग्यथा ब्राह्मणी ब्राह्मणं बोधयति तथेत्यर्थः ।

शे०चं०— ननूक्तिं विनाऽन्यस्य तदुपायस्याभावादेव न तदर्थं यत्नं कुर्वन्तीत्यत आह **यद्वेति** ॥

॥ इति अनुक्तौ ज्ञातत्वाभावान्न पुनर्व्यापार इति चेत् उक्तेः प्रागेव पदानि ज्ञाततायै यत्नं कथं न कुर्युः ॥

* * *

॥ अथ पदानामचेतनत्वात्पदार्थप्रतिपादनादिव्यापारस्य पुरुषोच्चारणाधीनत्वे विरम्यव्यापारस्याप्यनुपपत्तिः ॥

१४८ सु०— उत्तरं शङ्कते **पुरुषेति** ।

अनु०— पुरुषाधीनता तेषां यदि

स्यादेतद्यदि पदानि चेतनानि स्युः । न चैवम् । अतो वक्तृपुरुषायत्तान्येव । स यदोच्चारणेन व्यनक्ति तदा श्रोतृबुद्धिस्थानि भूत्वा पदार्थप्रतिपादनादिव्यापारवन्ति भवन्ति, न तु स्वयं किमपि कुर्वन्तीति ।

* * *

१४९ सु०— एवं तर्ह्यन्वयबोधरूपोऽपि विरम्यव्यापारो न तेषामुपपद्यत इत्याह **पश्चाचेति** ।

अनु०— पश्चाच्च सा समा ।

पश्चादन्वयबोधने सा पुरुषाधीनता ।

एतदुक्तं भवति । चैतन्ये हि पदानामन्वयबोधनाय समभिव्याहृतानाम् अस्माकं न पदार्थप्रतिपादनमात्रेण कृतार्थता, अतोऽन्वयोऽप्यस्माभिः प्रतिपादनीय इति विमृश्य विरम्यव्यापारो युज्यते । न चैवम् । अन्यथोक्त एवातिप्रसङ्ग इति ।

परि०— **उ(क्ताति)क्त एवातिप्रसङ्ग इति** । अनुक्तावपि किं न स इति बुद्धिस्थत्वायेति चोक्तप्रसङ्ग इत्यर्थः ।

गु०दी०— **अन्यथोक्त एवातिप्रसङ्ग** इत्यत्र **अन्यथा** चैतन्याभावेऽपि विमृश्य पुनर्वाक्यार्थं स्वयमेव बोधयन्ति चेत् पदार्थबोधनाय प्राग्वाक्यप्रयोक्तारं पुरुषमन्वयबोधनाय पुनश्च प्रयुंक्ष्वेति तं प्रेरयेयुरित्यतिप्रसङ्ग इत्यर्थः । सकृत्प्रयुक्तस्य पदार्थबोधनमात्रेण चरितार्थत्वादिति भावः । किञ्चानुपपन्नश्चायं जडानां विरम्यव्यापारः न हि देवदत्तेन ताडितो दण्डो नासौ भुवि पतित इति पुनरपि ताडनाय स्वयमेव यतते । **शब्दबुद्धिकर्मणां त्रिक्षणावस्थायित्वमि**ति वदता भवताऽवान्तरव्यापारस्य पूर्वभावित्वनियमात्प्राक् पदार्थबोधं पश्चादन्वयबोधं कुर्वन्तीति न वक्तुं शक्यम् । अतः पुनरन्वयबोधस्याकस्मिकतैवेत्यप्यूह्यम् ॥ ३ । २ । १५ ॥

वं०प०— **विरम्यव्यापारः** चेतनधर्मभूत इति शेषः । तेषां जडरूपाणां पदानाम् ॥ **अन्यथेति** । एवमयोगेऽपि चेतनधर्मभूतो विरम्यव्यापारो जडेषु यद्यङ्गीक्रियत इत्यर्थः ॥ **उक्त एवेति** । बुद्धिस्थत्वाये-त्यनेनोक्त इत्यर्थः ।

शे०चं०— **न चैवमिति** । पदानां च चैतन्यमित्यर्थः । अस्तु चैतन्यमपि तेषामित्यत आह **अन्यथेति** ॥ **उक्त एवेति** । बुद्धिस्थत्वाय यत्नं नेत्युक्तो द्विविधोऽतिप्रसङ्ग इत्यर्थः ।

वा०र०— बोधकतापातादिति पाठः । तेन न च सेत्युत्तरवाक्ये परामर्शोपपत्तिः । बोधकत्वेति पाठे तु लिङ्गमविवक्षित्वा अर्थपरामर्श इति ज्ञेयम् । यत्नं नेत्युक्त इति पाठः ।

।। इति पदानामचेतनत्वात्पदार्थप्रतिपादनादिव्यापारस्य पुरुषोच्चारणाधीनत्वे विरम्यव्यापारस्याप्यनुपपत्तिः ।।

* * *

।। अथ अन्वयानभिधायिभिरपि पदैर्यद्यन्वयं प्रतिपद्येत तदा गवादिपदैरश्वादिकमपि प्रतिपद्येत ।।

१५० **सु०**— श्रोताऽन्वयज्ञाने कारणमिति तु स्यात् । किन्तु कर्तैव । तस्य करणं तु विचार्यते । अनन्विताभिधायीनि पदान्येव करणीकृत्य श्रोता तत्स्मारितानामर्थानामन्वयज्ञानाय यतत इति चेत् तत्राह **पुमानेवेति** ।

अनु०— पुमानेवान्वयायैषां यदि पश्चाद्विचेष्टते ।
अनन्विताभिधानानां स एवार्थान्तरोक्तिषु ।
यततां

अन्वयशब्देन तज्ज्ञानमुपलक्ष्यते । **पश्चात्** पदैः पदार्थस्मरणानन्तरम् । **अनन्विताभिधानानां** साहाय्येनेति शेषः । **सः** पुमानेव । **उक्ति**शब्दस्तत्कार्यज्ञानोपलक्षणः । अन्वयानभिधायिभिरपि पदैर्यद्यन्वयं प्रतिपद्यते, तदा गवादिपदैरश्वादिकमपि प्रतिपद्येतेत्यर्थः ।

परि०— शङ्कते **श्रोतेति** ।

वं०प०— **अनन्विताभिधानानां** पदानां, **साहाय्येन** तादृशानि पदानि सहायीकृत्येत्यर्थः ।

शे०चं०— ननु तर्हि मूलेऽप्यन्वयज्ञानायेति वक्तव्यम् । अन्वयायेति तु कथमुक्तमित्यतोऽत्रान्वयशब्दस्य तज्ज्ञानोपलक्षणत्वान्नानुपपत्तिरित्याह **अन्वयशब्देनेति** ।। **तत्कार्येति** । अर्थान्तरोक्तिकार्येत्यर्थः । अभिप्रायमाह **अन्वयेति** । अविशेषादिति भावः ।

।। इति अन्वयानभिधायिभिरपि पदैर्यद्यन्वयं प्रतिपद्येत तदा गवादिपदैरश्वादिकमपि प्रतिपद्येत ।।

* * *

।। अथ गवादिपदानामश्वादौ शक्त्यभावात्तेन तत्प्रतिपत्त्यभावे अन्वये शक्तिरहितैस्तैः कथमन्वयज्ञानाय यतेत ।।

१५१ **सु०**— शङ्कते **शब्देति** ।

अनु०— शब्दशक्तिश्चेत्तत्र नैव

गवादिपदानामश्वादौ शक्तिरेव नास्ति, तत्कथं तैस्तत्प्रतिपद्यताम् । न (हि) चक्षुषा शब्दं प्रतिपद्यत इति चेदित्यर्थः ।

१५२ सु०—तर्हि समं प्रकृतेऽपीत्याह **अन्वये कथमिति** ।

अनु०— अन्वये कथम् ।

अन्वये शक्तिरहितैस्तैः **कथम्** अन्वयज्ञानाय यतेतेत्यर्थः ।

।। इति पदान्येव पदार्थप्रतिपादनावान्तरव्यापाराण्यन्वयं बोधयन्तीतिपक्षे विरम्यव्यापारापत्तिः ।।
।। इति नवीनाभिहितान्वयपक्षनिरासः ।।

* * *

।। अथ अभिहितान्वयादिपक्षायुक्तत्वोपसंहारः ।।
।। अथ अभिहितान्वयादिपक्षे कल्पनागौरवदोषः अनुभूतिविरोधश्च ।।

१५३ सु०— 'यद्यनन्वितमि'त्यादिनोक्तमर्थमुपसंहरति **तदिति** ।

अनु०— तत्कल्पनागुरुत्वादिदोषेऽतोऽभिहितान्वयः ।
अनुभूतिविरुद्धश्च त्याज्य एव मनीषिभिः ।

तत् तस्मात् । तस्यैव विवरणं **कल्पनेत्यादि** । कल्पनागौरवं प्रथमसूत्रेण व्युत्पादितम् । **अभिहितान्वय** इत्युक्तसमस्तपक्षोपलक्षणम् ।

परि०— व्युत्पादितमिति । 'गौरवं कल्पनेऽन्यथे'त्येतद्व्याख्यावसर इति भावः ।

यादु०— व्युत्पादितमिति । 'गौरवं कल्पनेऽन्यथे'त्येतद्व्याख्यावसर इति शेषः ।

वं०प०— तस्यैव तस्मादित्यस्यैव ।

शे०चं०— प्रथमसूत्रेणेति । जिज्ञासासूत्रे 'गौरवं कल्पनेऽन्यथे'त्यादिनेति शेषः । अन्विताभिधानातिरिक्तसमस्तपक्षाणामप्यनुपपन्नतायाः प्राक् सम्यक् समर्थितत्वादभिहितान्वयवादमात्रग्रहणानुपपत्तिमाशङ्क्याह अभिहितेति ।

वा०र०— कल्पनागौरवस्य प्रथमसूत्रेण व्युत्पादनाभावात् प्रथमसूत्रीयभाष्यपरं प्रथमसूत्रपदमित्याशयेन शेषं पूरयति **जिज्ञासासूत्र इति** ।

* * *

।। अथ अभिहितान्वयपक्षे अनुभूतिविरोधस्योपपादनम् ।।

१५४ **सु०**— कथमनुभूतिविरोध इत्यत आह **कर्तृशब्दे हीति** ।

अनु०— कर्तृशब्दे ह्यभिहिते धर्मसामान्यवेदनात् ।
विशेषधर्ममन्विच्छन् किमित्येव हि पृच्छति ।

कर्तृग्रहणं सम्बन्धिमात्रोपलक्षणम् । **विशेषधर्ममिति** तज्ज्ञानम् । देवदत्तेनेति कर्तृवाचिनि शब्दे प्रयुक्ते श्रोता **किमिति पृच्छतीति** तावदविवादम् । स च पचनादिधर्मविशेषज्ञानमि(मन्वि)च्छन्नेव पृच्छति । विशेषजिज्ञासा च धर्मसामान्यज्ञानादेव । न च तदा तस्य धर्मसामान्यज्ञानोपायोऽस्त्यन्यः पदात् । अतः पदेन धर्मसामान्यान्वितं वस्तु प्रतिपादितमिति ज्ञायते ।

यादु०— धर्मविशेषेति । क्रियाविशेषज्ञानमित्यर्थः । एवमग्रेऽपि धर्मपदं क्रियापरम् ॥

वं०प०— सम्बन्धीति । ससम्बन्धिकपदार्थवाचिशब्देत्यर्थः । मूले गुणक्रियादिधर्माणां मध्ये कस्मिंश्चिद्विशेषधर्मे कथित इत्यर्थः ॥ **पदेनेति** । या विशेषजिज्ञासा सा धर्मसामान्यज्ञानपूर्विकेत्यविनाभावबलेनैव धर्मसामान्यज्ञानं भवति न त्वेतत्पदजन्यम् । तथा च अन्त्यानुमाने अप्रयोजकतेति भावः ।

शे०चं०— ननु देवदत्तेनेति कर्तृवाचिशब्दप्रयोग इव ग्राममित्यादिकर्मवाचकशब्दप्रयोगेऽपि किमिति प्रश्नस्याविशिष्टत्वान्न कर्तुरेव ग्रहणं युक्तमित्यत आह **कर्तृग्रहणमिति** । प्रश्नस्य धर्मविशेषेच्छामूलकत्वासम्भवादाह **तज्ज्ञानमिति** । तज्ज्ञानोपलक्षणमित्यर्थः । करिष्यमाणानुमाने आश्रयासिद्धिपरिहारायाह **अविवादमिति** ।

।। इति अभिहितान्वयपक्षे अनुभूतिविरोधस्योपपादनम् ।।

* * *

।। अथ किमिति प्रश्नस्य विशेषजिज्ञासार्थत्वोपपादनम् ।।

१५५ सु०— किमिति प्रश्नो विशेषजिज्ञासयेत्येतत्कुत इत्यत आह **गुणेति** ।

अनु०— गुणक्रियादिधर्माणां विशेषे कथिते पुनः ।
निराकाङ्क्षो भवेद्यस्मात्

निराकाङ्क्षो निवृत्तजिज्ञासः । तस्माद्विशेषधर्ममन्विच्छन् **किमित्येव हि पृच्छतीति** सम्बन्धः ।

।। इति किमिति प्रश्नस्य विशेषजिज्ञासार्थत्वोपपादनम् ।।

* * *

।। अथ उक्तार्थस्याभिप्रायः ।।
।। अथ तत्र उक्तार्थेन विशेषान्विताभिधानपक्षस्यापि परास्तत्वम् ।।
।। अथ तत्रापि अभिहितान्वयादिपक्षाणां त्याज्यत्वेन सर्वशब्दानां सामान्येनान्वितस्वार्थवाचकत्वमेव ।।

१५६ सु०— एतदुक्तं भवति । कर्त्रादिपदश्रवणानन्तरभावी किमित्यादिप्रश्नो जिज्ञासामूलः, प्रश्नत्वात् सम्मतवत् । सा च जिज्ञासा धर्मविशेषविषया, तदुक्त्या निवर्तमानत्वात् (सम्मत)सम्प्रतिपन्नवत् । विशेषजिज्ञासा च धर्मसामान्यज्ञानपूर्विका विशेषजिज्ञासात्वात् सम्मतवत् । सामान्यज्ञानं चेदम् एतत्पदजन्यं तदनन्तरभावित्वात्सम्मतवदिति । पदेन पदार्थमात्रेऽभिहिते अविनाभावबलेन धर्मसामान्यज्ञानमिति चेन्न, दृष्टपदपरित्यागेन अदृष्टानुमानकल्पनानुपपत्तेरिति ।

एतेन विशेषान्विताभिधानपक्षोऽपि परास्तः ।

अभिहितान्वयादिपक्षाणां त्याज्यत्वे प्रकृते किमायातमित्यत आह **शब्दा इति** ।

अनु०— शब्दा अन्वितवाचकाः ।

सर्वेऽपि शब्दाः सामान्येनान्वित(स्व)ार्थवाचका इत्येष एव पक्षो ग्राह्य इत्यर्थः ।

परि०— अविनाभावेति । क्रियाकारकान्वितेत्यादिव्याप्तिबलेनेत्यर्थः ॥ **एतेनेति** । कर्तृशब्द इत्यादिकथनेनेत्यर्थः ।

यादु०— अविनाभावबलेनेति । यत्कारकं तत्क्रियान्वितमित्यविनाभावबलेनेत्यर्थः ॥ **एतेनेति** । कर्तृशब्दे ह्यभिहित इत्यादिनोपपादितानुभवविरोधेनेत्यर्थः । न हि प्रथमत एव विशेषान्वयबोधने तज्जिज्ञासामूलकः किमिति प्रश्नोऽनुभूयमानो युज्यत इति भावः ॥ ३-२-१५ ॥

वं०प०— दृष्टपदेति । धर्मसामान्यज्ञानकारणत्वेन दृष्टं यत्पदरूपं कारणं तत्परित्यागेनेत्यर्थः ।

शे०चं०— कर्तृशब्द इत्यादिवाक्यसमुदायतात्पर्यमाह **एतदुक्तं भवतीति** ॥ **प्रश्नत्वादिति** । न च विदिततत्त्वेन पुरुषेण परपरीक्षार्थं क्रियमाणे प्रश्ने व्यभिचारस्तदन्यत्वेन हेतुविशेषणस्यात्राभिमतत्वेन तदप्रसङ्गादिति भावः ॥ **अविनाभावबलेनेति** । यत्कारकं तत्क्रियान्वयि या क्रिया सा कारकान्वयिनीत्यविनाभावबलेनेत्यर्थः ॥ **एतेनेति** । (अनुभवविरोधेनेत्यर्थः) विशेषधर्मज्ञानेच्छया किमिति प्रश्नानुपपत्त्येत्यर्थः । प्रथमत एव विशेषान्वयबोधने विशेषस्य ज्ञातत्वेन तज्जिज्ञासाया असम्भवेन तन्मूलकप्रश्नानुपपत्तेरिति भावः ।

वा०र०— प्रश्नदोषा हि चत्वार इत्याद्यनुभाष्यमूलव्याख्यानावसरे प्रागुक्तरीत्याह **न च विदितत्वेनेति** । **असिद्धसाधन इति** । स्वप्राधिकरणानुभाष्यमूले 'किं च विदिततत्त्वोऽपि यदा परपरीक्षार्थं तत्र प्रमाणं पृच्छती'त्युक्तिं हृदि कृत्वेयमाशङ्का ।

॥ इति अभिहितान्वयादिपक्षाणां त्याज्यत्वेन सर्वशब्दानां सामान्येनान्वितस्वार्थवाचकत्वमेव ॥
॥ इति उक्तार्थेन विशेषान्विताभिधानपक्षस्यापि परास्तत्वम् ॥
॥ इति उक्तार्थस्याभिप्रायः ॥
॥ इति अभिहितान्वयादिपक्षे कल्पनागौरवदोषः अनुभूतिविरोधश्च ॥
॥ इति अभिहितान्वयादिपक्षायुक्तत्वोपसंहारः ॥
॥ इति अभिहितान्वयादिपक्षाणामयुक्तत्वस्योपपादनम् ॥
॥ इति भगवद्धर्माणां भगवता सविशेषाभेदस्य समर्थितत्वादेवान्विताभिधानव्यतिरिक्तमतानामनुपपन्नता ॥
॥ इति एतदधिकरणानुषङ्गसिद्धार्थकथनम् ॥

* * *

॥ अथ एतदधिकरणीयसाक्षात्प्रतिपाद्यार्थोपसंहारः ॥

१५७ सु०— अधिकरणस्य साक्षात्प्रतिपाद्यमर्थमुपसंहरति अत इति ।

अनु०— अतोऽनन्तगुणात्मैको भगवान्

अनन्तगुणात्मकत्वेऽपि न तस्यैक्यं विहन्यते, नाप्येकेनाभिन्नानामनन्तत्वं गुणत्वं चेत्यर्थः ।

वं०प०— तस्य भगवतः । एकेनेति । एकेन धर्मिरूपेण च भगवतेत्यर्थः । विशेषबलेनेति भावः ।

शे०चं०— अनन्तत्वमिति । विहन्यत इति पूर्वेण सम्बन्धः ।

॥ इति एतदधिकरणीयसाक्षात्प्रतिपाद्यार्थोपसंहारः ॥

* * *

॥ अथ एतदधिकरणीयानुषङ्गिकार्थोपसंहारः ॥

१५८ सु०— तच्चेत्यानुषङ्गिक(मर्थ)मुपसंहरति एक एवेति ।

अनु०— एक एव तु ।
उच्यते सर्ववेदैश्च ....॥

तुशब्देन सकलधर्मान्वित इति सूचयति ॥ ३-२-१५ ॥

परि०— तच्चेतीति । तच्च 'नाभिहितान्वय' इत्यादिनोक्तमित्यर्थः ॥

वं०प०— तुशब्देनेति । पदानामन्विते शक्तेः साधित्वादिति भावः ॥ ३-२-१५ ॥

शे०चं०— तुशब्देनेति । अनेन मूले तुशब्दो विशेषार्थ इत्युक्तं भवति ॥ ३-२-१५ ॥

॥ इति एतदधिकरणीयानुषङ्गिकार्थोपसंहारः ॥

॥ इति उभयव्यपदेशाधिकरणम् ॥

॥३-२-१५-२८ तः ३१ ॥

॥ अथ परानन्दा(परमता)धिकरणम् ॥

॥ ३-२-१६-३२ तः ३४ ॥

॥ अथ ईशगुणानां लौकिकगुणाद्वैलक्षण्यम् ॥

॥ अथ ईश्वरीयसर्वगुणानामीश्वरेणाभेदः, सर्वलौकिकगुणाद्वैलक्षण्यम्, सर्वगुणात्मत्वम्, सर्वकर्तृत्वम्, सविशेषत्वञ्च ॥

ब्र०सू०— ॐ परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॐ ॥ ३२ ॥

१५९ **सु०**— 'परमेश्वरस्यानन्दादयो गुणाः किं लौकिकानन्दादिसलक्षणाः किंवा तद्विलक्षणाः। आद्ये न तत्र बहुमानः सम्भवति। न द्वितीयः, प्रकारप्रमाणाभावात्, विमता लौकिकसलक्षणा आनन्दादिशब्दवाच्यत्वादिति बाधकसद्भावाच्च। अन्यथा तत्रानन्दादिशब्दप्रवृत्तिर्न स्यात्, व्युत्पत्त्यभावात्। अतीन्द्रियत्वेन तत्रोपदेशा(द्युपायाद्य)भावे सादृश्यानुमानस्यैवानुसरणीयत्वात्, तस्य च असिद्धत्वात्। ततश्च वेदवेद्यत्वं न स्यादि'त्यस्य समाधानार्थमिदमारभ्यते। तत्राशङ्कितसकलदोषपरिहारो न स्फुटः प्रतीयत इत्यतो व्याचष्टे **ते चेति**।

अनु०— .... ते चाखिलविलक्षणाः।

ते गुणा न केवलं गुणिनाऽभिन्नाः, किन्नामाखिलेभ्यो लौकिकानन्दादिभ्यो **विलक्षणाश्च**। कथं विलक्षणा इत्यत आह **सर्व इति**।

सर्वे सर्वगुणात्मानः सर्वकर्तार एव तु।

आनन्दोऽपि ज्ञानात्मको ज्ञानमप्यानन्दात्मकमित्यादि, न ह्येवमन्तःकरणपरिणामभेदाः सुखादयः। **सर्वकर्तारो** जगत्सृष्ट्यादिकर्तारश्च। एवशब्देनोपचारं वारयति। अन्योन्यमभेदे शब्दानां पर्यायत्वमनेकत्वाभावश्च स्यादित्यत आह **तथाऽपीति**।

तथाऽपि सविशेषाश्च

परस्पराभेदेऽपि । ततो नोक्तदोष इति (शेषः) भावः ॥ अनेन वैलक्षण्यप्रकारो दर्शितः । प्रमाणं च वक्ष्यते ॥ तथा चाद्यं सूत्रद्वयं व्याख्यातं भवति ।

परि०— मूलं सङ्गमयितुं सूत्रप्रसक्तिमाह **परमेश्वरस्येति** । हेत्वंशव्यावर्त्यमाह **प्रकारेति** । वैलक्षण्यबीजयोः प्रकारप्रमाणयोरभावादित्यर्थः । 'बुद्ध्यर्थः पादवदि'ति सूत्रव्यावर्त्यमाह **विमता इति** । देवदत्तसुखादिवदिति दृष्टान्तयोगादिति भावः ॥ **वक्ष्यत इति** । 'पूर्णोऽशेषनियन्ता च' इत्यत्रेति भावः ॥ **तथा चेति** । प्रकारप्रमाणयोर्निरूपणे सतीत्यर्थः ।

गु०दी०— प्रकारप्रमाणाभावादित्यत्र प्रकारे वैलक्षण्यप्रकारे ॥ ३ । २ । १६-२० ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितायां गुर्वर्थदीपिकायां
तृतीयाध्यायस्य द्वितीयः पादः ॥

यादु०— प्रकारप्रमाणेति । येन प्रकारेण येन प्रमाणेन च विलक्षणः स प्रकारः तत्प्रमाणं च नास्तीत्यर्थः ॥ **वक्ष्यत इति** । 'तेषां वैलक्षण्यं श्रुतौ श्रुतमि'त्यत्रेति शेषः ।

वं०प०— अन्यथा लोकविलक्षणत्वे । **व्युत्पत्तीति** । सम्बन्धिज्ञानाभावादिति भावः ॥ **तस्य चेति** । विमतो भगवदानन्द आनन्दशब्दवाच्यः प्रसिद्धजीवानन्दसदृशत्वात् व्यतिरेकेण घटवदित्येवं व्युत्पत्त्यर्थमनुसरणीयेऽनुमाने हेतुरसिद्ध इत्यर्थः । **ततश्चेति** । एवं केनापि प्रकारेण व्युत्पत्त्यसम्भवे ॥ **वेदेति** । आनन्दं ब्रह्मण इत्यादिवेदेत्यर्थः । न ह्यगृहीतसङ्गतिकः शब्दो बोधक इति भावः ॥ **न केवलमिति** । अहिकुण्डलाधिकरणोक्तरीत्येति शेषः । **कथमिति** । केनापि प्रकारेणेत्यर्थः ॥ **आहेति** । लौकिकानन्दादिवैलक्षण्यप्रकारमाहेत्यर्थः ।

शे०चं०— प्रकारेति । वैलक्षण्यनिरूपकप्रकारस्य तन्निर्णायकप्रमाणस्य चाभावादित्यर्थः । न केवलं वैलक्षण्यनिर्णायकप्रमाणाभाव इत्येव किन्तु बाधकमप्यस्तीत्याह **विमता इति** । अप्रयोजकत्वमाशङ्क्य परिहरति **अन्यथेति** । लौकिकानन्दादिवैलक्षण्य इत्यर्थः । तथा चानन्दादिशब्दवाच्यत्वरूपहेतूच्छित्तेरेव बाधकत्वान्नाप्रयोजकत्वमिति भावः । तत्कथमित्यतो न तावदव्युत्पन्नस्यैव शब्दस्य वाचकत्वमतिप्रसङ्गात् । किन्तु वाच्यवाचकभावरूपसङ्गतिज्ञानरूपव्युत्पत्तिसापेक्षस्यैव । न च प्रकृते साऽस्ति येन वाचकत्वं स्यादित्याशयेनाह

व्युत्पत्त्यभावादिति । अस्तु भगवदानन्दादावानन्दादिशब्दानां व्युत्पत्तिरपीत्यतः सा किमयं गौरित्यादिवदयमानन्द इत्याद्युपदेशादिनाऽभिमता किंवाऽयं गोशब्दवाच्यो गोसदृशत्वादितिवत् विमता आनन्दादिशब्दवाच्याः आनन्दादिसदृशत्वादित्यनुमानादिति विकल्पद्वयं मनसि निधायाद्यासम्भवे हेतुं वदन् द्वितीयोऽङ्गीकार्य इत्याह **अतीन्द्रियत्वेनेति** । अस्तु तर्ह्यनुमानेनैव व्युत्पत्तिरिति द्वितीय इत्यत आह **तस्य चेति** ॥ **वेदेति** । आनन्दं ब्रह्मण इत्यादिवेदेत्यर्थः । न ह्यगृहीतसङ्गतिकः शब्दो बोधक इति भावः । ननु च लौकिकानन्दादेरप्येवम्भावान्नैतावन्मात्रेण तद्वैलक्षण्यसिद्धेरित्यत आह **न हीति** । तेषामयावद्द्रव्यभावितयाऽन्तःकरणेन भिन्नाभिन्नत्वान्न परस्परमत्यन्ताभिन्नत्वं युक्तमिति भावेन हेतुगर्भं विशेषणमाह **अन्तःकरणपरि(णाम)णतिभेदा इति** ॥ **उपचारमिति** । सर्वकर्तृभगवत्सम्बन्धित्वादेव गुणेषु सर्वकर्तृत्वोक्तिर्न तु गुणानां वस्तुतः सर्वकर्तृत्वादिति तदुक्तेरौपचारिकत्वं वारयितुमेवकार इत्यर्थः ॥ **पर्यायत्वमिति** । एकार्थवादित्वादिति भावः । **अनेकत्वाभावश्चेति** । एकैकेन ज्ञानादिनाऽत्यन्ताभिन्नत्वेनानन्दादीनामप्येकत्वादिति भावः । उपलक्षणं चैतत् । अनेकाभिन्नत्वाज्ज्ञानादेः स्वस्मिन्नेकत्वाभावप्रसङ्गाच्चेत्यपि द्रष्टव्यम् । **नोक्तदोष इति** । पर्यायत्वमनेकत्वाभावप्रसङ्ग इत्युक्तदोषो नेत्यर्थः ॥ **प्रमाणमिति** । भगवद्गुणानां लौकिकानन्दादिवैलक्षण्यप्रतिपादकं 'पूर्णोऽशेषनियन्ता चे'त्यादिश्रुतिरूपं प्रमाणमनुपदमेव वक्ष्यत इत्यर्थः ।

वा०र०— टीकायामुक्तसूत्रोपादानानान्तरं **प्रकारेति** । वैलक्षण्येति पाठः । अन्तःकरणपरिणामेत्यस्य अर्थानुवादेन अन्तःकरणपरिणतिभेदा इत्यनुवादः । एवकारव्यावर्त्यमाह **न तु गुणानामिति** । सर्वकर्तृत्वोक्तिरिति सम्बन्धः । **इति तदुक्तेरिति** । इत्यादिरूपेण सर्वकर्तृत्वाद्युक्तेरित्यर्थः ।

स०व्र०— **प्रकारप्रमाणेति** । अनेन प्रकारेण विलक्षणा इति वैलक्षण्ये प्रकाराभावात् लोकविलक्षणत्वे प्रमाणाभावाच्चेत्यर्थः ।

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितानुव्याख्यानस्य श्रीमज्जयतीर्थविरचितायाः सुधायाः श्रीमत्सत्यव्रततीर्थविरचितायां टिप्पण्यां तृतीयाध्यायस्य द्वितीयः पादः समाप्तः ॥

॥ इति ईश्वरीयसर्वगुणानामीश्वरेणाभेदः, सर्वलौकिकगुणाद्वैलक्षण्यम्, सर्वगुणात्मत्वम्, सर्वकर्तृत्वम्, सविशेषत्वञ्च ॥

॥ इति ईशगुणानां लौकिकगुणाद्वैलक्षण्यम् ॥

* * *

॥ अथ उक्तार्थे बाधकपरिहारः ॥

॥ अथ ईश्वरगतलोकविलक्षणगुणानां लौकिकगुणवाचकपदवाच्यत्वेऽनुपपत्तिपरिहारः ॥

॥ अथ विद्वद्व्युत्पत्तिबलात्तत्तच्छब्दप्रयोगस्य साधुत्वम् ॥

॥ अथ अविदुषां विद्वदुपदेशबलाद्व्युत्पत्त्युपपत्तिः ॥

॥ अथ अलौकिके विषये लौकिकसादृश्येनोपदेशयोगः ॥

॥ अथ किञ्चित्सादृश्येऽपि निरुपाधिप्रियत्वादिवैलक्षण्यस्य सत्त्वात्पूर्वोत्तरविरोधाभावः ॥

१६० सु०— बाधकपरिहारार्थं सूत्रम् ॐ बुद्ध्यर्थः पादवत् ॐ इति ॥

ब्र०सू०— ॐ बुद्ध्यर्थः पादवत् ॐ ॥ ३४ ॥

तद्व्याचष्टे **विद्वदिति** ।

अनु०— विद्वद्व्युत्पत्तितोऽपि च ।
तैस्तैश्शब्दैश्च भण्यन्ते

अपि च तथाऽपि, **तैस्तैः शब्दैश्च भण्यन्ते** । कथं **विद्वद्व्युत्पत्तितः** । विद्वांसो हि साक्षात्कृतभगवद्गुणाः पूर्वैर्विद्वद्भिर्व्युत्पादयितुं शक्यन्ते ।

अविदुषां कथं व्युत्पत्तिः, भवितव्यं हि तया, अन्यथा विद्वत्त्वस्यैवानुपपत्तेरित्यत आह **युज्यते** चेति ।

युज्यते चोपदेशातः ।

विद्वदुपदेशतोऽविदुषामपि व्युत्पत्तिः **युज्यते** ।

अतीन्द्रिये कथमुपदेश इत्यत आह **अन्येति** ।

अन्यानन्दादिसादृश्यम्

लौकिकानन्दादिसादृश्यं भगवदानन्दादेर्विद्यते । ततश्च योऽस्मदानन्दसदृशो भगवद्गुणः स आनन्दादिशब्दवाच्य इत्यादिरुपदेशो घटते ।

तर्हि पूर्वोत्तरविरोधः स्यात् । प्राक् 'ते चाखिलविलक्षणा' इत्युक्त्वेदानीमन्यानन्दादिसादृश्याभ्युपगमादित्यत आह आनुकूल्यादीति ।

आनुकूल्यादि नापरम् ।

आनुकूल्यं निरुपाधिप्रियत्वमानन्दस्य, बोधात्मकत्वं ज्ञानस्येत्यादि । अपरमल्पत्वास्थिरत्वादि ॥ आनुकूल्यादेः प्रवृत्तिनिमित्तस्य सत्त्वात् तदाश्रयेण व्युत्पत्तेरपि सम्भवात् आनन्दादिशब्दप्रवृत्त्युपपत्तावनुमानमप्रयोजकमित्युक्तं भवति ।

परि०— अपि चेत्यनुवादः । तथापीति व्याख्या ॥ **अनुमानमिति** । 'सादृश्यानुमानस्यैवानुसरणीयत्वादि'त्यनेन 'ईशानन्दादय आनन्दादिशब्दवाच्याः अस्मदानन्दसदृशत्वात् देवदत्तानन्दवदि'ति यदनुमानमुक्तं तदित्यर्थः । विमता इत्यनुमानं तु सिद्धसाधनतयैव परास्तम् । निरुपाधिप्रियत्वादिसादृश्यस्य स्वीकारादिति भावः । विमताः लौकिकविलक्षणा इत्यनुमानमित्यर्थः ।

यादु०— साक्षात्कृतभगवद्गुणा इति । तथा च वाच्यार्थदर्शनादुपदेशेनैव व्युत्पत्त्युपपत्तिरिति भावः । एवं सूत्राभिप्रेतं बाधकपरिहारमुपपाद्येदानीं सूत्रमुत्थापयति **नन्विति** ॥ **बुद्धिप्रवेशाभावेति** । अनेन बुद्ध्यर्थ इत्यंशतात्पर्यमुक्तमिति ज्ञातव्यम् ।

वं०प०— अनुमानमिति । विमता लौकिकसलक्षणा आनन्दादिशब्दवाच्यत्वादिति बाधत्वेनाशङ्कितमनुमानमित्यर्थः ॥ **कुतो न प्रयुज्यन्त इति** । तथा च जीवानन्दादिसाधारणानन्दादिशब्दप्रयोगः कुत इत्यर्थः । उत्तरमाह **तथा सतीति** । तथा च विलक्षणशब्दप्रयोगो न भवतीत्यर्थः ।

शे०चं०— समुच्चायकत्वासम्भवादपि चेत्येतद्व्याचष्टे **तथाऽपीति** । अनेन यद्यपि लोकविलक्षणास्तथाऽपीति मूलयोजना सूचिता भवति । व्युत्पत्त्यभावात् कथं तत्तच्छब्दवाच्यत्वमिति पृच्छति **कथमिति** । किं विदुषां व्युत्पत्त्यनुपपत्तिरभिमता उत अविदुषामिति विकल्पद्वयं मनसि निधायाद्यपक्षोत्तरत्वेन मूलं योजयति **विद्वद्व्युत्पत्तित इति** । अतीन्द्रियत्वेनोपदेशादेरसम्भवात् सादृश्यानुमानस्य च असिद्धत्वात् कथं विदुषामपि व्युत्पत्तिरित्यतस्तात्पर्यमाह **विद्वांसो हीति** । तथा च वाच्यार्थभूतानन्दादिसाक्षात्कारात् तान्प्रत्ययमानन्द

इत्याद्युपदेशेनैव व्युत्पत्तिरित्युक्तं भवति । द्वितीयपक्षोत्तरतयाऽपि मूलं योजयितुं तमुत्थापयति **अविदुषामिति** । तेषां वाच्यार्थसाक्षात्कारभावेन तान्प्रत्युपदेशादेरसम्भवादिति भावः । माऽस्तु तेषां व्युत्पत्तिः इत्यत उक्तं **भवितव्यं चेति** ॥ **विद्वदुपदेशत इति** । अयमानन्द इत्यादेरुपदेशत इत्यर्थः ॥ **अस्मदानन्दसदृश इति** । अस्मदानन्दादिसदृश इत्यर्थः । अत एवानन्दादिशब्दवाच्य इत्युत्तरत्रादिपदमिति ज्ञेयम् । तथा चाविदुषः प्रत्यय-मानन्दादिरित्युपदेशासम्भवेऽप्येवंविधोपदेशसम्भवादुपदेशेनैव व्युत्पत्त्युपपत्तिरिति भावः । **निरुपाधिप्रियत्व-मिति** । जन्येच्छाजन्यं जन्येच्छाविषयत्वमित्यर्थः । विद्वद्व्युत्पत्तितोऽपि चेति समुदायार्थमाह **आनुकूल्यादे-रिति** ॥ **अप्रयोजकमिति** । विमता लौकिकानन्दादिसलक्षणा इत्यत्र हि न निरुपाध्यनुकूलवेदनीयत्वादिना सालक्षण्यसाधनं तस्य बहुमानाविरोधित्वेन ममाप्यभिमततया तत्साधने सिद्धसाधनत्वप्रसङ्गात् । किन्त्वल्प-त्वास्थिरत्वादिसालक्षण्यसाधनमेव । तच्चोक्तरीत्याऽप्रयोजकमिति भावः ।

वा०र०— अपि चेत्येतदिति । इत्येतन्निपातसमुदायं तथापीत्यर्थकतया व्याख्यातीत्यर्थः । इच्छाविषयो हि प्रियमित्युच्यते । आनुकूल्यं चेच्छाविषयत्वमात्रं चेत्साधनादावतिप्रसक्तं इत्यतो विशेषविवक्षया व्याचष्टे **निरुपाधीति** मूलम् । तथा च उक्तमूलान्निरुपाधिकेच्छाविषयत्वमित्युक्तं भवति । अत्र चोपाधिर्नाम प्रयोजकः । स च उपस्थितत्वाल्लाघवात्प्रियशब्दमर्पितेच्छेत्येव पर्यवस्यति । निरश्च तत्सम्बन्धादिच्छाप्रयुक्ते-च्छाविषयत्वमक्षरार्थतया लब्धम् । तच्च कार्यमात्रजनकभगवदिच्छाप्रयुक्तत्वादस्मदिच्छाया अस्मदादिसुखेन सम्भवतीत्यतो विशेषविवक्षया पदार्थचन्द्रिकानुसारेण व्याचष्टे **जन्येच्छाजन्येति** । अत्र भावत्वमात्रं दुःखे गतमिति न तस्य सुखशब्दप्रवृत्तिनिमित्तता सम्भवति । विषयत्वविशेषितमपि द्वेषविषयतया तत्र गतमेव । इच्छापदोपादानेऽपि भगवदिच्छाविषयताया दुःखेऽपि सत्त्वान्न दुःखवारणसम्भव इत्यतो जन्यत्वेन इच्छा विशेषिता । जन्येच्छाविषयत्वमपि श्रीरामपूजोपकरणे गतम्, अतो जन्येच्छापीच्छाजन्येतीच्छया जन्या नेति विशेषिता । श्रीकृष्णपूजोपकरणेच्छा तु पूजाजन्यसुखविशेषे जन्यैवेति तदजन्यत्वाभावान्न तत्र प्रसङ्गः । तथापि भगवदिच्छायाः कार्यमात्रजनकत्वेन तदिच्छाजन्यत्वस्यैवास्मत्सुखेच्छायां सत्त्वादसम्भवादविशेषणमित्यतो जनकीभूतेच्छापि जन्यत्वेन विशेषिता । भावपदपरित्यागे च दुःखाभावे गतमित्यतस्तत्पदमिति ज्ञातव्यम् ।

॥ इति किञ्चित्सादृश्येऽपि निरुपाधिप्रियत्वादिवैलक्षण्यस्य सत्त्वात्पूर्वोत्तरविरोधाभावः ॥

॥ इति अलौकिके विषये लौकिकसादृश्येनोपदेशयोगः ॥

॥ इति अविदुषां विद्वदुपदेशबलाद्व्युत्पत्त्युपपत्तिः ॥

॥ इति विद्वद्व्युत्पत्तिबलात्तत्तच्छब्दप्रयोगस्य साधुत्वम् ॥

॥ इति ईश्वरगतलोकविलक्षणगुणानां लौकिकगुणवाचकपदवाच्यत्वेऽनुपपत्तिपरिहारः ॥

* * *

।। अथ विलक्षणगुणेषु विलक्षणशब्दप्रयोगाभावकारणकथनम् ।।

१६१ सु०— ननु विलक्षणेष्वानन्दादिषु विलक्षणा एव शब्दाः कुतो न प्रयुज्यन्ते । तथा सति तत्र बुद्धिप्रवेशाभावप्रसङ्गात् ।

अल्पत्वादिसादृश्यं कुतो नेत्यत आह **पूर्णत्वादीति** ।

अनु०— पूर्णत्वादिमहत्तेषां वैलक्षण्यं श्रुतौ श्रुतम् ।

(तां) श्रुतिं पठति **पूर्ण इति** ।

पूर्णोऽशेषनियन्ता च सुस्वादुतम एकलः ।
गुणोरुसमुदायोऽयं वासुदेवः सुनिष्कलः ।
वासुदेवश्रुतिश्चैषा गुणान् वक्ति हरेः परान् ॥

पूर्णः पूर्णगुणः । **सुस्वादुतमः** शोभनानन्दतमः । **एकलः** एकाकी परानपेक्षः । **सुनिष्कलः** सर्वथा विभक्तांशविकलः । **हरेर्गुणान् परान्** विलक्षणान् **वक्ति** इति ।

परि०— गुणानामेव प्रस्तुतत्वात् तदनुगुणतया पूर्णपदं व्याचष्टे **पूर्णः पूर्णगुण इति** ।

यादु०— पूर्वं 'पूर्णत्वादि महत्तेषामि'ति पूर्णत्वस्य गुणनिष्ठतयोक्तत्वादाह **पूर्णः पूर्णगुण इति** । रमादीनां सत्त्वादेकाकित्वं बाधितमत आह **परानपेक्ष इति** ।

शे०चं०— एवं सूत्राभिप्रेतं बाधकपरिहारमुपपाद्य सूत्रमुत्थापयति **नन्विति** । वैलक्षण्येऽप्यानन्दादीनामन्यथा तत्प्रयत्नोपायाभावान्निरुपाध्यनुकूलवेद्यत्वादिज्ञापनार्थमानन्दादिपदस्यैव प्रयोग इत्याशयेनाह **तथा सतीति** । अनेन बुद्ध्यर्थ इत्यंशतात्पर्यमुक्तं भवति । ननु पूर्णोऽशेषनियन्ता चेत्यत्र भगवतः पूर्णत्वमुच्यते । न तु तद्गुणानामानन्दादीनां तत्कथमस्याः श्रुतेः 'पूर्णत्वादि महत्तेषां वैलक्षण्यं श्रुतौ श्रुतमि'त्यानन्दादिभगवद्गुणनिष्ठपूर्णत्वादिप्रतिपादकश्रुतित्वकथनमित्यत आह **पूर्णगुण इति** । रमादीनामपि सत्त्वेनैकाकित्वस्य बाधितत्वादाह **परानपेक्ष इति** । मत्स्याद्यनेककलत्वेन निष्कलत्वस्य बाधितत्वादाह **सर्वथेति** ।

वा०र०— वैलक्षण्येऽपीति । आनन्दादीनां वैलक्षण्येऽपीति सम्बन्धः । **अन्यथा** प्रकारान्तरेण ।

।। इति विलक्षणगुणेषु विलक्षणशब्दप्रयोगाभावकारणकथनम् ।।
।। इति उक्तार्थे बाधकपरिहारः ।।

* * *

।। अथ 'अरूपाधिकरण'ाद्यधिकरणानामपव्याख्यानस्यात्र निराकरणाभावे 'न स्थान(तोऽप्य)भेदाधिकरणे तत्कृतत्वप्रदर्शनम् ।।

१६२ सु०— एतेषामधिकरणानामपव्याख्यानं न स्थानतोऽपीत्यत्रैव निराकृतमिति न पुनः प्रक्रान्तम् ।। ३-२-१६ ।।

परि०— एतेषामधिकरणानामिति । 'अरूपवदेव हि', 'अत एव चोपमे'त्येवमादीनां निराकारनिर्विशेषब्रह्मपरत्वेन यदपव्याख्यानं तत् निर्दोषाशेषसद्गुणत्वादौ वेदपुराणादेः महातात्पर्यसमर्थनेन 'न स्थानत' इत्येतदनुव्याख्याने निराकृतमित्यर्थः ।

यादु०— न स्थानतोऽपीत्यत्रैवेति । तत्र हि सविशेषं ब्रह्म आविद्यकोपाधिकल्पितं न वेदान्तवाक्यप्रतिपाद्यम्, अपि तु निरस्तसमस्तविशेषमेवेति परेण प्रतिपादितम् । तच्च सगुण एव वेदानां महातात्पर्यस्य प्रामाणिकत्वात् तद्विरोधरूपयुक्त्या सम्यक् तत्र निराकृतम् 'महातात्पर्यमुख्यस्य विरोधादत एव हि । दोषित्वनिर्गुणत्वाल्पगुणत्वादि कथञ्चन । नार्थः श्रुतिपुराणादेस्तद्विरुद्धोऽखिलस्य च । अर्थः स्वयं विनिर्णीतो वासुदेवेन सादरमि'ति । अरूपवदेव हि तत्प्रधानत्वादित्याद्यधिकरणेष्वपि निर्विशेषमेव ब्रह्म वेदान्तवेद्यं न कल्पितं सविशेषमितीदमेव प्रमेयं प्रतिपाद्यतया परस्याभिप्रेतम् । तथाहि । अरूपवदेव हीत्यधिकरणारम्भे रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यम् । रूपादिमदिति तेनोक्तत्वात् । अत एव चोपमेति सूत्रचतुष्टयमेवाधिकरणमित्यभिप्रेत्यान्ते तस्मान्निर्विकल्पलिङ्गमेव ब्रह्म नोभयलिङ्गं विपरीतलिङ्गं वेति सिद्धमित्युपसंहृतत्वात् । प्रकृतैतावत्त्वं हीत्यत्रापि नेति नेतीत्यत्र विषयवाक्ये इतिशब्दद्वयेन पूर्वप्रकृतं मूर्तामूर्तलक्षणं रूपद्वयं परामृश्यते निषेध्यत्वाय शुद्धब्रह्मस्वरूपप्रतिपादनाय चेत्युक्तत्वात् । तदव्यक्तमाह हीत्यत्रापि पूर्वनिर्धारितं ब्रह्म कस्मान्न गृह्यत इत्याशङ्कापरिहाराय तस्याव्यक्तत्वमत्र समर्थ्यत इत्युक्तत्वेन निर्विशेषस्यैवाभिप्रेतत्वात् । परमत इत्यारभ्यानेन सर्वगतत्वमायामयशब्दादिभ्य इत्यन्तानि सूत्राण्येकमेवाधिकरणमित्यभिप्रेत्य तत्रापि यदेतन्निरस्तसमस्तप्रपञ्चं ब्रह्म निर्धारितम् । अस्मात्परमन्यत्तत्वं नास्तीति सिद्धान्तितत्वात् । अत एतेषामप्यधिकरणानां परकृतं व्याख्यानं महातात्पर्यविरोधलक्षणयुक्त्या तत्रैव निराकृतमित्यर्थः ।। ३-२-१६ ।।

वं०प०— अपव्याख्यानमिति । निर्विशेषं निरस्तसमस्तप्रपञ्चं शुद्धं ब्रह्मैवैतेष्वधिकरणेषु प्रतिपाद्यत इत्यपव्याख्यानमित्यर्थः ॥ ३-२-१६ ॥

शे०चं०— एतेषामिति । अरूपवदेव हि तत्प्रधानत्वादित्यधिकरणानामित्यर्थः । **अपव्याख्यानमिति** । एतदधिकरणापव्याख्यानस्य न स्थानत इत्येतदधिकरणीयप्रागुपदर्शितापव्याख्यानादतिभिन्नत्वेन तत्प्रदर्शनेनैवोपदर्शितप्रायत्वात् तत्प्रकारमनुपदर्श्यापव्याख्यानमिति सामान्येनैवोक्तम् । यद्यपि चात एव चोपमेत्येतदधिकरणापव्याख्यानं तदधिकरणापव्याख्यानावसर एव स्वरूपेणोपन्यस्य निरस्तमिति तत्साधारण्येनैतेषामिति न वक्तुमुचितम् । तथाऽपि महातात्पर्ययुक्तिविरोधेन तस्य पूर्वमनिरस्तत्वात् तथा निरसनीयत्वाभिप्रायेणैव तेषामिति सामान्येनैवोक्तमित्यवधेयम् **न स्थानतोऽपीत्यत्रैवेति** तत्र हि श्रुत्यादिशास्त्रस्य विष्णोर्निर्दोषत्वे समस्तगुणपरिपूर्णत्वे च महातात्पर्यं प्रमाणैरुपपाद्य तद्विरोधेन निर्दोषत्वादेर्वेदानर्थत्वप्रतिपादनेन निर्विशेषब्रह्मणो वेदाप्रतिपाद्यतायाः सविशेषब्रह्मणस्तत्प्रतिपाद्यतायाः सिद्धत्वान्निरस्तसमस्तविशेषमेव ब्रह्म प्रतिपत्तव्यमिति तदधिकरणापव्याख्याननिरासवदरूपवदेवेत्याद्यधिकरणीयोक्तरूपापव्याख्यानस्यापि निराकृतत्वान्न पृथक् तदत्र निराकृतमित्यर्थः । ततश्च न भाष्ये तदनिरासप्रयुक्तन्यूनत्वशङ्कावकाश इति भावः ॥ ३-२-१६ ॥

वा०र०— वेदानर्थत्वेति । वेदार्थत्वाभावेत्यर्थः ॥

॥ इति 'अरूपाधिकरण'ाद्यधिकरणानामपव्याख्यानस्यात्र निराकरणाभावे 'न स्थान(तोऽप्य)भेदाधिकरणे तत्कृतत्वप्रदर्शनम् ॥

इति परानन्दा(परमता)धिकरणम् ॥

॥ ३-२-२०-३३ तः ३४ ॥

★ ★ ★

॥ फलदानाधिकरणम् ॥

॥ ३-२-२०-३९ तः ४२ ॥

॥ अथ प्राणिनां स्वर्गनरकादिफलमीश्वरादेव भवतीति श्रुत्युपपत्तिभ्यामुपपादितार्थे आक्षेपस्तत्परिहारश्च ॥
॥ अथ 'धर्मं जैमिनिरि'त्यादिसूत्रोक्ताक्षेपपरिहारकतयोक्ते 'पूर्वं तु'इत्यादिसूत्रोक्तसमाधाने शङ्कापरिहारत्वेन सौत्र'पूर्व'पदव्याख्यानम् ॥
॥ अथ 'धर्मं जैमिनिरि'त्यादिसूत्रोक्ताक्षेपप्रदर्शनम् ॥

ब्र०सू०— ॥ ॐ फलमत उपपत्तेः ॐ ॥

१६३ सु०— अत्रादौ तावत् स्वर्गनरकादिकं फलं प्राणिनामीश्वरादेव भवतीति श्रुत्युपपत्तिभ्यामुपपादितम्। तदाक्षेपार्थं सूत्रं 'धर्मं जैमिनिरत एवे'ति। तस्यार्थः। ईश्वरः फलकारणं चेद्धर्माधर्मावपेक्षते न वा। नेति पक्षे वैषम्याद्यापत्तिर्वेदाप्रामाण्यप्रसक्तिश्च। आद्ये किमीश्वरेण तदपेक्षणीयेनैव कर्मणा फलसिद्धेः। अन्यथा गौरवापत्तेः। न चाचेतनत्वोपपत्तिविरोधः। न हि राजादिरिव कर्म फलं ददातीति ब्रूमो येनाचेतनत्वं बाधेत। किन्तु कारणमात्रम्। न च श्रुतिविरोधः। फलकारणयोर्धर्माधर्मयोः ईश्वरकारितत्वेन तत्स्तुतये तस्य फलकारणत्वोपचारादिति।

परि०— फलमित्येतदंशार्थमाह **फलं प्राणिनामीश्वरादेव भवतीति**। 'श्रुतत्वाच्चे'ति सूत्रार्थः। **श्रुतीति**। 'विज्ञानमानन्दं ब्रह्म रातिर्दातुरि'ति श्रुतीत्यर्थः। 'उपपत्तेरि'त्यस्यार्थः **उपपत्तिभ्यामिति**। ईश्वरकर्मणोर्यथाक्रमं चेतनत्वाचेतनत्वयुक्तेरित्यर्थः॥ **वैषम्याद्यापत्तेरिति**। निर्निमित्तं प्राणिनां विभागेन सुखदुःखादिप्राप्त्या वैषम्यनैर्घृण्ययोरापत्तिरित्यर्थः॥ **वेदाप्रामाण्येति**। सुखादिहेतुत्वेनोक्तकर्मणां व्यतिरेकव्यभिचारप्राप्तेरिति भावः॥ **न च श्रुतिविरोध इति**। 'रातिर्दातुरि'ति श्रुतीत्यर्थः।

यादु०— **न च श्रुतिविरोध इति**।'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणमि'ति श्रुतिविरोधो न चेत्यर्थः।

वं०प०— अचेतनस्य फलदातृत्वानुपपत्तिरूपोपपत्तिः । श्रुतत्वाच्चेति सूत्रोक्ता रातिर्दातुः परायणमिति श्रुतिरिति ध्येयम् ॥ **अन्यथेति** । कर्मण ईश्वरस्य चेत्युभयोः फलकारणत्वकल्पने गौरवं स्यादित्यर्थः ।

शे०चं०— **श्रुत्युपपत्तिभ्यामिति** । 'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं तिष्ठमानस्य तद्विद' इति श्रुत्या चेतनत्वरूपोपपत्त्या चेत्यर्थः । यद्यप्यत्र सौत्रक्रमानुरोधेनोपपत्तिश्रुतिभ्यामित्येव वक्तव्यं तथाऽप्यादि-सूत्रोक्तोपपत्तेरीश्वरस्य फलदातृत्वसम्भावकत्वेनानिश्चायकतया निश्चायकत्वाभिप्रायेण श्रुतेः प्रथमतो ग्रहणमिति द्रष्टव्यम् ॥ **वेदेति** । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवेदेत्यर्थः ॥ **अन्यथेति** । तदपेक्षणीयेन कर्मणा फलसिद्धावपि तस्य कारणत्व इत्यर्थः । ईश्वरस्यापि कारणत्वे द्वयोः कारणत्वाश्रयणाद्गौरवं कर्मणा एव कारणत्वे त्वेकस्यैव तदाश्रयणाल्लाघवमिति भावः ॥ **न च श्रुतीति** । विज्ञानमानन्दमित्याद्युदाहृतश्रुतीत्यर्थः ।

वा०र०— **विज्ञानमानन्दमित्यादि** । दातुः यजमानस्य रातिः फलप्रदम् । तिष्ठमानस्य मनसा स्वस्मिन्वर्तमानस्य च फलप्रदमिति श्रुत्यर्थः । **तथाऽप्यादिसूत्रेति** । यद्यप्यल्पाच्तरमित्यनुसारेण श्रुतिशब्दस्य प्रथमत उपादानमिति च वक्तुं शक्यं तथापि तस्यानित्यतयाऽप्युपपत्त्या नियामकत्वायोगेन तदनाश्रित्य अर्थ-विशेषज्ञापनार्थत्वमेव श्रुतिशब्दप्रथमप्रयोगस्योक्तमिति ज्ञातव्यम् । **उदाहृतश्रुत्यर्थ इति** । तत्र दात्रादिशब्दोक्त-यजमानादेः रातिः फलप्रदमित्युक्तत्वादिति स्पष्टत्वादिति भावः ।

॥ इति 'धर्मं जैमिनिरि'त्यादिसूत्रोक्ताक्षेपप्रदर्शनम् ॥

* * *

॥ अथ तदाक्षेपपरिहारकतयोक्त'पूर्वं तु'इत्यादिसूत्रोक्तसमाधानप्रदर्शनम् ॥

१६४ सु०— समाधानार्थं सूत्रम् ।

ब्र०सू०— ॐ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॐ ॥ ३२ ॥
ॐ फलमत उपपत्तेः ॐ ॥ ३९ ॥

तेनेदमुक्तम् । अपेक्षत एवेश्वरो धर्माधर्मौ । न च तावता तयोरेव अस्तु फलहेतुतेति युक्तम्, धमदिरिवेश्वरस्यापि फलहेतुतया श्रुतिसिद्धत्वेन त्यागायोगात्, बाधकाभावेन श्रुते-रुपचरितार्थताकल्पनाऽनुपपत्तेः, गौरवस्य अप्रामाणिकविषयत्वात् । परस्य ब्रह्मणः कर्मण-श्चोभयोर्हेतुत्वे साम्यापत्तिरित्यपि न वाच्यम्, यतः फलदाने परमेश्वरः कर्तृत्वेन, कर्म तु करणत्वेन 'पुण्येन पुण्यमि'त्यादौ व्यपदिश्यते, करणं च कर्तृप्रयोज्यमिति प्रसिद्धमेवेति ।

परि०— गौरवमेव बाधकमित्यत आह **गौरवस्याप्रामाणिकविषयत्वादिति** । ब्रह्मकर्मणी च फलहेतुत्वेन प्रमिते इति भावः सौत्र'तु'शब्दसूचितविशेषं व्यावर्त्यपूर्वमाह **परस्येत्यादिना** । '**इत्यादौ व्यपदिश्यत**' इत्यनेन हेतुव्यपदेशादित्यंशो व्याख्यातः । '**इति**'पदस्य तेनेदमुक्तमिति पूर्वेणान्वयः ।

वं०प०— **गौरवस्येति** । ईश्वरस्य तस्य फलहेतुतायाश्च प्रामाणिकत्वान्न गौरवमिति भावः ॥ **प्रसिद्धमेवेति** । तथा च न साम्यमिति भावः ॥ **सव्यापारीकरोतीति** । उद्बुद्धानि करोति फलोन्मुखानि करोतीत्यर्थः । तथा चोद्बोध एव व्यापार इति भावः ।

शे०चं०— **श्रुतिसिद्धत्वेनेति** । विज्ञानमानन्दमित्यादिश्रुतिसिद्धत्वेनेत्यर्थः । ननु विज्ञानमानन्दमिति श्रुतौ फलकारणयोर्धर्माधर्मयोरीश्वरकारितत्वेन तत्स्तुतये तत्कारणत्वोपचारान्नानया तस्य कारणत्वसिद्धिरित्यत आह **बाधकाभावेनेति** । गौरवस्यैव बाधकस्य सत्त्वात्कथं तदभाव इत्यत आह **गौरवस्येति** । बाधकान्तर-माशङ्क्य परिहरति **परस्येति** ॥

॥ इति तदाक्षेपपरिहारकतयोक्त'पूर्वं तु'इत्यादिसूत्रोक्तसमाधानप्रदर्शनम् ॥

* * *

॥ अथ तदाक्षेपसमाधानोत्थशङ्कानिवारकतया सौत्र'पूर्व'पदव्याख्यानम् ॥

१६५ सु०— तत्र इदमाशङ्क्यते । तथाऽपि कर्मापेक्षस्य ईश्वरस्य फलदानेऽनुपचरितं स्वातन्त्र्यं न सिद्ध्यति । ततश्च न तस्मिन् बहुमानातिशय इति ॥ एतत्परिहारत्वेन पूर्वपदं व्याख्याति स एवेति ।

अनु०— स एवाशेषजीवस्थनिस्सङ्ख्यानादिकालिकान् ।
धर्माधर्मान् सदा पश्यन् स्वेच्छया बोधयत्यजः ।
कांश्चित्तेषां फलं चैवं ददाति स्वयमच्युतः ।
न ते विशेषं कमपि प्रेरणादिकमच्युते ।
कुर्युः कदाऽपि तेनायं स्वतन्त्रोऽनुपचारतः ।

अनादिकालत्वं च प्रवाहापेक्षयोक्तं **कांश्चित् बोधयति** सव्यापारीकरोति **स्वयमेवेति** सम्बन्धः । 'लीलया करणीकरोति, न तु तेन विना दातुं न शक्नोती'ति भावः ।

यादु०— पूर्वपदं व्याख्यातीति । तुशब्दोपेतं पूर्वपदमित्यर्थः । तथा च फलदाने पूर्वोक्तं ब्रह्मैवेति पूर्वं त्वित्यस्यार्थ उक्तो भवतीति ज्ञातव्यम् ॥ ३-२-२० ॥

इति श्रीमद्वेदेशतीर्थपूज्यपादशिष्येण यदुपतिना कृतायां सुधाटिप्पण्यां
तृतीयाध्यायस्य द्वितीयः पादः ॥ ३-२ ॥

शे०चं०— पूर्वपदं व्याख्यातीति । तथा च निरसङ्ख्यानादिकालीनधर्माधर्मादिद्रष्टृत्वादेः सौत्रपूर्वपदार्थत्वेनोत्सूत्रत्वाभावादस्यार्थस्य न तदभिधायकस्य स एवेत्युत्तरग्रन्थस्याभाष्यत्वमिति भावः ॥ **प्रवाहेति** । धर्माधर्माणां सादित्वेन स्वरूपानादित्वस्य बाधितत्वादिति भावः । अचेतनत्वेन धर्माधर्मयोर्बोधासम्भवाद्बोधयतीति तद्बोधकत्वोक्तेरयोगमाशङ्क्याह **सव्यापारीकरोतीति** । फलं चैवेत्येवकारस्य व्यर्थत्वाद्विरुद्धत्वाच्चापेक्षितव्यवहितान्वयप्रदर्शनेन तत्सार्थक्यमाह **स्वयमेवेतीति** । धर्माधर्मान्सदा पश्यन्सव्यापारीकरोतीत्येतावतैव पूर्तेस्तत्र स्वेच्छयेति विशेषणानर्थक्यमाशङ्क्य कमपिक्षस्य हरेः फलदानेऽनुपचरितस्वातन्त्र्यसाधनाय लीलया तत्करणीकरणरूपार्थप्रतिपादकत्वात् तस्य न वैयर्थ्यमिति भावेन तत्तात्पर्यमाह **लीलया करणीकरोतीत्यादिना** ।

वा०र०—अस्यार्थस्येति । अस्यार्थस्योत्सूत्रत्वाभावादिति सम्बन्धः । **विशेषणानर्थक्यमाशङ्क्येति** । आनर्थक्यमित्याशङ्क्येत्यर्थः । हरेरिति षष्ठीपाठः ।

* * *

॥ अथ उक्त'पूर्व'पदार्थविवरकतया कर्मस्वरूपप्रपञ्चनम् ॥

१६६ सु०— यदेतदत्रोक्तं धर्माधर्मदर्शनं तत्प्रेरणं तत्फलदानं तदप्रेर्यत्वादिकं चेश्वरस्य तदेव विचार्यमाणं तस्मिन् महान्तं बहुमानमुत्पादयिष्यति किमु समस्तपदार्थ इत्याशयवान् कर्मणां स्वरूपं तावत् प्रपञ्चयति कर्माणीति ।

अनु०— कर्माणि तानि च पृथक् चेतनान्येव सर्वशः ।
अचेतनशरीराणि स्वकर्मफलभाञ्जि च ।

प्रत्येकं तेषु चानन्तकर्माण्येवंविधानि च ।
तानि चैवम्

तानीत्यशेषजीवस्थेत्याद्युक्तविशेषणानि । पृथगित्येकैकधर्माधर्माधिष्ठा(तृ)नभूतानि मुक्तव्यावृत्तये अचेतनशरीराणीत्युक्तम् । तत एव स्वकर्मफलभाञ्जि च । तेषु कर्माभिमानिषु । एवंविधानीति चेतनत्वाद्युक्तधर्मवन्ति तानि तेष्वपि कर्मसु वर्तमानानि ।

वं०प०— **यदेतदत्रोक्तमित्यादि** । अत्र धर्माधर्मदर्शनं मूले स एवेत्यारभ्य पश्यन्नित्यन्तेनोक्तम् । बोधयतीत्यनेन तत्प्रेरणम् । तेषामिति फलदानम् । न त इत्यादिना तदप्रेर्यत्वादिकं चोक्तमिति ज्ञेयम् ॥ **अधिष्ठानभूतानीति** । धर्माधमविवाधिष्ठानभूतौ येषां तानि धर्माधर्माधिष्ठानभूतानि । धर्माधर्मशरीरकाणीति यावदित्यशेषमतिमङ्गलम् ॥ ३-२-२० ॥

इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिता टीकाऽसङ्गृहीतसुधावाक्यार्थविवरणे तृतीयाध्यायस्य द्वितीयः पादः ॥ ३-२ ॥

वा०र०— **कर्मणां चेतनत्वादीति** । धर्मस्य सुखहेतुत्वमपीत्युपासनापादीयानुभाष्यादौ तु धर्माधर्मरूपाचेतनस्याचेतनत्वयुक्त्या मोक्षसाधनता निराकरिष्यत इति न विरोधः ।

शे०चं०— कर्मणां चेतनत्वादिप्रतिपादनस्य प्रकृतानुपयोगित्वादसङ्गतमित्याशङ्क्य निराकरोति **यदेतदिति । अत्र सूत्रे** । उक्तं पूर्वपदेनेति शेषः ॥ **अशेषजीवस्थेत्याद्युक्तेति** । अशेषजीवस्थत्वनिरसङ्ख्यत्वानादिकालिकत्वरूपोक्तविशेषणविशिष्टानीत्यर्थः ॥ **मुक्तेति** । चेतनतयाऽभिमतानां कर्मणां मुक्तव्यावृत्तय इत्यर्थः । **तत एवाचेतनशरीरत्वादेव** ॥ **कर्माभिमानिष्विति** । धर्माधर्माधिष्ठातृभूतकर्मस्वित्यर्थः ॥ **चेतनत्वाद्युक्तधर्मवन्तीति** । आदिपदेनाचेतनशरीरत्वस्वकर्मफलभाक्त्वयोः परिग्रहः ॥ **तेष्वपि कर्मसु वर्तमानानीति** । न केवलं धर्माधर्मारूपाचेतनशरीराधिष्ठातृचेतनकर्मस्वेव वर्तमानानि चेतनत्वाद्युक्तधर्मवन्ति । किन्त्वेवंविधानि चेति चेतनत्वाद्युक्तधर्मवत्त्वेनोक्तकर्मस्वपि वर्तमानानि कर्माण्येवं चेतनत्वाद्युक्तधर्मवन्तीत्यपिशब्दार्थः ।

॥ इति उक्त'पूर्व'पदार्थविवरकतया कर्मस्वरूपप्रपञ्चनम् ॥

* * *

।। अथ एवंविधकर्मणां दर्शनादिमत्त्वादीशशक्तेरुत्तमत्वम् ।।

१६७ **सु०**— ततः किमित्यत आह **इतीशस्येति** ।

अनु०— इतीशस्य निस्सीमा शक्तिरुत्तमा ।

।। इति एवंविधकर्मणां दर्शनादिमत्त्वादीशशक्तेरुत्तमत्वम् ।।

* * *

।। अथ कर्मणामेवंविधत्वे प्रमाणोदाहरणम् ।।

१६८ **सु०**— एवम्भूतानां कर्मणां दर्शनादिमतः । **उत्तमा** प्रतिबन्धादिरहितत्वात् ।

कर्मणामेवंविधत्वं कुत इत्यत आह **एकैवेति** ।

अनु०— एकैव ब्रह्महत्या हि वराहहरिणोदिता ।

हरिणैव न त्वर्वाचीनेन । **वराह**ग्रहणेन वाराहपुराण इति सूचितम् । **उदिता** चेतनत्वादिरूपेणेति शेषः ।

तदेव दर्शयति **ब्रह्मपारेति** ।

ब्रह्मपारस्तवेनैव निष्क्रान्ता राजदेहतः ।
स्तोत्रस्य तस्य माहात्म्याद्व्याधत्वं गमिता पुनः ।
प्राप्य ज्ञानं परं चाप तथाऽन्यान्यपि सर्वशः ।
अनन्तान्युदितान्येवं प्रभुणा कपिलेन हि ।
संसारे पच्यमानानि कर्माण्यपि पृथक् पृथक् ।

अनेन समग्रमितिहासं सङ्क्षेपेण स्मारयति । व्याधत्वादिप्राप्त्या चेतनत्वादिकं गम्यते । तथाशब्दः प्रमाणसमुच्चये । अन्यानि ब्रह्महत्यायाः । पृथक् पृथक् उदितानि । एवं चेतनत्वादिना । हीति (परम)सा(ङ्क्ये)ङ्क्यप्रसिद्धिं दर्शयति । कथं चेतनत्वादिना प्रतीतिस्तेषामित्यत उक्तं संसारेति ।

शे०चं०— मूले निस्सीमशक्तित्वे ईशस्येत्येतद्धेतुगर्भं विशेषणमिति भावेन हेतुसमर्पकतया तत्तात्पर्यमाह **एवम्भूतानामिति** । निस्सीमेत्येतावता पूर्तेरुत्तमेत्यनर्थकमित्याशङ्क्य तेन निर्मर्यादत्वलाभेऽप्यप्रतिबद्धत्वासिद्धेः तत्प्रतिपादकत्वात् तस्य नानर्थक्यमिति भावेन तत्तात्पर्यमाह **उत्तमा प्रतिबन्धादिरहितत्वादिति** । विवक्षितकर्मस्वरूपप्रतिपादनस्य कर्मणीत्यादिनैव सिद्धेरेकैवेत्याद्युत्तरग्रन्थानर्थक्यमित्याशङ्क्य कर्मणामुक्तप्रकारत्वस्य प्रामाणिकत्वकथनार्थत्वात् तस्य न तदिति भावेन प्रमाणोक्तिपरतयोत्तरग्रन्थं योजयितुं तदप्रामाणिकत्वशङ्कामुत्थापयति **कर्मणामिति** । वैयर्थ्यादिप्रसक्त्यैकैवेत्येवकारस्य यथास्थितसम्बन्धानुपपत्तेर्भिन्नक्रमतामाश्रित्य प्रयोजनमाह **हरिणैवेत्यादि** । मूले वराहग्रहणस्यानर्थक्यमाशङ्क्य परिहरति **वाराहेति** । वाराहपुराणस्योक्तार्थप्रतिपादकत्वान्न तदप्रामाणिकत्वशङ्कानिवर्तकत्वमित्यतोऽपेक्षितशेषपूरणेन तस्योक्तार्थप्रतिपादकतामुपदर्शयति **चेतनत्वादिरूपेणेति शेष इति** ॥ **तदेवेति** । चेतनत्वादिकमेवेत्यर्थः । कथमनेन चेतनत्वं ज्ञापितमित्यत आह **व्याधत्वादीति** । आदिपदेन ज्ञानादेः परिग्रहः । एकग्रन्थताभ्रान्तिं परिहरति **तथाशब्द इति** । प्रमाणान्तरोपन्यासस्तु वाराहपुराणेन ब्रह्महत्यायाः चेतनत्वादिसिद्धावपि तदतिरिक्तकर्मणां तदसिद्धेः तत्सिद्ध्यर्थमिति भावेन तथा व्याचष्टे **अन्यानीति** । पृथगित्येकैकधर्माधिष्ठतृभूतानीति पूर्वं तात्पर्यस्य कथितत्वात् तदनुक्त्वा व्यवहितत्वात् तसम्बन्धमात्रमेव दर्शयति **पृथगिति** । उक्तार्थस्य प्रतिपादकत्वसिद्ध्यर्थमाह **एवमिति** ।

वा०र०— वराहपुराणस्योक्तार्थेति । अत्र वराहपुराणस्योक्तार्थकत्वाप्रतिपादकत्वादिति पाठः । वराहपुराणस्य यदुक्तार्थकत्वं चेतनत्वादित्युक्तं कर्मेत्यर्थप्रतिपादकत्वमिति यावत् । तदप्रतिपादकत्वादित्यर्थः । 'वराहहरिणोदिता ब्रह्महत्ये'त्येतावन्मात्रेण ब्रह्महत्यायाश्चेतनत्वादिना वराहहरिणोदितत्वालाभादिति भावः । अप्रतिपादकत्वादित्यनन्तरं एकेनेत्याद्यनुव्याख्यानस्येति पाठः । वराहपुराणस्योक्तार्थेति पाठेऽपि वराहपुराणस्येति करणे कर्तृत्वोपचारेण वराहपुराणेनोक्तो योऽर्थः कर्माचेतनत्वादिस्तत्प्रतिपादकत्वादेकैवेत्यनुव्याख्यानस्येति योज्यम् । कर्माचेतनत्वादिरूपार्थाविशिष्टतया वराहपुराणस्यात्रोक्तिर्नास्तीत्यनेन लभ्यत इति पाठद्वयेऽपि फलत एक एवार्थः । तस्योक्तार्थप्रतिपादकतामिति वक्ष्यमाणतया तस्येत्यनुव्याख्यानार्थपदमाकृष्यत इति शेषो न पूर्वो वा । तथा च एतदनुव्याख्यानस्य प्रामाणिकत्वप्रतिपादनेन निष्प्रमाणकत्वशङ्कानिरासाय प्रवृत्तेरनेन चोक्तार्थस्य

प्रमाणगम्यत्वानुक्तेरनेन तच्छङ्कापरिहारायोग इति भावः । **अपेक्षितशेषपूरणेनेति** । अस्य वाक्यस्य प्रामाणिकत्वसमर्पकताया अत्र अनुव्याख्यानवाक्ये उक्तशेषस्यापेक्षितत्वादिति भावः । **तस्येति** । एकैवेत्यनुव्याख्यानस्येत्यर्थः । **उक्तार्थेति** । वराहपुराणे एकैव ब्रह्महत्या चेतनत्वादिनोक्तेत्युक्तार्थप्रतिपादकतामुपदर्शयतीत्यर्थः । उक्तरीत्या शेषपूरणे एकैव ब्रह्महत्या वराहहरिणा चेरूपेणोनोक्तेति विशिष्टार्थप्रतिपादकत्वेन वराहपुराणस्य अनेन अनुव्याख्यानोक्तिलाभादिति भावः । एतेनोक्तानुव्याख्यानस्योक्तार्थप्रतिपादकत्वानुपपत्तिशङ्कोपपादकतया वराहपुराणस्य विशिष्टार्थप्रतिपादकत्वेनात्रानुक्तेरेव वक्तव्यतया वराहपुराणस्योक्तार्थप्रतिपादकत्ववचनायोग इति शङ्कादेरनवकाश इति सूरयो विदाङ्कुर्वन्तु । **उक्तार्थप्रतिपादकत्वसिद्ध्यर्थमिति** । अत्रापि 'कपिलेनोदितानी'त्यनुव्याख्याने कर्मणां चेतनत्वादिनोदितत्वानुक्त्योक्तानुव्याख्यानस्य कपिलवाक्यं चेतनत्वादिना अनन्तकर्मप्रतिपादकमित्युक्तार्थप्रतिपादकत्वायोग इत्याशङ्कापरिहाराय अस्य अनुव्याख्यानस्योक्तार्थप्रतिपादकत्वं यथा स्यात् तथा अनुरूपमेवं शब्दव्याख्यानं करोतीत्यर्थः ।

श्रीमच्छ्रीगुरुराजीयशेषवाक्यार्थचन्द्रिका ।
भक्त्या संसेविताऽनेन प्रीतोऽस्तु गुरुगो हरिः ॥

आनन्दाब्धिप्रजातत्रिदिशतरुगुरुश्रीनिवासानुजश्री-
विद्याधीशाख्यरत्नाद्भुतविदमृतगोः केशवाचार्यवर्यात् ।
रुग्मिण्यायां प्रजातस्य विबुधनरसिंहस्य गुर्वीयसौध-
व्याख्यापाठादिशोधात्मकविवृतिकृतावन्तगो भक्तिपादः ॥

इति श्रीमत्सकलविद्वच्चक्रचूडामणि श्रीमद्गुरुराजवर्यविरचित श्रीमन्न्यायसुधाशेषवाक्यार्थचन्द्रिकापाठादिशोधे पाण्डुरङ्गिनरसिंहकृते तृतीयाध्यायस्य द्वितीयः पादः ॥

॥ इति कर्मणामेवंविधत्वे प्रमाणोदाहरणम् ॥

॥ इति तदाक्षेपसमाधानोत्थशङ्कानिवारकतया सौत्र'पूर्व'पदव्याख्यानम् ॥

॥ इति 'धर्मं जैमिनिरि'त्यादिसूत्रोक्ताक्षेपपरिहारकतयोक्ते 'पूर्वं तु'इत्यादिसूत्रोक्तसमाधाने शङ्कापरिहारत्वेन सौत्र'पूर्व'पदव्याख्यानम् ॥

॥ इति प्राणिनां स्वर्गनरकादिफलमीश्वरादेव भवतीति श्रुत्युपपत्तिभ्यामुपपादितार्थे आक्षेपस्तत्परिहारश्च ॥

* * *

॥ अथ पादार्थोपसंहारः ।

१६९ सु०— पादार्थमुपसंहरति **तस्मादिति** ।

अनु०— तस्मादनन्तमाहात्म्यगुणपूर्णो(गो) जनार्दनः ।
भक्त्या परमयाऽऽराध्य इति पादार्थ ईयते ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने तृतीयाध्यायस्य द्वितीयः पादः ॥

माहात्म्यं शक्तिः । **गुणाः** आनन्दाद्याः । **आराध्य** उपास्य इत्युत्तरपादार्थेन सङ्गतिमस्य सूचयति ॥ ३-२-२० ॥ ३७ तः ४२ ॥

परि०— अपौनरुक्त्याय माहात्म्यगुणपदयोरर्थमाह **माहात्म्यं शक्तिः । गुणाः** आनन्द्याद्या **इति** ॥ **सङ्गतिमिति** । हेतुहेतुमद्भावरूपेत्यग्रे व्यक्तमिति भावः ॥

॥ इति श्रीमत्सुधीन्द्रगुरुपादशिष्यराघवेन्द्रयतिकृते श्रीमन्न्यायसुधापरिमळाख्याने तृतीयाध्यायस्य द्वितीयः पादः ॥

शे०चं०— नन्वशेषमाहात्म्येति गुणानां माहात्म्यमुच्यते न भगवतस्तत्कथमयं पादार्थः । भगवन्माहात्म्यस्यैव तदर्थत्वात् । न चाशेषमाहात्म्यश्चासौ गुणपूगश्चेति कर्मधारयाश्रयणाद्भगवन्माहात्म्यप्रतिपादकत्वलाभाद्युक्तमस्य पादार्थोपसंहारत्वम् । तथा सति गुणपूग इत्येतावतैव तत्सिद्धयाऽनन्तमाहात्म्येत्यस्यानर्थक्यापातादित्यतो व्याख्याति **माहात्म्यमिति** । न चोक्तरीत्या वैयर्थ्यम् । अनन्तमाहात्म्यग्रहणस्य निष्कृष्यैतदधिकरणप्रमेयोपसंहारार्थत्वाद्गुणपूग इत्यस्य चैतद्व्यतिरिक्तैतत्पादीयसकलाधिकरणार्थोपसंहारार्थत्वादवैयर्थ्यमित्याशयात् ॥ **सङ्गतिमिति** । हेतुहेतुमद्भावलक्षणामित्यर्थः ॥ ३-२-२० ॥

गुरुराजोपदिष्टेन मार्गेणैव यथामति ॥
कृपयां भक्तिपादस्य विवृत्त्या प्रीयतां हरिः ॥ १ ॥

यद्विद्याधीशगुरोः शुश्रूषाऽन्या न रोचते तस्मात् ॥
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ॥ २ ॥

इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सकलविद्वच्चक्रचूडामणीनां श्रीमद्विद्याधीशतीर्थपूज्यपादानां निजशिष्यस्य केशवस्य कृतौ गुरुराजोक्तमार्गानुवर्तिन्यां श्रीमन्न्यायसुधाविषमपदवाक्यार्थविवृतौ शेषवाक्यार्थचन्द्रिकायां तृतीयाध्यायस्य द्वितीयः पादः ॥ ३-२ ॥

चषकः— आराध्य इत्यनूद्य व्याकुरुते उपास्य इति ।

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणश्रीमत्सत्यप्रियतीर्थपूज्यपादतनूज-सर्वतन्त्रस्वतन्त्र-गालवपुरिश्रीनिवासार्यान्तेवास्यन्तेगणगणितेन कृष्णशर्मणा रचितायां सुधाचषकनाम्न्यां कतिपयफक्किकाव्याख्यायां तृतीयाध्यायस्य द्वितीयः पादः ॥

॥ इति पादार्थोपसंहारः ॥

॥ इति फलदानाधिकरणम् ॥

(३-२-२०-३९ तः ४२ ॥)

★ ★ ★

१७० सु०—

इति श्रीमत्पूर्णप्रमतिभगवत्पादसुकृते-
रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ।
कृतायां टीकायां विषमपदवाक्यार्थविवृतौ
तृतीयेऽध्यायेऽस्मिन् भजनचरणः पर्यवसितः ॥

इति श्रीमज्जयतीर्थभिक्षुविरचितायां श्रीमन्न्यायसुधायां तृतीयाध्यायस्य द्वितीयः पादः ॥

★ ★ ★

परिशिष्टानि

पुटसंख्या

१) श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्
ब्रह्मसूत्रानुव्याख्यानम् १२५३ - १३६७

२) श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य प्रप्रथमटीका
श्रीपद्मनाभतीर्थविरचिता
सन्न्यायरत्नावली १३६९ - १४२३

३) श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका
श्रीत्रैविक्रमार्यकृता
नयचन्द्रिका १४२५ - १४६५

४) श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका
श्रीशङ्करपण्डिताचार्यविरचिता
अनुव्याख्यानसम्बन्धदीपिका १४६७ - १५०९

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

ब्रह्मसूत्रानुव्याख्यानम्

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

द्वितीयाध्यायस्य द्वितीयः पादः

अविरोधप्रतिपादनारम्भः

प्रथमपादे स्मृति-युक्ति-श्रुतिसंवादियुक्ति-बहुयुक्तिविरोधपरिहारः

स्मृतियुक्तिश्रुतिगुणयुक्तयो बहुयुक्तयः ॥ ५४७ ॥

एवं चतुर्विधा नैव विरुद्ध्यन्तेऽन्वयं प्रति ।
इति प्रथमपादेन निर्णीतेऽपि

इह द्वितीयपादे आग्रहतः प्रवृत्तानां प्रवाहतोऽनादीनां समयानां विरोधपरिहारः

अभियोगतः ॥ ५४८ ॥

दर्शनानां प्रवृत्तत्वान्मन्द आशङ्कते पुनः ।
अनादिकालतो वृत्ताः समया हि प्रवाहतः ॥ ५४९ ॥

न चोच्छेदोऽस्ति कस्यापि समयस्येत्यतो विभुः ।
भ्रान्तिमूलत्वमेतेषां पृथग्दर्शयति स्फुटम् ॥ ५५० ॥

तर्कैर्दृढतमैरेव वाक्यैश्चागमवादिनाम् ।
दौर्लभ्याच्छुद्धबुद्धीनां बाहुल्यादल्पवेदिनाम् ॥ ५५१ ॥

तामसत्वाच्च लोकस्य मिथ्याज्ञानप्रसक्तितः ।
विद्वेषात् परमे तत्त्वे तत्त्ववेदिषु चानिशम् ॥ ५५२ ॥

अनादिवासनायोगादसुराणां बहुत्वतः ।
दुराग्रहगृहीतत्वाद्वर्तन्ते समयाः सदा ॥ ५५३ ॥

तथापि शुद्धबुद्धीनामीशानुग्रहयोगिनाम् ।
सुयुक्तयस्तमो हन्युरागमानुगताः सदा ॥ ५५४ ॥

इति विद्यापतिः सम्यक् समयानां निराकृतिम् ।
चकार निजभक्तानां बुद्धिशाणत्वसिद्धये ॥ ५५५ ॥

॥ रचनानुपपत्त्यधिकरणम् ॥

ॐ रचनानुपपत्तेश्च नानुमानम् ॐ ॥ २-२-१ ॥

ॐ प्रवृत्तेश्च ॐ ॥ २-२-२ ॥

निरीश्वरसाङ्ख्यमतानुवादः

चेतनाचेतनं तत्त्वद्वयमेव निरीश्वराः ।
आहुस्तत्पञ्चपञ्चत्वविभागस्थमचेतनम् ॥ ५५६ ॥

चेतनं तदसङ्ख्यातं भिन्नमन्यद्विदोज्झितम् ।
अचेतनस्य कर्तृत्वं स्वातन्त्र्येण निगद्यते ॥ ५५७ ॥

परस्परविभेदश्च कार्याणामालयं भवेत् ।

पुरुषस्य भोक्तृत्वाभोक्तृत्ववादित्वेन साङ्ख्येषु मतभेदः

भोक्तृतां चेतनस्याहुः केचित्तामपि नापरे ॥ ५५८ ॥

स्वरूपचैतन्यबलात् स्वप्रकाशाच्च भोगिताम् ।
प्रकृतेश्च स्वरूपस्य विवेकाग्रहमेव तु ॥ ५५९ ॥

अभोगवादिनो भोगमाहुर्भेदग्रहात्तयोः ।
भोगिनां मुक्तिरुद्दिष्टा स एवाभोगवादिनाम् ॥ ५६० ॥

ईश्वरस्यानङ्गीकारात् मतद्वयमप्ययुक्तम्

ईशस्यासङ्ग्रहादेव न युक्तौ तावुभावपि ।

प्रवृत्तेश्चेति सूत्रार्थः, महदादेः चेतनेच्छाधीनत्वसाधनेन ईश्वरसाधनम्

चेतनेच्छानुसारेण यदा दृष्टः पटोद्भवः ॥ ५६१ ॥

एतादृशत्वमन्यस्य वस्तुत्वात् केन वार्यते ।

प्रधानस्य स्वातन्त्र्येण जगत्कारणत्वे
आगमः अनुमानं वा न प्रमाणम्

न च काचित् प्रमोक्तार्थे श्रुतिरेव प्रमा हि नः ॥ ५६२ ॥

आप्तत्वमुक्तमार्गेण वक्तुर्नैवोपपद्यते ।
अप्रामाण्यस्वतस्त्वस्य स्वीकारादपि मायिवत् ॥ ५६३ ॥

स्वोक्ताखिलनिषेधी स्यान्न च किञ्चित् प्रसिद्ध्यति ।
"इदं नाचेतनवशं वस्तुत्वात्प्रतिपन्नवत्" ॥ ५६४ ॥

इत्येव प्रतिषिद्धस्य केन मूलानुमा भवेत् ।

अचेतनस्य स्वेच्छानुसारित्वरूपस्वातन्त्र्यं व्याहतम्

स्वतन्त्रवृत्ती रचना सा चैवाचेतने कुतः ॥ ५६५ ॥

अचेतनत्वं स्वातन्त्र्यमिति चात्मप्रमाहतम् ।
स्वेच्छानुसारितामेव स्वातन्त्र्यं हि विदो विदुः ॥ ५६६ ॥

कुत इच्छाचेतनस्य सेच्छं चेत् किमचेतनम् ।

अचेतनस्य स्वातन्त्र्याङ्गीकारे साक्ष्यनुभवविरोधः

इच्छाम्यहमिति ह्येव निजानुभवरोधतः ॥ ५६७ ॥

अचेतनेच्छापगता यदि भेदाग्रहोऽत्र च ।
कथं स न घटस्य स्यान्मनो म इति भेदतः ॥ ५६८ ॥

मनसोऽपि गृहीतत्वात्

द्विविधः कामः— एकः आत्मधर्मः, अपरः, अन्तःकरणधर्मः

उभयात्मकता यतः ।
कामस्य तु 'मनः कामः' प्रियाप्रियविभेदतः ॥ ५६९ ॥

द्वैविध्यं दृश्यते चास्य तस्माद्भेदाग्रहः कुतः ।

सूत्रार्थमुपसंहरति

रचनानुपपत्तेस्तन्न सर्वज्ञानुमागतम् ॥ ५७० ॥

अचेतनं जगत्कर्तृ

ॐ पयोऽम्बुवच्चेत्तत्रापि ॐ ॥ २-२-३ ॥

ॐ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॐ ॥ २-२-४ ॥

पयोऽम्ब्वादिदृष्टान्तेन प्रधानस्य प्रवृत्तिस्वातन्त्र्यसाधनं न शक्यं,
चेतनाचेतनयोः भगवदधीनत्वस्य श्रुतिसिद्धत्वात्

पयोऽम्ब्वादि च नोपमा ।
एतत्प्रशास्तिवचनाच्चेतनाचेतनस्य च ॥ ५७१ ॥

आत्मनः इच्छास्वामित्वं, मनसः इच्छायाः उपादानत्वं,
तस्माच्चेतनस्यैव कर्तृत्वं न अचेतनस्य

द्वैविध्येऽपि तु कामादेः कुतः स्वामित्वमात्मनः ।
साक्षादनुभवारूढं शक्यतेऽपोदितुं क्वचित् ॥ ५७२ ॥

इच्छास्वामित्वमेवोक्तमिच्छावत्त्वं न चापरम् ।

ईश्वरस्य मुख्यं स्वाम्यं कर्तृत्वं च, जीवस्य अमुख्यमेव

किञ्चित्तद्वशगत्वेऽपि स्वामित्वं लोकवद्भवेत् ॥ ५७३ ॥

सर्वात्मतन्त्रकामादेः किमुतैव परेशितुः ।

'कामः सङ्कल्पः' इत्यादिश्रुतिः मनसः कामस्वामित्वं न वदति,
किन्तु कामोपादानत्वमेव वदति

न चानुभवगं कामस्वामित्वं वेदवागपि ॥ ५७४ ॥

शक्ताऽपवदितुं तस्मात् सा तदन्याभिधायिनी ।

यदि कामोऽन्तःकरणकर्तृकः स्यात् तदा मोक्षकामोऽपि
अन्तःकरणस्यैव स्यात्

मोक्षकामो भवेदन्यो यदि मुक्ताद्भविष्यतः ॥ ५७५ ॥

जीवमोक्षार्थं प्रकृतिः प्रवर्तत इति न युक्तम्

मोक्षकामस्य किं तेन स्वनाशार्थं च को यतेत् ।

कर्तृत्वं प्रकृतेरेव, भोक्तृत्वमात्मनः इति साङ्ख्यैकदेशमतनिरासः

कर्तृत्वं यस्य तस्यैव भोक्तृत्वमुपलभ्यते ॥ ५७६ ॥

विभागे च तयोर्मानं नैव किञ्चित् क्वचिद्भवेत् ।

प्रकृतेरेव बन्धमोक्षाविति मतमविद्याया एव बन्धमोक्षाविति मतवत्
श्रुतिस्मृतीतिहासपुराणानुभवविरुद्धम्

सर्वमानविरोधैकदुर्दीक्षादीक्षितस्त्वयम् ॥ ५७७ ॥

मायावाद्युपमां यायात् तच्चशब्दान्निराकृतः ।

॥ इति रचनानुपपत्त्यधिकरणम् ॥ १ ॥

* * *

॥ अन्यत्राभावाधिकरणम् ॥

ॐ अन्यत्राभावाच्च न तृणादिवत् ॐ
॥ २-२-५ ॥

प्रकृतिपुरुषौ स्वायत्तोपादानवीजशक्तिमन्तौ,
ईश्वरस्तु प्रकृत्यनुग्रहशक्तिमानिति सेश्वरसाङ्ख्यमतानुवादः

साङ्ख्यस्तु सेश्वरो ब्रूते क्षेत्रानुग्रहशक्तिमान् ॥ ५७८ ॥

अस्तीश्वरः स्वयं भातः क्लेशाकर्मादिवर्जितः ।
क्षेत्रशक्तिमती चैव प्रकृतिर्बीजशक्तिमान् ॥ ५७९ ॥

जीवः पर्जन्यवद्दैवशक्तिमानीश्वरः स्मृतः ।
पृथिवीवत् प्रधानं तज्जीवः सन्निधिमात्रतः ॥ ५८० ॥

बीजावपनकर्त्रैवेति

प्रकृतिपुरुषयोः स्वातन्त्र्येण न शक्तिः

अत्र प्राह स्वयं प्रभुः ।

अन्यत्र कापि शक्तिर्न स्वातन्त्र्येण

प्रकृतिपुरुषयोः तच्छक्तीनां च सत्तास्वरूपप्रतीतयः परमात्माधीनाः

ईश एव हि ॥ ५८१ ॥

शक्तीस्ताः प्रेरयत्यज्ञस्तदधीनाश्च सर्वदा ।
सत्ता प्रधानपुरुषशक्तीनां च प्रतीतयः ॥ ५८२ ॥

प्रवृत्तयश्च ताः सर्वाः

नित्यस्यापि नित्यता परमात्माधीना

नित्यं नित्यात्मना यतः ।
तथा नित्यतया नित्यं नित्यशक्त्या स्वयेश्वरः ॥ ५८३ ॥

नियामयति नित्यं च 'न ऋते त्वदि'ति श्रुतेः ।

प्रधानादिसत्तादेः भगवदधीनत्वे श्रुतिः प्रमाणम्

स्वभावजीवकर्माणि द्रव्यं कालः श्रुतिः क्रियाः ॥ ५८४ ॥

यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया ।
इति श्रुतेर्न सत्ताद्या अपि नारायणं विना ॥ ५८५ ॥

तत्पतञ्जलिविन्ध्यादिमतं न पुरुषार्थदम् ।

॥ इति अन्यत्राभावाधिकरणम् ॥ ३ ॥

* * *

॥ अभ्युपगमाधिकरणम् ॥

ॐ अभ्युपगमेऽप्यर्थाभावात् ॐ ॥ २-२-६ ॥

अत्राधिकरणे न साङ्ख्यमतनिरासः,
किन्तु अभ्यधिकाशङ्कानुसारेण चार्वाकमतनिरासः

चार्वाकैरुच्यते मानमक्षजं नापरं क्वचित् ॥ ५८६ ॥

देह आत्मा, पुमर्थश्च कामार्थाभ्यां विना न हि ।
यदैवं दर्शनेनास्य कोऽर्थः प्रत्यक्षगोचरः ॥ ५८७ ॥

लब्धस्तेनैव हि नरैः शास्त्रात् किं मोहनं विना ।
स्वपरार्थविहीनत्वात् स्वमतेनैव निष्फलम् ॥ ५८८ ॥

किमित्युन्मत्तवच्छास्त्रं वृथा प्रलपति स्वयम् ।
देहादन्योऽनुभवत आत्मा भाति शरीरिणाम् ॥ ५८९ ॥

मम देह इति व्यक्तं ममार्थ इतिवत् सदा ।
प्रत्यक्षस्यैव मानत्वमिति केनावसीयते ॥ ५९० ॥

यदि तत्साधकं वेदप्रामाण्ये न कथं भवेत् ।
न चान्यामानता क्वापि प्रमाणेनावसीयते ॥ ५९१ ॥

स्वमतेनार्थरहित उपेक्ष्यः पक्ष ईदृशः ।

॥ इति अभ्युपगमाधिकरणम् ॥ ३ ॥

* * *

॥ पुरुषाश्माधिकरणम् ॥

ॐ पुरुषाश्मवदिति चेत्तथापि ॐ ॥ २-२-७ ॥

पुरुषोपसर्जनप्रकृतिकर्तृकत्ववादनिरासः

सन्निधानाच्चेतनस्य वर्तते यद्यचेतनम् ॥ ५९२ ॥

तथाप्यबुद्धिपूर्वत्वादुक्तदोषः समो भवेत् ।

ॐ अङ्गित्वानुपपत्तेः ॐ ॥ २-२-८ ॥

अङ्गित्वं पुरुषस्यैव सर्वैरेवानुभूयते ॥ ५९३ ॥

तदङ्गत्वोक्तितश्चैव स्यात् सर्वस्यापलापकः ।
किमु सर्वेश्वरस्यास्य ह्यपलापाद्यतोऽखिलम् ॥ ५९४ ॥

॥ इति पुरुषाश्माधिकरणम् ॥ ४ ॥

* * *

।। अन्यथानुमित्यधिकरणम् ।।

ॐ अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॐ
।। २-२-९ ।।

ॐ विप्रतिषेधाच्चासमञ्जसम् ॐ
।। २-२-१० ।।

प्रकृत्युपसर्जनपुरुषकर्तृत्ववादनिरासः

अङ्गित्वं यदि तस्यैव स्वातन्त्र्यं चेन्न चाखिलम् ।
तत्प्रेरणेऽप्यशक्तत्वात् स्वतन्त्रोऽन्यो ह्यपेक्षितः ।। ५९५ ।।

न च स्वातन्त्र्यमस्यैव प्रत्यक्षादिविरोधतः ।
हिताक्रियादिदोषाच्च भद्रं नानीश्वरं मतम् ।। ५९६ ।।

संसारिणोऽन्यं सर्वेशं सर्वशक्तिमनौपमम् ।
चेतनाचेतनस्यास्य सत्त्वादेस्तदधीनताम् ।। ५९७ ।।

नाङ्गीकुर्वन्ति ये तेषां सर्वेषां च समा इमे ।

पञ्चमतनिरासोपसंहारः

तस्माच्छ्रुतिप्रमाणेन युक्तिभिश्च परो हरिः ।। ५९८ ।।

अङ्गीकार्यतमो नित्यः सर्वैरपि सुनिश्चितम् ।

इति अन्यथानुमित्यधिकरणम् ।। ५ ।।

* * *

॥ वैशेषिकाधिकरणम् ॥

ॐ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॐ ॥ २-२-११ ॥

परमाण्वारम्भवादिवैशेषिकादिमतानुवादः

नित्यज्ञानप्रयत्नेच्छं सङ्ख्याद्यैरपि पञ्चभिः ॥ ५९९ ॥

युक्तमीशं वदन्तोऽन्ये तदिच्छादृष्टचोदिताः ।
परमाणवश्चतुर्वर्गाः संयुज्यन्ते द्विशोऽखिलाः ॥ ६०० ॥

परमाणुद्वयेनैव द्व्यणुकं नाम जायते ।
द्व्यणुकत्रयेण त्र्यणुकं तैश्चतुर्भिस्तदात्मकम् ॥ ६०१ ॥

ततस्त्वनियमेनैव खण्डावयविनां भवः ।
ततश्चानियमेनैव सर्वावयविसम्भवः ॥ ६०२ ॥

कारणं समवाय्याख्यं परमाण्वादिरत्र हि ।
ईशेच्छादृष्टकालास्तु निमित्तं कारणं मतम् ॥ ६०३ ॥

सामान्यान्त्यविशेषौ च समवायश्च तत्त्रयम् ।
नित्यं, क्रिया अनित्याश्च गुणद्रव्ये द्विरूपके ॥ ६०४ ॥

कार्ये गुणक्रियाणां तु समवाय्यन्यकारणम् ।
कारणस्था गुणाद्यास्तु संयोगो द्रव्यकारणम् ॥ ६०५ ॥

एवं स्थितेऽपि सिद्धान्ते विशेषस्तत्र कल्पितः ।
द्व्यणुके परमाणौ च ह्रस्वत्वं परिमण्डलम् ॥ ६०६ ॥

न कारणं कार्यगुणे वैरूप्यं तत्र कारणम् ।
इत्याहुः

उपर्युक्तवैशेषिकादिमतनिरासः
द्व्यणुकपरमाणुपरिमाणादपि त्र्यणुकादौ सजातीयपरिमाणोत्पादः

तानथोवाच विद्याधीशः स्वयं प्रभुः ॥ ६०७ ॥

महत्त्वं चैव दीर्घत्वं त्र्यणुकाद्येषु कल्पितम् ।
तस्माच्च सदृशं कार्यं तत्कार्येषूपजायते ॥ ६०८ ॥

यथा तथैव ह्रस्वत्वात् पारिमाण्डिल्यतोऽपि हि ।
जायेत सदृशं कार्ये परिमाणं समत्वतः ॥ ६०९ ॥

न चेन्महत्त्वतश्चैव दीर्घत्वादपि नो भवेत् ।

अण्वोः द्व्यणुकपरमाण्वोः महत्त्वं, महत्सु त्र्यणुकादिषु अणुत्वं च अङ्गीक्रियते

सदृशस्य हि कार्यस्य नैव योगः कथञ्चन ॥ ६१० ॥

अप्रत्यक्षत्वमेव स्याद्यतः कार्येष्वणुत्वतः ।
इति चेन्न महत्त्वं च परमाणावणावपि ॥ ६११ ॥

कथं त्र्यणुकपूर्वेषु नाणुत्वमपि कथ्यते ।
प्रत्यक्षत्वतदन्यत्वे पुरुषापेक्षयाऽखिले ॥ ६१२ ॥

द्रव्यान्तरवर्त्युत्कृष्टपरिमाणापेक्षया
अणुत्व-महत्वव्यवहारादेकत्र उभयाङ्गीकारे न व्याघातः

अणुत्वं च महत्त्वं च यतो वस्तुव्यपेक्षया ।
तारतम्यस्थिता यस्मात् पदार्थाः सर्व एव च ॥ ६१३ ॥

अणुत्वमहत्त्वयोः न विश्रान्तिः

यथा महत्त्वविश्रान्तिस्तथाणुत्वस्य चेष्यते ।
परिमाणत्वतश्चेन्न महत्त्वस्यापि विश्रमः ॥ ६१४ ॥

दृश्यतेऽनन्त इत्येव तथाऽनन्त्यमणावपि ।
न महत्तत्त्वगुणत एतावानिति हीश्वरः ॥ ६१५ ॥

परिच्छिन्नस्तथाऽणोश्च नैतावद्भागता क्वचित् ।
विश्रान्तो यद्यनन्तांशः कश्चिदस्तीति गम्यते ॥ ६१६ ॥

नावसाययितुं शक्यो विरोधादेव केवलम् ।

कालाकाशादेः परिमाणोत्कर्षस्य आनन्त्यमिव
तदपकर्षानन्त्यमपि साक्षिसिद्धम्

केवलं साक्षिमानेन कालो देशोऽपि नान्तवान् ॥ ६१७ ॥

अपर्यवसितिश्चाणोर्दृश्यते साक्षिणा द्वयोः ।
यदि नो साक्षिगम्यं तन्महत्त्वं केन गम्यते ॥ ६१८ ॥

कालादेः परिमाणोत्कर्षानन्त्यं न अनुमानगम्यम्

विश्रान्तिस्तारतम्येन दृश्यते ह्यनुमानतः ।

आगमः कालादिपरिमाणोत्कर्षमिव तदपकर्षमपि प्रतिपादयति

यद्यागमादनन्तं तन्महत्त्वमवगम्यते ॥ ६१९ ॥

अनन्तमेव चाणुत्वं कुतो नैवावसीयते ।

कालादेः परिमाणोत्कर्षानन्त्यवत् तदपकर्षानन्त्यमपि वर्तते

महत्त्वाणुत्वयोर्नैव विश्रान्तिरुपलभ्यते ॥ ६२० ॥

अनन्तत्वं न अनल्पत्वं, किन्तु परिच्छेदाभावः

अन्यदेव ह्यनन्तत्वं महत्त्वाणुत्वयोः समम् ।

सङ्ख्यायां बहुत्वाल्पत्वयोरानन्त्यमिव कालादेः महत्त्वाणुत्वयोरप्यानन्त्यम्

बहुत्वाल्पत्वयोर्यद्वत्सङ्ख्यायामुपलभ्यते ॥ ६२१ ॥

आनन्त्यमेकभागानां तावत्त्वं ह्येव गम्यते ।

ईश्वरे परिमाणोत्कर्षापकर्षानन्त्यं 'सत्यं ज्ञान'मित्यादिश्रुतिराह

अणीयांश्च महीयांश्च भगवानागमोदितः ॥ ६२२ ॥

आनन्त्यवाचकः शब्दो द्विधाऽऽनन्त्येऽपि मानताम् ।
याति

ईश्वरस्य कालाल्पत्वगुणाल्पत्वशङ्का न युक्ता

नैव, गुणाल्पत्वं कालाल्पत्वं च मानगम् ॥ ६२३ ॥

सर्वकालगतस्याल्पकालेऽपि स्यादवस्थितिः ।
महागुणस्य चाल्पोऽपि गुणः स्यादिति चेद्भवेत् ॥ ६२४ ॥

तावत्त्वमेव नैव स्याद्देशोऽप्येतन्न नो मतम् ।

ब्रह्मणः गगनस्य च परिमाणोत्कर्षापकर्षानन्त्यसद्भावः
सूत्रकारेण उक्तः

महतोऽल्पत्वमपि हि व्योमवत् प्राह वेदवित् ॥ ६२५ ॥

कालादेः अल्पाल्पतरदेशसंस्थानाभावे सर्वत्रावस्थानमपि न स्यात्, शून्यत्वप्रसङ्गश्च

यद्यल्पदेशसंस्थानं न सर्वत्रापि नो भवेत् ।
स्थितस्य ह्यल्पदेशेषु सर्वगत्वं भवेत् ध्रुवम् ॥ ६२६ ॥

एकत्राप्यनवस्थस्य कुत एवाखिलस्थता ।
शून्यत्वमेव तस्य स्याद्यस्यैकत्रापि न स्थितिः ॥ ६२७ ॥

कालादौ परिमाणोत्कर्षापकर्षानन्त्यनिरूपणोपसंहारः,
प्रकृत्यादौ सर्वगते परममहति द्रव्यान्तरेऽपि उभयानन्त्यम्

अतो नाणुत्वविश्रान्तिर्न महत्त्वस्य च क्वचित् ।
उभयानन्त्ययुक् तस्मात्

ब्रह्म परानपेक्षया अनन्तं, देशतः कालतः गुणादितश्च अनन्तम्

यदि मुख्यं महद्भवेत् ॥ ६२८ ॥

तच्च ब्रह्म परं साक्षात् सर्वानन्त्ययुतं सदा ।

प्रत्यक्षादिप्रामाण्यसिद्ध्यर्थं साक्षी अङ्गीकर्तव्यः

यदि साक्षी स्वयम्भातो न मानं केन गम्यते ॥ ६२९ ॥

अक्षजादेश्च मानत्वमनवस्थाऽन्यथा भवेत् ।

परमाणोरपि भागाः सन्ति, परमाणौ विभिन्नावयवेषु सत्स्वपि
तेषां न विभागः

अतः सर्वपदार्थानां भागाः सन्त्येव सर्वदा ॥ ६३० ॥

सर्वदिक्ष्वपि सम्बन्धादविभागः पराणुता ।

सजातीयाभ्यामेव द्वाभ्यामेव परमाणुभ्यामेवेत्यादिनियमवत्यां वैशेषिकादिप्रोक्तसृष्टौ प्रमाणं नास्ति

तत्संयोगादनियतात् पदार्थानां जनिर्भवेत् ॥ ६३१ ॥

द्वयोरेव तु संयोग इति केनावसीयते ।
कारणस्य गुणास्तेन भवेयुः कार्यगा अपि ॥ ६३२ ॥

तारतम्येन सर्वेऽपि महान्तश्चाणवो यतः ।
न च तत्प्रोक्तसृष्टौ तु मानं केवलकल्पना ॥ ६३३ ॥

परमाण्वादिभिः अनियमसृष्टौ साक्षी प्रमाणम्

कथं साक्षिमितस्यास्य शक्नुयाद्वारणे क्वचित् ।

परमाण्वादेः साक्ष्यवेद्यत्वे अनुमानवेद्यत्वमपि न स्यात्

यदि साक्षिमितं नैतन्नानुमा तत्र वर्तते ॥ ६३४ ॥

पक्षीकर्तुमशक्यत्वात् कुत एवानुमा भवेत् ।
यत्र नास्ति पदन्यासः कस्तं विषयमाप्नुयात् ॥ ६३५ ॥

आकाशादिपरिमाणोत्कर्षानन्त्यमपि न आनुमानिकम्

देशान्तरादिशब्दाश्च शशशृङ्गादिशब्दवत् ।
सदृशं च सजातीयं नास्मत्पक्षे किमेव हि ॥ ६३६ ॥

आगमस्य अनादरे शशशृङ्गादेरपि सिद्धिः स्यात्

येनैव च प्रकारेणात्यसिद्धमनुमीयते ।
तेनैव शशशृङ्गादेः शक्यमस्तित्वकल्पनम् ॥ ६३७ ॥

प्रत्यक्षागमावधृतमेव व्याप्त्यादि अनुमानप्रमाणाङ्गम्

प्रत्यक्षमागमो वापि भवेद्यत्र नियामकः ।
सैव व्याप्तिर्भवेन्मानं नान्या सन्दिग्धमूलतः ॥ ६३८ ॥

सहदर्शनमात्रेण न व्याप्तिरवसीयते ।
यदैवाव्यतिरेकेऽस्य ह्यक्षजं वाऽऽगमो भवेत् ॥ ६३९ ॥

तन्निर्धारितयुक्तिर्वा व्याप्तिः सैवापरा न हि ।
अन्यथा सप्तमरसभावोऽप्यनुमयाऽऽपतेत् ॥ ६४० ॥

अनिष्टानि च सर्वाणि ह्यनुमा कामचारिणी ।

ॐ उभयथाऽपि न कर्माऽतस्तदभावः ॐ ॥ २-२-१२ ॥

ॐ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॐ ॥ २-२-१३ ॥

ॐ नित्यमेव च भावात् ॐ ॥ २-२-१४ ॥

समवायस्य समवायान्तरकल्पनाप्रसङ्गप्रदर्शनेन समवायनिरासः

कार्यकारणयोश्चैव गुणादेः पञ्चकस्य च ॥ ६४१ ॥

भिन्नस्यैव तु सम्बन्धः समवायोऽन्य ईर्यते ।
भिन्नत्वसाम्यतस्तस्य ताभ्यां योगो भवेद् ध्रुवम् ॥ ६४२ ॥

स स्वनिर्वाहकश्चेत्स्याद्द्रव्यमेव तथा न किम् ।

समवाये तद्गतत्वादिविशेषाङ्गीकारे गुणक्रियादिकमपि
द्रव्यस्वरूपमेव सत् विशेषात्मकमस्तु

विशेषस्तद्गतत्वादिर्यद्यभिन्नेऽवसीयते ॥ ६४३ ॥

गुणक्रियादिरूपस्य निषेधः केन हेतुना ।

द्रव्ये गुणाद्यभेदेऽपि विशेषबलाद् भेदव्यवहारः

द्रव्यमेव ततोऽनन्तविशेषात्मतया सदा ॥ ६४४ ॥

नानाव्यवहृतेर्हेतुरनन्तत्वं विशेषतः ।

विशेषः स्वेनैव विशेषी न पुनः विशेषान्तरेण

विशेषश्च विशेषी स स्वेनैव समवायवत् ॥ ६४५ ॥

गुणगुण्यादीनां भेदे कल्पनागौरवम्

कल्पनागुरुतादोषात् पदार्थान्तरता न हि ।
कल्पयित्वा षट् पदार्थान् साभावानपि केवलम् ॥ ६४६ ॥

एकस्मिन् स विशेषश्चेत् किं पूर्वं तस्य विस्मृतिः ।

प्रत्यक्षादिप्रमाणसिद्धप्रमाणानङ्गीकारो न युक्तः

येन प्रत्यक्षसिद्धेन व्यवहारोऽखिलो भवेत् ॥ ६४७ ॥

भावाभावविभागेन यं विना न कथञ्चन ।
एतादृशे विशेषेऽस्मिन् को द्वेषो वादिनां भवेत् ॥ ६४८ ॥

साक्षी अवयवावयव्यादेः सविशेषाभेदं गृह्णाति

अभेदेन प्रतीतिश्च कार्यकारणपूर्वके ।
अभावान्ते पदार्थेऽस्ति सविशेषावसीयते ॥ ६४९ ॥

पदार्थधर्माणामाश्रयतः भेदस्य अत्यन्ताभेदस्य वा अनुपपत्तेः
सर्वपदार्थेषु विशेषोऽङ्गीकार्यः

सामान्यादिपदार्थेषु तन्निष्ठत्वादयोऽखिलाः ।
कथं धर्मा निवार्यन्ते वस्त्वैक्येऽपि हि वादिभिः ॥ ६५० ॥

कार्यस्य तत्तन्निष्ठत्वं गुणादेर्व्यापितादिकः ।
कथं विशेषो नैवास्ति

धर्माणां भेदे तेषां षट्पदार्थातिरिक्तत्वं स्यात्

स च धर्मोऽपरो यदि ॥ ६५१ ॥

षट्पदार्थातिरेकः स्यात्

षट्पदार्थनियमपरित्यागेऽपि धर्मसन्तानानवस्था स्यात्

पदार्थानियमेऽपि हि ।
धर्मस्य धर्मसन्तानादनवस्थाखनिर्भवेत् ॥ ६५२ ॥

अनवस्थाभयात् सामान्यादिषु सामान्यादिकमनङ्गीकुर्वता
प्रकृते अनवस्था न परिहर्तुं शक्यते

सामान्यस्यापि सामान्यं गुणस्यापि गुणो ह्यतः ।
नाङ्गीकृतः स च यदि नानवस्था क्वचिद्भवेत् ॥ ६५३ ॥

धर्मधर्मिणोः सविशेषाभेदवादिनामस्माकं पक्षे न अनवस्था

अस्मत्पक्षे गुणाद्याश्च तद्वन्तो हि विशेषतः ।
अनन्यत्वान्नानवस्था

अयावदाश्रयभाविनां अवयविगुणकर्मसामान्यानामवयवादिभिः भेदाभेदाभ्युपगमः

भेदो नाशो भवेत् तथा ॥ ६५४ ॥

विशेषमेव संश्रित्य

प्रमाणानुसारेण भेदाभेदौ उपेत्य विशेषेण विरोधाभावाभिधानम्

विशेषो बलवान् यतः ।
दृष्टिप्रमाणतश्चैव विरोधो दर्शने कथम् ॥ ६५५ ॥

विरोधो ह्यविरोधश्च यतो दर्शनमानकौ ।
ततो दृष्टे विरोधस्तु सद्भिरापाद्यते कथम् ॥ ६५६ ॥

धर्मधर्मिणोः सविशेषाभेदस्य भेदाभेदयोश्च तत्र तत्र व्यवस्थाप्रदर्शनम्

अभिन्नो भगवान् स्वेन तदन्येन विभेदवान् ।
नित्या धर्मास्तदीयास्तु सर्वेऽस्मान्नैव भेदिनः ॥ ६५७ ॥

सामस्त्योच्छेदिनोऽन्यत्र धर्मा उभयरूपिणः ।
भावे त एव चोच्छेदात् तदन्ये च समस्तशः ॥ ६५८ ॥

अंशानामानन्त्येऽपि अंशांशिनोरभेदेन
अंशसंयोग एव अंशिसंयोग इति न अनवस्था

अंशांशिनोरभेदेन त्वंशसंयोग एव हि ।
अंशिनो नानवस्थाऽतो यद्यप्यंशेष्वविश्रमः ॥ ६५९ ॥

एकस्मिन् जात एवान्यः संयोगो जायते यदि ।
अनवस्था तदैव स्यात् संयोगैक्ये भवेत् क सा ॥ ६६० ॥

अंशे संयोगदृष्टेश्च दृष्टे का साऽनवस्थितिः ।

संयोगस्य अंशावृत्तित्वे कार्येषु परिमाणोत्कर्षो न स्यात्

यद्यंशगो न संयोगः कार्येषु प्रथिमा कथम् ॥ ६६१ ॥

परमाणुपरिमाणाद् द्व्यणुकस्य परिमाणोत्कर्षो नास्तीति
वचः स्वव्याहतम्

परमाणोरणोर्नास्ति महत्तेत्यद्भुतं वचः ।
अणूनां प्रथिमापेक्षां विनैव त्र्यणुकेऽपि सः ॥ ६६२ ॥

परमाणोर्महत्त्वं च विनेत्येतद्वचः कथम् ।

अंशिनः सर्वैरंशैः अत्यन्ताभेदः, एकैकांशेन तु भेदाभेदौ

अंशिनोंऽशैरभेदोऽयमंशेन तु भिदाभिदा ॥ ६६३ ॥

सर्वप्रत्यक्षविषयः कथमेव ह्यपोद्यते ।

संयोगविभागपृथक्त्ववादीनां अनेकाश्रितत्वानङ्गीकारेण अवयव्यादीनामवयवादिभिरभेदे न कश्चिदतिप्रसङ्गः

संयोगश्च विभागश्च भेदश्चैव पृथक् पृथक् ॥ ६६४ ॥

अन्योन्यप्रतियोगेन ह्युभयोरपि दृश्यते ।
भिन्ना इति तु भेदानां समुदायो हि दृश्यते ॥ ६६५ ॥

यथैव च पदार्थानामनयोर्भेद इत्यपि ।
इतोऽमुष्यामुतोऽमुष्य भेदो दृष्टो द्विधर्मिकः ॥ ६६६ ॥

तत्रैकवचनं यत्तद्विप्राणां भोजनं यथा ।

नरत्वादिसामान्यमपि न अनुगतं किन्तु प्रतिव्यक्ति भिन्नम्

नरत्वादिकमप्येवं तत्तद्धर्मतयेयते ॥ ६६७ ॥

न सर्वधर्म एकोऽस्ति समुदायस्तु भिन्नगः ।

सादृश्यमपि तत्तत्पदार्थेषु भिन्नम्

एतादृशं च सादृश्यं पदार्थेषु पृथक् पृथक् ॥ ६६८ ॥

एकस्मिन् नरे नष्टे तद्गतनरत्वादेः नाशात्,
नरान्तरे दर्शनाच्च नरत्वादिकं प्रतिव्यक्ति भिन्नम्

एकस्मिन् स विनष्टेऽपि यतोऽन्यत्रैव दृश्यते ।
कुतो भस्मत्वमाप्तस्य नरत्वं पुनरिष्यते ॥ ६६९ ॥

एकत्वे नास्ति मानं च

सामान्यादीनां प्रत्याश्रयं भेदे श्रुतिः प्रमाणम्

श्रुतिरप्याह सादरम् ।
"भिन्नाश्च भिन्नधर्माश्च पदार्था निखिला अपि ॥ ६७० ॥

स्वैः स्वैर्धर्मैरभिन्नाश्च स्वरूपैरपि सर्वशः ।
अनिवृत्तविनाशास्तु धर्मा उभयरूपकाः ॥ ६७१ ॥

न केनचिदभिन्नोऽतो भगवान् स्वैर्गुणैर्विना ।"

गोत्वादिसामान्यस्य अनेकवृत्तित्वाभावे गोशब्दसङ्गतिग्रहणलक्षणव्युत्पत्तिः
न स्यादित्याक्षेपो न युक्तः, सादृश्येन व्युत्पत्तेः सम्भवात्

इति व्युत्पत्तिरपि हि सादृश्येनैव गम्यते ॥ ६७२ ॥

सर्वेषु युगपच्छब्दः सदृशेषु प्रवर्तते ।
तथापि प्रासितस्त्वेकवचनाच्च विशेषतः ॥ ६७३ ॥

अभीष्टावगतिश्च स्याच्छक्तिः सादृश्यगा यतः ।
तादृशोऽयं च तच्छब्द इति ज्ञापयति स्फुटम् ॥ ६७४ ॥

अनुगतसामान्यस्यैव व्युत्पादकत्वे
जाति-व्यक्ति-स्वरूपेत्यादि सामान्यरहितशब्दानां व्युत्पत्तिः न स्यात्

जातितश्चेत् कथं तासु तत्र चेदनवस्थितिः ।
तथैव व्यक्तिविज्ञानं व्यक्तित्वाभावदूषितम् ॥ ६७५ ॥

यदि तच्चास्ति तस्यापि विशेषेष्वनवस्थितिः ।
कथं स्वरूपत्वमपि ज्ञायतेऽनुगतं यदि ॥ ६७६ ॥

एकव्युत्पत्तिपर्यन्तमनवस्थादिदूषितम् ।

अनुगतसामान्यदूषणोपसंहारः

कल्पनागौरवात् तेन युक्ता नानुगकल्पना ॥ ६७७ ॥

समवायस्य एकत्वनिरासः

औपाधिकविशिष्टाद्यमपि तद्वस्तु किं ततः ।
अन्यत्तदेव चेदग्निमत्त्वं किं तत्र भण्यते ॥ ६७८ ॥

अग्निसंयोगमात्रं चेद्भवेत् तत्सिद्धसाधनम् ।
भूधरस्याग्निसंयोगो यदि षष्ठ्यर्थ एव कः ॥ ६७९ ॥

समवायो यदि ह्यस्य चैकत्वात् सिद्धसाधनम् ।
यद्यस्यौपाधिको भेदः कुत एकत्वमिष्यते ॥ ६८० ॥

नानिर्वाच्यं हि तेनेष्टमत औपाधिकान्ययोः ।
सत्यत्वात् को विशेषः स्यान्मायावाद्यन्यथा भवेत् ॥ ६८१ ॥

उपाधिजन्यं तद्रम्यमिति चौपाधिकं भवेत् ।
उभयत्राप्यनन्ताः स्युः समवाया इतस्ततः ॥ ६८२ ॥

भिन्नत्वं चैव तेष्वस्ति को विशेष उपाधिगे ।
अविद्यमान एवान्यः समवायोऽधिगम्यते ॥ ६८३ ॥

उपाधिना तद्गमकमनुमानं न मा भवेत् ।

समवायस्य नित्यत्वनिरासः

एवमेवासतः सत्तासमवायो जनिर्मता ॥ ६८४ ॥

तत्रापि ह्युक्तदोषाणां नैव किञ्चिन्निवारकम् ।

अस्मत्पक्षे विशिष्टादिनिरूपणे जनिनिरूपणे च नोक्तदोषप्रसङ्गः

अस्मत्पक्षे विशेषस्य सर्वत्राङ्गीकृतत्वतः ॥ ६८५ ॥

नास्ति दोषः क्वचिद्भावो ह्यभावश्च स एव हि ।

अभावभावयोः भावाभावधर्मवत्त्वं, निषेधविधिबुद्धिविषयत्वं च

अभावस्य च धर्माः स्युर्भावास्तेषां च तेऽखिलाः ॥ ६८६ ॥

प्रत्यक्षमानतः सर्वमेतन्नो वारणक्षमम् ।
सर्वे भावा अभावाश्च पदार्थास्तेन सर्वदा ॥ ६८७ ॥

तथापि प्रथमं बुद्धेर्यो निषेधस्य गोचरः ।
सोऽभावो विधिबुद्धेस्तु गोचरः प्रथमं परः ॥ ६८८ ॥

तस्मात् प्रध्वस्तभेदादि सदित्येवावगम्यते ।
अस्त्यभावोऽस्ति च ध्वंसो देहाभावश्च भस्मता ॥ ६८९ ॥

इत्यादि युज्यते सर्वं प्रत्यक्षादिप्रमाणतः ।

अन्योन्याभावभेदपृथक्त्वानां न परस्परं भेदः

अन्योन्याभावभेदौ च पृथक्त्वं च पृथक् पृथक् ॥ ६९० ॥

यत्कल्पयन्ति तच्चैव कल्पनागौरवाद्गतम् ।
पर्यायत्वेन ते शब्दा ज्ञायन्ते सर्व एव हि ॥ ६९१ ॥

भेदस्य धर्मिस्वरूपत्वं सर्वशून्यत्वापत्तिरित्याक्षेपनिरासः

भेदस्य तु स्वरूपत्वे ये वदन्ति च शून्यताम् ।
अद्भुतास्ते यतोऽन्यस्य प्रतियोगित्वमिष्यते ॥ ६९२ ॥

प्रतियोगिनो हि भेदोऽयं न तु स्वस्मात् कथञ्चन ।
विभागेनाल्पतैव स्यात् कुत एव तु शून्यता ॥ ६९३ ॥

न शून्यानां हि संयोगाद्भावो वस्तुन इष्यते ।
विदारणार्थो धातुश्च विभागगुणवाचकः ॥ ६९४ ॥

अविदारणेऽपि ह्यास्यस्य भिन्नावोष्ठौ च तस्य च ।
अत उन्मत्तवाक्यत्वान्मायावादो ह्युपेक्षितः ॥ ६९५ ॥

ईश्वरो न अष्टगुणः, किन्तु अनन्तगुणार्णवः

न चामन्दसदानन्दस्यन्द्यनन्तगुणार्णवः ।
ईश्वरोऽष्टगुणत्वेन प्रमेयोऽप्रमितत्वतः ॥ ६९६ ॥

"मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे ।"
"अनन्तगुणमाहात्म्यशक्तिज्ञानमहार्णवः ॥ ६९७ ॥

नारायणः परोऽशेषचेतनेभ्यः परं पदम् ।"
इत्यादिवेदतद्वाक्यैरनन्तैश्चावसीयते ॥ ६९८ ॥

अनन्तगुणता विष्णोः कथमेव ह्यपोद्यते ।
यद्यनन्तविशेषाश्च तज्ज्ञानादेर्निवारिताः ॥ ६९९ ॥

कथं तत्तद्विषयता सार्वज्ञार्थं विधीयते ।
औपाधिकविशेषस्तु पूर्वमेव निराकृतः ॥ ७०० ॥

ईश्वरज्ञानस्य स्वप्रकाशत्वसमर्थनम्

स्वप्रकाशत्वमपि तु यैर्ज्ञानस्य निवारितम् ।
कथं सर्वज्ञता तस्य स्वज्ञानाधिगमं विना ॥ ७०१ ॥

ज्ञानं विश्वाधिगं त्वेकं तज्ज्ञानविषयं परम् ।
इति ज्ञानद्वयेनैव सर्ववित्परमेश्वरः ॥ ७०२ ॥

इति चेदेष एवार्थस्तज्ज्ञानावसितो यदि ।
स्वप्रकाशत्वमेव स्याज्ज्ञानं ह्येतद्विशेषणम् ॥ ७०३ ॥

ज्ञानान्तरेण चेदत्र भवेदेवानवस्थितिः ।
स्वप्रकाशत्वमेतस्माद्दुर्निवारं समापतेत् ॥ ७०४ ॥

ईश्वरे दुःखाभावेन सुखाभावसाधनं न युक्तम्

सुखवान् दुःखवांश्च स्यादिति व्याप्तिश्च नो भवेत् ।
निर्दुःखत्वं महानन्दः श्रुत्यैवेशस्य भण्यते ॥ ७०५ ॥

योऽशनायापिपासे च शोकादींश्चातिवर्तते ।
आनन्दं ब्रह्मणो विद्वान् विपाप्मेत्यादिका च सा ॥ ७०६ ॥

ईश्वरस्य तथेष्टत्वं दुःखित्वोपाधिरित्यपि ।
उक्ते किमुत्तरं ब्रूयात् श्रुत्यनादरतत्परः ॥ ७०७ ॥

न चात्मदुःखितेच्छा स्यादत एतन्निवार्यते ।
सहदर्शनमात्रेण श्रुतीनामपलापकः ॥ ७०८ ॥

यज्ञादेरपि पापस्य हेतुत्वं हिंसया युतेः ।
नानुमाति कथं तत्र यद्युपाधिर्निषिद्धता ॥ ७०९ ॥

अदुःखित्वेन चानुक्तिः कथं नोपाधितां व्रजेत् ।
"अदुःखमितरत् सर्वं जीवा एव तु दुःखिनः ॥ ७१० ॥

तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तते ।"
इति श्रुतिर्हि परमा श्रुत्युक्तिर्यदि कारणम् ॥ ७११ ॥

किं कार्यमनुमानेन गलस्तनसमेन हि ।
अनुमानेन यद्यर्थः श्रुतिदृष्टोऽप्यपोद्यते ॥ ७१२ ॥

पूर्वोक्तेन प्रकारेण नेश्वरो धर्म एव च ।
स्यात् तत्फलं च तेनात्र श्रुतिरेव प्रमा भवेत् ॥ ७१३ ॥

ईशस्यानुमया सिद्धेः श्रुतिर्धर्मिप्रमा भवेत् ।
तया सर्वगुणैः पूर्ण ईश उक्तो यतस्ततः । ॥ ७१४ ॥

अनानन्दानुमानस्य धर्मिग्राहिविरोधतः ।
न प्रमाणं भवेत् तस्मान्नानुमात्रोपयोगिनी ॥ ७१५ ॥

वैशेषिकमते कालभेदानङ्गीकारेण ईश्वरेच्छादिकारणानां सर्वदा सत्त्वेन सर्वदा कार्योत्पत्तिप्रसङ्गः

नित्येच्छत्वात् परेशस्य परमाणुसदात्वतः ।
अदृष्टकालयोश्चैव भावात् कार्यं सदा भवेत् ॥ ७१६ ॥

न हि कालविभेदोऽस्ति तत्पक्षे

अस्मन्मते कालविशेषे उत्पत्तेरेव ईश्वरेच्छाविषयत्वेन न सर्वदा कार्योत्पत्तिः

अस्मन्मते हरेः ।
विशेषकाल एवैतत्सृष्ट्यादीच्छा सदातना ॥ ७१७ ॥

कालविशेषाः ईश्वरजन्याः

विशेषाश्चैव कालस्य हरेरिच्छावशाः सदा ।
"सर्वे निमेषा" इति हि श्रुतिरेवाह सादरम् ॥ ७१८ ॥

उदीरयति कालाख्यां शक्तिमित्यस्य वागपि ।
कालस्य कालगत्वेन न विरोधोऽस्ति कश्चन ॥ ७१९ ॥

ईश्वरेच्छायाः सर्वदा विद्यमानत्वेऽपि शक्तिव्यक्तिरूपावस्थितसिसृक्षात्वादिविशेषवत्त्वात् सृष्ट्यादेः समयनियमः

असङ्ख्यातविशेषत्वादिच्छाया अपि सर्वदा ।

कालः स्वगतः ईश्वराधीनश्च

"ईशो देशश्च कालश्च स्वगता एव सर्वदा ॥ ७२० ॥

ईशाधीनौ च तौ नित्यं तदाधारौ च तद्गतौ ।"
इति श्रुतिरपि प्राह काले स्वोद्दिष्ट एव तु ॥ ७२१ ॥

तत्कालसृष्टिमेवातो वाञ्छतीशः सदैव हि ।
स्यात् कालः स तदैवेति कालस्य स्वगतत्वतः ॥ ७२२ ॥

ईश्वरेच्छायां सिसृक्षात्वादिवैचित्र्यं स्वभावादेव

स्वभावादेव हीच्छैषा "देवस्यैष" इति श्रुतेः ।

कारणानां कार्याणां च स्वभावोऽपि ईश्वराधीन एव

स्वभावोऽपि परेशेच्छावश इत्युदितः पुरा ॥ ७२३ ॥

नित्या अनित्याश्च ततस्तदधीना इति श्रुतिः ।

ॐ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॐ ॥ २-२-१५ ॥

ॐ उभयथा च दोषात् ॐ ॥ २-२-१६ ॥

वैशेषिकमते रूपादिमत्त्वेन परमाणूनामनित्यत्वमेव स्यात्

रूपस्पर्शादिहेतुभ्यः परमाणोरनित्यता ॥ ७२४ ॥

अनुमेया

ॐ अपरिग्रहाचात्यन्तमनपेक्षा ॐ ॥ २-२-१७ ॥

'आत्मन आकाशः' इत्यादिश्रुतिविरुद्धत्वेन वैशेषिकमतमनुपादेयमिति
विष्णौ सर्वशब्दसमन्वयं नास्ति, तद्विरोधः

श्रुतीनां च विरुद्धत्वान्न तन्मतम् ।
उपादेयमतश्चायमविरुद्धः समन्वयः ॥ ७२५ ॥

॥ इति वैशेषिकाधिकरणम् ॥ ६ ॥

* * *

॥ समुदायाधिकरणम् ॥

ॐ समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॐ ॥ २-२-१८ ॥

सौगतमतनिरासः, वैभाषिकसौत्रान्तिकमतानुवादः

वैभाषिकाश्च सौत्रान्ताः स्वरसक्षणिकं जगत् ।
अणूनां समुदायं च कालकर्मनिमित्ततः ॥ ७२६ ॥

उत्पत्तिकाले युक्तागामात्मानं च क्षणस्थितम् ।
नित्यं सन्तानमेतेषां पञ्चस्कन्धात्मना स्थितम् ॥ ७२७ ॥

संस्काररूपविज्ञानसंज्ञादुःखात्मना स्थितिः ।
दुःखाभावं सुखं चाहुररूपज्ञानसन्ततिम् ॥ ७२८ ॥

मोक्षं

परमाणुसमुदाय एव गोघटादिप्रपञ्चः,
न त्ववयवी कश्चिदस्तीति तन्मतस्य निरासः

स समुदायो हि नैकस्मादेव युज्यते ।
नोभयोश्चोभयत्वं यत्समुदायव्यपेक्षया ॥ ७२९ ॥

अतोऽन्योन्याश्रयत्वेन समुदायो न युज्यते ।

ॐ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॐ
॥ २-२-१९ ॥

अन्योन्यापेक्षया पुंसः समुदायत्ववेदनम् ॥ ७३० ॥

स्यात् तत्सदातनत्वेऽपि तच्च सामीप्यहेतुकम् ।
इति चेत्कार्यसम्भूतिमात्रव्यापृतिकारणम् ॥ ७३१ ॥

न तु कार्यविशेषेषु व्यापृतं कारणं भवेत् ।
अतोऽर्थेन्द्रियसंयोगिरूपकारणतात्मनः ॥ ७३२ ॥

संयोगिरूपराहित्यान्नैव तज्ज्ञानतापि हि ।
विशेषकार्यजनकं यदि कारणमिष्यते ॥ ७३३ ॥

कुतः समानरूपत्वं कार्याणामपि सर्वशः ।
अतोऽनियत्या यत्किञ्चिद्यस्य कस्यापि कारणम् ॥ ७३४ ॥

अदृष्टमपि तस्यैव विशेषापादकं कुतः ।
यस्य कस्यापि यत्किञ्चिद्विशेषमुपपादयेत् ॥ ७३५ ॥

कार्यं च कारणं चैव यत्किञ्चिद्यस्य कस्यचित् ।
भवेन्नियामकाभावादिदमस्यैव कारणम् ॥ ७३६ ॥

इति नित्यविनाशित्वे केन मानेन गम्यते ।
इदं न जायतेऽमुष्मादित्यत्रापि न कारणम् ॥ ७३७ ॥

ॐ उत्तरोत्पादे च पूर्वनिरोधात् ॐ ॥ २-२-२० ॥

ॐ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॐ
॥ २-२-२१ ॥

ॐ प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात् ॐ ॥ २-२-२२ ॥

ॐ उभयथा च दोषात् ॐ ॥ २-२-२३ ॥

ॐ आकाशे चाविशेषात् ॐ ॥ २-२-२४ ॥

ॐ अनुस्मृतेश्च ॐ ॥ २-२-२५ ॥

सर्वक्षणिकतावादनिरासः

विनाशोत्पत्तयश्चैव न दृश्यन्ते सदातनाः ।
दृश्यते प्रत्यभिज्ञातः स्थिरत्वं सर्ववस्तुषु ॥ ७३८ ॥

फलादीनां विशेषेण सर्वत्राप्यनुमीयते ।
सत्त्वेन क्षणिकत्वं चेदाकाशस्याविशेषतः ॥ ७३९ ॥

अविशेषोऽखिलस्यापि सत्त्वात् किं नानुमीयते ।
यद्याकाशस्य सत्त्वं न कुत एव नरादिषु ॥ ७४० ॥

सधर्मिप्रतियोगित्वमभावस्य नियामकम् ।
तौ विना न ह्यभावश्च क्वचिद्दृष्टः कदाचन ॥ ७४१ ॥

अधर्मिप्रतियोगित्वमाकाशस्यावगम्यते ।
स्वीकारत्यागतोऽदृष्टदृष्टयोः सर्ववस्तुषु ॥ ७४२ ॥

गुणानुन्मत्त एवासौ विदधात्यधिकं पुनः ।
उत्तरोत्पत्तिमात्रेण विनाशात् पूर्ववस्तुनः ॥ ७४३ ॥

न संस्कारार्पकत्वं च युज्यते कस्यचित् क्वचित् ।
अतो ज्ञातं मयेत्यादि न ज्ञेयमनुमा कुतः ॥ ७४४ ॥

एकत्वमनुभूतिस्थं त्यक्त्वा निर्मानिका भिदा ।
कुत आत्मादिकेषु स्याद्बल्येवानुभवो यतः ॥ ७४५ ॥

कार्यकारणयोश्चैककालीनत्वं विना कथम् ।
पूर्वसंस्कारयोगी स्यादुत्तरो नियमेन च ॥ ७४६ ॥

सम्बद्धा एव संस्कारमन्यत्रादधतेऽखिलाः ।
असम्बद्धः कथं पूर्व उत्तरे वासनाकरः ॥ ७४७ ॥

एककालतया योगं विना(ऽ)संस्कारतः कथम् ।
क्षणमात्रमवस्थानं स्वीकृतं सर्ववस्तुषु ॥ ७४८ ॥

पूर्वमध्यापरकलाविकलः क्षण इष्यते ।
पूर्वभावभवं कार्यमुत तन्नाशसम्भवम् ॥ ७४९ ॥

यौगपद्यं सति भवेदुत्पाद्यानामशेषतः ।
विनाशे चेन्न तत्कार्यं कार्योत्पत्तौ च का प्रमा ॥ ७५० ॥

अभेदेऽपि विशेषेण देहदीपफलादिषु ।
विशेषदर्शनं युक्तमस्माकमनुभूतितः ॥ ७५१ ॥

विशेषदर्शनं मानं यदि न स्थैर्यदृक्कुतः ।
दिक्सुखे च खदृष्टान्ताद्भावौ सच्चेत् क्वचिद्भवेत् ॥ ७५२ ॥

ज्ञानातिरिक्तः सर्वोऽपि रूपादिप्रपञ्चोऽनुमेव इति सौत्रान्तिकसिद्धान्तविशेषस्य दुर्बलत्वात्
स्फुटतरानल्पदोषवत्त्वाच्च सूत्रे न निरासः

विश्वं प्रत्यक्षगं त्यक्त्वा तयोर्योऽनुमितं वदेत् ।
मायावादिवदेवासावुपेक्ष्यो भूतिमिच्छता ॥ ७५३ ॥

सर्वप्रमाणसिद्धं यद्बुद्धेर्भेदेन सर्वदा ।
कथं नु तस्य बुद्धित्वं विश्वमन्यच्च किम्प्रमम् ॥ ७५४ ॥

सर्वलोको बिभेत्यज्ञो यस्मादनुभवात् सदा ।
तस्यापलापिनः किं न निष्प्रमाणकवादिनः ॥ ७५५ ॥

सोऽहं तदिदमेवाहं सुखी सद्गगनं दिशः ।
सत्या इत्याद्यनुभवाः सदा तत्प्रतिपक्षगाः ॥ ७५६ ॥

वैभाषिकसौत्रान्तिकमतनिराकरणोपसंहारः

अतो निर्मानमखिलप्रमाणप्रतिपक्षगम् ।
दुर्मतं कोऽनुगृह्णीयाद्विनाऽसुरततिं क्वचित् ॥ ७५७ ॥

॥ इति समुदायाधिकरणम् ॥ ७ ॥

* * *

॥ असदधिकरणम् ॥

ॐ नासतोऽदृष्टत्वात् ॐ ॥ २-२-२६ ॥

माध्यमिकमतनिरासः

शून्यमेव तत्त्वं, जगतः सांवृतसत्यत्वमिति तन्मतानुवादः

अपरः शून्यमखिलं मनोवाचामगोचरम् ।
निर्विशेषं स्वयम्भातं निर्लेपमजरामरम् ॥ ७५८ ॥

अशेषदोषरहितमनन्तं देशकालतः ।
वस्तुतश्च तदस्मीति नित्योपासापरोक्षितम् ॥ ७५९ ॥

रागादिदोषरहितं तद्भावं योगिनं नयेत् ।
तस्यैवानादिसंवृत्या नानाभेदात्मकं जगत् ॥ ७६० ॥

सदिवाभाति सत्यत्वं सांवृतं तस्य चेष्यते ।
पारमार्थिकसत्यत्वं शून्यादन्यस्य न क्वचित् ॥ ७६१ ॥

सांवृतेनैव सत्त्वेन व्यवहारोऽखिलो भवेत् ।
शून्यात् संवृतियोगेन विश्वमेतत् प्रवर्तते ॥ ७६२ ॥

सृष्टिकाले पुनश्चान्ते स्तिमितं शून्यतां व्रजेत् ।
इति ब्रूते

ॐ नासतोऽदृष्टत्वात् ॐ ॥ २-२-२६ ॥

असतः शून्यस्य जगत्कारणत्वनिरासः

तमुद्दिश्य जगाद जगतां गुरुः ॥ ७६३ ॥

नासतो जगतो भावो न हि दृष्टासतो जनिः ।
सतः क्वचित् प्रमाणं च दृष्टिरेवाखिलाद्धरम् ॥ ७६४ ॥

ॐ उदासीनानामपि चैवं सिद्धिः ॐ ॥ २-२-२७ ॥

यद्येवं सप्तमरसान्मधुरादिव पीनता ।
भवेज्जनस्य मार्जारशृङ्गं गोरिव घातकम् ॥ ७६५ ॥

कार्यार्थी कारणं सच्च नोपादद्यात् कथञ्चन ।
न प्रवर्तेत चेष्टाय शून्यादेवेष्टसम्भवात् ॥ ७६६ ॥

देशकालादिनियमो न हि शून्यात् सतो भवेत् ।
पुरुषेच्छानुसारेण यदि किञ्चित्प्रजायते ॥ ७६७ ॥

किं नानुमीयते तद्वद्वस्तुत्वात्पुरुषोद्भवः ।
सर्वस्यापि

ॐ नाभाव उपलब्धेः ॐ ॥ २-२-२८ ॥

विश्वस्य असत्त्वोक्तिनिरासः

न चाभावो विश्वं सदिति गम्यते ॥ ७६८ ॥

यतोऽनुभवविरोधे तु वचनं वादिनः कुतः ।

विश्वस्य स्वप्नभ्रान्तिसमत्वनिरासः

स्वप्नभ्रान्तिवदेवेदं संवृत्यैवोपलभ्यते ॥ ७६९ ॥

यदि सत्त्वेन

ॐ वैधर्म्याच्च न स्वप्नादिवत् ॐ
॥ २-२-२९ ॥

किञ्चात्र भ्रमो नैव निवर्तते ।

अनादेरस्य विश्वस्य निवृत्तिर्यदि चेष्यते ॥ ७७० ॥

निवृत्तिश्च निवर्तेत तस्या भ्रान्तित्वसम्भवात् ।
दृष्टस्य भ्रान्तितो चेत् स्याददृष्टे न भ्रमः कुतः ॥ ७७१ ॥

गवामशृङ्गिभावेन न हि स्याच्छशशृङ्गिता ।

सतः कारणत्ववादिनां नैते दोषाः

अस्माकं तु प्रमाणेन प्रसादादीश्वरस्य च ॥ ७७२ ॥

उक्तभङ्ग्यागमानां च प्रामाण्याद्युज्यतेऽखिलम् ।

मिथ्यात्वसाधकानुमाननिरासः

दृश्यत्वाद्विमतं मिथ्या स्वप्नवच्चेदियं च मा ॥ ७७३ ॥

मिथ्या चेत् साध्यसिद्धिर्न व्यभिचारो न चेद्भवेत् ।
साधकत्वमसत्यस्य साध्यं विप्रतिपत्तितः ॥ ७७४ ॥

तस्य चेत्यनवस्था स्यात् सत्त्वं चास्यानुभूतितः ।
अनुभूतिविरोधेन मिथ्यात्वे मा न काचन ॥ ७७५ ॥

साक्षिणा प्रत्यक्षविषयस्य त्रैकालिकाबाध्यत्वरूपसत्त्वं गृह्यते

अतीतानागतौ कालावपि नः साक्षिगोचरौ ।
तत्सम्बन्धितया सत्त्वमपि दृष्टस्य साक्षिगम् ॥ ७७६ ॥

दृढदृष्टं तु यद्दृष्टं दृष्टाभासस्ततोऽपरम् ।

दृश्यत्वाद्यनुमानानां सत्प्रतिपक्षत्वम्

भ्रान्तेः संवृतिसत्यस्य विशेषो व्यभिचारवान् ॥ ७७७ ॥

तेनाप्यङ्गीकृतः सम्यक् स नः सत्यत्वमेव हि ।
विज्ञानाद्व्यभिचारोऽस्य कदाचित् स्यादिति प्रमा ॥ ७७८ ॥

नैव दृष्टा प्रमा सा च न भवेत् स्वविरोधतः ।

अनेकभेदभिन्नस्य प्रपञ्चस्य प्रत्यक्षत्वं सम्भवति, भेदस्यापि प्रत्यक्षत्वं सम्भवति, भेदस्य धर्मिस्वरूपत्वात् न अन्योन्याश्रयदोषः, अतः प्रपञ्चस्य न सांवृतत्वम्

भेदो विशेष्यधर्म्यादिग्रहणापेक्षया यदि ॥ ७७९ ॥

अन्योन्याश्रयताहेतोर्दुर्ग्राह्य इति यन्न तत् ।
स्वरूपं वस्तुनो भेदः यन्न तस्य ग्रहेऽग्रहः ॥ ७८० ॥

अन्यथाऽस्यामुना भेद इति वक्तुं न शक्यते ।
अगृहीतो यदा भेदस्तदा स्वस्मादिति ग्रहः ॥ ७८१ ॥

स्यात् प्रतीतिविरोधाच्च न हि कश्चित् तथा वदेत् ।

भेदस्य धर्मिस्वरूपत्वमनङ्गीकुर्वतां मतेऽपि न अन्योन्याश्रयः

धर्मित्वप्रतियोगित्वतद्भेदा युगपद्यदि ॥ ७८२ ॥

विशेषणं विशेष्यं च तद्भावश्चैव गृह्यते ।
को विरोधः स्वरूपेण गृहीतो भेद एव तु ॥ ७८३ ॥

अस्यामुष्मादिति पुनर्विशेषेणैव गृह्यते ।

अहेतुप्रसङ्गनित्यसमजात्युत्तरेण माध्यमिकमायावादिनौ निराकरोति

किञ्च भेदः कथं ग्राह्य इति यः परिपृच्छति ॥ ७८४ ॥

धर्म्यादिभेदग्रहणात् तेनोक्तोऽन्योन्यसंश्रयः ।
अन्यत्वाग्रहणे प्रोक्तः कथमन्योन्यसंश्रयः ॥ ७८५ ॥

अन्यत्वं यदि सिद्धं स्यात् कथमन्योन्यसंश्रयः ।
एतादृशस्य वक्तारावुभौ जात्युत्तराकरौ ॥ ७८६ ॥

मायी माध्यमिकश्चैव तदुपेक्ष्यौ बुभूषुभिः ।

शून्यवादमायावादयोः नैव वैलक्षण्यम्

यच्छून्यवादिनः शून्यं तदेव ब्रह्म मायिनः ॥ ७८७ ॥

न हि लक्षणभेदोऽस्ति निर्विशेषत्वतस्तयोः ।
अनृतादिविरोधित्वमुभयोश्च स्वलक्षणम् ॥ ७८८ ॥

मिथ्याभूतस्य असाधकत्वं स्फुटत्वात्सूत्रे नोक्तम्

स्ववाक्याभावसंवादान्न कृत्यं प्रतिवादिनः ।
तत्पक्ष इति वैधर्म्यान्न स्वप्नादिवदित्यजः ॥ ७८९ ॥

अप्रयत्नान्निराचक्रे

'वैधर्म्याच्चे'ति चकारेण प्रपञ्चमिथ्यात्वस्य प्रत्यक्षविरुद्धत्वं
निष्प्रमाणत्वं च सूचितम्

चेति दृष्टिविरुद्धताम् ।
निष्प्रमाणत्वमप्यस्य सूचयामास विश्वकृत् ॥ ७९० ॥

॥ इति असदधिकरणम् ॥ ८ ॥

* * *

।। अनुपलब्ध्यधिकरणम् ।।

ॐ न भावोऽनुपलब्धेः ॐ ।। २-२-३० ।।

योगाचारमतनिरासः

ज्ञानमेवैकमखिलज्ञेयाकारं प्रभासते ।
तत्र सन्ततिभेदश्च स्वभेदो भेद एव च ।। ७९१ ।।

कल्पिताः प्रतिभासन्ते नानासंवृतिभूमिषु ।
इत्येतदपि नो युक्तं न हि ज्ञानतया जगत् ।। ७९२ ।।

भासतेऽनुभवस्यैव विरुद्धत्वादपेशलम् ।
तन्मतं

ॐ क्षणिकत्वाच्च ॐ ।। २-२-३१ ।।

स्थिरस्य जगतः क्षणिकज्ञानेन अभेदः न युज्यते

क्षणिकत्वाच्च ज्ञानस्य स्थिररूपतः ।। ७९३ ।।

ज्ञेयस्योक्तप्रकारेण

ॐ सर्वथानुपपत्तेश्च ॐ ।। २-२-३२ ।।

सर्वश्रुतिविरुद्धत्वात् सर्वे बौद्धपक्षाः न युक्ताः

सर्वश्रुतिविरोधतः ।
अनुभूतिविरुद्धत्वादपि पक्षा इमेऽशिवाः ।। ७९४ ।।

।। इति अनुपलब्ध्यधिकरणम् ।। ९ ।।

* * *

॥ नैकस्मिन्नधिकरणम् ॥

ॐ नैकस्मिन्नसम्भवात् ॐ ॥ २-२-३३ ॥

जैनमतनिरासः

आह क्षपणको विश्वं सदसद्द्वयमद्वयम् ।
द्वयाद्वयमतत्सर्वं सप्तभङ्गि सदातनम् ॥ ७९५ ॥

सप्तभङ्गीनिरासः

नैतत्पदार्थ एकस्मिन् युक्तं दृष्टिविरोधतः ।
भावाभावतया विश्वं येन रूपेण मीयते ॥ ७९६ ॥

तद्रूपमेव तदिति नियमः केन वार्यते ।
तत्तद्दोषनिवृत्त्यर्थं स्वीकृता तत्तदात्मता ॥ ७९७ ॥

यदि तैरखिलैर्दोषैर्लिप्यते चलदर्शनः ।
अतिहाय प्रमाणाप्तनियमं सदसत्तया ॥ ७९८ ॥

अशेषमाविरुद्धं च निर्मानं व्याहतं सदा ।
सर्वप्रकारं वदतो दृष्टहानिरमग्रहः ॥ ७९९ ॥

स्वव्याहतत्वमित्याद्या दोषाः सर्वे भवन्ति हि ।

ॐ एवं चात्माकात्स्र्न्यम् ॐ ॥ २-२-३४ ॥

ॐ न च पर्यायादप्यविरोधो विकारादिभ्यः ॐ ॥ २-२-३५ ॥

आत्मनः कायपरिमाणत्वनिरासः

वक्ति स्वप्रभमात्मानं देहमानं तदप्यलम् ॥ ८०० ॥

दुष्टं नानाशरीरेषु प्रवेशादन्यथाभवात् ।

आत्मनः स्थूलसूक्ष्मशरीरेषु प्रवेशात् स्थूलसूक्ष्मपरिमाणोपजनने
अनित्यत्वापत्तिः

अन्यथाभावि यद्वस्तु तदनित्यमिति स्थितिः ॥ ८०१ ॥

तन्मते तदनित्यत्वं पुद्गलस्यानिवारितम् ।
नानित्यतास्मत्पक्षे तु चैतन्यादेर्विशेषिणः ॥ ८०२ ॥

लक्षणस्य निवृत्तौ तु स्यान्न तच्चेतने क्वचित् ।
ओतप्रोतात्मकत्वं तु पटे देहेऽङ्गसंस्थितिः ॥ ८०३ ॥

इत्यादिलक्षणस्यैव निवृत्तौ स्यादनित्यता ।
भौतिकं त्वेव रूपादि व्याप्तं नाशेन नो मते ॥ ८०४ ॥

नैवं तस्यान्यथाभावो यस्यानित्यत्वमीरितम् ।
रूपादियुक्तस्य तथा जगन्नाशित्वसिद्धये ॥ ८०५ ॥

व्याप्त्या तयान्यथाभावादात्मनोऽनित्यता भवेत् ।

ॐ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषात् ॐ
॥ २-२-३६ ॥

सन्ततोर्ध्वगतेर्मुक्तित्वे आत्मनः विकृतिः अनित्यत्वं च स्यात्

नित्योर्ध्वगतिरप्येषा या मुक्तिरिति कथ्यते ॥ ८०६ ॥

अलोकाकाशमाप्तस्य कथं न विकृतिश्च सा ।
कीदृशश्चान्यथाभावो नाशहेतुतयेष्यते ॥ ८०७ ॥

संस्थानापगमश्चेत् स न हि भूसागरादिषु ।
यः कश्चिदन्यथाभावो यदि मुक्तिश्च तादृशी ॥ ८०८ ॥

स्थावराणामनात्मत्वनिरासः

देहमाने विकारः स्यादिति स्थास्नूननात्मनः ।
आह हस्त्यादिदेहेषु ह्यपि स्यादन्यथाभवः ॥ ८०९ ॥

अणुदेहस्य जीवस्य गजत्वे विकृतिर्हि या ।
देहव्याप्तौ विशेषः कस्तस्याः स्थास्नुतनौ च नुः ॥ ८१० ॥

वृक्षादीनां सेन्द्रियत्वं सात्मकत्वं च

गीतात्पुष्पफलावाप्तिः स्पर्शात् कार्श्यं रसात् स्थितिः ।
अपि वृक्षस्य दृश्यन्त इति नानात्मता भवेत् ॥ ८११ ॥

एवं चात्माकात्स्न्र्यमिति तत एवाह वेदवित् ।

॥ इति नैकस्मिन्नधिकरणम् ॥ १० ॥

* * *

॥ पत्युरधिकरणम् ॥

ॐ पत्युरसामञ्जस्यात् ॐ ॥ २-२-३७ ॥

पाशुपतमतनिरासः, तन्मतानुवादः

सर्वज्ञत्वादिकैः सर्वैर्गुणैरुक्तं सदाशिवम् ॥ ८१२ ॥

जगद्विचित्ररचनाकर्तारं दोषवर्जितम् ।
आहुः पाशुपताः

पशुपतेः दोषित्वश्रवणात् तस्य जगत्कारणत्वादिकं नोपादेयम्

तच्च बहुश्रुतिविरोधतः ॥ ८१३ ॥

नोपादेयं मतं ह्यस्य देवस्य स्तुहि गर्तगम् ।
उत्पिपेष शिरस्तस्य गृणीषे सत्पतिं पदम् ॥ ८१४ ॥

यद्विष्णोरुपमं हन्तुं रुद्रमाकृष्यते मया ।
धनुर्यं कामये तं तमुग्रं मा शिश्नदेवताः ॥ ८१५ ॥

घ्नञ्छिश्नदेवानेकोऽसावासीन्नारायणः परः ।
तस्माद्रुद्रः सम्प्रसादश्चाभूतां वैष्णवं मखम् ॥ ८१६ ॥

यज्ञेन यज्ञमयजन्ताबध्नन् पुरुषं पशुम् ।
यो भूतानामधिपती रुद्रस्तन्तिचरो वृषा ॥ ८१७ ॥

इत्यादिश्रुतिसामर्थ्यात् पारतन्त्र्यं जनिर्मृतिः ।
पराधीनपदप्राप्तिरज्ञत्वं प्रलयेऽभवः ॥ ८१८ ॥

प्रतीयन्ते सदोषत्वान्नेशः पशुपतिस्ततः ।

ॐ सम्बन्धानुपपत्तेश्च ॐ
॥ २-२-३८ ॥

तन्मते शिवस्य अशरीरत्वेन न जगत्कर्तृत्वम्

अशरीरत्वतस्तस्य सम्बन्धो जगता क्वचित् ॥ ८१९ ॥

कर्तृत्वेन न युज्येत देहिनो ज्ञानदृष्टितः ।

ॐ अधिष्ठानानुपपत्तेश्च ॐ ॥ २-२-३९ ॥

ॐ करणवच्चेन्न भोगादिभ्यः ॐ ॥ २-२-४० ॥

ॐ अन्तवत्त्वं असर्वज्ञता वा ॐ ॥ २-२-४१ ॥

शरीरभावेऽपि कारकग्रामस्य साक्षात् प्रयत्नाधिष्ठेयत्वमिति न युक्तं, भोगप्रसङ्गात्

न च देहादिवद्विश्वमस्य स्याद्भोगसम्भवात् ॥ ८२० ॥

आदिसृष्टिसमये अधिष्ठानाभावात् शिवस्य न कर्तृत्वम्

अधिष्ठाने स्थितः कर्ता कार्यं कुर्वन् प्रतीयते ।
नास्याधिष्ठानयोगोऽस्ति भूतानां प्रलये तदा ॥ ८२१ ॥

शिवस्य अदेहत्वे असर्वज्ञत्वं, देहित्वे अनित्यत्वम्

अदेहश्चेदसर्वज्ञः शिलाकाष्ठादिवत् सदा ।
देही चेदन्तवानेव यज्ञदत्तनिदर्शनात् ॥ ८२२ ॥

श्रुतिप्रामाण्यबलात् नैते दोषाः विष्णौ सम्भवन्ति

न चैतदखिलं विष्णौ श्रुतिप्रामाण्यगौरवात् ।
मनोबुद्ध्यङ्गितां विष्णोर्लक्षयामो य एव सः ॥ ८२३ ॥

स एव देहो विज्ञानमैश्वर्यं शक्तिरूर्जिता ।
देहो विष्णोर्न ते विष्णो वासुदेवोऽग्रतो भवेत् ॥ ८२४ ॥

एको नारायण आसीन्न ब्रह्मा न च शङ्करः ।
अजस्य नाभावध्येकमर्पितं मात्रया परः ॥ ८२५ ॥

सदेहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः ।
ज्ञानज्ञानः सुखसुखः स विष्णुः परमोऽक्षरः ॥ ८२६ ॥

आनन्द एक एवाग्र आसीन्नारायणः प्रभुः ।
प्रियं तस्य शिरो मोदप्रमोदौ च भुजौ हरेः ॥ ८२७ ॥

आनन्दो मध्यतो ब्रह्म पुच्छं नान्यदभूत् क्वचित् ।
मनसोऽस्याभवद्ब्रह्मा ललाटादपि शङ्करः ॥ ८२८ ॥

पक्षयोर्गरुडः शेषो मुखादासीत् सरस्वती ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ ८२९ ॥

इत्यादिश्रुतिसन्दर्भबलान्नित्यगुणात्मनः ।
विष्णोर्देहाज्जगत् सर्वमाविरासीदितीयते ॥ ८३० ॥

मानवत्त्वाद्विरोधः को नामानं क्वचिदिष्यते ।
अविरोधो विरोधश्च मानेनैव हि गम्यते ॥ ८३१ ॥

अत उक्तं समस्तं च वासुदेवस्य युज्यते ।

शिवादिनाम्नां विष्णौ शक्तिमत्त्वात् शिवादिनामयुक्ताः श्रुतयः विष्णुविषया एव

शिवादिनामयुक्ताश्च श्रुतयो विष्णुवाचकाः ॥ ८३२ ॥

नामानि सर्वाणि च यमेको यो देवनामधाः ।
विष्णुनामानि नान्यस्य सर्वनामा हरिः स्वयम् ॥ ८३३ ॥

न नारायणनामानि तदन्येष्वपरे हरौ ।
इत्यादिश्रुतयस्तत्र मानं चोक्तः समन्वयः ॥ ८३४ ॥

शैवपुराणान्यपि शिवस्य जगत्कारणत्वे न प्रमाणानि

पुराणानि पुराणाद्यैर्विरुद्धत्वान्न तत्प्रमा ।
तद्विरुद्धेषु नो मानं पूर्वापरविरोधतः ॥ ८३५ ॥

समब्राह्मविरोधाच्च नियमाद्वैष्णवेष्वपि ।
मोहार्थमुक्तितश्चैव

अधिकरणार्थोपसंहारः

विष्णुरेको गुणार्णवः ॥ ८३६ ॥

स्कन्दसूर्यगणेशादिमतानि न्यायतोऽमुतः ।
निराकृतान्यशेषेण सिद्धान्तस्याविशेषतः ॥ ८३७ ॥

॥ इति पत्युरधिकरणम् ॥ ११ ॥

* * *

॥ उत्पत्त्यधिकरणम् ॥

ॐ उत्पत्त्यसम्भवात् ॐ
॥ २-२-४२ ॥

शाक्तमतनिरासारम्भः

निराकृतौ विशेषस्य भावाच्छक्तिमतं पृथक् ।
दूष्यते

शाक्तमतानुवादः

महती देवी ह्रीङ्कारी सर्वकारणम् ॥ ८३८ ॥

त्रिपुरा भैरवीत्यादिनामभिः साभिधीयते ।
तस्याः सदाशिवाद्याश्च जायन्ते देवमानवाः ॥ ८३९ ॥

भूतभौतिकमप्येतदिति

महावाममतनिरासः

तन्नोपपद्यते ।
दृष्टा पुम्भ्यः सदा सृष्टिः स्त्रीपुम्भ्यो वा विशेषतः ॥ ८४० ॥

केवलाभ्यो न हि स्त्रीभ्यस्तत उत्पत्त्यसम्भवात् ।
नार्च्यं महावाममतं

मध्यवाममतनिरासः

वामैरन्यैरुदीर्यते ॥ ८४१ ॥

शिवोपसर्जना शक्तिः ससर्जेदं समन्ततः ।
इति तच्चोपपन्नं न

ॐ न च कर्तुः करणम् ॐ ॥ २-२-४३ ॥

शिवस्याकरणत्वतः ॥ ८४२ ॥

अदेहत्वात्

अणुवाममतनिरासः

अपि ह्यन्ये ब्रूयुः सर्वज्ञमीश्वरम् ।

अणुवामाः

ॐ विज्ञानादिभावे वा तदप्रतिषेधः ॐ ॥ २-२-४४ ॥

न तद्युक्तमीशवादप्रवेशनात् ॥ ८४३ ॥

सार्वज्ञादिगुणैर्युक्तं गुरुकल्पनया द्वयम् ।
न युज्यते ततस्त्वीश एक एव प्रयोजकः ॥ ८४४ ॥

उक्तदोषश्च तत्पक्ष इति नैवात्र दूष्यते ।

ॐ विप्रतिषेधाच्च ॐ ॥ २-२-४५ ॥

शाक्तमतनिरासोपसंहारः

श्रुतिस्मृतीतिहासानां सामस्त्येन विरोधतः ॥ ८४५ ॥

सतां जुगुप्सितत्वाच्च नाङ्गीकार्यं हि तन्मतम् ।

उत्पत्त्यसम्भवादित्यादिचतुस्सूत्री पाञ्चरात्रमतनिराकरणपरेति
व्याख्यानं न युक्तम्

पञ्चरात्रनिषेधार्थमेतान्याचक्षते यदि ॥ ८४६ ॥

सूत्राण्यतिविरुद्धं तद्यत आह स भारते ।
"पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् ॥ ८४७ ॥

ज्ञानेष्वेतेषु राजेन्द्र सर्वेष्वेतद्विशिष्यते ।
पञ्चरात्रविदो ये तु यथाक्रमपरा नृप ॥ ८४८ ॥

एकान्तभावोपगता वासुदेवं विशन्ति ते"
इति, गीता च तच्छास्त्रसङ्क्षेप इति हीरितम् ॥ ८४९ ॥

वेदेन पञ्चरात्रेण भक्त्या यज्ञेन चैव हि ।
दृश्योऽहं नान्यथा दृश्यो वर्षकोटिशतैरपि ॥ ८५० ॥

इति वाराहवचनं श्लोका इति वचः श्रुतौ ।
वेदैश्च पञ्चरात्रैश्च ध्येयो नारायणः परः ॥ ८५१ ॥

पञ्चरात्रं च वेदाश्च विद्यैकैव द्विधेयते ।
इत्यादिवेदवचनैः पञ्चरात्रमपोद्यते ॥ ८५२ ॥

कथमेव

जीवोत्पत्त्यभिधानात् पञ्चरात्रस्याप्रामाण्यमिति न युक्तं,
श्रुतिसूत्रेष्विव पञ्चरात्रेऽपि देहाद्युत्पत्त्यपेक्षयैवोत्पत्तिकथनात्

अत्र दोषः क उत्पत्तिर्ज्ञोऽत इत्यपि ।
इहैवोक्ता न चाभूतभावस्तत्रापि कथ्यते ॥ ८५३ ॥

"अनादिकर्मणा बद्धो जीवः संसारमण्डले ।
वासुदेवेच्छया नित्यं भ्रमती"ति हि तद्वचः ॥ ८५४ ॥

न हि संसारसादित्वं पञ्चरात्रोदितं क्वचित् ।

वासुदेवात् सङ्कर्षणो नाम जीवोऽजायतेत्यत्र जनिः प्रादुर्भावः व्यूहो वा

जीवाभिमानिशेषस्य नाम्ना सङ्कर्षणस्य तु ॥ ८५५ ॥

वासुदेवाज्जनिः प्रोक्ता प्रद्युम्नस्य ततस्तथा ।
मनोऽभिमानिनः कामस्यैवं साक्षाद्धरेः क्वचित् ॥ ८५६ ॥

सङ्कर्षणादिनाम्नैव नित्याचिन्त्योरुशक्तितः ।
व्यूहयुक्तोऽन्यथानूद्य कथं दुष्टत्वमुच्यते ॥ ८५७ ॥

शाण्डिल्यवृत्तान्तकथने पञ्चरात्रस्य वेदविद्वेषः प्रतीयत इत्यस्य निरासः

"यदि विद्याच्चतुर्वेदान्" इतिवद्वेदपूरणम् ।
पञ्चरात्रादिति कुतो द्वेषः शाण्डिल्यवर्तने ॥ ८५८ ॥

अपव्याख्याननिराकरणोपसंहारः

अतः परमशास्त्रोरुद्वेषादुदितमासुरैः ।
दूषणं पञ्चरात्रस्य वीक्षायामपि न क्षमम् ॥ ८५९ ॥

॥ इति उत्पत्त्यधिकरणम् ॥ १२ ॥

* * *

पादार्थोपसंहारः

अतोऽशेषजगद्धाता निर्दोषोरुगुणार्णवः ।
नारायणः श्रुतिगणतात्पर्यादवसीयते ॥ ८६० ॥

अन्धन्तमः प्रविशन्ति ये त्वविद्यामुपासते ।
ततो भूय इवायान्ति एतस्या नैव निन्दकाः ॥ ८६१ ॥

ततो विद्यामविद्यां च यो जानात्युभयं सह ।
दोषज्ञानादतीत्यैतां विद्ययामृतमश्नुते ॥ ८६२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
श्रीब्रह्मसूत्रानुव्याख्याने द्वितीयाध्यायस्य द्वितीयः पादः ॥

* * *

॥ श्रीः ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

अथ द्वितीयाध्यायस्य तृतीयः पादः

अस्मिन् पादे वैदिकवचनानां परस्परविरोधाभावप्रदर्शनं,
सङ्गतिश्च अन्तर्भावलक्षणा

अथाशेषसमाम्नायविरोधापाकृतिं प्रभुः ।
करिष्यन्

प्रथमपादे अधिदैवादिविषयवाक्यानां परस्परविरोधाभावप्रदर्शनं, चतुर्थपादे आध्यात्मविषयवाक्यानां परस्परविरोधाभावप्रदर्शनम्

अधिदैवाधिभूतजीवपरात्मनाम् ॥ ८६३ ॥

स्वरूपनिर्णयायैव वचनानां परस्परम् ।
पादेनानेनाविरोधं दर्शयत्यमितद्युतिः ॥ ८६४ ॥

एतत्पादाधिकरणपूर्वपक्षयुक्तिसङ्ग्रहः

अनुभूतियुक्तिबहुवाग्वैलोम्यं च ततोऽधिकम् ।
एतत्सर्वं ततः साम्यं द्वारवैयर्थ्यमेव च ॥ ८६५ ॥

दृष्टयुक्त्यनुसारित्वमुक्तान्यार्थाविरोधतः ।
प्रसिद्धनामस्वीकारे बहुवाक्यानुवर्तिता ॥ ८६६ ॥

लोकदृष्टानुसारित्वं जीवसाम्यमनादिता ।
तत्र तत्र परिज्ञानं गुणसाम्यश्रुती तथा ॥ ८६७ ॥

उत्पत्तिमत्त्वं स्वगुणाननुभूत्यल्पकल्पने ।
नानाश्रुतिश्च वैचित्र्यं युक्तयः पूर्वपक्षगाः ॥ ८६८ ॥

एतत्पादाधिकरणसिद्धान्तयुक्तिसङ्ग्रहः

व्यवस्थानुपपत्तिश्च स्वातन्त्र्यमनुसारिता ।
मुख्यता शक्तिमत्त्वं च वैरूप्यं सर्वसङ्ग्रहः ॥ ८६९ ॥

गत्यादिरीशशक्तिश्च सर्वमानविरोधिता ।
अभीष्टासिद्धिसुव्यक्ती शास्त्रसिद्धिर्विपर्ययः ॥ ८७० ॥

विशेषकारणं चेति सिद्धान्तस्यैव साधिकाः ।

॥ वियदधिकरणम् ॥

ॐ न वियदश्रुतेः ॐ ॥ २-३-१ ॥

वियत्पदं न आकाशमात्रपरं,
किन्तु परमात्मातिरिक्तानां प्रकृत्यादीनामुपलक्षणार्थम्

प्रकृतिः पुरुषः कालो वेदास्तदभिमानिनः ॥ ८७१ ॥

महदाद्याश्च जायन्ते

इह अधिकरणे उक्तं जन्म न अभूत्वाभवनलक्षणं,
किन्तु पराधीनविशेषावाप्तिलक्षणम्

पराधीनविशेषिता ।
इदं सर्वं ससर्जेति जनिमत्त्वमिहोदितम् ॥ ८७२ ॥

आकाशस्य वैशेषिकादिवदवकाशमात्ररूपत्वे,
वाह्यानामिव मूर्ताभावरूपत्वेऽपि वा अभूत्वाभवनरूपोत्पत्तिर्नैवोपपद्यते

अवकाशमात्रमाकाशः कथमुत्पद्यतेऽन्यथा ।
यद्यनाकाशता पूर्वं किं मूर्तनिबिडं जगत् ॥ ८७३ ॥

मूर्तसम्पूर्णता चैव यद्यनाकाशता भवेत् ।
मूर्तद्रव्याणि चाकाशे स्थितान्येव हि सर्वदा ॥ ८७४ ॥

'आत्मन आकाशः' इत्यादिश्रुतौ भूताकाशाभिमानी आकाशशब्दवाच्यः,
तद्देहोत्पत्तिः पराधीनविशेषावाप्तिः

अत आकाशशब्दोक्तस्तद्देवोऽत्र विनायकः ।
देहोत्पत्त्या समुत्पन्न इति श्रुत्याऽभिधीयते ॥ ८७५ ॥

रूपिणः भूताकाशस्य अभूत्वाभवनात्मकोत्पत्तिरपि एतच्छ्रुत्यभिप्रेता

भूतमप्यसितं दिव्यदृष्टिगोचरमेव तु ।
उत्पद्यते

अव्याकृताकाशः साक्षिप्रत्यक्षसिद्धः नित्यः,
भूताकाशाव्याकृताकाशेत्याकाशद्वयसद्भावे श्रुतिरेव प्रमाणम्

अव्याकृतं हि गगनं साक्षिगोचरम् ॥ ८७६ ॥

प्रदेश इति विज्ञेयं नित्यं नोत्पद्यते हि तत् ।

अव्याकृताकाशस्य अभूत्वाभवनलक्षणोत्पत्त्यसम्भवेऽपि पराधीनविशेषावाप्तिरूपोत्पत्तिः
'इदं सर्वमसृजते'त्यादिश्रुतिविवक्षिता

तथापि मूर्तसम्बन्धपरतन्त्रविशेषयुक् ॥ ८७७ ॥

खमेवोत्पत्तिमन्नाम श्रुतिशब्दविवक्षितम् ।

प्रकृत्यादीनां पराधीनविशेषावाप्तिरूपोत्पत्तिः

प्रकृतिः पुरुषः काल इत्येते च समस्तशः ॥ ८७८ ॥
ईशाधीनविशेषेण जन्या इत्येव शब्दिताः ।

क्षणलवादिरूपकालविशेषस्य अभूत्वाभवनरूपोत्पत्तिः,
कालप्रवाहस्य नित्यत्वम्

कालप्रवाह एवैको नित्यो न तु विशेषवान् ॥ ८७९ ॥

रमायाः भगवदिच्छया सिसृक्षुत्वविशेषप्राप्तिरेव सृष्टिः, न तु देहोत्पत्तिः

पुरुषाव्यक्तकालानां रमैवैकाभिमानिनी ।
सिसृक्षुत्वविशेषं तत् साक्षाद्भगवदिच्छया ॥ ८८० ॥
प्राप्तैव सृष्टेत्युदिता

प्रधानस्य ईश्वराधीनविकारेण पुरुषाणां देहसम्बन्धेन च सृष्टिः

प्रधानं विकृतेरपि ।
पुमांसो देहसम्बन्धात् सृष्टिमन्त इतीरिताः ॥ ८८१ ॥

ॐ अस्ति तु ॐ ॥ २-३-२ ॥

ॐ गौण्यसम्भवात् ॐ ॥ २-३-३ ॥

ॐ शब्दाच्च ॐ ॥ २-३-४ ॥

ॐ स्याच्चैकस्य ब्रह्मशब्दवत् ॐ ॥ २-३-५ ॥

ॐ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॐ ॥ २-३-६ ॥

ॐ यावद्विकारं तु विभागो लोकवत् ॐ ॥ २-३-७ ॥

॥ इति वियदधिकरणम् ॥ १ ॥

* * *

॥ मातरिश्वाधिकरणम् ॥

ॐ एतेन मातरिश्वा व्याख्यातः ॐ ॥ २-३-८ ॥

प्रतिभातपरावरत्वात् मुख्यवायुः नित्यसमः, पराधीनविशेषाप्तेः जनिमांश्च

एवं प्रलयकालेऽपि प्रतिभातपरावरः ।
मुख्यवायुर्नित्यसमः शरीरोत्पत्तिकारणात् ॥ ८८२ ॥

पराधीनविशेषेण जनिमानेव शब्दितः ।

जन्मनः पराधीनविशेषस्वरूपत्वे अङ्गीकृत एव
भगवदन्यस्य सर्वस्य जन्मेति युज्यते

नैव किञ्चित् ततो जन्मवर्जितं परमादृते ॥ ८८३ ॥

पराधीनविशेषत्वे जन्मनः

उपादानधर्मिणो धर्मान्तरात्मना परिवर्तः जन्म इत्येवाङ्गीकारे रमायाः जीवचैतन्यस्य प्रधानस्य वेदस्य च एवंविधजन्माभावात् परमेश्वरादृते सर्वं जनिमदिति न सिद्ध्येत्

स्थूलताभवः ।
पूर्वशब्दविलोपश्च यदि जन्मेति कीर्त्यते ॥ ८८४ ॥

रमाया नैव जन्मास्ति चैतन्यस्यापि केवलम् ।
प्रधानस्य च वेदस्य

वेदस्यापि ईश्वरेच्छया नियतविशिष्टानुपूर्वीकत्वेन अर्थबोधकत्वशक्त्या
आविर्भावरूपपराधीनविशेषावाप्तिरस्ति

वेदस्यापीश्वरेच्छया ॥ ८८५ ॥

व्यक्तिर्नाम विशेषोऽस्ति तस्मात् तद्वशतैव हि ।
उत्पत्तिरत्र कथिता

॥ इति मातरिश्वाधिकरणम् ॥ १ ॥

॥ असम्भवाधिकरणम् ॥

ॐ असम्भवस्तु सतोऽनुपपत्तेः ॐ ॥ २-३-९ ॥

स्वतन्त्रत्वात् ब्रह्मणः न उत्पत्तिः

स्वतन्त्रत्वात् परात्मनः ॥ ८८६ ॥

नैवोत्पत्तिः कथमपि न स्वतन्त्रं ततोऽपरम् ।

॥ इति असम्भवाधिकरणम् ॥ ३ ॥

* * *

॥ तेजोऽधिकरणम् ॥

ॐ तेजोऽतस्तथा ह्याह ॐ ॥ २-३-१० ॥

॥ इति तेजोऽधिकरणम् ॥ ४ ॥

* * *

॥ अबधिकरणम् ॥

ॐ आपः ॐ ॥ २-३-११ ॥

॥ इति अबधिकरणम् ॥ ५ ॥

* * *

॥ पृथिव्यधिकरणम् ॥

ॐ पृथिव्यधिकाररूपशब्दान्तरादिभ्यः ॐ ॥ २-३-१२ ॥

॥ इति पृथिव्यधिकरणम् ॥ ६ ॥

* * *

॥ तदभिध्यानाधिकरणम् ॥

ॐ तदभिध्यानादेव तु तल्लिङ्गात्सः ॐ ॥ २-३-१३ ॥

॥ इति तदभिध्यानाधिकरणम् ॥ ७ ॥

* * *

॥ विपर्ययाधिकरणम् ॥

ॐ विपर्ययेण तु क्रमोऽत उपपद्यते च ॐ ॥ २-३-१४ ॥

॥ इति विपर्ययाधिकरणम् ॥ ८ ॥

* * *

॥ अन्तराधिकरणम् ॥

ॐ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॐ ॥ २-३-१५ ॥

ॐ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॐ ॥ २-३-१६ ॥

॥ इति अन्तराधिकरणम् ॥ ९ ॥

* * *

॥ आत्माधिकरणम् ॥

ॐ नात्मा श्रुतेः नित्यत्वाच्च ताभ्यः ॐ ॥ २-३-१७ ॥

॥ इति आत्माधिकरणम् ॥ १० ॥

* * *

॥ ज्ञाधिकरणम् ॥

ॐ ज्ञोऽत एव ॐ ॥ २-३-१८ ॥

ॐ युक्तेश्च ॐ ॥ २-३-१९ ॥

॥ इति ज्ञाधिकरणम् ॥ ११ ॥

* * *

॥ उत्क्रान्त्यधिकरणम् ॥

ॐ उत्क्रान्तिगत्यागतीनाम् ॐ ॥ २-३-२० ॥

ॐ स्वात्मना चोत्तरयोः ॐ ॥ २-३-२१ ॥

ॐ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॐ
॥ २-३-२२ ॥

ॐ स्वशब्दोन्मानाभ्यां च ॐ ॥ २-३-२३ ॥

ॐ अविरोधश्चन्दनवत् ॐ ॥ २-३-२४ ॥

ॐ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॐ
॥ २-३-२५ ॥

ॐ गुणाद्वालोकवत् ॐ ॥ २-३-२६ ॥

॥ इति उत्क्रान्त्यधिकरणम् ॥ १२ ॥

* * *

॥ व्यतिरेकाधिकरणम् ॥

ॐ व्यतिरेको गन्धवत्तथा च दर्शयति ॐ
॥ २-३-२७ ॥

अच्छेद्यं जीवं विभज्य भागानां भोगशक्तिं प्रदाय
पुनरेकतामापादयतो हरेः सर्वं वशं, स एव स्वतन्त्रः

अच्छेद्यस्यापि जीवस्य विभागं बहुधा हरिः ॥ ८८७ ॥

कृत्वा भोगान् प्रदायैव चैक्यमापादयेत् पुनः ।
अत ईशवशं सर्वं चेतनाचेतनं जगत् ॥ ८८८ ॥

अविभागं विभागाय यदा नयति केशवः ।
किमशक्यं परेशस्य तदेति (त्य)ह्यभिधीयते ॥ ८८९ ॥

॥ इति व्यतिरेकाधिकरणम् ॥ १३ ॥

* * *

॥ पृथगधिकरणम् ॥

ॐ पृथगुपदेशात् ॐ ॥ २-३-२८ ॥

जीवात्मनः परमात्मना आत्यन्तिकभेदसमर्थनम् 'योऽहं सोऽसावि'त्यादिश्रुतिभिः
भेदमिथ्यात्वसाधकानुमानेन च जीवब्रह्मणोरभेद इत्याशङ्का

एवं स्थितेऽपि जीवैक्यं केचिदाहुः परात्मना ।
तयोऽहमिति पूर्वाभिः श्रुतिभिश्चानुमाबलात् ॥ ८९० ॥

'भिन्नोऽचिन्त्य' इत्यादिश्रुतौ जीवपरमात्मनोर्भेदोपदेशात् न तयोरभेदः

न तद्युक्तं यतो विष्णुः पृथगेवाभिधीयते ।

मुक्तावपि जीवपरमात्मनोः भेदाभिधायिन्यः श्रुतिस्मृतयः

प्रज्ञानेत्रोऽलोक इति मुक्तौ भेदोऽभिधीयते ॥ ८९१ ॥

एतमानन्दमित्यन्या परमं साम्यमित्यपि ।
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥ ८९२ ॥

सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ।
उपसम्पद्यते ज्योतिः स्वरूपेणाभिपद्यते ॥ ८९३ ॥

तत्र पर्येति जक्षंश्च क्रीडन्नपि सदा सुखी ।
आचक्ष्व मे परं मोक्षं धीरा यं प्रवदन्ति तम् ॥ ८९४ ॥

इत्युक्त आह वाग्देवी परं मोक्षं प्रजापतेः ।
शाखां शाखां महानद्यः संयान्ति परितः स्रवाः ॥ ८९५ ॥

धानापूपा मांसकामाः सदा पायसकर्दमाः ।
यस्मिन्नग्निमुखा देवाः सेन्द्राः सहमरुद्गणाः ॥ ८९६ ॥

ईजिरे क्रतुभिः श्रेष्ठैस्तदक्षरमुपासते ।
प्रविशन्ति परं देवं मुक्तास्तत्रैव भोगिनः ॥ ८९७ ॥

निर्गच्छन्ति यथाकामं परेशेनैव चोदिताः ।
भेददृष्ट्याऽभिमानेन निःसङ्गेनापि कर्मणा ॥ ८९८ ॥

कर्तृत्वात् सगुणं ब्रह्म पुरुषं पुरुषर्षभम् ।
स सङ्गत्य पुनः काले कालेनेश्वरमूर्तिना ॥ ८९९ ॥

जाते गुणव्यतिकरे यथापूर्वं प्रजायते ।
ऋचां त्वः पोषमास्ते च परेण प्रेरिताः सदा ॥ ९०० ॥

यत्कामस्तत्सृजत्यद्धैवात्मना तत्सृजत्यपि ।
सहैव ब्रह्मणा कामान् भुङ्क्ते निस्तीर्णतद्गुणः ॥ ९०१ ॥

दुःखादींश्च परित्यज्य जगद्व्यापारवर्जितः ।
भुङ्क्ते भोगान् सदैवोच्चानित्याद्यागममानतः ॥ ९०२ ॥

मुक्तस्य भेदावगतेः कथमेव ह्यभिन्नता ।
जीवेशयोः

अनुमानेनापि न अभेदसिद्धिः

नानुमा च तदभेदं प्रमापयेत् ॥ ९०३ ॥

मिथ्यैव भेदो विमतो भेदत्वाच्चन्द्रभेदवत् ।
इति चेत् साध्यधर्मोऽयं सन्नसन्वा न वोभयम् ॥ ९०४ ॥

यदि सन्नपसिद्धान्तः स एवासन्निर्तीरिते ।
नोभयं चेन्न सिद्धं तत् इति मानस्य दूषणम् ॥ ९०५ ॥

अनिर्वचनीयत्वे अनुमानं न प्रमाणम्

न च मानान्तरेणैतच्छक्यं साधयितुं क्वचित् ।
अनुमानेन चेत् सैव ह्यनवस्था भविष्यति ॥ ९०६ ॥

अनिर्वचनीयत्वप्रतिपादकः आगमोऽपि नास्ति

न चागमस्तदर्थोऽस्ति नासदासीन्न तद्वदेत् ।
परिशेषादनिर्वाच्यं यदि सिध्येत् परात्मनः ॥ ९०७ ॥

अनिर्वाच्यत्वमेव स्यात् परिशिष्टो ह्यसौ सदा ।
न चान्य आगमस्तत्र सदसत्प्रतियोगिनि ॥ ९०८ ॥

प्रत्यक्षमनिर्वचनीये न प्रमाणम्

न च प्रत्यक्षमत्रास्ति

अर्थापत्तिरपि अनिर्वचनीये न प्रमाणम्

न चार्थापत्तिरिष्यते ।
बाधायोगात् सत इति बाधाभावत एव हि ॥ ९०९ ॥

इष्टापत्तिर्न हि भ्रान्तावपि बाधोऽवगम्यते ।
विषयस्य कुतो बाधो विद्यमानं हि बाध्यते ॥ ९१० ॥

न हि वन्ध्यासुतो वध्यो यज्ञदत्तो हि वध्यते ।
बाधायोगात् सत इति व्याप्तिरेषा क्व दृश्यते ॥ ९११ ॥

कश्चायं बाध उद्दिष्टो न हि नाशोऽसतो भवेत् ।
निवृत्तिश्चाप्रवृत्तस्य कथमेवोपपद्यते ॥ ९१२ ॥

नासीदस्ति भविष्यच्च तदिति ज्ञानमेयता ।
यदि बाधस्तदा सत्त्वं तेनैवाङ्गीकृतं पुनः ॥ ९१३ ॥

प्रतीतिर्नासत इति वदन्नङ्गीकरोति ताम् ।
निषेधो ह्यप्रतीतस्य कथञ्चिन्नोपपद्यते ॥ ९१४ ॥

उपमानमनिर्वचनीये न प्रमाणम्

न चोपमा भवेदत्र

उपलब्ध्यभावोऽपि अनिर्वचनीये न प्रमाणम्

प्रत्यक्षात्सत्त्वमेव च ।

ईशस्य परात्मनां च अप्रत्यक्षत्वात् भेदोऽप्रत्यक्ष इति न युक्तं स्वात्मनः प्रत्यक्षत्वात् शास्त्रावगतेश्वरात् भेदप्रत्यक्षसम्भवात्

शास्त्रगम्यपरेशानाद्भेदः स्वात्मन ईयते ॥ ९१५ ॥

स्वात्मनः परमात्मभेदग्राहकं साक्षिप्रत्यक्षं प्रबलं अतः तद्विरोधेन
जीवब्रह्मणोः एकत्वं नानुमातुं शक्यते

अनुभूतिविरोधेन कथमेकत्वमुच्यते ।
किञ्चित्कर्ता च दुःखीति सर्वैरेवानुभूयते ॥ ९१६ ॥

सर्वज्ञो भगवान् विष्णुः सर्वशक्तिरिति श्रुतः ।

ईश्वरं पक्षीकृत्य जीवाभेदसाधने उपजीव्यश्रुतिविरोधः

अनुभूताद्धि भेदेन श्रुतिरेषा वदत्यमुम् ॥ ९१७ ॥

'तद्योऽहमि'त्यादिश्रुतिरपि उपजीव्यप्रत्यक्षागमविरोधादभेदे न प्रमाणम्

उपजीव्यविरुद्धं तु कथमैक्यं श्रुतिर्वदेत् ।

उपजीव्यप्रत्यक्षागमयोरप्रामाण्यधर्मिण एवासिद्ध्या
आगमैः अनुमानेन च धर्मिबोधनं न स्यात्

अप्रामाण्यं यदा भेदवाचकस्य भविष्यति ॥ ९१८ ॥

स एव धर्मिणो ग्राही तदभेदः कथं भवेत् ।

'यः सर्वज्ञः' इत्यादिश्रुतिः ब्रह्मस्वरूपमात्रे प्रमाणं,
सार्वज्ञादिभेदकधर्मवैशिष्ट्यांशे अप्रमाणमिति न युक्तम्

यत्स्वरूपग्रहे मानं तद्धर्मे न कथं भवेत् ॥ ९१९ ॥

एकविज्ञानविज्ञप्त्या द्वयं मानं भविष्यति ।
न चेदेकं प्रमाणं तद्द्वयमप्यत्र नो भवेत् ॥ ९२० ॥

उपजीव्यविरोधेन अभेदप्रमाणस्य दुष्टत्वनिरूपणोपसंहारः

धर्मिग्राहिविरोधस्तु तस्मान्मानस्य दूषणम् ।

निरपेक्षभेदश्रुतेः सापेक्षाभेदप्रमाणबाधकत्वम्

नोपजीव्यो ह्यभेदोऽत्र क्वचिद्भेदश्रुतेर्बलात् ॥ ९२१ ॥

भेदश्रुतिः न अनुवादिनी, ब्रह्मणः शास्त्रैकयोनित्वात्

न च मानान्तरोपेयं ब्रह्म तद्भवति क्वचित् ।

ब्रह्मणः प्रमाणान्तरवेद्यत्वेऽपि तेनैव प्रमाणेन
अभेदानुमानादेः उपजीव्यप्रमाणविरोधः

येन मानेन चोपेयं भेदस्तेनावगम्यते ॥ ९२२ ॥

सर्वज्ञानुमयैवेशो यद्युपेयः कथञ्चन ।
सर्वज्ञत्वगुणेनैव तया भेदोऽवगम्यते ॥ ९२३ ॥

अभेदानुमानागमयोः उपजीव्यप्रमाणविरोधपरिहाराय 'अहं दुःखी'त्याद्यनुभवस्य मिथ्यात्वकथनस्य निरासः

न दुःखानुभवः क्वापि मिथ्यानुभवतां व्रजेत् ।
न हि बाधः क्वचिद्दृष्टो दुःखाद्यनुभवस्य तु ॥ ९२४ ॥

यदि दुःखानुभूतिश्च भ्रान्तिरित्यवसीयते ।
अदुःखिता श्रुतिः केन न भ्रान्तिरिति गम्यते ॥ ९२५ ॥

श्रुतिस्वरूपमर्थश्च मानेनैवावसीयते ।
तच्चेन्मानं गृहीतं ते किं दुःखानुभवे भ्रमः ॥ ९२६ ॥

न च बाधविशेषोऽस्ति यदबाधितमेव तत् ।

बाधो यद्यनुभूतेऽथ कथं निर्णय ईयते ॥ ९२७ ॥

कोऽपि ह्यर्थो न निश्चेतुं शक्यते भ्रमवादिना ।
भ्रमत्वमभ्रमत्वं च यदैवानुभवोपगम् ॥ ९२८ ॥

एकस्य भ्रमता तत्र परस्याभ्रमता कुतः ।
भ्रमत्वमभ्रमत्वं च सर्वं वेद्यं हि साक्षिणा ॥ १२९ ॥

स चेत् साक्षी क्वचिद्दुष्टः कथं निर्णय ईयते ।
विशेषाः सर्व एवैते साक्षिप्रत्यक्षगोचराः ॥ १३० ॥

ऊरीकृत्य च तान् सर्वान् व्यवहारः प्रवर्तते ।
साक्षिणो व्यवसायी तु व्यवहारोऽभिधीयते ॥ १३१ ॥

तस्मात् सर्वप्रसिद्धस्य व्यवहारस्य सिद्धये ।
साक्षी निर्दोष एवैकः सदाङ्गीकार्य एव नः ॥ १३२ ॥

शुद्धः साक्षी यदा सिद्धो दुःखित्वं वार्यते कथम् ।
उपजीव्यप्रमाणं तद्भेदग्राहकमेव हि ॥ १३३ ॥

'पृथगुपदेशादि'ति सूत्रार्थोपसंहारः

अतो जीवेशयोर्भेदः श्रुतिसामर्थ्यसुस्थिरः ।

ॐ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॐ
॥ २-३-२९ ॥

जीवब्रह्मणोर्भेदेऽपि अभेदवदुपन्यासे श्रुतेराशयवर्णनम्

तथापि तु चिदानन्दपूर्वास्तत्सदृशा गुणाः ॥ १३४ ॥

सारः स्वरूपमस्यापि मुक्तावप्यवशिष्यते ।
अतोऽभेदवदेवैताः श्रुतयः प्रवदन्ति हि ॥ १३५ ॥

पौराणानि च वाक्यानि सादृश्याभेदसंश्रयात् ।
सादृश्याच्च प्रधानत्वात् स्वातन्त्र्यादपि चाभिदाम् ॥ १३६ ॥

आहुरीशेन जीवस्य न स्वरूपाभिदां क्वचित् ।
स्थानैक्यमैकमत्यं च मुक्तस्य तु विशिष्यते ॥ ९३७ ॥

सादृश्यं च विशेषेण

जडानां क्वचिदेवाभेदव्यपदेशो हेतुः

जडानां द्वयमेव तु ।
भवेत् सादृश्यमत्यल्पं तृतीयं परमात्मना ॥ ९३८ ॥

ईशस्य स्वगतरूपाद्यभेदोपदेशो मुख्य एव

ईशरूपक्रियाणां च गुणानामपि सर्वशः ।
तथैवावयवानां तत्स्वरूपैक्यं तु मुख्यतः ॥ ९३९ ॥

"यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।
एवं धर्मान् पृथक्पश्यंस्तानेवानुविधावति" ॥ ९४० ॥

इति श्रुतेः

ईशधर्माणां न भेदाभेदौ स्तः

नोभयं च भेदाभेदाख्यमिष्यते ।
"एकमेवाद्वितीयं तन्नेह नानास्ति किञ्चन ॥ ९४१ ॥

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।"
इति श्रुताविवेत्यस्माद्भेदाभेदनिराकृतिः ॥ ९४२ ॥

इवोभये च सादृश्य इति वाक् शब्दनिर्णये ।

॥ इति पृथगधिकरणम् ॥ १४ ॥

* * *

॥ यावदधिकरणम् ॥

ॐ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॐ
॥ २-३-३० ॥

॥ इति यावदधिकरणम् ॥ १५ ॥

* * *

॥ पुंस्त्वाधिकरणम् ॥

ॐ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॐ
॥ २-३-३१ ॥

ॐ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वान्यथा ॐ ॥ २-३-३२ ॥

॥ इति पुंस्त्वाधिकरणम् ॥ १६ ॥

* * *

॥ कर्तृत्वाधिकरणम् ॥

ॐ कर्ता शास्त्रार्थवत्त्वात् ॐ ॥ २-३-३३ ॥

ॐ विहारोपदेशात् ॐ ॥ २-३-३४ ॥

ॐ उपादानात् ॐ ॥ २-३-३५ ॥

ॐ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॐ
॥ २-३-३६ ॥

ॐ उपलब्धिवदनियमः ॐ ॥ २-३-३७ ॥

ॐ शक्तिविपर्ययात् ॐ ॥ २-३-३८ ॥

ॐ समाध्यभावाच्च ॐ ॥ २-३-३९ ॥

ॐ यथा च तक्षोभयथा ॐ ॥ २-३-४० ॥

ॐ परात्तु तच्छ्रुतेः ॐ ॥ २-३-४१ ॥

ॐ कृतप्रयत्नापेक्षस्तु विहितप्रतिषेधावैयर्थ्यादिभ्यः ॐ ॥ २-३-४२ ॥

॥ इति कर्तृत्वाधिकरणम् ॥ १७ ॥

* * *

॥ अंशाधिकरणम् ॥

ॐ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॐ ॥ २-३-४३ ॥

जीवब्रह्मणोः न मुख्यः अभेदः, नापि स्वाभाविकौ भेदाभेदौ, किन्तु सादृश्यादिलक्षणः अमुख्यः अभेदः, मुक्तौ श्रुतिस्मृतिभिः भेदोपदेशात्

भेदस्य मुक्तौ वचनादपि तत्पक्षनिग्रहः ॥ ९४३ ॥

चेतनत्वादि सादृश्यं यद्यभेद इतीष्यते ।
अङ्गीकृतं तदस्माभिर्न स्वरूपैकता क्वचित् ॥ ९४४ ॥

न केनचिदभेदोऽस्ति भेदाभेदोऽपि वा क्वचित् ।
समुदायमृते विष्णोः स्वगुणादीन् विनाऽपि वा ॥ ९४५ ॥

इति श्रुतेर्न तस्यास्ति भेदाभेदोऽपि केनचित् ।

अभेदश्रुतयः भेदश्रुतयश्च अंशत्वाभिप्रायाः, जीवस्य परमेश्वरांशता तु तत्सादृश्यं तदधीनसत्तादिमत्त्वं च

अभेदश्रुतयोऽशत्वात् सादृश्यं चांशताऽस्य तु ॥ ९४६ ॥

मत्स्याद्यवताराः हरेः स्वरूपांशाः, जीवाः विभिन्नांशाः

अंशस्तु द्विविधो ज्ञेयः स्वरूपांशोऽन्य एव च ।
विभिन्नांशोऽल्पशक्तिः स्यात् किञ्चित्सादृश्यमात्रयुक् ॥ ९४७ ॥

अंशिनो यत्तु सामर्थ्यं यत्स्वरूपं यथा स्थितिः ।
स एव चेत् स्वरूपांशः प्रादुर्भावा हरेर्यथा ॥ ९४८ ॥

ॐ मन्त्रवर्णात् ॐ ॥ २-३-४४ ॥

ॐ अपि स्मर्यते ॐ ॥ २-३-४५ ॥

ॐ प्रकाशादिवन्नैवं परः ॐ ॥ २-३-४६ ॥

ॐ स्मरन्ति च ॐ ॥ २-३-४७ ॥

स्वरूपांशे दृष्टान्ताः

सूर्यमण्डलमान्येकस्तत्प्रकाशाभिमानवान् ।
सूर्योऽथ सप्तमाब्धेश्च बाह्योदस्य च वारिपः ॥ ९४९ ॥

कठिनत्वेन मेवदिः पृथिव्या अपि देवता ।
धरादेव्येवमेवैको भगवान् विष्णुरव्ययः ॥ ९५० ॥

नानावताररूपेण स्थितः पूर्णगुणः सदा ।

भिन्नांशे दृष्टान्ताः

विण्मूत्राद्यभिमानिन्यो यथाऽपभ्रष्टदेवताः ॥ ९५१ ॥

सूर्यादिभ्यस्तथैवायं संसारी परमात् पृथक् ।

ॐ अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॐ
॥ २-३-४८ ॥

देहदोषैश्च दुष्टत्वादपभ्रष्टाख्यदेवताः ॥ ९५२ ॥

अन्याः सूर्यादिदेवेभ्यो ह्यनुग्राह्याश्च तैः सदा ।
एवमेव पराद्विष्णोः पृथक्संसारिणो मताः ॥ ९५३ ॥

अनुग्राह्याश्च तेनैव तत्प्रसादाच्च मोक्षिणः ।
न तु मत्स्यादिरूपाणामनुग्राह्यत्वमिष्यते ॥ ९५४ ॥

ॐ असन्ततेश्चाव्यतिकरः ॐ ॥ २-३-४९ ॥

गुणपरिपूर्णत्वात् मत्स्यादीनां स्वरूपांशत्वं,
अपरिपूर्णत्वात् जीवानां भिन्नांशत्वम्

गुणैरशेषैः पूर्णत्वान्मुख्याभेदो परैर्न च ।

ॐ आभास एव च ॐ ॥ २-३-५० ॥

जीवाः अंशाभासाः, न तु मुख्यांशाः

अंशाभासाश्च सर्वेऽपि परस्यांशा न मुख्यतः ॥ ९५५ ॥

यथैषा पुरुषे छाया एतस्मिन्नेतदाततम् ।
न तु पुम्पादवत् पादा जीवा एते परात्मनः ॥ ९५६ ॥

पूर्णास्तस्य गुणा एव प्रादुर्भावतया स्थिताः ।
एवं जगाद परमा श्रुतिर्नारायणं परम् ॥ ९५७ ॥

एतत्पादार्थसङ्ग्रहः

अक्षयो भगवान् विष्णुर्लक्ष्म्यावासो लये स्थितः ।
मुक्तैः सदा चिन्त्यमानो ब्रह्माद्यैस्तारतम्यगैः ॥ ९५८ ॥

प्रकृतिः पुरुषः कालो वेदाश्चेति चतुष्टयम् ।
नित्यं स्वरूपतो विष्णोर्विशेषावाप्तिमात्रतः ॥ ९५९ ॥

उत्पत्तिमदिति प्रोक्तं लक्ष्मीस्तदभिमानिनी ।
ततो जातः पुमान् नाम ब्रह्मास्यां वासुदेवतः ॥ ९६० ॥

सूत्रात्मा प्राणनामा च देव्यौ प्रकृतिमानिनी ।
ततो रूपं महन्नाम ब्रह्मणोऽहंकृतिः शिवः ॥ ९६१ ॥

ब्रह्मणो बुद्धिनाम्नोमा तत इन्द्रो मनोऽभिधः ।
स्कन्दश्च तत एवान्ये सर्वे देवाः प्रजज्ञिरे ॥ ९६२ ॥

तत्र पूर्वतनः श्रेयान् गुणैः सर्वैः समस्तशः ।
तेभ्यश्च भगवान् विष्णुस्तदधीना इमे सदा ॥ ९६३ ॥

जन्मस्थितिलयाज्ञाननियतिज्ञानसंसृतिः ।
मोक्षश्च तदधीनत्वमेतेषां नैव हीयते ॥ ९६४ ॥

मुक्तावपि स एवैकः स्वतन्त्रः पूर्णसद्गुणः ।
इति श्रुत्युपपत्तिभ्यां पादेऽस्मिन् प्रभुणोदितम् ॥ ९६५ ॥

॥ इति अंशाधिकरणम् ॥ १८ ॥

* * *

॥ अदृष्टाधिकरणम् ॥

ॐ अदृष्टानियमात् ॐ ॥ २-३-५१ ॥

ॐ अभिसन्ध्यादिष्वपि चैवम् ॐ ॥ २-३-५२ ॥

ॐ प्रदेशादिति चेन्नान्तर्भावात् ॐ ॥ २-३-५३ ॥

॥ इति अदृष्टाधिकरणम् ॥ १९ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीब्रह्मसूत्रानुव्याख्याने द्वितीयाध्यायस्य तृतीयः पादः ॥

* * *

॥ श्रीः ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

अथ द्वितीयाध्यायस्य चतुर्थः पादः

अध्यात्मविषयश्रुतीनां परस्परविरोधपरिहारः, श्रुत्यादिसिद्धयुक्तिसहितश्रुतिविरोधपरिहारः

श्रुत्यर्थः श्रुतियुक्तिभ्यां विरुद्ध इव दृश्यते ।
यत्र तन्निर्णयं देवः सुविशिष्टोपपत्तिभिः ॥ ९६६ ॥

करोत्यनेन पादेन

एतत्पादीयपूर्वपक्षयुक्तयः, सिद्धान्तयुक्तयश्च

तत्र स्पष्टार्थवच्छ्रुतिः ।
विशेषश्रुतिवैरूप्यं माहात्म्यं व्यक्तसद्गुणः ॥ ९६७ ॥

दृष्टायुक्तिः समानत्वं कर्तृशक्तिर्विमिश्रिता ।
युक्तयः पूर्वपक्षेषु सुनिर्णीतास्तु तादृशाः ॥ ९६८ ॥

युक्तयो निर्णयस्यैव स्वयं भगवतोदिताः ।

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते ब्रह्मसूत्रानुव्याख्याने द्वितीयाध्यायस्य चतुर्थः पादः ॥

* * *

॥ प्राणोत्पत्त्यधिकरणम् ॥

ॐ तथा प्राणाः ॐ ॥ २-४-१ ॥

ॐ गौण्यसम्भवात् ॐ ॥ २-४-२ ॥

ॐ प्रतिज्ञानुपरोधाच्च ॐ ॥ २-४-३ ॥

॥ इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

* * *

॥ तत्प्रागधिकरणम् ॥

ॐ तत्प्राक् श्रुतेश्च ॐ ॥ २-४-४ ॥

॥ इति तत्प्रागधिकरणम् ॥ २ ॥

* * *

॥ तत्पूर्वकत्वाधिकरणम् ॥

ॐ तत्पूर्वकत्वाद्वाचः ॐ ॥ २-४-५ ॥

॥ इति तत्पूर्वकत्वाधिकरणम् ॥ ३ ॥

* * *

॥ सप्तगत्यधिकरणम् ॥

ॐ सप्तगतेर्विशेषितत्वाच्च ॐ ॥ २-४-६ ॥

ॐ हस्तादयस्तु स्थितेऽतो नैवम् ॐ ॥ २-४-७ ॥

॥ इति सप्तगत्यधिकरणम् ॥ ४ ॥

* * *

॥ अण्वधिकरणम् ॥

ॐ अणवश्च ॐ ॥ २-४-८ ॥

॥ इति अण्वधिकरणम् ॥ ५ ॥

* * *

॥ श्रेष्ठाधिकरणम् ॥

ॐ श्रेष्ठश्च ॐ ॥ २-४-९ ॥

ॐ न वायुक्रिये पृथगुपदेशात् ॐ ॥ २-४-१० ॥

॥ इति श्रेष्ठाधिकरणम् ॥ ६ ॥

* * *

॥ चक्षुराद्यधिकरणम् ॥

ॐ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॐ ॥ २-४-११ ॥

ॐ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॐ ॥ २-४-१२ ॥

॥ इति चक्षुराद्यधिकरणम् ॥ ७ ॥

* * *

॥ पञ्चवृत्त्यधिकरणम् ॥

ॐ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॐ ॥ २-४-१३ ॥

॥ इति पञ्चवृत्त्यधिकरणम् ॥ ८ ॥

* * *

॥ अण्वधिकरणम् ॥

ॐ अणुश्च ॐ ॥ २-४-१४ ॥

॥ इति अण्वधिकरणम् ॥ ९ ॥

* * *

॥ ज्योतिराद्यधिकरणम् ॥

ॐ ज्योतिराद्यधिष्ठानं तु तदामननात् ॐ ॥ २-४-१५ ॥

ॐ प्राणवता शब्दात् ॐ ॥ २-४-१६ ॥

ॐ तस्य च नित्यत्वात् ॐ ॥ २-४-१७ ॥

॥ इति ज्योतिराद्यधिकरणम् ॥ १० ॥

* * *

॥ तइन्द्रियाधिकरणम् ॥

ॐ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॐ ॥ २-४-१८ ॥

ॐ भेदश्रुतेः ॐ ॥ २-४-१९ ॥

ॐ वैलक्षण्याच्च ॐ ॥ २-४-२० ॥

॥ इति तइन्द्रियाधिकरणम् ॥ ११ ॥

* * *

॥ संज्ञाधिकरणम् ॥

ॐ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॐ
॥ २-४-२१ ॥

॥ इति संज्ञाधिकरणम् ॥ १२ ॥

* * *

॥ मांसाधिकरणम् ॥

ॐ मांसादि भौमं यथाशब्दमितरयोश्च ॐ ॥ २-४-२२ ॥

ॐ वैशेष्यात्तु तद्वादस्तद्वादः ॐ ॥ २-४-२३ ॥

॥ इति मांसाधिकरणम् ॥ १३ ॥

समाप्तोऽयं द्वितीयोऽध्यायः ॥ २ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

* * *

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

ब्रह्मसूत्रानुव्याख्यानम्

तृतीयाध्यायस्य प्रथमः पादः

एतत्पादीयाधिकरणपूर्वपक्षयुक्तयः

स्वाभाविकान्यथानामसहभावान्यथोक्तयः ॥ १६९ ॥

अविशेषविशेषौ च सहभावो विमिश्रता ।
विरुद्धोक्तिः सहस्थानं वैयर्थ्यं चान्यथागतिः ॥ १७० ॥

युक्तयः पूर्वपक्षस्य

एतत्पादीयाधिकरणसिद्धान्तयुक्तयः

गुणाधिक्यार्थतो भवौ ।
उपपत्तिर्द्विरूपत्वमाधिक्यमनुरूपता ॥ १७१ ॥

योग्यता बलवत्त्वं च विभागः कारणाभवः ।
क्लृप्तिरन्या गतिश्चैव सिद्धान्तस्यैव साधकाः ॥ १७२ ॥

॥ तदन्तराधिकरणम् ॥

ॐ तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् ॐ ॥ ३-१-१ ॥

॥ इति तदन्तराधिकरणम् ॥ १ ॥

॥ संज्ञाधिकरणम् ॥

ॐ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॐ
॥ २-४-२१ ॥

॥ इति संज्ञाधिकरणम् ॥ १२ ॥

* * *

॥ मांसाधिकरणम् ॥

ॐ मांसादि भौमं यथाशब्दमितरयोश्च ॐ ॥ २-४-२२ ॥

ॐ वैशेष्यात्तु तद्वादस्तद्वादः ॐ ॥ २-४-२३ ॥

॥ इति मांसाधिकरणम् ॥ १३ ॥

समाप्तोऽयं द्वितीयोऽध्यायः ॥ २ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

* * *

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

ब्रह्मसूत्रानुव्याख्यानम्

तृतीयाध्यायस्य प्रथमः पादः

एतत्पादीयाधिकरणपूर्वपक्षयुक्तयः

स्वाभाविकान्यथानामसहभावान्यथोक्तयः ॥ १६९ ॥

अविशेषविशेषौ च सहभावो विमिश्रता ।
विरुद्धोक्तिः सहस्थानं वैयर्थ्यं चान्यथागतिः ॥ १७० ॥

युक्तयः पूर्वपक्षस्य

एतत्पादीयाधिकरणसिद्धान्तयुक्तयः

गुणाधिक्यार्थतो भवौ ।
उपपत्तिर्द्विरूपत्वमाधिक्यमनुरूपता ॥ १७१ ॥

योग्यता बलवत्त्वं च विभागः कारणाभवः ।
क्लृप्तिरन्या गतिश्चैव सिद्धान्तस्यैव साधकाः ॥ १७२ ॥

॥ तदन्तराधिकरणम् ॥

ॐ तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् ॐ ॥ ३-१-१ ॥

॥ इति तदन्तराधिकरणम् ॥ १ ॥

॥ त्र्यात्मकत्वाधिकरणम् ॥

ॐ त्र्यात्मकत्वात्तु भूयस्त्वात् ॐ ॥ ३-१-२ ॥

॥ इति त्र्यात्मकत्वाधिकरणम् ॥ २ ॥

* * *

॥ प्राणगत्यधिकरणम् ॥

ॐ प्राणगतेश्च ॐ ॥ ३-१-३ ॥

॥ इति प्राणगत्यधिकरणम् ॥ ३ ॥

* * *

॥ अग्न्याद्यधिकरणम् ॥

ॐ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॐ ॥ ३-१-४ ॥

॥ इति अग्न्याद्यधिकरणम् ॥ ४ ॥

* * *

॥ प्रथमाधिकरणम् ॥

ॐ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॐ ॥ ३-१-५ ॥

॥ इति प्रथमाधिकरणम् ॥ ५ ॥

* * *

॥ अश्रुतत्वाधिकरणम् ॥

ॐ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॐ ॥ ३-१-६ ॥

॥ इति अश्रुतत्वाधिकरणम् ॥ ६ ॥

* * *

॥ भाक्ताधिकरणम् ॥

ॐ भाक्तं वानात्मवित्त्वात्तथा हि दर्शयति ॐ ॥ ३-१-७ ॥

॥ इति भाक्ताधिकरणम् ॥ ७ ॥

* * *

॥ कृतात्ययाधिकरणम् ॥

ॐ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्याम् ॐ ॥ ३-१-८ ॥

॥ इति कृतात्ययाधिकरणम् ॥ ८ ॥

* * *

॥ यथेताधिकरणम् ॥

ॐ यथेतमनेवं च ॐ ॥ ३-१-९ ॥

॥ इति यथेताधिकरणम् ॥ ९ ॥

* * *

॥ चरणाधिकरणम् ॥

ॐ चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॐ ॥ ३-१-१० ॥

ॐ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॐ ॥ ३-१-११ ॥

ॐ सुकृतदुष्कृते एवेति तु बादरिः ॐ ॥ ३-१-१२ ॥

॥ इति चरणाधिकरणम् ॥ १० ॥

* * *

॥ अनिष्टाधिकरणम् ॥

ॐ अनिष्टादिकारिणामपि च श्रुतम् ॐ ॥ ३-१-१३ ॥

ॐ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॐ ॥ ३-१-१४ ॥

ॐ स्मरन्ति च ॐ ॥ ३-१-१५ ॥

॥ इति अनिष्टाधिकरणम् ॥ ११ ॥

* * *

॥ अपिसप्ताधिकरणम् ॥

ॐ अपि सप्त ॐ ॥ ३-१-१६ ॥

॥ इति अपिसप्ताधिकरणम् ॥ १२ ॥

* * *

॥ तत्राप्यधिकरणम् ॥

ॐ तत्रापि च तद्व्यापारादविरोधः ॐ ॥ ३-१-१७ ॥

॥ इति तत्राप्यधिकरणम् ॥ १३ ॥

* * *

॥ विद्याधिकरणम् ॥

ॐ विद्याकर्मणोरिति तु प्रकृतत्वात् ॐ ॥ ३-१-१८ ॥

॥ इति विद्याधिकरणम् ॥ १४ ॥

* * *

॥ नतृतीयाधिकरणम् ॥

ॐ न तृतीये तथोपलब्धेः ॐ ॥ ३-१-१९ ॥

ॐ स्मर्यतेऽपि च लोके ॐ ॥ ३-१-२० ॥

ॐ दर्शनाच्च ॐ ॥ ३-१-२१ ॥

ॐ तृतीये शब्दावरोधः संशोकजस्य ॐ ॥ ३-१-२२ ॥

ॐ स्मरणाच्च ॐ ॥ ३-१-२३ ॥

॥ इति नतृतीयाधिकरणम् ॥ १५ ॥

* * *

॥ तत्स्वाभाव्याधिकरणम् ॥

ॐ तत्स्वाभाव्यापत्तिरुपपत्तेः ॐ ॥ ३-१-२४ ॥

॥ इति तत्स्वाभाव्याधिकरणम् ॥ १६ ॥

* * *

॥ नातिचिरेणाधिकरणम् ॥

ॐ नातिचिरेण विशेषात् ॐ ॥ ३-१-२५ ॥

॥ इति नातिचिरेणाधिकरणम् ॥ १७ ॥

* * *

॥ अन्याधिकरणम् ॥

ॐ अन्याधिष्ठिते पूर्ववदभिलापात् ॐ ॥ ३-१-२६ ॥

ॐ अशुद्धमिति चेन्न शब्दात् ॐ ॥ ३-१-२७ ॥

॥ इति अन्याधिकरणम् ॥ १८ ॥

* * *

॥ रेतोऽधिकरणम् ॥

ॐ रेतःसिग्योगोऽथ ॐ ॥ ३-१-२८ ॥

॥ इति रेतोऽधिकरणम् ॥ १९ ॥

* * *

॥ योन्यधिकरणम् ॥

ॐ योनेः शरीरम् ॐ ॥ ३-१-२९ ॥

बीजयोनिसम्बन्धेन शरीरोत्पत्तिरित्युत्सर्गः, ज्ञानतपोयोगाधिकरणविशेषेण तदभावेऽपीत्यपवादः

बीजपूरुषयोनीनां सङ्गातिनियमोज्झितिम् ।
अथशब्देन भगवानाह कारणतश्च ताम् ॥ ९७३ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीब्रह्मसूत्रानुव्याख्याने तृतीयाध्यायस्य प्रथमः पादः ॥

॥ इति योन्यधिकरणम् ॥ २० ॥

* * *

॥ श्रीः ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

अथ तृतीयाध्यायस्य द्वितीयः पादः

एतत्पादीयाधिकरणपूर्वपक्षयुक्तयः

पश्चाददृष्टयविज्ञानकालदुःखपृथग्भवाः ।
स्थानभेदो विरुद्धत्वं न्यायसाम्यं स्वतो भवः ॥ ९७४ ॥

गुणसाम्यमयोगश्च तर्कबाधो विलोमता ।
नानाभावः प्रलोभश्च युक्तयः पूर्वपक्षगाः ॥ ९७५ ॥

एतत्पादीयाधिकरणसिद्धान्तयुक्तयः

अशक्यकर्तृताशक्तिः स्वतोऽबोधस्तथैव च ।
अमानक्लृप्तिसन्मानव्यवस्थात्यल्पताभवाः ॥ ९७६ ॥

विशेषदृष्टिवाक्ये च पुंशक्तिः सुनिदर्शनम् ।
अलौकिकत्वमाधिक्यं स्वातन्त्र्यं निर्णयप्रमाः ॥ ९७७ ॥

॥ सन्ध्याधिकरणम् ॥

ॐ सन्ध्ये सृष्टिराह हि ॐ ॥ ३-२-१ ॥

ॐ निर्मातारं चैके पुत्रादयश्च ॐ ॥ ३-२-२ ॥

ॐ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॐ ॥ ३-२-३ ॥

ॐ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॐ ॥ ३-२-४ ॥

भगवतः स्वप्नावस्थाप्रवर्तकत्वमहिमोक्तिः,
अनादिमनसः अनाद्यनुभवप्रवाहोत्पन्नवासनाश्रयत्वम्

वासनाः सर्ववस्तूनामनाद्यनुभवागताः ।
सन्त्येवाशेषजीवानामनादिमनसि स्थिताः ॥ ९७८ ॥

त्रिगुणात्मकं मनोऽस्त्येव यावन्मुक्तिः सदातनम् ।
तत्रैवाशेषसंस्काराः सञ्चीयन्ते सदैव च ॥ ९७९ ॥

सूक्ष्मत्वेन लये सच्च प्राकृतैरुपचीयते ।
सृष्टिकाले यदा तन्न कुतः संसारसंस्थितिः ॥ ९८० ॥

भगवानेव संस्काररूपोपादानेन स्वाप्नपदार्थान् सृष्ट्वा दर्शयति

संस्कारैर्भगवानेव सृष्ट्वा नानाविधं जगत् ।
स्वप्नकाले दर्शयति

स्वप्नमायासरूपेत्यादिश्रुतिस्मृतिषु स्वाप्नस्य जाग्रत्त्वप्रतीतेरेव भ्रान्तित्वमुक्तम्

भ्रान्तिर्जाग्रत्त्वमेव हि ॥ ९८१ ॥

अननुभूतशिरच्छेदादेः प्रतीतेः स्वप्नस्य भ्रान्तित्वमिति न युक्तं
संसारस्य अनादित्वात् क्वचिज्जन्मनि अनुभवसम्भवात् ।
अत्रापि जन्मनि श्रवणजनितसंस्कारसम्भवात्

अदृष्टे चाश्रुते भावे न भाव उपजायते ।
अदृष्टादश्रुताद्भावान्न भाव उपजायते ॥ ९८२ ॥

इति श्रुतिपुराणोक्तिरनादित्वात्तु युज्यते ।

शशविषाणादीनां जन्मान्तरे अनुभवाभावेऽपि
स्वाप्नप्रतीत्युपादानतत्संस्कारः सम्भवति

कदाचिद्दर्शनायोग्यं यत्तत्रापि विभागतः ॥ ९८३ ॥

दृष्टं समाधिकरणं दृश्यतेऽत्र स च भ्रमः ।

स्वाप्नपदार्थानां वासनोपादानकत्वसमर्थनम्

वासनामात्रमूलत्वाज्जाग्रद्वत् स्पष्टता न च ॥ ९८४ ॥

स्वप्नस्य द्रष्टुः स्वप्नोपलभ्यरथादेः किं भेदः, अथ अभेदः,
उत भेदाभेदौ इति विकल्प्य प्रश्नो न युज्यते

भेदोऽभेदोऽथवा द्वन्द्वमिति प्रश्नो न युज्यते ।
द्रष्टुः स्वप्नस्य दृष्टत्वाद्भेदस्यैवाखिलैर्जनैः ॥ ९८५ ॥

विकल्पप्रश्नदोषाः स्वव्याहत्यादयः तत्त्वनिर्णयविरोधिनः

प्रश्नदोषा हि चत्वारः स्वव्याहतिरसङ्गतिः ।
सिद्धार्थता च वैफल्यं न तैः स्यात्तत्त्वनिर्णयः ॥ ९८६ ॥

वादेऽपि तत्त्वनिर्णयविरोधिनः निग्रहत्वम्

तत्त्वनिर्णयवैलोम्यं स्याद्वादेऽपि हि निग्रहः ।

वादे सम्भावितकिञ्चिन्निग्रहोद्भावनेन न कथावसानं, जल्पवितण्डयोस्तु सर्वमपि निग्रहस्थानमुद्भाव्यं, तेन कथावसानं च भवति

उद्भावनीयमेव स्यान्न कथावसितिर्भवेत् ॥ ९८७ ॥

विजिगीषुकथायां तु कथावसितिकारणम् ।

सिद्धार्थविषयत्वस्य दूषणत्वानङ्गीकारे अतिप्रसङ्गः

परिहारेऽपि सिद्धत्वं दूषणं प्रतिवादिनः ॥ ९८८ ॥

प्रतिज्ञायां तदन्यस्य सिद्धतैव हि साधिका ।

नैयायिकानां मते आश्रयासिद्ध्यादयो दोषाः, तत्त्वतस्तु न ते दोषाः

आश्रयव्याश्रयासिद्धी साध्यासिद्धिश्च दूषणम् ॥ ९८९ ॥

केषाञ्चिन्न च ते दोषा व्याप्तौ सत्यां कथञ्चन ।

भृङ्गत्वादिकं बाधितविषयत्वान्न साधनं, न तु असदाश्रयत्वात्

दोषो व्याहतिरेवास्ति नृभृङ्गास्तित्वसाधने ॥ ९९० ॥

यत्र व्याहतता नास्ति कोऽतिसङ्गोऽस्य साधने ।

न्यायानां प्रत्यक्षागममूलत्वं, तदभावे न्यायाभासत्वम्

प्रत्यक्षागममूलास्तु न्यायाः सर्वे भवन्ति हि ॥ ९९१ ॥

न्यायाभासा अमूलाः स्युः न्यायस्यान्यस्य तौ पुनः ।

अदृष्टव्यभिचारस्यैव हेतोः साध्यसाधकत्वं साक्षिणा सिद्धं प्रमाणबाधे च अदृष्टव्यभिचारित्वं न भवति, अतो बाधस्य दूषणत्वम्

अदृष्टे व्यभिचारे तु साधकं तदिति स्फुटम् ॥ ९९२ ॥

ज्ञायते साक्षिणैवाद्धा मानबाधे न तद्भवेत् ।

सर्वेषां ज्ञानानां मानत्वं साक्षिणैव अवसीयते

यत्साक्षिणैव मानत्वं मानानामवसीयते ॥ ९९३ ॥

रागादिकलुषितं मनः अप्रमाणस्य प्रामाण्यं गृह्णाति तच्च बाधितं भवति

अमानस्य तु मानत्वं मानसत्वाच्चलं भवेत् ।

यथा निरुपाधिकमेव साधनं प्रामाण्योपयोगि तथा
निरुपाधिक एव व्यभिचारः असाधनत्वे हेतुः

उत्सर्गतोऽपि यत्प्राप्तमपवादविवर्जितम् ॥ ९९४ ॥

व्यभिचार्यपवादेन मानमेव भविष्यति ।
अतो हि भोजनादीनामिष्टसाधनतानुमा ॥ ९९५ ॥

मानं व्यवहृतौ नित्यं व्यभिचारो हि तत्र च ।

व्याप्त्याद्यङ्गसाकल्ये व्यधिकरणत्वमात्रेण न दुष्टत्वं, व्यधिकरणस्यापि व्याप्त्यादिसम्पत्तितः साधकत्वं दृष्टम्, अतो व्यधिकरणासिद्धिर्न दोषः

व्याप्तत्वे व्याश्रयत्वं तु कथमेव हि दूषणम् ॥ ९९६ ॥

रोहिण्युदय आसन्नः कृत्तिकाभ्युदिता यतः ।
इत्युक्ते साधनं नो किं न ह्याङ्गैवात्र साधिका ॥ ९९७ ॥

अप्रसिद्धविशेषणत्वमपि न दोषः

अन्यत्सदसतोर्विश्वमिति च व्याहृतेरमा ।
असिद्धसाधने दोषः को व्याप्तिर्यदि विद्यते ॥ ९९८ ॥

व्याप्तिश्च व्यतिरेकेण तत्र तैश्चावगम्यते ।
अप्रसिद्धस्य साध्यस्य साधकत्वं यदेष्यते ॥ ९९९ ॥

लिङ्गस्योक्तौ विशेषोऽयं केन मानेन गम्यते ।
साधनं परमाण्वादेर्यद्यसिद्धस्य चेष्यते ॥ १००० ॥

यथानुभवमेवैतन्नाङ्गीकार्यं कुतस्तदा ।
यत्र नातिप्रसङ्गोऽस्ति मानं न च विपर्यये ॥ १००१ ॥

क्लिष्टकल्पनयैवात्र साध्यमित्यतिदुर्वचः ।

पक्षधर्मत्व-सपक्षसत्त्वादिपञ्चरूपोपपन्नत्वाभावेऽपि परिशेषादीनामनुमानत्वाङ्गीकार इव केवलव्यतिरेकिणोऽपि पञ्चरूपोपपन्नताविरहेऽपि अनुमानत्वमङ्गीकार्यम्

परिशेषो मिथःसिद्धिश्चक्रकस्वाश्रयादयः ॥ १००२ ॥

असिद्धसाधकत्वेन पञ्चावयवतां विना ।
अङ्गीकार्याः समस्तैस्तन्नियमः किंनिबन्धनः ॥ १००३ ॥

वादे सिद्धसाधनतोद्भावनेऽपि कथावसितिर्न भवति, अतो वादत्वहानेरभावात् वादकथायां सिद्धसाधनं निग्रहस्थानम्

सिद्धसाधनतायां च न कथावसितिर्भवेत् ।

वादिप्रतिवादिनोरन्यतरपक्षेऽपि व्यभिचारो हेत्वसिद्धिश्च हेतोर्दूषणमेव

व्यभिचारो हेत्वसिद्धिरेकपक्षेऽपि दूषणम् ॥ १००४ ॥

न अष्टौ दृष्टान्तदोषाः, किन्तु साध्यसाधनवैकल्यमेकमेव

साध्यसाधनवैकल्यं दृष्टान्तस्य

व्यर्थविशेषणत्वव्यर्थविशेष्यत्वे हेतुदूषणे

विशेषणे ।
वैयर्थ्यमेकासिद्धौ च विशिष्टासिद्धिरेव हि ॥ १००५ ॥

प्रथमप्रश्ने अप्रयोजनतादोषोद्भावनं शक्यम्

अप्रयोजनता तत्र प्रथमप्रश्नदूषणम् ।

सिद्धार्थताऽप्रयोजनत्वयोर्न अतिरिक्तनिग्रहस्थानत्वं, किन्तु अधिकेऽन्तर्भावः

सिद्धप्रश्नादिकं यत्तदाधिक्यान्तर्गतं भवेत् ॥ १००६ ॥

अर्थापत्त्युपमानाभावानां न पृथक्प्रमाणत्वम्

अर्थापत्त्युपमाभावा अनुमान्तर्गताः क्वचित् ।
प्रत्यक्षान्तर्गतोऽभावः सुखादेर्नियमेन च ॥ १००७ ॥

अन्यत्र झटिति प्राप्तः

उपक्रमोपसंहारादीनां वाक्यप्रकरणस्थानादीनां च अनुमानेऽन्तर्भावः

प्रारम्भाद्याश्च युक्तयः ।
आगमार्थावसित्यर्था नियतव्याप्तयोऽखिलाः ॥ १००८ ॥

वाक्यं प्रकरणं स्थानं समाख्या च तथाविधाः ।
कुरुपाण्डववत् तेषामुपपत्तेः पृथग्वचः ॥ १००९ ॥

तर्कस्य दूषणानुमानेऽन्तर्भावः

स्वन्यायैः साधनं कार्यं परन्यायैस्तु दूषणम् ।
स्वन्यायैर्दूषणं च स्यात् साधितैः प्रतिवादिनः ॥ १०१० ॥

प्रसङ्गार्थतया प्रोक्ता न सिद्धान्तस्य दूषकाः ।

छलजात्योर्व्याहतिप्रभेदत्वम्, यद्वा छलमसङ्गतं, जातिर्विरोधः

छलं जातिरिति द्वेधा व्याहत्यन्तरमिष्यते ॥ १०११ ॥

छलजात्योर्लक्षणम्

जातिः स्वव्याहतिर्ज्ञेया छलमर्थान्तरोत्तरम् ।

उक्तार्थस्य प्रकृतोपयोगप्रदर्शनम्, प्रमाणाभावात् प्रमाणविरोधात् स्वव्याहतेश्च न स्वप्नस्य अनिर्वचनीयत्वम्

एवं संशोधितन्यायसदागमविरोधतः ॥ १०१२ ॥

नानिर्वाच्यमिह प्रोक्तं मायामात्रपदेन हि ।
विलक्षणं सदसतोरिति हि व्याहतं स्वतः ॥ १०१३ ॥

स्वप्नस्य सदसद्विलक्षणत्वे ब्रह्मणि प्रतियोगित्वरूपधर्माङ्गीकारप्रसङ्गः

प्रतियोगित्वमप्यस्य ब्रह्मणोऽङ्गीकृतं भवेत् ।

प्रतियोगित्वस्य मिथ्यात्वे स्वप्नस्य वा सत्यत्वं, ब्रह्मणो वा मिथ्यात्वं स्यात्

मिथ्या चेत् प्रतियोगित्वं वैलक्षण्यं ततो न हि ॥ १०१४ ॥

अविलक्षणत्वं सत्यं स्यान्मिथ्यात्वं ब्रह्मणस्ततः ।
अनिर्वाच्यस्य सत्त्वं वा

ब्रह्मणो निर्धर्मकत्वनिरासः

यदि धर्मा न केचन ॥ १०१५ ॥

ब्रह्मणो नैव जिज्ञास्यं जिज्ञासा धर्मनिर्णयः ।
इदमित्थमिति ज्ञानं जिज्ञासायाः प्रयोजनम् ॥ १०१६ ॥

इत्थम्भावो हि धर्मोऽस्य न चेन्न प्रतियोगिता ।
इत्यम्भावात्मकान् धर्मानाहुश्च श्रुतयोऽखिलाः ॥ १०१७ ॥

अदृश्यत्वादयोऽप्यस्य गुणा हि प्रभुणोदिताः ।
यदि स्युस्तादृशा धर्माः सर्वज्ञत्वादयो न किम् ॥ १०१८ ॥

अन्यापेक्षा यदि स्युष्टे सत्तैवं देशकालगा ।
देशकालानपेक्षा हि न सत्ता क्वापि दृश्यते ॥ १०१९ ॥

सर्वधर्मोज्झितस्यास्य किं शास्त्रेणाधिगम्यते ।
मिथ्याधर्मविधातुश्च वेदस्यैवाप्रमाणता ॥ १०२० ॥

अप्राप्तां भ्रान्तिमापाद्य किं वेदो मानतां व्रजेत् ।
न हि वेदं विना ब्रह्म वेद्यं धर्माश्च तद्गताः ॥ १०२१ ॥

वेदवेद्यस्य मिथ्यात्वं यदि नैक्यस्य तत्कथम् ।
धर्मारोपोऽपि सामान्यधर्मादीनां हि दर्शने ॥ १०२२ ॥

इदन्तदादिधर्मित्वे धर्मोऽन्यः कल्प्यतेऽत्र हि ।
सर्वधर्मविहीनस्य धर्मारोपः क्व दृश्यते ॥ १०२३ ॥

तदर्थं यदि धर्माणामारोपः सानवस्थितिः ।

सार्वज्ञादेः मिथ्यात्वसिद्धये विश्वस्य भ्रान्तिकल्पितत्वकथनं न युक्तं, विश्वमिथ्यात्वसाधकानुमानस्य गौडपादादिपुरुषप्रणीतागमस्य च अप्रामाण्यात्

ईशतज्ज्ञानवेदाक्षजानुमामातृपूर्विणः ॥ १०२४ ॥

भ्रान्तिर्विश्वस्य येनैव मानाभासेन कल्प्यते ।
तन्मात्रस्यान्यथाभावे किं न स्याद्विश्वसत्यता ॥ १०२५ ॥

येनेदं कल्प्यते भ्रान्तं भ्रान्तिस्तस्यैव किं न सा ।
भ्रान्तत्वे तस्य विश्वारेरीशाद्यभ्रान्तमेव हि ॥ १०२६ ॥

भवेयुर्भ्रान्तयो नृणां नैवेशादेः कथञ्चन ।

विश्वसत्यत्वग्राहिप्रत्यक्षबाधितत्वात् 'नेह नानास्ती'त्याद्यागमः न विश्वमिथ्यात्वप्रतिपादकः

सत्यत्वमक्षजप्राप्तं यदि भ्रान्तमितीष्यते ॥ १०२७ ॥

सर्वप्रमाणप्रामाण्यं साक्षिवेद्यम्

प्रामाण्यमागमस्यापि प्रत्यक्षादन्यतः कुतः ।
साक्षिप्रत्यक्षतो ह्येव मानानां मानतेयते ॥ १०२८ ॥

साक्षिणः स्वप्रकाशत्वात् न अनवस्था

साक्षिणः स्वप्रकाशत्वमनवस्था ततो न हि ।

ऐक्यागमस्य प्रत्यक्षतः न प्राबल्यम्

तात्कालिकं प्रमाणत्वमक्षजस्य यदा भवेत् ॥ १०२९ ॥

ऐक्यागमस्य किं न स्यात् तस्याप्येतादृशं यदि ।
ऐक्यप्रमाणमिथ्यात्वं यदा विश्वस्य सत्यता ॥ १०३० ॥

ऐक्यवाक्यस्य मानत्वं यद्यबाध्यमितीष्यते ।
अक्षजस्यापि मानत्वं नाबाध्यं किमितीष्यते ॥ १०३१ ॥

अद्वैतहानिसामान्यान्न विशेषश्च कश्चन ।
यदि स्वतस्त्वं प्रामाण्ये विश्वसत्ता कथं न ते ॥ १०३२ ॥

प्रत्यक्षस्य प्रामाण्यं तात्कालिकमिति व्याहतम्

प्रामाण्यस्य च मर्यादा कालतो व्याहता भवेत् ।
कालान्तरेऽप्यमानं चेदिदानीं मानता कुतः ॥ १०३३ ॥

विश्वमिथ्यात्वप्रतिपादकानुमानागमयोः मोक्षसमये अबाधितत्वे अद्वैतहानिः,
बाधितत्वे विश्वस्य पुनः प्राप्त्या मोक्षाभावप्रसङ्गः

मिथ्यात्वमानं मोक्षेऽपि मानं किं नेति भण्यताम् ।
मानत्वेऽद्वैतहानिः स्यादमानत्वेऽप्यमोक्षता ॥ १०३४ ॥

विश्वस्य पुनरापत्तिर्मिथ्यामानं यदा न मा ।

मुक्तेः सत्त्वे अद्वैतहानिः, असत्त्वे अमुक्तत्वप्रसङ्गः,
मुक्तेः कालाधिकरणकत्वेन कालस्यासत्त्वे मोक्षाभावः

अस्ति चेन्मुक्त्यवस्था च द्वैतापत्तिरतोऽन्यथा ॥ १०३५ ॥

अमुक्तत्वं तथा काले कालाधीना हि मुक्तता ।
काल एवागमोऽप्याह मुक्तिं कालनिवर्तने ॥ १०३६ ॥

मुक्तेरपि निवृत्तिः स्यात् संसारित्वमतो भवेत् ।

प्रत्यक्षसिद्धस्य अनुमानागमाभ्यां न बाधः, देहात्मत्वं न प्रत्यक्षसिद्धं,
किन्तु अनुमानाभासगम्यम्

क्व च प्रत्यक्षतः प्राप्तमनुमागमबाधितम् ॥ १०३७ ॥

देहात्मत्वं यदि न तत्प्राप्तं प्रत्यक्षतः क्वचित् ।
मम देह इति ह्येव न देहोऽहमिति प्रमा ॥ १०३८ ॥

उपचारश्च कृष्णोऽहमिति कर्दमलेपने ।
वस्त्रस्य यद्वदेवं स्यात् यद्युपाधिकृतं तदा ॥ १०३९ ॥

स्वतः शुक्लत्ववत् कार्ष्ण्यं न ममेति प्रतीयते ।

देहादिसङ्घातस्य आत्मनश्च अन्योन्यं भेदः तद्धर्माणां च
परस्परमसंसर्गः प्रतीयत एव

कथं च भेदो देहादे(दि)रात्मनो न प्रतीयते ॥ १०४० ॥

जातमात्रा मृगा गावो हस्तिनः पक्षिणो झषाः ।
भयाभयस्वभोगादौ कारणानि विजानते ॥ १०४१ ॥

अस्मृतौ पूर्वदेहस्य विज्ञानं तत्कथं भवेत् ।
अन्वयव्यतिरेकादेरनुसन्धानविस्मृतौ ॥ १०४२ ॥

यदा देहान्तरज्ञानं देहैक्यावसितिः कुतः ।

देहात्मभेदज्ञानेऽपि आत्मनो देहे व्यासक्तत्वात् अभिन्नवद्व्यवहारः

व्यासक्तत्वादात्मनो देहे व्यवहारेष्वपाटवात् ॥ १०४३ ॥

भेदज्ञानेऽपि चाङ्गारवह्निवत् स्वाविविक्तवत् ।
भवन्ति व्यवहाराश्च न हि प्रत्यक्षगानपि ॥ १०४४ ॥

अर्थान्यथानुभवतः प्रतिपादयितुं क्षमाः ।
लोकाः

प्रत्यक्षप्राप्तस्य न अनुपजीव्यागमानुमानाभ्यां बाधः इत्युक्तार्थोपसंहारः

ततो हि प्रत्यक्षसिद्धं नान्येन केनचित् ॥ १०४५ ॥

शक्यं वारयितुं क्वापि

प्रत्यक्षस्य न वर्तमानमात्रग्राहित्वनियमः, उत्तरकालस्य साक्षिवेद्यत्वाभावे मोक्षस्यापि तदवेद्यत्वं स्यात्, ततश्च तदर्थः प्रयत्नो न स्यात्

तच्चेन्नोत्तरगोचरम् ।
कथमेवोत्तरः कालस्तद्गो मोक्षश्च गम्यते ॥ १०४६ ॥

पदार्थेषु प्रमाणान्तरेण शक्तिग्रहानन्तरमेव वाक्यानां वाक्यार्थबोधकत्वात् साक्षिणा उत्तरकालाद्यनवगतौ न आगमेन तदवगतिः

आगमोऽपि हि सामान्ये सिद्धे प्रत्यक्षतः पुनः ।
विशेषं गमयेदेव कथं शक्तिग्रहोऽन्यथा ॥ १०४७ ॥

अतीतानागतार्थेषु जाते शक्तिग्रहेऽखिलम् ।
विशेषं गमयेद्वाक्यं न तदज्ञातशक्तिके ॥ १०४८ ॥

शक्तिश्चेद्वर्तमाने स्यान्नातीतानागतं वदेत् ।
यदि शक्तिग्रहोऽन्यत्र कथं स स्यात्तदग्रहे ॥ १०४९ ॥

"सामान्याकार एव शब्दवाच्यो, विशेषस्तु लक्ष्य एव । अतो न शक्तिग्रहाय अतीतादिग्रहापेक्षा"
इति मीमांसकमतस्य निरासः

सामान्यं दृष्टमेवासावन्यत्र गमयेद्यदि ।
सामान्यवर्जितं वस्तु स्वरूपं गमयेत्कथम् ॥ १०५० ॥

न स्वरूपत्वसामान्यं केनाप्यङ्गीकृतं क्वचित् ।
स्वरूपं चेदनुगतं व्यावृत्तं तत्र किं भवेत् ॥ १०५१ ॥

सर्वानुगतधर्माणामन्ते हि स्वत्वमिष्यते ।
किं व्यावृत्तमिति प्रश्ने स्वरूपमिति केवलम् ॥ १०५२ ॥

स्यादुत्तरं ततोऽन्यच्चेत्तदेव स्वयमेव नः ।
एवं व्यावृत्तरूपेऽपि यदा शक्तिग्रहो भवेत् ॥ १०५३ ॥

तस्य सामान्यतो ज्ञानं विना स च भवेत्कुतः ।

सर्वं वस्तु व्यावृत्तरूपं सामान्यरूपं च, स्वरूपाभिन्नस्य प्रतिनियतस्य सामान्याकारस्य अभ्युपगमः

अतो विशेषसामान्यरूपं सर्वमपीष्यते ॥ १०५४ ॥

एकस्यैव वस्तुनो विशेषवलेन व्यावृत्तानुवृत्तबुद्धिजनकत्वेन विशेषसामान्यरूपता

व्यावृत्तं यच्च सामान्यं तदेव स्याद्विशेषतः ।

पदार्थानां न परस्परमेकधर्मता

न चैकधर्मता तेन पदार्थानां परस्परम् ॥ १०५५ ॥

धर्माणां भेददृष्ट्यैव तत्सादृश्यस्य दर्शनात् ।

अनुगतसामान्याभावेन वर्तमानातीतानागताः साक्षिगोचराः

अतः सर्वे पदार्थाश्च सामान्यात्साक्षिगोचराः ॥ १०५६ ॥

सर्वमित्येव विज्ञानं सर्वेषां कथमन्यथा ।

अनुगतसामान्याभावेऽपि सादृश्यात् शक्तिग्रहः

किञ्चित्सादृश्यविज्ञानादखिलस्यापि वस्तुनः ॥ १०५७ ॥

शब्दशक्तिग्रहश्च स्यात् तत्तत्सादृश्यमानतः ।

मानसप्रत्यक्षस्य अतीतार्थगोचरत्वम्

प्रत्यक्षं मानसं चैव यदातीतार्थगोचरम् ॥ १०५८ ॥

तदा स्मृतिप्रमाणत्वमतीतत्वविशेषितम् ।
आधिक्यमनुभूतात् तु यदातीतत्वमिष्यते ॥ १०५९ ॥

बाधाभावात् स्मृतेः प्रमाणत्वम्

मानता च कथं न स्यात्स्मृतेर्बाधश्च नात्र हि ।

प्रत्यभिज्ञायाः अतीतादिग्राहित्वम्

मानत्वं प्रत्यभिज्ञाया अपि सर्वानुभूतिगम् ॥ १०६० ॥

अतीतवर्तमानत्वधर्मिणी सा च दृश्यते ।

प्रत्यभिज्ञायाः प्रत्यक्षत्वसमर्थनम्

न च सा स्मृतिमात्रार्था तदिदन्त्वग्रहैकतः ॥ १०६१ ॥

'प्रत्यक्षस्य न वर्तमानमात्रग्राहित्वनियमः' इत्युक्तार्थोपसंहारः

अतो न वर्तमानैकनियमः स्याद्ग्रहेऽक्षजे ।

प्रमाणप्रमेयप्रमात्रतिरिक्तप्राकट्यापरपर्यायज्ञातताया: निरासः

न च प्रमाणतोऽन्या स्यात्प्रमितिर्नाम कुत्रचित् ॥ १०६२ ॥

मानाभावाद्गौरवाच्च कल्पनायाः किमेतया ।
मयैतज्ज्ञातमिति तु साक्षिगं ज्ञानगोचरम् ॥ १०६३ ॥

ज्ञानमेव ततोऽन्या न प्रमितिर्नाम दृश्यते ।

प्रमाणप्रमेयप्रमातृरूपत्रिविधविश्वस्य अबाध्यत्वप्रतिपादनोपसंहारः

मानमातृप्रमेयाणां तदुच्छित्तिर्न हि क्वचित् ॥ १०६४ ॥

स्वप्नस्य न मिथ्यात्वं, तस्य जाग्रत्त्वमात्रे भ्रमः

स्वाप्नानामपि चैतेषां न बाधो दृश्यते क्वचित् ।
जाग्रत्त्वमात्रमत्रैकमन्यथा दृश्यते स्फुटम् ॥ १०६५ ॥

अतो मिथ्या न च स्वप्नो जाग्रद्वज्जाग्रदेव च ।
आत्मवत्क्वचिदात्मा च स्यादेव भ्रमगोचरः ॥ १०६६ ॥

एतावता न मिथ्यासौ स्वप्ने जागरिते तथा ।
यद्यात्मन्यन्यथा दृश्यं भ्रान्तमत्रापि तद्भवेत् ॥ १०६७ ॥

अबाधितानुवृत्तेस्तु स्वप्नादेर्भ्रान्तता कुतः ।

जाग्रत्स्वप्नयोः मिथ्यात्वानुमानमनुपपन्नम्

न च काचित् प्रमा विश्वभ्रान्तत्वे सर्वमेव च ॥ १०६८ ॥

अभ्रान्तत्वे प्रमाणं तु कथं तद्भ्रान्तता भवेत् ।

स्वप्नजागरयोः भ्रान्तत्वं साधयतः मतमपि भ्रान्तं, अशेषदोषदुष्टम्

किञ्च भ्रान्तत्ववादी स भ्रान्तत्वं स्वमतस्य च ॥ १०६९ ॥

अङ्गीकरोति नियतं तत्र सम्प्रतिपन्नता ।
वादिनोस्तेन चाभ्रान्तं विश्वमेव भविष्यति ॥ १०७० ॥

भ्रान्तत्वभ्रान्तता चेत् स्यात् कथं नाभ्रान्तिसत्यता ।
अशेषदोषदुष्टं तन्मतं हेयं बुभूषुभिः ॥ १०७१ ॥

येन स्वमतहेयत्वं स्वयमङ्गीकृतं सदा ।
भ्रान्तित्वाद्दुर्घटत्वस्य भूषणत्वाच्च केवलम् ॥ १०७२ ॥

उन्मत्तोऽपि कथं तस्य मतं स्वीकर्तुमिच्छति ।
ईशशक्तेरचिन्त्यत्वान्महोन्मत्तैः प्रवर्तितम् ॥ १०७३ ॥

मायाशब्दार्थनिरूपणम्, जीववासना उपादानकारणम्,
ईश्वरप्रज्ञा निमित्तकारणम्

अतः प्रज्ञात्र मायोक्ता जैव्युपादानमेव सा ।
निमित्तमैश्वरी मुख्या

मायामात्रशब्दार्थः

निर्मितं त्रातमेव च ॥ १०७४ ॥

ताभ्यां सह पृथक् चैव मायामात्रमितीर्यते ।
उभाभ्यां मातमैश्वर्या त्रातं सह पृथक् ततः ॥ १०७५ ॥

प्रज्ञावासनयोः मन उपादानकत्वम्, अत एव अत्र जैवीप्रज्ञाशब्दः वासनायां लाक्षणिकः

प्रज्ञात्मकं मनो येन मनोरूपाश्च वासनाः ।
धीर्भीरिति मनस्त्वेवेत्याह च श्रुतिरञ्जसा ॥ १०७६ ॥

मनः चिदचिन्मिश्रम्, जीवः सर्वाः सांसारिकीः अवस्थाः यावन्मुक्ति मनसैव पश्यति

चिदचिन्मिश्रमेवैतन्मनो यावच्च संसृतिः ।
तेनावस्था इमाः सर्वा जीवः पश्यति सर्वदा ॥ १०७७ ॥

'कात्स्न्र्येन अनभिव्यक्तस्वरूपत्वात्' इति सूत्रांशव्याख्यानम्

मनोविकारा विषयाः स्वाप्रा यद्वाह्यवन्न ते ।
स्थूला भवन्त्यतस्तेषां स्पष्टता न तथा क्वचित् ॥ १०७८ ॥

क्वचित्स्पष्टा अपि स्युष्टे वासना मानसी च सा ॥

॥ इति सन्ध्याधिकरणम् ॥ १ ॥

* * *

॥ पराभिध्यानाधिकरणम् ॥

ॐ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॐ ॥ ३-२-५ ॥

न केवलं स्वप्न ईश्वरेच्छाधीनः, किन्तु तत्तिरोधानं तदभिव्यक्तिरपि

ईशेच्छयाऽन्तर्दधाति व्यज्यते च पुनस्तया ॥ १०७९ ॥

॥ इति पराभिध्यानाधिकरणम् ॥ २ ॥

* * *

॥ देहयोगाधिकरणम् ॥

ॐ देहयोगाद्वासोऽपि ॐ ॥ ३-२-६ ॥

द्वितीयतृतीयाधिकरणार्थोपसंहारः

सृष्ट्वैव वासनाभिश्च प्रपञ्चं स्वाप्नमीश्वरः ।
वासनामात्रतां तस्य नीत्वाऽन्तर्धापयत्यजः ॥ १०८० ॥

॥ इति देहयोगाधिकरणम् ॥ ३ ॥

* * *

॥ तदभावाधिकरणम् ॥

ॐ तदभावो नाडीषु तच्छ्रुतेरात्मनि ह ॐ ॥ ३-२-७ ॥

॥ इति तदभावाधिकरणम् ॥ ४ ॥

* * *

॥ प्रबोधाधिकरणम् ॥

ॐ अतः प्रबोधोऽस्मात् ॐ ॥ ३-२-८ ॥

॥ इति प्रबोधाधिकरणम् ॥

* * *

॥ कर्मानुस्मृत्यधिकरणम् ॥

ॐ स एव च कर्मानुस्मृतिशब्दविधिभ्यः ॐ ॥ ३-२-९ ॥

॥ इति कर्मानुस्मृत्यधिकरणम् ॥ ६ ॥

* * *

॥ सम्पत्त्यधिकरणम् ॥

ॐ मुग्धेऽर्धसम्पत्तिः परिशेषात् ॐ ॥ ३-२-१० ॥

परमेश्वर एव जीवं सुषुप्तिबोधमोहान् प्रापयति

सुषुप्तिबोधमोहांश्च स्ववशास्तद्वशं सदा ।
जीवं नयति जीवेशः

परमेश्वर एव सर्वेषां सर्वावस्थाप्रेरकः, न तु केषाञ्चित् कादाचित्कावस्थाप्रेरकः

नान्यः कर्तास्य कश्चन ॥ १०८१ ॥

॥ इति सम्पत्त्यधिकरणम् ॥ ७ ॥

* * *

॥ न स्थानतोऽप्यधिकरणम् ॥

ॐ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॐ ॥ ३-२-११ ॥

सुरनरादिशरीरेषु प्रतिशरीरं दक्षिणाक्ष्यादिस्थानेषु स्वप्नादिकर्ता न स्थानभेदेन भिन्नः

न स्थानभेदतोऽप्यस्य भेदः कश्चित् परेशितुः ।
सर्वत्राशेषदोषोज्झपूर्णकल्याणचिद्गुणः ॥ १०८२ ॥

ॐ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॐ ॥ ३-२-१२ ॥

ॐ अपि चैवमेके ॐ ॥ ३-२-१३ ॥

'कार्यकारणबद्धौ तावि'त्यादिश्रुत्या परमात्मनि भिन्नत्वाल्पगुणत्वादिप्रतीतिरित्याक्षेपो न युक्तः । सकलश्रुतिस्मृतीतिहासपुराणानां परमेश्वरस्य अशेषदोषदूरत्वे समस्तगुणपरिपूर्णत्वे महातात्पर्यात् तद्विरुद्धस्य मानत्वाभावात्

तद्विरुद्धं तु यत्तत्र मानं नैव क्वचिद्भवेत् ।
महातात्पर्यरोधेन कथं तन्मानमत्र तु ॥ १०८३ ॥

मोक्षादिप्रयोजनेन शास्त्रेण तत्साधनभूतं भगवद्गुणोत्कर्षनिर्दोषताज्ञानमेवोत्पादनीयमिति तत्रैव अशेषशास्त्रस्य महातात्पर्यम्

दुःखाप्ययसुखावाप्तिहेतुत्वेनैव वेदवाक् ।
भवेन्मानं तदीशानात् प्रसन्नादेव नान्यथा ॥ १०८४ ॥

प्रसन्नता गुणोत्कर्षज्ञानादेव हि केवलम् ।
निर्दोषतापरिज्ञानादपि नान्येन केनचित् ॥ १०८५ ॥

निर्दोषाशेषसद्गुणपरमात्मज्ञानं प्रसादद्वारा मोक्षसाधनमित्यत्र प्रमाणवचनानि

"यो मामशेषदोषोज्झं गुणसर्वस्वबृंहितम् ।
जानात्यस्मै प्रसन्नोऽहं दद्यां मुक्तिं न चान्यथा" ॥ १०८६ ॥

"यो मामशेषाभ्यधिकं विजानाति स एव माम् ।
विजानात्यखिलांस्तस्य दद्यां कामान् परं पदम्" ॥ १०८७ ॥

'यो मामेवमसम्मूढः' 'किं मां निन्दन्ति शत्रवः ।'
इत्यादिवेदस्मृतिगवाक्यैरेवावसीयते ॥ १०८८ ॥

उक्तार्थे अनुमानम्

लोकतश्च प्रसादेन मुक्तिः सगुणवेदनात् ।

महातात्पर्यविरुद्धवचनानामन्यार्थता

महातात्पर्यमुख्यस्य विरोधादत एव हि ॥ १०८९ ॥

दोषित्वनिर्गुणत्वाल्पगुणत्वादि कथञ्चन ।
नार्थः श्रुतिपुराणादेः

सकलशास्त्रस्य भगवद्गुणोत्कर्षे महातात्पर्यमित्यत्र भगवद्गीतासमाख्या

तद्विरुद्धोऽखिलस्य च ॥ १०९० ॥

अर्थः स्वयं विनिर्णीतो वासुदेवेन सादरम् ।
"इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ॥ १०९१ ॥

एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ।"
इति

अधिकरणार्थोपसंहारः

अतोऽखिलसच्छास्त्रविरुद्धत्वेन नानुमा ॥ १०९२ ॥

वर्तते तत्र तेनेशो निर्णीतोऽखिलसद्गुणः ।

॥ इति नस्थानतोऽप्यधिकरणम् ॥ ८ ॥

* * *

॥ अरूपाधिकरणम् ॥

ॐ अरूपवदेव हि तत्प्रधानत्वात् ॐ ॥ ३-२-१४ ॥

ॐ प्रकाशवच्चावैयर्थ्यम् ॐ ॥ ३-२-१५ ॥

ॐ आह च तन्मात्रम् ॐ ॥ ३-२-१६ ॥

ॐ दर्शयति चाथो अपि स्मर्यते ॐ ॥ ३-२-१७ ॥

॥ इति अरूपाधिकरणम् ॥ ९ ॥

* * *

॥ उपमाधिकरणम् ॥

ॐ अत एव चोपमा सूर्यकादिवत् ॐ ॥ ३-२-१८ ॥

भेदाभेदमतनिरासः

'जीवः ब्रह्माभिन्नः चेतनत्वात्, ब्रह्मांशत्वात्' इत्यनुमानं न युक्तं
'जीवो ब्रह्माभिन्नो न भवति तदाभासत्वात्' इत्यनुमानविरोधात्

न च चित्त्वादभिन्नत्वं जीवस्येशवदाप्यते ॥ १०९३ ॥

यत आभासतामेव श्रुतिरस्य वदत्यलम् ।

जीवस्य ब्रह्माभासत्वे श्रुतिवचनानि

"यथैषा पुरुषे छाया एतस्मिन्नेतदाततम्" ॥ १०९४ ॥

"छाया यथा पुंसदृशी पुमधीना च दृश्यते ।
एवमेवात्मकाः सर्वे ब्रह्माद्याः परमात्मनः" ॥ १०९५ ॥

"सत्ताप्रतीतिकार्येषु पुमधीनो यथेयते ।
आभास एवं पुरुषा मुक्ताश्च परमात्मनः" ॥ १०९६ ॥

जीवस्य ब्रह्माभासत्वं न साक्षात्, किन्तु रमाब्रह्मादिपरम्परया

"छाया विष्णो रमा तस्याश्छाया धाता विशेषकौ ।
तस्येन्द्रकामौ च तयोस्तयोरन्येऽखिला अपि" ॥ १०९७ ॥

हरेर्ब्रह्मास्य गीस्तस्या विशेषाविन्द्र एतयोः ।
मारश्चाभासकाः सर्व एतयोस्तदधीनतः ॥ १०९८ ॥

परमेश्वरः पूर्णशक्तिः, अन्ये सर्वे अल्पशक्तयः,
परमेश्वराभासत्वात् जीवाः तेन अत्यन्तभिन्नाः

"सर्वेऽल्पशक्तयश्चैव पूर्णशक्तिः परो हरिः ।
चेतनत्वेऽपि भिन्नास्ते तस्मादेतेन सर्वदा" ॥ १०९९ ॥

इत्यादिश्रुतिवाक्येभ्यो ज्ञायते भेद एव हि ।

जीवस्य परमेश्वराभासत्वं श्रुतियुक्तिविरुद्धं, अतः समुदायैक्यमङ्गीकार्यमित्याशङ्का

आभासत्वं हि निर्णीतं जीवस्य परमात्मनः ॥ ११०० ॥

तन्न युक्तं यदाभास उपाध्यायत्त ईयते ।
उपाध्यायत्तताभावादाभासत्वविरोधतः ॥ ११०१ ॥

चेतनत्वेन चांशत्वात् समुदायैक्यमापतेत् ।

समुदायैक्याङ्गीकारे समुदायांशयोः जीवेश्वरयोः भेदोऽपि सम्भवति

अतः पृथक्त्वमुदितं समुदायांशयोर्भवेत् ॥ ११०२ ॥

समुदायैक्यस्वरूपम् । ब्रह्म एकमेव तत्त्वं मायासम्बन्धादीश्वरतामापद्यते,
जीवाः ब्रह्मणोंऽशाः भिन्नाभिन्नाः

ईशाख्या समुदाये स्यादीशरूपेष्विवोदिता ।

देहाद्युपाधीनामात्यन्तिकापाये जीवाः स्वाभाविकं ब्रह्मत्वमापद्यन्ते

अतो देहाद्युपाधीनामपाये समता भवेत् ॥ ११०३ ॥

ईशरूपैः

सूर्यकादिवत् उपाधिनिमित्तमाभासत्वं जीवस्य न सम्भवतीत्याक्षेपः

अथाभासा मुख्यतः सूर्यकादिवत् ।
यदा तदोपाध्यायत्तरूपाणां नाशिता भवेत् ॥ ११०४ ॥

एतदाशङ्कानिवृत्त्यर्थं 'अत एव चोपमा' इति सूत्रभागः

इत्याशङ्कानिवृत्त्यर्थमाह वेदाधिपः प्रभुः ।
अत एवोपमेत्येव च

परमात्माधीनत्व-परमात्मसदृशत्वाभ्यां जीवस्य परमात्माभासत्वं
न तु उपाध्यधीनत्वतन्नाशनाश्यत्वाद्यैः

अन्याभासविशेषिताम् ॥ ११०५ ॥

यदुक्तं तदधीनत्वं सर्वावस्थास्वशेषतः ।
जीवस्य सदृशत्वं च चित्त्वमात्रं न चापरम् ॥ ११०६ ॥

तावन्मात्रेण चाभासो रूपमेषां चिदात्मनाम् ।
नोपाध्यधीनताद्यैश्च नातिसाम्यं निदर्शने ॥ ११०७ ॥

किञ्चित्सुखादिसादृश्यमपीशेनासुरानृते ।

आभासशब्दार्थनिरूपणम्

तत आभासते नित्यं तद्वदाभासतेऽपि च ॥ ११०८ ॥

भानमस्तित्वमपि चैवासमन्ताद्यतस्ततः ।
जीव आभास उद्दिष्टः सदैव परमात्मनः ॥ ११०९ ॥

न जलायत्तसूर्यादिप्रतिबिम्बोपमत्वतः ।

सूत्रे एवशब्दः तदधीनत्वं, चशब्दः किञ्चित् सादृश्यं च अवधारयतः

तदधीनत्वमेवेति किञ्चित्सादृश्यमेव च ॥ १११० ॥

सम्प्रकाशयतः सूत्रगतौ

समुदायैक्यं सर्वप्रमाणविरुद्धम्

अखिलमानतः ।
जीवेशभेददृष्ट्यैव समुदायैकता कुतः ॥ ११११ ॥

'सर्वोपेते'त्यादिसूत्रेण सर्वशक्तेः ब्रह्मणः निर्दोषित्वस्योक्तत्वेन दोषिणा जीवेनैक्यं न युज्यते

अशेषदोषराहित्यं सर्वशक्तित्वतो हरेः ।
'सर्वोपेते'ति कथितमत ऐक्यं क्व दोषिणा ॥ १११२ ॥

उपाधिनिमित्तदोषवत्त्वं न घटते

अशेषशक्तियुक्तश्चेत्स्वातन्त्र्याद्दोषवान् कथम् ।

'जीवब्रह्मणोरैक्येऽपि ब्रह्मणो जीवगतदुःखाद्यनुसन्धानाभावात् न दोषः' इत्यादिपरिहारनिरासः

अनुसन्धानरहितमैक्यं चेदेकता न तत् ॥ १११३ ॥

चेतनैक्येऽनुसन्धानं प्रमाणं नैव चापरम् ।
अनुसन्धानरहितं समुदायैक्यमेव चेत् ॥ १११४ ॥

चेतनेष्वस्तु तन्नाममात्रमेव यतस्ततः ।
मुक्तौ स्यादनुसन्धानमित्यपि स्यात् सुदुष्करम् ॥ १११५ ॥

सर्वज्ञ एकतां नानुसन्धत्ते नैव सा यतः ।
पश्चात्स्यादनुसन्धानं चेन्मिथ्याज्ञानिता भवेत् ॥ १११६ ॥

विद्यमानानुसन्धानं न चेदज्ञत्वमापतेत् ।
असदैक्यं भवेत्पश्चाद्यदि स्यात् सप्तमो रसः ॥ १११७ ॥

संसारे मोक्षे च समुदायैक्यमिति पक्षस्य निरासः

समुदायैक्यमेतस्माद्दूरतोऽपाकृतं सदा ।

मत्स्याद्यवताराणां तु परस्परं परमात्मना च न भेदः

अतोऽशेषगुणोन्नद्धं निर्दोषं यावदेव हि ॥ १११८ ॥

तावदेवेश्वरो नाम तत्र भेदोऽपि न क्वचित् ।
"नेह नानास्ति किमपि हरयोऽयमयं हि सः" ॥ १११९ ॥

इत्यादिश्रुतिमानेन

इन्द्रार्जुनाद्यंशेषु अनुसन्धानप्रकारः

जीवांशाः सर्व एव च ।
नियमेनानुसन्धानवन्तो यद्येकता स्वतः ॥ ११२० ॥

अंशिनोऽशेषसन्धानमत्यल्पस्यापि विद्यते ।
भुवि जातेन चांशेन सुखदुःखादि तद्गतम् ॥ ११२१ ॥

अनुभूयते विशेषस्तु कश्चिदीशकृतो भवेत् ।
ईशस्याचिन्त्यशक्तित्वान्नाशक्यं क्वापि विद्यते ॥ ११२२ ॥

जीवेश्वरैक्ये ईश्वरस्य ईशतैव अनुपपन्ना

सेशतानुपपन्नैव यदि जीवैकतास्य हि ।
अनीशस्येशतेत्येव विरुद्धं सर्वमानतः ॥ ११२३ ॥

उपजीव्यविरोधात् जीवैश्वरैक्ये श्रुतिः न प्रमाणम्

ईशत्वेनैव विज्ञातमनीशत्वेन चेत् श्रुतिः ।
अनीशत्वेन विज्ञातमीशत्वेनाथवादिशेत् ॥ ११२४ ॥

उपजीव्यविरोधेन नैव मानत्वमेष्यति ।

अघटितघटनाशक्त्या ईशत्वानीशत्वयोरेकत्र समावेशकल्पना न युक्ता

अत एवेशतासिद्धेर्न किञ्चिच्छक्यमस्य च ॥ ११२५ ॥

परमात्मशक्त्या अघटितघटनाकल्पनाप्रकारः

ईशत्वेऽनीशभेदेन श्रुत्या सम्यक्प्रकाशिते ।
अयुक्तमपि चान्यत्र युक्तं भवति तद्बलात् ॥ ११२६ ॥

अतोऽन्यत्रापि यद्दृष्टं तदीशेनैव कल्प्यते ।
श्रुत्याभासाप्तमपि न हीशत्वपरिपन्थि यत् ॥ ११२७ ॥

उक्तार्थे ब्रह्मतर्कवचनानि

ईशोऽनीशो जगन्मिथ्या दुःखी मुक्तो भिदा न हि ।
इति प्रतिज्ञाव्याघातः सर्वदोषाधिकाधिकः ॥ ११२८ ॥

इति हि ब्रह्मतर्कोक्तिरतिहेयमतोऽखिलैः ।
बुभूषुभिर्मतमिदं जीवेशाभेदवादिनः ॥ ११२९ ॥

नायुक्तमीशितुः किञ्चिदीशत्वस्याविरोधि यत् ।
यदीशत्वविरोधि स्यात् तदेवायुक्तमञ्जसा ॥ ११३० ॥

ईशत्वस्याविरोधेन योजयित्वाखिलाः प्रमाः ।
सिद्धेशत्वेन चायुक्तमपि हीशेन योजयेत् ॥ ११३१ ॥

मानतः प्राप्तमखिलं नामानं योजयेत्क्वचित् ।
इति हि ब्रह्मतर्कोक्तिरतो युक्तमिहोदितम् ॥ ११३२ ॥

॥ इति उपमाधिकरणम् ॥ १० ॥

* * *

अरूपाधिकरणस्थसूत्रचतुष्टयतात्पर्यनिरूपणम्, प्राकृतरूपरहितत्वादरूपं ब्रह्म

स चाप्राकृतरूपत्वादरूपः स्वगुणात्मकम् ।
रूपमस्य शिरः पाणिपादाद्यात्मकमिष्यते ॥ ११३३ ॥

अतो नानित्यता नैव श्रुतिद्वयविरोधिता ।
यथा हि तैजसस्यैव प्रकाशस्योज्झितावपि ॥ ११३४ ॥

आत्मैव ज्योतिरित्याह जीवस्येशं श्रुतिस्तथा ।

॥ अम्बुवदधिकरणम् ॥

ॐ अम्बुवदग्रहणात्तु न तथात्वम् ॐ ॥ ३-२-१९ ॥

॥ इति अम्बुवदधिकरणम् ॥ ११ ॥

* * *

॥ वृद्धिह्रासाधिकरणम् ॥

ॐ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॐ ॥ ३-२-२० ॥

ॐ दर्शनाच्च ॐ ॥ ३-२-२१ ॥

'अथात आनन्दस्य मीमांसे'त्यादिश्रुत्या मुक्तौ आनन्दस्य साध्यस्य तारतम्यावगमात् साधनभूतायाः भक्तेरपि तारतम्यमावश्यकम्

तद्भक्तितारतम्येन तारतम्यं विमुक्तिगम् ॥ ११३५ ॥

ब्रह्मादीनां च सर्वेषामानन्दादेर्यथाक्रमम् ।

॥ इति वृद्धिह्रासाधिकरणम् ॥ १२ ॥

* * *

॥ पालकत्वाधिकरणम् ॥

ॐ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॐ ॥ ३-२-२२ ॥

॥ इति पालकत्वाधिकरणम् ॥ १३ ॥

* * *

॥ अव्यक्तत्वाधिकरणम् ॥

ॐ तदव्यक्तमाह हि ॐ ॥ ३-२-२३ ॥

ॐ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॐ ॥ ३-२-२४ ॥

ॐ प्रकाशवच्चावैशेष्यम् ॐ ॥ ३-२-२५ ॥

ॐ प्रकाशश्च कर्मण्यभ्यासात् ॐ ॥ ३-२-२६ ॥

ॐ अतोऽनन्तेन तथा हि लिङ्गम् ॐ ॥ ३-२-२७ ॥

॥ इति अव्यक्तत्वाधिकरणम् ॥ १४ ॥

* * *

॥ अहिकुण्डलाधिकरणम् ॥

ॐ उभयव्यपदेशात्त्वहिकुण्डलवत् ॐ ॥ ३-२-२८ ॥

ॐ प्रकाशाश्रयवद्वा तेजस्त्वात् ॐ ॥ ३-२-२९ ॥

ॐ पूर्ववद्वा ॐ ॥ ३-२-३० ॥

ॐ प्रतिषेधाच्च ॐ ॥ ३-२-३१ ॥

॥ इत्यहिकुण्डलाधिकरणम् ॥ १५ ॥

* * *

॥ परमताधिकरणम् ॥

ॐ परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॐ
॥ ३-२-३२ ॥

ॐ दर्शनात् ॐ ॥ ३-२-३३ ॥

ॐ बुद्ध्यर्थः पादवत् ॐ ॥ ३-२-३४ ॥

॥ इति परमताधिकरणम् ॥ १६ ॥

* * *

॥ स्थानविशेषाधिकरणम् ॥

ॐ स्थानविशेषात्प्रकाशादिवत् ॐ ॥ ३-२-३५ ॥

ब्रह्माद्यानन्दानां भगवदानन्दप्रतिबिम्बत्वेऽपि
साधनभूतभक्त्यादिवैचित्र्यात् वैचित्र्यम्

प्रतिबिम्बवदप्येषामानन्दोऽन्यगुणा यथा ॥ ११३६ ॥

ॐ उपपत्तेश्च ॐ ॥ ३-२-३६ ॥

बिम्बभूतनारायणशक्त्या च प्रतिबिम्बेषु वैचित्र्यम्

नारायणगुणाधीनश्च

ब्रह्मादिजीवानन्दः अत्यल्पत्वात् बिम्बभूतभगवदानन्दाद्भिन्नः

अत्यल्पस्तदपेक्षया ।

तस्माद्भिन्नश्च सततं

ब्रह्मादिजीवानन्दस्य अत्यल्पत्वे श्रुतिः

"अन्यज्ज्ञानं परस्य च ॥ ११३७ ॥

अन्यज्ज्ञानं च जीवानामन्य आनन्द ईशता ।
मुख्येशता परेशस्य गौणी जीवस्य सा यतः" ॥ ११३८ ॥

इति श्रुतेः

॥ इति स्थानविशेषाधिकरणम् ॥ १७ ॥

* * *

पालकत्वाधिकरणपूर्वपक्षसिद्धान्ताशयविशदीकरणम्

सृष्टिनाशौ तदधीनावितीरिते ।
स्वभावत्वात् स्थितेर्नैतदपेक्षेति न युज्यते ॥ ११३९ ॥

यतः स्वभावोऽप्यखिल ईशायत्तोऽखिलस्य च ।

अव्यक्तत्वाधिकरणतात्पर्यनिरूपणम्
जीवशक्त्यपेक्षया अव्यक्तोऽपि भगवान् स्वशक्त्यैव दृश्यते

अव्यक्तोऽपि स्वशक्त्यैव भक्तानां दृश्यते हरिः ॥ ११४० ॥

अहिकुण्डलाधिकरणतात्पर्यनिरूपणम्
सर्वेषां ब्रह्मधर्माणां ब्रह्मणा सविशेषोऽत्यन्ताभेदः

तदभिन्ना गुणा नित्यमपि सर्वे विशेषतः ।
गुणत्वेन गुणित्वेन भोक्तृभोग्यतया स्थिताः ॥ ११४१ ॥

विशेषात्मतया तेषां नित्यशक्त्यात्मना तथा ।
नित्यं स्थितेर्न धर्माणां क्रियादीनामनित्यता ॥ ११४२ ॥

न विशेषात्मता चेयमनित्या शक्तिरूपता ।
सैव यत्सविशेषा स्याद्

विशेषोऽपि भगवतो नैव भिन्नः, स्वनिर्वाहकश्च

विशेषोऽन्यो न चाप्ययम् ॥ ११४३ ॥

स्वनिर्वाहकताहेतोस्तथापि स्याद्विशेषता ।

ज्ञानादिधर्माणां भगवदभिन्नत्वं तद्विशेषत्वमित्युभयस्यापि श्रुतौ व्यपदेशो वर्तते

विशेषत्वेन विज्ञातेः प्रमाणैरखिलैरपि ॥ ११४४ ॥

ससर्ज सञ्जहारेति विशेषो ह्यवगम्यते ।
श्रुत्यैव स स एवेति तदभेदश्च गम्यते ॥ ११४५ ॥

सविशेषाभेदसमर्थनम्

प्रथमं भेदवादिना विशेषोऽवश्यमङ्गीकार्य इति प्रतिपादनम्

भेदो यदि विशेषस्य स भेदो भेदिना कथम् ।
भिन्नश्चेदनवस्था स्यादभिन्नश्चेत् पुरा न किम् ॥ ११४६ ॥

विशेषोऽभिन्न एवेति तेन नाभ्युपगम्यते ।
अभिन्नो निर्विशेषश्चेद्भेदस्तद्भेदता कुतः ॥ ११४७ ॥

अनेनानेन भिन्नोऽयमिति यत्सविशेषतः ।
भेद एवैष बहुधा दृश्यते तत्किमुत्तरम् ॥ ११४८ ॥

अभेदभेदयोश्चैव स्वरूपत्वं हि भेदिनः ।
तयोरप्यविशेषत्वे पर्यायत्वं हि शब्दयोः ॥ ११४९ ॥

अभेदभेदशब्दौ च पर्यायाविति को वदेत् ।
भेदोऽन्योन्यमभेदश्च भेदिना चेद्विशेषिता ॥ ११५० ॥

अविशेषे कथं भेदो भेदिनैकस्तथा भिदा ।
पुनस्तयोर्विभेदश्च भेदिमात्रत्वतो भवेत् ॥ ११५१ ॥

भेदिनश्चैव भेदस्य विशेषो यदि गम्यते ।
अभेदाभेदिनोश्चैव किं भेदोऽभेदभेदयोः ॥ ११५२ ॥

विशेषेणैव सर्वत्र यदि व्यवहृतिर्भवेत् ।
कल्पनागौरवायैव किं भेदः कल्प्यते तदा ॥ ११५३ ॥

ऐक्यप्रतीत्यभावेन भेद एव गवाश्वयोः ।
स एवेति प्रतीतौ हि विशेषो नाम भण्यते ॥ ११५४ ॥

अभेदवादिना मायावादिनापि विशेषोऽवश्यमङ्गीकार्य इति प्रतिपादनम्

सच्चिदादेरपर्यायसिद्ध्यर्थं मायिनापि हि ।
अङ्गीकार्यो विशेषोऽयं यद्यसत्यविशेषणम् ॥ ११५५ ॥

पृथक्पृथग्वारयितुं शब्दान्तरमितीष्यते ।
मायाविशेषराहित्यविशेषणविशेषिता ॥ ११५६ ॥

सत्यस्यापि भवेत् सा च तथा चेदनवस्थितिः ।
यदि सत्ये विशेषो न न तदुक्तिर्भवेत्तदा ॥ ११५७ ॥

लक्ष्यते चेत् तेन लक्ष्यमित्यपि स्याद्विशेषिता ।
पुनः पुनर्लक्षणायामपि स्यादनवस्थितिः ॥ ११५८ ॥

यद्यभावविशेषित्वं स्यादङ्गीकृतमेव ते ।
असार्वज्ञादिराहित्यमप्येवं ते भविष्यति ॥ ११५९ ॥

तदा सार्वज्ञमेव स्याद्भावार्थत्वान्नञोर्द्वयोः ।
यदि नैतादृशं ग्राह्यमसुखत्वानिवर्तनात् ॥ ११६० ॥

असत्त्वाज्ञानतादेश्च स्यादसत्त्वादिकं तदा ।
अनृतादिविरोधित्वं यद्यस्याभ्युपगम्यते ॥ ११६१ ॥

अनैश्वर्यविरोधित्वमप्येवं किं निवार्यते ।
अखण्डखण्डनादेवं विशेषोऽखण्डवादिना ॥ ११६२ ॥

खण्डितेनापि मनसा स्वीकार्योऽनन्यथागतेः ।

भेदाभेदवादिनापि विशेषोऽवश्यमङ्गीकार्यः

अखण्डखण्डवादिभ्यां खण्डाखण्डेन चैव तत् ॥ ११६३ ॥

महादरेण शिरसि विशेषो धार्य एव हि ।

अहिकुण्डलादिनिदर्शनत्रयमपि सविशेषाभेदोपयुक्तत्वेन सूत्रकारस्याभिमतम्

निदर्शनत्रयेणातो भगवानत्यभिन्नताम् ॥ ११६४ ॥

गुणानामादरेणाह

भगवद्धर्माणां भगवता सविशेषाभेदस्य समर्थितत्वात् अभिहितान्वयवादो न सूत्रकाराभिप्रेतः, किन्तु अन्विताभिधानवाद एव अभिप्रेत इत्यवगम्यते

तच्च नाभिहितान्वयः ।
यदाशेषविशेषाणामुक्तिः सामान्यतो भवेत् ॥ ११६५ ॥

पदैकेनाप्युत्तरेण विशेषावगतिर्भवेत् ।
यतोऽशेषविशेषाणां वस्तुनास्त्येव चैकता ॥ ११६६ ॥

अतः सामान्यतो ज्ञातः पदान्तरबलात् पुनः ।
भवेद्विशेषतो ज्ञातस्तेन स्यादन्वितोक्तिता ॥ ११६७ ॥

अन्विताभिधानमनुभवसिद्धम्

स्वार्थ एवान्वितो यस्मात् केनचित्तद्विशेषतः ।
अनेनेति तदुक्त्यैव ज्ञायतेऽनुभवेन हि ॥ ११६८ ॥

अन्विताभिधानानङ्गीकारे वाधकप्रदर्शनम्

यद्यनन्वितमेवैतत्पदं स्वार्थं वदेदिह ।
तथान्यान्यपि सर्वाणि कः कुर्यादन्वयं पुनः ॥ ११६९ ॥

व्यापारो न हि शब्दस्य परः स्वार्थप्रकाशनात् ।
पुमानप्येकवारोक्त्या कृतकृत्यो यदा भवेत् ॥ ११७० ॥

अन्वयस्य कथं ज्ञानं शब्दार्थत्वं यदास्य न ।
यदैवानन्वितार्थस्य वचनं तैः पदैर्भवेत् ॥ ११७१ ॥

अनन्वितः स्याच्छब्दार्थो न तदर्थो हि सोऽन्वयः ।
निराकाङ्क्षपदान्येव वाक्यमित्युच्यते बुधैः ॥ ११७२ ॥

तत्तदर्थाभिधानेन स्यान्निराकाङ्क्षता च सा ।
अपूर्तेस्तावदर्थानामाकाङ्क्षा पूर्वमिष्यते ॥ ११७३ ॥

कर्मकर्तृक्रियाणां तु पूर्तौ कोऽन्योऽन्वयो भवेत् ।
अपूर्तिश्चेत्पदैरुक्तैः किं नृभृङ्गेण पूर्यते ॥ ११७४ ॥

व्यापारश्चेत् पुनस्तेषामनुक्तावपि किं न सः ।
उक्ते बुद्धिस्थताहेतोर्यदि व्यापार इष्यते ॥ ११७५ ॥

बुद्धिस्थत्वाय यत्नं न कथं कुर्युः पुरैव च ।
पुरुषाधीनता तेषां यदि पश्चाच्च सा समा ॥ ११७६ ॥

पुमानेवान्वयायैषां यदि पश्चाद्विचेष्टते ।
अनन्विताभिधानानां स एवार्थान्तरोक्तिषु ॥ ११७७ ॥

यततां शब्दशक्तिश्चेत्तत्र नैवान्वये कथम् ।
तत्कल्पनागुरुत्वादिदोषेतोऽभिहितान्वयः ॥ ११७८ ॥

अभिहितान्वयवादोऽनुभवविरुद्धः

अनुभूतिविरुद्धश्च त्याज्य एव मनीषिभिः ।
कर्तृशब्दं ह्यभिहिते धर्मसामान्यवेदनात् ॥ ११७९ ॥

विशेषधर्ममन्विच्छन् किमित्येव हि पृच्छति ।
गुणक्रियादिधर्माणां विशेषे कथिते पुनः ॥ ११८० ॥

निराकाङ्क्षो भवेद्यस्माच्छब्दा अन्वितवाचकाः ।

अधिकरणार्थोपसंहारः

अतोऽनन्तगुणात्मैको भगवानेक एव तु ॥ ११८१ ॥

उच्यते सर्ववेदैश्च

परमताधिकरणतात्पर्यनिरूपणम्

परमात्मनो आनन्दादिगुणाः लौकिकानन्दादिभ्यो विलक्षणाः

ते चाखिलविलक्षणाः ।
सर्वे सर्वगुणात्मानः सर्वकर्तार एव तु ॥ ११८२ ॥

तथापि सविशेषाश्च विद्वद्व्युत्पत्तितोऽपि च ।
तैस्तैः शब्दैश्च भण्यन्ते युज्यते चोपदेशतः ॥ ११८३ ॥

अन्यानन्दादिसादृश्यमानुकूल्यादि नापरम् ।
पूर्णत्वादि महत्तेषां वैलक्षण्यं श्रुतौ श्रुतम् ॥ ११८४ ॥

"पूर्णोऽशेषनियन्ता च सुखादुत्तम एकलः ।
गुणोरुसमुदायोऽयं वासुदेवः सुनिष्कलः" ॥ ११८५ ॥

वासुदेवश्रुतिश्चैषा गुणान्वक्ति हरेः परान् ।

* * *

॥ तथान्यत्त्वाधिकरणम् ॥

ॐ तथान्यत्प्रतिषेधात् ॐ ॥ ३-२-३७ ॥

॥ इति तथान्यत्त्वाधिकरणम् ॥ १८ ॥

* * *

॥ सर्वगतत्वाधिकरणम् ॥

ॐ अनेन सर्वगतत्वमायामयशब्दादिभ्यः ॐ ॥ ३-२-३८ ॥

॥ इति सर्वगतत्वाधिकरणम् ॥ १९ ॥

॥ फलाधिकरणम् ॥

ॐ फलमत उपपत्तेः ॐ ॥ ३-२-३९ ॥

ॐ श्रुतत्वाच्च ॐ ॥ ३-२-४० ॥

ॐ धर्मं जैमिनिरत एव ॐ ॥ ३-२-४१ ॥

ॐ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॐ ॥ ३-२-४२ ॥

ईश्वरः फलकारणम्, स च लीलया धर्माधर्मौ अपेक्ष्य फलं ददाति ।
अतः अनुपचरितमेव तस्य स्वातन्त्र्यम्

स एवाशेषजीवस्थनिःसङ्ख्यानादिकालिकान् ॥ ११८६ ॥

धर्माधर्मान् सदा पश्यन् स्वेच्छया बोधयत्यजः ।
कांश्चित् तेषां फलं चैव ददाति स्वयमच्युतः ॥ ११८७ ॥

न ते विशेषं कमपि प्रेरणादिकमुच्यते ।
कुर्युः कदापि तेनायं स्वतन्त्रोऽनुपचारतः ॥ ११८८ ॥

भगवन्माहात्म्यज्ञानार्थं कर्मस्वरूपप्रपञ्चनम्

कर्माणि तानि च पृथक् चेतनान्येव सर्वशः ।
अचेतनशरीराणि स्वकर्मफलभाञ्जि च ॥ ११८९ ॥

प्रत्येकं तेषु चानन्तकर्माण्येवंविधानि च ।
तानि चैवमितीशस्य निःसीमा शक्तिरुत्तमा ॥ ११९० ॥

एकैव ब्रह्महत्या हि वराहहरिणोदिता ।
ब्रह्मपारस्तवेनैव निष्क्रान्ता राजदेहतः ॥ ११९१ ॥

स्तोत्रस्य तस्य माहात्म्याद्व्याधत्वं गमिता पुनः ।
प्राप्य ज्ञानं परं चाप तथान्यान्यपि सर्वशः ॥ ११९२ ॥

अनन्तान्युदितान्येवं प्रभुणा कपिलेन हि ।
संसारे पच्यमानानि कर्माण्यपि पृथक्पृथक् ॥ ११९३ ॥

॥ इति फलाधिकरणम् ॥ २० ॥

* * *

पादार्थोपसंहारः

तस्मादनन्तमाहात्म्यगुणपूर्णो जनार्दनः ।
भक्त्या परमयाऽऽराध्य इति पादार्थ ईयते ॥ ११९४ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीब्रह्मसूत्रानुव्याख्याने तृतीयाध्यायस्य द्वितीयः पादः ॥

* * *

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादविरचित-श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य प्रप्रथमटीका

श्रीपद्मनाभतीर्थविरचिता

सन्न्यायरत्नावली

द्वितीयाध्यायस्य द्वितीयः पादः

*५४७ जगत्कारणे विष्णावुक्तसमन्वयस्य परोद्भावितस्मृतियुक्तिश्रुत्युपसर्जनयुक्तिबहुयुक्तिभेदेन चतुर्विधविरोधं पूर्वस्मिन्पादे क्रमेण निरस्य अस्मिन्पादे परसमयेषु दूषणान्युद्भाव्यन्ते । विपक्षदूषणस्य स्वपक्षदार्ढ्यकारणत्वात् । यद्यपि दृढतरानुकूलयुक्तिभिर्निर्णीतवेदार्थेनान्यथा शङ्का न स्यात् निर्मलमतेः तथाऽपि मन्दमतेराशङ्का स्यादेव तद्वाद्याग्रहात् प्रवर्तमानमतविप्रतिपत्त्या । तदेतदाह **स्मृतीति** ।

५४९ मन्दाशङ्काप्रकारानाह **अनादीति** ।

५५१ यदि परमतान्यप्रमाणमूलानि तर्हि कथमनादितोऽनुत्सन्नानि वर्तन्ते । न ह्युन्मत्तवाक्यमपि मतत्वेनाभ्युपगतं लोकेषु वर्तते । अतो मतान्तरप्रतिपादिततत्त्वानामपि जगत्कारणवत्त्वशङ्का मन्दस्य जातेति तत्परिहाराय भगवान् सूत्रकारः प्रत्येकं परमतानां भ्रान्तिमूलत्वम् आगमप्रामाण्यवादिनः प्रत्यागमैस्तदितरान् प्रबलतर्कैश्च दर्शितवान् । भ्रान्तिमूलानि दर्शनानि बलवत् तर्कागमपराहतानि किमिति नोच्छिद्यन्त इत्याशङ्कित आह **दौर्लभ्यादिना** ।

५५४ नन्वेवं दुराग्रहग्रहीतलोके सुयुक्तिभिः स्वपक्षस्थापनं परपक्षनिराकरणं वा अरण्यरोदनवद्व्यर्थमित्यत आह **तथाऽपीति** । **तमोहन्युः** अज्ञानं हन्युरित्यर्थः ।

५५५ ये तु निःसंशयेन स्वपादपद्माश्रयाः तेषां प्रतिपक्षनिराकरणयुक्तिशाणेन विद्यासिनैशित्यसिद्ध्यर्थं परसमय-निराकरणं वेदव्यासः चकार इत्यर्थः ।

---

* प्रतिपरिच्छेदं प्रारम्भे सूचिताः सङ्ख्याः अनुव्याख्यानश्लोकसङ्ख्याः इति ज्ञातव्यम् ।

॥ रचनानुपपत्त्यधिकरणम् ॥

५५८ तत्र तावन्निरीश्वरसाङ्ख्यमतं निराकर्तुमुपन्यस्यति **चेतनेत्यादिना** । अत्रेत्थं साङ्ख्यप्रक्रिया । चेतनमचेतनं चेति तत्त्वद्वयम् । अचेतनं च पञ्चविंशतिभेदभिन्नम् । तथा हि कापिलसूत्रम् । मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति । तत्र चेतनमणिगतं परस्परमत्यन्तभिन्नं च । अचेतनं तु सर्वं प्रकृत्यात्मकं तयाऽभिन्नं प्रलयपर्यन्तं परस्परं भिन्नं च । ईश्वरानधिष्ठितमेवाचेतनं कार्यकारि । प्रकृतेरेव कर्तृत्वं सर्वेऽभ्युपगच्छन्ति साङ्ख्याः । तत्र पुरुषस्य भोक्तृत्वं केचिन्मन्यन्ते । केचिन्नभोक्तृत्ववादिनस्त्वात्मनः स्वरूपचैतन्येन स्वयंप्रकाशेन सुखदुःखानुभवं वदन्ति । न त्वात्ममनःसंयोगजेनात्मसमवेतेनास्वयंप्रकाशेन । अन्ये तु प्रकृतिपुरुषयोर्भेदाग्रहनिबन्धनः सुखदुःखादिमानहमिति व्यवहारो न त्वात्मनः सुखित्वादिज्ञाननिबन्धनः । सुखदुःखादित्वादिकं त्वन्तःकरणधर्म इति मन्यन्ते । प्रकृतिपुरुषयोर्विवेकज्ञाने इति विवेकाज्ञाननिबन्धनदुःखादिबन्धनिवृत्तिः पुरुषस्येति भोक्तृत्वं मन्यमानानां मतम् । तदन्येषां प्रकृतिपुरुषयोर्भेदग्रहणमेव मुक्तिरिति मतम् ।

५६१ अधुनोपन्यस्तमतं दूषयितुमुपक्रमते **ईशस्येति** । ईश्वरनिरपेक्षप्रधानप्रवृत्त्यङ्गीकारात् पुरुषस्य भोक्तृत्वाभोक्तृत्वपक्षौ साङ्ख्यैकदेशौ युक्तिपराहतावित्यर्थः ।

५६१ युक्तिपराहतिं दर्शयति **चेतनेति** । अत्रायं प्रयोगः । महदहङ्कारादिकार्यं चेतनेच्छाधीनोत्पत्तिकं कार्यत्वाद्घटवदिति । न च ईश्वरनिरपेक्षं प्रधानं प्रवर्तत इत्यादिसाङ्ख्याभ्युपगते किञ्चित्प्रमाणम् । अस्ति चेश्वराधिष्ठितत्वे प्रधानस्य श्रुतिः प्रमाणम् । योऽयोनिं योनिमधितिष्ठत्येक इति । अयोनिं वियोनिमिति प्रकृत्यन्तररहितां प्रकृतिमित्यर्थः । कूर्मपुराणे चैतदुक्तम् 'प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः । क्षोभयामास भगवान् सृष्ट्यर्थं जगतो विभुः' इति । न च प्रधानस्य ईशानधिष्ठितस्य जगदुत्पादकत्वम् आप्तेन कपिलेनोक्तत्वात् सिद्ध्यतीति वाच्यम् । प्रमाणविरुद्धार्थं वक्तुराप्तत्वाभावात् । योऽसौ सिद्धानां कपिलो मुनिरित्याद्यागमसिद्धो विष्णववताररूपः कपिल आप्ततमोऽन्योऽसौ निरीश्वरसाङ्ख्यप्रणेतुः कपिलात् । 'कपिलो वासुदेवाख्यस्तन्त्रं साङ्ख्यं जगाद ह । ब्रह्मरुद्रादिदेवेभ्यो भृग्वादिभ्यस्तथैव च । तथैवासुरये सर्ववेदार्थपरिबृंहितम् । सर्ववेदविरुद्धं च कपिलोऽन्यो जगाद ह । साङ्ख्यमासुरयेऽन्यस्मै कुतर्कपरिबृंहितमि'ति पाद्मवचनात् । अपि च । प्रामाण्यवदप्रामाण्यमपि स्वत एवाङ्गीकरोति साङ्ख्यो विज्ञानानाम् । अतः तेन स्वदर्शनोक्तमस्तीति च नास्तीत्यप्युक्तं स्यात् ।

५६२ ततश्च मायावाद्यभ्युपगतविश्वसदसद्वैलक्षण्यादिवत् परस्परव्याहतमिति न किञ्चित्सिद्ध्यति । तदेतदाह **न च इति** ।

५६४ इतोऽपि कारणात् केवलप्रधानाधीनोत्पत्तिकं जगन्न भवतीत्याह **इदमिति** । अत्रायं प्रयोगः । महदादिकमीश्वरनिरपेक्षप्रधानाधीनोत्पत्तिकं न भवति वस्तुत्वात् प्रधानवदिति । अनेनैवानुमानेन पराहतत्वादम्बुवच्चेतननिरपेक्षप्रवृत्तिमत्त्वानुमानं प्रधानस्य न घटते ।

५६५ **केन मूलानुमा भवेत्** इत्यभिमतार्थस्य प्रतिपत्तौ कारणभूतानुमा केन भवेत् । न केनापि भवेदित्यर्थः ।

५६६ एतदेव विवृणोति **स्वतन्त्रेति** । **आत्मप्रमाहतमिति** । स्वव्याहतमित्यर्थः ।

५६८ न हि जगद्रचनाकर्तृत्वमचेतनस्य युज्यते । इच्छावद्धर्मत्वाद्रचनायाः । न ह्यचेतनस्येच्छावत्त्वम् । इच्छाम्यहमित्यात्मधर्मत्वेन व्यवहारादिच्छायाः । न चात्मनश्चेतनेनेच्छावता मनसा भेदाग्रहादयं व्यवहारः किं न स्यादित्यत आह **यदीति** ।

५६८ मम मन इति मनसो भेदेन गृह्यमाणत्वात् । न तेन भेदाग्रहणमात्मन उपपद्यते । अन्यथा घटोऽहमिति घटेन भेदाग्रहणं स्यात् आत्मनः । अपि च यदि भेदाग्रहादभेदव्यवहारस्तर्ह्यभेदाग्रहाद्भेदव्यवहारोऽपि स्यात् । ततश्च इच्छाम्यहमिति व्यवहारभङ्गः स्यात् । न च कुत्रचिद्भेदाग्रहात् अभेदव्यवहारो दृष्टः । पुरोवर्तिरजतयोः संसर्गज्ञानादेवेदं रजतमिति व्यवहारः शुक्तिकायाम् । सत्यरजते तथाऽनुभवात् । अन्यथा सत्यरजतेऽपि संसर्गाग्रहात् इदमंशेन रजतस्येदं रजतमिति व्यवहारो न स्यात् ।

५६९ ननु 'कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे'ति श्रुत्या कामादीनां मनोधर्मत्वेनोक्तेः कथमिच्छाऽऽत्मधर्म इत्यत आह **उभयेति** । कामो हि द्विविधो विद्यते । अतो जीवस्वरूप-कामस्यापि सद्भावान्मनः काम इत्येतदप्यस्तीति न मनोधर्मत्वोक्तिविरोधः । कामस्य द्वैविध्यमाह **प्रियाप्रियेति** ।

५७० परिणामेऽनिष्टकारिणः प्रियस्येच्छा मनोधर्मो हितेच्छा जीवस्य धर्मः । 'स यदि पितृलोककामो भवती'ति तस्य मुक्तिदशायामपि कामश्रवणात् । तस्मादिच्छाम्यहमिति व्यवहारो मुख्यत एव । अधुनोपपादितमर्थमुपसंहारद्वारा 'रचनानुपपत्तेश्च नानुमानमि'ति सूत्रारूढं करोति **रचनेति** । अतो धर्मादिकं कस्यचित् प्रत्यक्षं प्रमेयत्वात् कुम्भवदिति अनुमानानुमितसर्वज्ञेन कपिलेन प्रोक्तत्वहेतुनाऽवगतं प्रधानं जगत्कर्तृ न भवति विचित्ररचनानुपपत्तिपराहतत्वात् । न हि विचित्रा प्रासादादिरचना अचेतनात् दृष्टा । अपि च उक्तानुमानेन कणादोऽपि सर्वज्ञः स्यात् । तथा सति तेन प्रतिषिद्धत्वात् प्रधानाभावोऽप्यापाद्येत ।

५७१ ननु चेतनानधिष्ठितमपि प्रधानं कार्यकारि स्यात् । यथा क्षीरं दध्याकारेण परिणमते स्वयमेव । यथा च नदीजलं स्वयमेव वहति । न तु चेतनाधिष्ठितमित्याशङ्क्याह **पयोम्ब्विति** । 'एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते । एतेन ह वाव पयो मण्डं भवती'ति श्रुत्या नद्यादिजडतदभिमानिचेतनानां च नद्यादिशब्दवाच्यानामीश्वरेण प्रशास्यत्वोक्तेः पयोऽम्बुनोरपि स्वतःप्रवृत्त्यभावेन दृष्टान्तत्वासिद्धिः ।

५७२ ननु मनसः कर्तृत्वं कथम् । तस्यापि पुरुषवदिच्छावत्त्वानङ्गीकारात् । मनसः प्रकृत्यात्मकम् । अतश्च प्रकृतेः कर्तृत्वमायातमित्यत आह **द्वैविध्येऽपीति** । कामः स्वामिनः कर्तृत्वं न तु कामरूपपरिणामिनः सवृत्तिकमनआदि-स्वामित्वं तु पुरुषस्यैवानुभवसिद्धत्वात् । चेतनार्थत्वाच्च । चेतनस्येच्छावत्त्वं नाम इच्छास्वामित्वमेव कर्तृत्वप्रयोजकं विवक्षितमतो मनसः कर्तृत्वमित्यर्थः ।

५७३ ननु परिणामेऽहितकारीदमिति जानतोऽप्यवशात् तत्र इच्छा जायते तत्कथमिच्छास्वामित्वं पुरुषस्य अतद्वशत्वात् इच्छाया इत्यत आह **किञ्चिदिति**।

५७५ यथेषद्वशीकृतदेशस्य नृपस्य (भृत्यस्य) देशस्वामित्वं लोके व्यवह्रियते। तद्वत् ईषद्वशीकृतेच्छस्यापि पुरुषस्येच्छास्वामित्वं युज्यते। सर्वात्मना वशीकृतेच्छादेरीश्वरस्येच्छास्वामित्वम् अत एव कर्तृत्वं किमु वक्तव्यमित्यर्थः। तस्माद्वेदवाक्यमप्युक्तप्रकारेणार्थान्तराभिधायकं न तु इच्छानिषेधकं चेतनस्य। इत्यतोऽपीच्छावत्त्वं पुरुषस्य नाचेतनस्येत्याह **मोक्षेति**।

५७६ न च कालान्तरभाविपुरुषमोक्षमुद्दिश्य प्रकृतिः प्रवर्तत इति युक्तम्। स्वार्थरहितप्रवृत्त्यसम्भवात्। न हि देवदत्तकृतसुकृतफलं यज्ञदत्तो भुङ्क्ते। कृतहान्यकृताभ्युपगमप्रसङ्गात्। किञ्च प्रकृतिनिवृत्तौ हि पुरुषस्य मुक्तिः। एवं सति स्वनिवृत्त्यर्थं प्रकृतिः प्रयतत इत्यतिविरुद्धम्। इतोऽपि कर्तृत्वभोक्तृत्वे पुरुषस्यैव युक्ते। योऽहं कर्ता सोऽहं भोक्तेत्यनुभवात्। कर्तृभोक्त्रोरन्यत्वे प्रमाणाभावाच्च। तदेतदाह **कर्तृत्वमिति**।

५७७ उपसंहरति **सर्वमानेति**। आत्मनः सर्वप्रमाणसिद्धकर्तृत्वभोक्तृत्वानङ्गीकारे साम्यान्मायावादितौल्यं याति साङ्ख्यः। अत एव सर्वप्रमाणविरुद्धानुष्ठानलक्षणदुर्दीक्षां गृहीतवान्। अत एव 'भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्' इत्यादौ पूर्वनिराकृतेन मायिना 'रचनानुपपत्तेश्च नानुमानमि'ति चकारात्समुच्चित्य निराकृतः सूत्रकारेण। अतो नेशनिरपेक्षं प्रधानं जगत्कारणम्॥ १॥

॥ इति रचनानुपपत्त्यधिकरणम्॥ १॥

* * *

॥ अन्यत्राभावाधिकरणम् ॥

५७८ अत्र यत्पतञ्जलिः प्राह 'ईशोपकृतात्प्रधानाज्जगदुत्पत्तिरि'ति तन्निराकर्तुमनुवदति **साङ्ख्य इति**।

५८१ साङ्ख्याद्युत्पत्तौ पृथिवीवत्प्रधानं महदाद्युत्पत्तौ कारणम्। पर्जन्यवदीश्वरः कारणम्। बीजावपनकर्तृवज्जीवः सन्निधिमात्रतः कारणम्। बीजावपनकर्तृत्वमपि देहस्यैव तत्सङ्गादुपचर्यते जीव इत्यर्थः। अत्रैतन्मतनिरासकं यत्सूत्रम् 'अन्यत्राभावाच्च न तृणादिवदि'ति। तद्व्याचष्टे **अन्यत्रेति**। न च तृणाद्युत्पत्तौ पृथिवीसहायमिव पर्जन्यः प्रधानसहायमात्रमीश्वरः करोति। यतः प्रधानपुरुषतच्छक्तीनां प्रतीतयः प्रवृत्तयः सत्ताश्चेशाधीनाः। तत्र नित्यवस्तु नित्यरूपेणानित्यं च अनित्यरूपेण स्वरूपभूतया नित्यशक्त्येश्वर एव सर्वदा नियमयति। 'न ऋते त्वत्क्रियते किञ्च नारे महामर्कं मघवन् चित्रमर्च' इति श्रुतेः। यतस्त्वदृते किमपि न क्रियते आरे दूरेऽप्यतो महान्तमर्कमतिशयितानन्दं भो मघवन् मखेश चित्रं चमत्करणीयं त्वां त्वमेवार्च। त्वामर्चितुमपि त्वदनुग्रहमन्तरेणान्यस्यासामर्थ्यादित्यर्थः।

५८४ तदेव श्रुत्यन्तरेण द्रढयति **स्वभावेति** । नित्यस्यापि पुरुषाधीनत्वं दृष्टम् । प्रत्यवायपरिहारे यतो नित्यकर्मविशेषे कृते तदकरणनिमित्तप्रत्यवायप्रतियोगिकः प्रागभावः कदाचिन्न नश्यति । अकृते तु प्रायश्चित्ते प्रत्ययोत्पत्त्या नश्यत्येव । उपसंहरति **तदिति** । विन्ध्यो निरीश्वरसाङ्ख्यस्तन्मतवत्पतञ्जलिमतमप्यनुपादेयमित्यर्थः ॥ २ ॥

॥ इति अन्यत्राभावाधिकरणम् ॥ २ ॥

* * *

॥ अभ्युपगमाधिकरणम् ॥

५८६ अत्र चेतनाचेतनविभागमङ्गीकुर्वतोऽचेतनं चेतनाधिष्ठितमेव प्रवर्तते । न तु स्वतन्त्रमित्येतदसहमानस्य देहात्मवादिनश्चार्वाकस्य मतमनूद्य निराकरोति **चार्वाकैरित्यादिना** ।

५८६ न लोकायतिकशास्त्रमुपादेयं तत्र प्रयोजनवदर्थस्य बोध्यस्याभावात् । न हि प्रत्यक्षादतिरिक्तोऽर्थः शास्त्रावबोध्यो वक्तुं शक्यः प्रत्यक्षैकप्रमाणवादिना लोकायतिकेन । तस्माच्छास्त्रस्य परव्यामोहनमेव प्रयोजनमापद्यते । तस्मात्स्वाभ्युपगमादेव स्वार्थपरार्थशून्यत्वाच्चार्वाकदर्शनमुन्मत्तवाक्यवत् प्रलापमात्रम् । एतदेवोक्तं सूत्रकारेण 'अभ्युपगमेऽप्यर्थाभावादि'ति ।

५८९ ननु देहव्यतिरिक्तात्मनि सति तस्यात्मपरलोकप्रयोजनं वक्तुं शक्यते । स कुतः सिद्ध इत्याशङ्क्ति आह **देहादिति** । अपि च । यदि देहस्यैव चैतन्यं तर्हि सुप्तावपि स्यात् । बालस्य प्रथमं स्तनपानप्रवृत्तिश्च न स्यात् । स्तनपानेष्टसाधनत्वस्य पूर्वं तद्देहेनादृष्टत्वात् ।

५९० ननु यदा प्रत्यक्षमेवैकं प्रमाणं तदाऽदृष्टप्रयोजनं कुतः सिद्ध्येदित्याशङ्क्याह **प्रत्यक्षस्येति** ।

५९२ न च अनुमानादीनाममानत्वं प्रत्यक्षतः सिद्धमिति वाच्यम् । प्रत्यक्षामानत्वमनुमानतः सिद्धमित्यपि वक्तुं शक्यत्वात् । किञ्च यदि प्रत्यक्षमानत्वं साक्षिप्रत्यक्षेण सिद्धमित्युच्यते तर्हि तेनैवानुमानादिप्रामाण्यं सिद्धमित्यभ्युपगम्यतां विशेषाभावात् । अतो निष्प्रयोजनत्वादिदोषदुष्टत्वादुपेक्षणीयं चार्वाकमतमित्युपसंहरति **स्वमतेनेति** । न परेणैवापादितं नैरर्थक्यं तत्पक्षस्य किन्तु स्वेनैवाङ्गीकृतमित्यर्थः ॥ ३ ॥

॥ इति अभ्युपगमाधिकरणम् ॥ ३ ॥

* * *

॥ पुरुषाश्माधिकरणम् ॥

५९२ ननु यदुक्तमीशानधीनस्य प्रधानस्य जगदुत्पत्तौ प्रवृत्तिर्न सम्भवतीति तन्न युज्यते । अयस्कान्तसन्निधानादिवायसः पुरुषसन्निधानात् प्रधानस्यान्धपङ्गुन्यायेनाशङ्क्य परिहरति **सन्निधानादिति** । चेतनसन्निधिमात्रात् अचेतनस्य प्रवृत्तौ सुप्तिदशायां देहादेः प्रवृत्तिप्रसङ्गो रचनानुपपत्तेरित्यादिनोक्तदोषप्रसङ्गश्चायस्कान्तगतेनेशप्रेरणादेवायसोऽपि प्रवृत्तिरिति । न बुद्धिशून्यस्य स्वतःप्रवृत्तिः क्वापि सम्प्रतिपन्ना ॥ ४ ॥

५९३ किञ्च यदि शरीरस्य कार्येषु प्रवृत्तमानस्य पुरुषः सन्निधिमात्रेणोपकरोति तदा शरीरस्य प्राधान्यं पुरुषस्योपसर्जनत्वं प्रसज्यते । ततश्च शरीरमङ्गं पुरुषोऽङ्गीति व्यवहारलोपेन सर्वापलापदोषः स्यात् । किमु यतोऽखिलं भवति तस्येशस्यापलापान्निरीश्वरसाङ्ख्यस्य । तदेतदाह **अङ्गित्वमिति** । एतदेवोक्तं सूत्रकारेण 'पुरुषाश्मवदिति चेत्तथापी'ति ।

॥ इति पुरुषाश्माधिकरणम् ॥ ४ ॥

* * *

॥ अन्यथानुमित्यधिकरणम् ॥

५९५ अधुना अङ्गभूतं शरीरमादाय पुरुष एवाङ्गीकार्येष्वीश्वरनिरपेक्षः समग्रस्वातन्त्र्यशक्तिरहितोऽपि प्रवर्तत इति पक्षमनूद्य दूषयति **अङ्गित्वं यदीति** । शरीरेणैव सहायेन पुरुषस्य कार्यकारित्वे शरीरादानं न स्यात् । तत्र शरीरान्तरसहायाभावात् । अतः प्रकृतिप्रेरणं चेश्वरेणेत्यङ्गीकर्तव्यम् ।

५९६ ननु किमीश्वरेण शरीरेण वा तन्निरपेक्षस्वातन्त्र्यं जीवस्य किं न स्यात् इत्याशङ्क्याह **न चेति** । न हि मुख्यस्वतन्त्रस्य हिताकरणमहितकरणं च प्रतिषेधेन करणप्रतिहतिश्चानुभवसिद्धं युज्यते । एतदेवोक्तम् 'अन्यथानुमितौ च ज्ञशक्तिवियोगादि'ति सूत्रेण ।

५९७ अधुना ये पूर्वोक्तदोषास्त ईश्वरं तदधीनत्वं च विश्वस्यानङ्गीकुर्वतां भवन्तीत्याह **संसारिण इति** ।

५९८ 'रचनानुपपत्तेरि'त्यारभ्योक्ततात्पर्यमाह **तस्मादिति** । अतो गत्यन्तराभावात् सर्वेशो हरिरङ्गीकर्तव्य एव सर्ववादिभिरित्यर्थः ॥ ५ ॥

इति अन्यथानुमित्यधिकरणम् ॥ ५ ॥

* * *

॥ वैशेषिकाधिकरणम् ॥

५९९ अत्र सर्वेश्वरमभ्युपगम्य द्व्यणुकादिप्रकारेण जगदारम्भं वदतां कणादादीनां मतं तावदुपन्यस्यति **नित्यज्ञानेति** । नित्यज्ञानप्रयत्नेच्छावन्तं सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागैर्युक्तमीश्वरमभ्युपगच्छन्तो वैशेषिकादय इत्थमाहुः । पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाणव ईशेच्छाजीवादृष्टप्रेरिताः क्रियावन्तो भवन्ति सृष्टिकाले । तत्र सजातीययोः परमाण्वोः संयोगाद् द्व्यणुकं जायते । तद्द्व्यणुकत्रयेण त्र्यणुकं त्र्यणुकचतुष्टयेन चतुरणुकं च । ततश्च अनियतसङ्ख्याकावयवैः खण्डावयव्यन्त्यावयविनश्च जायन्ते । विजातीयावयवारब्धाश्च । तत्र यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं परमाण्वादि । ईशेच्छादिकं निमित्तकारणमेव । अनुत्पत्तिमन्तो नित्या एव सामान्यविशेषसमवायाः । अन्त्यमितिपदं विशेषपदार्थस्पष्टीकरणार्थम् । कर्माण्यनित्यान्येव । द्रव्यं त्वाकाशादिकं नित्यं तद्गतैकत्वादिगुणाश्च । पटादिद्रव्यमनित्यं तद्गतरूपादिगुणाश्च । द्रव्यासमवायिकारणमवयवसंयोग एव । गुणकर्मणोरसमवायिकारणं गुणः क्वचित्कर्म च । तत्र कार्यद्रव्यगतरूपादेः कारणद्रव्यगतरूपादिकं कारणैकार्थसमवायप्रत्यासन्नसमवायिकारणम् । आत्मगतसुखदुःखादेरात्ममनःसंयोग एकार्थसमवायप्रत्यासन्नोऽसमवायिकारणम् । कर्मणश्च पतनादेर्गुरुत्वादिगुणः । संयोगविभागयोश्च कर्म चलनवदवयवारब्धद्रव्यगतकर्मणश्च । एवं यद्यपि कारणगुणप्रक्रमेण कार्ये गुणारम्भ इति मतं तथाऽपि पारिमाण्डिल्यं परमाणुपरिमाणं द्व्यणुके ह्रस्वत्वासमवायिकारणं न भवति । द्व्यणुकपरिमाणं चाणुत्वम् । त्र्यणुकमहत्त्वासमवायी कारणं न भवतीति विशेषः कल्पनीय एव । विरूपत्वादणुत्वमहत्त्वयोः तथा पारिमाण्डिल्याणुत्वयोरपि । सजातीययोरेव हि परिमाणयोः कार्यकारणभावो दृष्टः । यथा पटतन्तुपरिमाणयोरिति । एवं वदतां वादिनां निराकरणाय यत्प्रभुर्व्यासो जगाद सूत्रं 'महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामि'ति, तदर्थमाह **महत्त्वमिति** ।

६०८ अयमर्थः । यथा त्र्यणुकादिकारणपरिमाणात् कार्ये परिमाणमुत्पद्यते । तथा परमाणुपरिमाणात् द्व्यणुके द्व्यणुकपरिमाणात् त्र्यणुके परिमाणमुत्पद्येत । विशेषाभावात् । अन्यथा त्र्यणुकपरिमाणादपि चतुरणुके परिमाणं नोत्पद्येत ।

६१० चोदयति **सदृशास्येति** । अयमर्थः । यथा त्र्यणुकादिषु महत्त्वात् सदृशतया महत्त्वमेवोत्पद्यते तथा यदि परमाण्वादिकारणगतादणुत्वात् कार्येष्वणुत्वमेवोत्पद्येत तथा सति त्र्यणुकादीनां परमाणुवदप्रत्यक्षत्वप्रसङ्गः । अतो न महत्त्ववदणुत्वस्य परिमाणारम्भकत्वमापादयितुं शक्यत इत्येतत्परिहरति **न महत्त्वमिति** ।

६११ अयमर्थः । यद्यवश्यं महत्त्वस्य महत्त्वमेव कारणं तर्हि परमाणुमहत्त्वात् द्व्यणुके महत्त्वम् । द्व्यणुकमहत्त्वादेव त्र्यणुकमहत्त्वमुत्पद्यत इति किमिति नाङ्गीक्रियते । स्वावयवापेक्षया परमाण्वादेरपि महत्त्वात् । यदि स्वतः स्थूलापेक्षया परमाण्वादेरणुत्वमिष्टं तर्हि तत्कार्यत्र्यणुकादेरणुत्वमप्यस्तु । तत्तत्स्थूलापेक्षया परमाणुद्व्यणुकयोर्महत्त्वे त्र्यणुकवत्प्रत्यक्षत्वं स्यादिति चेत् । सत्यम् । स्याद्योगिप्रत्यक्षादेव । न हि येन केनचिद्दृष्टस्य सर्वदृश्यत्वनियमः । न हि त्र्यणुकमपि सर्वः पश्यति । मन्ददृष्ट्यगोचरत्वात् ।

६१४ नन्वणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवदित्यनुमानविरुद्धं परमाणुमहत्त्वमिति चोदयति **यथेति** ।

६१४ महत्परिमाणतारतम्यस्यापि विश्रान्त्यभावान्न दृष्टान्तत्वमिति परिहरति **न महत्त्वस्येति** । इदमस्मान्महदिदमस्मान्महदिति महत्त्वतारतम्यवदिदमस्मादण्विदमस्मादण्वित्यणुतारतम्यमप्यनन्तमेव दृश्यते । न हि महत्तत्त्वात् परिमाणतः पञ्चगुणः षट्गुणो वेतीयत्तया परिच्छिन्न ईश्वरस्तद्वत्त्यणुकस्य षष्ठो भागः परमाणुरित्ययुक्तम् । यदि महत्तत्त्वादनन्तांशाधिक ईश इत्युच्यते तद्वत्त्यणुकादनन्तांशहीनत्वं परमाणोः स्यात् । न तु तत्राणुत्वविश्रान्तिः । यथा देशकालयोर्न देशतः कालतः परिच्छेदोऽनुभूयते । तयोर्द्वयोरपरिच्छेद एव साक्षिसिद्धः । एवं परमाणोर्भागमानतोऽपरिच्छेदः साक्षिसिद्ध इत्यभ्युपगन्तव्यम् । महत्त्वपरिमाणस्थापर्यवसानमसिद्धं चेत्यपर्यवसानं केन सिद्धम् । न च अनुमानात् तस्य दूषितत्वात् । महतो महीयानित्याद्यागमेन विरुद्धत्वाच्च । यत्र महत्त्वं पर्यवसितमित्युच्यते तन्महतोऽपि महत्प्रतीयते । एवमणुपरिमाणतारतम्यमप्यपर्यवसितम् । यथा सङ्ख्या द्वित्र्यादिगणनेनैकतदर्धतदर्धादिभेदेन च न पर्यवस्यति । एवं परिमाणमप्यणुत्वमहत्त्वतारतम्याभ्यामपि न पर्यवस्यति ।

६२२ निरवधिकगुणत्वमहत्त्वयुतश्च 'अणोरणीयान्महतो महीयानात्मे'ति श्रुतेर्हरिरित्याह **अणीयानिति** ।

६२३ 'अनन्तं ब्रह्मे'ति श्रुत्या निःसीमाणुत्वमहत्त्वसिद्धिर्ब्रह्मण इत्याह **आनन्त्येति** । ननु परिमाणतोऽल्पत्वं भगवतो ज्ञानानन्दादिगुणतः कालतश्चाल्पत्वं किं न स्यादित्याशङ्क्याह **नैवेति** । 'शते पञ्चाश'न्न्यायेन अनन्तकालीनस्य ब्रह्मणोऽल्पकालीनत्वमिति बहुलतरगुणस्य षड्गुणवत्त्वमप्यस्तु न तु तन्मात्रम् । न हि तस्य महतोऽणुत्वमात्रमभ्युपगतं सूत्रकारेणापि 'अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्चे'ति ।

६२६ महतोऽपि ब्रह्मणोऽल्पत्वं व्योमवदुक्तमित्याह **महत इति** ।

६२५ एकस्याणुत्वमहत्त्वविरोधमाशङ्क्याह **यदीति** ।

६२९ यत्परममहत्तदल्पाल्पदेशेष्वपि तिष्ठत्येव । तत्र स्वयमल्पभूतस्याल्पदेशान्तःसंस्थानं न युज्यते । न हि घटान्तर्मठस्तिष्ठति । अल्पदेशोपाधिकमल्पत्वं न सम्भवत्येव । अत एव अणुतारतम्यादेरपर्यवसानं चक्षुरादिनिरपेक्षेणापि स्वयंप्रकाशसाक्षिणा सिद्धमित्युक्तम् । तस्य स्वयंप्रकाशत्वं साधयति **यदीति** । प्रत्यक्षादिज्ञानेषु तत्प्रामाण्ये च स्वयंप्रकाशं साक्षिणमन्तरेण न मानान्तरं सम्भवति । अनवस्थापराहतत्वात् । अतः पटादिवत् परमाण्वादेरपि साक्षिणैवावयवसिद्धेर्युक्तमणुतारतम्यादेरपर्यवसानम् । न हि निरवयवस्य परमाणोर्दशदिक्संयोग एकदेशवर्तिनो घटन्ते । परमाणुत्वं चापेक्षिकम् । न तु परिनिष्ठितमेकत्र । अतो यतः परमाणुर्नास्ति स परमाणुरिति न । किन्तु यतः परमवयवविभागो नास्ति सः परमाणुरिति युक्तम् । अणुपरिमाणतारतम्यापर्यवसाने अनन्तावयवारब्धत्वाविशेषो मेरुसर्षपयोरपि परिमाणभेदानुपपत्तिरिति न वाच्यम् । केचिद्ब्रह्मनन्तावयवारब्धाः केचित् अब्रह्मानन्तावयवारब्धा इति

परिमाणभेदोपपत्तेः । अनन्तेष्वपि बहुत्वं युक्तम् । यथा अनन्तेभ्योऽप्यतीतब्रह्मणोऽतिबह्वनन्तत्वमतीतमनूनाम् । ब्रह्मणो दिवसे हि चतुर्दश मनवो भवन्तीति पुराणप्रसिद्धिः ।

६३१ यथा निरवयवत्वं परमाणोरप्रामाणिकम् । तथा तद्द्वयसंयोगादेव द्रव्योत्पत्तिरप्यप्रामाणिकीत्याह **तत्संयोगादिति** ।

६६२ अवयवानां द्वयसंयोगात् त्रयसंयोगादपि लोष्ठादिकार्यदर्शनादाद्यकार्यमपि तथैव युक्तमित्यर्थः । पूर्वोक्तप्रकारेण सर्वद्रव्याणां तारतम्येनाणुत्वमहत्त्वसम्भवात् परमाणुद्व्यणुकयोर्महत्त्वसम्भवे तत्कार्यस्य त्र्यणुकादेरपि महत्त्वसम्भवात् । अणुत्र्यणुकपरिमाणयोर्विजातीयत्वेन तत्कार्यकारणभावोऽपि न युक्त इत्याह **कारणस्येति** ।

६३३ परमाणुगतद्वित्वसङ्ख्यैव द्व्यणुके त्र्यणुकगतत्रित्वसङ्ख्यैव त्र्यणुके परिमाणमारभते । त्र्यणुकादिकस्य च सजातीयपरमाण्वादेरेव समवायिकारणत्वमित्यादिकमप्यप्रामाणिकमित्याह **न चेति** । अङ्कुरादिकार्याणामप्याद्युपष्टम्भकभागानामसमवायित्वं पार्थिवभागानां समवायित्वमिति वैपरीत्यस्यापि वक्तुं शक्यत्वात् । अतो द्व्यणुकादिकार्यं प्रति सजातीयावयवानां समवायिकारणत्वम् । तत्सङ्ख्याया द्व्यणुकादिपरिमाणं प्रत्यसमवायिकारणत्वमित्यादिकल्पना न साक्ष्यादिसिद्धसृष्टिप्रकारं निवारयितुं शक्नोतीत्यर्थः ।

६३४ ननु त्र्यणुकावयवतदवयवादेरतीन्द्रियत्वान्न साक्षिसिद्धत्वं किन्त्वनुमानगम्यत्वमित्यत आह **यदीति** ।

६३५ न तावत्परमाणोः पक्षीकारेण परमाणुरनुमातुं शक्यते । तत्र हेतोराश्रयासिद्धिप्रसङ्गात् । यत्र पदमपि न्यस्तुं न शक्यते न तद्देशं कश्चिल्लभते । त्र्यणुकावयवाः सावयवाः महद्द्रव्यारम्भकत्वात् चतुरणुकवदिति परमाणोरनुमाने तस्यापि महद्द्रव्यारम्भकत्वहेतुना अवयवानुमानं स्यात् । तथा देशकालानन्त्यमपि साक्षिसिद्धम् । न च तत्राप्यनुमानमुदेति । शशः शृङ्गीत्याद्यनुमानप्रतिबन्दीपराहतत्वात् । तथा हि । अयं प्रत्यक्षपरिदृश्यमानो देशः स्वतः स्थूलेन सूक्ष्मेण च देशेन सम्बद्धो देशत्वाद्धस्तवितस्त्यादिपरिच्छिन्नदेशवत् । अयं परिदृष्टः कालः कालान्तरवान् कालत्वादतीतकालवदित्यनुमाने सम्मतानि सर्वशृङ्गाणि शृङ्गान्तरसमानकालीनानि शृङ्गत्वात् गोशृङ्गवदित्यपि अनुमानं स्यात् । ततश्च देशान्तरादिवच्छशशृङ्गसिद्धिः । सजातीयं नाम सदृशमेव अस्मत्पक्षे । सदृशं च किं केन न भवति । अतः सामान्यतो दृष्टानुमानेन अत्यन्तातीन्द्रियवस्तुसिद्धौ शशशृङ्गसिद्धिरपि दुर्वारैव । अतः शिष्योपाध्यायवत्सहदर्शनमात्रेण साध्यसाधनयोर्न व्याप्तिः सिद्ध्यति । सन्दिग्धमूलत्वात् । किन्तु प्रत्यक्षेणागमेन वाऽत्र निर्धारितयुक्त्या वा गृहीतोऽविनाभाव एव अनुमानम् । यथा प्रत्यक्षयोग्यस्य धूममात्रस्य प्रत्यक्षयोग्यवह्निमात्रेण । यथा अधर्मत्वस्य निषिद्धत्वेन । यथा देशकालव्यवहितधूममात्रस्य देशादिव्यवहितवह्निमात्रेण प्रत्यक्षसिद्धधूमाग्निसम्बन्धेनैव ह्यप्रत्यक्षधूमाग्निसम्बन्धो निश्चीयते । अन्यथा सप्तमरसाद्यनिष्टान्यापतेयुः । सामान्यतो दृष्टानुमायाः कामचारित्वात् ।

६४१ इतोऽपि वैशेषिकादिसमयोऽनुपपन्न इत्याह **कार्येति** । अवयवावयविगुणगुणिक्रियावज्जातिव्यक्तिविशेषविशेषिभेदेन पञ्चसु स्थलेषु समवायोऽभ्युपगतोऽनुपपन्नः । तद्यथा तन्तुपटयो रूपपटयोश्चलनपटयोः पटत्वपटयोः

परमाणुतदन्त्यव्यावर्तकयोश्च अत्यन्तभिन्नयोः समवायसम्बन्धोऽपेक्षितः तथा तस्यापि समवायिभ्यां भिन्नत्व-साम्यात् समवायान्तरेण भाव्यम् । न हि स्वयमसम्बद्धोऽन्यसंयोजकः कश्चिद्दृष्टः । अतः समवायान्तरस्याप्येव-मित्यनवस्था दुर्वारा । एतेदेवोक्तं 'समवायाभ्युपगमाच्च साम्यादनवस्थितेरि'ति सूत्रेण ।

६४३ ननु समवायस्य सम्बन्धरूपत्वात् स्वनिर्वाहकत्वाच्च न समवायान्तरापेक्षेत्याशङ्क्याह **स स्वेति** । यदि सम्बन्धरूपत्वात् समवायान्तरानपेक्षत्वं समवायस्य संयोगस्यापि तर्हि तथात्वं स्यात् । न च समवायस्य स्वनिर्वाहकत्वेन सम्बन्धान्तरनिरपेक्षत्वम् । द्रव्यस्यापि तथा वक्तुं शक्यत्वात् । तथा च द्रव्यात्मत्वाभ्युपगमात् द्रव्यातिरिक्तसमवायादिपदार्थान्तरासिद्धिः स्यादित्यर्थः ।

६४३ अपि च । यथाऽवयवावयविनिष्ठत्वगुणगुणिनिष्ठत्वास्तित्वाभिधेयत्वादिधर्मजातं समवायस्य स्वरूपाति-रेकेण धर्मान्तरं नाभ्युपगम्यते, तथैव गुणक्रियासमवायादिकस्य द्रव्यात्मकत्वमभ्युपगम्यतामविशेषात् । तदाह **विशेष इति** ।

६४४ निगमयति **द्रव्यमिति** । अतो गुणक्रियाद्यनन्तविशेषात्मतया द्रव्यमेव नीलं पीतं चलतीत्यादिव्यवहारा-लम्बनं धर्मधर्मिव्यवहारतद्धर्मानन्त्यव्यवहारोऽपि विशेषायत्तो न तु भेदायत्तः ।

६४५ विशेषोऽपि न निर्विशेषः किन्तु स्वेनैव विशेषवान् । यथा पराभ्युपगतः समवायः स्वरूपेणैव वस्तु समवायीत्यर्थः ।

६४६ किञ्च द्रव्यव्यतिरिक्तगुणादिपदार्थकल्पने कल्पनागौरवं स्यादित्याह **कल्पनेति** । किञ्चादौ षड्भाव-पदार्थानभावसहितान् कल्पयित्वा पश्चात् समवायादेः अनतिरिक्तविशेषकल्पनाद्वरं द्रव्यस्यैव तथाविधविशेषकल्पनं कल्पनालाघवादित्याह **कल्पयित्वेति** ।

६४७ इतोऽपि विशेषोऽभ्युपगन्तव्य इत्याह **येनेति** ।

६४८ **भावाभावविभागेनेति** । विधिमुखनिषेधमुखभेदेनेत्यर्थः ।

६४९ नन्ववयवावयव्यादीनां परस्परभेदरहितत्वं कथं येन भेदरहितेषु तेषु अपर्यायशब्दनियामको विशेषः सिद्ध्येदित्यत आह **अभेदेनेति** ।

६५० मृद्घटः शुक्लो घटश्चलति घटोऽयं घटः पटो न भवतीत्याद्यभेदानुभवस्य युक्तं विशेषेणैव घटनमित्यर्थः । ननु सामान्यादेरपि न सम्मतो विशेषोऽस्ति । कथं तत्प्रतिबन्द्या द्रव्यस्यैव तथाविधविशेषापादनेन षट्पदार्थप्रक्रियाभङ्गः क्रियत इत्यत आह **सामान्येति** । यत्सामान्यादेर्बहुत्वं तत्तद्द्रव्यनिष्ठत्वमवयविनश्च तत्तदवयवनिष्ठत्वं रूपादेः

व्याप्यवृत्तित्वं संयोगादेरव्याप्यवृत्तित्वमभ्युपगतम् । तद्यदि द्रव्यादिभ्योऽन्यत् तर्हि षट्पदार्थनियमभङ्गः स्यात् । यदि पदार्थान्तरं गुणादिषु बहुत्वादिलक्षणमङ्गीक्रियते तर्हि तत्रापि शक्तिसादृश्यादिकं तस्मिन्नप्यभिधेयत्वादिकमित्यनवस्थाकारोऽयं पक्षो भवेत् । अपि च इदं सामान्यमिदं सामान्यमित्यनुवृत्तप्रत्ययवेद्यं सामान्येऽपि सामान्यं चतुर्विंशतिगुणा इति गुणेऽपि सङ्ख्यारूपगुणोऽनुभूयमान आपद्यत एवाङ्गीकृतः । यद्येतदप्यनवस्थाकारकमङ्गीक्रियते तर्ह्यनवस्थादूषणोच्छेदप्रसङ्गः ।

६५४　ननु भवत्पक्षेऽपीयमनवस्थादूषणं स्यात् गुणादीनां धर्मवत्त्वाङ्गीकारे । नो चेदेको गुण उत्पत्तिर्जायत इत्यादिव्यवहारो न स्यादित्याशङ्क्याह **अस्मत्पक्ष इति** । गुणादीनां तद्धर्माणां चानन्यत्वान्नानवस्था । तत्र धर्मधर्मिभावस्तु विशेषबलात्सिद्ध्यति । धर्माणां विनाशोत्तरकालं धर्मिणोऽत्यन्तभेदश्च भवेत् । पूर्वं तु भेदाभेदौ । अत्यन्ताभेदे विनाशासम्भवात् । भेदाभेदयोर्भेदाभेदान्तराभावेऽपि विशेषबलाद्व्यवहारसिद्धिः । न च तावेकत्र विरुद्धावनुभवसिद्धत्वात् । भगवतस्तु प्रपञ्चादत्यन्तभेदः स्वगुणादिभिरत्यन्ताभेदस्तेषां यावद्द्रव्यभावित्वात् । उच्छेदिनो धर्मास्तस्य सद्भावदशायां धर्मिणो भिन्नाभिन्नाः । स्वासद्भावदशायामत्यन्तभिन्ना, यथा चामघटरूपादयः ।

६५९　नन्वंशाभावे परमाणोरन्येन संयोगो न स्यादिति यदुक्तं तन्न युज्यते । अंशत एव संयोगे अंशस्याप्यंशतः संयोग इत्यनवस्थाप्रसङ्गादित्याशङ्क्याह **अंशांशिनोरिति** । अनेन हस्तपुस्तकसंयोगाच्छरीरपुस्तकसंयोगः संयोगजसंयोगोऽन्यो जायत इत्येतच्च निरस्तं भवति । अंशांशिनोरभेदेन हस्तसंयोगस्यैव शरीरसंयोगत्वात् ।

६६०　अंशतः संयोगानङ्गीकारे बाधकमाह **यदीति** ।

६६२　यथैकदेशतोऽसंयुक्तैरनेकावयवैरारब्धस्यापि द्रव्यस्य स्थूलत्वं व्याहतम् । एवं परमाणोः सकाशाद् द्व्यणुकस्य अमहत्त्वमित्येतदपि व्याहतमित्याह **परमाणोरिति** । तथा द्व्यणुकपरिमाणानपेक्षया त्र्यणुकपरिमाणमुत्पद्यते परमाणुपरिमाणानपेक्षया च द्व्यणुकपरिमाणमित्येतदपि व्याहतमित्याह **अणूनामिति** ।

६६३　तथा अंशांशिनोरत्यन्तभेदवादो न युक्त इत्याह **अंशिन इति** । अशेषांशैर्विनाऽभावादंशिनोऽभेद एकेनांशेन विनाऽप्यंशान्तरात्मकतया भावात् भेदाभेदावनुभवसिद्धावित्यर्थः ।

६६४　तथा संयोगविभागयोर्भेदवदेकनिष्ठत्वं विहाय द्विनिष्ठत्वाभिमानमपि अयुक्तम् इदमनेन संयुक्तम् इदमनेन संयुक्तम् इदमस्माद्विभक्तम् इदमस्माद्विभक्तम् इत्येकस्यैव अन्यप्रतियोगिसंयोगविभागधर्मधर्मित्वेनानुभवादित्याह **संयोग इति** ।

६६५　भेदस्यैकधर्मत्वं स्पष्टयति **भिन्ना इति** । भिन्ना इत्युक्ते यथा पदार्थबहुत्वं प्रतीयते एवं भेदबहुत्वं प्रतीयते। अस्मिन्नेव भेदसमूहे एषां भेदोऽनयोर्भेद इत्येकवचनं प्रयुज्यते । न चैतावता स चैको भेदः । इदमस्माद्भिन्नमिद-

मस्माद्भिन्नमित्यन्योन्यप्रतियोगिभेदापेक्षया द्वयोर्धर्मिणोर्भेदद्वयप्रतिभासात् । अतस्तस्मिन्नेकवचनं विप्राणां भोजनमित्यादिवत् समूहाभिप्रायम् । अतः संयोगस्य अनेकवृत्तित्वे भेदस्य तद्व्यतिरेकेणाभ्युपगतपृथक्त्वस्याप्यनेकवृत्तित्वं स्यादित्यर्थः ।

६६७ संयोगादिवत् सामान्यमपि नानेकवृत्तीत्याह **नरत्वादिकमिति** । सामान्यं नाम सादृश्यमेव । तच्चैकधर्मिकं धर्म्यन्तरनिरूप्यमिदमनेन सदृशमित्यनुभवात् । अतो गोत्वादिकं प्रतिव्यक्तिभिन्नमेव । एकगोपिण्डेन सह गोत्वे नष्टे पिण्डान्तरेऽपि गोत्वस्योपलम्भात् । नष्टगोपिण्डस्थगोत्वधर्मानाशे तदुपाधेरप्यविनाशप्रसङ्गः । न चैकमेव गोत्वं गोष्वित्यत्र प्रमाणमस्ति । अतोऽनेकत्वमन्तरेण नानेकनिष्ठधर्मः सम्भवतीत्यर्थः ।

६७० श्रुत्या चायमर्थः सिद्ध इत्याह **भिन्ना इति** ।

६७१ यावद्द्रव्यभाविधर्माणां भेदाभेदावाह **अनिवृत्तेति** । अत्यन्तानुच्छेदिनो धर्माः सन्ति धर्मिणि । ते न भिन्नाभिन्ना इत्यर्थः ।

६७२ नन्वानन्त्यव्यभिचाराभ्यां व्यक्तिषु शब्दसम्बन्धग्रहणानुपपत्तेरवश्यं सामान्यमेकमभ्युपगन्तव्यमेव । तत्कथमनेकवृत्तिधर्मो निषिद्ध्यत इत्यत आह **व्युत्पत्तिरिति** ।

६७५ खुरपुच्छसास्नादिमत्पिण्डेषु सादृश्यादेव सर्वेष्वपि गोशब्दव्युत्पत्तिरुपपद्यत एवानुगतसामान्याभावेऽपि । तत्र गामानय शुक्लामित्यादिषु वाक्येषु विवक्षितगोपिण्डावगतिरर्थप्रकरणलिङ्गादिनोपपद्यते । गोशब्देन सहगृहीतसम्बन्धव्यक्तिवद्व्यक्त्यन्तरेऽपि गोशब्दव्यवहारः सादृश्यविषयशक्त्यैवोपपद्यत इत्यर्थः । अनुगतगोत्वजात्यैव गोषु शब्दव्यवहार इत्यङ्गीकारे दूषणमाह **जातित इति** । जातित एव शब्दव्यवहाराङ्गीकारे गोत्वघटत्वपटत्वादिजातिषु जातिशब्दव्यवहारोऽनुपपन्नः स्यात् । यदि तत्र जातित्वसामान्यमङ्गीक्रियते तर्हि तस्मिन्नपि जातित्वसामान्ये जातिषु च सामान्यशब्दव्यवहारार्थं जात्यन्तरमङ्गीकरणीयम् । तत्राप्येवं तत्राप्येवमित्यनवस्था स्यात् । यद्यनुवृत्तप्रत्यक्षादिवेद्यत्वादिलक्षणोपाधिवशाज्जातिषु जातिशब्दप्रवृत्तिरभ्युपगम्यते, तर्हि सास्नाद्युपाधिवशाद्गवादिशब्दप्रवृत्तिः स्यादविशेषात् । एवं घटपटादिव्यक्तिषु व्यक्तित्वसामान्याभावाद्व्यक्तिशब्दव्युत्पत्तिरप्यनुपपन्नैव । यदि व्यक्तित्वसामान्यमङ्गीक्रियते तर्हि तस्मिन्नपि जातित्वसामान्याश्रयत्वेन व्यक्तिभूते तदितरव्यक्तिषु च व्यक्तित्वमेकमङ्गीकरणीयम् । तस्मिन्नप्येवं तस्मिन्नप्येवमित्यनवस्था स्यात् ।

६७६ इतोऽपि जात्यङ्गीकारोऽनुपपन्न इत्याह **कथमिति** । जातेः शब्दप्रवृत्तिनिमित्तत्वे पदार्थानां स्वरूपेषु स्वरूपशब्दप्रवृत्तिर्न स्यात् । न हि स्वरूपत्वसामान्यं केनचिदङ्गीकृतम् । यदि स्वरूपशब्दस्यापि व्यक्तिषु सम्बन्धग्रहणाय अनुगतवाचित्वमुच्यते तर्ह्यत्यन्तव्यावृत्तवाचकं किमिति पृष्टे अन्यत्पदं वाच्यम् । तदप्येवमनुगतवाचकं स्यादित्यतस्तद्व्यावृत्ताभिधायकं वाच्यम् । तदप्येवं तदप्येवमित्यनवस्था स्यात् । यावद्व्यावृत्ताकारवाचकं पदं

नोच्यते तावदियमनवस्था दुष्परिहरैव । न चावाच्यो व्यावृत्ताकारो व्यावृत्ताकारपदेन वाच्यत्वात् । तस्माद्व्यातिरिक्तजातेः कल्पनादिगौरवदोषोपहतत्वात् द्रव्यात्मकसादृश्यमेव शब्दप्रवृत्तिनिमित्तमित्यभ्युपगन्तव्यमित्यर्थः ।

६७८ अपि च न तावदौपाधिकव्यवहारालम्बनमुपाध्युपाधिमद्व्यतिरिक्तं विशिष्टव्यवहारालम्बनं च विशेषणविशेष्यतत्सम्बन्ध्यतिरिक्तं वक्तुं शक्यते । षट्पदार्थनियमभङ्गात् । नापि विशेषणविशेष्यतत्सम्बन्धानामन्यतमस्य विशिष्टव्यवहारालम्बनत्वं वक्तुं शक्यमिति सोदाहरणमाह **औपाधिकेत्यादिना** । पर्वतोऽग्निमानिति विशिष्टमवगम्यते वस्तु । तदेव धूमवत्त्वहेतुः साधयति । तत्र न तावत् अग्निसंयोगो विशिष्टशब्दाभिधेयः । तत्साधने सिद्धसाध्यतादोषप्रसङ्गात् । अग्निसंयोगस्य महानसादौ सिद्धत्वात् । यदि पर्वतस्याग्निसंयोगो वैशिष्ट्यलक्षणः साध्यते, तर्हि पर्वतस्येति षष्ठ्यभिधेयसम्बन्धो निरूपणीयः । यदि पर्वतस्याग्निसंयोगेन सह समवायसबन्ध उच्यते, तर्हि स एव धूमवत्त्वेन साध्यः स्यात् । तथा च सिद्धसाध्यतादोषस्तदवस्थ एव । समवायस्य तन्तुपटादौ सिद्धत्वात् । न हि ततोऽन्यः समवायोऽस्तीत्यङ्गीक्रियते । यदि पर्वताग्निसंयोगाद्युपाधिवशात्तत्र तत्र समवायो भिद्यते तर्हि नैकत्वं समवायस्य सिद्ध्यति । औपाधिकोऽपि भेदः सन्नेव हि समवायस्य । सदसद्विलक्षणश्चेन्मायावादप्रवेशः स्यात् । अतो नौपाधिकस्तदौपाधिकस्यापि सत्यत्वमविशिष्टमौपाधिकशब्दसामर्थ्यदिव । तथा ह्यौपाधिकसमवायभेद इति किमुपाधिजन्य उपाधिव्यङ्ग्यो वा । पक्षद्वयेऽपि पर्वताग्निसंयोगादीनां समवायाश्रयाणामुपाधीनामनेकत्वेन समवायानन्त्यं दुर्वारमेव । तथा समवायिभ्यामुपाधिभ्यां संयोगन्यायेन द्वौ समवायौ अभिधीयेताम् । ताभ्यां समवायापेक्षिभ्यां च अन्यौ ताभ्यां ताभ्यामप्येवमित्यनवस्था दुष्परिहरा । समवायभेदोऽस्ति चेदसावुपाधितो वाऽस्त्वनुपाधितो वा न तत्र विशेषः कश्चित् । यदि पर्वताग्निसंयोगोपाधिवशात् अविद्यमान एव समवायभेदः प्रतीयमानो धूमवत्त्वहेतुना साध्यत इत्युच्यते तर्हि इदं अनुमानं न प्रमाणं स्यात् । अयथार्थविदकत्वात् ।

६८४ इदानीं प्रागसतः सत्तासमवायो जनिरिति यज्जनिलक्षणं तदौपाधिकविशिष्टवद्दुर्निरूपमित्याह **एवमेवेति** । समवायविशेषस्य जनित्वे समवायानेकत्वप्रसङ्गः । समवायस्य नित्यत्वैकत्ववज्जगति जनेरपि नित्यत्वैकत्वप्रसङ्गः । उपाधिकल्पितसमवायस्य जनित्वे जनेरभावः स्यादित्यर्थः ।

६८५ स्वपक्षे त्वेकस्मिन्नपि विशेषाङ्गीकाराद्विशेष्यस्य पर्वतस्याग्निमत्ववैशिष्ट्यं सम्भवति । तथा पूर्वमसतः पदार्थस्य सद्भावलक्षणोत्पत्तिर्युज्यत इत्याह **अस्मत्पक्ष इति** ।

६८६ विशेषबलेन पूर्वमसतः सत्त्वमुपपादयति **अभावस्येति** । यथाऽभावस्य गगनकुसुमादेः प्रमेयत्वादिभावरूपधर्मो दृष्टः । यथा च भावानामेवेदमिदं न भवतीत्यन्यापोहलक्षणधर्मो दृष्टः । एवं पूर्वमसन्नपि पश्चात्सम्भवितुमर्हति । अन्यथा घटः पूर्वमसन्निति सामानाधिकरण्येन व्यवहारो न स्यात् । एवं सर्वपदार्था भावाभावरूपाः । स्वरूपेण सत्त्वादन्यरूपेणासत्त्वात् ।

६८८ नन्वेवं सति भावाभावव्यवस्था न स्यादित्यत आह **तथाऽपीति** । परामर्शोत्तरकालमभावस्य भावधर्मवत्त्वं भावस्याभावधर्मवत्त्वं च प्रतीयते प्रथमप्रतिपत्त्या भावाभावव्यवस्थेत्यर्थः ।

मस्माद्भिन्नमित्यन्योन्यप्रतियोगिभेदापेक्षया द्वयोर्धर्मिणोर्भेदद्वयप्रतिभासात् । अतस्तस्मिन्नेकवचनं विप्राणां भोजनमित्यादिवत् समूहाभिप्रायम् । अतः संयोगस्य अनेकवृत्तित्वे भेदस्य तद्व्यतिरेकेणाभ्युपगतपृथक्त्वस्याप्यनेकवृत्तित्वं स्यादित्यर्थः ।

६६७ संयोगादिवत् सामान्यमपि नानेकवृत्तीत्याह **नरत्वादिकमिति** । सामान्यं नाम सादृश्यमेव । तच्चैकधर्मिकं धर्म्यन्तरनिरूप्यमिदमनेन सदृशमित्यनुभवात् । अतो गोत्वादिकं प्रतिव्यक्तिभिन्नमेव । एकगोपिण्डेन सह गोत्वे नष्टे पिण्डान्तरेऽपि गोत्वस्योपलम्भात् । नष्टगोपिण्डस्थगोत्वधर्मानाशे तदुपाधेरप्यविनाशप्रसङ्गः । न चैकमेव गोत्वं गोष्वित्यत्र प्रमाणमस्ति । अतोऽनेकत्वमन्तरेण नानेकनिष्ठधर्मः सम्भवतीत्यर्थः ।

६७० श्रुत्या चायमर्थः सिद्ध इत्याह **भिन्ना इति** ।

६७१ यावद्द्रव्यभाविधर्माणां भेदाभेदावाह **अनिवृत्तेति** । अत्यन्तानुच्छेदिनो धर्माः सन्ति धर्मिणि । ते न भिन्नाभिन्ना इत्यर्थः ।

६७२ नन्वानन्त्यव्यभिचाराभ्यां व्यक्तिषु शब्दसम्बन्धग्रहणानुपपत्तेरवश्यं सामान्यमेकमभ्युपगन्तव्यमेव । तत्कथमनेकवृत्तिधर्मो निषिद्ध्यत इत्यत आह **व्युत्पत्तिरिति** ।

६७५ खुरपुच्छसास्नादिमत्पिण्डेषु सादृश्यादेव सर्वेष्वपि गोशब्दव्युत्पत्तिरुपपद्यत एवानुगतसामान्याभावेऽपि । तत्र गामानय शुक्लामित्यादिषु वाक्येषु विवक्षितगोपिण्डावगतिरर्थप्रकरणलिङ्गादिनोपपद्यते । गोशब्देन सहगृहीतसम्बन्धव्यक्तिवद्व्यक्त्यन्तरेऽपि गोशब्दव्यवहारः सादृश्यविषयशक्त्यैवोपपद्यत इत्यर्थः । अनुगतगोत्वजात्यैव गोषु शब्दव्यवहार इत्यङ्गीकारे दूषणमाह **जातित इति** । जातित एव शब्दव्यवहाराङ्गीकारे गोत्वघटत्वपटत्वादिजातिषु जातिशब्दव्यवहारोऽनुपपन्नः स्यात् । यदि तत्र जातित्वसामान्यमङ्गीक्रियते तर्हि तस्मिन्नपि जातित्वसामान्ये जातिषु च सामान्यशब्दव्यवहारार्थं जात्यन्तरमङ्गीकरणीयम् । तत्राप्येवं तत्राप्येवमित्यनवस्था स्यात् । यद्यनुवृत्तप्रत्यक्षादिवेद्यत्वादिलक्षणोपाधिवशाज्जातिषु जातिशब्दप्रवृत्तिरभ्युपगम्यते, तर्हि सास्नाद्युपाधिवशाद्गवादिशब्दप्रवृत्तिः स्यादविशेषात् । एवं घटपटादिव्यक्तिषु व्यक्तित्वसामान्याभावाद्व्यक्तिशब्दव्युत्पत्तिरप्यनुपपन्नैव । यदि व्यक्तित्वसामान्यमङ्गीक्रियते तर्हि तस्मिन्नपि जातित्वसामान्याश्रयत्वेन व्यक्तिभूते तदितरव्यक्तिषु च व्यक्तित्वमेकमङ्गीकरणीयम् । तस्मिन्नप्येवं तस्मिन्नप्येवमित्यनवस्था स्यात् ।

६७६ इतोऽपि जात्यङ्गीकारोऽनुपपन्न इत्याह **कथमिति** । जातेः शब्दप्रवृत्तिनिमित्तत्वे पदार्थानां स्वरूपेषु स्वरूपशब्दप्रवृत्तिर्न स्यात् । न हि स्वरूपत्वसामान्यं केनचिदङ्गीकृतम् । यदि स्वरूपशब्दस्यापि व्यक्तिषु सम्बन्धग्रहणाय अनुगतवाचित्वमुच्यते तर्ह्यत्यन्तव्यावृत्तवाचकं किमिति पृष्टे अन्यत्पदं वाच्यम् । तदप्येवमनुगतवाचकं स्यादित्यतस्तद्व्यावृत्ताभिधायकं वाच्यम् । तदप्येवं तदप्येवमित्यनवस्था स्यात् । यावद्व्यावृत्ताकारवाचकं पदं

नोच्यते तावदियमनवस्था दुष्परिहरैव । न चावाच्यो व्यावृत्ताकारो व्यावृत्ताकारपदेन वाच्यत्वात् । तस्माद्व्यातिरिक्तजातेः कल्पनादिगौरवदोषोपहतत्वात् द्रव्यात्मकसादृश्यमेव शब्दप्रवृत्तिनिमित्तमित्यभ्युपगन्तव्यमित्यर्थः ।

६७८ अपि च न तावदौपाधिकव्यवहारालम्बनमुपाध्युपाधिमद्व्यतिरिक्तं विशिष्टव्यवहारालम्बनं च विशेषणविशेष्यतत्सम्बन्ध्यतिरिक्तं वक्तुं शक्यते । षट्पदार्थनियमभङ्गात् । नापि विशेषणविशेष्यतत्सम्बन्धानामन्यतमस्य विशिष्टव्यवहारालम्बनत्वं वक्तुं शक्यमिति सोदाहरणमाह **औपाधिकेत्यादिना** । पर्वतोऽग्निमानिति विशिष्टमवगम्यते वस्तु । तदेव धूमवत्त्वहेतुः साधयति । तत्र न तावत् अग्निसंयोगो विशिष्टशब्दाभिधेयः । तत्साधने सिद्धसाध्यतादोषप्रसङ्गात् । अग्निसंयोगस्य महानसादौ सिद्धत्वात् । यदि पर्वतस्याग्निसंयोगो वैशिष्ट्यलक्षणः साध्यते, तर्हि पर्वतस्येति षष्ठ्यभिधेयसम्बन्धो निरूपणीयः । यदि पर्वतस्याग्निसंयोगेन सह समवायसम्बन्ध उच्यते, तर्हि स एव धूमवत्त्वेन साध्यः स्यात् । तथा च सिद्धसाध्यतादोषस्तदवस्थ एव । समवायस्य तन्तुपटादौ सिद्धत्वात् । न हि ततोऽन्यः समवायोऽस्तीत्यङ्गीक्रियते । यदि पर्वताग्निसंयोगाद्युपाधिवशात्तत्र तत्र समवायो भिद्यते तर्हि नैकत्वं समवायस्य सिद्ध्यति । औपाधिकोऽपि भेदः सन्नेव हि समवायस्य । सदसद्विलक्षणश्चेन्मायावादप्रवेशः स्यात् । अतो नौपाधिकस्तदौपाधिकस्यापि सत्यत्वमविशिष्टमौपाधिकशब्दसामर्थ्यादेव । तथा ह्यौपाधिकसमवायभेद इति किमुपाधिजन्य उपाधिव्यङ्ग्यो वा । पक्षद्वयेऽपि पर्वताग्निसंयोगादीनां समवायाश्रयाणामुपाधीनामनेकत्वेन समवायानन्त्यं दुर्वारमेव । तथा समवायिभ्यामुपाधिभ्यां संयोगन्यायेन द्वौ समवायौ अभिधीयेताम् । ताभ्यां समवायापेक्षिभ्यां च अन्यौ ताभ्यां ताभ्यामप्येवमित्यनवस्था दुष्परिहरा । समवायभेदोऽस्ति चेदसावुपाधितो वाऽस्त्वनुपाधितो वा न तत्र विशेषः कश्चित् । यदि पर्वताग्निसंयोगोपाधिवशात् अविद्यमान एव समवायभेदः प्रतीयमानो धूमवत्त्वहेतुना साध्यत इत्युच्यते तर्हि इदं अनुमानं न प्रमाणं स्यात् । अयथार्थविदकत्वात् ।

६८४ इदानीं प्रागसतः सत्तासमवायो जनिरिति यज्जनिलक्षणं तदौपाधिकविशिष्टवद्दुर्निरूपमित्याह **एवमेवेति** । समवायविशेषस्य जनित्वे समवायानेकत्वप्रसङ्गः । समवायस्य नित्यत्वैकत्ववज्जगति जनेरपि नित्यत्वैकत्वप्रसङ्गः । उपाधिकल्पितसमवायस्य जनित्वे जनेरभावः स्यादित्यर्थः ।

६८५ स्वपक्षे त्वेकस्मिन्नपि विशेषाङ्गीकाराद्विशेष्यस्य पर्वतस्याग्निमत्ववैशिष्ट्यं सम्भवति । तथा पूर्वमसतः पदार्थस्य सद्भावलक्षणोत्पत्तिर्युज्यत इत्याह **अस्मत्पक्ष इति** ।

६८६ विशेषबलेन पूर्वमसतः सत्त्वमुपपादयति **अभावस्येति** । यथाऽभावस्य गगनकुसुमादेः प्रमेयत्वादिभावरूपधर्मो दृष्टः । यथा च भावानामेवेदमिदं न भवतीत्यन्यापोहलक्षणधर्मो दृष्टः । एवं पूर्वमसन्नपि पश्चात्सम्भवितुमर्हति । अन्यथा घटः पूर्वमसन्निति सामानाधिकरण्येन व्यवहारो न स्यात् । एवं सर्वपदार्था भावाभावरूपाः । स्वरूपेण सत्त्वादन्यरूपेणासत्त्वात् ।

६८८ नन्वेवं सति भावाभावव्यवस्था न स्यादित्यत आह **तथाऽपीति** । परामर्शोत्तरकालमभावस्य भावधर्मवत्त्वं भावस्याभावधर्मवत्त्वं च प्रतीयते प्रथमप्रतिपत्त्या भावाभावव्यवस्थेत्यर्थः ।

६८९ अभावस्य भावरूपधर्माङ्गीकारादेव नष्टघटस्यापि पटाद्भेदोऽस्त्येवेत्यादिव्यवहारो युज्यत इत्यत आह **तस्मादिति** ।

६९० अभावश्च त्रिविधः । प्रागभावप्रध्वंसाभावात्यन्ताभावभेदेन । अन्योन्याभावस्तु भेदपृथक्त्वशब्दव्यवहार्यो वस्तुस्वरूपान्न व्यतिरिच्यते । तत्र भेदकल्पने दूषणमाह **अन्योन्येति** ।

६९२ अत्र भेदस्य वस्तुस्वरूपत्वे यन्मायिभिर्दूषणमभिहितं तदनूद्य दूषयति **भेदस्येति** । अयमर्थः । यदि भेदः स्वरूपं वस्तुनस्तर्हि घटस्य विदारणं स्यात् । भिदिर् विदारण इति धातोः । तथा भिन्नघटभागानामपि भेदस्वरूपत्वाद्विदारणं स्यात् । एवं तत्रापि तत्रापीत्यन्ततः सर्वावयवानां विदारणेन शून्यतापत्तिरिति । नायं दोषः । अन्यप्रतियोगिकभेदस्वरूपत्वात् घटस्य अन्येनैव विभागो भवेत् न स्वेन । विदारणेऽपि घटतदवयवानां ततोऽप्यल्पतरादवयवानामपि विदारणमेव स्यात् । न तु शून्यता । न हि शून्यस्य शून्यान्तरसंयोगेन किञ्चिदारभ्यते । अपि च भेदस्वरूपत्वे वस्तुनो विदारणापादनमसङ्गतमेव । अन्यत्वलक्षणभेदस्य वस्तुस्वरूपत्वात् । न च विदारणमेवान्यत्वम् । तथा सत्यविभक्तोष्ठयोरनन्यत्वप्रसङ्गात् । अतः 'प्रयोगतोऽनुमन्तव्या(ऽनुगन्तव्या) अनेकार्था हि धातव' इत्यभियुक्तवचनाद्भिदेर्धातोर्विदारणवदन्यत्वमप्यर्थो भवत्येव । अत इदं मायिमतमनुवादार्हमेव न भवतीति न पृथगनूद्य दूषितमस्मिन्पादे सूत्रकृता ।

६९७ यदुक्तं ज्ञानेच्छाप्रयत्नाद्यष्टगुणक ईश्वर इति तदयुक्तम् । अपरिमेयगुणत्वादित्याह **न चेति** ।

६९७ 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे । यदासीत्तत एवाद्यः स्वयम्भूः समभूदज' इत्यादिभगवद्वाक्याद्भागवतस्थात् । अनन्तगुणेत्यादिश्रुतेश्च भगवतो नित्यानन्दस्यापि गुणानन्त्यं सिद्धमित्याह **मयीति** । अनन्ते गुणतो इति भगवत एकैकगुणापेक्षयाऽप्यानन्त्यमभिधीयते ।

६९९ तद्विवृणोति **यदीति** ।

७०० ननु सृष्टिविषयत्वस्थितिविषयत्वादिविशेषो न स्वतो ज्ञानेच्छादेः किन्तु विषयोपाधिकः किं न स्यादित्यत आह **औपाधिकेति** । औपाधिकविशेषोऽप्यस्ति चेदनन्तविशेषत्वं दुर्निवारमीश्वरज्ञानस्य नास्ति चेद्घटाद्यविषयत्वं स्यादित्यर्थः ।

७०१ अपि च स्वप्रकाशलक्षणविशेषस्त्ववश्यमभ्युपगन्तव्यो ज्ञानस्य । अन्यथा सर्वज्ञत्वमीशस्य न स्यादित्याह **स्वप्रकाशत्वमिति** । यैर्ज्ञानस्य निराकृतं तेषां पक्ष इति शेषः । न हि स्वज्ञानमेवाजानतः सर्वज्ञत्वं भवति । स्वज्ञानस्यापि सर्वमध्यपतितत्वात् । न च तद्विषयं ज्ञानान्तरमस्तीति वाच्यम् । ज्ञानद्वयेन सर्वं जानामीति ज्ञानस्यापि ज्ञानद्वयमध्यपतितत्वेन स्वप्रकाशत्वापरिहारात् । विषयतया स्वेन विशेष्यत्वं हि स्वप्रकाशत्वं ज्ञानस्य । यदि स्वेतरसर्वविषयज्ञानात् तद्विषयज्ञानाच्च तदुभयविषयज्ञानमीशस्यान्यदभ्युपगम्यते, तर्हि तत्त्रितयविषयज्ञानमन्यदि-

त्यनवस्था स्यात् । सर्वेषामपि यत्सर्वमिति ज्ञानं तस्य स्वविषयत्वाभावे सर्वविषयत्वं न स्यात् । स्वस्यापि सर्वमध्यपतितत्वात् । अतः स्वप्रकाशत्वमवश्यमभ्युपगन्तव्यं ज्ञानस्य इत्यर्थः ।

७०५ ईशस्य ज्ञानादिकमभ्युपगम्य आनन्दानभ्युपगमे यो हेतुः पराभ्युपगतः तमनूद्य दूषयति **सुखवानिति** । न चेशस्य सुखित्वे यज्ञदत्तवदुःखित्वापत्तेर्न सुखित्वमिति वाच्यम् । ज्ञानित्वेऽपि चैत्रवदनित्यज्ञानाज्ञानयोरापत्त्येश्वरस्य ज्ञानाभावप्रसङ्गात् । 'योऽशनाया पिपासे शोकं मोहं जरां मृत्युमत्येति', 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कदाचन', 'य आत्माऽपहतपाप्मे'त्यादिश्रुत्या ईश्वरस्य दुःखाभावपरानन्दयोः प्रतिपादितत्वाच्च ।

७०७ न च देवदत्तादेर्दुःखित्वे सुखित्वं प्रयोजकं किन्तु दुःखित्वापादकेश्वरेच्छाविषयत्वं हि तत्र प्रयोजकम् । न चेशः स्वस्य दुःखित्वमिच्छति । अतो न दुःखित्वं तस्येत्याह **ईश्वरस्येति** । किञ्च नित्यपूर्णानन्दश्चेदीश्वरस्तर्हि दुःखवान् स्यादित्यापादयितुं न शक्यते । नित्यानन्दस्य दुःखित्वेन व्याप्त्यभावात् । व्याहतं चेदमापादनम् । नित्यपूर्णानन्दस्य दुःखित्वविरोधात् । न चेशस्यानन्दवत्त्वे चैत्रवदनित्यानन्दवत्त्वमापद्यत इति वाच्यम् । अनित्यसुखित्वस्य दुःखित्वप्रयुक्तत्वान्मैत्रादौ । दुःखित्वं चेश्वरस्य श्रुतिविरुद्धम् ।

७०८ किञ्च सुखित्वदुःखित्वयोः सहदर्शनमात्रेण श्रुतिसिद्धेश्वरानन्दापलापे अग्नीषोमीयपशुहिंसादेरपि ब्राह्मणादिहिंसावत् पापहेतुत्वं किमिति नानुमीयत इत्याह **सहेति** ।

७०८ यदि पापहेतुत्वे हिंसात्वं न प्रयोजकं ब्रह्महत्यादौ, किन्तु श्रुत्या निषिद्धत्वम् । अतः श्रुतिविहितहिंसायुक्तत्वान्न यज्ञादेरधर्मत्वमित्युच्यते तर्हि दुःखित्वेऽपि न दुःखित्वं प्रयोजकं जीवस्य किं तर्हि श्रुत्या दुःखित्वेनोक्तत्वम् । अतो नेश्वरस्य दुःखित्वमिति समः समाधिः । तस्माच्छ्रुतिरेवात्रोपादेया, नानुमानमजागलस्तनायमानमित्यर्थः ।

७१२ यद्यवश्यं श्रुतिमनादृत्येश्वरस्य दुःखाभावेन सुखाभावो घटादाविव अनुमीयते तर्हि विमतो जगत्कर्ता पुरुषत्वात् देवदत्तवत्, यज्ञो न कर्तव्यः हिंसात्वात् सम्मतवत्, धर्मो न स्वर्गसाधनं कृतिसाध्यत्वान्निष्ठीवनवदित्यनुमानेनेश्वराद्यभावः स्यात् । तस्मादनुमानमनादृत्य श्रुत्युक्तप्रकारेणेश्वरादिवस्तु ग्राह्यम् । तदेतदाह **अनुमानेनेति** ।

७१४ इतोऽपि नानुमानं प्रतिरोधकं धर्मिग्राहकप्रमाणविरुद्धत्वादित्याह **ईशस्येति** ।

७१६ कालभेदेन जगत्सृष्टिप्रलयव्यवस्था च परमते न घटते । कालस्य भेदाभावात्, औपाधिकभेदस्य तु निराकृतत्वादित्याह **नित्येच्छत्वादिति** । अनेन 'नित्यमेव च भावादि'ति सूत्रं विवृतम् । स्वमते तु कालभेदसद्भावात् सृष्ट्यादिव्यवस्था उपपन्ना ।

७१८ ईश्वरेच्छा च स्वयं नित्याऽपि कालविशेषव्यवस्थितसृष्ट्याद्यवस्थापादिका । कालविशेषाश्चेश्वराधीनाः । 'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः । अर्धमासा मासा ऋतवः संवत्सराश्च' इति श्रुतेः ।

७१९ 'सोऽन्तःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयानः। उवास तस्मिन्सलिल' इति भागवतवचनाच्च। सृष्टिसंहारौ तत्तत्कालीनौ इतिवत् सृष्टिसंहारकालावपि नेशोऽन्याधीनः । अतः तत्तत्कालीनाविति युज्यते । कालस्य स्वनिर्वाहकत्वादित्याह **कालस्येति** । न च वाच्यमविचित्रेश्वरेच्छया सृष्ट्यादिविचित्रं कार्यं कथमिति । अनन्तविशेषत्वादीश्वरेच्छायाः । कालवदीशदेशावपि स्वनिर्वाहकौ । ईशः स्वतन्त्रो देशः सर्वगत इति व्यवहारात् । स्वनिर्वाहकत्वेऽपि देशकालावीश्वराधीनौ स्वयमेव तत्तत्कालभेदं तदा तदैव कल्पयति । एवं स्वोद्दिष्ट एव कालविशेषे सृष्टिः स्यात् संहारः स्यादिति च कल्पयति ।

७२४ एवं हीशस्येच्छास्वभावादेव न कालकर्मनिबन्ध्या न चैवं स्वभावादेव सर्वमपीति वाच्यम् । स्वभावस्य नित्यानित्यश्चेशाधीनस्योक्तत्वात् । अधुना रूपादिमत्त्वेन परमाणूनामपि घटादिवदनित्यत्वमुपपादयन्नधिकरणार्थमुपसंहरति **रूपेति** । अनेन 'रूपादिमत्त्वाच्च विपर्ययो दर्शनादि'ति सूत्रं विवृतं भवति । अतो न वैशेषिकादिप्रक्रिया श्रुतिसमन्वयसिद्धानन्तगुणकं नारायणं जगत्कारणं विघटयितुं समर्थेति सिद्धम् ॥ ६ ॥

॥ इति वैशेषिकाधिकरणम् ॥ ६ ॥

* * *

॥ समुदायाधिकरणम् ॥

७२६ शब्दादीनां केषाञ्चित्पदार्थानां त्रिक्षणावस्थायित्वं वदतो वैशेषिकादेर्मतनिराकरणप्रसङ्गेनेदानीं सर्वक्षणिकत्ववादिनो बौद्धस्य मतं निराक्रियते । बौद्धाश्चतुर्विधाः । तत्र तावद्बाह्यार्थाङ्गीकारिणां द्विविधानां मतं दूषयितुमुपन्यस्यति **वैभाषिका इत्यादिना** । स्थितिः स्कन्धानामिति शेषः । वैभाषिकसौत्रान्तिकमतस्थितिरेषा । कालकर्मनिमित्ततो मिलितपरमाणुसमुदाय एव पर्वतादिप्रपञ्चो न त्ववयव्येकोऽस्ति । ज्ञानमेवात्मा । दुःखाभावः सुखम् । निर्विषयचित्सन्ततिर्मुक्तिः । सर्वमेतद्रूपविज्ञानवेदनासंज्ञासंस्कारभेदेन पञ्चधा भिन्नं वस्तु क्षणविनाशि च । रूपादिसन्ततयो वस्तुभूताः स्थायिन्यश्चेति ।

७२९ तत्र तावत् परमाणुपुञ्जं निराकरोति **स समुदाय इत्यादिना** । अनेन 'समुदाय उभयहेतुकेऽपि तदप्राप्तिरि'ति सूत्रं विवृतं भवति ।

७३० 'इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वादि'ति सूत्रं व्याचष्टे **अन्योन्येत्यादिना** । न च वाच्यं विरलेष्वपि परमाणुषु विद्यमानः समुदायो मिलितेष्वेकैकापेक्षया व्यवह्रियत इति । सर्वक्षणिकत्वभङ्गापत्तेः । नित्यत्वे समुदायस्य न च तस्य वस्तुत्वं वाच्यम् । एको घट इति प्रत्ययविरोधात् । न च तस्य प्रत्ययस्यालम्बनं परमाणवः । तेषामनेकत्वादप्रत्यक्षत्वाच्च । न च वस्तुभूतसमुदायं परमाणवो मिलित्वा जनयन्तीति युक्तम् । तेषामसमुदितपरमाणुजननस्वभावत्वात् । क्षणिकत्वविरोधाच्च । समुदायप्रवाहस्याप्यनादित्वे प्रलयाभ्युपगमो व्याहतः स्यात् ।

७३२ एवं सति का हानिरित्यत आह **अत इति**। इन्द्रियासंयुक्तादर्थादिन्द्रियसंयुक्तार्थोत्पत्त्यनुपपत्तेः। अर्थासंयुक्तादिन्द्रियादर्थसंयुक्तेन्द्रियोत्पत्त्ययोगाच्च। संयुक्तार्थेन्द्रियकारणकस्य ज्ञानस्योत्पत्तिः न युज्यते। अघटज्ञानाद्घटज्ञानं च न स्यादित्यर्थः।

७३३ कारणाद्विसदृशकार्योत्पत्तौ घटलक्षणादपि पटलक्षणोत्पत्तिः स्यादित्याह **विशेषेति**। यस्य कस्यापि कारणं स्यादिति शेषः।

७३५ अदृष्टोपकृतं कारणं विलक्षणं कार्यं जनयेत्। को दोष इत्यत आह **अदृष्टमिति**। न ह्यनुपकर्तुरदृष्टादुपकर्त्रदृष्टोत्पत्तिर्युज्यते। न च क्षणविनाशिनः कारणस्य सहकार्यसाद्यविसदृशकार्यजनकत्वं युक्तम्। क्षणिकत्वभङ्गप्रसङ्गात्। क्षणिकत्वे परमाणूनां मिलित्वा घटादिव्यवहारजननत्वं न युज्यत इत्युक्तम्।

७३८ अधुना क्षणिकत्वमप्ययुक्तं सर्वस्येत्याह **विनाशोत्पत्तय इति**।

७३९ स एवायमिति प्रत्यभिज्ञाप्रत्यक्षस्य स्तम्भादीनां स्थायित्वग्राहकस्य क्षणिकत्वग्राहकानुमानेन बाधं मन्यमानश्चोदयति **फलेति**। अत्रायं प्रयोगः। यत्सत्तत्क्षणिकं यथा दीपादिः। सन्तश्च पञ्चस्कन्धाः। दीपस्यापि प्रतिक्षणमन्यत्वमनुमेयम्। परिमाणविशेषदर्शनात्।

७४० भिन्नपरिमाणत्वं भिन्नेषु दृष्टं घटादिषु। तदेतद्दूषयति **आकाशस्येति**। अयमर्थः। यदि प्रत्यक्षसिद्धमपि जगतः स्थिरत्वमनुमानेन बाध्यं स्यात्। तर्हि प्रदीपादिरपि सत्त्वादाकाशादिवद्विशेषरहित इत्यनेनैवानुमानेन क्षणिकत्वसाधकपरिमाणादिविशेषरहितः स्यात्। ततस्तस्याक्षणिकत्वसिद्धिः। अनेनैवानुमानेन जगत्स्थिरं च स्यात्। ननु मूर्ताभाव एवाकाशः। अतः कथं तस्य सत्त्वमित्यत आह **यदीति**। अभावो हीदमत्र नास्तीति धर्मिप्रतियोगिनावपेक्ष्यैव निषेधमुखेनैव प्रतीयते। आकाशस्य तु विधिमुखेन धर्मिप्रतियोगिनावपेक्ष्यैव प्रतीयमानत्वान्नाभावत्वम्। अतोऽदृष्टं क्षणिकत्वादिकं स्वीकुर्वन् वस्तुतो दृष्टं स्थायित्वादिकं परित्यजन्नयं शाक्यः स्वतोऽप्युन्मत्तस्यैव समीचीनत्वं प्रकाशितवान् भवेत्।

७४३ ननु न प्रत्यभिज्ञया जगत्स्थायित्वं सिद्ध्यति। यतः पूर्वं वस्तूत्तरस्मिन्वस्तुनि संस्कारमाधाय नश्यति। अतः पूर्ववस्तुसदृशमुत्तरवस्तूत्पद्यते। तेन पूर्वं यज्ज्ञातं तदिदमिति भ्रम इत्यत आह **उत्तरेति**। पूर्वं यज्ज्ञातं तत्सदृशमेतदिति रजतमिति ज्ञानं तदिदमिति भ्रमो वा स्थिरस्यात्मनो घटते न तु क्षणिकस्य। न ह्यन्यावबद्धवस्तुना सदृशज्ञानमभेदभ्रमो वाऽन्यस्य सम्भवति। तथा सत्यज्ञातगोरपि गोसदृशत्वज्ञानं गवये अज्ञातसर्पस्यापि सर्पज्ञानं रज्जौ स्यात्। अनुमानं च क्षणिकात्मपक्षे दुर्लभम्। व्याप्त्याद्यनुसन्धातुरभावात्।

७४६ इतोऽपि पूर्वक्षणाहितसंस्कारापादितसादृश्यवशात् सोऽहमित्यादिभ्रम इत्येतदयुक्तमित्याह **कार्येति**। न च क्षणिकस्य वस्तुनो वस्त्वन्तरमुत्पाद्य तस्मिन् संस्काराधायकत्वं युक्तम्। क्षणिकत्वभङ्गात्। पूर्वापरकलाभ्यां

तन्निरूप्यमध्यकलया च हीनः कालविशेषो हि क्षणोऽभ्युपगतः । तस्मिन् वस्तुनः स्वरूपलाभवस्त्वन्तरोत्पादन-संस्काराधानानामवसरो न ह्यस्ति । अपि च वस्तुसादृश्यापादकसंस्कारापादकसंस्काराणामपि यत्सादृश्यं तदपि संस्कारान्तरापाद्यं चेत्, तत्राप्येवं तत्राप्येवमित्यनवस्था स्यात् । विसदृशसंस्काराणां सादृश्यापादकत्वे घटसंस्कारवत् पटसन्ततिगतसंस्कारस्यापि घटसन्ततौ सादृश्यापादकत्वप्रसङ्गः ।

७४९ इतोऽपि क्षणिकत्ववादोऽनुपपन्न इत्याह **पूर्वभावेति** । अयमर्थः । किं पूर्वस्य वस्तुनः सद्भाव उत्तरं वस्तूत्पद्यते उत नाशान्तरम् । आद्ये पक्षे उत्तरतोत्तरघटाख्यकार्याणां क्षणमात्रपरिवर्तिनां स्वस्वकारणक्षणवर्तितया प्रथमे घटक्षण एवोत्पत्तिः स्यात् । ततश्च घटसन्तत्यभावः स्यात् । युगपदुत्पन्नानां कार्यकारणभावश्च न स्यात् । गोशृङ्गयोरिव । द्वितीये पक्षे विनाशस्य व्यवहितत्वान्नोत्तरवस्तुकारणत्वं पूर्वस्य वस्तुनः स्यात् ।

७५१ नियतपूर्वक्षणवर्ति हि कारणं निर्हेतुकस्योत्तरवस्तुन उत्पत्तिश्चाप्रामाणिकी । यद्दीपादिवद्घटादेरपि क्षणिकत्वानुमानं तत्प्रत्यक्षविरुद्धं साध्यविकलदृष्टान्तश्चेत्याह **अभेद इति** । विशेषबलादेकस्यापि दीपस्य कालभेदात् वृद्धिह्रासादिविशेषोऽनुभवसिद्धः । न च विरुद्धधर्माध्यासमात्रेण भेदो वक्तुं शक्यते वस्तुनः । क्षणिकस्यापि स्वस्वार्थक्रियायां समर्थस्य वस्त्वन्तरार्थक्रियायामसमर्थस्य शक्तत्वाशक्तत्वधर्माध्यासेन भेदापत्तेः । अत एव भविष्यदर्थक्रियायामिदानीमशक्तस्य पश्चाच्छक्तस्याप्येकत्वमविरुद्धं वस्तुनः । किञ्च यथा दीपस्य वृद्धिह्रासादिज्ञानं प्रमाणं तथैव स्थायित्वज्ञानमपि प्रमाणं किं न स्यादविशेषादित्याह **विशेषेति** ।

७५२ यथा विशेषदर्शनं मानं दिगादिसत्त्वज्ञानमप्येवं किं स्यादित्याह **दिगिति** । यदि सद्वस्तु किमप्यङ्गीकृतं तर्हि तद्वदाकाशस्य भावत्वमाकाशवत् दिक्सुखयोश्च । विधिप्रत्ययवेद्यत्वाविशेषादित्यर्थः ।

७५३ एवं वैभाषिकसौत्रान्तिकयोर्मतमविशेषेण दूषितम् । अधुना सौत्रान्तिकेन यदन्यदभ्युपगतं नीलपीताकारज्ञानमेव प्रत्यक्षं तेन स्वाकारार्पकयाऽनुमेयोऽर्थ इति तद्दूषयति **विश्वमिति** । न च ज्ञानेनार्थोऽनुमेय इति वाच्यम् । अर्थेन ज्ञानमनुमेयमित्यपि वक्तुं शक्यत्वादात्मनः क्षणिकत्वाङ्गीकारात् । तत्र च कृतहान्यादिदोषापत्तेः । अतो मतद्वयमेतत्त्याज्यमेव ॥ ७ ॥

॥ इति समुदायाधिकरणम् ॥ ७ ॥

* * *

॥ असदधिकरणम् ॥

७५४ अधुना ज्ञानार्थाभाववादिनः कल्पितं जगत्कारणत्वं च शून्यं वदतो बौद्धैकदेशिनो माध्यमिकस्य मतं दूषयितुमुपन्यस्यति **अपर इत्यादिना इति ब्रूत इत्यन्तेन** । स्वयम्भातमित्यपरप्रकाश्यम् । अनन्तं वस्तुतः स्वव्यतिरिक्तवस्तु शून्यमित्यर्थः ।

७६४ अत्रैतन्मतनिरासकं सूत्रम् 'नासतोऽदृष्टत्वादि'ति । तद्व्याचष्टे **नासत इत्यादिना** । नासतो जगत्कारणत्वमनुमातुं शक्यते । दृष्टान्ताभावात् ।

७६५ न हि दृष्टाननुसार्यनुमातुं युक्तम् । असतः कार्यजनकत्वे सप्तमरसाभावादेव तृप्त्यादिकार्यसिद्धौ मधुरादिषु प्रवृत्तिवैय्यर्थ्यं स्यादित्याह **यद्येवमिति** ।

७६७ अपि च इदमस्मिन्देश इदमस्मिन्काले भवत्वित्यभिसन्धाय देशकालभेदेन वस्तु व्यवस्थापयितुं न हि बुद्धिशून्यः शक्नोति सर्वधर्मरहितत्वाभ्युपगमादित्याह **देशेति** । अपि च विमतं पुरुषोद्भूतं कार्यत्वाद्घटवदित्यनुमानपराहतं सर्वस्य शून्योद्भूतत्वमित्याह **पुरुषेति** ।

७६८ ननु सर्वस्यैवाभावात् कथं तस्य शून्योद्भूतत्वं निषिद्ध्यत इत्याशङ्क्याह **न चेति** । यद्यनुभूयमानमपि विश्वं नास्तीत्युच्यते तर्ह्यनुभूयमानत्वाविशेषान्नास्तीति वचनमपि नास्तीति स्यात् । तदा विश्वमस्तीति वचनं सत्यं स्यात् । अभावाभावस्य भावत्वात् । अनेन 'नाभाव उपलब्धेरि'ति सूत्रं विवृतम् ।

७६९ अधुना सदित्युपलब्धमपि स्वाप्नगजादिकमविद्यमानमेव तद्वदिदमपि विश्वं सांवृतसत्यमेव न वस्तुभूतमित्याशङ्कते **स्वप्नेति** ।

७७० युक्तं स्वाप्नगजादेरवास्तवत्वं तदुत्तरकाले बाधदर्शनाद्विश्वस्य तु तद्बाधादर्शनान्न भ्रान्तित्वमिति परिहरति **किञ्चेति** । ननु शुक्तिरजतवद्विश्वस्यापि प्रतीत्युत्तरकाले ज्ञानेन निवृत्तिर्भवतु को दोष इत्याशङ्क्याह **अनादेरिति** । यद्यनादितो वर्तमानस्यापि विश्वस्य ज्ञानेन निवृत्तिरनुमीयते तर्हि तस्या अपि निवृत्तेरादिमत्याः सुतरां निवृत्तिरनुमीयते । पदार्थत्वेन विश्ववद्भ्रान्तिविषयत्वप्रसङ्गात् । न हि दृष्टस्य विश्वस्य भ्रान्तिविषयत्वं निवृत्तेरदृष्टाया अभ्रान्तिविषयत्वमिति सम्भवति । तथात्वे हि दृष्टविषाणानां गवादीनामभृङ्गित्वमदृष्टविषाणानां शशानां भृङ्गित्वं स्यादित्यर्थः ।

७७२ देशकालादिनियमो न हि शून्यात् सतोर्भवेदित्युक्तम् । तर्हि स्वपक्षे कथमित्यत आह **अस्माकमिति** ।

७७३ ननु बाधाभावाद्विश्वस्य सत्यत्वमित्युक्तम् । तन्न । विमतं मिथ्या दृश्यत्वात् स्वप्नवदित्यनुमानेन बाधादित्याशङ्क्य परिहरति **दृश्यत्वादिति** ।

७७४ यदेतत्प्रपञ्चस्य मिथ्यात्वानुमानं तदपि किं दृश्यत्वेन मिथ्या सत्यं वा । यदि मिथ्या तर्हि विश्वं सत्यं स्याद्बाधकाभावात् । यदि सत्यं तर्हि तत्र व्यभिचरितत्वेन दृश्यत्वहेतुरसाधकः स्यात् । अपसिद्धान्तश्च स्यात् शून्यव्यतिरेकेण सत्यत्वाङ्गीकारे । दृश्यत्वानुमानस्यापि मिथ्यात्वे प्रपञ्चस्य मिथ्यात्वसाधकत्वं न सिद्ध्यतीत्याह **साधकत्वमिति** ।

७७५ यदि असत्यमानस्य साधकत्वं सत्यमानानभ्युपगमादसत्यमानान्तरेण साध्यते तर्हि तस्याप्यसत्य-मानान्तरेण साधकत्वं साध्यं विप्रतिपन्नत्वादित्यनवस्था स्यात् । इतोऽपि नानुमानात्प्रपञ्चमिथ्यात्वमित्याह **सत्त्वं चेति** ।

७७६ प्रपञ्चस्य सत्यत्वं ह्यनुभवसिद्धम् । अतो मिथ्यात्वे यदनुमानादिकं तद्बाधितविषयमित्यर्थः । ननु प्रत्यक्षा-नुभवो विश्वस्य वर्तमानकालीनं सत्त्वं गृह्णाति । अनुमानं तु भविष्यत्कालीनां निवृत्तिं गृह्णाति । अतो विरोधाभावान्न बाध्यबाधकभाव इत्यत आह **अतीतेति** ।

७७७ प्रत्यक्षादिदृष्टविश्वस्य त्रैकालिकसत्त्वं साक्षिणा गृह्यत इति साधितमधस्तात् । अतो न भविष्यद्बाधोऽनुमातुं शक्यते । ननु दृष्टस्य त्रैकालिकाबाध्यत्वे सदिदं रजतमिति दृष्टस्य शुक्तिरजतस्याप्यबाध्यत्वप्रसङ्ग इत्यत आह **दृढेति** ।

७७७ शुक्तिरेव दृष्टा तत्सादृश्याद्रजतं दृष्टवदवभासते न तु मुख्यतो दृष्टम् । न हि आशामोदकतृप्तिरपि तृप्ति-र्भवति । अत एव विश्वमिथ्यात्वसाधने शुक्तिरजतादिदृष्टान्तः साधनविकलो भवति । मुख्यतस्तत्र दृश्यत्वा-भावात् । इतोऽपि न शुक्तिरजतसाम्यं अर्थक्रियाकारिणः प्रपञ्चस्यासांवृतत्वादित्याह **भ्रान्तेरिति** ।

७७८ न हि कुत्रचिद्भ्रान्तस्य सांवृतसत्यत्वं सांवृतसत्यस्य वा भ्रान्तत्वमभ्युपगतम् । शून्यवादिनाऽपि पृथक् परिभाषितत्वात् । अस्मदभ्युपगतसत्त्वमपि शुक्तिरजताद्वैलक्षण्यमेव प्रपञ्चस्य ।

ननु प्रतीतिमात्रपरिवर्तिनो भ्रान्तिविषयात्सांवृतसत्यस्य शून्यज्ञाननिवर्त्यमानत्वमेव विशेषो नान्यः । भ्रान्तिविषयवत्प्रतीतत्वेन प्रपञ्चस्यापि स्वविषयज्ञानव्यभिचारानुमानेन उत्तरकालीनबाधसिद्धेरित्याशङ्क्याह **विज्ञानादिति** । एतदनुमानस्यापि प्रतीतत्वेन स्वविषयज्ञानव्यभिचारः स्यात् । ततश्च प्रपञ्चस्य स्वविषय-ज्ञानाद्व्यभिचारग्राहकप्रमाणाभावादव्यभिचारः सिद्ध्यतीत्यर्थः ।

७७९ अत्र चोदयति **भेद इति** । अयमर्थः । पञ्चभेदात्मकः प्रपञ्चोऽभ्युपगतः । स च भेदस्य निरूपयितु-मशक्यत्वादवस्तुभूतो भवेत् । तथा हि । अयमनयोर्भेद इति विशेषणविशेष्यभावापेक्षया भेदसिद्धिर्विशेषणविशेष्य-भावश्च भेदसापेक्षः । इदमस्माद्भिन्नमिति धर्मिप्रतियोग्यपेक्षया भेदसिद्धिर्भेदापेक्षश्च धर्मिप्रतियोगिभाव इतीतरेतरा-श्रयतया न कथञ्चिद्भेदो निरूपयितुं शक्यत इत्येतन्निरस्यति ।

७८० **यन्न तदिति** । यदि धर्मादिप्रतीतिरन्या भेदप्रतीतिश्चान्या तर्हीतरेतराश्रयत्वं भवेत् । न त्वेतदस्ति । वस्तुस्वरूपत्वाद्भेदस्य । धर्मिणि गृहीते प्रतियोगिनि च तद्भेदाग्रहणासम्भवात् । अन्यथाऽयं घटो वा पटो वेति संशयः स्यात् ।

७८१ न त्वयमस्माद्भिन्न इति व्यवहारः । गृहीतभेदत्वाविशेषे स्वरूपयोः परस्मादितिवत्स्वस्मादयं भिन्न इति व्यवहारः किं न स्यादित्याह **अन्यथेति** ।

७८२ अतः पूर्वं धर्मिप्रतियोगिप्रतीतिः पश्चात् भेदप्रतीतिरिति प्रतीतिद्वयासम्भवादेकयैव प्रतीत्या धर्मधर्मिप्रतियोगितद्भेदा गृह्यन्त इति नेतरेतराश्रयदोष इत्याह **धर्मित्वेति** ।

७८३ घटस्येत्येतावतैव सामान्येन स्वेतरसर्ववस्तुभ्यो भेदसिद्धावपि घटाद्भेदः स्तम्भाद्भेद इति विशेषाकारमवलम्ब्य व्यवहार इत्याह **स्वरूपेणेति** । न च घटस्वरूपत्वे भेदस्य घटस्य भेद इति व्यवहारो न युक्त इति वाच्यम् । घटस्य स्वरूपमितिवदुपपत्तेः । एकस्मिन्नपि विशेषाङ्गीकारात् । इतोऽपीतरेतराश्रयणत्वेन भेददूषणमयुक्तं स्वव्याहतत्वेन जात्युत्तरत्वात् । तथा हि । यदि भेदादितरेतराश्रयत्वदूषणस्य स्याद्भेदः तर्हि भेददूषणेनेतरेतराश्रयत्वमपि दूषितं स्यात् । ततश्च दूषणाभावाद्भेदसिद्धिः स्यात् ।

७८४ यदि भेदादितरेतराश्रयत्वस्य भेदोऽङ्गीक्रियते तर्हि तत्रापीतरेतराश्रयत्वं स्यात् । तदाह **किञ्चेति** ।

७८६ एवं माध्यमिकमतस्य दूषणेनैव मायावादिमतमपास्तं भवति तयोरविशेषादित्याह **एतादृशस्येति** ।

७८८ मायिमाध्यमिकमतयोरविशेषमुपपादयति **यच्छून्येति** । सच्चिदानन्दात्मकत्वं नामानृतजडादिविरोधित्वमेवाङ्गीकृतं ब्रह्मणि मायिना । एतच्चापोहवादिना माध्यमिकेन शून्येऽपि स्वीकृतम् । निर्विशेषत्वाभ्युपगमात् । न ब्रह्मणः शून्यस्य च परस्परं भेदो निरूपयितुं शक्यते मायिना शून्यवादिना च ।

७८९ किञ्च स्वमतस्यापि मिथ्यात्वाङ्गीकारात् मायिमाध्यमिकाभ्यां तस्य दूषणं मृतमारणतुल्यम् । अत एव 'वैधर्म्याच्च न स्वप्नादिवदि'त्यनायासेन निराकरणं कृतं सूत्रकृतेत्याह **स्ववाक्येति** ।

७९० सूत्रगतचकारार्थमाह **चेतीति** । यतो विश्वकृता सूत्रकारेणैव स्वप्नसाम्यं विश्वस्य दृष्टिविरुद्धमप्रमाणं चेति चकारेण सूचितम् । अतो मायिमाध्यमिकमतं परित्याज्यमेवेत्यर्थः ॥ ८ ॥

॥ इति असदधिकरणम् ॥ ८ ॥

* * *

॥ अनुपलब्ध्यधिकरणम् ॥

७९१ अधुना अर्थभेदवादिनो योगाचारस्य बौद्धैकदेशिनो मतं निराकर्तुमुपन्यस्यति **ज्ञानमित्यादिना** ।

७९२ संवृतिभूमिष्वन्तःकरणेषु ज्ञानस्य प्रतिक्षणं भेदः प्रतिदेहं सन्ततिभेदभ्रान्त्या भासत इत्युपन्यस्तं ज्ञानाद्वैतमतं दूषयति **इत्येतदिति** । यदि ज्ञानार्थयोरभेदः स्यात्तर्हि अहं घट इति प्रतीतिः स्यात् । न त्वयं घट इति । किञ्चास्मिन्मते आशामोदकतृप्तानामुपार्जितमोदकतृप्तानां च रसवीर्यविपाकादितौल्यं स्यात् । अनेन 'न भावोऽनुपलब्धेरि'ति सूत्रं व्याख्यातं भवति । ज्ञानं हीन्द्रियार्थसंयोगभेदेनान्यदन्यदुत्पद्यते ।

७९३ ज्ञेयस्य स्थायित्वं प्रतिपादितमतोऽपि न तयोरैक्यमित्याह **क्षणिकत्वादिति**। अनेन 'क्षणिकत्वाच्चे'ति सूत्रं व्याख्यातं भवति ।

७९४ एवं निराकृतांश्चतुरो बौद्धपक्षानुपसंहरति **सर्वश्रुतीति**। अतो बौद्धमतावष्टम्भेन नोक्तसमन्वयापक्षेप इति सिद्धम् ॥ ९ ॥

॥ इति अनुपलब्ध्यधिकरणम् ॥ ९ ॥

* * *

॥ नैकस्मिन्नधिकरणम् ॥

७९५ अथ वेदबाह्यवादिमतनिराकरणप्रसङ्गाज्जैनमतं निराकर्तुमुपन्यस्यति **आह इति**। जैनेन सर्वमक्षणिकमेव सप्तप्रकारमभ्युपगतम् । सत्स्यादसत्स्यात्सदसत्स्यात्सदसद्विलक्षणं च स्यात्सदसच्च तद्विलक्षणं च स्यादुक्तमेतन्न स्यात्स्याच्चेति ।

७९६ तदेतद्दूषयति **नैतदिति**। स्वरूपेण सत्त्वमन्यरूपेणासत्त्वमेव पदार्थस्य युक्तम् । न तु स्वरूपेणैव सदसत्त्वादिकमनुभवविरुद्धत्वात् । सत्त्वे वस्तुनोऽसत्त्ववादिनोक्तदोषपरिहाराय असत्त्वं स्वीकृतम् । असत्त्वे सत्त्ववादिनोक्तदोषपरिहाराय सत्त्वं स्वीकृतम् । तदुभयदोषपरिहाराय सदसद्विलक्षणं च स्वीकृतम् । तत्रोक्तदोषपरिहाराय पक्षान्तरं स्वीकृतम् ।

७९७ तत्राप्येवमिति सप्तभङ्गीस्वीकारे सर्वपक्षोक्तदोषसमुदायः स्यादित्याह **तत्तद्दोषेति**।

७९८ तस्मात् स्वरूपेणैव सदसत्त्वादिसप्तप्रकारवत्त्वमेकस्याशेषमानविरुद्धत्वान्निष्प्रमाणकत्वात् स्वव्याहतत्वान्न सम्भवतीत्याह **अतिहायेति**। अमग्रहोऽप्रमाणकग्रह इत्यर्थः। अनेन 'नैकस्मिन्नसम्भवादि'ति सूत्रं व्याख्यातं भवति ।

८०० अधुना क्षपणको यदन्यदभ्युपगतवान् कायपरिमाणो जीव इति तदनूद्य दूषयति **वक्तीति**। देहपरिमितत्वे जीवस्याश्वशरीरपरिमितस्य कर्मवशाद्गजशरीरं गतस्य तत्राव्याप्यवर्तनं स्यात्, ततश्च गजदेहैकदेशस्य चेष्टा न स्यादनात्मकस्य। यद्यप्यल्पमहदादिशरीरेषु सङ्कोचविकासाभ्यां व्याप्तिरङ्गीक्रियते जीवस्य, तर्हि विकारित्वं स्यात्। ततश्च यद्विकारि तदनित्यमित्यभ्युपगमादनित्यत्वं स्यात् ।

८०२ स्वमते तु विकारमात्रेणानित्यत्वानभ्युपगमान्नानित्यत्वम् । जीवस्य ज्ञानह्रासवृद्ध्यादिविकारवतोऽपीत्याह **नानित्यतेति** । लक्षणनिवृत्त्यैव विशेष्यवस्तुनो निवृत्तिरभ्युपगता । न च चैतन्यलक्षणं कदाचिन्नश्यति । अतो नानित्यत्वं चेतनस्याशङ्क्यम् । पटगजादेरप्योतप्रोतात्मकत्वादिलक्षणनिवृत्त्यैव नाशित्वं भवेत् । चलनादिविकारमात्रेण नाशित्वे जीवगजादेरपि नाशित्वप्रसङ्गः । अतः कृतकत्वेनेव लक्षणनिवृत्त्यैव नाशित्वं वस्तुव्याप्तम् । कतिपयावयवविगमागमादिना विकारेण वस्तुनो नाशे प्रत्यभिज्ञाविरोधः । न हि छिन्नपुच्छकर्णो वा कृशो वा पुष्टो वा श्वा न प्रत्यभिज्ञायते । अनुमीयमाने साधने व्यभिचारः स्यात् । रूपादिकमपि भौतिकमेव नाशित्वेन व्याप्तम् । अतो रूपवतोऽपि जीवस्य नानित्यतापत्तिः ।

८०५ न चैवमभ्युपगन्तुं शक्यं क्षपणकेनेत्याह **नैवमिति** । यद्यद्विकारवद्यद्यद्रूपादिमच्च तत्तदनित्यमिति व्याप्तिबलेन हि जगतः प्रलयोऽभ्युपगतस्तेन । न चात्र मानान्तरं वक्तुं शक्यम् । अपौरुषेयागमानभ्युपगमात् । अतो विकारित्वेन अनित्यत्वं दुर्निवारं जीवस्य तन्मते । न च निर्विकारत्वं वक्तुं शक्यम् । मुक्तस्यापि सन्ततोर्ध्वगमनलक्षणविकाराभ्युपगमात् । ननु सर्वावयवसन्निवेशविश्लेषलक्षणविकारस्यैवानित्यत्वसाधकत्वमभ्युपगतं न विकारमात्रस्य अतो नानित्यत्वमात्मनः प्रसज्यते । सर्वावयवसन्निवेशविश्लेषलक्षणविकाराभावादिति चेन्मैवम् । भूभूधरादीनामपि नित्यत्वप्रसङ्गात् । सर्वावयवविश्लेषलक्षणविकारानुपलम्भात् तेषाम् अतो विकारमात्रस्यानित्यत्वसाधकत्वमभ्युपगन्तव्यमेवेति नोक्तदोषपरिहारः परमते ।

८०९ यच्चान्यदभ्युपगतं तेनोद्भिजादीनां नियामकत्वं तच्च दूषयितुमाह **देहमान इति** । ननु देहपरिमित एवात्मा । तत्र पूर्वमल्पशरीरपरिमितस्य पश्चाद्वृक्षादिशरीरपरिमितत्वे वृद्ध्यादिविकारप्राप्तेर्न वृक्षादेः सात्मकत्वमिति चेन्मैवम् । एवं सति हस्त्यादेरपि निरात्मकत्वप्रसङ्गात् । आत्मनस्तावद्देहे व्याप्त्या भाव्यमेव । तत्र पूर्वमल्पशरीरमितस्यात्मनः पश्चाद्धस्त्यादिशरीरपरिमितत्वे वृक्षादिशरीरमितत्वे वा न हि वृद्ध्यादिविकारे विशेषो वक्तुं शक्यते ।

८१२ वृक्षादेः सात्मकत्वमात्मलिङ्गैः साधयति **गीतादिति** । गीतात्पुष्पादिवत् रसनिष्पेषादिना पुष्पादिविगमदर्शनात् । धूपधूमविशेषाधिवासनेनारोग्यपुष्पाढ्यतावदतिशीतोष्णस्पर्शतो ग्लानिदर्शनात् । क्षितिरसाभ्यादानेन वृद्धिक्षतभग्नप्ररोहणदर्शनात्सात्मकत्वमेव वृक्षादीनाम् । न ह्यचेतनस्य शब्दादिवेदनं सम्भवतीत्यर्थः ।

८१२ 'एवं चात्माकात्स्न्र्यं न च पर्यायादप्यविरोधो विकारादिभ्य' इति सूत्रारूढोऽयं प्राक् प्रपञ्चितोऽर्थ इत्याह **एवमिति** । अतो न क्षपणकपक्षावष्टम्भेनापि वैदिकसिद्धान्ताक्षेप इति सिद्धम् ॥ १० ॥

॥ इति नैकस्मिन्नधिकरणम् ॥ १० ॥

* * *

७९३ ज्ञेयस्य स्थायित्वं प्रतिपादितमतोऽपि न तयोरैक्यमित्याह **क्षणिकत्वादिति**। अनेन 'क्षणिकत्वाच्चे'ति सूत्रं व्याख्यातं भवति।

७९४ एवं निराकृतांश्चतुरो बौद्धपक्षानुपसंहरति **सर्वश्रुतीति**। अतो बौद्धमतावष्टम्भेन नोक्तसमन्वयापक्षेप इति सिद्धम्॥ ९॥

॥ इति अनुपलब्ध्यधिकरणम्॥ ९॥

* * *

॥ नैकस्मिन्नधिकरणम्॥

७९५ अथ वेदबाह्यवादिमतनिराकरणप्रसङ्गाज्जैनमतं निराकर्तुमुपन्यस्यति **आह इति**। जैनेन सर्वमक्षणिकमेव सप्तप्रकारमभ्युपगतम्। सत्स्यादसत्स्यात्सदसत्स्यात्सदसद्विलक्षणं च स्यात्सदसच्च तद्विलक्षणं च स्यादुक्तमेतन्न स्यात्स्याच्चेति।

७९६ तदेतद्दूषयति **नैतदिति**। स्वरूपेण सत्त्वमन्यरूपेणासत्त्वमेव पदार्थस्य युक्तम्। न तु स्वरूपेणैव सदसत्त्वादिकमनुभवविरुद्धत्वात्। सत्त्वे वस्तुनोऽसत्त्ववादिनोक्तदोषपरिहाराय असत्त्वं स्वीकृतम्। असत्त्वे सत्त्ववादिनोक्तदोषपरिहाराय सत्त्वं स्वीकृतम्। तदुभयदोषपरिहाराय सदसद्विलक्षणं च स्वीकृतम्। तत्रोक्तदोषपरिहाराय पक्षान्तरं स्वीकृतम्।

७९७ तत्राप्येवमिति सप्तभङ्गीस्वीकारे सर्वपक्षोक्तदोषसमुदायः स्यादित्याह **तत्तद्दोषेति**।

७९८ तस्मात् स्वरूपेणैव सदसत्त्वादिसप्तप्रकारवत्त्वमेकस्याशेषमानविरुद्धत्वान्निष्प्रमाणकत्वात् स्वव्याहतत्वान्न सम्भवतीत्याह **अतिहायेति**। अमग्रहोऽप्रमाणकग्रह इत्यर्थः। अनेन 'नैकस्मिन्नसम्भवादि'ति सूत्रं व्याख्यातं भवति।

८०० अधुना क्षपणको यदन्यदभ्युपगतवान् कायपरिमाणो जीव इति तदनूद्य दूषयति **वक्तीति**। देहपरिमितत्वे जीवस्याश्वशरीरपरिमितस्य कर्मवशाद्गजशरीरं गतस्य तत्राव्याप्यवर्तनं स्यात्, ततश्च गजदेहैकदेशस्य चेष्टा न स्यादनात्मकस्य। यद्यप्यल्पमहदादिशरीरेषु सङ्कोचविकासाभ्यां व्याप्तिरङ्गीक्रियते जीवस्य, तर्हि विकारित्वं स्यात्। ततश्च यद्विकारि तदनित्यमित्यभ्युपगमादनित्यत्वं स्यात्।

८०२ स्वमते तु विकारमात्रेणानित्यत्वानभ्युपगमान्नानित्यत्वम् । जीवस्य ज्ञानह्रासवृद्ध्यादिविकारवतोऽपीत्याह **नानित्यतेति** । लक्षणनिवृत्त्यैव विशेष्यवस्तुनो निवृत्तिरभ्युपगता । न च चैतन्यलक्षणं कदाचिन्नश्यति । अतो नानित्यत्वं चेतनस्याशङ्क्यम् । पटगजादेरप्योतप्रोतात्मकत्वादिलक्षणनिवृत्त्यैव नाशित्वं भवेत् । चलनादिविकार-मात्रेण नाशित्वे जीवगजादेरपि नाशित्वप्रसङ्गः । अतः कृतकत्वेनेव लक्षणनिवृत्त्यैव नाशित्वं वस्तुव्याप्तम् । कति-पयावयवविगमागमादिना विकारेण वस्तुनो नाशे प्रत्यभिज्ञाविरोधः । न हि छिन्नपुच्छकर्णो वा कृशो वा पुष्टो वा श्वा न प्रत्यभिज्ञायते । अनुमीयमाने साधने व्यभिचारः स्यात् । रूपादिकमपि भौतिकमेव नाशित्वेन व्याप्तम् । अतो रूपवतोऽपि जीवस्य नानित्यतापत्तिः ।

८०५ न चैवमभ्युपगन्तुं शक्यं क्षपणकेनेत्याह **नैवमिति** । यद्यद्विकारवद्यद्यद्रूपादिमच्च तत्तदनित्यमिति व्याप्ति-बलेन हि जगतः प्रलयोऽभ्युपगतस्तेन । न चात्र मानान्तरं वक्तुं शक्यम् । अपौरुषेयागमानभ्युपगमात् । अतो विकारित्वेन अनित्यत्वं दुर्निवारं जीवस्य तन्मते । न च निर्विकारत्वं वक्तुं शक्यम् । मुक्तस्यापि सन्ततोर्ध्वगमन-लक्षणविकाराभ्युपगमात् । ननु सर्वावयवसन्निवेशविश्लेषलक्षणविकारस्यैवानित्यत्वसाधकत्वमभ्युपगतं न विकार-मात्रस्य अतो नानित्यत्वमात्मनः प्रसज्यते । सर्वावयवसन्निवेशविश्लेषलक्षणविकाराभावादिति चेन्मैवम् । भूभूधरा-दीनामपि नित्यत्वप्रसङ्गात् । सर्वावयवविश्लेषलक्षणविकारानुपलम्भात् तेषाम् अतो विकारमात्रस्यानित्यत्वसाधक-त्वमभ्युपगन्तव्यमेवेति नोक्तदोषपरिहारः परमते ।

८०९ यच्चान्यदभ्युपगतं तेनोद्भिज्जादीनां नियामकत्वं तच्च दूषयितुमाह **देहमान इति** । ननु देहपरिमित एवात्मा । तत्र पूर्वमल्पशरीरपरिमितस्य पश्चाद्वृक्षादिशरीरपरिमितत्वे वृद्ध्यादिविकारप्राप्तेर्न वृक्षादेः सात्मकत्वमिति चेन्मैवम् । एवं सति हस्त्यादेरपि निरात्मकत्वप्रसङ्गात् । आत्मनस्तावद्देहे व्याप्त्या भाव्यमेव । तत्र पूर्वमल्पशरीरमितस्यात्मनः पश्चाद्धस्त्यादिशरीरपरिमितत्वे वृक्षादिशरीरमितत्वे वा न हि वृद्ध्यादिविकारे विशेषो वक्तुं शक्यते ।

८१२ वृक्षादेः सात्मकत्वमात्मलिङ्गैः साधयति **गीतादिति** । गीतात्पुष्पादिवत् रसनिष्पेषादिना पुष्पादिविगम-दर्शनात् । धूपधूमविशेषाधिवासनेनारोग्यपुष्पाढ्यतावदतिशीतोष्णस्पर्शतो ग्लानिदर्शनात् । क्षितिरसाभ्यादानेन वृद्धिक्षतभग्नप्ररोहणदर्शनात्सात्मकत्वमेव वृक्षादीनाम् । न ह्यचेतनस्य शब्दादिवेदनं सम्भवतीत्यर्थः ।

८१२ 'एवं चात्माकात्स्न्यं न च पर्यायादप्यविरोधो विकारादिभ्य' इति सूत्रारूढोऽयं प्राक् प्रपञ्चितोऽर्थ इत्याह **एवमिति** । अतो न क्षपणकपक्षावष्टम्भेनापि वैदिकसिद्धान्ताक्षेप इति सिद्धम् ॥ १० ॥

॥ इति नैकस्मिन्नधिकरणम् ॥ १० ॥

* * *

॥ पत्युरधिकरणम् ॥

८१३ अधुना पाशुपतादीनां रुद्रस्यैव जगत्कारणत्ववादिनां मतमुपन्यस्य बहुश्रुतिस्मृतिविरुद्धत्वेन नोपादेयमित्याह **सर्वज्ञत्वेति** ।

८१४ बहुश्रुतिविरोधं दर्शयति **अस्येत्यादिना** ।

८१८ 'अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः । विदे हि रुद्रो रुद्रियं महित्त्वं यासिष्टं वर्तिरश्विनाविरावदि'ति । हविर्भिराराधितस्य विष्णोः प्रसादाद्रुद्रो रौद्रं महत्त्वं विदे लेभ इत्यर्थः । 'स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् । मृळा जरित्रे रुद्रे'ति । मृगमिव भीमं श्रीनृसिंहं हृद्गर्तसदनं भो रुद्र त्वं स्तुहीत्यर्थः। 'रुद्रस्य त्वेव धनुरार्तिः शिर उत्पिपेषे'ति । रुद्रस्य शिरो धनुष्कोटिरुत्पिपेष चिच्छेदेत्यर्थः । कुमाराश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् । भूरेर्दातारं सत्पतिं गृणीषे इति । भो रुद्र बहुतरस्यापेक्षितस्य दातारं सत्पतिं विष्णुं गृणीषे स्तौषीत्यर्थः । 'तव श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रम् । पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनामि'ति । भो रुद्र यस्माद्विष्णोः पदं त्वया हृदि न्यधायि निहितं तेन कारणेन गोनां वाचां गुह्यं नारायणेति नाम जपोपदेशादिना पालयसीत्यर्थः । 'अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्त वा उ' । इति । रुद्राय हन्तवे रुद्रं हन्तुम् । अहं धनुरातनोम्याकर्षामीत्यर्थः । 'यं कामये तं तमुग्रं कृणोमी'ति । यं यमुग्रं रुद्रं कर्तुं कामये तं रुद्रं कृणोमि करोमीत्यर्थः । 'मा शिश्नदेवा अपि गुर्ऋतं न' इति शिश्नदेवा लिङ्गदेवाः भूतभविष्यद्वर्तमानरुद्रा नोऽस्माकं ऋतं ब्रह्म मागुर्नावगच्छन्तीत्यर्थः । स्कान्दे च । 'न त्वं वेत्सि न वेत्तीन्द्रो नाहं वेद्मि न शङ्करः । वेत्ति पारं महत्त्वस्य हरेरद्भुतकर्मण' इति । 'घ्नन् शिश्नदेवा अभिवर्पसाऽभूदि'ति । शिश्नदेवान् रुद्रान् घ्नन्मारयन्वर्पसा तेजसाऽभ्यभूत्परेश इत्यर्थः । 'एको नारायण आसीन्न ब्रह्मा न च शङ्कर' इति स्पष्टार्थः । 'स रुष्टः स प्रसन्नः यद्रुष्टः यत्प्रसन्नः तस्माद्रुद्रसम्प्रसादावभूतां न ह्यङ्गदेवतामि'ति । विष्णुकोपप्रसादाज्जातौ रुद्रचतुर्मुखावित्यर्थः । शान्तिपर्वणि च । 'नमोऽतिशयरसे तस्मै देहिनां परमात्मने । नारायणाय विश्वाय निर्गुणाय गुणात्मने । यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसम्भवः । एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदादेशितपन्थानौ सृष्टिसंहारकारणावि'ति । 'देवा वै सत्रमासत ऋद्धिपरिमितियशस्कामाः । तेऽब्रुवन् यन्नः प्रथमः पश्येत्स एषां मखं वैष्णवं यश आर्च्छदि'ति । तेषां देवानां वैष्णवमखशब्दवाच्यो रुद्रो यश आर्च्छदाहरदित्यर्थः । तद्युगलेन स्तब्धधनुषो धनुर्ज्यायशः प्रत्याहर्तुकामेनेन्द्रेण छिन्नेत्युपरि श्रूयते । 'तस्येन्द्रो वज्ररूपेण धनुर्ज्यामच्छिनत्स्वयमि'ति । तत एव रुद्रशिरश्छिन्नम् । 'यज्ञेन यज्ञमयजन्त देवा' इति तेजःसाधनत्वाद्यज्ञेन वैष्णवमखाभिधेन रुद्रेण यज्ञं विष्णुमयजन्त देवा इत्यर्थः । 'देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुमि'ति । देवाः पुरुषमेधयागं कुर्वाणा रुद्राख्यं पुरुषं पशुमबध्नन्नित्यर्थः । 'यो भूतानामधिपती रुद्रस्तन्तिचरो वृषे'ति । भूतपती रुद्रो वृषा विष्ण्वाज्ञालक्षणतन्त्या बद्धश्चरतीत्यर्थः ।

८१८ एताभिः श्रुतिभिः पशुपतेरनीश्वरत्वप्रकरणं किं प्रतीयत इत्याह **इत्यादीति** । स्तोतृत्वादिश्रवणेन पारतन्त्र्यमवगन्तव्यं पशुपतेः । प्रलयेऽभवो भाव इत्यर्थः । अनेन 'पत्युरसामञ्जस्यादि'ति सूत्रं व्याख्यातं भवति ।

८१९ यद्यशरीरत्वान्न जन्यादिमत्त्वं पशुपतेः सम्भवतीत्युच्यते तर्हि जगत्कारणत्वं न स्यात् । अशरीरत्वेन परिदृष्टकारकप्रयोक्तृत्वासम्भवात् । देहवत एव हि ज्ञानचिकीर्षाप्रयत्नवतः कर्तृत्वं दृष्टं कुविन्दादेः । यदि विश्वोत्पादनमचेतनमेव पशुपतेः शरीरमङ्गीक्रियते तर्हि तद्विकारेण पशुपतेरपि विकारित्वं स्यात् । ततश्च हर्षविषादौ स्यातां तदेतदाह **अशरीरेति** ।

८२१ इतोऽपि न जगत्कर्तृत्वं पशुपतेरधिष्ठानरहितत्वादित्याह **अधिष्ठान इति** ।

८२२ ननु शरीरवतः कर्तुरधिष्ठानेन भाव्यम् । अशरीरस्य पशुपतेः किमधिष्ठानेनेत्याह **अदेह इति** । अदेहस्याज्ञत्वेनाकर्तृत्वं दुष्परिहरमेव । एतद्दूषणपरिहाराय पशुपतेर्देहवत्त्वाभ्युपगमे यज्ञदत्तवन्मृतिरपि स्यादित्याह **देहीति** । अतो बहुतरप्रतिकूलतर्कपराहतत्वान्नानुमानमूलकः पाशुपतागमः पशुपतेर्जगत्कर्तृत्वसाधकः ।

८२३ ननु यत् 'सम्बन्धानुपपत्तेरधिष्ठानाद्यनुक्ते'रित्यादिसूत्रोक्तदूषणं पाशुपतागमवेद्यस्य पशुपतेर्जगत्कर्तृत्वे तदखिलं विष्णोरपि किं न स्यादित्याशङ्क्य परिहरति **न चैतदिति** । 'देहवत्त्वाभ्युपगमान्नादेहवत्त्वप्रयुक्तदूषणं जगत्कर्तृत्वे विष्णोः । देहस्य च ज्ञानानन्दादिगुणात्मकत्वाभ्युपगमान्न भौतिकदेहप्रयुक्तदूषणं च वक्तुं शक्यमित्यभिप्रायः । अप्राकृतदेहवतो विष्णोर्जगत्कर्तृत्वं श्रुतिभिः साधयति **मनोबुद्धीत्यादिना** ।

८३१ 'बुद्धिमनोऽङ्गप्रत्यङ्गवत्तां भगवतो लक्षयामहे बुद्धिमान् मनोवानङ्गप्रत्यङ्गवानिति', 'यदात्मको भगवान् तदात्मिका व्यक्तिः । किमात्मको भगवान् ज्ञानात्मक ऐश्वर्यात्मकः शक्त्यात्मकः', 'वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्करः', 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्', 'तस्माद्विराळजायते'त्यादिवाक्यैः अप्राकृतनित्यविग्रहस्वरूपाद्विष्णोर्जगदुत्पत्तिः प्रतीयते । 'ज्ञानज्ञानः सुखसुख' इति प्राकृतेन्द्रियादिजन्यज्ञानसुखो न भवति किन्तु विशुद्धज्ञानसुखघन इत्यर्थः । न च शाश्वताप्राकृतदेहवत्त्वादिमाहात्म्यं पशुपत्यादेरप्यस्तीति वाच्यम् । 'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति । न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमापे'ति श्रुतिविरोधात् । नन्वेकस्यैव विष्णोर्देहदेहिभावादिकं विरुद्धमित्यत आह **मानवत्त्वादिति** ।

८३२ ननु शिवस्यापि जगत्स्रष्टृत्वं श्रूयते श्वेताश्वतरश्रुतौ । 'विश्वस्य स्रष्टारमनेकरूपं विश्वस्यैकं परिवेष्टितारम् । ज्ञात्वा शिवं शान्तिमत्यन्तमेती'त्यत आह **शिवेति** ।

८३३ शिवादिनाम्नां विष्णुविषयत्वे प्रमाणमाह **नामानीति** । 'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति', 'यो देवानां नामधा एक एव', 'विष्णुनामानि नान्यस्ये'त्यादिश्रुतिभिर्हरावेव सकलश्रुतिसमन्वयस्योक्तत्वाच्च । शिवादिनामयुक्तश्रुतीनां विष्णावेव अतिमुख्यतयोपपन्नत्वात् न रुद्रादेर्जगत्कर्तृत्वप्रतिपादकत्वं सम्भवतीत्यर्थः ।

८३४ **अपरे** तदन्यवाचिशब्दा इत्यर्थः । नापि लैङ्गादिपुराणानि पाशुपतागममूलानि रुद्रस्य जगत्कारणत्वे प्रमाणानि । वैष्णवपुराणेतिहासादिभिरुक्तप्रकारेण श्रुतिभिश्च विरुद्धत्वात् । रुद्रस्य सर्वोत्तमत्वं प्रक्रम्य क्वचिद्विष्णोरेव सर्वोत्तमत्वप्रतिपादनेन परस्परविरुद्धत्वाच्च । शिवविष्णवपक्षपातित्वेन मध्यस्थैः ब्राह्मपुराणादिभिर्वेदानुसारिभिर्विरुद्धत्वात् । न हि बहुतरप्रमाणविरुद्धार्थे प्रवर्तमानं मानं भवति । न च शैवादिपुराणवद्वैष्णवपुराणेषु देवतान्तरोत्कर्षकथनमस्ति । यत्र क्वचिद्विचारितं प्रतिभाति तत् 'एष मोहं सृजामी'ति मोहनार्थमित्युक्तं श्रीविष्णुना वाराहपुराणे । यदि शैवादिपुराणमपि दर्शनान्तरसिद्धरुद्रस्य सर्वोत्तमत्वं पूर्वपक्षयित्वा विष्णोरुत्कर्षमेव तात्पर्यतः प्रतिपादयतीत्युच्यते तदङ्गीक्रियत एव । तस्मात् 'आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा', 'सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते । वेदशास्त्रात्परं नास्ति न दैवं केशवात्परमि'ति बहुतरपुराणेषु श्रवणात् सकलकल्याणगुणगणाकरो विष्णुरेव । तदेतदाह **पुराणानीति** ।

८३७ प्रधानमल्लनिबर्हणन्यायेन पाशुपतपक्षनिराकरणेन स्कन्दादिप्रधानकमतान्यपि निराकृतानि भवन्ति । न हि पशुपतेरीश्वरत्वनिराकरणयुक्त्या स्कन्दसूर्यादीनामीश्वरत्वं निराकर्तुमशक्यमित्याह **स्कन्देति** ॥ ११ ॥

॥ इति पत्युरधिकरणम् ॥ ११ ॥

* * *

॥ उत्पत्त्यधिकरणम् ॥

८३८ शाक्तेयमतं युक्त्यन्तरेण निराकर्तुमुपन्यस्यति **महतीति** ।

८४० एतन्मतं दूषयति **तन्नेति** । न पुरुषविरहिताया देव्या रुद्रादिजगत्प्रसवितृत्वं युज्यते । न हि कुत्रचित्स्त्री पुरुषानुपकृताऽपत्योत्पादिका दृष्टा । परमपुरुषस्तु केवलोऽपि पद्मजादेरुत्पादनसमर्थो द्रोणस्येव भरद्वाजः । न च वाच्यं शक्तेः शिवः सहायोऽस्तु जगदुत्पादादाविति । जगदादौ देहेन्द्रियरहितस्याशक्तत्वेन सहायत्वायोगात् । न च वाच्यं नित्यसर्वज्ञत्वं सर्वशक्त्यादिमत्त्वं शिवस्याप्यस्तीति । तस्मादेव जगतोऽप्युत्पत्तिसम्भवेन शक्तिकारणत्वभङ्गापत्तेः ।

८४६ एवम् 'उत्पत्त्यसम्भवात्', 'न च कर्तुः करणमि'त्यादिसूत्राणि व्याख्याय तेषामधुना भागवतमतनिराकरणपरत्वं यत्परैरुक्तं तदनूद्य दूषयति **पञ्चरात्रेति** । न च पाशुपतवत्पञ्चरात्रमप्यप्रमाणमिति वाच्यम् । 'पञ्चरात्रस्य कृत्स्नस्ये'त्यादिभारतवचनविरोधात् । 'ज्ञानेष्वेतेषु राजेन्द्र सर्वेष्वेतद्विशिष्यत' इत्यस्यार्थः । 'साङ्ख्यं योगः पाशुपतमि'त्युपक्रान्तेषु पाशुपतादिषु ज्ञानशब्दोक्तेष्वेतत्पञ्चरात्रमेव प्रमाणत्वेन विशिष्टमिति । 'अर्जुने विमनस्के वै गीता भगवता स्वयमि'ति भारत एव गीतायाः नारायणप्रोक्तकृत्स्नपञ्चरात्रार्थसङ्क्षेपरूपत्वप्रतिपादनात् 'वेदेन पञ्चरात्रेण'

इत्यादिवराहवचनाच्च पञ्चरात्रप्रामाण्यं सिद्ध्यतीत्याह **गीता चेत्यादिना** । भारतस्य च सूत्रकृदेव कर्ता । अतः सूत्रकृदभिप्रायापरिज्ञानादेव पञ्चरात्रनिषेधः सूत्रारूढ इति प्रलाप इत्याशयः ।

८५१ अपि च । पञ्चरात्रविदो मुख्या इति प्रकृतपञ्चरात्रविषयत्वेन 'ऋषीनुवाच तान्सर्वान् सुदृढं पुरुषोत्तमः । कृतं शतसहस्रं हि श्लोकानां हितमुत्तममि'ति श्लोकशब्दः प्रयुक्तः शान्तिपर्वणि । श्लोकशब्देन च 'ऋग्वेदो यजुर्वेदः सामाथर्वाङ्गिरस इतिहासः पुराणं विद्योपनिषदः श्लोका' इति श्रुत्या पञ्चरात्रस्य गृहीतत्वात् तस्यैव 'ऋग्वेदो यजुर्वेदः सामवेद एकायनं दैवविद्ये'ति श्रुत्यन्तरे चैकायनशब्देन ऋगादिवत्प्रमाणत्वेन पञ्चरात्रस्य स्वीकाराच्च । 'वेदैश्च पञ्चरात्रैश्च' इत्यादिश्रुतिभिश्च पञ्चरात्रप्रामाण्यस्य सिद्धत्वात् तन्निषेधः कर्तुमशक्य इत्याह **श्लोका इत्यादिना** । न च वाच्यं वासुदेवात् सङ्कर्षणो नाम जीवोऽजायत इत्यादिना पञ्चरात्रगतं नित्यस्य जीवस्योत्पत्तिकथनं श्रुति-सूत्रविरुद्धमिति । 'ज्ञोऽत एवे'ति सूत्रेण 'अस्मादात्मनः सर्व एत एवात्मनो व्युच्चरन्ती'ति श्रुत्या च जीवोत्पत्तेः कथ्यमानत्वात् ।

८५३ यद्यत्र 'अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीर' इत्यादिवचनानुरोधेन देहोपाधिकोत्पत्तिरुच्यते जीवस्य न त्वभूत्वाभवनमित्यभ्युपगम्यते, तर्ह्यनादिकर्मणा बद्धो जीव इत्यादिपञ्चरात्रवचनानुरोधेन जीवो जायत इति वचनेऽपि तथैवाभ्युपगम्यतां केनचिद्देहातिरिक्तजीववादिना । तदेतदाह **उत्पत्तिरित्यादिना** ।

८५५ अधुना वासुदेवात्सङ्कर्षणो नाम जीवो जायते, सङ्कर्षणात् प्रद्युम्नो नाम मनो जायत इत्यादेः परवादिभिरज्ञातं पञ्चरात्राभिप्रेतमर्थद्वयमाह **जीवाभिमानिनीति** । तत्र भगवान् शाण्डिल्यः षडङ्गवेदमधीत्य तस्मिन्महत्याम्नाये निष्ठामनधिगच्छन् यः सर्वपरो धर्मो यस्मान्न भूयोऽस्ति कथं तं विद्यामित्येवं बलवद्विवेकमातिष्ठमानो बभूव । तत्र भगवते शाण्डिल्याय भगवता सङ्कर्षणेन व्यक्तेन शब्दवच्छास्त्रं प्रोक्तमिति यत्पञ्चरात्रगं वाक्यं तत्पञ्चरात्रादृते वेदार्थस्य ज्ञातुमशक्यत्वात् वेदोपबृंहकत्वेन पञ्चरात्रं शाण्डिल्येनाधिगतमित्येतदर्थम् । यथा हि भारतवाक्यम् । 'यदि विद्याच्चतुर्वेदान् साङ्गोपनिषदान् द्विजः । न चेत् पुराणं संविद्यान्नैव स स्याद्विचक्षणः । इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यति' इत्येतद्वेदार्थस्येतिहासपुराणाभ्यां विज्ञातुं शक्यत्वात् ताभ्यां वेदः समुपबृंहणीय इत्येवमर्थयति ।

८५८ शाण्डिल्यवर्तिनि द्वेषो निर्निमित्त इत्याह **यदीति** ।

८५९ उक्तार्थमुपसंहरति **अत इति** । उक्तप्रकारेण बौद्धपाशुपतादीनां प्रतिपक्षाणां निन्दितत्वेनाप्रतिपक्षत्वाच्छ्रुतिनिकरसमन्वयाधिगम्य निर्दोषोरुगुणार्णवो नारायणः सिद्ध इत्यर्थः ।

* * *

पादार्थोपसंहारः

८६१ 'अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां रताः। विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत' इति श्रुत्या विपरीतज्ञानमयानां प्रतिपक्षाणां निन्द्यत्वं दर्शयति **अन्धन्तम इति**। अयमर्थः। ये विद्यायां रताः पराविद्यां न निन्दन्ति तेऽप्यविद्यानिष्टवदन्धन्तमः प्रविशन्ति। अस्मिन्नर्थे मनुरपि। 'या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृता' इति। तत इयं विधेयमविद्येति विविच्य ज्ञातव्यम्। एवं सत्यनर्थकारणत्वेन बुद्ध्या परित्यक्तयाऽविद्यया मृत्युर्न प्राप्यते। परमपुरुषार्थसाधनत्वेन बुद्ध्याऽभ्यस्तया विद्ययाऽमृतमश्नुत इति ॥ १२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचित-श्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां
श्रीमत्पद्मनाभतीर्थभट्टारकविरचितायां सन्न्यायरत्नावल्यां
द्वितीयाध्यायस्य द्वितीयः पादः ॥ २२ ॥

* * *

॥ श्रीः ॥

सन्न्यायरत्नावली

अथ द्वितीयाध्यायस्य तृतीयः पादः

८६३ ननु परसमयानां प्रत्येकं स्वस्वमतेन विरोधमुद्भाव्य अप्रामाण्यमापादितं प्राक् यथा तथैवाधिभूतादिविषयेषु तत्स्रष्टरि च श्रुतीनां परस्परविरुध्यमानानामप्रामाण्यं स्यात्। तद्वदशेषवेदस्याप्रामाण्यं स्यात्। ततश्च पूर्वोक्तसमन्वयासिद्धिरित्याशङ्कायामाह **अथेति**। निखिलवेदवाक्यानां परस्परविरोधः पादद्वयेन परिह्रियते। तत्राधिदैवादीनां स्वरूपनिर्णयाय तेषु विरुद्धयमानानां केषाञ्चिद्वचनानां तावत्परस्परविरोधोऽनेन पादेन परिह्रियत इत्यर्थः।

८६५ 'न वियदश्रुतेरि'त्यारभ्य आपादपरिसमाप्तेर्यथाक्रममधिकरणेषु पूर्वपक्षयुक्तीः सिद्धान्तयुक्तीश्च दर्शयति **अनुभूतीत्यादिना**।

॥ वियदधिकरणम् ॥

८७१ तत्र तावत् प्रथमाधिकरणं प्रपञ्चयति **प्रकृतिरित्यादिना** । अस्यार्थः । 'आत्मन आकाशः सम्भूतः', 'स इदं सर्वमसृजते'त्यादौ सर्वस्य विष्णुसृष्टत्वं श्रूयते । तत्र अव्याकृताकाशप्रकृत्यादीनां केषाञ्चित्पदार्थानां पराधीनातिशयलाभ एवोत्पत्तिः न तु सर्वथाऽभूत्वा भवनम् । 'अनादिर्वाऽयमाकाशः', 'अथ ह वाव नित्यानि पुरुषः प्रकृतिः काल' इत्यादिश्रुतिविरोधात् ।

८७३ अव्याकृताकाशस्यान्याधीनविशेषलाभमन्तरेण स्वरूपेणोत्पत्तौ युक्तिविरोधमाह **अवकाशेति** । न च अवकाशलक्षणाकाशो प्रलये सर्वत्र नासीदिति युज्यते । स्वव्याहतत्वात् । न ह्यवकाशाभावे सर्वत्रेति युज्यते । यत्र मूर्तवस्तुसङ्कीर्णत्वं तत्रावकाशो नास्तीति लोकव्यवहारात् । प्रलयेऽवकाशाभावे मूर्तसङ्कीर्णत्वं स्यात् । मूर्तद्रव्याणि च न ह्यवकाशं परित्यज्य तिष्ठन्ति । तस्मादव्याकृताकाशं सर्वदाऽस्त्येव ।

८७५ आकाशस्योत्पत्तिवचनं त्वभिमानिदेहविषयत्वेन भूताकाशविषयत्वेनाप्युपपद्यत इत्याह **अत इति** ।

८७७ पृथिव्यादिमूर्तसम्बन्धाख्यपराधीनविशेषलाभात् अव्याकृताकाशस्यानुत्पन्नस्याप्युत्पत्तिवचनं युज्यत इत्याह **तथाऽपीति** । कालप्रवाहस्य नित्यस्यापि क्षणादिरूपविशेषलाभात् पुरुषाव्यक्ताद्यभिमानिन्याः श्रियोऽपि नित्यायाः सिसृक्षत्वविशेषलाभात्, प्रधानस्य नित्यस्यापि महदादिरूपेण विकारलक्षणविशेषोत्पत्तेः,

८७९ जीवानां च नित्यानामपि देहसम्बन्धरूपविशेषलाभात् भगवत्स्रष्टृत्वं युज्यत इत्याह **कालेति** ॥ १ ॥

॥ इति वियदधिकरणम् ॥ १ ॥

* * *

॥ मातरिश्वाधिकरणम् ॥

८८२ 'तेजोबन्नान्याकाश इति तान्यनित्यानि वायुर्वाव नित्यः सैषा नस्तमिता देवता यद्वायुरि'त्यादिश्रुत्या मुख्यवायोरपि अविष्णुसृष्टत्वमाशङ्क्याह **एवमिति** ।

८८३ 'आकाशाद्वायुरि'त्यादिश्रुत्या देहसम्बन्धलक्षणपराधीनविशेषोत्पत्तिमत्त्वेन विष्णुसृष्टत्वं वायोरपि पूर्वोक्तन्यायेनावगन्तव्यम् । नित्यत्ववचनं तु प्रलयेऽप्यविनष्टज्ञानविषयत्वेनोपपन्नम् । न हि परेशवदपराधीनत्वेन नित्यत्वं वायोर्युज्यते । द्वयोः परस्परैश्वर्याभावेन सर्वैश्वर्यानुपपत्तेः । एतदेवोक्तम् 'एतेन मातरिश्वा व्याख्यात' इति सूत्रेण । अतः परतो लब्धविशेषवत्त्वेन जन्मना सर्वं जन्मवदेवेशव्यतिरिक्तम् । न जन्मरहितमित्यर्थः ।

८८३ पूर्वं सूक्ष्मरूपेण सतः स्थूलरूपत्वापत्तिलक्षणं पूर्वसंज्ञापरित्यागेन संज्ञान्तरलाभाख्यं च यज्जन्म तत्पृथिव्यादीनामेव सम्भवति न लक्ष्मीतत्त्वजीवतत्त्वादीनाम् । अत 'इदं सर्वं ससर्जे'त्यत्र परतो लब्धविशेषवत्त्वमेव जन्म विवक्षितमित्याह **स्थूलतेति** ।

॥ इति मातरिश्वाधिकरणम् ॥ २ ॥

* * *

॥ असम्भवाधिकरणम् ॥

८८६ एतच्च जन्म परमात्मनो न सम्भवत्येवापराधीनत्वादित्याह **स्वतन्त्रेति** । एतदेवोक्तम् 'असम्भवस्तु सतोऽनुपपत्तेरि'ति सूत्रेण ॥ ३ ॥

॥ इति असम्भवाधिकरणम् ॥ ३ ॥

* * *

८८७ एतदेव निरवधिकैश्वर्यं हरेरुपपादयति **अच्छेद्यस्येति** । एतदेवोक्तं 'व्यतिरेको गन्धवत्तथा च दर्शयती'ति सूत्रेण । तथा च शाण्डिल्यश्रुतिः 'एकीभवत्यथ बह्वीभवति तं यथायथेश्वरः प्रकुरुते तथातथा भवति सोऽचिन्त्यः परमो गरीयानि'ति । पाद्मे च 'अचिन्त्ययेशशक्त्यैव ह्येकोऽवयववर्जितः । आत्मानं बहुधा कृत्वा क्रीडते योगसम्पदे'ति ॥ १३ ॥

॥ इति व्यतिरेकाधिकरणम् ॥ १३ ॥

* * *

॥ पृथगधिकरणम् ॥

८९० एवमुक्तप्रकारसिद्धनिरतिशयैश्वर्येण परमात्मना अनीशस्य जीवस्य 'तद्योऽहं सोऽसौ योऽसौ सोऽहमि'-त्यादिश्रुत्या अभेदसाधकानुमानेन चैक्यं वदतां मतं दूषयितुमुपन्यस्यति **एवमिति** । एतन्मतनिराकरणत्वेन 'पृथगुपदेशादि'ति सूत्रं योजयति **न तदिति** । 'पृथगात्मानं प्रेरितारं च मत्त्वा जुष्टस्ततस्तेनामृतत्वमेती'त्यादि श्रुतेर्जीवपरयोरभेदो न युक्त इत्यर्थः ।

८९१ ननु भेदवाक्यमीश्वराज्जीवस्य सांसारिकभेदविषयतयोपपन्नमित्यत आह **प्रज्ञेति** ।

८९१ 'सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रोऽलोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म स एतेन प्राज्ञेनात्मना-ऽस्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत्' इत्यस्यां श्रुतौ ब्रह्मादिस्थावरान्तस्य सर्वस्य ब्रह्मनेत्रकत्वमुक्त्वा लौकिकत्वाल्लोकशब्दवाच्यस्य मुक्तसमुदायस्यापि प्रज्ञाशब्दवाच्यब्रह्मनेत्रत्वस्य तथा अमृतस्य मुक्तस्य परमात्मना सहैव वैकुण्ठे सर्वकामानुभवस्य श्रवणादात्यन्तिक एव जीवस्येश्वराद्भेदो न सांसारिक एव इत्यर्थः ।

८९२ अस्मिन्नेवार्थे श्रुतिस्मृतिबाहुल्यं दर्शयति **एतमित्यादिना** । 'एतमानन्दमयमात्मानमुपसङ्क्रम्य इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन् एतत्साम गायन्नास्ते', 'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति', 'एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते । स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वे'त्यादीनि श्रुतिवाक्यानि । 'इदं ज्ञानमि'त्यादि भगवद्वाक्यम् । तस्य मध्ये वैतरः पुण्यगन्धः सहस्रशाखो विमलो विभाति । तस्य मूलात्सरितः प्रस्रवन्ति मधूदकप्रस्रवणा रमण्यः । 'शाखां शाखामि'त्यादि भारतवाक्यम् । कश्यपप्रजापतिवादे व्यक्तम् । आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः। योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः । भेददृष्ट्येत्यादिभागवतवचनस्य अयमर्थः । जीवब्रह्मभेददर्शनेनाभिमाने-नाभितो ज्ञानेनाह भावात्यागेन । स हिरण्यगर्भो ऋष्यादिभिः सह जगत्कर्तृत्वेन सर्वज्ञत्वादिगुणपूर्णं ब्रह्म विष्ण्वाख्यं प्रलये सङ्गत्य प्रविश्य पुनः सृष्टिकाले जातेऽगुणव्यतिकरे त्रिगुणव्यतिकरशून्ये श्वेतद्वीपे रूपे प्रजायते । विष्णु-विग्रहान्निर्गच्छति । तत्रापि स्थितो यथापूर्वं ऋष्यादिभिः पूज्यमान एव तिष्ठतीति । 'ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विममीत उत्व' इत्यृचोऽयमर्थः । मुक्तब्रह्मणां मध्ये त्व एको ब्रह्मा ऋचां योगं पुपुष्वान् अतिपुष्टार्थत्वेन व्याख्यां कुर्वन्नास्ते । एको गायत्रं साम शक्वरीषु ऋक्षु गायति । एको भागवतादिजातविद्यां वदति । एको यज्ञस्य विष्णोर्मात्रामंशरूपं विममीते चिन्तयतीति । 'यं यमन्तमभिकामो भवति यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति । तेन सम्पन्नो महीयते स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते । 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता । तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवती'ति एतानि श्रुतिवाक्यानि । हृदयस्य भवतीति ब्रह्मणः शेषभूतो भवतीत्यर्थः । 'स्वेच्छया विश्वमोक्षिणः । भुञ्जते सुसुखान्येव न दुःखादीन् कदाचने'ति ब्रह्म-वैवर्तवचनम् । 'जगद्व्यापारवर्जमि'ति सूत्रं जगदीश्वराद्भेदप्रतिपादकं मुक्तस्य । अत एव श्रुतिसूत्रादिपर्यालोचनया जीवेशयोरात्यन्तिकभेदोऽवसीयते ।

९०४ अधुना तस्यानुमानेन मिथ्यात्वमाशङ्कते **मिथ्येति** । घटपटादिभेदस्य पक्षतुल्यत्वान्न तत्र भेदत्वहेतो-र्व्यभिचारः शङ्कनीयः । परिहरति **साध्येति** । अयमर्थः । यदेतद्विमतभेदस्य पक्षीकृतस्य चन्द्रभेदवन्मिथ्यात्वं साध्यते तत्किं सदसद्वोभयविलक्षणं वा । न प्रथमद्वितीयपक्षावङ्गीकर्तुं शक्यावनिर्वचनीयवादिना । तस्याप्यपसिद्धान्ता-पत्तेः । उभयविलक्षणत्वं चेत् तस्याप्रसिद्धत्वेन पक्षोऽप्रसिद्धविशेषणः स्यात् । द्वौ चन्द्राविति प्रतीतचन्द्रभेदस्यापि सदसद्विलक्षणत्वाभावेन दृष्टान्तश्च साध्यविकलः स्यात् । न चैतद्दृष्टान्तगतसाध्यस्याप्यनुमानान्तरेण साध्यत्वं

वाच्यम् । तदनुमानदृष्टान्तगतसाध्यस्यापि अनुमानान्तरेण साध्यत्वमित्यनवस्थापत्तेः । अतो दृष्टान्ताभावान्नानुमानमनिर्वचनीयं गोचरयति । न च वाच्यं नासदासीन्नो सदासीत्तदानीमिति वाक्येन सदसतोर्निषेधात्प्रलये परिशिष्यमाणस्य अनिर्वचनीयत्वमापादितम् । परिशिष्यमाणं च तम आसीदिति वाक्यशेषात्तमोनामकं जगदुपादानमिति । 'आनीदवातं स्वधया तदेकमि'त्यपि वाक्यशेषेण ब्रह्मणोऽपि परिशिष्यमाणत्वेन श्रुतत्वात् तस्याप्यनिर्वचनीयतापत्तेः । अतो यथा 'अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यत' इत्यत्र सदसच्छब्दाभिहितपृथिव्यादिस्थूलसूक्ष्मनिषेधः कृत एवं नासदासीदित्यत्रापि । न त्वनिर्वचनीयं किञ्चिद्विधीयते ।

९०९ नापि भेदमात्रस्य ख्यातिबाधान्यथानुपपत्त्या सदसद्वैलक्षण्यसिद्धिरित्याह **न चार्थापत्तिरिति** । तत्र यत्सत्त्वे भेदस्य बाधो न स्यादित्येतन्न घटत इत्याह **बाधेति** । सति हि बाधे तदन्यथानुपपत्त्या जीवेशादिभेदस्य असत्त्वं भवेत् । न तु बाधोऽस्ति प्रबलप्रमाणप्रतीतस्य । अतो भेदसत्यत्वे बाधो न स्यात् इष्टापत्तेः । किञ्च यदा दृष्टान्ते चन्द्रभेदादावपि बाधो निरूपयितुं न शक्यते तदा सुतरामन्यत्र । तथा हि । न तावद् भ्रमस्य बाधो युज्यते । भ्रमो नाभूत् इत्यनुभवाभावात् । नापि भ्रमविषयस्य शुक्तिरजतादेर्बाधो युक्तः । खपुष्पवदविद्यमानत्वात् । न च शुक्तितत्त्वाविद्योत्पन्नं प्रातीतिकसत्त्वयुक्तं रजतं शुक्तितत्त्वसाक्षात्कारेण बाध्यत इति वाच्यम् । तथाविधरजते प्रमाणाभावात् । असदेव रजतं प्रत्यभादित्युत्तरकालानुभवविरोधाच्च । रजतप्रत्ययस्तु सादृश्यादिदोषवशाच्छुक्तिमेव विषयीकृत्योत्पन्न इति न तथाविधं रजतं विषयतया गमयति । यद्यन्यत्र विद्यमानं रजतं शुक्तिशकले बाध्यत इत्युच्यते तर्हि सतोऽप्यात्मनो देहादौ बाधसम्भवेन यद्यत् सत्तत्तत् न बाध्यमिति व्याप्त्यभावात् सत्त्वे तस्य बाधो न स्यादित्यापादनं न स्यात् । यदि रजतस्यान्यत्र सत्त्वेऽपि शुक्तिरजतं त्वसदेव बाध्यतेऽतो न सतः क्वापि बाध इत्युच्यते तर्हि कोऽयं बाधः । नाश इति चेन्नैवम् । असतो नाशासम्भवात् । न ह्यप्रवृत्तस्य निवर्तनं युज्यते । यद्यसतोऽपि सत्त्वेन प्रतीतस्य नासीदस्ति भविष्यतीति ज्ञानविषयत्वं बाध इत्युच्यते, तर्हि सिद्धो नः पक्षः । असतः ख्यातेः सिद्धत्वात् ।

९१४ असतः ख्यातिमुपपादयति **प्रतीतिरिति** । न ह्यसतोऽप्रतीतावसन्न प्रतीयते शशशृङ्गवदिति वक्तुं शक्यते । अप्रतीतस्यानूद्यत्वदृष्टान्तत्वयोरभावात् । असतः प्रतीतत्वेऽपि विधिमुखेन भ्रमविषयत्वं न कथञ्चिदिति चेन्नैवम् । स्वप्ने शशशृङ्गस्यासतोऽपि विधिमुखेन भ्रमविषयत्वदर्शनात् । अतो भ्रमविषयस्यासत्त्वे ख्यातिर्न स्यादित्येतदप्यनुपपन्नम् । तस्मान्नार्थापत्तिरनिर्वचनीये प्रमाणम् । उपमाप्रमाणं तु न तत्र शङ्काऽर्हम् । प्रत्यक्षं तु घटपटादिसत्तायामेव मानं नानिर्वचनीये । अतोऽनिर्वचनीयं नाम सर्वप्रमाणशून्यत्वाच्छशविषाणवन्नास्त्येव । अत एव चन्द्रभेदस्याप्यनिर्वचनीयत्वाभावात् जीवेशभेदस्य अनिर्वचनीयत्वसाधकानुमानं दृष्टान्तशून्यमेवेत्यप्रमाणम् । इतोऽपि जीवेशयोर्भेदबाधकमनुमानमप्रमाणम् ।

९१५ तौ येन प्रमाणेन प्रसिद्धौ तेन प्रमाणेन भिन्नतयैवेति प्रसिद्धाविति धर्मिग्राहकप्रमाणविरुद्धत्वादित्याह **शास्त्रेति** ।

९१८ उपजीव्यप्रमाणविरुद्धत्वादेव 'तद्योऽहमि'त्यादिश्रुतिरपि जीवेशयोर्भेदं बोधयितुं न शक्नोतीत्याह **उपजीव्येति**। अयमर्थः। किञ्चित्कर्तृत्वदुःखित्वादिमत्त्वेनानुभूयमानाज्जीवाद्विलक्षणत्वेन 'यः सर्वज्ञः स सर्वविदि'-त्यादिश्रुत्या सर्वज्ञत्वसर्वशक्तिमत्त्वादिधर्मविशिष्टत्वेन सिद्धमीशमुपजीव्य तेन जीवस्य अभेदः श्रुतिशतेनापि बोधयितुं न शक्यते उपजीव्यप्रमाणविरोधादेव।

९१८ ननूपजीव्यप्रमाणमीशो धर्मिण्येव मानं न तु तस्य सर्वज्ञत्वादौ। तदभावेऽपीशस्वरूपमात्रेणाभेदस्य बोधयितुं शक्यत्वात्। तत्कथमुपजीव्यश्रुतिविरोधोऽभेदवाक्यस्येत्याशङ्क्याह **अप्रामाण्यमिति**। सर्वज्ञत्वादिभेदकधर्मवत्त्वं विहायेश्वरपदार्थस्य ज्ञातुमशक्यत्वात् न तेनाभेदो जीवस्य बोधयितुं शक्यते। न हि 'यः सर्वज्ञ' इत्यादिवाक्यस्य विशिष्टार्थबोधकस्य विशेष्यांशे प्रामाण्यं विशेषणांशेऽप्रामाण्यमुभयमेकस्य युज्यते। विरोधात्। यदि विशेषणांशे सर्वज्ञत्वादावप्रमाणमेतद्वाक्यं तर्हि विशेष्यांशेऽप्यप्रामाण्यं स्यादविशेषात्। तथा सति ईशस्यैवाभावात् तेन अभेदो जीवस्य सुतरां न स्यात्। अतः सर्वज्ञत्वादिविशिष्ट एव ईशः श्रुत्या बोध्यते। एवंविधेन च तेन जीवस्याभेदप्रतिपादने धर्मिग्राहकप्रमाणविरोधो दुर्निवार एव। न च 'द्वासुपर्णा सयुजे'त्यादिभेदवाक्यस्य जीवेशयोरभेदोपजीवनं पश्यामः। अत उपजीव्यत्वेन भेदश्रुतेरेव बलवत्त्वेनाभेदश्रुतेर्भेदोपजीवकत्वात्। उपजीव्योपजीवकयोरुपजीव्यं बलवदिति हि न्यायः।

९२२ ननु जीववदीश्वरोऽपि प्रमाणान्तरसिद्ध एवानूद्यते भेदागमेन। अतः तस्याप्यनुवादकत्वेन दौर्बल्यं किं न स्यादित्याशङ्क्याह **न चेति**। वेदैकवेद्यत्वस्य पूर्वमेवोक्तत्वान्न मानान्तरवेद्यत्वं ब्रह्मण इत्यर्थः। मानान्तरवेद्यत्वेऽपि ब्रह्मणो न जीवाद्भेदो व्याहत इत्याह **येनेति**। अयमर्थः। मानान्तरं चेदीश्वरेऽनुमानमेव सम्भावितं नान्यत्। तच्च सर्वज्ञत्वसर्वकर्तृत्वादिविशिष्टमेवेशं साधयतीत्यङ्गीकर्तव्यम्। तेन च जीवस्यासर्वज्ञस्याभेदं बोधयद्वाक्यं स्वोपजीव्यानुमानविरुद्धत्वात् दुर्बलमेवेति नाभेदसाधकम्। वेदेऽपि दृढतरानुमानविरुद्धार्थस्य परित्यागो दृष्टः 'ता आप ऐक्षन्ते'त्यादौ। अनुमानसिद्धेऽपीश्वरे दार्ढ्यहेतुत्वेन श्रुतिश्चोपपद्यते। प्रसिद्धो हि बहुप्रमाणसंवादः सन्दिग्धार्थेषु दार्ढ्यहेतुत्वेन।

९२४ नन्वस्तु बहुतरसिद्धत्वप्रमाणेन नित्यपूर्णज्ञानादिमानेवेशः। तेन सह भेदस्तु जीवस्य न स्यात्। दुःखादेर्भ्रान्तित्वेन भेदकाभावादित्याशङ्क्याह **न दुःखेति**। न च दुःखादेर्भ्रान्तिकल्पिततत्वम्। बाधकाभावात्। 'विमुक्तश्च विमुच्यत' इति श्रुतिः दुःखादिलक्षणबन्धस्य बाधिकेति चेन्नैवम्। दुःखाद्यनुभवेनैषा श्रुतिरेव बाध्यत इत्यपि वक्तुं शक्यत्वात्। यदि मानसिद्धत्वेनैषा श्रुतिर्न बाध्यत इत्युच्यते तर्हि दुःखादिकमपि तथैवाभ्युपगम्यतामविशेषात्। शुक्तिरजतादिवत् दुःखादेर्दृढप्रत्यक्षबाधस्तु नास्त्येव। श्रुत्यैव प्रत्यक्षबाधे आदित्यो यूप इत्यनयाऽपि प्रत्यक्षबाधः स्यात्।

९२५ इतोऽपि दृढतरानुभवसिद्धस्य दुःखादेर्बाधो न युक्त इत्याह **यदीति**। यदि शुक्तिरजतादिविषयमनोवृत्तिवद्दुःखादिविषयः साक्ष्यनुभवोऽयथार्थः स्यात् तर्ह्ययं भ्रमोऽयमभ्रम इति व्यवस्थापकानुभवोऽप्ययथार्थः स्याद-

विशेषात् । तथा सति कोऽप्यर्थो न निश्चीयते । न ह्यनुभवमन्तरेण परीक्षाभ्रमाभ्रमनिश्चायकमन्यत्प्रमाणमस्ति । तन्निश्चायकमन्यदिति अनवस्थानात् । अतः स्वयंप्रकाशेन साक्ष्यनुभवेन रज्जुसर्पादिविषयमनोवृत्तेर्भ्रमत्वं वियदादिविषयस्याभ्रमत्वं निश्चीयते । तस्यायथार्थत्वे पूर्वोक्त एव दोषः । योऽयं साक्षिनिर्दोषत्वादिविशेषः सोऽपि साक्षिगोचरः । तद्बलेन घटादिवस्तु निर्धार्यते । तेन भेदकारणादिव्यवहारः प्रवर्तते । निर्धारित एव साक्षिव्यवहारोऽनिर्धारितव्यवहारस्तु मानसः । अतो निर्धारितव्यवहारान्यथाऽनुपपत्त्या साक्षी निर्दोष एवाङ्गीकार्यः ।

९३३ साक्षिणो निर्दोषत्वे तत्सिद्धस्य दुःखादेर्बाधो न युक्त इत्याह **शुद्ध इति** । उक्तार्थमुपसंहरति **उपजीव्येति**।

९३४ ननु यदि धर्मिग्राहकप्रमाणसिद्धो जीवेशयोर्भेदः तर्हि जीवस्येशेनाभेदप्रतिपादकत्वेन प्रतीयमानानां 'तत्त्वमसी'त्यादिश्रुतीनां 'अहं हरिः सर्वमिदं जनार्दन' इत्यादिपुराणवाक्यानां च का गतिरित्यत आह **तथाऽपीति**। यथा अग्निवत्पैङ्गल्यादिगुणयुक्तत्वात् माणवकोऽग्निरित्युच्यते एवमीशवज्ज्ञानादिगुणयुक्तत्वात् त्वंशब्दवाच्यो जीवस्तदित्युच्यते । न च वाच्यं तच्छब्देन जगत्स्रष्टुरीशस्य चैतन्यं त्वंशब्देन संसारिणो जीवस्य चैतन्यं च जहदजहल्लक्षणया वृत्त्या लक्ष्यते, एवं लक्षितचैतन्ययोरैक्यं तत्त्वमसीति श्रुत्या प्रतिपाद्यत इति । जगत्स्रष्टृपरामर्शिनस्तच्छब्दस्यैव त्वंशब्दवाच्ये जीवे गौणवृत्त्याश्रयणेन तत्त्वम्पदयोरुभयोरपि लक्षणावृत्त्याश्रयणस्य पराहतत्वात् । पदद्वयस्यामुख्यार्थत्वाश्रयणादेकस्य पदस्य अमुख्यार्थत्वाश्रयणस्य वरिष्ठत्वात्। एतदेवोक्तं 'तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवदि'ति सूत्रेण । उपजीव्यप्रमाणविरुद्धार्थपरित्यागेनोपजीवकस्याभेदवाक्यस्य अर्थान्तरपरत्वं न्यायसिद्धम्।

९३६ श्रुत्या प्रतिपादयति **सादृश्याच्चेति** । अस्यार्थः । ईशसदृशत्वादीशप्रधानकत्वादीशाधीनत्वाच्च जीवस्येशेन व्यपदेशः उपपद्यते । मुक्तस्येशप्रधानत्वात् ईशाधीनत्वात् ईशैनैकमत्यादीशेन सहैकस्थाननिवासित्वादीशेनोद्भूतसादृश्ययुक्तत्वात् ईशाभेदवचनमुपपद्यते ।

९३८ जडस्येशप्रधानकत्वादीशपरतन्त्रत्वादीशेन किञ्चित्सदृशत्वादीशाभेदवचनमुपपद्यते । न त्वत्र मुख्याभेदः । मुख्यतो भेदस्त्वीशस्य स्वगुणादिभिरेव । 'आनन्दो ब्रह्मे'त्यादि सामानाधिकरण्यव्यपदेशसिद्धः । तत्र भेददर्शनमात्रस्य अनर्थहेतुत्ववचनमिदम् ।

९४० **यथोदकमिति** । यथा पर्वतेषु दुर्गे अत्युच्चप्रदेशेषु वृष्टमुदकम् अधो धावति, एवमीशस्य धर्मान् पृथग्भेदेन पश्यन् पुमान् तान् दृष्टान् धर्मान् अन्वेवमधो धावति । तद्दर्शनानन्तरमविलम्बेन नरकं गच्छतीत्यर्थः ।

९४१ यथात्र निषिद्धत्वाद्भेदो नाङ्गीकर्तव्यः । एवमेव 'अद्वितीयमि'त्यादिश्रुत्या निषिद्धत्वात् भेदाभेदावपीशस्य स्वगुणादिनाऽङ्गीकर्तव्यावित्याह **नोभयमिति** । एकस्मिन्नवयवादिभेदेन नानाभावात् घटादिवदिव आशङ्कितं ब्रह्मणि आ निषिद्ध्यते । **एकमेवेति** । अद्वितीयपदेन तस्य समाधिकशून्यत्वमुच्यते । अयमस्मिन्ग्रामे द्वितीय इति समाधिकराहित्यविवक्षया द्वितीयपदप्रयोगदर्शनात् । इह ब्रह्मणि गुणादिभेदेन नानात्वं किञ्चिदपि नास्ति । इह ब्रह्मणि

अवयवादिभेदे नानात्वेव भेदमिश्रत्वेनेषमपि नानात्वं पश्यति स मृत्योः मरणानन्तरं मृत्युरूपमतिशयितनरकं प्राप्नोतीत्यर्थः ।

॥ इति पृथगधिकरणम् ॥ १४ ॥

* * *

॥ यावदधिकरणम् ॥

९४३ अत्रेहीति विशेषणं ब्रह्मण्येव गुणादिभेदेन नानात्वं वाद्यन्तरप्राप्तं तन्निषिद्ध्यते । न तु नानात्वमात्रम् । तथा सति इहेति विशेषणं व्यर्थं स्यात् । अत एतद्विशेषणसामर्थ्यादिव ब्रह्मजीवनानात्वस्य सिद्धत्वात् । तन्निषेधोऽनुपपन्न इत्याह **भेदस्येति** ।

९४५ न च मुक्तस्येशेन वचनैर्भेदस्य साधितत्वेऽप्यभेदश्रुत्या भेदोऽप्यस्त्विति वाच्यम् । भिन्नस्याभिन्नत्व-विरोधात् । अतश्चेतनत्वादिसादृश्यमेव जीवेशयोरभेदश्रुत्यर्थो न स्वरूपाभेदः । अस्मिन्नर्थे श्रुतिमाह **न केनचि-दिति** । पदार्थबहुत्वे विष्णोरप्यन्तर्भावा न हि तत्र बहुत्वं विष्णोरेवेति बहुत्वेनैव विष्णोरभेदाभेदः स्वगुणादिभिरेव । नान्येनेत्यर्थः ।

९४६ 'अंशो नानाव्यपदेशादि'त्यस्मिन्नधिकरणे जीवस्य ईशाद्भिन्नांशत्वेन समर्थितत्वात् अभेदश्रुतयो न स्वरूपाभेदपराः । किन्त्वीशात्सदृशलक्षणांशत्वाभिप्राया एवेत्याह **अभेदेति** ।

९४७ 'ममैवांशो जीवलोके जीवभूतः सनातनः' इत्यादिवचनात् ततो जगन्मङ्गलमच्युतांश इत्यादिवचनाच्च जीवस्य कृष्णाद्यवतारस्य च नारायणांशत्वमस्ति । तत्र किञ्चित्साम्याद्विष्णुना जीवस्य भिन्नांशत्वं सर्वसाम्यात् कृष्णाद्यवतारस्य अभिन्नांशमित्येतत् परमश्रुत्याह **अंशस्त्विति** ।

९४९ एतत् सदृष्टांशमुपपादयति **सूर्येत्यादिना** । तत्र तावद्दृष्टान्तदर्शनार्थमिदमुच्यते । सूर्योऽयं मण्डलमधि-ष्ठायांशेनालोकमधितिष्ठति । वरुणोऽपि ब्रह्माण्डावरणोदकमधिष्ठाय स्वादूदकसमुद्रमंशेनाधितिष्ठति । धरादेव्यपि पृथिवीमधिष्ठाय कठिनत्वेन पार्थिवं मेर्वादिपर्वतमंशेनाधितिष्ठति । एवमिदमिति । अत्र च यथा सूर्यादीनां स्वस्वां-शैरत्यन्ताभेदः । एवं मत्स्याद्यवतारैर्विष्णोरत्यन्ताभेदः । यथा वा विण्मूत्राभ्यां पृथिव्युदकसूर्यांशभूतानामभिमानि-न्योऽपभ्रष्टदेवताः सूर्यादिभ्यः पृथग्भूता एवमंशभूतोऽपि जीवः पृथगेव परेशात् । ताश्चाक्षाद्यभिमानिन्यो देहदोष-दुष्टत्वादपभ्रष्टदेवताः सन्मुच्यमानत्वाच्च । न चैवं मत्स्यादिरूपाणामन्यत् प्रेर्यमस्ति । सम्पूर्णशक्त्यादिगुणपूर्णत्वात् । अतस्तैरत्यन्ताभेदो विष्णोर्न जीवैः । एतदेवोक्तं 'प्रकाशादिवन्नैवं परः', 'अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योति-रादिवदि'ति सूत्रद्वयेन ।

९५५ अतो मत्स्याद्यवतारतुल्यत्वाभावाज्जीवानां न ते मुख्यांशा भगवतः किन्त्वंशाभासा एवेत्याह **अंशेति** ।

९५६ अत्र च 'यथैषे'ति श्रुतिः प्रमाणम् । यथैषा पुरुषस्य छायैवमेव जीवजातमेतस्य परमात्मनश्छाया-ऽऽभासभूतमित्यर्थः । ननु 'पादोऽस्य विश्वाभूतानि, त्रिपादस्यामृतं दिवी'ति परमपुरुषस्य द्युस्थितपादत्रयवदेव भूतशब्दवाच्यानां जीवानां पादत्वश्रवणात् कथं तेषां तदाभासत्वमित्यत आह **न त्विति** । द्युशब्दवाच्यस्य वैकुण्ठादिलोकस्थितपरमपुरुषांशरूपत्रयस्य अमृतत्वादिकल्याणगुणपूर्णत्वान्न तद्वदंशत्वं जीवानामपूर्णगुणानां दोष-वतां युज्यते । तेषु पादशब्दस्तु निष्कारस्य चतुर्थांशोऽयं शङ्खखण्डस्तुलित इतिवदत्यन्तभिन्नविषय एव । न हि मार्गविन्यस्तपादाकृतावपि पादशब्दः प्रयुक्त इत्येतावताऽसौ पुरुषस्य पादो भवति ।

९५८ अधुना विष्णोः सकाशात् वियदाद्यारम्भविचारमुपक्रम्य प्रवृत्तस्यास्य पादस्य तात्पर्यं सङ्क्षिप्याह **अक्षय इत्यादिना** ।

९६१ **देव्यौ** ब्रह्मसूत्रात्मनः पत्न्यौ ।

९६४ **एतेषां** ब्रह्मादीनामित्यर्थः ॥ १८ ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीमत्पद्मनाभभट्टारकविरचितायां द्वितीयाध्यायस्य तृतीयः पादः ॥ २३ ॥

* * *

अथ द्वितीयाध्यायस्य चतुर्थः पादः

९६६ अवसितः अधिभूतादिविषये परस्परविरुध्यमानश्रुतिविरोधपरिहारः । अध्यात्मविषये श्रुतीनां श्रुतियुक्तिभ्यां विरुद्धवत्प्रतीयमानानां बलवत्तरयुक्तिभिर्विरोधः परिह्रियते अस्मिन्पाद इत्याह **श्रुतीति** ।

९६७ अधुना 'तथा प्राणा' इत्यादेः अस्य पादस्य अधिकरणेषु पूर्वपक्षयुक्तीः सिद्धान्तयुक्तीश्च एकोक्त्या क्रमेणाह **तत्रेत्यादिना** । अतो विरोधशून्येन निखिलश्रुतिसमन्वयेन जगत्कर्ता सकलगुणपरिपूर्णो निर्दोषो विष्णुरिति सिद्धम् ।

इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभभट्टारकविरचितायां द्वितीयाध्यायस्य चतुर्थः पादः ॥ २४ ॥

* * *

॥ श्रीः ॥

सन्न्यायरत्नावली

अथ तृतीयाध्यायस्य प्रथमः पादः

॥ प्राणोत्पत्त्यधिकरणम् ॥

९६९ एवमध्यायद्वयेन सिद्धस्य सकलकल्याणगुणवतो निर्दोषस्य श्रीपतेः साक्षात्कारपूर्वकप्राप्तिसाधनापेक्षायां तृतीयोऽध्याय आरभ्यते । तत्र भक्त्यादिसाधनाङ्गभूतं यद्भगवदितरविषयवैराग्यं तन्निरूपणपरस्य प्रथमपादस्याधिकरणेषु पूर्वपक्षयुक्तिमालां सिद्धान्तयुक्तिमालां च क्रमेणोद्धरति **स्वाभाविकेति** ।

॥ इति तदन्तराधिकरणम् ॥ १ ॥

* * *

९७३ स्वर्गादिवैराग्यार्थमेव अत्र पूर्वपादनिरूपितेन्द्रियभूतसूक्ष्मपरिष्वक्तस्य जीवस्य कर्मवशादन्नपृथिवीपुरुषयोषित्क्रमेण भ्रमणं चेत्थं यथा 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती'त्यादिवाक्यमुदाहृत्य निरूपितं तत्र यदेतद्वाक्यं 'मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते । यो यो ह्यन्नमत्ति यो वा रेतः सिञ्चति तद्भूय एव भवति । तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्यन्ते ब्राह्मणयोनिं वे'त्यादि । तदितः प्रेत्य स्वर्गं गत्वा पुनरावृत्तानां जीवानां वृष्टिद्वारा व्रीह्यादिजीवेषु सङ्क्रमणं तत्र सङ्क्रान्तानां रेतःसिक्पुरुषे प्रवेशं तत्र प्रविष्टानां योनिप्रवेशं च प्रायिकमभिदधति न तु तन्नियतम् । केनचित्कारणेन मान्धातृद्रोणद्रुपदकृपादीनां पुराणेतिहासेषु योनिप्रवेशमन्तरेणापि जननश्रवणात् 'विशेषकारणादेव विशेषाज्जनिरिष्यते । सामान्यजननं चैव नृणां सामान्यहेतुत' इति वाक्याच्च । एतामेव कारणविशेषकृतां बीजयोनिपुरुषयोनिप्रवेशनियमोज्झितिं भगवान् सूत्रकृदप्याह 'रेतःसिग्योगोऽथे'ति । अत्र अर्थशब्देन पक्षान्तरं सूचयतीत्याह **बीजेति** ॥ २० ॥

॥ इति योन्यधिकरणम् ॥ २० ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां तृतीयाध्यायस्य प्रथमः पादः ॥ ३१ ॥

* * *

॥ श्रीः ॥

अथ तृतीयाध्यायस्य द्वितीयः पादः

९७८ यदर्थं स्वर्गादिगतौ हेयत्वं प्रदर्श्य वैराग्यं विहितमधस्तात् सा भगवति भक्तिरधुना विधीयते । तदर्थमेव जैवस्वप्नाद्यवस्थाकर्तृत्वादिमाहात्म्यं भगवतो निरूप्यते । न हि माहात्म्यवर्जिते वस्तुनि भक्तिरुत्पद्यते । तां भगवद्भक्तिं निरूपयतोऽस्य पादस्याधिकरणेषु प्रथमं पूर्वपक्षयुक्तीरनन्तरं सिद्धान्तयुक्तीरनुक्रामति **पश्चादित्यादिना** ।

९७८ ननु स्वप्नसृष्टेरुपादानकारणशून्यत्वेन मिथ्यात्वात् कथं तत्कर्तृत्वलक्षणो गुणो भगवतः सिद्ध्यतीत्यत आह **वासना इत्यादिना** । जाग्रत्कालदृष्टश्रुतकरितुरगगोसंस्कारास्तावत्सन्त्येव मनोवृत्तिरूपाः । उपादानान्तराभावेऽपि ता एवोपादानीकृत्य स्वाप्नकरितुरगादिसृष्टिं हरिः करोतीति युज्यते । सूत्रमप्येतमेवार्थमाह 'सन्ध्ये सृष्टिराह ही'ति । या तु स्वप्नजाग्रत्त्वप्रतीतिः सा भ्रान्तिरस्तु । स्वप्नजाग्रत्त्वस्य कदाऽपि जाग्रद्दशायामननुभूतत्वेन वासनया सृष्ट्य-सम्भवात् ।

९८२ अननुभूतविषयसंस्कारानुत्पत्तिश्च श्रुतिपुराणवाक्याभ्यां सिद्धेत्याह **अदृष्ट इति** ।

८८३ यत्त्विह जन्मन्यदृष्टमेव किञ्चित्स्वप्ने प्रतीयते तत्पूर्वजन्मस्वनुभूतवासनामूलत्वेन युक्तमनादित्वात् संस्कार-स्येत्याह **अनादित्वादिति** ।

९८२ यत्तु शशस्य विषाणवत्त्वं कदाचिदपि द्रष्टुमयोग्यं स्वप्ने प्रतीयते तत्र शृङ्गं शशोऽप्यनुभूतमेव । तदुभय-संसर्गस्याननुभूतत्वेन वासनामयत्वासम्भवात् तत्प्रतीतिः शुक्तिरजतप्रतीतिवद्भ्रान्तिः । तदाह **कदेति** ।

९८४ स्वप्नजाग्रत्प्रपञ्चयोः सत्यत्वाविशेषेऽपि जाग्रत्प्रपञ्चवत्स्पष्टत्वाभावस्तु स्वाप्नप्रपञ्चस्य वासनामात्रमूलत्वा-द्युज्यत इत्याह **वासनेति** । अनेन 'मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादि'ति सूत्रं व्याख्यातं भवति ।

९८५ अत्र मायामात्रशब्देन स्वप्नस्यानिर्वचनीयत्वं प्रतिपादयितुं यन्मायावादिना खण्डनं क्रियते तदनूद्य दूषयति **भेद इति** । अयमर्थः । द्रष्टुरात्मनः सकाशात् स्वप्नः किं भिन्नोऽभिन्नो वा भिन्नाभिन्नो वेति विकल्पदूषणं तावदा-स्ताम् । अयं विकल्प एव तावदनुपपन्नः । स्वप्नतद्द्रष्ट्रोर्भेदस्यैवानुभवेन निश्चितत्वात् । न हि स्थाणोः पुरुषाद्भेदे निश्चिते स्थाणुपुरुषयोर्भेदोऽभेदो वेत्यादि विकल्पः सम्भवति । निश्चितार्थस्य च प्रश्ने दूषणमाह **प्रश्नदोषा इति** ।

८९६ **चत्वारः** स्वव्याहत्यादिभेदेन । यथा वन्ध्या किं पुत्रवती न वेति प्रश्नः व्याहतः । ब्रह्म जगत्कारणमित्युक्ते जगतः क्षणिकत्वे किं प्रमाणमिति प्रश्नोऽसङ्गतः । पुरोवर्तित्वेन दृश्यमानो घटः किमत्रास्तीति प्रश्नोऽसन्दिग्धार्थ-विषयः । कति काकदन्ता इति प्रश्नो विफलः । एवं सति स्वप्नतद्द्रष्टोर्भिन्नत्वेन सर्वलोकसिद्धयोर्भेदोऽभेदो वेति

प्रश्नस्त्वसन्दिग्धविषयत्वेनानुपपन्न इत्यर्थः । व्याहत्यादिदुष्टप्रश्नानां करणे बाधकमाह **न तैः स्यात् तत्त्वनिर्णय इति** । न ह्यसन्दिग्धार्थेऽपि विप्रतिपद्यमानं स्वव्याहत्यादिकं च पृच्छन्तं प्रति तत्त्वं निर्णेतुं शक्यते । अतोऽसन्दिग्धार्थादिप्रश्नस्तत्त्वनिर्णयविरोधी । स च तस्य पृच्छतो वीतरागकथायां वादलक्षणायां विजिगीषुकथायां जल्पादिलक्षणायां च पराजयनिमित्तत्वेन निग्रहस्थानं भवति । तच्च वादकथायामुद्भाव्यम् । न तु कथावसितिकारणम् । वादकथायाः तत्त्वनिर्णयार्थत्वेन तत्त्वनिर्णयपर्यन्तं प्रवर्तयितव्यत्वात् ।

१८७　विजिगीषुकथायां तु कथावसितिकारणं च भवतीत्याह **तत्त्वनिर्णय इति** ।

९८८　यथा प्रश्नस्य प्रसिद्धार्थविषयत्वं दूषणम् एवं प्रतिवादिसम्प्रतिपन्नार्थप्रतिज्ञानं परिहारस्यापि दूषणत्वमित्याह **परिहार इति** ।

९८९　हेतुस्तु न प्रतिज्ञातार्थवद्विप्रतिपन्नः साधकः किन्तूभयवादिसिद्ध एवेत्याह **तदन्यस्येति** । उभयवादिसिद्धेः साध्येन व्याप्तियुक्तो हेतुराश्रयासिद्धो वा व्यधिकरणासिद्धो वाऽप्रसिद्धसाध्यो वाऽस्तु नासौ हेत्वाभास इत्याह **आश्रयेति** ।

९९०　नन्वाश्रयासिद्धेर्हेतुदूषणत्वं दृष्टं नृशृङ्गमस्ति शृङ्गत्वात् गोशृङ्गवदित्यनुमाने । अन्यथा नृशृङ्गास्तित्वमपि स्यादित्यत आह **दोष इति** । प्रत्यक्षविरोधपराहतत्वादेव नृशृङ्गास्तित्वमनुमानेन साध्यते न तु शृङ्गत्वहेतोराश्रयासिद्धत्वेन । अतो यत्र प्रत्यक्षादिविरोधो नास्ति तत्र हेतुराश्रयासिद्धोऽपि साधक इत्युक्तेर्नातिप्रसङ्गः सम्भवति । **दृष्टश्च** खपुष्पवद्वन्ध्यापुत्रस्यावक्तृत्वं साधयन्नसत्त्वहेतुः । योग्यत्वे सति अनुपलभ्यमानत्वं हेतुश्च असत्त्वं साधयन् **पदार्थस्य** ।

९९१　नन्वाश्रयासिद्धो हेतुश्चेत्प्रत्यक्षादिविरुद्धार्थमपि किमिति न साधयतीत्यत आह **प्रत्यक्षेति** । प्रत्यक्षमूलस्तावन्न्यायो भवति । आगममूलश्च । प्रत्यक्षागमयोरन्यतरमूलसन्न्यायमूलश्च । प्रत्यक्षादिमूलशून्यस्तु न्यायाभास एव । अतो न्यायस्य प्रत्यक्षाद्युपजीवकत्वात् तद्विरुद्धार्थे न प्रवृत्तिर्युज्यत इत्यर्थः ।

९९२　ननु प्रत्यक्षादिभिर्विरुद्धार्थे चोद्यमानस्य हेतोरविरुद्धार्थसाधकत्वे किं प्रमाणमित्यत आह **अदृष्ट इति** । असति बाधके इदं साधनमस्मिन्साध्ये प्रमाणं सति तु बाधके न प्रमाणमिति सर्वप्रमाणानां प्रामाण्यग्राहकेण साक्षिणैवावसीयते । अत एव साक्षिव्यवसायस्य न व्यभिचार इत्यर्थः ।

९९४　यस्तु जगत्क्षणिकत्वादिसाधनस्य अप्रमाणस्यैव प्रमाणत्वाध्यवसायः कस्यचित्स मानसत्त्वाद्बलवत्प्रमाणेन बाध्य इत्याह **अमानस्येति** । साक्ष्यध्यवसायस्तु उत्सर्गतः प्रमाणमिदं साधनमपवादे सत्यप्रमाणमेव भवति । अत एव यद्यद्भोजनं तत्तदिष्टसाधनमिति न्यायः क्वचिदपथ्यभोजनस्यानिष्टरोगादिसाधनत्वेन व्यभिचरितोऽपि भोजनप्रवृत्तिव्यवहाराङ्गं भवति ।

९९४ तदेतदाह **उत्सर्ग इति**।

९९६ एवमाश्रयासिद्धेर्हेतुदूषणत्वं नास्तीत्युक्त्वेदानीं व्यधिकरणासिद्धेर्हेतुदूषणत्वं नास्तीत्याह **व्याप्तत्व इति**। कृत्तिकोदयेन रोहिण्या आसत्त्यनुमानदर्शनाद्व्यधिकरणोऽपि साध्येन व्याप्तो हेतुः साधक इत्यर्थः।

९९८ ननु विश्वं सदसद्विलक्षणमिति पक्षोऽप्रसिद्धविशेषणत्वेन दूषणेनैव दूषणीयः सिद्धान्तिना। तत् कथमप्रसिद्ध-साध्यत्वं हेतुदूषणं नाङ्गीक्रियत इत्यत आह **अन्यदिति**। सद्विलक्षणत्वमसद्विलक्षणत्वविरोध्यसद्विलक्षणत्वं च सद्विलक्षणत्वविरोधीति सदसद्विलक्षणत्वं स्वव्याहतत्वादेवाप्रामाणिकं न तु अप्रसिद्धत्वेन। स्वव्याहतिरहित-साध्यमप्रसिद्धमपि हेतुरविनाभावेन साधयतीत्युक्ते न ह्यतिप्रसङ्गोऽस्ति। न चाप्रसिद्धेन साध्येन हेतोर्व्याप्तिर्न सम्भवतीति वाच्यम्। व्यतिरेकव्याप्तिसम्भवात्। दृष्टं च व्यतिरेकव्याप्त्या हेतोः साधकत्वम्। जीवच्छरीरं सात्मकं प्राणादिमत्त्वान्न यदेवं न तदेवं यथा घट इत्यस्मिन्ननुमाने। अतोऽतिप्रसङ्गाभावाद्विपरीतप्रमाणाभावात् प्रमाणान्तरेण साध्यप्रसिद्धिकल्पनाया व्यर्थत्वात् परमाणुवदप्रसिद्धमपि साध्यं साधयत्येव लिङ्गम्।

१००२ ननु सपक्षरहितत्वेन न्यूनावयवकमनुमानं कथमप्रसिद्धं साध्यं साधयतीत्यत आह **परिशेष इति**। भोक्तृत्वस्य अचेतनधर्मत्वनिषेधपरिशेषलक्षणानुमानात् चेतनधर्मत्वं अन्यत्र अप्रसिद्धं सिद्ध्यति। अज्ञानस्य भ्रम-निबन्धनत्वे भ्रमस्य च अज्ञाननिबन्धनत्वादज्ञानभ्रमयोः परस्पराश्रयत्वलक्षणनिराकरणतर्काहतयोरसिद्धिरन्यत्रा-प्रसिद्ध्या सिद्ध्यति। एवं निराकरणतर्कलक्षणानां चक्रकादीनामप्रसिद्धसाध्यत्वान्नानुमानात् चेतनधर्मत्वं अन्यत्र अप्रसिद्धं सिद्ध्यति। अज्ञानस्य भ्रमनिबन्धनत्वे भ्रमस्य च अज्ञाननिबन्धनत्वात् अज्ञानभ्रमयोः परस्पराश्रयत्व-लक्षणनिराकरणतर्कयोरसिद्धिः अन्यत्र अप्रसिद्ध्या सिद्ध्यति। एवं निराकरणतर्कलक्षणानां चक्रकादीनामप्रसिद्धि-साध्यत्वान्नानुमानस्य साधर्म्य दृष्टान्ताद्यवयवनियमः सिद्ध्यतीत्यर्थः। एवमाश्रयासिद्ध्यादीनामहेतुदूषणत्वं सिद्धम्।

१००४ यदुक्तं प्रतिवादिसम्प्रतिपन्नार्थप्रतिज्ञानं परिहारदूषणमिति तदपि वादकथायामसन्दिग्धार्थप्रश्नवन्न कथा-वसानिकमित्याह **सिद्धेति**। न हि शब्दस्य नित्यानित्यत्वविवादे वादिना प्रमाणशब्दः प्रमेय इति सम्प्रतिपन्नार्थ-प्रतिज्ञायां तत्त्वनिर्णयावसाना कथा परिसमाप्यत इत्यर्थः।

१००८ यथा सम्प्रतिपन्नार्थत्वं प्रतिज्ञादूषणमेवमनैकान्तिकत्वमसिद्धत्वं हेतुदूषणम्। तच्च वादिप्रतिवादिनोरन्य-तराभ्युपगत्यापि भवति। यथा शुक्तिरजतदृष्टान्तेन प्रपञ्चमिथ्यात्वे मायिना प्रयुक्तस्य ज्ञेयत्वहेतोरात्मनि व्यभि-चारित्वं प्रतिवादिसिद्धमपि दूषणं, यथा घटदृष्टान्तत्वेन वेदस्यानित्यत्वे तार्किकेण प्रयुक्तस्य कृतकत्वहेतोरसिद्धत्वं प्रतिवाद्यभ्युपगतं दूषणमेव। दृष्टान्तस्य च साध्यविकलत्वं साधनविकलत्वं च दूषणम्। तथा सविशेषणस्यापि विशेषणवैय्यर्थ्यं च दूषणम्। विशेषणविशेष्ययोरन्यतरस्य वैय्यर्थ्येनासिद्धौ विशिष्टासिद्धेरपरिहार्यत्वात्। तद्यथा शब्दो नित्यः प्रमेयत्वे सति कृतकत्वादिति व्यर्थविशेषणासिद्धः कृतकत्वे सति प्रमेयत्वादिति व्यर्थविशेष्यासिद्धः। यदुक्तं प्रश्नदूषणवैफल्यं तत्प्रथमप्रश्नस्यैव दूषणम्। उत्तरोत्तरप्रश्नस्य पूर्वपूर्वप्रश्नोपयोगित्वेनापि सम्भवात्। पूर्वप्रश्ना-

नुपयुक्तप्रश्नस्त्वसङ्गतः प्रश्नान्तर्भूतः । प्रसिद्धार्थप्रश्ननिष्प्रयोजनार्थप्रश्नयोः सिद्धसाधनस्य चाधिकोक्तिलक्षणनिग्रहस्थानेऽन्तर्भावः । अतो विरोधासङ्गत्यादिनिग्रहस्थानातिरिक्तं न निग्रहस्थानं शङ्कनीयम् । अर्थापत्त्युपमानाभावाख्यानां प्रमाणानामनुमानादावन्तर्भावः । तथा हि । यतोऽप्रसिद्धसाध्यसाधकलिङ्गस्य दृष्टस्य श्रुतस्य वाऽन्यथाऽनुपपत्तिरेवार्थापत्तिः । अतो व्यतिरेकव्याप्तिमूलानुमानैव सा । एतद्गतसादृश्यप्रतियोगित्वादेतेन सदृशं तदित्युपमानमप्यनुमानमेव । तद्यथा सा गौरनेन गवयेन सदृशीति सादृश्येन एतदवच्छेदकत्वात् । योऽयं स्वसादृश्येनावच्छिनत्ति स तेन सदृशः । यथा पित्रा पुत्रः । शब्दान्तर्भूतमप्युपमानं दृष्टम् । यथा कीदृग्गवय इति पृष्टेन किं तदुक्तम् । यथा गौर्गवयस्तथेति । यत्र प्रमाणाभावस्य लिङ्गत्वमनुसन्धाय प्रमेयाभावो निश्चीयते योग्यत्वे सत्यनुपलभ्यमानत्वात् भेरुरिव सर्षपोऽत्र नास्तीतिवत् तत्राभावस्य अनुमानान्तर्भाव एव । सुखदुःखादेः अभावस्तु तत्सद्भाववत्साक्षिप्रत्यक्षवेद्यो न योग्यानुपलब्धिलिङ्गानुमेयः । यत्र घटादेरप्यभावो योग्यानुपलब्धेर्लिङ्गत्वमननुसन्धाय शीघ्रं प्रतीयते तत्रासौ प्रत्यक्षोऽभ्युपगन्तव्यः । अतोऽर्थापत्त्यादिकं प्रत्यक्षादिप्रमाणत्रितयान्न पृथग्भूतं प्रमाणम् । उपक्रमोपसंहारादीनां वाक्यार्थकरणानामपि युक्त्यन्तर्भाव एव न पृथक्प्रमाणत्वमित्याह **प्रारम्भेति** । उपक्रमोपसंहारादीनां तु व्याप्त्या निर्णायकत्वदर्शनाद्युक्तित्वमेवेत्यर्थः ।

१००९ उपक्रमादीनां युक्त्यन्तर्भूतत्वेऽपि 'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय' इति बृहत्संहितायामुपपत्तिशब्देन निर्दिष्टाया युक्तेः सकाशात् तेषां पृथङ्निर्देशस्तु कुरुपाण्डववत् सामान्यविशेषभावेन युज्यत इत्याह **कुरुपाण्डववदिति** ।

१०१० यद्वेदस्यानुमानेन अनिर्वचनीयत्वसाधने अप्रसिद्धविशेषणत्वं दूषणं परं प्रत्युद्भावितं तस्य स्वेन अनङ्गीकृतस्य परं प्रत्युद्भावने अपसिद्धान्ततादोषमाशङ्क्याह **स्वन्यायैरिति** । यथा स्वाभ्युपगमन्यायैरपि परं प्रति साधितैः परपक्षो दूषयितुं शक्यते तथा सुतरां पराभ्युपगतन्यायैः । अतो यद्येवं चेदेवं दूषणं स्यादित्यनुपगतस्यैव परं प्रति प्रसङ्गरूपेणापादनेनापसिद्धान्ततया प्रसिद्धेन परपक्षदूषणेऽपि स्वपक्षसाधनं त्ववश्यं स्वसिद्धन्यायेन कार्यं न परस्यैव सिद्धेनेत्यर्थः ।

१०११ परोक्तार्थस्य दूषणं तु परोक्तन्यायेनापि भवतीति दर्शयति **छलमिति** । यथा स्वव्याहतेः प्रश्नदूषणत्वमेवं छलजात्युत्तरयोरपि वक्तुरभिप्रेतार्थादर्थान्तरकल्पनं स्वव्याघातकमुत्तरं जातिः । तद्यथा 'नवकम्बलोऽयं माणवक' इत्युक्ते छलवाद्याह 'कुतोऽस्य नवकम्बला' इति । न हि माणवकस्य पृथिवीतो नवकम्बला युज्यन्त इति छलोत्तरेणैव छलोत्तरं व्याहतं भवति । माणवकस्य नूतनकम्बलोपलम्भान्नवानां कम्बलानां प्रत्यक्षव्याहतत्वेनाप्रसक्तत्वात् तच्छलोत्तरं व्याहतेऽन्तर्भवति । वक्तुरभिप्रेतार्थापरिज्ञानं विपरीतज्ञानं चेति निग्रहस्थानद्वयं छलवादिनो भवति । अनुमानं प्रमाणमित्युक्ते जातिवाद्याह । नानुमानं प्रमाणं पदार्थत्वादप्रमाणवदित्येतत्स्वस्याप्यनुमानत्वेन अप्रामाण्यमापादयतीति स्वव्याघातकरत्वेन जात्युत्तरम् ।

१०१२ उक्तार्थमुपसंहरति **एवमिति** । न च मायामात्रपदस्य अनिर्वचनीयावाचकत्वे किञ्चित्प्रमाणमस्ति ।

१०१३ व्याहतं च सत्त्वेनासत्त्वेन वाऽनिर्वचनीयत्वं विश्वस्येत्याह **विलक्षणमिति**। सद्विलक्षणस्यासत्त्वनियमादसद्विलक्षणस्य सत्त्वनियमाच्च सद्विलक्षणमसद्विलक्षणं च विश्वमित्युक्ते सच्चासच्चेत्युक्तं स्यात्। तत्सदसत्त्वं चैकस्य व्याहतमित्यर्थः।

१०१३ किञ्च सत्प्रतियोगिकवैलक्षण्यं विश्वस्य वदता ब्रह्मव्यतिरेकेण सदनभ्युपगमात् प्रतियोगित्वलक्षणधर्मवत्त्वं ब्रह्मणा एवाङ्गीकृतमिति निर्विशेषत्वं त्यक्तं स्यात्। यदि प्रतियोगित्वं मिथ्या ब्रह्मणः तर्हि कथं ततो विलक्षणं जगदुच्यते। ततश्च वैलक्षण्यासम्भवेनाविलक्षणत्वं स्याज्जगद्ब्रह्मणोः। अवैलक्षण्ये च तयोरुभयोरपि मिथ्यात्वं स्यात्। सत्यत्वं वा। न पुनर्ब्रह्मणः सत्यत्वं जगतो मिथ्यात्वम्। तदाह **प्रतियोगित्वमिति**।

१०१५ ननु वैलक्षण्यवदवैलक्षण्यमपि धर्मरूपं नास्त्येव ब्रह्मणो निर्विशेषस्य। तत्कथं तस्य जगदविलक्षणत्वेन जगद्वन्मिथ्यात्वापत्तिरित्यत आह **यदीति**।

१०१५ यदि सर्वधर्मरहितं ब्रह्म न तर्हि जिज्ञास्यं स्यात्। सामान्यतः प्रतीतं हि विशेषधर्मवत्तयेदमित्थंभूतमिति निश्चेतुं जिज्ञासा भवति। यदि ब्रह्मण इत्थंभावलक्षणो धर्मो नास्ति तर्ह्यनैवंभूतं प्रति प्रतियोगिभावो न स्यात्। तथा सत्यन्यवन्मिथ्यात्वं स्यादित्युक्तो दोषः।

१०१७ सगुणत्वमेव ब्रह्मणः सर्वज्ञत्वादिधर्मवत्त्वेनैव सद्भावप्रतिपादकैः 'यः सर्वज्ञः सर्वविदि'त्यादिश्रुतिसमूहैः सिद्धमित्याह **इत्थंभावात्मकानिति**।

१०१८ 'अदृश्यत्वादिगुणको धर्मोक्तेरि'ति वदता सूत्रकारेणापि ब्रह्मणः सगुणत्वमेवाभ्युपगन्तव्यमित्युक्तमित्याह **अदृश्येति**। अन्यव्यावृत्तिरूपाणामप्यदृश्यत्वादीनां यदा ब्रह्मगुणत्वमभिप्रेतं सूत्रकृतः तदा किमु वक्तव्यं सर्वज्ञत्वादीनां भावरूपाणामित्यर्थः। भावरूपा एव धर्मा ब्रह्मणो न सन्त्यन्यव्यावृत्तिरूपास्त्वभावधर्माः सन्तीत्येषा कल्पना प्रमाणशून्या व्यर्था च। अभावरूपधर्माङ्गीकारेऽपि ब्रह्मणो निर्विशेषत्वभङ्गादित्याह **यदीति**।

१०१९ ननु न स्वतो ब्रह्मणः सर्वज्ञत्वादिकं सम्भवति परापेक्षत्वात्। न हि सर्वमनपेक्ष्य सर्वज्ञत्वं सर्वेश्वरत्वादिकं निरूपयितुं शक्यते। स्वभावतस्तु निर्गुणमेव ब्रह्मेति चेन्मैवम्। एवं सति गुणाधीननिरूपणत्वेन निर्गुणत्वायोगाद्ब्रह्म निर्गुणं च न स्यात्। न चानन्याधीननिरूपणत्वमात्रेण परकृतत्वं वस्तुनः। न ह्यल्पापेक्षया महत्त्वं व्यवहृतमित्येतावता तत् परकृतं भवति। यद्यन्यापेक्षत्वेन सर्वज्ञत्वादयो ब्रह्मणो न स्वतः स्युः। तर्हि तथैव तस्य सत्ताऽपि स्वतो न स्यात्। कालादिसापेक्षत्वात्। न ह्यतीतानागतवर्तमानकालानामन्यतमं कालमनपेक्ष्यास्तीति नासीदिति वा भविष्यतीति वा निरूपयितुं शक्यते। अतोऽन्यापेक्षत्वात् परकृतमेव सत्त्वमिति ब्रह्मणः स्वतोऽसत्त्वं स्यात्। तदेतदाह **अन्येति**।

१०२० ब्रह्मणि सत्त्वादिनिखिलधर्मानङ्गीकारे बाधकमाह **सर्वेति**। न हि सत्त्वमसत्त्वं वाऽन्यद्वा किञ्चिन्निर्विशेषे ब्रह्मणि शास्त्रेण विधातुं शक्यते। अतस्तस्मिंश्छास्त्रमनर्थकं स्यात् इत्यर्थः। अविद्यमानमेव सर्वज्ञत्वादिधर्मं ब्रह्मणि ज्ञापयति चेच्छास्त्रमप्रमाणं स्यात् अनाप्तवाक्यवदसदर्थबोधकत्वात् इत्याह **मिथ्येति**।

१०२१ ननु निषेद्धुमेव ब्रह्मणि सर्वज्ञत्वादिकमन्यतः प्राप्तमनुवदतः शास्त्रस्य कथमप्रामाण्यं स्यादित्यत आह **अप्राप्तमिति**। भवेदेवं यदि प्रत्यक्षादिना सर्वज्ञत्वादिकं प्रतीतं स्यात्। न च तद्वेदादृते ज्ञातुं शक्यमित्याह **न हीति**।

१०२२ यद्यप्राप्तत्वेन शास्त्रवेद्यमपि ब्रह्म सर्वज्ञत्वादिकं मिथ्येत्युच्यते तर्हि तद्वदेव शास्त्रवेद्यत्वेन तदभ्युपगत-जीवब्रह्मैक्यमपि कथं मिथ्या न स्यादित्याह **वेदेति**। न च वाच्यं निर्गुणत्वश्रुत्या यन्निषेध्यं तत्समर्पणमात्रत्वमेव सर्वज्ञत्वादिप्रतिपादकश्रुतेरिति । 'असदेवेदमग्र आसीत्' इत्यसत्त्वप्रतिपादकश्रुत्या यन्निषेध्यं तत्समर्पणपरत्वेन 'सदेव सौम्येदमग्र आसीदि'त्यादिश्रुतेरुपपन्नत्वेन ब्रह्मणोऽसत्त्वप्रसङ्गात्। यद्यसत्त्ववचनस्याव्यक्तत्वपरत्वेनोपपन्न-त्वान्नासत्त्वं ब्रह्मण इत्युच्यते तर्हि निर्गुणत्वश्रुतेरपि प्राकृतगुणराहित्यविशेषतयोपपन्नत्वात्। न ब्रह्मणि सर्वज्ञ-त्वादिधर्मनिषेध इत्यभ्युपगम्यतां निर्विशेषे ब्रह्मण्यारोपितधर्मविधायकत्वे शास्त्रमप्रमाणं स्यादित्युक्तम्। अधुना तत्र धर्मारोपोऽपि न घटते युक्तिविरुद्धत्वादित्याह **धर्मेति**। अपरोक्षाधिष्ठाने पुरोवर्तित्वादिविशिष्टे परोक्षाभिधाने वा देशकालस्वरूपव्यवहितत्वादिविशिष्टे सामान्यधर्मग्रहणादेव रजताद्यारोपो दृष्टो न पुनर्निर्विशेषः कस्यचिदारोपः। यदि सर्वज्ञत्वादिधर्मारोपे कारणत्वेन ब्रह्मणि सामान्यधर्माद्यारोपोऽङ्गीक्रियते तर्हि तदारोपोऽप्येवमित्यनवस्थापत्तिः। ननु जगदीशत्वसर्वज्ञत्वादेर्मिथ्यात्वे तत्प्रतिपादकवाक्यस्यायथार्थत्वं स्यादिति यदुक्तं तदिष्टमेव। निखिलस्यापि प्रमातृप्रमाणप्रमेयाकारस्य उपलभ्यमानत्वहेतुना शुक्तिरजतवत् भ्रान्तित्वाङ्गीकारादित्यत आह **ईशेति**।

१०२५ यज्जगद्भ्रान्तत्वसाधनमुच्यते तदेव प्रत्यक्षादिबहुतरप्रमाणविरुद्धत्वाद्यथार्थमिति न जगतो मिथ्यात्वमापा-दयति। यद्बहुप्रमाणविरुद्धं तदप्रमाणं हि दृष्टम्। यथा द्वैधे बहूनां वचनं विरुद्धमेकस्य वचनम्। न च सर्वैर्व्यव-ह्रियमाणस्य भ्रान्तत्वं युज्यते। भ्रान्त्यैव सर्वे जगद्व्यवहरन्तीत्येषैव भ्रान्तिः तस्य मायावादिनः किं न स्यात्। तस्य जगच्छत्रोर्भ्रान्तत्वे जगदीशादयो जगदभ्रान्त्यैव व्यवहरन्तीति सिद्ध्यति। ननु मायावाद्येवाभ्रान्तिमान् जगदीशादयस्तु भ्रान्तिमन्त इति किं न स्यादित्यत आह **भवेयुरिति**।

१०२७ ननु सर्वलोकप्रत्यक्षसिद्धजगत्सत्यत्वमनुमानेनैव नेह बाधितुं शक्यते । अद्वैतागमेन तु बाध्यताम् । अनुमानवत् आगमस्य प्रत्यक्षानुपजीवकत्वात् इत्याशङ्क्याह **सत्यत्वमिति**। आगमेन निखिलप्रत्यक्षबाधे आगमस्य स्वरूपं प्रामाण्यं च प्रत्यक्षविशेषगृहीतं न सिद्ध्यत्येवेति कस्य जगत्सत्यत्वबाधकत्वं भवेदित्यभिप्रायः।

१०२९ ननु यावद्बाधं प्रत्यक्षस्य प्रामाण्यमस्त्येव । तेन च प्रत्यक्षेणावगतप्रमाणभावस्यागमस्याद्वैते प्रामाण्यं युक्तमेवेत्याशङ्क्याह **तात्कालिकमिति**।

१०३१ किञ्चित्कालं प्रमाणीभूय पश्चादप्रमाणीभावः प्रत्यक्षस्य चेदेकमेवाद्वितीयं तत्त्वमसीत्याद्यद्वैतागमस्यापि स्यादविशेषात्। एवं सति यदा द्वैतागमः प्रमाणीभवति तदा अद्वैतमिथ्यात्वेन द्वैतमिदं सत्यं भवेत्। परस्पर-विरुद्धयोरितरनिषेधस्येतरविधिनियतत्वात्। अद्वैतागमस्याबाधितं प्रामाण्यं चेत् प्रत्यक्षादेरपि स्यात् प्रामाण्यत्वा-विशेषादित्याह **ऐक्यवाक्यस्येति**।

१०३२ किञ्च प्रत्यक्षाप्रामाण्याबाध्यत्ववत् अद्वैतागमप्रामाण्याबाध्यत्वस्यापि अद्वैतसिद्धिव्याघातकत्वाविशेषात् तदङ्गीकरणमद्वैतवादिनो व्यर्थमेव। यदि अद्वैतागमप्रामाण्यबाधोऽप्यस्ति सोऽप्यबाध्यश्चेदद्वैतव्याघातस्तदवस्थ एव। तदाह **अद्वैतेति**। अपि च यस्त्वद्वैतागमवत्प्रत्यक्षादिकं स्वतःप्रमाणमभ्युपगच्छति तेन मायावादिना अद्वैतागम-प्रतिपाद्यवत् प्रत्यक्षादिविषयस्य प्रपञ्चस्याबाध्यत्वमवश्यमभ्युपगन्तव्यम्। प्रत्यक्षादेरयथार्थत्वे प्रमाणत्वमेव नाङ्गी-कर्तुं शक्यम्। किमु तस्य स्वतःप्रामाण्यमित्याह **यदीति**।

१०३३ यावत् निखिलद्वैतबाधकं अपरोक्षज्ञानं न जायते तावत्पर्यन्तमेव द्वैताभासकं प्रमाणमित्येतद्व्याहतमेव। न हि कालत्रयेऽप्येतदप्रमाणमिति बाधकज्ञानेन गृहीतस्य अद्वैतज्ञानस्य कदाचिदपि प्रामाण्यं युज्यते। तदाह **प्रामाण्यस्येति**।

१०३४ नन्वस्तु द्वैताभासस्य प्रत्यक्षादेरप्रामाण्यमद्वैतप्रमाणेन बाध्यमानत्वादित्यत आह **मिथ्येति**। येन प्रमाणेन द्वैतमात्रनिषेधकेन कैवल्यमात्मनः सिद्ध्यति तत्प्रमाणं कैवल्यदशायामबाधितं चेत् अद्वैतभङ्गो बाधितं चेत् पुनर्द्वितीयसद्भावेनात्मनः कैवल्यहानिः स्यात्। अपि च मुक्त्यवस्थाऽऽत्मनोऽबाधिता चेत् अद्वितीयत्वहानिर्बाधिता चेदमुक्तत्वमेव स्यात्। तथा बन्धनिवृत्त्युत्तरकालो बाधरहितश्चेत् अद्वैतभङ्गो बाधितश्चेत् कालाभावेन नित्यत्वस्य निरूपयितुमशक्यत्वात् मुक्तेर्निवृत्त्या संसारः स्यादात्मनः। न च नासीदस्ति भविष्यतीति बाधः कालस्य युज्यते। स्वव्याहतत्वात्।

१०३७ तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति। अथ मर्त्योऽमृतो भवतीति कालसम्बन्धस्य श्रवणात् मुक्तौ न तस्य निवृत्तिर्वक्तुं शक्यते। न च कालसम्बन्धरहितं किञ्चिदस्ति तदाह **तथेति**। अतः प्रत्यक्षादिसिद्धस्य द्वैतस्य न कथञ्चिद्बाधकं सम्भवति। न च कुत्रचित् दृढप्रत्यक्षसिद्धमनुमानेनागमेन वा तदुभयेन वा बाध्यं दृष्टम्।

१०३८ न च देहात्मत्वं प्रत्यक्षसिद्धं प्रमाणान्तरबाध्यं दृष्टमिति वाच्यम्। मम देह इति भेदस्यैव अनुभूयमानत्वात् देहात्मनोः। अत एव कृष्णोऽहमितिवद्देहगतकार्ष्ण्यारोपो देहिनि। तत्र कृष्णशब्दः परं शुक्लपट इव कर्दमलिप्त उपचारेण प्रयुज्यते। जातिमूकस्यापि कर्दमलिप्तपटे कृष्णबुद्ध्युत्पत्तेर्न कृष्णशब्दस्योपचारमात्रत्वं तत्र। किन्तु कार्ष्ण्यमेव कर्दमोपाधिकमस्तीत्युज्यते। तर्हि पटस्य यथा स्वतःशुक्लस्य कर्दमोपाधिकृतं कार्ष्ण्यम्। एवमात्मनोऽपि स्वतश्चिद्रूपस्य मम कार्ष्ण्यमिति प्रतीयमानकार्ष्ण्यमभ्रान्तमेव देहोपाधिकं भवेत्। कर्दमोपाधिकमित्येव प्रतीय-मानत्वात्। न हि शुक्ले पटेऽपि कार्ष्ण्यं भ्रान्तम्। तदेतदाह **कथञ्चेति**। कार्ष्ण्यं ममेति न प्रतीयते किमिति काक्वा योजनीयम्।

१०४२ ननु पटकर्दमयोर्भेदेन प्रतीयमानत्वात् कार्ष्ण्यं कर्दमकृतमिति प्रत्येतुं शक्यते। देहात्मनोस्तु भेदेन प्रतीत्यभावात् न देहोपाधिनिबन्धनमात्मकार्ष्ण्यमिति प्रतीतिरुपपद्यते। कृष्णोऽहमिति देहात्मनोरभेदप्रतीति-रित्यङ्गीकृत्य मम देह इति भेदस्तु मम चैतन्यमितिवदौपाधिक इत्येतदपि वक्तुं शक्यत्वात्। पश्चादीनां

तत्तुल्यमनुष्याणां च देहात्मभेदज्ञानं सम्भावितमित्याह **कथमिति**। यथा जातिस्मरणात् पूर्वदेहानुभूतानुसन्धातॄणां देहात्मभेदज्ञानं सिद्धम्। एवमिष्टसाधनत्वेन सह स्तनपानादेः पूर्वदेहानुभूतान्वयव्यतिरेकव्याप्त्यनुसन्धानेनैव बाल्य-दशायां मनुष्यादीनां प्रथमस्तनपानादौ प्रवर्तमानत्वादस्त्येव तेषां देहात्मभेदज्ञानम्। अतो गृहादौ नष्टे नष्टोऽहं समृद्धे समृद्धोऽहमिति व्यवहारवद्गौरोऽहमिति व्यवहारोऽपि न देहात्माभेदप्रत्ययनिबन्धनः किन्त्वौपचारिक एव।

१०४३ ननु गृहादेरिव देहात्मनोर्भेदज्ञानमस्ति चेत् मदीयदेहो गौरो न त्वहमिति व्यवहारो लोकस्य किं न स्यादि-त्याशङ्क्याह **व्याप्तत्वादिति**। यथा अन्तर्बहिरग्न्याक्रान्तमयःपिण्डमग्नेः सकाशाद्विविच्य व्यवहर्तुमशक्यत्वात् अग्न्यविवेकेन अयो दहतीति व्यवहरत्यनिपुणो लोकः प्रत्यक्षसिद्धेऽप्यग्न्ययसोर्भेदे, तथा स्वेन व्याप्तत्वात् स्वस्मा-द्विविच्य व्यवहर्तुमशक्तेन लोकेन देहः स्वाविक्तवद्व्यवह्रियते प्रत्यक्षसिद्धेऽप्यात्मदेहभेदे। अतो देहात्मभेदो नाप्रत्यक्षो न प्रमाणान्तरबाध्यश्च। चन्द्रस्य प्रादेशमात्रप्रत्यक्षं तु दूरत्वदोषयुक्तत्वेनापटुत्वात् प्रमाणान्तरेण बाध्यते। दृढप्रत्यक्षं तु न केनापि बाध्यमिति तत्सिद्धस्य जगतो न कदाचित्प्रमाणान्तरबाध्यतेति युज्यते।

१०४६ ननु दृढप्रत्यक्षमपि वर्तमानार्थग्राहकमेव न तूत्तरकालीनायां मोक्षदशायां विश्वस्याबाध्यत्वं गृह्णाति। प्रत्यक्षस्योत्तरकालीनार्थागोचरत्वादित्याशङ्क्य परिहरति **तदिति**। यद्येष्यदर्थं सर्वथा न गोचरयेत् प्रत्यक्षं तर्ह्यु-त्तरकालस्तद्गतो बन्धमोक्षश्च न सिद्ध्येदेव यत्र विश्वबाध आशङ्क्येत। न च उत्तरकालादेरत्यन्ताप्रसिद्धस्यागमेन सिद्धिर्वक्तुं शक्यते। अनुमानस्येवागमस्यापि सामान्यतः प्रत्यक्षसिद्धार्थविषयत्वात्। यस्त्वप्रसिद्धो विशेष आगमबोध्यः स तु पदार्थस्य पदान्तरविशिष्टत्वाख्यो न तु पदार्थमात्रम्। प्रत्यक्षतोऽप्रतीतत्वे तस्य पदेन वाच्य-वाचकसम्बन्धग्रहणं न स्यात्। न ह्यप्रतीतेन सम्बन्धो गृहीतुं शक्यते। अतश्चातीतानागतपदार्थेषु सामान्याकारेण साक्षिप्रतीतेषु पदानां वाचकशक्तिर्गृहीतेति तेषां पदार्थानां संसर्गो वाक्येन बोध्यते नान्यथा। यदि वर्तमान एव घटादिः प्रत्यक्षस्तत्रैव च घटादिशब्दसम्बन्धग्रहणं तर्ह्यतीतमनागतं च घटादिकं न बोधयेत् घटादिपदम्। सम्बन्धग्रहणं च पदस्यावर्तमानार्थे प्रतीत एव घटते नान्यथा। यत् सम्बन्धग्रहणकाले दृष्टं घटत्वादिसामान्यं तदेव कालान्तरेऽपि गृहीतशक्तिको घटादिशब्दो ज्ञापयति। घटादिव्यक्तयस्त्वतीतानागताश्च सामान्याधारतयाऽर्था-ज्ज्ञायन्ते। अतो न तासां घटादिशब्दसम्बन्धग्रहणार्थं प्रत्यक्षतोऽवगतिरपेक्षितेति यद्युच्यते तर्हि वर्तमानवस्तु-स्वरूपेष्वेव दृष्टेषु गृहीतशक्तिको वस्तुस्वरूपशब्दोऽतीतानागतवस्तुरूपेष्वगृहीतशक्तिक इति तानि न ज्ञापयेत्। स्वरूपत्वसामान्यस्य स्वरूपशब्दवाच्यस्याभावादेव न तदाधारतया ज्ञापयतीत्यपि युज्यते। न हि स्वरूपत्वसामान्यं केनचिदङ्गीकृतम्। परमप्रतियोगिकत्वाच्चात्यन्तव्यावृत्ताकार एव स्वरूपशब्दार्थो नान्यसाधारणाकारः। अन्यसाधारणं तु घटव्यक्तेर्वस्तुत्वं तत्तदीयान्यसाधारणं द्रव्यत्वं ततोऽपीषत्साधारणं घटत्वमत्यन्तासाधारणं तु स्वरूपत्वमेवेष्यते। अन्यथा वस्तुनो व्यावृत्ताकारः क इति प्रश्नस्य स्वरूपमित्येवोत्तरं नोच्येत। यदि भेद इत्युत्तरमुच्यते तर्हि स एव स्वरूपपदार्थ इत्यस्मन्मतमेव सिद्धम्। अत एव परस्परव्यावृत्तेष्वप्यतीतानागतवर्तमानेषु स्वरूपेषु स्वरूपशब्द-सम्बन्धग्रहणार्थं विशेषतो ज्ञानाभावेऽपि सामान्यतो ज्ञानमवश्यमित्यभ्युपगन्तव्यम्। अत एव वस्तु सर्वमपि सामान्यविशेषात्मकं विशेषबलादेकमेव व्यावृत्तरूपं सामान्यरूपं चेति युज्यते। न च सामान्यस्यैवानेकपदार्थ-

धर्मत्वमाशङ्कनीयम् । रूपादिवद्गोत्वादेरपि प्रतिव्यक्तिभिन्नस्यैव दर्शनात् । न हि खुरपुच्छसास्नादिमत्त्वं लक्षणं सादृश्यमुक्त्वा अन्यद्गोषु गोत्वं नामैकमुपलभ्यते । अतो गोत्वाश्वत्वादिसामान्यस्यानेकवर्तिनः शब्दप्रवृत्तिनिमित्तस्य प्रत्यक्षवेद्यस्याभावाद्गवादिसर्वपदार्था गवादिशब्दसम्बन्धग्रहणार्थं केनचिदाकारेण वेत्तव्या एव साक्षिणा । अन्यथा सर्वमिति विज्ञानं सर्वेषां न स्यात् । न हि सर्वं प्रमाणप्रमेयरूपं सामान्याकारेणापि साक्षिणमन्तरेण विषयीकर्तुं शक्यते । तथा तेनापि विषयीकृते च सर्वस्मिन्न हि सर्वशब्दस्य व्यक्तिर्गृहीतुं शक्यते ।

१०५७ साक्षिप्रत्यक्षस्य सर्ववस्तुष्वपि सामान्याकारेण प्रवृत्तिं स्पष्टयति **किञ्चिदिति** । यथेमे दृश्यमानाः सास्नादिमन्तोऽर्था गवादिशब्दवाच्यास्तथा तत्सदृशाः सर्वेऽपि देशकालान्तरस्था गवादिशब्दवाच्या इति । तत्र शब्दसम्बन्धग्रहणान्यथाऽनुपपत्त्या सामान्याकारेण साक्षिप्रत्यक्षेणातीतानागतवस्तुप्रतीतिः सिद्धेत्यर्थः ।

१०५८ स्मरणलक्षणप्रत्यक्षस्य मानसस्यातीतकालविशेषितार्थविषयत्वाच्च न वर्तमानविषयत्वं प्रत्यक्षस्य युज्यते । स्मरणं चाबाधितार्थविषयं यदा भवति तदैव प्रमाणम् । अनुभूतत्वविशिष्टार्थविषयत्वान्न पूर्वानुभवगृहीतार्थमात्रविषयत्वेन अप्रामाण्यमाशङ्क्यम् । न हि पूर्वानुभवोऽनुभूताकारेण वस्तु गृह्णाति तदाह **प्रत्यक्षमिति** । प्रत्यक्षस्य वर्तमानैकविषयत्वमित्यपि न वाच्यम् । प्रत्यभिज्ञाप्रत्यक्षस्यातीतवर्तमानकालसम्बन्धवस्तुविषयत्वात् । न च अतीतस्मरणेतरकालसम्बन्धाङ्गस्मरणसंश्लिष्टमेतज्ज्ञानमिति वाच्यम् । तदिदं वस्त्विति प्रत्यभिज्ञाप्रत्यक्षस्य विषयवदैक्यप्रतीतेः । अतो न वर्तमानैकविषयत्वं प्रत्यक्षस्य युज्यते । तदाह **मानत्वमिति** ।

१०६१ एवं मानमातृप्रमेयरूपस्य सर्वस्य प्रत्यक्षतः सार्वकालीनाबाध्यत्वं साधयितुं प्रत्यक्षस्य वर्तमानैकग्राहित्वं निषिद्धम् । तत्र विषयत्वातिरेकेण प्रमेये प्रागुक्तलक्षणं प्रमित्याख्यं प्रमाणतोऽन्यन्नास्तीति तावदाह **न चेति** । अतो ज्ञानज्ञातृज्ञेयरूपमेव विश्वम् । तच्च प्रत्यक्षबलादेव सर्वथाऽबाध्यमभ्युपगन्तव्यम् । न हि स्वप्नस्थस्यापि मानमातृप्रमेयरूपस्य प्रपञ्चस्य कदाचिद्बाधो दृश्यते । उत्तरकाले तु जाग्रत्वमेव बाध्यते स्वप्नस्य न स्वप्नः । अतो जाग्रत्त्ववत्स्वप्नावस्था सत्यैव । जाग्रदवस्थाऽप्यात्मवत्सत्या । यथाऽऽत्मनि स्वतन्त्रकर्तृत्वभ्रमो जात इत्येतावताऽत्मा न मिथ्या । एवं स्वप्ने जाग्रत्त्वभ्रमो जाग्रदवस्थायां च क्वचिच्छुक्तिरजतादिभ्रमो जात इत्येतावता न स्वप्नजागरिते मिथ्या । यथा आत्मन्यन्यथादृश्यमान एवांशो मिथ्या न तु सर्व आत्मा । एवं स्वप्नजाग्रदवस्थयोरन्यथादृश्यमान एवांशो मिथ्या न तु सर्वे स्वप्नजाग्रदवस्थे च । स्वप्नोऽनुभूतो जाग्रदनुभूतमित्येव व्यवहारोऽनुवर्तते न भ्रमोऽयं जात इति व्यवहारः कदाचित्कस्यचित् । न किञ्चिद्भ्रान्तत्वापादकं प्रमाणं सम्भवति प्रत्यक्षादिसर्वप्रमाणासिद्धस्य जाग्रदादिप्रपञ्चस्य । अपि च यो वादी सर्वं भ्रान्तिपरिकल्पितमिति वदति स सर्वमध्यपतितत्वात्स्वमतस्य भ्रान्तिमूलत्वमङ्गीकरोत्येव । प्रतिवाद्यपि तन्मतस्य भ्रान्तिमूलत्वमेव प्रतिपादयतीति तस्य तत्राविप्रतिपत्तिरेव सम्प्रतिपत्त्या भ्रान्तत्वापादकम् । अतः भ्रान्तिमूलत्वेनाप्रामाण्यमिति जगतः सत्यत्वं दुर्वारमेव । अपि च स्वमतस्यापि भ्रान्तित्वं दुर्घटत्वं च भूषणं वदताऽनिर्वाच्यत्वादिना हेयत्वमेव स्वीकृतमिति तन्मतमुन्मत्तोऽपि कथं स्वीकर्तुमिच्छेत् । न ह्युन्मत्तः स्वमतं भ्रान्तमिति नियमेन वदति ।

१०७३ नन्वशेषदोषदुष्टत्वेनोन्मत्तेनाप्यनिर्वाच्यवादिमतं हेयं चेत् कथं लोके प्रवृत्तमित्यत आह **ईशेति**। अचिन्त्येशशक्त्या प्रेरितैर्महोन्मत्तैः प्रवर्तितमित्यर्थः।

१०७४ अतश्चानिर्वाच्याभावादेवानिर्वाच्यत्वं नोच्यते स्वप्नस्य मायामात्रपदेन सूत्रगतेन किं तर्ह्युपादानभूतया जीवप्रज्ञया सहितेशप्रज्ञया निमित्तया निमित्तत्वं जीवप्रज्ञाया निरपेक्षतया भ्रान्तत्वमेव तस्य तेनोच्यते। मायावादिनमभिमुखेति प्रज्ञाया इति प्रज्ञावाचित्वेनाभिधानात्। तदाह **अत इति**।

१०७५ एतदेव विवृणोति **उभाभ्यामिति**।

१०७६ ननु मनोगतवासनामयस्य स्वप्नप्रपञ्चस्य प्रज्ञोपादानत्वं कथमित्यत आह **प्रज्ञात्मकमिति**।

१०७८ 'कात्स्न्र्येनानभिव्यक्तस्वरूपत्वादि'ति सूत्रशेषार्थमाह **मनोविकारा इति** ॥ १ ॥

॥ इति सन्ध्याधिकरणम् ॥ १ ॥

* * *

॥ पराभिध्यानाधिकरणम् ॥

१०७९ 'पराभिध्यानात्तु तिरोहितमि'ति सूत्रं विवृणोति **ईशेच्छयेति** ॥ २ ॥

॥ इति पराभिध्यानाधिकरणम् ॥ २ ॥

१०८१ स्वप्नप्रपञ्चवत्तिरोधानवत्सुषुप्तिप्रबोधादिकं जीवस्य परेशेणैव हरिणा भवति स्वतन्त्रेण न तु कालकर्मादिनेत्याह **सुषुप्तीति**। न च केषुचिदेव जीवेषु स्वप्नादेर्हरिर्नियन्तेति वाच्यम्। 'प्रदर्शकस्तु सर्वेषां स्वप्नादेरेक एव तु। परमः पुरुषो विष्णुस्ततोऽन्यो नास्ति कश्चन। देशकालविशेषेषु स्वप्नादीनां स एव हि। तिरस्कर्ता च कर्ता च न खण्डेशः स राजवदि'ति वचनविरोधात्। अनेन 'तदभावो नाडीषु तच्छ्रुतेरात्मनि ह', 'अतः प्रबोधोऽस्मादि'ति सूत्रतात्पर्यमुक्तं भवति ॥ ४-५-६-७ ॥

॥ इति सम्पत्त्यधिकरणम् ॥ ७ ॥

* * *

॥ न स्थानतोऽप्यधिकरणम् ॥

१०८२ ननु एकस्यापि परमात्मनः जाग्रत्स्वप्नसुषुप्त्यादिस्थानभेदात् ज्ञानशक्त्यादितारतम्यं जीवस्येव किं न स्यात् ? इत्येतामाशङ्कां परिहरतो 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र ही'ति सूत्रस्यार्थमाह **न स्थानेति** । सर्वस्थानेष्वपि निर्दोषः पूर्णषड्गुणार्णव एव विष्णुर्न स्वरूपगततारतम्ययुक्तः । 'सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षत' इति श्रुतेः सर्वेषु भूतेषु स्थितं विष्णुं ब्रह्मेत्येव पूर्णगुणक इत्येवाचक्षत इत्येवार्थः ।

१०८८ न चैतद्विरुद्धार्थम् । 'न सत्यं नापि चानृतं प्राज्ञः किञ्चन संवेत्ति तुर्यं तत्सर्वदृक् सदे'त्यादिवचनम् तुरीयनामा परमस्तुरीयावस्थजीवं प्रति सर्वं दर्शयतीति सर्वदृक् प्राज्ञनामा हरिः सम्प्रसुप्तं न वेदयतीति न संवेत्तीत्येवमविरुद्धार्थत्वेन वक्तुमशक्यत्वात् । वेत्तीत्यन्तर्गर्भितणिजर्थो व्यपदेशः । अन्यथा तस्य प्रयोजनवदर्थवत्त्वव्याहत्या प्रामाण्यनिश्चयो न स्यात् । प्रमाणवदर्थवत्त्वं च वेदस्येश्वरे गुणपूर्णत्वमज्ञानादिदोषराहित्यं चावेदयत एव स्यान्न अन्यथा । यतो विष्णोर्निर्दोषाशेषगुणवत्त्ववेदनमेव तत्प्रीतिद्वारा दुःखरहितसुखावाप्तिसाधनम् । एतदेव श्रुतिस्मृतिवाक्यैः समर्थयति **यो मामशेषदोषोज्झमित्यादिना** ।

१०८८ 'यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारते'त्येतद्भगवद्वाक्यम् । 'खलेन पुरुषान् प्रतिहन्मि भूरि किं मां निन्दन्ति शत्रवोऽनिन्द्रा' इति श्रुतेरयमर्थः । इन्द्रं परमेश्वरं मामनिन्द्रा अनीश्वराः सन्तः **शत्रव** आसुरप्रकृतयः किं निन्दन्ति । दोषाभावेन मम निन्दितुमशक्यत्वात् । निर्निमित्तं निन्दतस्तान्बहुतरानपि खल इव परुषान्धान्यानि प्रतिहन्मि चूर्णयामि ।

१०८९ परमेश्वरो स्वगुणोत्कर्षज्ञानेनैव प्रीयते न निन्दयेत्युक्तं भवति । परमेश्वरस्य गुणोत्कर्षज्ञानमेव तत्प्रीतिद्वारा मुक्तिसाधनमित्येतल्लोकानुसारादपि सिद्ध्यति । लोके राजगुणोत्कर्षज्ञानस्य राजप्रीतिद्वारा शृङ्खलादिबन्धनिवृत्तिसाधनत्वदर्शनादित्याह **लोकत इति** ।

१०८९ अतो विष्णौ दोषित्वं निर्गुणत्वादिकं न वेदेन प्रतिपाद्यते । तस्य परमप्रयोजनवदर्थवत्त्वविरोधात् । निर्दोषतया महागुणवत्तया च पुरुषोत्तमत्वमेव स्वस्य वेदार्थ इति स्वयं विष्णुरेव सतात्पर्यमुक्तवान् । 'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः । इति गुह्यतमं शास्त्रमि'ति । तदाह **महातात्पर्येति** ।

१०९२ अतः सुषुप्त्यादिस्थानभेदेन मनुष्यपश्वादिशरीरभेदेन जीवात्मनीव परमात्मनि हीनोत्तमादिभावानुमानमखिलशास्त्रविरुद्धत्वेन अप्रमाणमेवेति स्वगततारतम्यरहितानन्तरूपो विष्णुः सिद्ध इत्युपसंहरति **अत इति** ॥ ८ ॥

॥ इति नस्थानतोऽप्यधिकरणम् ॥ ८ ॥

॥ अरूपाधिकरणम् ॥

१०९३ अधुनेशेनेशरूपाणां चिद्रूपाणामिव जीवस्याप्यभेदः किं न स्याच्चेतनत्वादित्याशङ्क्य श्रुतिभिराभासत्वोक्तेर्न तस्येशेनाभेद इत्याह **न चेति**।

१०९४ ताः श्रुतीरुदाहरति **यथेति**। यथैषेत्यस्य विवरणं छाया यथेत्यादि। अनेन प्रतिबिम्बस्य बिम्बाधीनत्वप्रतिपादनेन जीवपरमात्मनोर्बिम्बप्रतिबिम्बभावेऽप्यभेदः किं न स्यादित्येतच्चोद्यं परिहृतं भवति। विशेषकौ गरुडशेषावित्यर्थः।

११०० उक्तार्थमनूद्याक्षिपति **आभासत्वमिति**। अयमर्थः। कृष्णादिवदीशस्यांश एव जीवो नाभासः। आभासत्वे देहाद्युपाध्यायत्तस्य देहाद्युपाधिनाशे नाशः स्यात्। पुरुषाद्याभासस्य दर्पणाद्युपाधिगतस्य दर्पणाद्यपगमेऽपगमदर्शनात्। अतो जीवानां नित्यत्वेनाभासत्वायोगात् कृष्णादिवदंशभूतानां चिद्रूपत्वेनेशाभेद एव स्यात्। निखिलचेतनसमुदायेऽपीशाख्या यथा कृष्णादिरूपसमुदाये सिद्धान्त्यभ्युपगता समुदायान्तरेण भेदेऽपि समुदायाकारेणाभेदो नानुपपन्नः।

११०५ अत एव 'पृथगुपदेशादि'त्यत्र यत्पृथक्त्वमुदितं तच्चिद्रूपस्येशस्यांशयोः कृष्णादिलक्षणजीवलक्षणयोर्भवेत्। तच्च जीवानां देहेन्द्रियोपाधिकृतं न सहजम्। अतस्तदुपाधिनाशे तेषामीशरूपैः कृष्णादिभिः साम्यमेव स्यात्। तदेतत्परिहरति **इत्याशङ्केति**। 'अत एव चोपमा सूर्यकादिवदि'ति सूत्रकृता प्रतिबिम्बितसूर्यकादिलक्षणत्वेन जीवस्योक्तत्वादीशाभासत्वेऽपि न तस्यानित्यत्वमित्यर्थः।

११०६ ननु नित्यानां जीवानामीशाभासत्वं किं निमित्तम्। किञ्च तेषां सूर्याभासादिवैलक्षण्यमित्यत आह **यदुक्तमिति**। यथा सूर्याभासस्य स्वबिम्बाधीनत्वं स्वबिम्बसादृश्यमेवमीशाभासस्य जीवस्य न तु तद्वदुपाध्यधीनत्वम्। न हि दृष्टान्तदार्ष्टान्तिकयोः सर्वसाम्यम्। कुत्रचिदीशादाभासते ईशवदवभासते ईशादासमन्ताद्भवत्यस्तित्वं च तत इति हीशाभासो जीवः सर्वदा। तस्मादुपाधिनोत्पन्नस्यापि जीवस्याभासत्वं हेत्वाभासवत्तद्वदेव कल्पितत्वं च युज्यते। अतो यदेतत्पूर्वं प्रतिपादितं स्वबिम्बाधीनत्वं स्वबिम्बेन किञ्चित्सादृश्यं च जीवस्य तद्द्वयमेवकारचकाराभ्यामुपादाय अत एव सूर्यकाद्युपमा श्रुतिस्मृतिषु क्रियते न तूपाध्यधीनत्वेनेति सूत्रोक्तं भवतीत्याह **तदधीनत्वमिति**।

११११ ननूपाध्यधीनाभासत्वाभावे जीवस्य मत्स्याद्यवतारवदीशाभेदः किं नेष्यते। चिद्रूपत्वाविशेषादित्यत आह **जीवेशेति**। न हि दुःखादिदोषवता जीवेनाशेषदोषरहितस्येशस्याभेदो युज्यते। अशेषदोषराहित्यं च तस्य स्वातन्त्र्यादिसर्वशक्तिमत्त्वेन सिद्ध्यति। न हि स्वतन्त्रे दोषो भवितुं शक्नोति। एतदेव हि समर्थितं 'सर्वोपेता च

तद्दर्शनादि'ति सूत्रेण लौकिकदृष्टान्तेन जगत्कर्तरि प्राप्तश्रमचिन्तादिदोषपरिहारपरेण । अपि च ऐक्ये जीवेशयोः स्वस्वानुभववदीश्वरोऽहमिति जीवस्य जीवोऽहमितीशस्यानुसन्धानं स्यात् । अननुसन्धाने तु तयोरैक्यं न स्याद्धटेनेव जीवस्य । न हि कुत्रचिदेकस्य चेतनस्य स्वस्मिन्ननुभवाननुभवावेकविषयौ दृश्येते । स्वस्मिन्नप्यतीतजन्मस्थे अधुनाऽननुसन्धानं तु कालव्यवधानाद्युज्यते । अतः स्वपादादिगतसुखाद्यनुसन्धानवदीशादिचेतनानाम् अन्योन्य-सुखदुःखाद्यनुसन्धानाभावात् वृक्षाणामिव समुदायाकारेणैक्यमन्तरेण नान्यदैक्यं भवेत् । अपि च ईशस्य दुःखि-भिर्जीवैरैक्यानुसन्धानायोगात् तेन सर्वज्ञेनाननुसन्धीयमानमैक्यमविद्यमानमिति न मुक्तावप्यनुसन्धातुं शक्यते । विद्यमानैक्याननुसन्धानत्व ईशस्याप्यज्ञत्वप्रसङ्गः । अतो जीवमोक्षात्प्रागनुसन्धीयमानत्वेनाविद्यमानं तदैक्यं पश्चादपि न शक्यतेऽनुसन्धातुमीशेन । तस्य मिथ्याज्ञानित्वप्रसङ्गात् । न चेदानीमसदेव जीवेशैक्यं कालान्तरोत्पन्नं अनु-सन्धीयत इति वाच्यम् । कुत्रापि सप्तमरसस्योत्पत्तिवच्चेतनस्य चेतनेन पूर्वाविद्यमानैक्योत्पत्त्यदृष्टेः । अतो मत्स्या-द्यवतारवदीशाभिन्नांशत्वं जीवानां दूरोत्सारितमेवेत्याह **समुदायेति** । अतो यावदेव विष्ण्वंशांशरूपादिकं निर्दोषं गुणबृंहितं विष्णुना स्वाभिन्नत्वेनानुभूयमानं तावदेवेश्वरत्वम् । तत्र स्वगतभेदो नास्त्येव । 'इन्द्रो मायाभिः पुरुरूप ईयते । युक्ता ह्यस्य हरयः शतादश' इति 'अयं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च । तदेत-द्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा । यश्चायमग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं वाङ्मयःपुरुषोऽयमेव सोऽयमात्मेतीदममृतमिदं ब्रह्मेति । नेह नानास्ति किञ्चने'त्यादिश्रुतेः ।

११२० ननु जीवस्येशांशत्वेऽपि तदभेदाननुसन्धानमिन्द्राद्यंशभूतार्जुनादीनां इन्द्राद्यभेदाननुसन्धानवद्युज्यत इत्या-शङ्क्य दृष्टान्तेऽप्यननुसन्धानमदृष्टमित्याह **जीवांशा इति** । इन्द्रादीनामंशेन भूमाववतारितानां मध्येऽत्यल्पेना-प्यंशिना अंशगतसुखदुःखाद्यनुसन्धानं आत्मीयत्वेन अनुसन्धीयते । अंशेन तु अंशिगतसुखदुःखादिकं किञ्चिदेवा-नुभूयते । ज्ञानशक्त्यादेरंशिन्यतिशयोंऽशे न्यूनतेति विशेष ईशेन घटितो भवेत् । ईशस्याचिन्त्यशक्तित्वादभेदे-ऽप्यंशांशिनोः परस्परविशेषघटकत्वं युज्यते ।

११२३ न चैवं सत्यचिन्त्यशक्त्यैवेश्वरः स्वाभिन्नत्वेऽपि जीवस्य पारतन्त्र्यादिविशेषान् घटयत्विति वाच्यम् । अस्वतन्त्रेणाभिन्नस्य अचिन्त्यशक्तित्वासम्भवेन अघटितघटकत्वानुपपत्तेरित्याह **सेशतेति** ।

११२८ सर्वप्रमाणविरुद्धं चेशानीशयोरैक्यं न केनापि बोधयितुं शक्यते । श्रुतिरपि किमीश्वरं प्रमाणसिद्धमधि-कृत्यानीशभावं बोधयत्युतानीशजीवं प्रमाणसिद्धमधिकृत्येश्वरभावम् । उभयथाऽप्युपजीव्यप्रमाणविरुद्धत्वान्न तत्र प्रमाणम् । एवमयमुपजीव्यप्रमाणविरुद्धोऽप्यभेद ईश्वरस्य शक्त्या घटित इति न वक्तव्यम् । अनीशेनाभिन्नस्येश-त्वासिद्धेरुक्तत्वात् । अतोऽनीशाद्भेदेनेशो सिद्ध एतच्छक्त्याऽन्यदघटितमपि घटितमिति वक्तुं शक्यते । न तु पुन-रेकस्मिन्जीवेंऽशांशभाववति शक्त्यादितारतम्यमिवेश्वरः स्वस्मिन्नपि तच्छ्रुतितात्पर्यविचारशून्यप्रतीतिप्राप्तमीशत्व-परिपन्थिनं घटयतीति । ईशस्यानीशभावविरोधात् । ब्रह्मतर्के चायं विरोध इत्युक्त इत्याह **ईशोऽनीश इति** ।

११३० यथा जगन्मिथ्येत्येतस्य मिथ्यात्वे जगतो मिथ्यात्वं व्याहतं यथा च भेदो नेति भेदतन्निषेधयोर्भेदेन भेदनिषेधो व्याहतः । एवमीशस्यानीशभावो व्याहत इत्यर्थः । न चेशत्वानीशत्वादिवदणिममहिमादेरपि एकस्मिन्विरुद्धत्वेन अनीश्वरत्वमीशत्वाविरोधित्वात् । तदेतच्च ब्रह्मतर्केण समर्थयति **नायुक्तमिति** ।

११३३ नन्वत्र विष्णोः प्रभावनिरूपणफलत्वेन या भक्तिरभिप्रेता न सा बहुमानपूर्वकप्रेमलक्षणा तस्मिन्नाकाशवन्मूर्तत्वेन सौन्दर्यादिगुणरहिते सम्भवति । 'अमूर्तश्चासौ दिव्यो ह्यमूर्तः पुरुष' इति श्रुतेः । मूर्तत्वे विष्णोर्घटवदनित्यत्वं स्यादित्यत आह **स चेति** । 'यदा पश्यः पश्यते रुग्मवर्णम्', 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते', 'हिरण्मयश्मश्रुर्हिरण्मयकेश आप्रणखात्सर्व एव सुवर्णः', 'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्', 'तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाती'त्यादिश्रुतिभिः आानन्दादिगुणात्मकसुन्दरतररूपत्वेनोक्तत्वान्नामूर्तो विष्णुः । प्राकृतमूर्तिशून्यत्वादमूर्त इति श्रुत्योच्यते । अत एव न तस्यानित्यत्वम् । मूर्तत्वेऽपि प्राकृतरूपवत्त्वं ह्यनित्यत्वेन व्याप्तं घटादौ । अजरोऽमरोऽच्छेद्योऽयमिति स्मृतिभिश्च विष्णो रूपेषु नित्यत्वमवगम्यते जरामरणनिषेधात् । न ह्यरूपे जरादिप्रसक्तिरस्ति । अत एव ब्रह्मणि रूपत्वारूपत्ववचनयोर्व्यवस्थितविषयत्वान्न विरोधः शङ्कनीयः ।

११३४ लोके रूपशब्दस्य प्राकृतरूपेष्वेव प्रसिद्धस्याप्राकृतरूपे भगवति प्रयोगं सदृष्टान्तमुपपादयति **यथेति** । 'अस्तमित आदित्ये याज्ञवल्क्यश्चन्द्रमस्यस्तमिति शान्तेऽग्नौ शान्तायां वाचि किं ज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवती'त्यस्यां श्रुतौ यथा सूर्यादिर्बाह्यद्योतकस्याभावदशायां सुप्तावस्य जीवस्य स्वरूपसुखादिद्योतके भगवत्यप्राकृतप्रकाशे ज्योतिःशब्दः प्रयुक्तः प्राकृतप्रकाशैकविषयतया लोकप्रसिद्धोऽप्येवं रूपशब्दः इत्यर्थः । अनेन 'अरूपवदेव हि तत् प्रधानत्वात् प्रकाशवच्चावैय्यर्थ्यमि'त्यादिसूत्रं स्पष्टीकृतं भवति ॥ ९ ॥

* * *

॥ अम्बुवदधिकरणम् ॥

११३५ अत्र भगवतः प्रभावनिरूपणफलत्वेन वा भक्तिरभिप्रेयते तद्विषयस्य विष्णोः न्यूनातिरेकभावाभावेऽपि सा न्यूनातिरेकभाववत्त्येव । न हि ब्रह्मादिमनुष्योत्तमपर्यन्तानामेकविधैव भक्तिः । अत एव तेषां श्रुत्युक्तमानन्दतारतम्यं सिद्ध्यतीत्याह **भक्तीति** ॥ १२ ॥

॥ इति वृद्धिह्रासाधिकरणम् ॥ १२ ॥

* * *

॥ स्थानविशेषाधिकरणम् ॥

११३६ ब्रह्मादिगतानन्दस्य नारायणानन्दप्रतिबिम्बभूतस्य बिम्बभूतानन्दवैचित्र्याभावेऽपि आश्रयगुणवैचित्र्यमुपपन्नमित्याह **प्रतिबिम्बवदिति** । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुत्या भगवदानन्दलेशाभासत्वमेव ब्रह्माद्यानन्दस्योच्यते । न त्वसौ भगवदानन्दस्य साक्षाल्लेशतया तेनाभिन्न इति । 'अन्यानन्दः परस्ये'त्यादिश्रुतिविरोधात् । अनेन 'वृद्धिह्रासभाक्त्वमि'त्यादिसूत्रं स्पष्टीकृतं भवति ॥ १७ ॥

११३९ अधुना भगवद्वृत्त्युद्रेकाय जगत्स्थितिरपि तदधीनेत्येतदाक्षिप्य समर्थयति **सृष्टीति** । नन्वस्तु जगतः सृष्टिनाशयोरेव हर्यधीनत्वं पूर्वमेव प्रपञ्चितत्वात् । सृष्टवस्तुस्थितेरुपसंहारपर्यन्तं स्वभावत एव सिद्धत्वेन हर्यनधीनत्वमिति चेन्मैवम् । 'द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्ती'ति सर्वस्वभावस्यापि हर्यधीनत्वश्रवणात् । अस्मिन्नर्थे श्रुतिश्च । 'नैतावदेना परोऽन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ती'ति । 'एना अनेन विश्वकर्मणा परमेश्वरेणैतावदस्त्येषे'त्यादिना पूर्वप्रस्तुतसृष्टिसंहाराख्यमेव कार्यं भवतीति न किं तर्हि स उक्षा पुरुषर्षभो द्यावापृथिवी बिभर्ति धत्ते पुष्णाति चेत्येतदन्यदपि परतः परेशात्साध्यमस्तीत्यर्थः । अनेन 'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय' इति सूत्रं स्पष्टीकृतं भवति ॥ १३ ॥

११४० ननु यदुक्तं भक्तितारतम्यस्य मुक्तावानन्दतारतम्यं साध्यमिति तन्न । 'यदा पश्यः पश्यते रुग्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती'ति दर्शनसाध्यत्वस्य श्रवणात् । न च दर्शनसहितभक्तितारतम्यस्य हरिविषयस्य मुक्त्यानन्दतारतम्यं साध्यमिति वाच्यम् । 'यदेकमव्यक्तमनन्तरूपः । न चक्षुषा पश्यति कश्चिदेनमि'ति हरेरदृश्यत्वश्रवणादित्यत आह **अव्यक्त इति** ।

११४० अभक्तानामेवादृश्यत्वात् अव्यक्त इत्युच्यते हरिः । साधनान्तरस्य तद्व्यक्तीकरणसामर्थ्याभावेऽपि स्वशक्त्यैव भक्तैर्दृश्योऽसौ । तथा च तस्यैव वाक्यम् । 'भक्त्या त्वनन्यया शक्योऽहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपे'ति । अनेन 'तदव्यक्तमाह हि', 'प्रकाशश्च कर्मण्यभ्यासात्' इत्यादि सूत्रं स्पष्टीकृतं भवति ॥ १४ ॥

११४१ नन्वनन्तगुणवान् हरिरिति तद्वृत्त्यर्थमत्र यत्प्रतिपादनं तन्न युक्तम् । गुणानां हरेश्च परस्परभेदानभ्युपगमेन गुणगुण्यादिभावानुपपत्तेरित्याशङ्क्य विशेषबलादुपपन्नो गुणगुण्यादिभाव इत्याह **तदभिन्ना इति** ।

११४२ नन्वस्यानन्दादिभिरकादाचित्कैरभेदो हरेरविरोधाज्जगत्स्रष्टृत्वादिधर्मैः सर्जनादिकर्मभिश्च कादाचित्कैस्तु नाभेदो युज्यते । अनित्यधर्माभिन्नस्य हरेरप्यनित्यत्वापत्तेरित्यत आह **विशेषात्मतयेति** । सर्जनशक्तिरूपेण भगवति नित्यं सतामेव सर्जनादिक्रियादीनां पुनः पुनरपि व्यज्यमानत्वान्नानित्यत्वम् । न च अभिव्यक्तरूपस्यानित्यत्व-

माशङ्कनीयम् । नित्यशक्तिरूपाभिन्नत्वात् तस्य । शक्तिरूपं व्यक्तिरूपमिति पृथग्व्यवहारस्तु विशेषनिबन्धनः । विशेषतद्वतोरभेदेऽपि विशेषविशेषिभावः स्वनिर्वाहकत्वात्सिद्ध्यति । अभिन्नेऽपि वस्तुन्ययमेव विशेष्यांशोऽयमेव विशेषणांश इत्येव प्रमाणैर्ज्ञायमानत्वाद्व्यवस्था सिद्ध्यति । न च भेदहीने परमात्मनि विशेषो नास्तीति वाच्यम् । 'स इमान् लोकानसृजते'त्यादिश्रुत्या तत्स्रष्टृत्वादिविशेषप्रतीतेः । सोऽसृजतेति सामानाधिकरण्यात् स इति शब्द-निर्दिष्टस्य परमात्मनः स्रष्टृरूपेणाभेदप्रतीतेश्च । यस्त्वत्र सविशेषाभेदमसहमानो धर्मधर्मिणोर्भेदं वदति स प्रष्टव्यः । किमस्यापि भेदस्य धर्मधर्मिभ्यां भेद उताभेदो निर्विशेषाभेदो वा । नाद्यः । भेदस्य भेदे तस्यापि भेद इत्यनवस्थानात् । न द्वितीयः । भेदवद्धर्मस्यापि धर्म्यभेदापत्तेः । तद्भेदस्याङ्गीकर्तुमशक्यत्वात् । न तृतीयः । धर्मधर्मिभ्यां भेदस्य निर्विशेषाभेदे तयोरयं भेद इति व्यवहारस्याभावप्रसङ्गात् । तस्य विशेषनिबन्धनत्वात् । विशेषाभावे घटस्य भेद इति घटस्य घट इत्युक्तं भवति । तत्र तत्प्रतियोगिकतयैकस्य वस्तुभेदस्य बहुधा व्यवह्रियमाणत्वाच्च न निर्विशेषत्वं युज्यते । किन्तु योऽयं भेदस्य भेदो धर्मिणा तस्य ततो भेदः तस्यापि भेद इत्यनवस्थापत्तेरभेद इति वक्तव्यम् । ततश्च तयोर्भेदाभेदयोरेकवस्तुस्वरूपत्वेन परस्परमप्यभिन्नयोर्विशेषाभावे भेदाभेदशब्दयोः पर्यायत्वं स्यात् । न हि तयोः पर्यायत्वं केनचिदप्यभ्युपगतम् ।

१११५० ननु न विशेषो भेदाभेदयोः किन्तु भेद एव अभेदस्तु तयोर्धर्मिणा सह इत्याशङ्क्य परिहरति **भेदो-ऽन्योन्यमिति** ।

११५० एवमपि भेदाभेदयोर्विशेषत्वं भवेदेव । तयोर्धर्मिणा निर्विशेषाभेदे धर्मितावन्मात्रत्वं स्यात् तदा कथमभेदो भेदिना भिन्नो भेदो भेदिना भिन्नस्तयोर्भेदाभेदयोश्च परस्परं भेद इत्ययमर्थः सिद्ध्येत् । किन्तु धर्मिशब्द एव बहुश उच्चारितो भवेत् । यद्येतद्दोषपरिजिहीर्षया भेदाभेदयोर्धर्मिणा भेदेऽपि न धर्मितावन्मात्रत्वं किन्त्वस्ति विशेष इत्यु-च्यते । तर्ह्यभेदभेदयोरपि विशेष एव स्यात् । किं भेदेन । विशेषबलादेव व्यवहारसिद्धौ पदार्थबहुत्वकल्पनाया अन्याय्यत्वात् । न च कल्पनागौरवापत्तेर्गोतुरगादेरपि धर्मधर्मिवत्सविशेषाभेद एवास्त्विति वाच्यम् । तेषामैक्य-प्रतीत्यभावात् । न हि गौरेवाश्व इति प्रतीतिरस्ति । धर्मधर्मिणोस्तु भेदाप्रतीतेः सविशेषाभेदो युक्तः । 'आनन्दो ब्रह्मे'त्यादिप्रमाणाच्च ।

११५५ न केवलं सच्चिदानन्दादेर्ब्रह्मणस्तु धर्मधर्मिभावमङ्गीकुर्वता तदन्यथाऽनुपपत्त्या स्वीकार्यो विशेषः । किन्तु तम् अनङ्गीकुर्वता वैदिकाभासेनापि स्वीकार्य इत्याह **सच्चिदिति** । 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यत्र अखण्डार्थं प्रतिपादयता मायावादिनाऽपि सत्यादिपदानामपर्यायत्वसिद्ध्यर्थं ब्रह्मणि विशेषोऽवश्यमभ्युपगन्तव्यः । अन्यथा सत्यपदेनैव गतार्थस्य ज्ञानादिपदस्य वैयर्थ्यप्रसङ्गादित्यर्थः ।

११५५ अथ सत्यत्वादिविशेषाभावेऽपि ब्रह्मण्यसत्यं न भवतीति सत्यम् । अज्ञानं न भवतीति ज्ञानमिति माया-कल्पितासत्यादिपदार्थव्यावृत्त्यर्थत्वान्न सत्यादिपदानां वैयर्थ्यमिति मन्यसे तर्हि ब्रह्मणो सत्यादिपदार्थव्यावृत्ति-

विशेषणविशेषित्वं दुर्वारं स्यात् । यद्यसत्यादिव्यावृत्तिविशिष्टत्वस्यापि मायामयत्वात् तद्व्यावृत्तिवैशिष्ट्यं ब्रह्मण्युच्यते तर्ह्येतद्वैशिष्ट्यस्यापि तथाविधत्वात् तद्व्यावृत्तिवैशिष्ट्यं ब्रह्मणीत्येवमनवस्था स्यात् । सर्वविशेषरहिते ब्रह्मणि शब्देन वाच्यत्वप्रसङ्गात् । लक्ष्यत्वविशेषेण निर्विशेषत्वभङ्गाच्च । असत्यपदव्यावृत्तपदस्यापि लक्ष्यकत्वे तेन किं लक्ष्यमित्युक्ते ब्रह्मेति वक्तव्यम् । ब्रह्मपदस्याप्यवाचकत्वात् तेनापि किं लक्ष्यमित्युक्ते अन्यत्पदं वक्तव्यम् । तेनाप्येवमित्यनवस्थाप्रसङ्गः ।

११५९ ननु यदापादितमसत्यं न भवतीत्युक्ते असत्यव्यावृत्तिवैशिष्ट्यमायातं ब्रह्मण इति । तदिष्टमेव । अतद्व्यावृत्तिधर्मकत्वेन अङ्गीकारादित्याशङ्क्याह **यद्यभावेति** । अयमर्थः । सत्यादिपदवत्सर्वज्ञादिपदमपि ब्रह्मणि श्रूयत एव । अत्र असत्यं न भवतीति सत्यमित्युक्ते असत्यव्यावृत्तिं वदताऽसर्वज्ञं न भवतीति सर्वज्ञमित्यसर्वज्ञताव्यावृत्तिरपि ब्रह्मण्यङ्गीकार्यैव । अविशेषात् । ततश्च सर्वज्ञत्वं तस्मिन् सिद्ध्येत् । नञ्द्वयोः भावार्थत्वात् । यदि असर्वज्ञत्वनिषेधेऽपि सर्वज्ञत्वसिद्ध्या ब्रह्मणो सर्वज्ञत्वं न व्यावर्त्यते तर्हि अनानन्दनिषेधेऽप्यानन्दो न व्यावर्तते । तथा सत्यज्ञानादिनिषेधेऽपि असत्त्वाज्ञानत्वादिकं च न व्यावर्त्येत । अविशेषात् । तथा सत्यसुखासत्त्वासत्यत्वाज्ञानत्वादिकं ब्रह्मणः स्यात् ।

११६३ यदि सत्यादिपदैरसत्यादिविरोधत्वेनोक्तत्वात् न असत्यादिकं ब्रह्मणः तर्हि ईश्वरपदेनानीश्वरविरोधत्वेनोक्तत्वात् न अनैश्वर्यं तस्य स्यात् । तदा चैश्वर्यं दुर्निवारमित्युक्तमेव । अत एव निर्विशेषत्वखण्डनेन गत्यन्तराभावादखण्डवादिना अनिच्छताऽपि ब्रह्मणि विशेषः स्वीकार्यः । तथा गुणगुणिनोरभेदवादिना भेदाभेदवादिना च सबहुमानं स्वीकार्यः । तेन विनाऽनिर्वाहादित्याह **अखण्डेति** ।

११६४ अतो विशेषबलादेव गुणानां ब्रह्मणश्चात्यन्ताभेदेऽपि गुणगुणिभावं 'उभयव्यपदेशात्त्वहिकुण्डलवत्', 'प्रकाशाश्रयवद्वा तेजस्त्वात्', 'पूर्ववद्वे'ति सूत्रत्रयेण निदर्शनत्रयं प्रदर्श्य भगवान् सूत्रकारः प्रतिपादितवानित्याह **निदर्शनेति** ।

११६५ ननु ब्रह्मपदाभिहितस्य पदान्तरपर्यालोचनया गुणान्वयो भवेत् । न तु ब्रह्मपदेनैव गुणान्वितमभिधीयते । ब्रह्मपदाभिधेयज्ञानमेव मुक्तिसाधनमुक्तं 'ब्रह्मविदाप्नोति परमि'ति । न तु ब्रह्मगुणज्ञानं मुक्त्यनुपयोगित्वादेव । न ब्रह्मणो गुणत्वं श्रुतितात्पर्यतः सिद्ध्यतीत्याशङ्क्य प्रतिषेधति **तच्चेति** ।

११६५ सामान्यतः सर्वगुणानामपि ब्रह्मपदेनैवोक्तेः न तेन गुणानन्वितं ब्रह्मोच्यते । तथा हि । ब्रह्म किमित्याकाङ्क्षायां सत्यं ज्ञानमित्यादिविशेष उच्यते । तस्य च ब्रह्मपदेन सामान्यतोऽप्रतिपत्तौ किमित्याकाङ्क्षैव न स्यात् । धर्मिवाचकेन ब्रह्मपदेन सामान्यत उक्तानां सत्यज्ञानादिधर्माणां विशेषतोऽवगत्यर्थं हि सत्यज्ञानादिपदं प्रयुज्यते । धर्मिवाचकपदं धर्मानपि सामान्यतो विधातुं शक्नोत्येव । धर्म्यभिन्नत्वात् तेषाम् । अतः प्रथमोच्चारितपदं सामान्यतोऽर्थान्तरैरन्वितं स्वार्थमभिदधाति । प्रथमनिर्दिष्टानामर्थान्तराणां विशेषतोऽभिधायकानि पदान्तराणीत्यन्विता-

भिधानमेव युक्तम् । यतः केनचिदर्थेनान्वित एव स्वार्थे शब्दोऽव्युत्पन्नः अतः तथाविधमेव प्रतिपादयति । अनेन एतदन्वितमिति पदान्तरवशात् ज्ञायते ।

११७१ अन्विताभिधानानभ्युपगमे दूषणमाह **यदीति** ।

११८१ अतः अन्विताभिधानसामर्थ्यादिव वेदैः आनन्दाद्यखिलगुणात्मक एव विष्णुरुच्यत इत्याह **अत इति** । प्रकृते किमायातमित्यतः सर्वात्मना विष्णुरेवोच्यत इत्याह **अत इति** ।

११८२ न च आनन्दत्वाज्ज्ञानत्वादित्यादिहेतुना भगवदानन्दादीनां लोकगतानन्दादिवदपूर्वत्वादिकमाशङ्क्यम् । 'एष ह्येव परम आनन्द' इत्यादिश्रुतिविरोधात् । अलौकिकेष्वपि भगवदानन्दादिगुणेषु लौकिकानन्दादिसादृश्यादनुकूलत्वादेव आनन्दादिशब्दप्रवृत्तिर्मृन्मयघटसादृश्यात्सौवर्णघटे घटशब्दस्येव युज्यते । तदेतदाह **ते चेति** । अनेन 'परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः', 'बुद्ध्यर्थः पादवत्' इति सूत्रद्वयतात्पर्यं विवृतं भवति ॥ १६ ॥

११८६ ननु विष्णावतिशयितभक्तिसिद्ध्यर्थं यदत्र सर्वगुणाढ्यत्वं प्रतिपाद्यते तत्र युज्यते । कर्मण एव स्वर्गादिफलदत्वेन विष्णोः फलदातृत्वगुणाभावादित्यत आह **स एवेति** । 'पुण्येन पुण्यं लोकं नयती'त्यादिश्रुतेः विष्णुरेवानन्तजीवानां तत्तत्कर्मानुसारेण फलदाता । कर्मणस्तु अचेतनत्वात् न फलदातृत्वं युज्यते । न हि सेवैव फलं ददाति । राजादिर्हि सेवानुसारेण फलदाता दृष्टः । कृष्यादिकर्मापीशत एव फलति न स्वतः । स्वतः फलति चेत् कदाचिद्विफलं न स्यात् ।

११९४ पादार्थमुपसंहरति **तस्मादिति** ॥ २० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमद्ब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां तृतीयाध्यायस्य द्वितीयः पादः ॥ ३२ ॥

* * *

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादविरचित-श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका

श्रीत्रैविक्रमार्यकृता

नयचन्द्रिका

द्वितीयाध्यायस्य द्वितीयः पादः

*५४७ वृत्ताश्रवणपूर्वकमन्दाशङ्कां सहेतुकमुद्भाव्य पादसङ्गतिं दर्शयति **स्मृतीति**।

५४८ **अभियोगतः** अभ्यासतः।

५५१ कथं प्रमाणाबाह्यत्वे सत्यपि कस्यापि समयस्योच्छेदो न भवतीत्याशङ्कायामाह **दौर्लभ्यादिति**।

५५४ एवं प्रबलैः समयैर्लोके स्थिरमन्यथाज्ञानं दुष्परिहरमित्यत आह **तथाऽपीति**।

५५५ **बुद्धिशाणत्वं** बुद्धिनिशातत्वं बुद्धेर्नैशत्यमित्यर्थः।

५५६ तत्र निरीश्वरसाङ्ख्यमतमनुवदति **चेतनेति**।

५५८ पञ्चपञ्चविभागस्थं पञ्चकृत्वः पञ्चत्वेन विभागे स्थितमिन्द्रियमनोबुद्धिशब्दादिमहदादिविकृतस्येयं प्रकृतिश्चेति निरीश्वरसाङ्ख्येष्वेव भेदमाह **भोक्तृतामिति**।

५५९ स्वरूपचैतन्यबलात् स्वरूपचैतन्याख्यसामर्थ्यात् स्वयंप्रकाशात् भोगितामाहुः भोगवादिन इति शेषः। आनुभविकस्य सुखदुःखभोगस्य का गतिरभोगवादिनामित्यत आह **प्रकृतेरिति**।

५६० प्रकृतेरन्तःकरणरूपायाः सुखादिधर्मिण्याश्च स्वरूपस्य च भेदाग्रहं सुख्यहमित्यादि**भोगव्यवहारहेतुमाहुः**।

५६१ स एव भेदाग्रह एव मुक्तिरित्येतन्निराकरोति **ईशस्येति**।

---

* प्रतिपरिच्छेदं प्रारम्भे सूचिताः सङ्ख्याः अनुव्याख्यानश्लोकसङ्ख्याः इति ज्ञातव्यम्।

५६१ युक्तिविरुद्धत्वं दर्शयति **चेतनेति** । **यदा** यदि । अत्रायं प्रयोगः । विमत उद्भवश्चेतनाधीनो वस्तुत्वात् पटोद्भववदिति ।

५६२ 'पद्भ्यां भूमिर्दिशः श्रोत्रांस्तथा लोकानकल्पयन्नि'त्यादिश्रुतिरेव **प्रमा हि नः** किमन्यान्वेषणेन ।

५६३ 'प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमम्' इत्यादिस्मृतिश्चाप्तेन कपिलेनोक्तत्वादिदं सर्वं सिद्ध्यतीत्यत आह **आप्तत्वमिति** ।

५६४ 'विमतो धर्मदृङ् न स्यादि'त्यादिपूर्वोक्तमार्गेणापि च ज्ञानानां प्रामाण्यवदेवाप्रामाण्यस्यापि हि स्वतो भावं स्वीकरोति हि साङ्ख्यो न तु परतो दोषात् । अनेन न्यायेन स्वोक्तार्थस्याखिलस्यापि निषेधी स्यात् ।

५६५ यथा मायी सद्विलक्षणमेवासद्विलक्षणमित्यादि वदन् **मूलकारणानुमा** जगत्कारणानुमा केन भवेत् । एतदनुमानपराहतत्वात् ।

५६५ 'रचनानुपपत्तेश्च नानुमानमि'ति सूत्रं विवृणोत्येतदेवोपपादयन् ॥ **स्वतन्त्रेति** । आत्मप्रमाहतमात्मवचन-विरुद्धं स्वव्याहतमित्यर्थः ।

५६६ तदेवोपपादयति **स्वेच्छेति** ।

५६८ **यदीत्यादेरयमर्थः** । यद्यात्मनो चेतनेच्छावता मनसा भेदस्याग्रहत्वादहमिच्छामीति व्यवहारो हेतुः तर्हि स भेदाग्रहः कथमात्मनो घटस्य न स्यात् ।

५६८ मम घट इतिवद्भेदेनैव गृहीतत्वं मनसोऽपि सममित्याह **मनसेति** । ननु 'मनः कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे'ति श्रुतेः कामादीनां मनोधर्मिकत्वात् कथमिच्छा आत्मधर्म इत्यत आह **उभयेति** ।

५७० परिणामे प्रियकाम आत्मनः परिणामेऽप्रियकामो मनस इति **द्वैविध्यम्** । **तस्मात्** आत्मन इच्छावत्त्वात् **कुतः** तत्र भेदाग्रहो व्यवहारहेतुरङ्गीक्रियते । उक्तार्थं निगमयति **रचनेति** ।

५७१ प्रधानं स्वतन्त्रं प्रवर्तते अचेतनत्वात् पयोम्ब्वादिवदिति सर्वज्ञत्वेनाभिमतकपिलानुमां 'पयोम्बुवच्चेत्तत्रापी'ति योजयंस्तद्दृष्टान्तस्य साध्यविकलत्वमुद्भावयति **पय इति** । 'एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते । एतेन ह वाव पयो मण्डं भवती'त्यादावेतत्प्रशस्तिवचनात् ।

५७२ ननु मनसोऽपीच्छावत्त्वाङ्गीकारात् किमिति तद्रूपस्य प्रधानस्य कर्तृत्वं न स्यादित्यत आह **द्वैविध्ये-ऽपीति** ।

५७३ **इच्छावत्त्वं** नाम इच्छास्वामित्वमेव विवक्षितं न त्विच्छारूपेण परिणामित्वं तावन्मात्रं हि मनसः । ननु परिणामे स्वप्रियकारीदमिति जानतोऽपि पुरुषस्य स्ववशत्वात् तत्रेच्छा जायते । अतः कथं तस्या इच्छायाः स्वामित्वमित्यत आह **किञ्चिदिति** । अस्ति हि लोके ग्रामादीनां किञ्चित्स्ववशत्वेन स्वामित्वव्यवहारः ।

५७४ सर्वात्मना स्वतन्त्रेच्छाशक्त्यादेः **परेशितुः** किमुतैव **स्वामित्वं** वर्णनीयम् । अस्माभिस्तु तस्य हि स्वतन्त्रकर्तृत्वं सिषाधयिषितम् ।

५७५ **तदन्याभिधायिनी** मनस इच्छारूपेण परिणामाभिधायिनी । इतश्च चेतनस्यैवेच्छावत्त्वमित्याह **मोक्षेति** । **अन्यो** मनो नाम कोऽर्थः । मनसः स्वरूपनाशो हि तत्पक्षे मोक्षः । तथा च मनः स्वयमेव नागच्छेद्यत इत्यायातम् ।

५७६ तच्च कः कुर्यात् ? तदाह **स्वनाशेति** ।

५७७ भोगवादिनो दूषयति । कर्तृत्वं 'योऽहं कर्ता स एव भोक्ताऽस्मी'त्यनुभवेनैवोपलभ्यते । तच्च शब्दान्निराकृतः तस्मात् तच्छ्रुतेन चशब्देन अपिशब्देन समुच्चित्य निराकृतः ।

५७८ यथा मायी ब्रह्म निर्विशेषत्वादेव रचनानुपपत्तेः न कारणं तथाऽनुमानं च अचेतनत्वान्नेति ॥ १ ॥

५७९ **क्लेशकर्मादि** । अविद्यास्मितरागद्वेषाभिनिवेशाः पञ्च क्लेशाः । आदिशब्दात् कर्मफलभोगः ।

५८१ देहे सन्निधानमात्रतो न तु कर्तृत्वात् । 'अन्यत्राभावाच्च न तृणादिवदि'ति विवृण्वन्नेतन्मतं निराकरोति **अन्यत्रेति** । तत्प्रधानम् । **पुरुषशक्तीनां** सत्ताप्रतीतयश्च प्रवृत्तयश्च ताः सर्वाः तदधीनाः ।

५८४ 'न ऋते त्वत्क्रियते किञ्चनारे महामर्कं मघवन् चित्रमर्च'ेति श्रुतिः । हे तत्त्वगणपते यशश्विन् । त्वदृते दूरेऽपि किञ्चन क्रियते महान्तमर्चनीयं सुखं चेतनत्रातारं त्वं च त्वमेवास्मान्नर्च प्रविश्येत्यर्थः । तदेव श्रुत्यन्तरेण द्रढयति **स्वभावेति** ।

५८६ पतञ्जलिः सेश्वरसाङ्ख्यो विन्ध्यो निरीश्वरः ॥ २ ॥

अत्र चेतनाचेतनद्वयकल्पनायां गौरवम् । अचेतनमेव चेतनीभूतं मदिरादिद्रव्यवत् प्रवर्तत इत्यत्र लाघवम् । प्रमाणस्याप्येकस्य कल्पनमित्याशयवतां चार्वाकाणां मतमनुवदति **चार्वाकैरिति** ।

५८७ 'अभ्युपगमेऽप्यर्थाभावादि'ति सूत्रं विवृण्वंस्तत्परिहरति **यदैवमिति** । **यदा** यदि ।

५८८ **तेनैव** प्रत्यक्षेणैव ।

५८९ देहव्यतिरिक्तात्मनि प्रमाणमाह **देहादीति** ।

५९० यदि तत्साधकं साक्षिप्रामाण्यमभ्युपगम्यते तर्हि तद्वेदप्रामाण्ये कथं प्रमाणं न भवेत् ।

५९१ न च अन्यमानता तदभिमतप्रत्यक्षप्रमाणेनावसीयते । आगमादेरप्रमाणं व्यभिचारिलिङ्गात् ।

५९२ गुरुवाक्याद्वा अवसीयते चेत् अभ्युपगतागमादेरेव प्रामाण्यं निगमयति **स्वमतेनेति** ॥ ३ ॥

साङ्ख्यैकदेशीयान्निराकुर्वन् 'पुरुषाऽश्मवदिति चेत्तथाऽपी'ति सूत्रं व्याख्याति **सन्निधानादिति** ।

५९३ अबुद्धिपूर्वत्वादचेतनस्य स्वतन्त्रप्रवृत्त्यनुपपत्तिरुक्तदोषः । 'अङ्गित्वानुपपत्तेरि'ति सूत्रं व्याख्याति **अङ्गित्वमिति** ।

५९४ **सर्वस्य** सर्वानुभवस्य । यतोऽखिलं वर्तते तस्यापलापात् सर्वप्रमाणापलापक इति किमु वक्तव्यम् ॥ ४ ॥

५९५ तत्रैव पक्षान्तरं दूषयन् 'अन्यथाऽनुमितौ च ज्ञशक्तिवियोगादि'ति सूत्रं व्याख्याति **अङ्गित्वमिति** । सृष्टिकाले अस्य शरीरसंयोगार्थं शरीरप्रेरणा कार्या हि । तत्र स्वयमशरीरत्वात् अशक्तः ।

५९६ **अस्यैव** जीवस्यैव । 'हिताक्रियादी'त्यादिशब्दादहितकृतिः ।

५९८ इमे रचनानुपपत्तेरित्याद्युक्तदोषाः ॥ ५ ॥

५९९ वैशेषिकादिमतमनुवदति **नित्येति** । सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागैः पञ्चभिः सङ्ख्यादित्रयस्य सर्वत्रापि नित्याश्रितस्य नित्यत्वनियमान्नित्यत्ववचनम् । इच्छादीनां तु जीवेऽविनाशित्वादतस्तच्छङ्कोच्छेदनार्थं नित्यत्व-वचनम् ।

६०० तेषां सृष्ट्याद्यङ्गत्वेन पृथग्वक्तव्यत्वाददृष्टं जीवस्य पार्थिवाप्यतैजसवायवीयाश्चतुर्वर्गाः ।

६०३ तैश्चतुर्भिस्तदात्मकं त्र्यणुकं चतुर्भिश्चतुरणकं यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् ।

६०४ अन्त्यपदेनाविशेषस्यान्त्यस्यान्त्यव्यावर्तकत्वं लक्षयति । द्रव्यं त्वाकाशादि नित्यम् । तद्गतैकत्वादिगुणत्वं च पृथिव्यादिकमनित्यं तद्गतरूपादिगुणश्च ।

६०५ कार्य इत्यादेरयमर्थः । कार्यगतगुणक्रियाणां कारणगतगुणक्रियायाः कारणैककार्यसमवायप्रत्यासन्नगुण-क्रियायाः कारणैककार्यप्रत्यासन्नत्वादसमवायिकारणम् । कारणद्रव्यस्यासमवायिकारणम् ।

६०७ द्व्यणुके ह्रस्वत्वं द्व्यणुककार्यत्र्यणुके ह्रस्वान्तरस्य कारणं न भवति । परिमाणौ पारिमाण्डिल्यं च तत्कार्ये द्व्यणुके पारिमाण्डिल्यान्तरस्य कारणं नेति विशेषः । तत्र किं निमित्तमित्यत आह **वैरूप्यमिति** । विजातीय-परिमाणाक्रान्तत्वम् । 'महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामि'ति योजयंस्तन्निराकरोति **तानिति** ।

६१० पूर्वपक्षयुक्तिमाह **सदृशस्येति** ।

६११ अणुपरमाण्वोरणुप्रत्यक्षत्वं कार्येषु त्र्यणुकादिष्वणुत्वं कारणगुणसदृशमुत्पद्यते चेत् तेषामप्रत्यक्षत्वं स्यादेवेत्यर्थः । न महत्त्वमिति परिहरति । परमाणौ स्वावयवादणौ च परमाणौ महत्त्वं कथं न स्यात् ।

६१४ त्र्यणुकपूर्वेष्वपि चतुरणुकादिभ्योऽणुत्वं न कथ्यते । अखिले वस्तुनि प्रत्यक्षत्वाप्रत्यक्षत्वे पुरुषापेक्षया । तथाहि । सूक्ष्मदर्शिनां प्रत्यक्षास्त्र्यणुकाद्याश्च स्थूलदर्शिनामप्रत्यक्षा हि परमाण्वादयोऽपि केषाञ्चित्प्रत्यक्षा एव । ननु यतः परमाणुर्नास्ति स परमाणुः कस्मात् कथं परमाणोर्निरवयवस्य स्वावयवेभ्यो महत्त्वम् । अयं च प्रयोगः । अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तम् । परिमाणतारतम्यत्वान्महत्परिमाणतारतम्यवदिति चेत् । महत्त्वस्यापि विश्रमाभावात् साध्यविकलो दृष्टान्तः । तदाह **यथेति** ।

६१७ ननु कश्चिदीश्वरान्महीयानस्ति । अतस्तत्र विश्रान्तं महत्त्वतारतम्यमित्यत आह **नेति** । महत्तत्त्वगुणेनेश्वर एतावानिति परिच्छिन्नो महत्त्वाद्दशगुण एवेश्वरो नातोऽधिक इति । तथा सर्वस्मादणोरपि त्र्यणुकस्य दशगुणभागता क्वचिन्न स्यात् । विश्रान्त इत्यादेरयमर्थः । यदि सर्वथाऽप्ययं परमाणुर्विश्रान्तो विश्रामस्थानं तस्मादणोरभिन्न-स्याभावादित्युच्यते तथाऽपि कश्चिदनन्तांशवानस्तीत्येव स च गम्यते न तु सर्वस्मादणुरित्यवसायितुमशक्यः । स्वांशेभ्यो महत्त्वाद्विरोधादेव केवलमनुभवविरोधादेवेत्यर्थः । तदेवोपपादयति **केवलमिति** । ततोऽपरत्रापि देशोऽस्ति ततः परश्चापि कालोऽस्ति ततः पश्चादपि नान्तवान् ।

६१८ तथाऽणोर्द्वयोर्महत्त्वाणुत्वयोर्मानतोऽपर्यवसितिः साक्षिणा दृश्यते । अणोश्चाणुर्नास्ति तस्माच्चाणुर्महा-नस्ति । तस्माच्च तस्माच्चेति यदि महत्त्वं साक्षिगम्यत इत्युच्यते तर्हि प्रमाणेन गम्यत इति वाच्यम् ।

६१९ अनुमानतोऽणुत्वतारतम्यविश्रान्तिकल्पनायां दृष्टान्तत्वेनाभ्युपगतं हि । तद्यदि तन्महत्त्वमागमादवगम्यत इत्युच्यते तर्ह्यनन्तत्वेनैवावगम्यते । तद्दृष्टान्तेनाणुत्वमपि कुतोऽनन्तत्वमेव नावसीयते ।

६२० तदुभयानन्त्यमेव विशेषतः प्रतिपादयति **महत्त्वेति** । महत्त्वाणुत्वयोरनन्तत्वमात्रेण समम् ।

६२१ तथाऽपि परस्परमन्यदेव विलक्षणमेव महत्त्वादुद्रिक्ततया ह्यनन्तत्वाणुत्व ऊनत्वेति । तत्रोदाहरणमाह **बहुत्वेति** ।

६२२ एकं द्वे त्रीणीति बहुत्वे वर्तमानानामेकभागानामेवानन्त्यम् । एकत्र ततो द्वितीयांशस्ततश्च ततश्चेत्यल्पत्वे वर्तमानानां च तावत्त्वं ह्येव गम्यते । सङ्ख्यायामनन्तत्वमेव हि गण्यते । न त्वितः परं नास्तीति परिच्छिन्नत्वम् ।

६२४ 'अणोरणीयान्महतो महीयानात्मे'त्यागमोदिते 'भगवान् स य एषोऽनन्त' इत्यादिरानन्त्यवाचकः शब्द ईशस्य स्वरूपतो गुणतोऽणोर्ज्ञानादिगुणतः कालतश्चाल्पत्वमस्तु । तथाच तस्याज्ञत्वविनाशित्वादिप्रसङ्ग इत्यत आह **नैवेति** । तावत्त्वमेवेत्यादेरयमर्थः ।

६२५ अल्पगुणत्वमात्रमल्पकालवर्तित्वं नास्माकं मतम् । महतोऽपि विशेषादणुत्वं घटत इत्यत्र 'अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्चे'ति सूत्रं प्रमाणीकरोति **महत इति** ।

६२६ कथमल्पदेशस्थत्वसर्वदेशस्थत्वे युगपदेकस्यैव भगवतः । सर्वदेशस्थश्चेदल्पदेशस्थत्वं नैव स्यात् तस्य इति शङ्कां परिहरति **यदीति** । बहूनामल्पदेशानां समुदायः स हि सर्वदेशो नामेत्याकूतम् ।

६२८ प्रकृतार्थं निगमयति **अत इति** । तर्ह्येवं मुख्यं महद्भवेत् । अन्यथाऽणुत्वानन्ताख्यमहिम्नोऽभावादमुख्यमहदेव ।

६२९ अणुत्वाविश्रान्तिसाधकस्य साक्षिणः प्रामाण्यं साधयति **यदीति** । स्वयंभातः स्वयंप्रकाशः स्वप्रामाण्यं च स्वयमेव गृह्णातीत्यर्थः ।

६३० अथवा साक्षिणोऽनङ्गीकारपक्षादेः प्रामाण्यग्रहणार्थं प्रमाणान्तरं तस्यापि तस्यापीत्यनवस्था । यतः परमाणोर्नास्ति परमाणुः स परमाणुरिति परमाणुलक्षणं वदता तेन तत्परमाणूनां निरवयवत्वमभिप्रेतम् । तन्निराकरोति **अतः सर्वेति** ।

६३१ तर्हि सृष्टिकारणस्य कस्यचित्परमाणोः किं लक्षणमित्यत आह **अविभाग इति** । यतः परं विभागो नास्ति स परमाणुरित्यर्थः । कारणस्य परमाणुद्व्यणुकादेर्महत्त्वादिगुणा एव त्र्यणुकादिकार्यगा भवेयुः । कणादस्य केवलमन्यथाकल्पना कथं साक्षिमितस्याणुत्वाविश्रान्त्यादेर्वारणे शक्नुयात् ।

६३४ ननु न वयं साक्ष्याख्यं प्रमाणमङ्गीकुर्महि यदणुत्वाविश्रान्तावुपन्यस्तौ । नास्माकं देशादिकमपि साक्षिसिद्धमित्यत आह **यदीति** । यदि देशादिकं साक्षिमितमिति न तर्हि केन मीयत इति शेषः ।

अनुमेत्यत आह **नेति** । पक्षज्ञानासम्भवात् पक्षीकर्तुमशक्यत्वं केनचित्प्रमाणेन पक्षो ज्ञायते चेदनुमाप्रयोगवैयर्थ्यं स्यात् । देशादिस्वरूपमात्रमनुमातुं यः पक्षमेव न जानाति स कथमनुमिमीत इत्यर्थः ।

६३५ अस्मिन्नर्थे दृष्टान्तरूपेणार्थान्तरोपन्यासं करोति **यत्रेति** । ननु परिदृष्टो देशो देशान्तरवान् देशत्वाद्धस्तादिपरिच्छिन्नदेशवत् ।

६३६ परिदृष्टः कालः कालान्तरवान् कालत्वादतीतक्षणवदित्यनुमानसिद्धं देशादिकमित्यत आह **देशेति** । 'परिदृष्टशृङ्गाणि शृङ्गान्तरसमानकानि शृङ्गत्वाद्गोवदिति' इति न्यायेन शृङ्गत्वाद्गोवदिति । तेन न्यायेन शृङ्गादेरपि सिद्धिः स्यादिति भावः । इयमक्षरयोजना । देशान्तरादिशब्दास्तु शशशृङ्गादिवाचिशृङ्गान्तरशब्दवदेव । अत्रेदमाकूतम् । न तावद्धर्मिग्राहकप्रमाणेनैव साध्यसिद्धे सत्यनुमानावकाशः । तथाऽप्यनुमीयते चेत्तदतिप्रसङ्गव्याहतमिति । विमतो देशादिः सजातीयवानिति च न वाच्यमित्याह **सदृशमिति** ।

सजातीयं नाम सदृशमेवेष्टव्यम् । तद्विवक्षितस्यानुगतधर्मस्य निराकरिष्यमाणत्वात् । अस्मत्पक्षे किमेव हि केन सदृशं न स्यात् । सर्वस्यापि वाच्यत्वादिसादृश्योपलभ्यत्वात् । तस्मात्तेन न्यायेनापि शशशृङ्गाद्यनुमितिः स्यात् ।

६३८ अत्यसिद्धमतीन्द्रियं वस्तु तर्हि कीदृशमनुमानं प्रमाणमित्यत आह **प्रत्यक्षमिति** । उक्तार्थमेव प्रपञ्चयति **सैवेति** ।

६३९ शिष्योपाध्ययोरिव सहदर्शनमात्रेण मूलप्रमाणनिश्चयं विना व्याप्तिर्नावसीयेत । यदैव यद्येवाव्यतिरेकस्याविनाभावाख्याक्षजादिग्राहको भवेत् तर्हि सैव व्याप्तिर्यथा ।

६४१ 'समवायाभ्युपगमाच्च साम्यादनवस्थितेरि'ति योजयंस्तत्कल्पनान्तरमनूद्य दूषयति **कार्येति** ।

६४४ गुणगुणिक्रियातद्वज्जातिव्यक्तिविशेषविशेष्यावयवावयविपञ्चकस्य च तस्य समवायसम्बन्धस्य ताभ्यां सम्बन्धिभ्यां सम्बन्धोऽप्यपेक्षितो भवेत् । **तस्यापि** तस्यापीत्यनवस्था ।

६४५ ननु तयोः सम्बन्धरूपसमवायाख्यसम्बन्धिनोऽपि स्वयमेव सम्बन्ध इति सर्वनिर्वाहकत्वादित्यत आह **स इति** । द्रव्यमेव स्वगुणक्रियादिरूपेण तथा स्वनिर्वाहकं न स्यात् । किमनेन समवायेन ।

पुनश्च विशेषं साधयति **विशेष इति** । यद्यभिन्न एव समवायो गुणगुण्यादिगतत्वास्तित्वादौ विशेषोऽवसीयते तर्ह्यस्मद्विवक्षितस्य गुणक्रियासत्तारूपस्य द्रव्यविशेषस्य निषेधः केन हेतुना क्रियते । गुणादिविशेषाणामनन्तत्वं च परस्परं विशेषतो न तु भेदात् । ननु तस्य विशेषस्य विशेषान्तरकल्पनया युष्मत्पक्षेऽप्यनवस्थेत्यत आह **विशेषश्चेति** ।

६४६ यथा परस्य समवायित्वेनैव समवायस्य परमते कल्पनागौरवं वदन् स्वमते कल्पनालाघवं द्योतयति **कल्पयित्वेति** । आतानवितानवान् पट आहतः पट इति भावाभावविभागेन वादिनां सर्वेषामिति शेषः ।

६४९ कार्यकारणादीनामभेदे विशेषे च प्रमाणमाह **अभेदेनेति** । मृद्घटोऽपटो घटः कृष्णो घट इत्याद्यनुभवः ।

६५० इतश्च विशेषं विना कथञ्चन व्यवहारो न घटत इत्याह **सामान्यादिति** । **तन्निष्ठत्वादयः** व्यक्तिनिष्ठत्वादयः ।

६५१ तदेवोपपादयति **कार्यस्येति** । कार्यस्य पटादेस्तन्त्वादितत्कारणनिष्ठत्वं शुक्लत्वादिगुणस्य पटादौ व्यापिता पतनक्रियायाश्च व्यापिता संयोगादिगुणस्यैकदेशवृत्तिविशेषस्यान्त्यव्यावर्तकत्वम् ।

ननु तन्निष्ठत्वादिधर्मः सर्वोऽपि सामान्यादेर्भिन्नश्चेत्किं नच्छिन्नमित्यत आह **स चेति** । योऽयं सामान्यस्य द्रव्यत्वादिनिष्ठत्वं तद्धर्मस्य सामान्यनिष्ठधर्मोऽङ्गीक्रियते सामान्यनिष्ठत्वधर्मस्यापि सामान्यनिष्ठधर्मनिष्ठत्वं तस्यापि तन्निष्ठत्वं तस्यापीत्येकैकधर्मस्यैव धर्मसन्तानाद्बह्वीनामनवस्थानामाकरोऽयं पक्षः । गोत्वादिसामान्यस्य च सत्तादिसामान्यम् । सर्वगुणस्यापि चतुर्विंशतिसङ्ख्यागुणोऽन्तर्भावसिद्धोऽप्यतोऽनवस्थाभयाद्धि तैर्मुख्यतो नाङ्गीकृतः । स च यदि सामान्यस्य सामान्यं गुणस्य गुणश्च यदि तैरङ्गीक्रियते तर्हि तत्पक्षे क्वचिदनवस्था न दोष इत्यायातम् ।

६५४ ननु युष्मत्पक्षेऽप्ययमेको गुण इत्यादौ गुणस्य सङ्ख्यागुणाङ्गीकारे सङ्ख्यायाश्च तद्धर्मत्वं तस्यापि तथेत्यनवस्था किं न स्यादित्यत आह **अस्मदिति** । ननु यदि फलादिभिः श्यामत्वादिगुणानामभेदः तर्हि तेभ्यः पूर्वं नाशासम्भव इत्यत आह **भेद इति** ।

६५५ गुणादीनां नाशे सति भेदो भवेत् । तथाऽपि कथं सर्वात्मना विनाशिभेदिना पूर्वमभेदः । भेदाभेदयोरेकत्र विरुद्धत्वादित्याशङ्कायामाह **विशेषमिति** ।

६५७ इदं फलं श्याममेवेत्यभेदस्य नेदानीमिदं फलं श्यामं रक्तमेवेति भेदस्य चैकत्रैव दृष्टिप्रमाणतश्च भेदाभेदौ युज्येते । तादृशगुणगुणिनोः कुत्र गुणादीनामत्यन्ताभेद इत्याशङ्कां परिहरति **अभिन्न इति** ।

६५८ स्वेन रूपेण कृष्णरामादिना भगवतोऽन्यत्रासामस्त्योच्छेदिनस्तिरोधानमात्रभाजो धर्मा एव नैव भेदिनः । धर्मिणि सत्येव सामस्त्योच्छेदिनो धर्मा भिन्नाभिन्नरूपाः फलश्यामतादयः । तदेव विशिनष्टि **भाव इति** । धर्माः स्वानां भावे धर्मिण एवोच्छेदानन्तरं भिन्नाश्च ।

६६१ ननु यद्यणुत्वविश्रमार्थं परमाणोरंशाः सन्ति तेषां च तेषां चेत्यंशेष्वपि सम उच्यते तर्ह्यनवस्थया द्व्यणुकाद्युत्पत्तिः न स्यात् । तथा हि । अंशांशिसंयोगस्तावदंशसंयोगेनैवोत्पद्यते । हस्तपुस्तकसंयोगाद्धि शरीरपुस्तकसंयोगो जायते । तस्मात्परमाणोरंशित्वे त्वंशसंयोगादेव संयोगो जायते । तदंशानां चांशित्वे तथेत्यनवस्था स्यादित्यत आह **अंशेति** ।

अंशसंयोग एवांशिनः संयोगोऽपि नान्यः । अंशे संयोगदृष्टेश्च । हस्ताख्यशरीरांशे पुस्तकदृष्टेश्च नानवस्था । न च तत्र हस्तपुस्तकसंयोगातिरिक्तः शरीरपुस्तकसंयोगो दृश्यते । येन तयोः कार्यकारणत्वेन भेदः कल्प्यते । परमाणूनां निरंशत्वात् । स्वरूपसंयोग एवेत्यत्र दूषणमाह **यदीति** ।

६६२ न हि परमाणोः कार्यस्याणोः प्रथिमाऽस्माभिरङ्गीकृत इत्यत आह **परमाणोरिति** । स्वस्मादणोः स्वस्य महत्त्वं नास्ति । कारणगुणानपेक्षयैव कार्ये गुणा जायन्त इति प्रमाणविरुद्धमित्यर्थः ।

६६३ नन्वंशांशिनोरभेदे कथमेकांशविनाशेऽप्यंशिनोऽनवस्थानमित्यत आह **अंशिन इति** । अंशिनः सर्वांशैरभेदः सर्वैर्विनाऽशिन एवाभावात् । एकैकांशेन तु भेदाभेदौ तद्विनाशेऽप्यंशस्य स्थितेः ।

६६४ ननु यदि संयोगादीनां द्विष्ठधर्माणां धर्मिभ्यां द्वाभ्यामप्यैक्यं तर्हि तयोर्धर्मिणोरन्योन्यमप्यैक्यप्रसङ्ग इत्यत आह **संयोग इति**।

६६५ उभयोरपि पृथग्दृश्यते हि संयोगादिधर्मो न तु द्वितः।

६६६ अनयोर्धटयोर्भेदोऽस्तीत्येकवचनेनैव द्वयोरेको धर्म इत्यत आह **अनयोरिति**। इतः पटादमुष्य घटस्य भेदः। अमुतो घटादस्य पटस्य भेद इत्यन्योन्यप्रतियोगेन द्विरूपो हि भेदो द्विधर्मिको दृष्टः।

६६७ विप्राणां भोजनमित्येकवचनमेकसमुदायविषयं यदेकमनेकसमवेतं सामान्यं तदभिमतं तद्दूषयति **नरत्वेति**। आदिशब्दात् सत्त्वादि।

६६८ अस्ति हि समुदायत्वधर्मः समुदायिनिष्ठः। तस्मात् कथमेको धर्मो न भवतीत्यत आह **समुदाय-स्त्विति**। समुदायत्वधर्मस्तु नियमेन भिन्नः। यथैकातिरिक्तसङ्ख्याधर्मः। एतादृशत्वं नरत्वगोत्वादिकं सादृश्यमेव समनरत्वादिधर्मः।

६७० उक्तार्थे **श्रुतिरप्याह**।

६७१ कालान्तरेऽप्यनिवृत्तत्वेन निवृत्तिरहितत्वेन विनाशो येषामिति निवृत्तविनाशाः। अतो घटपटादीनामात्मनश्च प्रत्यक्षप्रमाणेनैव भिन्नत्वनिश्चयात्।

६७२ नन्वनन्तासु व्यक्तिष्वेकमनुवृत्तधर्मं विना शब्दसम्बन्धज्ञानानुत्पत्तिरेकत्र दृष्टं हि गोत्वं सर्वत्रापि व्युत्पत्तिं ग्राहयतीत्यत आह **व्युत्पत्तिरिति**।

६७३ गौरानीयतामिति प्रयुक्तो गोशब्दः सर्वेषु सास्नादिमत्त्वेन सदृशेषु प्रवर्तते। तर्हि कथं विवक्षितावगतिरित्यत आह **तथाऽपीति**। **प्रामितः** प्रकरणलिङ्गाद्युपपत्तितः।

६७४ निगमयति **शक्तिरिति**। अयं सास्नादिमान् अन्यस्तादृशश्च गोशब्द इति सादृश्यं ज्ञापयति। शब्दस्य वाचकत्वशक्तिः सादृश्यानुगेति **यतो** यस्मादेव।

६७५ **जातित** इत्यादेरयमर्थः। जातित इत्येवं व्युत्पत्तिः सम्भवति चेत् कथं तासु गोत्वनरत्वादिजातिषु तत्त-च्छब्दव्युत्पत्तिः। तत्रापि जातित्वजातिरस्तीति चेत् तत्रापि व्युत्पत्त्यर्थं जात्यन्तरकल्पना तत्रापीत्यनवस्थितिः। व्यक्तिषु संज्ञासम्बन्धविज्ञानमपि व्यक्तिवैजात्यभावेनैव **दूषितम्**।

६७६ **यदि** व्यक्तित्वं नाम सामान्यमस्ति तर्हि तस्याश्रयेषु विशेषव्युत्पत्त्यर्थं विशेषान्तरकल्पना तत्रापि तत्रापीत्यनवस्था। अपि च सर्वसामान्यधर्मेभ्यो व्यावृत्तं वस्तुस्वरूपं हि विशेषो नाम। तस्माद्विशेषत्वमनुगतमित्युक्ते

स्वरूपत्वमनुगतमित्युक्तं स्यात् । स्वरूपत्वमनुगतं चेद्व्यावृत्तान्तरं विना कथं ज्ञायते, व्यावृत्तान्तरकल्पनायां स्वरूपस्यानुगतत्वकल्पनया अस्य स्वव्याहतिः । तदाह **कथमिति** ।

६७७ एकस्य जातिशब्दस्यैकस्य व्यक्तिशब्दस्य च सादृश्यद्वारेण व्युत्पत्तिपर्यन्तमुभयथाऽप्यनवस्थादिदूषितमेतन्मतम् । **आदिशब्दात्** कल्पनागौरवम् ।

६७८ विशेषमनङ्गीकुर्वतां पक्ष औपाधिकमपि न घटत इत्याह **औपाधिकेति** । पाचकत्वादिकमौपाधिकमिति उच्यते । समवायिभेदश्च तदौपाधिकम् । किं तच्चैत्रादिवदाहोस्वित्ततोऽन्यम् । अग्निमन्नामविशिष्टं किं पर्वताख्यं वस्तु ततोऽन्यद्वा । **आदिशब्दाद्भेदादि** । तदेव चेत्किमिति तत्र पर्वतेऽग्निमत्त्वं भण्यते । पर्वतोऽग्निमानित्युक्तेरपि पर्वतः पर्वत इतिवदभिन्नार्थकत्वात् । न हि विशेषस्तैरङ्गीक्रियते ।

६७९ अथ विशिष्टं पर्वतादन्यद्यत्किञ्चिदग्निसंयोगमात्रमिति चेत् तत्पर्वतोऽग्निमानित्यनुमानं **सिद्धसाधनं** भवेत् । अग्निसंयोगमात्रस्य महानसादौ सिद्धत्वात् । यदि भूधरस्येति षष्ठ्यर्थस्तथाऽपि सिद्धसाधनं स्यात् । अस्य च समवायस्य महानसाग्निसंयोगसमवायेनैकत्वात् । न तु महानसाग्निसंयोगोपाधिभिन्नः ।

६८० तत्समवायः पर्वताग्निसंयोगसमवायस्तदुपाधिभिन्नः । एवं तदुपाधिभिन्नो ह्ययं समवाय इत्यत आह **यदीति** ।

६८१ नन्वमुख्यो ह्यौपाधिको भेदः तस्मात् तेनैकत्वभङ्गः स्यादित्यत आह **नेति** । मायावाद्यन्यथा भवेत् । सत्त्वासत्त्वविलक्षणाङ्गीकारे मायावादी भवेदयम् । भूयात् खल्वेष दोषः तस्य प्रच्छन्नबौद्धत्वात् ।

६८२ पर्वताग्निसंयोगाद्युपाधीनामनन्तत्वात् **समवाया अनन्ताः** । **इतस्ततस्तु** तत्तत्पदार्थेषु कार्यकारणगुणगुण्यादौ ।

६८४ एवं च स्वाभाविकभेदात् को विशेष औपाधिके लक्ष्यते । तस्माद्वृथेयमुपाधिकल्पना । औपाधिकविकल्पेऽप्ययमेव न्यायः । तत्रापि चैत्रस्य पाचकत्वमित्यादौ षष्ठ्यर्थत्वेन समवायस्यैव तेनाभ्युपगतत्वात् तत्पक्षे पदार्थानामुत्पत्तिरेव न घटत इत्याह **एवमिति** । एवमौपाधिकभेदवान् असतः सत्तासमवायो हि जनिः ।

६८५ तत्पक्षे तत्रापि स भेदो विद्यमानश्चेदपसिद्धान्तः । नो चेत् घटोत्पत्तावेव सर्वोत्पत्तिः । असतो घटसत्तासमवायेन सर्वसमवायस्यैकत्वात् ।

ननु युष्मत्पक्षेऽपि न हि पर्वतादिमात्रं विशिष्टादिकम् । तस्मात् कथमुक्तदोषो न स्यादित्यत आह **अस्मदिति** ।

६८६ विशिष्टादीनां विशेष्यादिभिरैक्याङ्गीकारेऽपि दोषो नास्ति । क्वचिद्देशे काले च भावरूपः स घट एव । देशान्तरे च कालान्तरे च भावरूपविशेषबलाद्धि भावाभावयोरुभयोरपि प्रसिद्धिद्योतकौ । अन्यथाऽयं घटः पूर्वमसन्न घटे बहिरसन्निति सामानाधिकरण्यानुपपत्तिः । अत्र सत एव घटस्य देशान्तरकालान्तरयोरसत्त्वानङ्गीकारे तस्य व्याप्तत्वं नित्यत्वं च स्यात् । एकस्यैव भावाभावरूपत्वं धर्मद्वारेणापि प्रतिपादयति **अभावस्येति** ।

६८९ **तस्मात्** प्रध्वस्तात् अभावस्य च भावधर्मसम्भवात् प्रध्वस्तघटस्य विद्यमानत्वाद्भेदो वाच्यतादि च सदस्ति शशविषाणस्याभावोऽस्ति च घटस्य प्रध्वस्ताभावो देहस्याभावो देहस्य भावो घटाभावः कपालाभाव इत्यादि विशेषाद्युच्यते । गतमेव गतं निरस्तमित्यर्थः ।

न च शङ्कनीयं भेदस्य त्रैविध्यं विशेषभावस्याभावरूपत्वं केवलानुमानस्यासाधकत्वमित्यादिकमपि पुनरुच्यत इति । तत्र तत्र प्रसङ्गप्राप्तत्वात् तात्पर्याच्च मुहुर्वचनसाफल्यात् ।

६९२ **भेदस्य** इत्यादेरयमर्थः । भेदस्य घटस्वरूपत्वे घटस्य रूपोत्पत्तावेव विदारणं स्यात् । तत्कपालानां पांसूनां च भेदस्य स्वरूपत्वे विदारणं स्यात् । भिदिर्विदारण इति धातुः । एवं सर्वविदारणेन सर्वविनाशाद्वै घटस्य शून्यतां वदन्ति ते भूतरूपाः । भेदशब्दस्य विदारणार्थभ्युपगमेऽप्यन्ततः शून्यता न स्यादित्यत आह **विभागेनेति** ।

६९४ तत्र युक्तिमाह **नेति** । यत्संयोगोत्पत्तिस्तद्वियोगेन हि नाश इत्याकूतम् । तदाऽयं धातुर्विदारणार्थोऽभ्युपगम्यते तदा द्रव्यावयवानां मिथो विभागगुणवाचको भवति हि । अत्र तद्व्यतिरिक्तमन्यत्वमेव विवक्षितम् । भिदान्यत्वमिति च पठन्ति । तदाह **विदारणेति** । अभ्युपेक्षितोऽस्मिन्पादे सूत्रकृतेति शेषः ।

६९६ ईश्वरस्यानन्दादिगुणान्निरस्य परेणाभ्युपगतमष्टगुणत्वमात्रं दूषयति **न चेति** । आनन्दस्यन्दिन आनन्दपूर्णा इति भावः । **अप्रमितत्वतः** अपरिच्छिन्नत्वतः । 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे । यदासीत्तत एवाद्यः स्वयम्भूः समभूदज' इति तद्वाक्यं भगवद्वाक्यं भागवते । एकैकगुणतोऽप्यनन्ते ज्ञानानन्दादयो गुणाः प्रत्येकमप्यनन्ता इत्यर्थः । यदासीदब्जम् । **आदिशब्दात्** 'अनन्तबाहुरनन्तगुणोऽनन्तरूप' इत्यादिका । एकैकगुणतोऽप्यनन्ते ज्ञानानन्दादयो गुणाः प्रत्येकमप्यनन्ता इत्यर्थः ।

६९९ एकैकगुणानन्त्यं साधयति **यदीति** । आदिशब्दादिच्छादिघटविषयत्वपटविषयत्वादिति शेषः ।

७०० तज्ज्ञानादेः न स्वतः किन्तु घटाद्युपाधिक एवेत्यत आह **औपाधिकेति** ।

७०१ ज्ञानस्य स्वप्रकाशविशेषानङ्गीकारे दूषणमाह **स्वेति** । यैर्ज्ञानस्य निवारितं तेषां पक्ष इति शेषः । स्वज्ञानाधिगमं विना कथं सर्वज्ञता तस्येश्वरस्य स्वज्ञानस्यापि सर्वान्तःपातित्वात् ।

७०३ **एष एव** इत्यादेरर्था उच्यन्ते। यो अयमनयोर्ज्ञानयोर्विषयविषयिभावः उक्तः स एष एवार्थः। **तज्ज्ञानावसितो यदि** विश्वज्ञानावसितो यदि। तर्हि विश्वज्ञानस्य स्वयंप्रकाशत्वं स्यादेव। तद्विश्वज्ञानमेकस्य विषयविषयिभावसम्बन्धस्य विशेषणं हि सम्बन्धित्वेन किञ्चिदज्ञानावसितो यदि। अथवा परमेश्वर एष पदार्थो विश्वज्ञानावसितो यदि। तद्विश्वज्ञानमेतद्विश्वज्ञानमेतस्य परमेश्वरस्य विशेषणं हि। अहं विश्वज्ञानवानस्मीति हि तत्परमेश्वरं ज्ञापयति। तथा च अप्रकाशत्वं स्यात्। अपि च परमेश्वरो ज्ञानाज्ञानावसितो यदि ज्ञानाज्ञानमेतद्विशेषणं हि। अहं ज्ञानाज्ञानवानस्मीति हि तं ज्ञापयति। अपि च। एष ज्ञानाज्ञानाख्य एवार्थो विश्वज्ञानावसितो यदि। ज्ञानाज्ञानं ह्येतस्य विश्वज्ञानस्य विशेषणं ज्ञापकत्वेनेदं विश्वज्ञानाज्ञानमिति हि विश्वज्ञानं तज्ज्ञापयति। तथा च अज्ञाननिवृत्तिः।

७०४ एषोऽर्थो ज्ञानान्तरेणावसितश्चेत्तज्ज्ञानमपि तथेत्यनवस्थितिः।

७०५ नन्वीश्वरस्य सुखवत्त्वे दुःखवत्त्वप्रसङ्गः। तथाहि। विमतो दुःखवान् सुखवत्त्वात्। यः सुखवान् स दुःखवान् यथा चैत्र इति। इयं व्याप्तिर्नो भवेत्। श्रुतिविरुद्धत्वादिति भावेनाह **सुखवानिति**।

७०६ 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति। य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोक' इति निर्दुःखत्वम्। 'आनन्दं ब्रह्मणो विद्वान्न बिभेती'ति महानन्दश्चेशस्यैव भण्यते हि।

७०७ एवं परहेतोः कालात्ययापदिष्टत्वमुद्भाव्य अप्रयोजकत्वदूषणं चाह **ईश्वरस्येति**। न हि चैत्रदुःखित्वे सुखित्वं प्रयोजकम्। किन्त्वीश्वरस्य दुःखितयेष्टत्वं तत्र प्रयोजकम्। सुखित्वसाधनं दुःखित्वसाध्यमुपाधत्ते विभजतीति दुःखित्वोपाधिः।

७०८ नन्वीश्वरस्य दुःखितयेष्टत्वमीश्वरे स्वस्मिन्नपि स्यान्नाम। एवं च साधनाव्यापकत्वाभावादुपाधित्वं न स्यादित्यत आह **न चेति**। न हि कस्यचिदात्मदुःखितेच्छा स्यात्। चैत्रसुखित्वदुःखित्वयोः सहदर्शनमात्रेण 'आनन्दं ब्रह्मे'त्यादिश्रुतीनामपलापतो यज्ञादिः पापहेतुर्हिंसायुतत्वाद्ब्रह्मकुलोत्सादनवदिति नानुमाति किम्। यदि तत्र 'ब्राह्मणो न हन्तव्य' इत्यादिश्रुतिनिषिद्धतोपाधिः। तर्हि श्रुतेः प्रयोजकत्वाङ्गीकारात् परसाधनस्यासिद्धत्वेन श्रुत्यनुक्तत्वं कथं नोपाधितां व्रजेत्। यदि श्रुत्युक्तिर्निर्णयकारणं तर्हि श्रुत्या दुःखित्वेनोक्तमप्युपाधिः स्याद्धि। तस्माच्छ्रौतेऽर्थे किमनुमानेनाजागलस्तनवद्व्यर्थेनेत्याह **किमिति**। न बुद्धो धर्मदर्शी स्यात् पुंस्त्वादित्यादिपूर्वोक्तेन प्रकारेण।

७१६ एवमीशस्यानुमया सिद्ध्यसम्भवादनानन्दानुमायाश्च श्रुतिर्धर्मिप्रमा भवेत्। 'नित्यमेव च भावादि'ति योजयंस्तत्पक्षे विशेषानङ्गीकारादतिप्रसङ्गमुद्भावयति **नित्येति**। तत्पक्षे कालोऽप्यौपाधिकभेद उक्तरीत्या निरस्तः।

७१७ **विशेषकाले** भिन्नकाले।

७१८ 'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः । अर्धमासा मासा ऋतवः संवत्सरश्चे'ति श्रुतिः । 'सोऽन्तःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः । उवास तस्मिन्सलिल' इति *भागवते* ।

७१९ कालस्योत्पत्त्यङ्गीकारे तदर्थं कालान्तरकल्पना । तदर्थं च तथेत्यनवस्थया विरोध इत्यतो ब्रूते **कालस्येति** ।

७२० अस्मत्पक्ष इच्छायाः सृष्टिविषयत्वे तस्याः सृष्टिविषयत्वाद्यसङ्ख्यातविशेषत्वान्न कश्चन विरोध इत्याह **असङ्ख्यातेति** । कालस्य स्वाख्यकालगत्वं श्रुत्या युक्त्या चोपपादयति **ईश इति** ।

७२१ 'ईशः सर्वत्र पुरुषः स्वतन्त्रः कालनित्यते'ति च श्रुतिः । न च तावता साम्यमिति भावेनाह **ईशाधीनाविति** ।

तद्गतौ तत्रैव गतौ न तु तदतिरेकेण व्याप्तौ । **स्वोद्दिष्टे** स्वयमित्युद्दिष्टे न त्वन्यस्मिन् । अतः कालस्येशाधीनत्वात् कदा कस्योत्पत्तिरिति पृष्टे दशममास इत्युक्ते स कालः कस्मिन्काल इति च पृष्टे स कालस्तदैवेति लोकव्यवहारः कालस्य स्वगतत्वतो हि यस्मात् । एवं चेत्सर्वमपि तत्तत्स्वभावः स्यान्न विष्णोरित्यत आह **स्वाभावादिति** ।

७२३ 'न हरिं विना ज्ञानस्वभावतोऽपि स्यादि'त्यादावुदितः । पुरा 'सृष्टिस्थितिक्षययतिप्रकाशावृतिबन्धनम् । सर्वाक्षराणामेवैकः कुर्यात्सात्त्विकमोक्षणम् । सर्गस्थितियतिज्योतिर्नित्यानन्दप्रदोऽक्षरे । चेष्टाप्रदश्च सर्वासामेक एव परो हरिरि'ति *परमश्रुति*रिति । ततः सर्वस्वभावस्य तद्वशत्वात् ।

७२४ 'रूपादिमत्त्वाच्च विपर्ययो दर्शनादि'ति सूत्रं विवृणोति **रूपेति** । अतोऽष्टगुणेशवादिमतस्यानुपादेयत्वादानन्दाद्यनन्तगुणमयदेहात्मकेश्वरप्रतिपादकोऽयं समन्वयो न विरुद्ध इति सिद्धम् ॥ ६ ॥

७२६ चतुर्विधेषु बौद्धेषु वैभाषिकाश्च सौत्रान्तिकाश्च बाह्यार्थवादिनो जगदेवमाहुः । स्ववीर्यमात्रेणैव क्षणविनाशिपरमाणूनां समुदायविशेषरूपं चात्मानं च ज्ञानमात्ररूपं क्षणिकमाहुः । एतेषां परमाण्वादीनां जगत्पञ्चस्कन्धात्मता स्थितं चाहुः । स्थितिः पञ्चस्कन्धानामिति शेषः ।

७२९ 'समुदाय उभयहेतुकेऽपि तदप्राप्तिरि'ति योजयंस्तन्मतं निराकरोति **समुदाय इति** । उभयोः सकाशान्न युज्यते । उभयशब्देनानेकमत्र विवक्षितं न द्वित्वमात्रम् ।

७३० 'इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वादि'ति सूत्रं व्याख्याति **अन्योन्येति** ।

७३१ तच्च समुदायत्ववेदनम् । सृष्टिकाले परमाणूनां सामीप्यहेतुकं प्रलयकाले तेषां दूरस्थत्वात् तन्नास्ति । तस्मात् सदातनानां परमाणूनां संयोगाज्जगदुत्पद्यत **इति चेत्** परमाणुपुञ्जाख्यं कारणं प्रलये दूरस्थं पश्चादपि दूरस्थं कार्यमेवापादयेन्न तु समीपस्थं किमुतैव संयुक्तम् ।

७३२ अतोऽयं च दोषः सम्प्राप्त इत्याह **अत इति** ।

७३३ **अतः** स्वोत्पत्तिमात्रस्यैव स्वनाशनिमित्तत्वात् प्रलय आत्मनः संयोगिरूपराहित्यात् सृष्टिकालेऽप्यर्थै-रिन्द्रियसंयोगिरूपस्य कारणता नैव स्यात् । तज्ज्ञानताऽपि नैव हि । तेष्वर्थेषु ज्ञानमस्येति तज्ज्ञानः । अतो विशेष-कार्यजनकत्वाङ्गीकारात् घटादिकं पटादिकस्य कारणं स्यात् । मूलसृष्टावात्मनश्च संयुक्तपरमाणूनां कारणं स्युः ।

७३५ नन्वात्मनामदृष्टं सृष्टिनिमित्तत्वतः परमाण्वादीनां संयोगादिविशेषनिमित्तमित्यत आह **अदृष्टमपीति** ।

७३६ तथा सत्येवमापद्यत इत्याह **कार्यं चेति** । नियामकाभावात् कस्यचित्स्वतन्त्रस्य नियामकाभावात् । फलादीनां विशेषसम्प्रतिपत्त्या क्षणिकत्वं प्रतिपाद्य तद्दृष्टान्तेनानुमीयते । यत्सत्तत्क्षणिकं यथा फलादि । सच्च विवादास्पदीभूतमिति । एवं प्रत्यक्षसिद्धस्य स्थिरत्वस्यापलापे सति विशेषः कथं सिद्ध्यति । तत्र चायं प्रयोगः । यत्सत्तदविशेषं यथाऽऽकाशादि । सच्च विवादास्पदीभूतमिति ।

७४० नन्वयं दृष्टान्तः साधनविकलः । आकाशस्य मूर्तद्रव्याभावरूपत्वादित्यत आह **यदीति** । अस्मिन्नाकाशे-ऽवलोको नास्तीत्यधर्मप्रतियोगिकत्वम् । आकाशस्तु नरादिवद्विधिमुखेनैव ह्यवगम्यते ।

७४३ उन्मत्तस्तु क्वचिदेव दृष्टं त्यजत्यदृष्टं स्वीकरोति च न तु सर्वत्र । तस्मादमुष्मात्स गुणवान् ।

'उत्तरोत्पादे च पूर्वनिरोधात्', 'असति प्रतिज्ञोपरोधो यौगपद्यमन्यथे'ति सूत्रयोः पूर्वमप्यभिप्रायः सूचितः **इदमस्यैवेत्यादिना** । न हि पदार्थानां यौगपद्ये कार्यकारणव्यवस्थेदमिति च सा निराकृता । इदानीं विस्तरत आह **उत्तरेति** ।

७४६ सादृश्यनिबन्धना भ्रान्तिः प्रत्यभिज्ञा । सादृश्यं च प्रत्येकं संस्काराज्ज्ञायत इति च न युक्तम् । संस्कारस्यैवाभावादित्याकूतम् । अतः क्षणविनाशित्वादात्मनां सादृश्यासम्भवाच्च पूर्वं तन्मया ज्ञातमिति ज्ञानं न सम्भवतीत्याशङ्क्य पक्षेऽनुमा कुत एव व्याप्तिस्मरणासम्भवात् संस्कारार्पकत्वात् सम्भवं प्रपञ्चयति **कार्येति** ।

७४७ सम्बन्धा एव कौतुकादयोऽन्यत्र पटादिषु संस्कारमादधते ।

७४८ **असंस्कारतः** संस्काराभावात् । तन्निबन्धनसादृश्याभावात् तन्निबन्धनभ्रान्त्यभावात् । प्रत्यभिज्ञाया निरवकाशत्वेन बलवत्त्वात् क्षणमात्रमवस्थानम् । न चैककालीनत्वमस्त्विति वाच्यम् । क्षणिकत्वभङ्गप्रसङ्गादिति

भावेन तल्लक्षणमाह **पूर्वेति** । एवंविधलक्षणे कथमुत्पाद्यसम्बन्धस्य विनाश इत्याशयः । क्षणस्यैवमिष्टत्वादेवायं च दोषः स्यादित्याह **पूर्वेति** ।

७५० सति पूर्वस्मिन्विद्यमाने कार्यं भवेच्चेत्तत्कार्यमपि तथा तत्कार्यमपि तथैवेति यौगपद्यं भवेत् । तथा च सव्येतरगोविषाणवत्कार्यकारणत्वाभावः । एकस्मात्कार्योत्पत्तौ च का प्रमा ।

७५१ परानुमानस्य दृष्टान्तः साध्यविकल इत्याह **अभेदेऽपीति** । दीपादिषु दीर्घह्रस्वत्वादिविशेषदर्शनं तु भेदं विनाऽपि विशेषमात्रेणैव युक्तमित्यनुभवसिद्धं च ।

७५२ दृष्टान्तोऽसम्मत इत्यत आह **सच्चेदिति** । न हि खादीनां रूपादिभ्यः कश्चिद्विशेषो विधिप्रत्ययवेद्यत्वमात्र इति भावः । यत्सौत्रान्तिकेनान्यदप्यभ्युपगतं नीलादिरूपेण दृश्यमानं तज्ज्ञानमेवानेनानुमितम् अन्यज्जगदिति ।

७५३ तन्निरस्यति **विश्वमिति** । किं न दूषणमिति शेषः । निगमयति **अत इति** ॥ ७ ॥

७५९ **वस्तुतः** अनन्तत्वतद्व्यतिरिक्तवस्त्वभावे ।

७६४ 'नासतो दृष्टत्वादि'ति विवृण्वन्नेति निराकरोति **नेति** ।

७६५ 'उदासीनानामपि चैवं सिद्धिरि'ति सूत्रं व्याख्याति **यदीति** ।

७६७ इतश्च तन्मतं न युज्यत इत्याह **देशेति** । प्रलयकालेऽपि सृष्टिः स्यात् । आदिशब्दात् साधननियमोऽपि न स्यात् । तथा च मृद्दण्डचक्रादिभिः पटादिसृष्टिः स्यात् । शून्यस्य करणस्य सर्वत्रापि निर्विशेषत्वात् । जगदुद्भवः पुरुषेच्छानुसारी वस्तुत्वात् सम्मतवदित्याह **पुरुषेति** ।

७६८ **पुरुषाद्भवः** पुरुषेच्छानुसारेण भवः । ननु वस्तुत्वहेतुरसिद्धः । उद्भवधर्मस्य धर्मिवस्तुनो भेदस्यैवाङ्गीकृतत्वादस्माभिरिति नैष दोषः । वस्तुशब्देन पदार्थमात्रस्यैव विवक्षितत्वात् । उद्भवधर्मस्यापि वस्तुत्वाविरोधात् ।

ननु न ह्यसतः सदुत्पत्तिरस्माभिर्विवक्षिता । विश्वस्याप्यभावरूपत्वादित्याशङ्कां परिहरन् 'नाभाव उपलब्धेरि'ति सूत्रं व्याख्याति **सर्वस्यापीति** ।

७६९ विश्वं सदित्युपलभ्यत इति यतोऽनुभूयमानमपि विश्वं न स्यादित्यनुभवविरोधेऽङ्गीक्रियमाणे सति वादिनो वचनं तदर्थश्चानुभूयमानत्वे सत्यपि कुतो भवेत् । तदभावे विश्वमपि प्रतिपत्त्यैव सत्यं भवेत् । सत्यानुभवस्य गतिं प्रतिवादिनोत्प्रेक्ष्यमाणामनूद्य परिहरन् 'वैधर्म्याच्च न स्वप्नादिवदि'ति सूत्रं व्याख्याति **स्वप्नेति** । **किमिति** । कस्माद्धेतोरित्यर्थः ।

७७० निवर्तत एव ज्ञानादित्यत आह **अनादेरिति** ।

७७१ **तस्या निवृत्ते**र्भ्रान्तिकल्पितत्वसम्भवात् । तत्पक्षेऽपि निर्विशेषित्वव्यतिरिक्तत्वात् । तस्याप्रामाण्यगत्या भ्रान्तिकल्पितत्वसम्भवाच्च । तदेवोपपादयति **दृष्टस्येति** । प्रमाणदृष्टस्य विश्वस्य भ्रान्तिकल्पितत्वं स्याच्चेत् प्रमाणदृष्टे तद्बाधे प्रत्ययः कुतो भ्रमो न स्यात् । तन्निदर्शनदृष्टान्तेनावस्तुत्वेनार्थान्तरमुपन्यस्यति **गवामिति** । दृष्टशृङ्गाणां गवामशृङ्गिभावेन सहादृष्टशृङ्गाणां शशानां शृङ्गिता न स्यादित्यसतो जायमानस्य कथं देशकालादिनियम इत्यत आह **अस्माकमिति** । सविशेषेच्छस्येश्वरस्य प्रसादात् ।

७७३ न हि धर्मादिसिद्धिः स्यान्नित्यवाक्यं विनेत्युक्तभङ्गिनाऽस्माकं दृष्टत्वं सत्त्वे हेतुः किन्तु मिथ्यात्व एवेत्याशयवतोऽनुमानमनूद्य परिहरति **दृश्यत्वादिति** ।

७७४ इयं चानुमा मिथ्या न चेत्सत्यायां तस्यां दृश्यत्वहेतोर्वृत्तेर्व्यभिचारो भवेत् । मिथ्यात्वे सत्यपि साधकत्वं किं न स्यादित्यत आह **साधकत्वमिति** ।

७७६ ननु प्रत्यक्षस्य वर्तमानमात्रग्राहित्वाच्छाश्वतिकं बाधाभावलक्षणं विश्वस्य सत्यत्वं कथं ततः सिद्ध्यतीत्यत आह **अतीतेति** ।

७७७ **दृष्टस्य सत्त्वं** साक्षिसिद्धं चेच्छुक्तिरजतादेः सत्त्वस्यापि तथात्वप्रसङ्ग इत्यत आह **दृढेति** । यदबाध्यत्वेन दृढं दृष्टं तदेव हि दृष्टं नाम । शुक्तिरजतादिकं तु दृष्टवदवभासते परं न तु मुख्यदृष्टम् । इतश्च विश्वस्य शुक्तिरजतादिसाम्यं नास्तीत्याह **भ्रान्तेरिति** ।

७७८ सविशेष एव हि नः पक्षे विश्वस्य सत्यत्वरूपः । नन्वापाततोऽबाध्यत्वाच्छुक्तिरजतादेर्विश्वस्य विशेषस्तु तत्त्वविज्ञानाद्देशकालान्तरादिभिः सह बाध्यत्वमेव ह्यस्मत्पक्षे तत्कथं सत्यत्वमित्यत आह **विज्ञानादिति** । **व्यभिचारः** बाधः ।

७७९ दृष्टा ह्यनुमा प्रमेत्यत आह **प्रमेति** । विश्ववदेव विश्वबाधकप्रमायास्तत्साध्यस्य विश्वबाधस्य च बाधः स विरोधो नाम । तथा च विश्वसत्यत्वं निरपवादं सिद्ध्यति । भेद इत्यादेरयमर्थः । यदि भेदो विशेष्यधर्म्यादिग्रहणापेक्षया गृह्यते तर्ह्यन्योन्याश्रयताहेतोर्दुर्ग्राह्यः । तथाहि । घटो भेदेन विशिष्ट इति विशेष्यविशेषणज्ञानापेक्षया भेदज्ञानं विशेष्यविशेषणज्ञानं च भेदज्ञानापेक्षम् । घटात्पटो भिन्न इति धर्मिप्रतियोगिज्ञानापेक्षया भेदज्ञानं धर्मिप्रतियोगिज्ञानं च भेदापेक्षमित्यन्योन्याश्रयत्वात् । गृहीतुमशक्य इति यदुच्यते न तद्युक्तम् ।

७८० **वस्तुनो भेदः स्वरूपमिति** । तस्माद्वस्तुनो ग्रहणसमये भेदस्याग्रहो न सम्भवति ।

७८१ अन्यथा वस्तुना सहैवाग्रहणे स्वरूपग्रहणानन्तरमपि घटस्य पटेन भेदोऽस्तीति वक्तुं न युज्यते । तत्र दूषणान्तरमप्याह **अगृहीत इति** । यदि वस्तुस्वरूपग्रहणेऽपि स्वपरयोरगृहीतो भेदस्तर्ह्यन्यस्माद्भिन्न इति च भेदग्रहः स्यात् ।

७८२ कदा धर्मित्वादीनां ग्रहणमित्यत आह **धर्मित्वेति** ।

७८३ प्रथमतो घटं दृष्ट्वा पश्चात् पटात् घटो भिन्न इति हि धर्मित्वादिग्रहणमित्यत आह **स्वरूपेणेति** । स्वरूपेण सह सामान्यतो गृहीतो भेद एव घटस्य पटाद्भेदः स्तम्भाद्भेद इत्यादिविशेषा गृह्यन्ते । **अन्यत्वं** हि भेदो नाम । एवं चान्योन्याश्रयतादोषेण भेददूषकेण स्वव्याघातात् जात्युत्तरकरौ स्वव्याहतिप्रसङ्गो हि जातिर्नाम । वैधर्म्याच्चेति सौत्रेण चशब्देनास्य शून्यत्ववादिनो मायिनश्च ॥ ८ ॥

७९१ विज्ञानविवर्तवादिनो मतमनुवदति **ज्ञानमेवेति** । **सन्ततिभेदः** ज्ञानसन्तत्याख्यानामात्मनां मिथो भेदः । स्वभेदसन्तानिनां ज्ञानानां स्वानां मिथो भेदोऽभेदश्च तेषामेव ।

७९२ स एवाहमिति गम्यमानो नानासंवृतिभूमिषु विविधा ज्ञानस्थानेष्वन्तःकरणेषु प्रतिभासन्ते । एतन्निरस्यति 'न भावोऽनुपलब्धेरि'ति व्याचक्षाणः ।

७९३ 'क्षणिकत्वाच्चे'ति सूत्रं विवृणोति **क्षणिकत्वादिति** ॥ ९ ॥

७९५ 'विश्वं सत्स्यादसत्स्यात्सदसत्स्यात्सदसद्विलक्षणं स्यात्सदसद्विलक्षणविलक्षणं च स्यादुक्तं सर्वं च न स्यादुक्तं सर्वं च स्यात्' एतत्परिहरन् 'नैकस्मिन्नसम्भवादि'ति सूत्रं व्याख्याति **नेति** ।

७९७ यदि विश्वसद्वाददोषनिवृत्त्यर्थमसदात्मना । एवमेव सदसदादिविलक्षणकल्पना सदसदादिदोषपरिहारार्थं समुच्चितकल्पना त्वसमुच्चितदोषपरिहारार्थमित्युच्यते । तर्हि तैः परिजिहीर्षितैर्दोषैरखिलैरपि लिप्यतेऽयमित्युत्तरम् ।

७९८ तदाह **तत्तदिति** । चलदर्शनश्चञ्चलसिद्धान्तः । सदसत्तया नियमः प्रमाणसिद्धो हि ।

७९९ न चेदं सदसद्विलक्षणमित्यादौ प्रमाणमस्ति । **व्याहतं** स्वव्याहतम् । **अमग्रहः** अप्रमाणग्रहः ॥

८०० 'एवञ्चात्मा कात्स्न्यर्म्', 'न च पर्यायादप्यविरोधो विकारादिभ्य' इति व्याख्याति **वक्तीति** । तत्तस्मा- दन्यथाभावान्नानित्यता चेतनस्येति शेषः ।

८०३ विशेषलक्षणनिवृत्तावेव विनाशो न तु सङ्कोचविकासादन्यथाभावमात्रादिति दर्शयति **ओतेति** ।

८०५ नैवं तस्येतीममेवार्थं प्रपञ्चयति **अन्यथाभाव इति** । तस्य पक्षे अन्यथाभावमात्रमेवानित्यत्वनिमित्तमीरितम् । तस्य रूपादिमात्रयुगेव तथा नाशेन व्याप्तं तया व्याप्त्या चान्यथाभावहेतोश्चात्मनोऽप्यनित्यता भवेत् भाविसंस्थापगमाभावात् तेषां नित्यत्वप्रसङ्ग इत्याकूतम् । चेतनस्य न ह्यचेतनस्य शब्दादिज्ञानं स्यात् । तस्माद्वृक्षस्यात्मता न भवेत् ॥ १० ॥

८१३ 'पत्युरसामअस्यादि'ति सूत्रं व्याख्याति **तच्चेति** । 'यं कामये तं तमुग्रं कृणोमि', 'अहं रुद्राय धनुरातनोमि', 'ब्रह्मद्विषे शरवे हन्त वा उ', 'अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः । विदेहि रुद्रो रुद्रिय महित्वं यासिष्टं वर्तिरश्विना विरावदि'ति श्रुत्यर्थो गुरुभिरुदितः । *तत्त्वप्रदीपिकायां* 'यं यमुग्रं कामये तं तमुग्रं कृणोमि । यं यं ब्रह्माणं कामये तं तं ब्रह्माणं करोमी'ति । इह च तात्पर्यमधिकमवगम्यते । 'अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिरि'त्यादरणीयत्ववर्णनात् । रुद्राय हन्तवे धनुरातनोमि । रुद्रं हन्तुमित्यर्थः । शरवे हन्त वा उ इतिवत् । शरुः संहारशीलः । शृ हिंसायामिति धातोः । विदे हि लेभे । विद लाभ इति धातोः । हविर्भिः प्रभरणे कर्मणा ध्यानेन । 'स्तुहि श्रुतं गर्तसदं युवानमि'ति, 'मृळन्न भीममुपहन्तुमुग्रमि'ति श्रुतिप्रसिद्धम् । हृदयगुहागं सिंहमिव भयङ्करं संहारशीलं स्वभावतोऽपि क्रूरं नरसिंहं स्तुहि । रुद्र सत्तव धनुरादि शिर उत्पिपेषेति रुद्रस्य तु गलावष्टब्धस्य रुद्रस्य धनुषः स्वधनुषः कोटिरेव स्वशिरश्चिच्छिदे । तस्येन्द्रो वर्मरूपेण धनुर्ज्यामच्छिनत् स्वयमि'ति हि तत्रैवोक्तम् । 'कुमारश्चित्पितरं वन्दमानं प्रति ननाम रुद्रोपयन्तम् । भूरेर्दातारं सत्पतिं गृणीषे' इति स्वपितरं वन्दमानं त्वां कुमारं षण्मुखोऽपि प्रतिदिनं ननाम । त्वं तु प्रभूतस्याभीष्टस्य दातारं विष्णुं स्तौषि यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनामिति त्वया विष्णोः पदमुपमं ज्ञानसमीपे न्यधायीति यत् तेन वेदानां गुह्यं नारायणनाम सत्परम्परायामुपदेशेन पालयसि । 'मा शिश्नदेवता' इत्यादेरर्थस्तु *पद्मनाभतीर्थभट्टारकैः* अभिहितः *सन्न्यायरत्नावल्याम्* । **शिश्नदेवा** लिङ्गदेवा भूतभविष्यद्वर्तमानरुद्रा अस्माकमृतं ब्रह्म मागुर्नावगच्छन्नित्यर्थः । *स्कान्दे* च । 'न त्वं वेत्सि स वेत्तीन्द्रो नाहं वेद्मि न शङ्करः । वेत्ति पारं महत्त्वस्य हरेरद्भुतकर्मण' इति । घ्नञ्छिश्नदेवा अभिवर्पसाऽभ्यभूदिति । **शिश्नदेवान्** रुद्रान् घ्नन् मारयन् वर्पसा तेजसाऽभ्यभूत् परमेश इत्यर्थः । 'एको नारायण आसीन्न ब्रह्मा न च शङ्कर' इति तु स्पष्टार्थम् । 'स रुष्टः प्रसन्नो यद्रुष्टः स प्रसन्नस्तस्माद्रुद्रः सम्प्रसादावभूतां न ह्यग्र एतावभूतामि'ति विष्णोः कोपप्रसादजौ रुद्रचतुर्मुखावित्यर्थः । *शान्तिपर्वणि* च । 'नमोऽतिशयसे तस्मै देवानां परमात्मने । नारायणाय विश्वाय निर्गुणाय गुणात्मने । यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसम्भवः । एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदादेशितपन्थानौ सृष्टिसंहारकारकावि'ति । 'देवा वै सत्रमासत ऋद्धिपरिमितं यशस्कामास्तेषां वैष्णवं मखं यश आर्च्छदि'ति । तेषां देवानां मध्ये विष्णुभक्तमार्च्छब्दवाच्यं रुद्रं यशः प्राप्नोत् । 'यज्ञेन यज्ञमयजन्त देवाः' यज्ञेन रुद्रेण यज्ञं विष्णुम् । 'देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम्', 'यो भूतानामधिपतिः रुद्रस्तन्त्रिचरो वृषे'ति । विष्ण्वाज्ञाख्यां तन्त्रिं चरतीति तन्त्रिचरो वृषा समर्थः । वृषभरूपश्च स्तोतृत्वादिना स्वातन्त्र्यादीनि प्रतियन्त एक इत्यादिना प्रलये भवः प्रलयावस्थायां स्थूलदेहाभावः ।

८१९ 'सम्बन्धानुपपत्तेश्चे'ति सूत्रं व्याख्याति **अशरीरत्वत इति**। देहिनो हि कुलालादेरुपादानादिकारणादिज्ञानं दृष्टम्।

८२० 'करणवच्चेन्न भोगादिभ्य' इति सूत्रं व्याख्याति **न चेति**। 'अधिष्ठानानुपपत्तेश्चे'ति योजयति **अधिष्ठान इति**। पत्युर्देहभावाभावयोर्दूषणान्तरेऽप्यभिधत्ते।

८२३ 'अन्तवत्त्वमसर्वज्ञता वे'ति योजयन् केवलानुमानमूलकं पाशुपतागममेवं दूषयित्वा तत्रोक्तदोषं स्वपक्षे परिहरति **न चैतदिति**।

'बुद्धिमनोऽङ्गप्रत्यङ्गवत्तां भगवतो लक्षयामहे। बुद्धिमान् मनोवान् अङ्गवान् प्रत्यङ्गवानि'ति। 'यदात्मको भगवांस्तदात्मिका व्यक्तिः। किमात्मको भगवान् ज्ञानात्मक ऐश्वर्यात्मकः शक्त्यात्मक' इति। 'वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्करः', 'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ती'त्यादौ रुद्रादीनां भगवन्महिमाप्राप्तिवचनाज्जगत्कर्तृत्वासम्भवः प्रतीयते। 'ज्ञानज्ञानो नाज्ञानमिश्रज्ञानः। सुखसुखो न दुःखमिश्रसुख इती'ति *तत्त्वप्रदीपिकायाम्*। 'श्रवणोत्थं प्रियं दर्शनोत्थो मोदः। भोगोत्थः प्रमोदः स्वरूपभूत आनन्दः। तत्तत्प्रवर्तकतया च तत्तद्व्यपदेशः। शिरः प्रियस्थितं तस्य परेयं प्रियनामकम्। मोदप्रमोदयोर्बाहू मोदनाच्च प्रमोदनात्। मोदप्रमोदनामानावानन्दश्चाततत्वतः। मध्यमानन्दसंस्थं च ब्रह्म सृष्ट्यादि बृंहयत्। पुच्छं प्रधानवायौ च ब्रह्माख्ये संस्थितं सदा। अभेदोऽप्यविशेषोऽपि परमैश्वर्ययोगतः। देहदेहिवदेवासौ पञ्चमावस्थितो हरिरि'ति *यजुःसंहितायाम्* इति च। नित्यगुणात्मनो नित्यगुणस्वरूपान्न तु प्राकृतात्।

८३१ नन्वेकस्य विष्णोर्देहदेहिभावादिकं विरुद्धमित्यत आह **मानवत्त्वादिति**।

८३२ ननु शिवस्यापि बहुरूपत्वेन विश्वस्रष्टृत्वं श्रूयते *श्वेताश्वतरश्रुतौ*। 'विश्वस्य स्रष्टारमनेकरूपं विश्वस्यैकं परिवेष्टितारम्। ज्ञात्वा शिवं शान्तिमत्यन्तमेती'त्यत आह **शिवादीति**। 'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति', 'यो देवानां नामधा एक एव तं सम्प्रश्नं भुवनायन्त्यन्ये'। उक्तः समन्वयश्च सर्वश्रुतीनां विष्णुवाचकत्वे मानम्। अपरे हरावपरवाचिनः शिवादिशब्दा हरौ वर्तन्त इत्यर्थः।

८३५ लैङ्गादि पुराणानि भागवतेतिहासपुराणादिभिर्विरुद्धत्वात् पाशुपतागमोक्तार्थे प्रमा न कथम्। समबलेषु पुराणेषु लैङ्गादीनां तत्र मानत्वमित्यत आह **तद्विरुद्धेष्विति**। लैङ्गादीनि रुद्रोत्तमत्ववाचीन्यपि स्वेष्वेव विष्णोः क्वचित्सर्वोत्तमत्ववचनाच्च परस्परविरोधतो भागवताद्युक्तार्थविरुद्धेष्वर्थेषु नो मानं स्युः। शैववैष्णवयोः समब्राह्मविरोधाच्च रुद्रोत्तमत्वस्य विवक्षितोऽर्थोऽवसीयते। वैष्णवादिषु भागवतादिषु देवतान्तरस्य सर्वोत्तमत्वानियमाच्च। 'त्वं च रुद्र महाबाहो मोहशास्त्राणि कारये'ति वचनात् पाशुपतागमस्य मोहार्थमुक्तितश्च। 'एको विष्णुरेव सर्वगुणान्वितो नान्यः'। न चैतावता लैङ्गादीनामप्रामाण्यप्रसङ्गः। तेषु पूर्वपक्षप्राचुर्ये सत्यपि विष्णूत्तमत्व एव तात्पर्यावगमात्। गणेशादीत्यादिशब्दाद्धिरण्यगर्भेश्वरमतम्॥ ११॥

८४० भैरवीत्यादिशब्दान्मायाकुण्डलिनी क्रियेत्यादीनि । 'उत्पत्त्यसम्भवादि'ति सूत्रं व्याख्याति **तन्नेति** ।

८४२ 'न च कर्तुः करणमि'ति सूत्रं व्याख्याति **तच्चेति** ।

८४३ 'विज्ञानादिभावे वा तदप्रतिषेध' इति सूत्रं व्याख्याति **नेति** । **द्वयं** ईश्वर ईश्वरी चेति ।

८४५ **तत्पक्षः** शिवकर्तृत्वपक्षः । **तन्मतं** वाममतम् ।

८४८ 'ज्ञानेष्वेतेषु ज्ञापयन्ती'ति ज्ञानानि साङ्ख्यादिशास्त्राणि तेष्वेतत्पञ्चरात्रं प्रमाणत्वेन विशिष्यते ।

८४९ **एकान्तभावो** नियतभक्तिः । 'कथितो हरिगीतासु समासविधिकल्पितः । एष धर्मो जगन्नाथात्साक्षान्नारायणान्नृप । नारदेन तु सम्प्राप्तः सरहस्यः ससङ्ग्रहः' इति च *मोक्षधर्मे* । एष धर्मः पञ्चरात्रोदितः । पञ्चरात्रस्य कृत्स्नस्येत्युत्तरवाक्यात् । 'वेदार्थपूरकं ज्ञेयं पञ्चरात्रं यतोऽखिलम् । तत्सङ्क्षेपश्च गीतेयं तस्मान्नास्याः समं क्वचिदि'ति *ब्रह्मवैवर्ते* । 'ऋषीनुवाच तान् सर्वान् अदृश्यः पुरुषोत्तमः । कृतं शतसहस्राणां श्लोकानां हि तमुत्तममि'ति *शान्तिपर्वणि* । श्लोकशब्दोक्तस्य पञ्चरात्रस्य । वेदा इत्यारभ्य इतिहासः पुराणं विद्योपनिषदः श्लोका इति श्रुतौ वचनं चास्ति पञ्चरात्रप्रामाण्यस्थापकम् ।

८५२ ननु 'वासुदेवात् सङ्कर्षणो नाम जीवो जायते । सङ्कर्षणात् प्रद्युम्नो नाम मनो जायत' इति पञ्चरात्रे जीवस्योच्यमानाया उत्पत्तेरसम्भवात् पञ्चरात्रं दूष्यत इत्यत आह **उत्पत्तिरिति** ।

८५३ तत्र पञ्चरात्रेऽपि जीवस्य घटवद्भूत्वाभावो न कथ्यते । **तद्वचः** पञ्चरात्रवचः । वासुदेवादित्यादेरभिप्रायमाह **जीवेति** ।

८५६ वासुदेवात् सङ्कर्षणः सङ्कर्षणात् प्रद्युम्नः प्रद्युम्नादनिरुद्धः सर्व एते ह भगवन्तो वासुदेवा इत्यादेरभिप्रायमाह **एवमिति** । **एवं** अनेन क्रमेण । ननु 'तत्र भगवान् शाण्डिल्यः षडङ्गं वेदमधीत्य तस्मिन्महत्याम्नाये निष्ठामधिगच्छन् यः सर्वपरमधर्मो यस्मान्न भूयोऽस्ति कथं तं विद्यामित्येवं बलवद्विवेकमातिष्ठमानो बभूव । तत्र भगवते शाण्डिल्याय भगवता सङ्कर्षणेन व्यक्तेन शब्दवच्छास्त्रं प्रोक्तमि'ति हि पञ्चरात्रे च 'चतुर्षु परं श्रेयो लब्ध्वा शाण्डिल्य इदं शास्त्रमधीतवानि'ति च ।

८५८ तस्माद्वेदविनिन्दकत्वादप्रामाण्यं तस्येत्यत आह **यदीति** । 'यदि विद्याच्चतुर्वेदान् साङ्गोपनिषदान् द्विजः । न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः । इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यती'त्यत्र यथा पुराणानां वेदार्थज्ञानपूरणमेवाभिप्रेतम्, तथा पञ्चरात्रादपीति । तस्माच्छाण्डिल्यवर्तनि शाण्डिल्यमार्गे पञ्चरात्रे कुतो द्वेषः ।

८६१ ननु 'न भृशं वदेत् समः सर्वेषु भूतेष्वि'त्यादिवचनविरोधान्मुमुक्षोः किमनया परपक्षनिन्दनयेत्याशङ्का-परिहाराय श्रुतिं दर्शयति **अन्धन्तम इति**। 'अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां रताः। ततो विद्यामविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत' इति। ये विद्यायां रताः। विद्यायामेव रता न त्वविद्यां निन्दन्ति। **भूय** इवेति क्रूरत्वज्ञापनार्थम्। अविद्यायाः सदोषत्वेन ज्ञाताया एतामेवातिपीडकत्वन मृत्युसंज्ञां तीर्त्वेति भावः। 'न भृशं वदेदि'ति सद्विवक्षया। समत्वं तु निन्द्येषु निन्द्यमानेषु मानं नेत्यादिकमेव। 'श्रेष्ठं पादं हरेत्तत्र भवेत्पादश्च कर्तरि। पादस्तेषु सभासत्सु यत्र निन्द्यो न निन्द्यते' अनेन अश्रेष्ठो भवति मुच्यन्ते सभासदः। 'एनो गच्छति कर्तारं निन्द्यार्हो यत्र निन्द्यत' इत्युद्योगपर्वणि। 'कर्णौ पिधाय निरयाद्यदकल्प ईशो धर्मावितर्यघृणिभिर्नृभिरस्यमाने। छिन्द्यात् प्रसह्य रुशतीमसतां प्रभुश्चेज्जिह्वामसूनपि ततो विसृजेत्स धर्मः' इति च *भागवते* ॥ १२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीकायां त्रैविक्रमार्यकृतौ नयचन्द्रिकायां द्वितीयाध्यायस्य द्वितीयः पादः ॥ २-२ ॥

* * *

अथ द्वितीयाध्यायस्य तृतीयः पादः

८६३ अथ अध्यायशेषेण वचनानामभिभूतादीनामुत्पत्त्यनुत्पत्त्यादिवाचिनां विषयविवेचनेनाविरोधं दर्शयति **अथेति**।

८६५ युक्तीर्दशयति **अनुभूतीति**।

८७१ 'न वियदश्रुतेरि'ति सूत्रं व्याचष्टे **प्रकृतिरिति**। 'इदं ससर्जे'त्यादिश्रुतिषु प्रकृत्यादीनां सामान्येन पराधीन-विशेषिताजनिमत्त्वं नामोदितम्। अन्यथा आकाशादीनां स्वरूपोत्पत्त्यङ्गीकारे। यद्यनाकाशतेत्यादेरयमर्थः। यदि पूर्व प्रलये नाकाशतेति केनचिदभ्युपगम्यते। यदि तेनैव मूर्तसम्पूर्णता नाकाशतेति चेष्यते। तत्रावकाशो नास्तीति लोकव्यवहारानुरोधात् तर्हि तत्पक्षे प्रलयकाले मूर्तनिबिडं जगद्भिद्यते। किन्त्वस्मिन्नाकाशे बहूनि मूर्तद्रव्यानि स्थितानि सन्ति। तस्मादत्र मूर्तद्रव्यान्तरस्य स्थित्यर्थमवकाशो नास्तीत्येव तस्य व्यवहारस्याभिप्रायो न पुनरवकाश एव नास्तीति।

८७५ अत्रेत्युक्तत्वात् सामान्यत उक्तामुत्पत्तिं विशिनष्टि **अत इति**। लवत्रुट्यादिविशेषवान् कालस्तूत्पद्यते। तत्तदा प्रधानं विकृतेरपि प्रधानमपि विकृतेः सृष्टमित्यादि ॥ १ ॥

८८२ 'एतेन मातरिश्वा व्याख्यात' इति सूत्रं व्याख्याति **एवमिति** । पूर्वाधिकरणोक्तयुक्तीनामनुकर्षणार्थ एवं-शब्दः । ज्ञानस्य नित्यत्वान्नायमन्यवदनित्यः । शरीरोत्पत्तिकारणान्नापि साक्षान्नित्यः । अतो नित्यसमः । पराधीन-विशेषेण शरीराभिमानोत्पत्त्याख्येन । पूर्वं सूक्ष्मत्वेन सतः क्षीरादेर्दार्ढ्यादिस्थूलत्वेन भावः स्थूलताभावः । पूर्वं कुण्ड-लादिरूपस्य हिरण्मयादेः पश्चात्कटकादिभावेन पूर्वशब्दविलोपस्तद्वशतैव हि । तद्वशता हि व्यक्तिरेव हि ॥ २ ॥

८८६ 'असम्भवस्तु सतोऽनुपपत्तेरि'ति सूत्रं व्याचष्टे **स्वतन्त्रत्वादिति** ॥ ३ ॥

८८७ 'व्यतिरेको गन्धवत्तथा च दर्शयती'ति सूत्रं विवृणोति **अच्छेद्यस्येति** ।

८८९ **विभागाय नयति** विभागार्थं प्रवर्तयति । **इत्यभिधीयते** इत्यभिप्रायोऽनेन सूत्रेणाभिधीयते ॥ १३ ॥

८९० परेशस्य सर्वशक्तित्वेन सर्ववैलक्षण्य **एवं स्थिते** सत्यपि **केचिन्मूढा** अनीशस्य जीवस्य तेनैक्यमाहुः । तद् 'योऽहं सोऽसौ योऽसौ सोऽहं तत्त्वमसी'त्यादिश्रुतिभिर्नेति परिहरति 'पृथगुपदेशादि'ति विवृण्वन् ।

८९१ भिन्नोऽचिन्त्यः परमो जीवसङ्घादित्यादि पृथगेवाभिधीयते । मुक्तिपर्यन्तमेव संसारिणः परमात्मना भेद इत्यत आह **प्रज्ञेति** । सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितम् । प्रज्ञानेत्रो लोकः प्रज्ञाप्रतिष्ठा प्रज्ञानं ब्रह्मेति । अलोको लोकविलक्षणत्वान्मुक्तवर्गो प्रज्ञानेत्रो ब्रह्मनेत्रकः । 'एतमानन्दमयमात्मानमुपङ्क्रामती'त्यादि । 'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति', 'एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभि-निष्पद्यते । 'स तत्र पर्येति जक्षन्क्रीडन्रममाण' इत्याद्याः श्रुतयः । आचक्ष्वेत्याद्यारण्यपर्वणि । आद्यः स्थिरचराणां वेदगर्भः सहर्षिभिः । योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः । भेददृष्ट्येत्यादिभागवतवाक्यार्थस्तु गुरुतमैरेवोक्ते *भागवतटीकायाम्* । 'अभिमानेन पूर्णज्ञानेन सङ्गत्य लये परमात्मानं प्रविश्य पूर्वं प्रज्ञायते । उच्चनीचादिभावेन जायते । अगुणव्यतिकरे श्वेतद्वीपे निर्गच्छति । गुणव्यतिकाराभावेऽप्युच्चनीचादि पूर्ववत् । विष्णोश्चैव विमुक्तानां न कदाचन गच्छती'ति *गारुड* इति । 'ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्करीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विममीत उ त्व' इति । मुक्तब्रह्मणां मध्ये त्व एको ऋचां पोषं मुख्यार्थं पुपुष्मान् सम्यग्व्याख्यानेन पोषितवानास्ते । एको गायत्रं साम गायति । शक्कर्याख्येषु सम्बन्धमेकः । पञ्चरात्रादिजातविद्यां वदति । 'एको यज्ञस्य मात्रां विष्णो रूपमेव वीक्षते । मर्त्यं देहं परित्यज्य चितिमात्रात्मदेहिनः । चितिमात्रेन्द्रियाश्चैव प्रविष्टा विष्णुमव्ययम्', 'यं यमभिकामो भवति । सङ्कल्पादेवास्य समुत्तिष्ठति । स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते । तस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते । सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विप-श्चिता । तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवती'ति । तद्गुणाः प्रकृतिगुणाः शोकाद्याः । हृदयस्य विष्णो-र्भवति । स्वबुद्ध्याऽपीति शेषः । स दुखाद्विमुक्त आनन्दी भवति । 'जगद्व्यापारवर्ज्यम्', 'अथ यदैनं मुक्तोऽनु-प्रविशति । मोदते च प्रमोदते च । कामांश्चैवानुभवती'ति । स वा एष एतस्मान्मर्त्याद्विमुक्तो चिन्मात्रो भवत्यथ

तेनैव रूपेणाभिपश्यत्यभिशृणोति । अभिमनुतेऽभिविजानाति तामेतां मुक्तिरित्याचक्षते । इत्यादिमानतः कुत्रचिदभिन्नता कथमेव जीवेशयोः । यदित्यादेरयमर्थः । विश्वस्य सदसद्विलक्षणत्ववादिनो भेदमिथ्यात्वस्य साध्यधर्मस्य सदसद्वादोऽपसिद्धान्तो हि साध्यधर्मः । तदुभयमपि न चेत् तत्पक्षविशेषणमसिद्धम् । सदसद्विलक्षणश्चेदप्रसिद्धविशेषणः पक्ष इत्याकूतम् । न सिद्धं तदित्यस्यान्योऽप्यर्थः । न मिथ्यात्वविशेषणं दृष्टान्तेन सिद्धम् । न हि चन्द्रभेदः सदसद्विलक्षणोऽस्मत्पक्षे । अतः साध्यविकलो दृष्टान्त इत्याशयः ।

९०६ ननु चन्द्रभेदः सदसद्विलक्षणो जडत्वाद्व्यतिरेकेण ब्रह्मवदित्यनुमानेनानिर्वचनीयत्वं साध्यते दृष्टान्तस्येत्यत आह **अनुमानेन चेदिति** । एतदनुमानस्यापि पक्षस्याप्रसिद्धविशेषणत्वात् तद्विशेषणमनुमानान्तरेण साध्यं तस्यापि तथेत्यनवस्था ।

९०७ ननु 'नासदासीन्नो सदासीत्तदानीमि'त्याद्युक्ता । 'तम आसीदि'त्युच्यमानमुपपादनं परिशेषात् सदसद्विलक्षणं सिद्ध्यति हीत्यत आह **नेति** । 'आनीदवातं स्वधया तदेकमि'ति परिशिष्टो ह्यसौ परमात्मा । तदा प्रलये । 'मूर्तं सदिति सम्प्रोक्तममूर्तमसदुच्यते । मूर्तामूर्ततरद्ब्रह्म न सत्तन्नासदुच्यत' इतिवत् । पृथिव्यादिसतो वाय्वाद्यसतश्च वैलक्षण्यमेवात्राभिप्रेतम् । न त्वनिर्वचनीयत्वम् । न हीदं सदसद्विलक्षणमिति कुत्रचित्प्रत्यक्षम् । अथ मतम् । 'प्रपञ्चो यदी'त्यादिश्रुतिबलात् प्रपञ्चस्य बाधोऽङ्गीकर्तव्यः । अन्यथा श्रुत्युदिताद्वैतहानेश्च । असतः ख्यात्ययोगात् सतो बाधायोगात् ख्यातिबाधान्यथाऽनुपपत्त्या अनिर्वचनीयो भेद इत्यत आह **न चार्थापत्तिरिति** । बाधायोगात् सत इत्यत्र भेदस्य सत्त्वाङ्गीकारे बाधायोगः प्रसज्यत इत्यभिप्रायः । नायमस्माकमतिप्रसङ्गः । किन्त्विष्टस्य भेदबाध्यत्वस्य प्राप्तिरेव ।

९११ नन्वनयाऽर्थापत्त्या शुक्तिरजतस्यानिर्वचनीयत्वं साधयामः । त्वयाऽपि भ्रान्तिविषयस्य ख्यातिबाधयोरङ्गीकृतत्वात् । पुनस्तद्दृष्टान्तेन भेदस्यानिर्वचनीयत्वं साधयाम इत्यत आह **न हीति** । बाधशब्दस्य विनाशार्थमङ्गीकृत्य 'सतो बाधायोगादि'ति वदता विवक्षितम् । यत्सत्तन्न नश्यतीति व्याप्तिः कुत्रचित् सम्मता दृश्यते । घटादेः सत एव बाधदर्शनात् ।

९१२ अनिर्वचनीयवादिनः पक्षेऽथ किञ्चिदपि बाधो न घटत इत्यभिप्रायेणाह **कश्चेति** ।

९१४ न हि कालत्रयेऽप्यसद्विलक्षणमिति वक्तुं प्रयोगत इत्याकूतम् । अत्यन्तासति निरुपाख्यापरपर्याये काचन प्रतीतिः न सम्भवति किमुत सत्त्वेन प्रतीतिरित्याशयेन असतः ख्यात्ययोगादित्युच्यमानं निरस्यति **प्रतीतिरिति** ।

९१५ सदृशदर्शननिमित्तकं ज्ञानं ह्युपमा प्रमाणम् । कुत्राप्यनिर्वचनीयदर्शनात् तदपि नास्ति भेदोऽनिर्वचनीय इत्याह **न चोपमेति** । घटात्पटो भिन्न इति प्रत्यक्षाद्भेदस्य सत्यत्वमेवावगम्यते च । तस्माद्भेदमिथ्यात्वानुमानं प्रत्यक्षविरोधेन कालात्ययापदिष्टश्चेत्यर्थः ।

९१६ शास्त्रेत्युक्तमेवोपपादयति **किञ्चिदिति** । अनुभूयते चात्मनेति शेषः । 'यः सर्वज्ञः सर्ववित् । सर्वैर्युक्ता शक्तिभिर्देवता से'ति श्रुतिः । यद्यस्यानन्ययोगेन प्रथमग्राहकं तद्धि तत्रोपजीव्यप्रमाणम् । तच्चेश्वरे श्रुतिरात्मन्यनुभूतिः । यदा यदि हि तत्तर्हि ।

९१९ ननु यः सर्वज्ञः स सर्वविदित्यादिवाक्यं धर्मिणो ब्रह्मणः स्वरूपमात्र एव प्रमाणं न तु सर्वज्ञत्वादिधर्मे । तस्य भेदापादकत्वेन हेयत्वात् । तस्मान्नोपजीव्यप्रमाणविरोध इत्यत आह **यदिति** ।

९२० एकेत्यादेरयमर्थः । परमात्मा सर्वज्ञ इत्येकविज्ञानेन हि धर्मिस्वरूपं धर्माश्च ज्ञायन्ते । अस्य विज्ञानस्यावयवभेद एव विद्यते न तु स्वरूपभेदः । तस्मात् तद्द्वयमपि मानसिद्धं भवेत् । विशब्दस्तस्य ज्ञानबाध्यविषयत्वद्योतकः । तयोः स्वरूपमात्रसर्वज्ञत्वादिधर्मयोर्मध्ये एकं स्वरूपमात्रं प्रामाणिकम् । न चेत् तद्द्वयमप्यप्रामाणिकं नो भवेत् । न चाभेदागमः क्वचिद्भेदश्रुतेरुपजीव्यः । तस्याः प्रत्यक्षाद्यानुकूल्येन बलिष्ठत्वात् ।

९२३ ननु विमतमुपादानाद्यपरोक्षवित्कर्तृकं कार्यत्वात् घटवदित्यनुमयैवेशो ज्ञायत इत्यत आह **सर्वज्ञेति** । अनेनेति सामान्यत उक्तमेवात्र विशेषितम् ।

९२४ ननु यदुक्तमैक्यश्रुतेः उपजीव्यप्रमाणविरुद्धत्वं तन्नास्ति । दुःखाद्यनुभवस्य भ्रमत्वादित्यत आह **न दुःखेति । आदि**शब्दादिच्छादयः ।

९२७ 'तरति शोकमात्मविदि'त्यदुःखिता श्रुतिमनिन श्रोत्रप्रत्यक्षाख्येन तच्छ्रोत्रप्रत्यक्षत्वं तया मानत्वेन गृहीतं चेद्दुःखानुभवे साक्षिप्रत्यक्षे कस्माद्भ्रमत्वं गृह्यते । तद्दुःखमनुभूयमानस्य दुःखादेः केनचिन्मानाभावेन बाधाङ्गीकारेऽतिप्रसङ्गमाह **बाध इति** ।

९२८ तदेव प्रपञ्चयति **कोऽपीति** । शुक्तिरजतादिज्ञानस्य भ्रमत्वं घटादिज्ञानस्याभ्रमत्वं च अनुभवगम्यमिति यत्तस्मात्साक्ष्यनुभवस्याव्यभिचारित्वात् भ्रमत्वेनानुभवसिद्धयोर्धर्मयोर्मध्ये एकस्यात्मदुःखानुभवस्य भ्रमता परस्य निर्दुःखत्वश्रुतिश्रवणस्य अभ्रमता कुतः कल्प्यते । क्वचिद्दुःखानुभवादौ विशेषा ज्ञानेच्छासुखदुःखादयः प्रत्यक्षादिप्रमाणानां प्रामाण्यग्राहिणः । साक्ष्याख्यप्रमाणान्निश्चयवान् हानोपादानादिव्यवहारोऽखिलोऽप्यभिधीयते । प्रामाण्यानिश्चये कथं व्यवहारः प्रवर्तते । साक्षी तु स्वयमेव स्वप्रामाण्यं निश्चिनोति । स्वयंप्रकाशत्वात् ।

९३२ एवं व्यवहारान्यथाऽनुपपत्तितर्केण साक्षिनिर्दोषत्वमङ्गीकार्यमित्याह **तस्मादिति** ।

९३३ प्रकृतमुपसंहरति **उपजीव्येति** ।

९३४ 'तद्गुणसारत्वात्तद्व्यपदेशः प्राज्ञवदि'ति योजयन् अभेदवाक्यानां गतिं दर्शयति **तथाऽपीति** । इत्यादीनि पौराणानि वाक्यानि । अस्ति हि सिंहो देवदत्त इत्याद्यभेदव्यपदेशः । देवदत्तस्य वीर्यादिगुणैः सिंहसादृश्यात् । मुक्तस्य

तु क्षीराब्ध्यादिस्थिततद्रूपापेक्षया स्थानैक्यं विशिष्यते। निर्दुःखत्वालम्बुद्धिगोचरमुखवत्त्वादिसादृश्यं च। जडानामीशप्रधानकत्वमीशतन्त्रत्वं चेति द्वयमेव तद्भेदव्यवहारनिमित्तम्। सत्तादिसादृश्यमत्यल्पम्। ईशस्य धर्मानाशात्।

९४० ईशस्य धर्मानीशाद्भेदेन पश्यतो दुःखे प्रमाणमाह **यथेति**। पर्वते दुर्गस्थले शिखरे वृष्टमुदकं यथाऽधो धावति। एवं भगवतो धर्मान् भेदेन पश्यन् पुरुषः तान् दृष्ट्वा अन्वेव विपरीतत्वेन धावति। दर्शनानन्तरमेव नरकं प्रति धावतीत्यर्थः। 'भेदाभेदनिवृत्त्यर्थमेवशब्दोऽवधारकः। समाधिकनिवृत्त्यर्थमद्वितीयपदं तथा। तद्भेदेऽप्येकशब्दो यतोऽवयविनि स्थितः। एकमेवेत्यतः प्राह नारायणमियं श्रुतिः। समेऽद्वितीयशब्दः स्यादद्वितीयोऽसमत्वतः। अधिकः कुत एव स्यादित्याह परमा श्रुतिरि'ति *सामसंहितायाम्*। इह ब्रह्मणि किञ्च नाना नास्ति। स्वगुणावयवादिभेदानामेकतमोऽपि नास्ति। इत्याकूतम्। 'य इह नानेव पश्यति। योऽभेदं भेदाख्यमुभयं वा पश्यति मृत्योः स मृत्युमाप्नोति' मृत्युशब्देन मरणवाचिनाऽधिकदुःखं लभ्यते। अधिकदुःखादधिकदुःखमन्धन्तमः समाप्नोतीत्यर्थः। तस्माद्ब्रह्मणि कस्माचिदपि वस्तुनो भेदाभेदौ न द्रष्टव्यौ। स्वगुणादिभिरभेद एव जीवादिभ्यो भेद एव ॥१४॥

९४३ यस्तु जीवादिभिः परमेश्वरस्य भेदाभेदौ पश्यति तत्पक्षनिग्रहोऽपि प्राप्तः। 'प्रज्ञानेत्र' इत्यादिना भेदस्य मुक्तौ वचनादित्याह **भेदस्येति**।

९४५ चेतनत्वादित्यादिशब्दात् सत्यम्। अत्र प्रमाणमाह **नेति**। विष्णोः समुदायेन भेदाभेदौ न ह्येकस्यैव समुदायत्वम्। स्वगुणादिभिरभेदः। अभेदश्रुतीनां गत्युक्तिमुखेन 'अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्यमधीयत एव' इत्यस्यार्थं सूचयति **अभेदेति**। उक्तं च *तत्त्वदीपिकायाम्*। अंशिनो यत्तु सामर्थ्यं जगत्सृष्ट्यादौ यत्स्वरूपं ज्ञानानन्दादि या स्थितिर्देशतः कालतो व्याप्तत्वेनेति।

९४९ 'प्रकाशादिवन्नैवं पर' इति सूत्रं व्याख्याति **सूर्येति**। परमांशत्वेऽपि संसारी परमात् पृथक्। 'अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवदि'ति सूत्रं व्याख्याति **देहेति**। अपरैः न च। अपूर्णशक्तिजीवांशैर्मुख्याभेदो नास्ति च।

९५५ अनेन 'असन्ततेश्चाव्यतिकर' इत्यस्यार्थः सूच्यते। 'आभास एव चे'ति सूत्रं व्याख्याति **अंशेति**।

९५६ तत्र प्रमाणमाह **यथेति**। 'यथैषा पुरुषस्य छाया तथैवैतस्मिन्परमात्मन्याततमेतज्जीवजातम्' परमात्मनः छायाप्रतिबिम्बभूतमित्यर्थः। एते जीवाः परमात्मनः पादा अपि पुरुषपादवदभिन्ना न, किन्त्वत्यन्तभिन्ना एकदेशपरिमिताश्च। व्यासनरसिंहप्रादुर्भावतया स्थितास्तु **तस्य** परमात्मनो ज्ञानवीर्यादिगुणा एव। तथाऽपि प्रत्येकं सर्वगुणपूर्णश्च।

९५८ एतत्पादार्थं सङ्क्षेपेणाह **अक्षयेति**। ब्रह्ममुख्यप्राणयोर्देव्यौ प्रकृत्यभिमानिन्यौ च जाते। तेषां ब्रह्मादीनामिमे जन्मादयो धर्माः सदा तदधीनाः। एतेषां मोक्षानन्तरं च तदधीनत्वं न हीयते ॥ १८ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीकायां त्रैविक्रमार्यकृतौ नयचन्द्रिकायां द्वितीयाध्यायस्य तृतीयः पादः ॥ २-३ ॥

* * *

अथ द्वितीयाध्यायस्य चतुर्थः पादः

९६६ पादसङ्गतिं दर्शयति **श्रुत्यर्थ इति**। विरुद्ध इव न तु विरुद्धः।

९६८ पूर्वपक्षयुक्तीः सिद्धान्तयुक्तीश्च दर्शयति **दृष्टेति**।

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीकायां त्रैविक्रमार्यकृतायां नयचन्द्रिकायां द्वितीयाध्यायस्य चतुर्थः पादः ॥ २-४ ॥

समाप्तोऽयमध्यायः ॥ २ ॥

श्रीकृष्णार्पणमस्तु ॥

* * *

अथ तृतीयाध्यायः

अथ तृतीयाध्यायस्य प्रथमः पादः

९६९ अस्मिन्पादे पूर्वपक्षयुक्तीर्दशयति **स्वाभाविकेति** ।

९७१ सिद्धान्तयुक्तीर्दर्शयति **गुणाधिक्येति** ।

९७३ 'रेतः सिग्योगोऽथेत्यत्राथशब्दस्य कृत्यमाह बीजेति । दिवः स्थासून् गच्छति स्थासुभ्यः पितरं पितुर्मातरमित्युक्तस्य बीजपुरुषयोनीनां सङ्गतिनियमस्योज्झितिमाह 'कारणतो भगवत्प्रसादातिरेकतो विशेषकारणादेव विशेषाज्जनिरुच्यते । सामान्यजननं चैव नृणां सामान्यहेतुत' इति वचनात् ॥ २० ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीकायां त्रैविक्रमार्यकृतायां नयचन्द्रिकायां तृतीयाध्यायस्य प्रथमः पादः ॥ ३-१ ॥

* * *

अथ तृतीयाध्यायस्य द्वितीयः पादः

९७४ अत्र पूर्वपक्षयुक्तीर्दर्शयति **पश्चाददृष्टीति** ।

९७६ सिद्धान्तयुक्तीरपि दर्शयति **अशक्येति** ।

९७८ 'सन्ध्ये सृष्टिराह ही'ति सूत्रं व्याख्याति **वासना इति** । मुद्रामुद्रितप्रतिमुद्रान्यायेनान्तःप्रविष्टपदार्थाकारा वासना यदा तत्र । यदि तन्मनो नास्ति ।

९८१ **जाग्रत्त्वं** जाग्रत्त्वप्रतीतिः ।

९८२ विषयेऽननुभूते सति तत्संस्कारो नोत्पद्यत इत्यत्र प्रमाणमाह **अदृष्ट इति** ।

९८३ नन्वकिञ्चनेन कदाचिदप्यश्रुतमदृष्टं राजभोगादिकं स्वप्ने दृश्यते हि । तस्मात् कथमेषा श्रुतिपुराणोक्तिर्युज्यत इत्यत आह **अनादित्वादिति** । अनादिकालजन्मसु कुत्रचिद्राजभोगादेरपि दृष्टिश्रुतिसम्भवादनादिमनसि तद्वासना

स्यादिति भावः । कदाचिदित्यादेरयमर्थ उच्यते । यत्कदाचिद्दर्शनायोग्यं शशविषाणादिकं स्वप्ने दृश्यते तदपि जागरिते विभागतो दृष्टमेव हि समदेशकालतया दृश्यते । स समानाधिकरणप्रत्ययो भ्रमश्च दृष्टो हि । जागरिते घटस्तद्विभागेन कस्यचिद्विषाणं च ।

९८४ 'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वादि'ति सूत्रं व्याख्याति **वासनेति** । स्वप्नद्रष्टुर्भेदे तद्भेदस्य भेदान्तरापेक्षयाऽनवस्थितिः । अभेदे स्वप्नबाधे द्रष्टुरपि बाधप्रसङ्गः । भेदाभेदे स्वव्याहतिः । तस्माद्भिन्नाभिन्नाभ्यामनिर्वाच्यत्वमङ्गीकर्तव्यम् । अत एवानिर्वाच्याविद्यामयः स्वप्न इत्येतत्सूत्राभिप्राय इति विवक्षया विकल्पयते ।

९८५ विकल्पमनूद्य दूषयति **भेद इति** । न हि दृष्टभेदयोः स्थाणुपुरुषयोर्भेदादिप्रश्नो युज्यते ।

९८६ वन्ध्या पुत्रवती न वेति प्रश्नस्य 'स्वव्याहति'दोषः । ब्रह्मानन्तगुणमित्युक्ते चेतनानां तारतम्ये किं प्रमाणमित्यस्य 'असङ्गतिः' । प्रत्यक्षतो निश्चितभेदयोः स्थाणुपुरुषयोर्भेदोऽस्ति न वेत्यस्य 'सिद्धार्थतामि'त्येतत्पर्वततृणानीत्यस्य 'वैफल्यम्' ।

९८८ **परिहारे**ऽपीत्यादेरयमर्थः । प्रश्नपरिहाररूपेऽनुमानेऽपि । प्रतिज्ञायां तु प्रतिवादिनः सिद्धत्वं दूषणम् ।

९८९ तदन्यस्य हेतोर्दृष्टान्तस्य च उभयवादिसिद्धत्वेन व्याप्तिमतोऽपि हेतोर्यदन्यैः कारणान्तरेणासाधकत्वमुच्यते तन्निराकरोति **आश्रयेति** ।

९९० ननु नृशृङ्गमस्ति शृङ्गत्वाद्गोशृङ्गवदित्यादिराश्रयाभावाद्धचप्रमाणमित्यत आह **दोष इति** । नृशृङ्गं नास्ति योग्यत्वे सत्यनुपलभ्यमानत्वाद्वैधर्म्येण घटवदित्यादौ यत्र प्रत्यक्षादिव्याहतता नास्ति तादृशस्यार्थस्य साधने कोऽतिप्रसङ्गः ।

९९१ कथमनुमानस्य स्वयमेव प्रमाणस्य प्रत्यक्षादिविरोधे दौर्बल्यमित्याकाङ्क्षायामाह **प्रत्यक्षेति** । अमूलाः प्रत्यक्षागमाख्यमूलरहिता न्यायाभासाः स्युः । अन्यस्य न्यायस्य क्वचिद्युक्तेर्मूलभूतस्य न्यायस्य पुनरपि तौ प्रत्यक्षागमावेव मूलं स्याताम् । तथा हि । परचक्षुष्मत्तानुमानस्य रूपज्ञत्वाख्ययुक्तिर्हि ज्ञापयति । विमतो रूपज्ञोऽश्रुतरूपविशेषस्य व्यवहर्तृत्वात् सम्मतवदिति । एवमनुमानमूलस्यास्यानुमानस्य रूपविशेषव्यवहारश्रवणाख्यं श्रोतृप्रत्यक्षं मूलम् ।

९९२ नन्वेवमनुमानस्य दुर्बलत्वात् प्रत्यक्षस्यापि क्वचिदाभासत्वदर्शनात् कथं प्रामाण्यनिर्णय इत्यत आह **अदृष्ट इति** । अनुमानस्य शुक्तिरजतादिप्रत्यक्षादेर्मानत्वं तु मानसप्रत्यक्षमात्रसिद्धत्वाद्बाध्यं भवेत् । साक्षिगृहीतस्यैव ह्यबाध्यत्वनियम इत्याशयः । यदुत्सर्गतः स्वभावतः प्राप्तं परीक्षां विनैव तदप्यपवादविवर्जितम् । साक्षिसम्मत्याऽभिमानमेव भवेत् । किमुत परीक्षाप्राप्तम् ।

९९५ उक्तार्थमेव सोदाहरणं स्पष्टयति **अत इति** । यद्यद्भोजनं तत्तदिष्टसाधनमिति व्याप्तावपि क्वचिदपथ्य-भोजनस्यानिष्टसाधनत्वाद्व्यभिचारो हि । न च तावता नित्यभोजनादिव्यवहारभङ्गः । एवं च नित्यव्यवहारान्यथाऽनुपपत्त्या प्रमाणानां प्रामाण्यग्राहकः साक्ष्यङ्गीकर्तव्यः ।

९९६ व्याप्तत्व इत्यादेरयमर्थः । हेतोः साध्येन व्याप्तत्वे सति साध्याश्रयाद्भिन्नाश्रयत्वं कथमेव हि दूषणम् ।

९९८ ननु विश्वं सदसद्विलक्षणमिति पक्षोऽप्रसिद्धविशेषणत्वेन हि दूष्यते । तस्मात्कथमन्यत्रासिद्धसाधनत्वं दूषणम् । नेत्यत आह **अन्यदिति** । सदसद्विलक्षणत्वमसद्विलक्षणत्वविरोधि । सद्विलक्षणस्यासद्विलक्षणत्वनियमात् । असद्विलक्षणत्वं सद्विलक्षणविरोधि । असद्विलक्षणस्य सत्त्वनियमादिति स्वव्याहतेः । अनुमानमप्रामाणिकम् । सर्वकार्यं सर्ववित्कर्तृपूर्वकं कादाचित्कत्वाद्व्यतिरेकेणात्मवदिति तैर्नैयायिकादिभिश्च तत्राप्रसिद्धे सर्ववित्पूर्वत्वे कर्तृकत्वे कादाचित्कत्वहेतोर्व्याप्तिर्गम्यते । ननु विमतं सकर्तृकं कार्यत्वात् घटवदिति कार्यत्वहेतोः सिद्धे सकर्तृकत्वमात्र एव वृत्तिः ।

९९९ पुनः पक्षधर्मताबलेन सर्वज्ञत्वं साध्यत इत्यत आह **अप्रसिद्धस्येति** । यदा यदि । अणुपरिमाणतारतम्यविश्रान्त्यन्यथाऽनुपपत्तेः परमाणवो केचन सन्तीति यथानुभवमेव कुतो नाङ्गीकार्यम् । यत्रासिद्धादिसाधनेऽतिप्रसङ्गो नास्ति तद्विपरीतार्थकमपि मानं च नास्ति । तत्राप्यणुपरिमाणतारतम्यं क्वचिद्विश्रान्तमित्यादिरूपेण क्लिष्टकल्पनयैव साध्यमित्यतिदुर्वचः । प्रमाणग्राह्यत्वात् ।

१००२ इतश्चासिद्धसाधनदूषणं परैः कल्पितोऽवयवनियमश्च न घटत इत्याह **परिशेष इति** । उक्तं च *सन्न्यायरत्नावल्याम्* । भोक्तृत्वस्याचेतनधर्मनिषेधे परिशेषलक्षणानुमानाच्चेतनधर्मत्वमन्यत्राप्रसिद्धं सिद्ध्यति । अज्ञानस्य भ्रमनिबन्धनत्वेऽज्ञानभ्रमयोः परस्पराश्रयलक्षणनिराकरणतर्कात् तयोरसिद्धिः अन्यत्र अप्रसिद्धा सिद्ध्यति । अज्ञानस्याज्ञानकल्पितत्वे आत्माश्रयता । तर्केणाज्ञाननिराकृतिश्च । आदिशब्दादनवस्थायाः । हेतोः सिद्धसाधनतायां च वीतरागकथावसतिः न भवेत् । यथा जगन्मिथ्यात्वे प्रयुक्तस्य दृश्यत्वहेतोरात्मनि व्यभिचारः । यथा वा तार्किकेण वेदानित्यत्वे प्रयुक्तस्य कृतकत्वहेतोरसिद्धिः । दृष्टान्तस्य दूषणं तु साध्यसाधनवैकल्यम् । यथा शुक्तिरजतदृष्टान्तस्य सदसद्विलक्षणत्वाभावात् साध्यवैकल्यम् । विनाशित्वहेतुना विश्वबाध्यत्वसाधने शुक्तिरजतस्य साधनवैकल्यं हेत्वादीनां विशेषणे वैयर्थ्यं च दूषणम् । विशेष्यविशेषयोरेकतरस्य व्यर्थत्वेनासिद्धौ तत्समुच्चयरूपस्य विशिष्टस्यासिद्धिरेव । यथा विशालत्वे सति धूमवत्त्वादिति व्यर्थविशेषणासिद्धिः । धूमवत्त्वे सति विशालत्वादिति विशेष्यासिद्धिः । तत्र तेषां प्रश्नदोषाणां मध्येऽप्रयोजकता प्रथमप्रश्नस्यैव दूषणम् । चरमप्रश्नानां तु विकल्पत्वे सति पूर्वत्रासङ्गतत्वेनासङ्गतिदोष एव । सिद्धप्रश्नादिकमित्यादिशब्दात् सिद्धसाधनव्यर्थविशेषणादीनि ।

१००७ केचिदर्थापत्त्यादीन्यनुमानादेः पृथक् प्रमाणान्यभ्युपगच्छन्ति । तन्निरस्यति **अर्थापत्तीति** । लिङ्गस्य दृष्टस्य श्रुतस्य वाऽन्यथाऽनुपपत्त्या लिङ्गिनोऽर्थत आपत्तिरेवार्थापत्तिः । यथा जीवन् देवदत्तो गृहाभावान्यथाऽनुपपत्त्या

बहिरस्तीति । एतद्गतसादृश्यप्रतियोगित्वादेतेन सदृशं तदित्युपमानम् । यथा गोसदृशगवयदर्शनात् गवयसदृशो गौरिति ज्ञानम् । प्रमाणाभावलिङ्गकं प्रमेयाभावज्ञानं ह्यभावप्रमाणम् । एतेऽनुमानान्तर्भूताः । तथा हि । देवदत्तो बहिरस्ति जीवित्वे सति गृहाभावित्वात् । स गौरेतद्गवयसदृशोऽस्य गवयस्य तद्गोसदृशत्वात् । यो यत्सदृशः स तत्सदृशो यथा भ्राता । विमतः सर्षपोऽत्र नास्ति । योग्यत्वे सत्यनुपलभ्यमानत्वात् । यथा पर्वत इति क्वचि-लिङ्गापेक्षया झटित्युत्पद्यमानं घटाद्यभावज्ञानं प्रत्यक्षान्तर्भूतम् । सुखदुःखादेरभावज्ञानं नियमेन प्रत्यक्ष एवान्त-र्भूतम् । साक्षिज्ञानत्वात् ।

१००८ उपक्रमाद्याश्चानुमानान्तर्भूता इत्याह **प्रारम्भाद्या इति** । 'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थ-वादोपपत्ती च लिङ्गं तात्पर्यनिर्णये' इति च *बृहत्संहितायाम्* । 'आत्मा वा इदमेक एवाग्र आसीदि'त्युपक्रमा-दस्मिन्नागमे परमात्मा प्रतिपाद्यत इत्यादिरूपेणागमार्थनिश्चयः । 'नमो विष्णवे महते करोमी'त्युपसंहारः । असकृ-दुक्तिरभ्यासः । यथा 'ब्रह्मविदाप्नोति परम्', 'येऽन्नं ब्रह्मोपासते', 'ये प्राणं ब्रह्मोपासत' इत्यादि । प्रमाणान्तरा-गम्यत्वमपूर्वता । तद्यदा स्त्रियं सिञ्चति । अथैनं जनयति । तदस्य प्रथमं जन्म । यदि कुमारं जन्मनोऽग्रेद्धि हापयतीत्युक्त्या तदस्य द्वितीयं जन्म स इतः प्रयन्नेव पुनर्जायते । तदस्य तृतीयं जन्मेत्यभ्यासतो जीवस्य वाच्य-त्वप्रतीतावपि तस्य प्रत्यक्षादिगम्यत्वेन सुपूर्वत्वात् तमपहाय अपूर्वत्वाज्ज्ञायमानजीवान्तर्यामिणि परमात्मनि तात्पर्यमवसीयतेति ज्ञानस्य फलम् । यथा 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीती'त्यत्र पक्षिज्ञानस्याफलत्वात् तद्वाचकत्वं नाङ्गीक्रियते । सफलत्वाज्जीवेश्वर-ज्ञानस्य तद्वाचकत्वमभ्युपगम्यते । यदर्थमन्यस्यार्थस्य वादः स तदर्थवादः । यथा परमात्मनः सर्वोत्तमत्वज्ञापनार्थं 'स इमाँल्लोकानसृजते'त्यादिसृष्टिकथनम् । अन्यत्रासम्भाव्यलिङ्गमुपपत्तिः । यथा 'विश्वस्मादिन्द्र उत्तरः', 'नकिरिन्द्र त्वदुत्तरो न ज्यायानस्ति वृत्रहन् नकिरेव यथा त्वमि'त्यादौ समाधिकरहितत्वादिन्द्रो विष्णुः । 'पराहीन्द्र धावसी वृषा कवेरतीव्यथीरि'तीन्द्रस्य विष्णोः पराजितत्ववचनेन समाधिकराहित्यासम्भवात् । 'श्रुतिर्नाम समुद्दिष्टं लिङ्गं तल्लक्षणं स्मृतम् । पदानि निरपेक्षाणि वाक्यं प्रकरणं तथा । एकस्य प्रतिपत्त्यङ्गवचनं स्थानमुच्यते । अन्यत्र तत्समोक्तिश्च समाख्यास्थानमेव च । अध्यायादिप्रबन्धस्तु प्रभेदा आगमस्य चे'ति वचनाद्वाक्यादीन्यवगम्यते । अवस्वरातिगर्गरो-परिसनिष्वणत् । पिङ्गापरि च निष्कदद्रिन्द्राय ब्रह्मोद्योतमित्यत्र पृथगन्वयाङ्गीकारे एकवाक्यत्वानुपपत्त्येन्द्रायाभीष्ट-दानार्थमुद्यतं ब्रह्मगर्गरोऽवस्वरातीत्याद्यन्वयोऽङ्गीकर्तव्यः । इति वाक्यस्य लिङ्गिभावः ।

१००९ नन्वनुपसञ्जातविरोधित्वेन आत्मोपक्रमस्याप्यात्मनोऽन्यत्र असम्भाव्यलिङ्गत्वमस्ति । एवमेवोपसंहारादीनां च । तस्मात् ततस्तेषामुपपत्तेः पृथग्वच इत्यत आह **कुरुपाण्डववदिति** । सन्तानबीजं कुरुपाण्डवानामित्यादौ कुरुभ्यः पाण्डवानां पृथग्वचनेऽप्यकुरुत्वं न स्याद्धि । सामान्यविशेषभावे तथावचनसम्भवात् । स्यात्किम् । भेदमिथ्यात्वानुमानमप्रसिद्धविशेषणमिति निरस्तं हि पुरस्तात् ।

१०१० अत्र तु तस्यादोषत्वान्नापसिद्धान्तः किं न स्यादित्यत आह **स्वन्यायैरिति** । केवलानुमानस्येश्वरसाधक-त्वाङ्गीकारे केवलानुमानेनैव तस्यानीश्वरप्रसङ्ग इति प्रसङ्गार्थतया प्रोक्तोऽर्थाव्यभिचारादिरूपो विरोध उक्तः ।

१०११ विरोधान्तरमप्यस्तीत्याह **छलमिति**। तयोरुदाहरणं भगवत्तमेनैवान्यत्रोक्तत्वात्। जातिः न मेये मानापेक्षेत्यादि। का मेये मानापेक्षाऽस्तीति च। तेनैव न्यायेन सिद्धत्वाच्छलमसङ्गतम्। अन्यच्च। गृष्टिविवक्षया गामानयेत्युक्ते पृथिवीविवक्षया न शक्यमितिवदिति।

१०१४ ननु तत्र छलस्यासङ्गतत्वमुक्तं हि। कथमत्र विरोधेऽन्तर्भाव उक्त इति नैष दोषः। तुलायाः प्रमाणत्वप्रमेयत्ववदुभयत्राप्यन्तर्भावसम्भवात्। न घटते पृथिवीनयनमिति छलवादिनोक्ते सति केन पृथिव्या अचेतनाया नेत्रं घटत इत्युक्तमनुक्तोपालम्भो यदिति छलवादिनः स्वोक्तन्यायेनैव वादिना व्याहतत्वाद्विरोधान्तर्भावो दृश्यते हि। सदसद्विलक्षणस्यार्थतः सदसत्त्वात् सदसत्त्वस्य चैकत्र स्वव्याहतत्वाद्व्याहतमेतत्। इतश्च तत्र घटत इत्याह **प्रतियोगित्वमिति**।

१०१६ अस्य सदसद्विलक्षणस्य प्रतियोगित्वं ब्रह्मणोऽङ्गीकृतं हि। तेन ततो ब्रह्मणो न विशेषत्वप्रसङ्गः। ततो ब्रह्मणो जगद्विलक्षणं चेज्जगद्वद्ब्रह्मणो मिथ्यात्वं ब्रह्मवज्जगतः सत्त्वं वा स्यात्। तदेवोपपादयति **इदमिति**। अस्य ब्रह्मण इत्थंभावात्मको धर्मो न चेत् प्रतियोगिताऽपि न स्यात्। तदभावे दोष उक्तः।

१०२१ 'अदृश्यत्वादिगुणको धर्मोक्तेरि'त्यस्याभावरूपा अपि गुणा अत्यद्भुताः। किमु सर्वज्ञत्वादिभावधर्मा इत्याशयः। 'सर्वधर्मोपपत्तेरि'त्यादावुदिता हि ते। सर्वमपेक्ष्य सर्वज्ञत्वसर्वस्रष्टृत्वादयः तस्मादन्यापेक्षा स्युष्ट इति। 'स्युष्टे सत्या इहाशिष' इतिवत्। ननु निषेद्धुमेव धर्माननुवदति वेदः तस्मात्कथमप्रमाणतेत्यत आह **अप्राप्तमिति**।

१०२२ ब्रह्मात्म्यैक्यस्य कथं मिथ्यात्वं न स्यात्। तस्यापि वेदेनैव हि वेद्यत्वं स्यात्किं न ब्रह्मणः। सर्वज्ञत्वादीनामत्यन्तासत्त्वमभ्युपगच्छामः। व्यावहारिकसत्यत्त्वाङ्गीकारात्। तत्तद्विधातुर्वेदस्यातत्त्वावेदकप्रमाणत्वं स्यात्। न चैतावता ब्रह्मणः सविशेषत्वं तेषां धर्माणामारोपितत्वादित्यत आह **धर्मेति**।

अपरोक्षस्येदन्त्वधर्मित्वे परोक्षस्य तत्त्वधर्मित्वे उभयस्यापि धावल्यादिविशेषधर्मित्वे च सति ह्यत्र शुक्त्यादावन्यो रजतत्वधर्मः कल्प्यते। तदर्थं धर्मारोपार्थं भ्रान्तिविषयत्वम्। उपपन्नश्च तस्य दृश्यत्वानुमानादेरन्यथाभावः। बहुप्रमाणविरुद्धत्वात्। एवमीशदेवमुन्यादिकं विश्वसत्यत्वादिभ्रान्तिमत्कल्प्यते। सा भ्रान्तिस्तस्यैव न किन्तु तदेवोपपादयति **भवेत्सूक्तिरिति**।

१०२७ **भ्रान्तं** भ्रान्तिकल्पितम्।

१०२९ तर्ह्यैक्यागमस्य प्रामाण्यं प्रत्यक्षादन्यतः कुतोऽङ्गीक्रियते। प्रत्येक्षेणैव चेत्तस्यापि जगत्प्रत्यक्षवदप्रामाण्यप्रसङ्गः स्यात्। किं यावद्विश्वनिवृत्तिप्रत्यक्षमपि प्रमाणमेव। तेनैक्यागमस्यापि प्रामाण्यं गृह्यत इत्यत आह **तात्कालिकमिति**।

१०३२ तस्याप्येतादृशं यदि तर्हि यदैक्यागमप्रामाण्यस्य मिथ्यात्वं तदविश्वसत्यतापात्तिः । **अद्वैतहानि-सामान्यात्** । ऐक्यवाक्यमानत्वस्य ब्रह्मव्यतिरिक्तस्याबाध्यस्यैवाङ्गीकारात् । तत्पक्षेऽप्यद्वैतहानेः समत्वात् । प्रत्यक्षादेरयथार्थत्वे प्रामाण्यमेवाङ्गीकर्तुं न शक्यते । किमुत स्वतःप्रामाण्यमित्यभिप्रायेणाह **यदीति** ।

१०३३ प्रामाण्यस्य कालतो मर्यादा नाम यावद्विश्वनिवृत्तिप्रमाणं ततःपरं अप्रमाणमिति हि सा व्याहता । न हि कालत्रयेऽप्यप्रमाणमिति बाधकज्ञानग्राह्यस्य कदाचित्प्रामाण्यं युक्तम् ।

१०३४ ननु सत्यमेवं द्वैतप्रामाण्यस्य तत्त्वतोऽप्रामाण्यमस्तु । बाध्यते हीदं मिथ्यात्वमानेनेत्यत आह **मिथ्यात्वेति** ।

१०३५ तथा कालेऽपि विकल्पविषयं मुक्तिकालेऽप्यस्ति न वा । अस्ति चेद् द्वैतापत्तिः । नास्ति चेन्मुक्त्यभावः ।

१०३६ 'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती'ति । 'तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवती'त्यागमः । कालनिवर्तने मुक्तेरपि निवृत्तिः स्यात् । तस्याः शाश्वतित्वाभावात् ।

१०३७ न च कालस्य कालत्रयवर्तित्वाभावापरपर्यायो बाधो घटते । स्वव्याहतत्वात् । इतश्च विश्वसत्यत्व-प्रत्यक्षापलापो न युक्त इत्याह **क्व चेति** । लोकेऽपि प्रत्यक्षतः प्राप्तमनुमानागममात्रबाधितम् ।

१०३८ दूरस्थवृक्षह्रस्वत्वादिकं तु प्रबलप्रत्यक्षेणैव बाधितम् । तन्मूलानुमानागमाभ्यां वा चन्द्रप्रादेशकत्वादिकमपि प्रत्यक्षमूलानुमानेनैव बाधितम् । दूरस्य वृक्षादिदृष्टान्तेन प्रत्यक्षस्य दूरग्रहणे त्वपटुत्वमनुभूयते हि । यदि देहस्यात्मत्वं प्रत्यक्षतो ज्ञातमनुमानागमबाधितमिति मतम् । तत्र ब्रूमः । तत्क्वचिदपि प्रत्यक्षतः प्रकर्षेणाप्तं न । यद्यपि यदा-कदाचित्प्रत्यक्षेण देहात्मत्वमवगम्यते । तथाऽपि प्रकृष्टानुभवाभेदेनैव हीत्यभिप्रायेणाह **ममेति** ।

१०३९ एवं च कादाचित्को देहात्मत्वभ्रमः प्रत्यक्षेणैव बाध्यत इत्यभिप्रायः । कृष्णदेहस्याहं कृष्ण इति व्यवहारः कथमित्यत आह **उपचार इति** ।

यद्वद्वस्त्रस्य कर्दमलेपने कृष्णवस्त्रमित्युपचारव्यवहार एवमत्रापि स्यात् । यदि पटस्य कार्ष्ण्यं कर्दमोपाधि-कृतमेवमेवात्मनः कार्ष्ण्यमपि देहोपाधिकृतमित्युच्यते ।

१०४० तर्ह्यपि पटस्य स्वतः शौक्ल्यवत्स्वतः कार्ष्ण्यं ममेति न प्रतीयते हि । औपाधिकमप्यमुख्यत्वादौपचारिक-मेव । देहादिरित्यादिशब्दादिन्द्रियाणि । स्यात्किम् ।

१०४१ अस्तु नाम विवेकिनां देहात्मभेदज्ञानं पश्वादीनां तत्तुल्यमनुष्याणां वा कथं तत्स्यादित्यत आह **जातेति** ।

१०४२ आदिशब्दाद्दुःखपूर्वदेहस्यास्मृतावनुसन्धानविस्मृतौ सत्यां तद्विज्ञानं कथं भवेदिति सम्बन्धः। 'अन्वयस्य व्यतिरेकादि'त्यादिशब्दोऽन्वयव्यतिरेकयोर्व्यस्तत्वेनाप्यनुसन्धानज्ञापकत्वप्रदर्शनार्थः । इदमत्राकूतम् । स्वभोग-साधनत्वादिना साध्येन स्तन्यपानत्वादेः साधनस्य पूर्वदेहानुभूतान्वयव्यतिरेकव्याप्त्यनुसन्धानेनैव हि ज्ञातमात्राणां प्रथमतः स्तनपानादौ प्रवर्तमानत्वादस्त्येव तेषां देहात्मभेदज्ञानमिति । तस्मात्स्वधनादिनाशे नष्टोऽहमिति व्यवहार-वदौपचारिकोऽहं कृष्णो कृशोऽहमित्यादिव्यवहारः ।

१०४३ ननु यथा धनादौ भेदव्यवहारः प्रचुरो न हि तथा देहे किन्तु स्वविविक्तवदेवेत्यत आह **व्याप्तत्वादिति** । यथाऽग्निमङ्गाराद्विविच्य व्यवहर्तुमशक्यत्वादङ्गारो दहति । अङ्गारस्तेजस्वीत्यादिव्यवहारः । एवमत्रापि प्रत्यक्षगम्या-न्माधुर्यविशेषानपि स्वानुभवानुकूल्येन प्रतिपादयितुं न क्षमा हि लोकाः तत एवं प्रत्यक्षासिद्धस्य प्रमाणान्तर-बाध्यत्वात् ।

१०४७ नन्वागम उत्तरकालं च तद्गमोक्षं च ज्ञापयेदित्यत आह **आगमोऽपीति** । आगमोऽप्यनुमानवदेव साक्षि-प्रत्यक्षतः सामान्यतः सिद्धात्मकालादिक एव विशेषं ज्ञापयेत् तत्र यदागमोऽत्यन्तमप्रसिद्धमवगमयति तत्रापि प्रत्यक्षसिद्धपदसमभिव्याहारेणैव हि ज्ञानं राजेव देवराडित्यादि कथं शक्तिग्रहः । अन्यथा साक्षिप्रत्यक्षेण सर्वस्य सामान्यतः सिद्धत्वानङ्गीकारे कथं तत्तच्छब्दानां वाचकत्वशक्तिज्ञानम् । व्युत्पत्तिग्रहणाभावे पुनरागमस्येवा-प्रवृत्तिप्रसङ्गः ।

१०४८ तदेवोपपादयति **अतीतेति** । नातीतानागतं वदेच्छब्द इति शेषः । यद्यन्यत्रातीतानागतयोरपि शब्दस्य वाचकत्वशक्तिग्रहोऽस्तीत्युच्यते, तर्हि सोऽतीतानागतकालग्रहतद्वर्तिपदार्थाग्रहे च कथं स्यादिति भावः । यद्यसौ घटादिशब्दो वर्तमानघटादावेव घटं घटत्वादिसामान्यमन्यत्रातीतानागतघटादिष्वप्यनुवृत्तं गमयेत् । कथं सामान्य-वर्जितं वस्तुस्वरूपमतीतानागतं तच्छब्दोऽवगमयेत् । स्वरूपत्वं गोत्वादिवदनुगतं चेत्तस्य किं व्यावृत्तं वस्तु भवेत् ।

१०५२ **सर्वेत्यादेः** अयमर्थः । सर्वपदार्थानां सत्त्वं नामानुगतधर्मः । पुनर्जडत्वं पुनः पार्थिवत्वं पुनर्घटत्व-मित्येतेषामन्ते हि स्वरूपसत्त्वं नामेष्यते । अत एव हि केवलव्यावृत्तं किमिति प्रश्ने स्वरूपमित्युत्तरं स्यात् । स्वरूपत्वजातिं कल्पयित्वा ततोऽन्यद्व्यावृत्तं कल्प्यते । चेतनावादिनः पक्षे स्वरूपं विवक्षितम् । तत्रापि तथा अङ्गीकारे अनवस्थाप्रसङ्गः । एवं व्यावृत्ताख्ये स्वरूपेऽप्यतीतानागतवर्तमाने यदा शक्तिग्रहो भवेत् तदा त्वनुवृत्तधर्म-स्यानवकाशात् । साक्षिप्रत्यक्षेण सामान्यतो ज्ञानं विना शक्तिग्रहः कुतो भवेत् । तस्मात् सर्वत्राप्येवमेव शक्ति-ग्रहः । यद्यव्यावृत्तं स्वरूपं विवक्षितं कालाक्षादि तदेव विशेषतो गोत्वादिसामान्यं च स्यात् ।

१०५५ ननु युष्माभिरपि वस्तुषु सामान्यमङ्गीक्रियते हि । तस्यानुगतधर्मत्वमपि स्यादित्यत आह **न चेति** । तेनानुगतधर्मकल्पनायामप्युक्तरीत्या व्युत्पत्त्यसम्भवे सर्वधर्माणां भेदानुभवेन निमित्तेन चैकधर्मिता न स्यात्किम् । अयं गौरयमपि गौरन्योऽपि गौरिति दृश्यते ह्येकमेव व्यक्तिष्वनुगतं गोत्वमित्यत आह **तदिति** ।

१०५७ तेषां गवादीनां सादृश्यमेव हि तथा दृश्यते । न हि खुरपुच्छसास्नादिमत्त्वलक्षणात्सादृश्यादन्यद्गोत्वं नामोपलभ्यते । न हि तत्पक्षेऽपीयं जातिरिति व्यवहारेऽपि जातित्वजातिर्नामास्ति । जातिसदृशस्यैव तत्राङ्गीकृतत्वात् । अतो व्युत्पत्तिग्रहणान्यथाऽनुपपत्तेश्चण्डमुण्डादीनां परस्परवैलक्षण्यात् कथं सादृश्येन शक्तिग्रह इत्यत आह **किञ्चिदिति** ।

१०५८ तत्तत्सादृश्यमानतः सास्नादिमत्त्वस्य सादृश्यस्य सामग्र्येणानङ्गीकारे महिषादिष्वतिव्याप्तिः । ततोऽतिरिक्तस्य कार्ष्ण्यादेरप्यङ्गीकारे गोष्वतिव्याप्तिरिति तत्तसादृश्यपरिमाणानुसरणादित्यर्थः । इतश्च प्रत्यक्षस्य वर्तमानमात्रविषयत्वं नेत्याह **प्रत्यक्षमिति** । मानसं प्रत्यक्षं च यद्यतीतार्थगोचरं तर्ह्येव तत्स्मृत्याऽस्य प्रमाणत्वम् । तस्यापि वर्तमानमात्रग्राहित्वे चक्षुरादेरविशेषप्रसङ्गात् ।

१०५९ नन्वनुभूतमात्रविषयत्वात् स्मृतेः प्रामाण्यं न स्यादित्यत आह **अतीतत्वेति** । अतीतत्वाख्यविशेषविषयत्वेन विशेषितं हि तदित्याशयः ।

तदेवोपपादयति **आधिक्यमिति** । अतीतवर्तमानत्वधर्मिणि तदेवेदं वसनमित्यादिप्रत्यभिज्ञाऽतीतविषयत्ववर्तमानविषयत्वधर्मिणि दृश्यते । न च अनिर्वचनीयं तस्याः प्रत्यभिज्ञायाः पूर्वमर्धं स्मृतिज्ञानमेव । शेषं प्रत्यक्षम् । एवं ज्ञानद्वयरूपा प्रत्यभिज्ञा ।

१०६२ तस्मात् स्मृतीतरस्य प्रत्यक्षस्यातीतविषयत्वं नास्तीति तदेवेदमिति तस्येदन्त्वे न ग्रहणस्यैकज्ञानत्वाद्वर्तमानैकनियमः । वर्तमानमात्रविषयत्वनियमः स्यात्किम् । प्रमासाधनं प्रमाणम् । अज्ञातार्थपरिच्छित्तिः । प्रमास्मृतेस्तु ज्ञातार्थविषयत्वेन प्रमित्यसाधनत्वान्न प्रमाणत्वमित्यत आह **न चेति** ।

१०६३ ननु मयैतद्वसनं ज्ञातमित्यनुभूयते हि । प्रमाणफलभूता प्रमितिः प्राकट्यापरपर्याया तस्मात् कथमत्र मानाभाव इत्यत आह **मयेति** । यदेते वदन्ति । तत्त्वावेदकप्रमाणफलभूतायाः प्रमित्या उदये प्रमाणादिसर्वप्रपञ्चस्योच्छित्तिरिति । तदप्याशामात्रमित्यायातम् । तदभिमतायाः प्रमित्या एवासम्भवात् ।

१०६४ तदाह **मानेति** । तत्तस्मात्प्रमित्यसम्भवादुक्तरीत्या प्रबलप्रत्यक्षसिद्धत्वाद्वा विच्छित्तिर्बाधः ।

१०६५ तत्र स्वप्नदृष्टान्तोऽपि नास्तीत्यभिप्रायेणाह **स्वाप्नानामिति** । ततः संस्कारमयत्वोक्तेः । आत्मा च क्वचिद्देहत्वादिभ्रमगोचरः स्यात् । यद्यात्मनि स्वरूपादन्यथादृश्यमानमात्रं मिथ्या न सर्वस्वरूपम्, तर्हि स्वप्नजागरितयोरपि जाग्रत्त्वं शुक्तिरजतादि च मिथ्या स्यात् । न सर्वे स्वप्नजाग्रदवस्थे । स्वप्ने गजादीनद्राक्षम् । जागरिते चैत्रादीनद्राक्षमित्यबाधित्वेनानुवृत्तेश्च । स्वमतस्य स्वशास्त्राभिमतार्थस्यात्मैक्यस्य विश्वभ्रान्तिकल्पितत्वस्य वा ।

१०६९ **भ्रान्तित्वेत्यादेरयमर्थः** । यदि जगतो भ्रान्तिकल्पितत्वधर्मस्य वादिना प्रतिपिपादयिषितस्य भ्रान्तिकल्पितत्वमङ्गीक्रियते, तर्ह्यभ्रान्तिकल्पितत्वस्यास्मदभिप्रेतस्य कथं सत्यता न स्यात् ।

१०७३ उन्मत्तेनाप्यपरिग्राह्यं कथं लोकैः प्रवर्तितमित्यत आह **ईशेति** ।

१०७४ एवं 'मायामात्रमि'ति सूत्रस्य परयोजनां निरस्य स्वयं तद्योजयति **अत इति** ।

१०७५ मुख्यनिमित्तमीश्वरी माया । अन्यज्जीवस्यादृष्टम् । सह पृथगिति स्वयमेव व्याख्याति **उभाभ्यामिति** ।

१०७६ स्यात्किम् । मनोगतवासनामयस्य स्वप्नस्य कथं प्रज्ञोपादानकत्वमित्यत आह **प्रज्ञेति** ॥ १ ॥

१०७९ 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययावि'ति सूत्रं योजयति **वासनेति** ।

१०८० उक्तार्थं निगमयति **सृष्ट्वैवेति** ॥ २ ॥

१०८१ 'तदभावो नाडीषु तच्छ्रुतेरात्मनि ह', 'अतः प्रबोधोऽस्मात्', 'मुग्धेऽर्धसम्पत्तिः परिशेषादि'ति सूत्राणि विवृणोति **सुषुप्तीति** ।

'स एव च कर्मानुस्मृतिशब्दविधिभ्य' इति सूत्रं व्याख्याति **नान्य इति** ॥ ६ ॥

१०८२ 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र ही'ति सूत्रं व्याख्याति **न स्थानेति** । सर्वत्र स्वरूपेष्वेवंविधः परमेशिता । तद्विरुद्धं तु परेशस्य बद्धत्वाज्ञत्वादिकं 'प्राज्ञः कारणबद्धस्त्वि'त्यादिवाक्यं तत्र मानं न भवेत् । वाक्यस्य तु 'बद्धो बन्धादिसाक्षित्वादि'त्यादिना विषयान्तरं द्रष्टव्यम् ।

१०८४ भगवतो गुणोत्कर्षत्वनिर्दोषत्वज्ञानजन्यप्रसादद्वारेण दुःखाप्ययसुखावास्योरेव वेदस्य महातात्पर्यमिति साधयति **दुःखेति** ।

१०८८ तत्र प्रमाणमाह **यो मामिति** । 'यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारते'ति भगवद्वचनम् । 'अभी ३ इदमेकमेको अस्मि निष्षाळभी द्वा किमु त्रयः करन्ति । खले न पर्षान्प्रति हन्मि भूरि किं मा निन्दन्ति शत्रवोऽनिन्द्राः' इत्यस्यार्थो ब्रह्माण्डवचनेनैवावगम्यते । इदं जगत्सर्वमीदृशानि भूरीणि वा मामभियान्ति सह्वचे । 'धान्यानि यद्वत्खलगानि मर्त्यः सञ्चूर्णयिष्याम्यहमेक एवे'ति । प्रसादान्मुक्तिरिति लोकदृष्टान्तोऽप्यवसीयते । स प्रसादो गुणवेदनादिति च । 'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः' इति भगवद्गीता ।

१०९१ 'इति गुह्यतममि'ति गीतासु ।

१०९२ ब्रह्मरूपाणि भिन्नानि भिन्नस्थानत्वाच्चैत्रवदित्यनुमा । ब्रह्मणो रूपाण्यभिन्नान्यैक्यानुसन्धानवत्त्वाद्ब्रह्मवदिति प्रत्यनुमानविरुद्धत्वेन च । तत्र ब्रह्मणो भिन्नत्वसदोषत्वादौ वर्तते रूपाणां ब्रह्मणो रूपाणामन्योन्यभेदे तेषां

प्रातिकूल्यानुकूल्ययोरपि स्वातन्त्र्यं न स्याद्धि । एवं च केषाञ्चिद्रूपाणां परतन्त्रत्वे तस्य ब्रह्मणः सर्वात्मना पूर्णत्वाभावप्रसङ्गः । सर्वस्मात्तस्य स्वरूपेषु भेदाभावप्रतिपादनेन सर्वगुणपूर्णत्वं सिद्धम् । तदाह **तेनेश इति** ॥ ८ ॥

१०९३ जीव ईशेनाभिन्नश्चित्त्वादीशरूपवदिति च न वाच्यमित्याह **न चेति** ।

१०९४ तत्रानाभासचित्त्वमुपाधिमभिप्रेत्याह **यत इति** । श्रुतिस्त्वस्य जीवस्याभासताख्यमीशरूपवैलक्षण्यं वदति । तां श्रुतिं चैकामुदाहरति **यथेति** ।

११०० सत्ताप्रतीतिकार्येषु सत्तायां विनाशेनाप्रतीतौ गमनादिकार्येषु च विशेषकौ गरुडानन्तौ । अत्र परैरुत्प्रेक्षितमनुवदति **आभासत्वमिति** । चेतनसमुदायरूपेण ब्रह्मैक्यसमुदायैक्यं नाम ।

११०२ 'पृथगुपदेशादि'ति भेदोक्तेर्गतिमाह **अत इति** । समुदायांशयोः समुदायरूपस्य ब्रह्मणोंऽशयोः कृष्णाख्यजीवाख्ययोरुदिता सिद्धान्तिनेति शेषः ।

११०३ पूर्ववाचेवाशङ्क्य परिहरति **अथेति** ।

११०४ तत्र सूत्रमवतारयति **आशङ्केति** ।

११०७ 'अत एव चोपमा सूर्यकादिवदि'त्यत्र अन्याभावविशेषितां चाह । वेदाधिपो जीवाख्याभासस्य **नोपाध्यधीनताद्यैश्चे**त्याद्यशब्दाद्भेदाभावो वादिविप्रतिपत्तिरेव तद्वचनं न पुनः क्वचित् । बिम्बप्रतिबिम्बयोर्भेदाभावात् । उपाध्यधीनत्वाभावे सूर्यकाद्युपमा कथमित्यत आह **नेति** ।

११०८ निदर्शने दृष्टान्ते दार्ष्टान्तिकस्य सर्वसाम्यं न विवक्ष्यते हि परीक्षकैः । **सुखादी**त्यादिशब्दान्नित्यदुःखाभावः । अतः सुराणां त्वीशेन किञ्चिज्ज्ञानमात्रमेव । साम्यमेव ।

१११० उक्तार्थस्य सूत्रपदस्य सम्बन्धं दर्शयति **तदधीनत्वमिति** । एवशब्दस्तदधीनत्वमेव जीवस्य न रूपाद्यधीनत्वादिकमिति सुप्रकाशयति । चशब्दः किञ्चित्सादृश्यम् । प्रत्यक्षाद्यखिलमानतो जीवेशभेददृष्टिर्मुहुरुक्ता ।

१११२ **सर्वशक्तित्वतः** सर्वशक्तिवचनतः ।

१११३ कथं ततोऽशेषदोषराहित्यमुक्तं स्यादित्यत आह **अशेषेति** ।

१११५ न तावत्सर्वचेतनानां मिथ ऐक्यानुसन्धानमस्ति । अनुभवविरोधात् । तत्समुदायैक्यमनुसन्धानरहितं चेद्यथा वृक्षाणां वनाख्येन समुदायेनैक्यं तादृशमेव हि । तन्नास्माकमनिष्टापत्तिरिति भाववानाह **अनुसन्धानेति** । सुदुष्करं साधयितुमिति शेषः ।

११११६ सर्वज्ञ ईशो मुक्तेः पूर्वमेकतां नानुसन्धत्त इति यतस्तस्मान्नैव स्यात्। दुःखिनैकतामनुसन्धत्ते चेदीशस्यापि दुःखितापत्तिः । मुक्तेः पश्चादैक्यस्यानुसन्धानं स्याच्चेत् किमविद्यमानस्येति चोद्यम् । उभयत्रापि दोषमाह **मिथ्येत्यादिना** ।

१११७ अविद्यमानस्यैक्यस्यानुसन्धानं चेदीशस्य मिथ्याज्ञानिता भवेत् । अविद्यमानस्यैक्यस्यापि तदैवानुसन्धानमासीन्न तु पूर्वमिति चेत् । पूर्वमज्ञत्वमापतेत् । उक्तं पूर्वमसदैक्यं यदि पश्चाद्भवेत् तर्हि सप्तमो रसोऽपि स्यात् । कुत्रचित्पूर्वं भिन्नस्य पश्चादैक्यादर्शनात् ।

१११८ **उन्नद्धं** उत्कृष्टम् ।

१११९ 'नेह नानाऽस्ति किञ्चन', 'इन्द्रो मायाभिः पुरुरूप ईयते', 'युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोऽयं वै हरयो दश न सहस्राणि बहूनि चानन्तानि च तदेतद्ब्रह्माऽपूर्वमनपरमबाह्यमयमात्मा ब्रह्म यश्चायमग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं वाङ्मयो यमेव स योऽयमात्मेदममृतमिदं ब्रह्मे'त्यादिश्रुतिमानेन तत्रेश्वरे भेदोऽपि नास्ति । चेतनैक्येऽनुसन्धानं प्रमाणमित्युक्तमेव ।

११२० विस्तरेणाह **जीवेति** । इन्द्रादिजीवांशा अर्जुनाद्या नियमेनैक्यानुसन्धानवन्तः । यदि स्वरूपेणैकता तर्हि न तु स्थानाद्यैक्यात् । यथा सोमे ब्रह्मावेशाद्ब्रह्मांशत्वव्यवहारे सत्यपि तस्य स्वरूपैक्याभावादनुसन्धानाभावः ।

११२१ अशेषमनुसन्धानमित्युक्तं स्पष्टयति **सुखेति** । नन्वंशिनस्तु सामस्त्येन सुखाद्यनुसन्धानमुच्यते हि ।

११२२ कथं तेनाभिन्नस्यैवांशस्य तद्वन्नास्तीत्यत आह **विशेषस्त्विति** ।

११२३ ईशस्याशक्यं न विद्यते चेत्स्वस्य जीवैकतामपि कुर्यादित्यत आह **सेति** ।

११२४ सर्वमानविरोधं प्रकाशयति **ईशत्वेनेति** । श्रुत्यादिभिरीशत्वेनैव विज्ञातं भगवन्तमनीशजीवत्वेनोपदिशेच्छ्रुतिः । यदि वाऽनीश्वरत्वेनैव प्रत्यक्षादिभिर्विज्ञातमीशत्वेनोपदिशेत् । तर्ह्युपजीव्यप्रमाणाविरोधेनैव मानत्वं गच्छेत् । न च नित्यत्वेन निर्दोषायास्तस्या अमानत्वं युक्तम् । तस्मात् ईशानीशयोरैक्यं न चोपदिशति श्रुतिरित्याशयः ।

११२५ **अस्य** ईशस्य ।

११२६ **अयुक्तमित्यादेरयमर्थः** । **अन्यत्र** ईशादन्यत्र । निरंशजीवादौ सामर्थ्यैकदेशविनियोगादिकमीशबलाद्युक्तं भवति ।

११२७ अत ईशादन्यत्र जीवे यद्दृष्टमंशांशिनोः शक्तितारतम्यादि तदपीशे तु नैव कल्प्यते । 'प्राज्ञः किञ्चन संवेत्ति तुरीयं तत्सर्वदृक् सदे'त्यादिश्रुत्याभासात्तमप्यविचारितार्थतया श्रुत्यादिविरुद्धेऽर्थे प्रयुक्ता श्रुतिः श्रुत्याद्याभासः । यत्तस्येश्वरत्वस्य विरुद्धं तदेव न कल्प्यते । न पुनश्चेतनत्वादिकम् ।

११२८ स्मृत्या च तस्य स्वव्याहतिं साधयति **ईश इति** । जगन्मिथ्येति वचने जगतो मिथ्यात्वधर्मस्यापि जगदन्तर्भूतत्वात् सोऽपि मिथ्येति प्रतिज्ञाव्याघातः । भेदनिषेधेऽपि भिदा नेत्यनयोः शब्दयोर्भेदोऽङ्गीकर्तव्यः । अपरथा भिदाभिदेत्येवोक्तं स्यात् ।

११३० ईशस्य सर्वोपपादकत्वमित्यादौ च मानमाह **नायुक्तमिति** ॥ १० ॥

११३३ किञ्चिदेकस्यैव अणिममहिमादिकं यदीशित्वविरोधि स्यादीशितव्यमिथ्यादिकं रूपवत्त्वादनित्य ईशोऽनित्यस्य च को हि महिमाऽत्र तस्मिन् भक्त्या च किमित्येतामाशङ्कां परिहरन् 'अरूपवदेव हि तत्प्रधानत्वादि'ति सूत्रं व्याख्याति **स चेति** ।

११३४ अत इत्यादेरयमर्थः । 'सहस्रशीर्षा पुरुषाः', 'वेदाहमेतं पुरुषं महान्तमि'त्यादेरप्राकृतरूपज्ञानात्मकस्य वाचकत्वात् । 'अवर्णमचक्षुः श्रोत्रं तदपाणिपादमि'त्यादेः प्रकृतरूपनिषेधकत्वादनित्यत्वम् । श्रुतिवर्गद्वयस्य परस्परविरोधित्वं च न स्यात् । घटाद्यनित्यत्वे प्राकृतरूपवत्त्वस्य प्रयोजकत्वात् रूपवत्त्वमात्रहेतोरप्रयोजकत्वं स्यात् । 'प्रकाशवच्चावैयर्थ्यमि'ति सूत्रं विवृणोति **यथेति** । 'अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किं ज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवती'ति श्रुतिः । यथा सुप्त्याद्यवस्थायां प्राकृतप्रकाशाभावेऽपि परमात्मानं ज्योतिःशब्देनाह । एवमेव 'पश्यते रुग्मवर्णमि'त्यादिका श्रुतिरपि ॥ ९ ॥

११३५ 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवमि'ति सूत्रं व्याख्याति **तद्वत्तीति** ॥ १२ ॥

११३६ 'स्थानविशेषात्प्रकाशादिवदि'ति सूत्रं व्याख्याति **प्रतिबिम्बवदिति** ।

११३७ 'परमतःसेतून्मानसम्बन्धभेदव्यपदेशेभ्य इत्यस्यार्थं सूचयति **तस्माद्भिन्नश्चेति** । न चात्र सूत्रक्रमविपर्यासो दोष आशङ्कनीयः । सिंहावलोकनन्यायस्यापि सम्भवात् । न च तावता सूत्रक्रमभङ्गप्रसङ्गः । अनेनैव भगवता भाष्ये सूत्रक्रमस्य सुतरां प्रदर्शितत्वात् । ईशता सा चान्येति शेषः ॥ १७ ॥

११३९ 'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय' इत्यभिप्रायं सूचयत्याशङ्कां परिहरन् **न युज्यत इति** ॥ ॥ १३ ॥

११४० 'तदव्यक्तमाह ही'त्यधिकरणार्थं सूचयति **अव्यक्त इति** ॥ १४ ॥

११४१ नन्वीशस्य सर्वावस्थाप्रेरकत्वादिगुणलक्षणो महिमा ह्यत्र विवक्षितो न घटते । गुणानां भेदाभ्युपगमे च गुणिमात्रस्यैव विद्यमानत्वादित्यत आह **तदभिन्ना इति** । गुणत्वेन भोग्यतया गुणित्वे भोक्तृतया च स्थिताः ।

११४३ ननु क्रियादिभिरनित्यधर्मैरीश्वरस्यैक्याङ्गीकारे तस्याप्यनित्यत्वप्रसङ्गादित्यत आह **विशेषात्मतयेति** । नेत्यादेरयमर्थः । धर्माणामियं क्रियाद्यात्मकता च नानित्या । स शक्तिरूपतयैव सविशेषत्वेन क्रियादिरूपते-त्युच्यते । इति यस्मात्तस्मान्नानित्यता ।

११४४ द्रव्यं स्वयमेव गुणगुणितद्विशेषात्मकमिति स्वनिर्वाहकताहेतोः स्यात् । द्रव्येणात्यन्तमभिन्नश्चेद्विशेषो नाम नास्तीत्याशङ्कां परिहरति **तथाऽपीति** ।

११४५ 'स इमान् लोकान् व्यसृजत । स ब्रह्मणा विसृजति । स रुद्रेण विलापयति । सोऽनुत्पत्तिरलयः । 'एक एव हरिरि'त्यादिश्रुत्या तत्र **स स इति** प्रस्तुतस्य परमात्मनः स्रष्ट्रादिरूपेणाभेदश्च गम्यते । समानाधिकरणोक्तेः ।

११४६ एवमभेदिना कथं भिन्नः किमाहोस्वित्तदभिन्नः । भिन्नश्चेत्तस्य भेदस्यापि भेदान्तरं तस्यापि तथेत्यनवस्था स्यात् । भेदस्त्वभिन्नश्चेत्पुरा विशेषविशेषिणोर्विशेष एवाभिन्न इति किमिति तन्नाङ्गीक्रियते ।

११४७ तथाऽङ्गीकारे च तस्यापसिद्धान्त इत्याशयेनाह **विशेष इति** । क्रियाद्याख्यो विशेषस्त्वभिन्न इति **तेन** तार्किकेण नाभ्युपगम्यते । योऽयं क्रियाद्याख्यविशेषस्य द्रव्येण भेदः सोऽभिन्नः । तस्मान्नानवस्था । न च तत्र अस्माभिर्भेदोऽभ्युपगतः । एकत्रापर्यायनानाशब्दवृत्तिविशेषोऽभ्युपगम्यत इति । मैवम् । तथा सति धर्मिणो भेद इति व्यवहारः कथं घटते । तयोः शब्दयोर्निर्विशेषैकार्थवाचकत्वेन पर्यायत्वप्रसङ्गात् ।

११४८ तदेतदाह **भिन्न इति** । अयं घटः स्तम्भेन सह भिन्नः कुम्भेन सह भिन्न इति । प्रतियोगिभेदादेक एव भेदः सविशेषत्वतो हि बहुधा दृश्यते ।

११४९ इतश्च विशेषोऽङ्गीकर्तव्य इत्याह **अभेदभेदयोरिति** । यो यं गुणगुणिनोर्भेदस्तद्विवक्षितो यश्चाभेदो धर्मिण आत्मनां तयोरुभयोरपि धर्मिणः स्वरूपत्वमिष्यते । तथा हि । भिदाभेदिनैकेति शेषः ।

११५१ अविशेषे कथमेवं भवेत् । भेदिमात्रत्वत इत्यन्वयः ।

११५२ धर्मिमात्रं हि विद्यते न तु भेदाभेदौ विद्येते इति वक्तुं न शक्यते । धर्मिणोर्विशेषाङ्गीकारादित्याशयः ।

११५३ किं भेदः कल्प्यते तदा तर्हि गुणगुण्यादीनां किमिति भेदः कल्प्यते । तत्रापि विशेषेणैव व्यवहृति-सम्भवात् ।

११५४ एवं चेद्व्रीहयादीनामपि विशेष एव स्यान्न भेद इत्याह **ऐक्येति** ।

११५५ न ह्यानन्दो ब्रह्मेत्यादिवद्व्रीहैरश्च इति सामानाधिकरण्येनाभेदानुभवः । सत्यमेवं गुणगुणिभावमङ्गीकुर्वतो विशेषोऽङ्गीकार्यो न पुनर्निर्गुणब्रह्मवादिनेत्यत आह **सच्चिदादेरिति** । 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादिवाक्येषु सच्चिदानन्दादेः शब्दजातस्यापर्यायत्वसिद्ध्यर्थं विशेषोऽङ्गीकार्यः । यदि जडत्वाद्यसत्यविशेषणं वारयितुं ज्ञानादिशब्दान्तरमिष्यते, तर्हि ब्रह्मणो जडत्वादिमायामयविशेषराहित्याख्यविशेषणविशेषिता तद्राहित्यविशेषिता च मायामयी चेत् सा च तथेत्यनवस्थितिः । निर्विशेषं शब्दप्रवृत्तिनिमित्ताभावान्न तावदुक्तिर्भवेत् ।

११५८ सत्यमेवमवाच्यं ब्रह्म जाड्यादिव्यावृत्तिद्वारेण ज्ञानादिपदजातेन लक्ष्यते परमिति चेत् तेन लक्ष्यत्वं नाम विशेषो भवेत् । अपिशब्दाद्व्यावृत्तादिपदवाच्यत्वं च स्यात् । **पुनः** पुनरित्यादेरयमर्थः । व्यावृत्तपदेनापि लक्ष्यमिति वदति चेत् । किं तल्लक्ष्यमिति पृष्टे ब्रह्मेति पदान्तरम् । तत्राप्येवं तत्राप्येवमित्यनवस्था स्यात् ।

११५९ ननु जाड्यादिविशेषेण विशेषितत्वं ब्रह्मण इति । तदिष्टमेवास्माकम् । भावाद्वैतवादित्वात् । न सार्वज्ञसुखत्वादिभावविशेषित्वमङ्गीकार्यमित्यत आह **यद्यभावेति** ।

११६१ **असत्त्वेत्यादेरयमर्थः** । असत्त्वाज्ञानत्वाव्याप्तत्वादेश्चानिवर्तनादसुखमज्ञानमव्याप्त्यादि च ब्रह्म स्यात् । किं 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादौ सत्यादिपदैर्ब्रह्मणोऽनृतादिविरोधित्वमङ्गीकुर्मो हि । तस्मान्नासत्यत्वादिकं तस्य प्रसज्यत इत्यत आह **अनृतादीति** । अनृतं न भवतीत्युक्तऋतत्वाख्यो भावधर्मः स्यादेव ब्रह्मणः । स पुरुषः 'स ईश्वरः स ब्रह्मे'तीश्वरशब्दविवक्षितेनानेनैश्वर्यविरोधित्वेन प्राप्तमैश्वर्यं किमिति निवार्यते । विशेषाभावात् । किञ्च ज्ञानादिपदाभिप्रेतं जडत्वादिविरोधित्वमस्याभ्युपगम्यते हि । तेनाभावधर्मिणोऽपि ब्रह्मणः सविशेषत्वमापतेदेव । तस्य ब्रह्मभावात् । न चेदभाव एव वा स्यात् । ब्रह्मैव वा स्यात् । एवं च सविशेषत्वे ऐश्वर्यादीनां भावधर्मादीनां को विरोधः । इदमनृतादीत्यादिशब्दाभिप्रेतम् ।

११६२ अखण्डवादी निर्विशेषब्रह्मवादी मायीत्यखण्डवादिनां विशेषभेदवादी वैशेषिकादिः । खण्डाखण्डो भेदवादी भट्टादिः ।

११६५ 'उभयव्यपदेशात्त्वहिकुण्डलवत्', 'प्रकाशाश्रयवद्वा तेजस्त्वात्', 'पूर्ववद्वे'ति निदर्शनत्रयेणाह भगवान् सूत्रकारः । यद्भाट्टा वदन्ति । अनन्वितत्वेनानभिहितानामर्थानामन्वय इति । तदप्यनेनापास्तम् । सर्वपदार्थानां गुणाद्यैक्यसाधनेनानन्वितस्यैवार्थस्यैवाभावप्रतिपादनात् । तदाह **तच्चेति** । **यदेत्यादेरयमर्थः** ।

११६६ पुरुष इत्येकपदेनापि तस्याशेषविशेषाणां सामान्यत उक्तिर्भवेत् । धर्मधर्म्यैक्यात् । धर्मिपदेन धर्माणां सामान्यत उक्तिसम्भवात् । अपरथा पुरुष इत्युक्तवन्तं प्रति पुरुषः किं करोतीति प्रश्नो न घटते । तावन्मात्रश्रवणेनैव कृतकृत्यत्वसम्भवात् । सामान्यतः प्रतीतानां पूजनभोजनशयनादीनां विवेचनाय हि पृच्छति । पुरुषोत्तमं पूजयतीत्युत्तरेण पदेन विशेषावगतिर्भवेत् । तदेवोपपादयति **यत इति** ।

११६८ अनुभवेनापि निश्चितोऽयमर्थ इत्याह **स्वार्थ इति**।

११६९ अनन्वितवादे दूषणमाह **यदीति**।

११७१ अनन्वयस्य कथं ज्ञानम्। शब्दार्थत्वं यदाऽस्य नेत्युक्तमेव प्रतिपादयति **यदैवानन्वितेति**।

११७२ **न तदर्थ** इत्यादेरयं भावः। एवं पदानामर्थानन्वय इत्यायातम्। तथाच तत्पक्षे वाक्यं नाम न स्यात्। निराकाङ्क्षपदानि वाक्यमिति हि वाक्यलक्षणम्। तत्रोचितकर्त्राद्यभिधानेन निराकाङ्क्षता च स्यादेव। तत्पक्षे तु कर्तृकर्मक्रियाद्यर्थेष्वभिहितेषु सत्स्वप्यन्वयस्यानवगतत्वादेवाकाङ्क्षायाः पूर्तेर्वाक्यं नाम न स्यात्।

११८१ प्रमाणमेव न स्यात्। प्रकृतमुपसंहरति **अत इति**॥ १५॥

११८२ 'परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्य' इति सूत्रमपि व्याख्याति सूत्रक्रमं व्यञ्जयन् **ते चेति**।

११८३ 'बुद्ध्यर्थः पादवदि'ति सूत्रं व्याख्याति **उपदेशत इति**। वेदवचनतः। '**आनुकूल्यादि**'त्यादिशब्दाज्ज्ञानस्य विषयसम्बद्धत्वं, **पूर्णत्वादी**त्यादिशब्दात् स्वतन्त्रत्वम्। 'अथैष एव परम आनन्द' इति श्रुतौ श्रुतम्। **पूर्ण** इत्यादौ च 'स्वाद्वत्ति' इति स्वादुरानन्दः स्वादुत्तमः स्वानन्दश्रेष्ठ इत्यर्थः। **एकलः** प्रधानः॥ १६॥

११८६ कर्मणैव सर्वस्य नियतत्वसम्भवात् कथं विष्णोः सर्वनियन्तृत्वमित्याशङ्कां परिहरन् 'फलमत उपपत्तेरि'ति सूत्रं व्याख्याति **स एवेति**।

११८७ धर्माधर्माणां बोधनं नाम तान्निमित्तीकृत्य कर्मान्तराणां प्रवर्तनं फलदानं सुखादिदानं **प्रेरणादिकमि**त्यादि-शब्दान्निवर्तनम्।

११९० **प्रत्येकमि**त्यादेरयमर्थः। तेषु कर्माभिमानिचेतनेषु प्रत्येकं पृथक् चेतनानि कर्माणि सन्ति। तानि चैवं पृथक् चेतनान्यनन्तकर्माणि तानि चैवमित्येकैकस्मिन्नेव जीवेऽनन्तधाऽनन्तकर्मनियन्तुरीश्वरस्य शक्तिरनन्तेति महामहिमा सर्वोपकारकश्चासौ। तथाऽन्यानपि सर्वशोऽन्यानि कर्माण्यपि तथैव भगवदधीनानि॥ २०॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीकायां त्रैविक्रमार्यकृतौ नयचन्द्रिकायां तृतीयाध्यायस्य द्वितीयः पादः॥ ३-२॥

* * *

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादविरचित-श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका

श्रीशङ्करपण्डिताचार्यविरचिता

अनुव्याख्यानसम्बन्धदीपिका

अथ द्वितीयाध्यायस्य द्वितीयः पादः

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

*५४७ उत्तरमुत्तरपादेन सङ्गमयितुमनुद्रवति **स्मृतीति** ।

५४८ स्मृतियुक्त्यादिविरोधः परिहृतश्चेत् पुनः समयनिरासाय का प्राप्तिरित्यत आह **इतीति** । **अभियोगः** आग्रहः ।

५४९ मन्दाशङ्काप्रकारमाह **अनादीति** ।

५५१ समयानाममानत्वेनादितो वर्तमानत्वं न युक्तम् । न ह्युन्मत्तवाक्यं समयतयानुवर्तत इति मन्दाशङ्का । अतस्तर्कादिभिः समयानां भ्रान्तिमूलदर्शनानि बलवत्तर्कागमपराहतानि किमिति न छिद्यन्त इत्याशङ्कां नुदति **दौर्लभ्यादिति** ।

५५४ दुराग्रहः समयानां प्रवृत्तौ कारणं चेत् सर्वथा तदनपगमान्निराकरणमरण्यरोदनवद् वृथा इत्यत आह **तथापीति** ।

* * *

* प्रतिपरिच्छेदं प्रारम्भे सूचिताः सङ्ख्याः अनुव्याख्यानश्लोकसङ्ख्याः इति ज्ञातव्यम् ।

॥ रचनानुपपत्त्यधिकरणम् ॥

५५६ बुद्धिशाणत्वसिद्धये प्रतिपक्षनिराकरणयुक्तिशाणेन विद्यादिना सिद्ध्यसिद्धय इत्यर्थः । अथ निरीश्वर-साङ्ख्यमतमनुवदति **चेतनेति** ।

५६१ अथ निराकरोति **ईशस्येति** ।

५६१ ईशासङ्ग्रहो न युक्तश्चेदीशसङ्ग्रहे का युक्तिरित्यत आह **चेतनेति** ।

५६२ ईश्वरनिरपेक्षं प्रधानं प्रवर्तत इत्यत्र युक्त्यभावात् काचिदपि प्रमा नेत्याह **न चेति** । युष्मत्पक्षे प्रधानस्ये-श्वरनियतत्वे किं मानमिति चेत् 'यो योनिमधितिष्ठत्येक' इत्यादि श्रुतिरित्यभिप्रैति **श्रुतिरिति** ।

५६३ अस्मत्पक्षे आप्तवाक्यं मानमित्यत आह **आप्तत्वमिति** ।

५६३ उक्तमार्गः प्रमाविरुद्धवक्तृत्वमिति यावत् । इतोऽपि तन्मतं न युक्तमित्याह **अप्रामाण्येति** ।

५६४ यदाप्तवाक्यादिमानं तत्स्वत एव मानमिति वदन् साङ्ख्यो ब्रह्म ज्ञेयमिति जानामीति न वक्तृमायिवत् स्वव्याहतिदुष्ट इति यावत् । चेतनेच्छेति स्वगतसाधनेऽनुमानमुक्तम् अथ परदूषणानुमानमाह **इदमिति** ।

५६६ स्वगतस्य स्वीकारे कारणभूतानुमा केन प्रकारेणापि नेत्यर्थः । इतोऽप्यचेतनं स्वतन्त्रं नेत्याह रचनानुप-पत्तेरित्यादिसूत्रव्याख्यानेन **स्वतन्त्रेति** । कुतो चेतनस्य रचना नास्तीति चेत्स्वव्याहतेत्याह **अचेतनत्वमिति** ।

५६७ स्वव्याहतिं प्रतिपादयति **स्वेच्छेति** । अचेतनस्वेच्छानुभवविरुद्धत्वान्नास्तीत्याह **इच्छामीति** ।

५६८ अचेतनादिच्छावतो मनसो भेदाग्रहादिच्छामीति व्यवहारः । तं पुनः चेतनस्येच्छावत्त्वादित्यत आह **यदीति** ।

५६९ घटस्य भेदो गृहीतश्चेन्मनसोऽपि गृहीतत्वाद्भेदाग्रहाभावः ।

५६९ **इह मन इति** । कामः सङ्कल्पः इत्याद्युक्तैतत्सर्वं मन एवेति । मनस एवेच्छावत्त्वावधारणान्न जीवस्ये-च्छेत्यत आह **उभयेति** ।

५७० यदि जडस्य मनसः कामोऽस्ति तर्हि पुरुषे यत्कर्तृत्वं स्यादित्यत आह **द्वैविध्य इति** ।

५७० तस्माद्भेदग्रहानुभवादित्यर्थः ।

५७१ अचेतनस्याकर्तृत्वं निगमयति **रचनेति** ।

५७२ मनसः कामरूपपरिमाणोऽस्ति चेदपि कामस्वामित्वाभावान्न कर्तृत्वम् । किन्तु कामाद्यात्मकमनःस्वामिनश्चेतनस्यैव कर्तृत्वमित्याशयः । मनस इच्छास्वामित्वाभावेऽपीच्छावत्त्वमस्ति चेत्कुत इच्छा चेतनस्येति । किमिति निषिद्धमिति चेत् कर्तृत्वप्रयोजकेच्छा स्वामित्वरूपेच्छावत्वाभावादित्यभिप्रैति **इच्छेति** ।

५७३ जीवस्येदमपथ्यमिति जानतः तत्र परवशतयेच्छा जायते । अतः कथं तत्स्वामित्वमित्यत आह **किञ्चिदिति** ।

५७४ सर्वं मन एवेति कामस्वामित्वं जीवनिषिद्धमित्यत आह **न चेति** ।

५७६ इतरथा मुमुक्षावैयर्थ्यप्रसङ्गाच्च जीवस्यैवेच्छेत्याह **मोक्षेति** ।

५८१ जीवः सन्निधिमात्रतः जीवावपनकर्तेव बीजावपनकर्तृत्वं देहस्यैव तत्सङ्गादुपचर्यते । जीवे तद्वदुत्पत्तिशक्तिमती बीजे सन्निधानमात्राज्जीवो बीजशक्तिमानित्युत्पत्तौ कारणमित्युपचर्यत इत्यर्थः । अन्यत्राभावादित्यादि सूत्रव्याख्यानेन परिहरति **अन्यत्रेति** ।

५८६ विन्ध्यो निरीश्वरसाङ्ख्यस्तन्मतवदिदं पतञ्जलिमतमपि पुरुषार्थदं नेत्यर्थः । जडव्यतिरिक्तः चेतनप्रस्तावे तदनङ्गीकाराच्चार्वाकस्य प्रत्यवस्थानोपपत्तेः । तन्मतमनूद्य दूषयति **चार्वाकैरिति** ।

५८८ पूर्वपक्षे प्रस्तुतमनुमानत्वे मानाभावं निगमयति **स्वपरार्थविहीनत्वादिति** ।

५८९ उक्तप्रकारेण प्रयोजनरहितत्वादिदं शास्त्रं न भवतीत्याह अभ्युपगम इत्यादि सूत्रार्थं विवृण्वन् स्वपरे देहव्यतिरिक्तात्मनि सत्त्वे इदं परलोकप्रयोजनम् । स कुतः सिद्ध इत्यत आह **देहादिति** ।

५९० प्रत्यक्षस्यैव मानत्वं नेतरस्येति वा युक्तमित्याह **प्रत्यक्षस्येति** ।

५९१ यदि तत्साधकं मानमङ्गीकृतं तर्हि तदेव वेदप्रामाण्ये किमिति मानं न भवेदित्यभिप्रैति **यदीति** ।

५९२ प्रोक्तमप्रयोजकत्वं तन्मतस्य हेतुं कृत्वोपेक्ष्यत्वमाह **स्वमतेनेति** ।

॥ इति अभ्युपगमाधिकरणम् ॥ ३ ॥

* * *

।। पुरुषाश्माधिकरणम् ।।

५९३ साङ्ख्यान्तराले लोकायतं निरासयन् सिंहावलोकनन्यायेन साङ्ख्यान्तरमतमनूद्य दूषयति पुरुषाश्मवदित्यादिसूत्रव्याख्यानेन सन्निधानादिति न केवलमुक्तदोषः । सर्वापलापदोषोऽपि स्यादित्याह **अङ्गित्वमिति** ।

।। इति **पुरुषाश्माधिकरणम्** ।। ४ ।।

* * *

।। अन्यथानुमित्यधिकरणम् ।।

५९५ पुरुषस्याङ्गित्वमङ्गीकृत्य शरीरसम्बन्धादीश्वरनिरपेक्षैव प्रवृत्तिरिति मतमनूद्य दूषयति **अङ्गित्वमिति** ।

५९६ तर्ह्ययमेव स्वतन्त्रः स्यादित्यत आह **न चेति** ।

५९८ एते हिताक्रियादिदोषा अन्येषां च विशिष्टेश्वरानङ्गीकर्तॄणां समाना इत्यर्थः ।

इति **अन्यथानुमित्यधिकरणम्** ।। ५ ।।

* * *

।। वैशेषिकाधिकरणम् ।।

५९९ वैशेषिकस्य विशिष्टेश्वरानङ्गीकारान्न कोऽपि दोष इत्याशङ्क्य तद्दोषप्रकटनाय तन्मतमनुवदति **नित्येति** ।

६०८ अथ महदित्यादिसूत्रव्याख्यानेन परिहरति **महत्त्वमिति** ।

६१० समत्वं नास्तीति तच्चोद्यमुद्भावयति **सदृशस्येति** ।

६१० परिहरति **नेति** ।

६१२ परमाण्वादौ त्र्यणुकादौ च महत्त्वाणुत्वाङ्गीकारे प्रत्यक्षत्वाप्रत्यक्षत्वप्रसङ्ग इत्युक्तं हि इत्यत आह **प्रत्यक्षत्वेति** ।

६१३ पदार्थानां परस्परापेक्षयाऽणुत्वमहत्त्वे तेषां तारतम्यस्थितिदर्शनादित्यर्थः ।

६१४ परमाणोर्महत्त्वमनुमानविरुद्धमिति चोदाहरति **यथेति** ।

६१५ महत्परिमाणतारतम्यस्यापि विश्रान्त्यभावान्न दृष्टान्तत्वमिति परिहरति **नेति** ।

६१५ महत्त्वस्य विश्रमो नास्तीति प्रतिपादयति **महत्तत्त्वेति** ।

६१६ ईश्वरस्यापरिच्छेदः प्रमाणसिद्ध इत्युक्तम् । अथ यदि यथा महत्त्वविश्रान्तिरुत्पत्त्योक्ते विश्रान्त ईश्वरो महत्तत्त्वादनन्तांशाधिक इत्युच्येत । तर्हि परमाणुरपि त्र्यणुकात् षष्ठांशो न भवति किन्तु अनन्तांशेभ्यः कश्चिदंश एव भवतीत्यङ्गीकार्यमित्याह **विश्रान्त इति** ।

६१७ अणुमहत्परिमाणयोरपर्यवसानं कालादिदृष्टान्तेनापि सिद्ध्यतीत्याह **केवलमिति** ।

६१८ यदि तदपर्यवसिते महत्त्वमसाक्षिसिद्धं तर्हि तत्पर्यवसितमहत्त्वं केन गम्यते । अनुमानतश्चेत् तस्यानुभवविरुद्धत्वेनामानत्वात्तारतम्यविश्रान्तिं न दृश्यते हीत्यभिप्रैति **यदीति** ।

६१९ आगमगम्यत्वेऽपि महत्त्वमपर्यवसितमित्याह **यदीति** ।

६२१ महत्त्वाणुत्वयोरविश्रमं पुनरपि प्रतिपादनार्थं प्रतिजानाति । तत्र दृष्टान्तमाह **बहुत्वेति** ।

६२२ अणुत्वमहत्त्वापर्यवसानमागमसिद्धं चेत्याह **अणीयानिति** ।

६२३ अनन्तं ब्रह्मेति श्रुत्या च निस्सीमाणुत्वमहत्त्वसिद्धिर्ब्रह्मण इत्याह **आनन्त्येति** ।

६२३ अनन्त एतेनात्यणुत्वाभिप्रायेऽत्यल्पगुणत्वादिकं स्यादित्यत आह **नैवेति** ।

६२५ तर्हि गुणाल्पत्वादिकं मानावगतं न भवतीति निषेधस्य कोऽभिप्राय इत्यत आह **तावत्त्वमिति** ।

६२५ अर्भकौकस्त्वादित्यादिसूत्रेणापि महतोऽणुत्वं सिद्धमित्याह **महत इति** ।

६२६ अल्पस्थानगतत्वाभावे तन्न्यायेन सर्वगतत्वं न स्यादित्याह **यदीति** ।

६२६ तदेव द्योतयति **स्थितस्येति** ।

६२७ पूर्वपक्षाभिप्रायमेवोद्बलयति **एकत्रेति** ।

६२८ अनन्तत्वं महत्त्वाणुत्वयोरित्युक्तं निगमयति **अत इति** ।

६२८ यदि दृष्टान्तभूतं मुख्यमन्तर्हितस्याणुत्वानन्तरस्य चोक्तत्वादुभयानन्त्ययुगेव मुख्यं महदङ्गीकर्तव्यमित्यर्थः ।

६२९ साक्षिप्रमाणात्सर्वदिक्सम्बन्धादपिपदानां भाग्यः सन्तीत्यर्थः । केवलं साक्षिमानमभिप्रमाणान्तरनिरपेक्षत्वात् साक्षिप्रमाणस्य स्वयंप्रकाशत्वमभिप्रेतम् । तदनङ्गीकारे दूषणमाह **यदीति** ।

६३१ साक्षिप्रमाणात् सर्वदिक्सम्बन्धादपि पदार्थानां भाग्यः सन्तीत्यर्थः । परमाणोर्महत्त्वे का परमाणुतेत्यत आह **अविभाग इति** ।

६३१ परमाणोर्निरवयवत्वात् परमाणुसंयोगनियमोऽप्यप्रामाणिक इत्यत आह **तत्संयोगादिति** ।

६३२ परमाणोरपि महत्त्वाणुत्वे मानसिद्धे इति । येन केन हेतुना अणुत्वमहत्त्वादयो गुणा द्व्यणुकादिकार्येषु भवेयुरित्याह **कारणस्येति** ।

६३३ परमाणुगतद्वित्वसङ्ख्यैव द्व्यणुके । द्व्यणुकगतत्रित्वसङ्ख्यैव त्र्यणुके परिमाणमारभते । त्र्यणुकादिकस्य च सजातीयपरमाण्वादिरेव समवायिकारणमित्यादिकमप्रामाणिकमित्याह **न चेति** ।

६३४ ननु सावयवा एव परमाण्वादयः कारणमिति साक्षिसिद्धमिति वक्तुं न शक्यते । त्र्यणुकावयवतदवयवानां केवलानुमानगम्यत्वादित्यत आह **यदीति** ।

६३५ परमाणुं पक्षीकृत्य परमाण्वनुमानं नुदति । हेतोराश्रयासिद्धत्वादित्यर्थः ।

६३५ अनुमानाप्रवृत्तौ पक्षीकरणाशक्यत्वं हेतुर्भवतीति प्रतिपादयति **यत्रेति** ।

६३६ दूरे स्थितस्य यं प्रदेशमुद्दिश्य प्रमाणं नास्ति तस्य विषयस्य प्राप्तिः न घटत इत्यर्थः । त्र्यणुकावयवाः सावयवाः महद्द्रव्यारम्भकत्वाच्चतुरणुकत्वादिति परमाणोरनुमाने तस्यापि महद्द्रव्यारम्भकारम्भकता हेतुनावयवानुमानं स्यादिति चाभिप्रायः ।

६३६ वस्तूनां सावयव ईक्षकालानन्त्यमपि साक्षिसिद्धम् । न तत्राप्यनुमानमुदेति । शशभृङ्गाद्यनुमानप्रतिबन्धिपराहतत्वात् । तथाहि । अयं परिदृश्यमानो देशः स्वतः स्थूलसूक्ष्मदेशेन सम्बधः देशत्वात् हस्तिविजयादिपरिच्छिन्नदेशवत् । अयं परिदृष्टः कालः कालान्तरवान् कालत्वादतीतक्षणवदित्यनुमाने सम्मतानि सर्वशृङ्गाणि शृङ्गान्तरसमानकालीनानि शृङ्गत्वात् गोशृङ्गवदित्यप्यनुमानं स्यात् । ततश्च देशान्तरादिवच्छशशृङ्गसिद्धिरित्यभिप्रैति **देशान्तरेति** ।

६३६ देशकालादेर्भावत्वेन सजातीयस्यानुमाने शशशृङ्गादेरभावत्वेन विजातीयस्य सिद्धिप्रसङ्गो नेत्यत आह **सदृशमिति** ।

६३७ अभावस्य भावसजातीयत्वे अस्तित्वमपि स्यादिति चेत्सत्यमित्याह **येनेति** ।

६३८ सत्सजातीयत्वान्न शृङ्गादिकं सद्भवितुमर्हति । पटवदित्याविनाभावः किमिति मानं नाभूदित्यत आह **प्रत्यक्षमिति** ।

६३९ शिष्योपाध्यायाविनाभावसन्दिग्धमूलाविनाभावस्य अमानत्वमित्यभिप्रैति **सहेति** । प्रत्यक्षादेर्व्याप्ति-नियामकत्वं साधनस्य साध्यव्यतिरेकनिश्चायकत्वमिति स्पष्टयति **यदैवेति** ।

६४० अनियतव्याप्तेरादरणीयत्वेऽतिप्रसङ्गमाह **अन्यथेति** ।

६४१ इतोऽपि तन्मतं दुष्टमिति प्रकटनायानूद्य 'समवायाभ्युपगमादि'त्यादिसूत्रव्याख्यानेन परिहरति **कार्ये-त्यादिना** ।

६४२ समवायस्य स्वनिर्वाहकत्वात् न सम्बन्धान्तरापेक्षेत्येतद्दूषयति **स स्वेति** ।

६४३ गुणादेर्द्रव्याभेदोऽवयवावयविनिष्ठत्वादेः समवायाभेदवदपि सिद्ध्यतीत्याह **विशेष इति** ।

६४४ गुणादेर्द्रव्याभेदं निगमयति **द्रव्यमिति** ।

६४५ ततः समवायासम्भवादित्यर्थः । न चैकस्य विशेषविशेषिभावोऽसिद्ध इति वाच्यम् । समवायस्य सिद्ध-त्वादित्याह **विशेष इति** ।

६४६ द्रव्यव्यतिरिक्तगुणादिपदार्थकल्पने कल्पनागौरवं च स्यादित्याह **कल्पनेति** ।

६४६ तदेव द्योतयति द्रव्याद्गुणादपि पदार्थाः भिन्नाः समवायस्य सत्तादिविशेषास्त्वभिन्ना इति च कल्पनागौरवं सेत्स्यत आह **कल्पयित्वेति** ।

६४७ न केवलं कल्पनागौरवपरिहारायैव विशेषोऽभ्युपगन्तव्यः व्यवहारान्यथानुपपत्तेः । प्रत्यक्षसिद्धत्वाच्चेत्याह **येनेति** ।

६४९ कार्यकारणादेरभेदे किं मानम् । येन विशेषोपपत्तिरित्यत आह **अभेदेनेति** ।

६५० सामान्यादेस्तद्गतत्वादि विशेषप्रतिबन्द्या द्रव्यस्य गुणाय भेदाभिधानं न सम्भवति । सामान्यादौ सम्मत-विशेषाभावादित्यत आह **सामान्येति** ।

६५१ तन्निष्ठत्वादिधर्माः क इत्याशङ्कायामाह **कार्यस्येति** ।

६५३ अनवस्था तन्मतेऽप्यनिष्टेत्याह **सामान्यस्येति** ।

६५४ अतः अनवस्था स्यादिति भयादित्यार्थः । भवतामपि पुण्यादीनां धर्मत्वाङ्गीकारेऽनवस्था स्यात् । न चेदेको गुणः उत्पत्तिर्जायत इत्यादि व्यवहारोऽनुपपत्तिरित्यत आह **अस्मदिति** ।

६५५ द्रव्ये सति तदन्यस्य धर्मस्य कथं विनाशः । विनाशिनश्चाविनाशिद्रव्यैक्यं कथमित्याशङ्कायां धर्मस्य विनाशात्पूर्वं द्रव्याद्भेदाभेदाख्यविशेषमाश्रित्येत्यभिप्रैति **विशेषमिति** ।

६५५ कुत एवमित्यत आह **दृष्टीति** । भेदाभेददर्शनं युक्तिविरुद्धमित्यत आह **विरोध इति** ।

६५६ युक्तिर्दृष्टं विरोद्धुं नालमिति दर्शयति **विरोध इति** ।

६५७ तर्हि भगवद्रूपादेरपि भेदाभेदः स्यादित्याशङ्कायां तत्परिहाराय 'वासुदेवः सङ्कर्षणः प्रद्युम्नोऽनिरुद्धोऽहम्', 'एवं धर्मान् पृथक् पश्यन्' इत्यादिवाक्यसिद्धतदभेदानुसारि सिद्धान्तमाह **अभिन्न इति** ।

६५९ निरंशस्य परमाणोः संयोगानुपपत्तिरिति सर्वपदार्थानां भागाः सन्त्येव । सर्वदा सर्वदा दिक्ष्वपि सम्बन्धादित्यत्राभिप्रेतं तन्न युज्यते । अंशानन्त्येंशिसंयोगस्याप्यंशसंयोगान्तरापेक्षयानवस्थानादित्यत आह **अंशांशिनोरिति** ।

६६० नावस्थेत्येतदेव प्रकटयति **एकस्मिन्निति** ।

६६१ अंशतः संयोगानङ्गीकारे बाधकमाह **यदीति** ।

६६२ यथैकदेशतः संयोगानारब्धकार्यस्य स्थूलत्वं व्याहतमित्याह । एवं परमाणोरमहत्त्वमित्येतदपि व्याहतमित्याह **परमाणोरिति** ।

६६२ प्रथमात्कारणस्य किञ्चिन्महत्त्वं विनोत्तरकार्यमहत्त्वं च व्याहत इत्याह **अणूनामिति** ।

६६३ अंशांशिनोरत्यन्तभेदोऽपि व्याहत इत्याह **अंशिन इति** ।

६६४ भेदपृथक्त्वयोरेवानिष्टत्वाङ्गीकारो वा संयोगविभागयोरेकनिष्ठत्वाङ्गीकारं विनानेकनिष्ठत्वाङ्गीकारोऽप्ययुक्त इत्याह **संयोग इति** ।

६६५ न चैकानिष्ठत्वस्य सम्प्रतिपत्तिमात्रेण संयोगविभागयोरेकत्वदृष्टान्तसौलभ्येऽपि भेदैकनिष्ठत्वं सुगमत्वं यरस्पष्टयति **भिन्ना इति** ।

६६७ संयोगादिवत्सामान्यमप्येकनिष्ठमित्याह **नरत्वादिकमिति** ।

६६८ गोर्नाशे गोत्वं न नश्यति चेच्छौक्ल्यादिकमपि न नश्येत् । तस्माद्गोबहुत्वमपि स्यादित्यर्थः ।

६७० नरत्वादिधर्माणां बहुत्वं श्रुतिसिद्धं चेत्याह **श्रुतिरिति** ।

६७३ अनिवृत्तविनाशस्तु धर्मा उभयरूपकाः धर्मिण्यविनष्टे विनाशवन्तो धर्मानाशात्पूर्वं भिन्नाऽभिन्ना इत्यर्थः । अनेकधर्मलक्षणस्य सामान्याङ्गीकारे सत्यानन्त्यव्यभिचाराभ्यां व्युत्पत्त्यसम्भव इत्यत आह **व्युत्पत्तिरिति** ।

६७३ तदेव द्योतयति **सर्वेष्विति** ।

६७४ गोशब्दस्य सर्वगोविषयत्वेऽपि विवक्षितगौरवगतिश्च शुक्लेत्यादिविशेषणाद्युज्यते इत्याह **तथापीति** । शब्दः सदृशेषु प्रवर्तत इत्यत्र हेतुमाह **शक्तिरिति** । गोशब्देन सह गृहीतसम्बन्धव्यक्तिवद्व्यक्त्यन्तरेऽपि गोशब्द-व्यवहारसादृश्यविषयशक्त्यैवोपपद्यते इत्यर्थः ।

६७५ अनेकनिष्ठत्वलक्षणजातित एव व्युत्पत्तिरिति पक्षे बाधकमाह **जातित इति** । जातिनिष्ठजातिशब्द-व्युत्पत्तिः तास्वनुगतजातित्वं जात्यन्तरापेक्षा पुनरप्येवमित्यनवस्थानं बाधकमित्यर्थः । व्यक्तिशब्दव्युत्पत्तिरपि व्यक्तित्वसामान्यापेक्षा । व्यक्तित्वजातिरपि जातित्वसामान्याश्रयत्वेन व्यक्तिर्भवति । पुनर्व्यक्तित्वव्यक्तौ व्यक्तिषु च शब्दव्युत्पत्तिव्यक्तित्वान्तरापेक्षेत्यनवस्थानं बाधकमित्यर्थः ।

६७६ स्वरूपत्वजात्यनङ्गीकारात् स्वरूपशब्दव्युत्पत्तिव्युत्पत्त्यसम्भवाच्च । न जातितो व्युत्पत्तिस्वरूपत्वजात्य-नङ्गीकारे तद्व्यावृत्ताधिष्ठाने शब्दव्युत्पत्तिः जात्यन्तरापेक्षेत्यनवस्थानात् । कल्पनागौरवाच्च न जातिर्घटत इत्याह **कथमिति** ।

६७८ गुणवद्द्रव्यमित्यादौ विशिष्टस्य विशेष्याद्भेदाङ्गीकारे षट्पदार्थनियमभङ्गः स्यात् । विशेषमात्रत्वाङ्गीकारे विशिष्टव्यवहारस्य निरर्थकत्वमित्येतस्माद्धेतोश्च तत्पक्षेऽनुपपन्नमित्याह **औपाधिकेति** ।

६८१ औपाधिकभेदस्यानिर्वचनीयत्वादिति च वक्तुं तस्यासम्भव इत्याह **नानिर्वाच्यमिति** ।

६८२ औपाधिकस्य सत्यत्वं प्रतिपादयति **उपाधिजन्यमिति** ।

६८३ समवायस्यौपाधिकभेदः परमार्थः इत्यङ्गीकारात् बहुत्वप्रसङ्गो दुष्परिहारो न इत्युपसंहरति **भिन्नत्वमिति** ।

६८३ अथ सिद्धसाधनत्वपरिहारायानुमानस्याविद्यमानः समवायो विषय इति चेत्तत्र दोषमाह **अविद्यमान इति** ।

६८४ प्रागसतः सत्त्वासमवायो जनिरिति । जनिलक्षणं तेनाभ्युपगतम् । तदप्यौपाधिकविषयशिष्टवदनिरूप्यमित्याह **एवमिति** ।

६८५ अत्रापि विशिष्टस्य विशेष्यमात्रत्वविशिष्टव्यवहारस्य निरर्थकत्वं विशेष्यात् । भेदे पदार्थातिरेकः समवायस्य जनित्वे समवायस्यानेकत्वानित्यत्वप्रसङ्गः । जनेरेकत्वानित्यत्वप्रसङ्गो वेत्यादि दोषाः स्युरित्यर्थः । अस्मत्पक्षे त्वेकस्मिन्नपि विशेष्याङ्गीकाराद्विशेष्यस्य पर्वतस्याग्निमत्त्ववैशिष्ट्यं सम्भवति यथा तथा पूर्वमसतः पदार्थस्य सद्भावलक्षणोत्पत्तिर्युज्यत इत्याह **अस्मत्पक्ष इति** ।

६८६ एकस्यैव शिष्यस्य क्वचिदसत्त्वं च विशेषेणोपपद्यते इत्याह **क्वचिदिति** ।

६८६ पूर्वमसतः पश्चात्सत्त्वमुपपादयति **अभावस्येति** ।

६८८ यथा गगनम् अभिन्नमसदपि प्रमेयत्वादिभावधर्मवत् सदपि घटादिकं न भवत्यन्यव्यावृत्त्याख्याभावधर्मवत्तया पूर्वमविद्यमानो घटः पश्चादभूदिति सामानाधिकरण्यदर्शनात्पूर्वमसमतः पश्चात्सत्वे युक्तिमित्यर्थः । सर्वेषां भावाभावेन भावाभावविवेकः कथमित्यत आह **तथापीति** ।

६८९ तस्माद्भावस्य भावरूपधर्मसम्भवादेव नेष्टघटस्य घटाद्भेदोऽस्तीत्याद्यवगम्य इत्यर्थः । अभावस्य भावधर्मत्वमुदाहरति **अस्तीति** ।

६९० अन्योन्यभावभेदपृथक्त्वशब्दानां पर्यायत्वेन प्रसिद्धानां भिन्नार्थत्वकल्पना च कल्पनागौरवादयुक्तेत्याह **अन्योन्येति** । स्वैःस्वैर्धर्मैरभिन्ना इति ।

६९२ भेदस्य वस्तुस्वरूपत्वं प्रस्तुतम् । तत्र मायिनाभिहितदूषणमनूद्य दूषयति **भेदस्येति** ।

६९३ अन्यस्य प्रतियोगित्वमिति प्रसिद्धमित्याह **प्रतियोगिन इति** ।

६९३ विदारणपक्षेऽपि घटस्यावयवशोर्विदारणमेव स्यात् । न तु शून्यतेत्याह **विभागेनेति** ।

६९४ द्रव्यस्यावयवशो विभागेन शून्यत्वे सति शून्यानां द्रव्यसमवायकारणं स्यात् । अस्तु तर्हि तथेत्यत आह **नेति** ।

६९४ अपि च भेदप्रसङ्गैर्विदारणापादनमसङ्गतमन्यत्वलक्षणभेदस्य वक्तुः विवक्षितत्वादित्याह **विदारणेति** ।

६९५ न च विदारणमेवान्यत्वमित्याह **अविदारणेऽपीति** ।

६९५ भिन्नाऽभिन्ना इत्यर्थः ।

६९६ यन्नित्यज्ञानाद्यगुणत्वमेवेश्वरस्याभिहितम् । तद्बहुप्रमाणविरुद्धत्वात् न युक्तमित्याह **न चेति** ।

६९९ **अनन्तगुणता इति** । भगवत एकैकगुणापेक्षयाप्यनन्तत्वमभिधीयते । तदनङ्गीकारे बाधकमाह **यदीति** ।

७०० स्वतोऽविशेषाभावेऽप्यौपाधिको विशेषः स्यादित्यत आह **औपाधिकेति** ।

७०१ ज्ञानस्य स्वप्रकाशत्वानङ्गीकारात् सार्वज्ञमयुक्तमित्याह **स्वप्रकाशत्वमिति** ।

७०२ स्वप्रकाशत्वमन्तरेणाभिसार्वज्ञं सम्भवतीत्याशङ्क्य दूषयति **ज्ञानमित्यादिना** ।

७०५ ईशस्य ज्ञानादिकमभ्युपगम्यानन्दानभ्युपगमे तदभिमतमनूद्य दूषयति **सुखवानिति** ।

७०५ सुखवान् दुःखवांश्च स्यादिति व्याप्तिश्च नो भवेत् । कुत एतदित्यत आह **निर्दुःखत्वमिति** ।

७०६ का सेत्यत आह **य इति** ।

७०७ विमतो सुखी दुःखी सुखित्वात् इत्यनुमानस्य श्रुतिविरोधोऽभिहितः । उपाधिविरोधोऽप्यस्तीत्याह **ईश्वरस्येति** ।

७०८ उपाधेः साधनव्यापकत्वमाशङ्क्य परिहरति **न चेति** ।

७०८ किञ्च दर्शनमात्रेण श्रुत्यर्थापत्त्यापेक्षस्यापि हि तस्य युक्तत्वेन दुःखहेतुत्वानुमानप्रसङ्ग इत्याह **सहेति** ।

७१० उपाधेः पक्षव्यावृत्तौ मानमाह **अदुःखमिति** ।

७१२ सहदर्शनमात्रेण श्रुत्यर्थापलापे धर्मसिद्धिरुद्भावि । इदानीं श्रुत्यपलापे सति ईश्वराद्यसिद्धिः उद्भाव्यते **अनुमानेनेति** ।

७१४ ईशस्यानन्दानुमानं श्रुतिविरोधेन दूषितम् । पुरस्तादिदानीं श्रुतेः धर्मिग्राहकप्रमाणत्वात् तद्विरोधेन दूषितमिति किं पुनर्वक्तव्यमिति प्रकटयितुमाह **ईशस्येति** ।

७१७ तत्पक्षे सृष्ट्यादिकालभेदाभावात् सर्वदा सृष्ट्यादिप्रसङ्गेनापि तत्पक्षं दूषयति । नित्यमेव च भावादिति सूत्रव्याख्यानेन नित्येच्छत्वादिति उक्तदूषणं स्वपक्षे परिहरति **अस्मन्मत इति** । एकदेशेच्छानित्यपि सृष्ट्या-द्युद्दिश्य वर्तमाना सृष्ट्यादिकर्त्रीश्वरवत्तत्तत्काले तत्तदिच्छेत्यङ्गीकारान्न दोष इत्यर्थः ।

७१८ कालस्य सृष्ट्यादीच्छायोग्यत्वादिविशेषाश्च स्वेच्छाविशेषवदीशेषवादीच्छाधीन इति सप्रमाणकमाह **विशेषा इति** ।

७१९ जगदुत्पत्तिनाशौ तत्तत्कालवर्तित्वेनोपपद्येते । निमेषाद्युत्पत्तेः । कालाधिकरणत्वानिरूपणादनुपपत्तिरित्यत आह **कालस्येति** ।

७२० तर्हि सिसृक्षासञ्जिहीर्षेत्याद्यपर्यायप्रत्ययवेद्याया इच्छाया एकत्वाविरोधः । कुत इत्याशङ्कां नुदति **असङ्ख्यातेति** ।

७२० न केवलं कालस्यैव स्वगतत्वं किन्तु ईशदेशयोरपि विद्यत इत्यत्र मानमाह **ईश इति** ।

७२३ ईशेच्छायाः औपाधिकत्वं च नास्तीत्याह **स्वभावादिति** ।

७२३ स्वनाशेशेच्छावश इत्याह **स्वभाव इति** ।

७२४ इतोऽपि तन्मतमयुक्तमित्यभिप्रायेण रूपादिमत्त्वादित्यादिसूत्रं व्याख्यायाधिकरणमुपसंहरति **रूपेति** ।

इति वैशेषिकाधिकरणम् ॥ ६ ॥

* * *

॥ समुदायाधिकरणम् ॥

७२६ शब्दादेकस्य चित्पदार्थस्य त्रिक्षणादिस्थायित्वं वदतो वैशेषिकादेर्मतनिरासप्रसङ्गे सर्वक्षणिकत्ववादि-बौद्धमतं दूषयितुमनुवदति **वैभाषिका इति** ।

७२९ अथ 'समुदाय' इत्यादिसूत्रव्याख्यानेन दूषयति **स इति** ।

७३० युक्तानां परमाणूनां समुदायोत्पत्तिरन्योन्याश्रयत्वेन निवारिताः । अथ वियुक्तानामेव विद्यमानं समुदायः सामीप्यहेतुना व्यवह्रियत एव केवलं न तूत्पद्यत इति मतमनूद्येतरेतरप्रत्यय........त्यादिसूत्रव्याख्यानेन दूषयति **अन्योन्येति** ।

७३० क्षणिकत्वे परमाणूनां देशान्तरसञ्चरणानवसरादेव संयोगो व्याहतः । वस्तुना प्रत्येकं समुदायत्वं चेदणुक-मिदमेकमिति प्रत्ययाव्याहतमित्यर्थः ।

७३३ सदृशात्सदृशोत्पत्तिनियमे व्यवहारायदाद्व्यवदाच पदसमुदायस्य .... सम उक्तः । अथ त्रिसदृशं कार्योत्पत्तौ दूषणमाह **विशेषेति** ।

७३५ सृष्टिकालात्पूर्वकारणस्य विशेषादृष्टसम्बन्धादसदृशकार्यजनकत्वं सम्भवतीति चेदनुपत्रदृष्टादयकर्तृदृष्टोत्पत्त्यनुत्पत्तिरित्याह **अदृष्टमिति** ।

७३५ अतो नियत्येत्युक्त्वा म नियतिमेव स्पष्टयति **यस्येति** ।

७३७ नित्यविनाशित्वेति मते तदपि मानाभावान्न युक्तमिति द्योतयति **नित्येति** ।

७३७ कार्यं चेत्यत्र विसदृशकार्योत्पत्तिशोधकनियामकाभावाद्विसदृशकार्योत्पत्तिरुद्भाविता । इदं न जायत इत्यत्र कारणाभावादिसदृशकार्यानुत्पत्तिर्निषिध्यत इति विशेषः ।

७३८ निरन्तरमुत्पत्त्योत्पत्त्यविनाशिपदार्थस्य मानाभावः । केन मानेन गम्यत इति सामान्यतः प्रस्तुतः । अथ विशेषतः प्रत्यक्षमानाभावमाह **विनाशेति** ।

७३९ न केवलं क्षणिकत्वं न दृश्यते किन्तु स्थिरत्वं दृश्यते चेत्यर्थः । अथानुमानसद्भावमाशङ्क्य 'आकाशे चे'त्यादिसूत्रव्याख्यानेन तदभावमाह **फलादीनामिति** ।

७४० दृष्टान्तस्य साधनवैकल्यमाशङ्क्य नुदति **यदीति** ।

७४१ अभावलक्षणमाह आकाशस्याभावाद्व्यावृत्तिदर्शनार्थं **सधर्मीति** ।

७४२ अथाकाशस्य भावान्तर्भावमाह **अधर्मीति** ।

७४२ उन्मत्तोऽपि धर्मिप्रतियोगिनिरपेक्षतया प्रतीयमानस्य सत्त्वग्रहणायालम् । अयं तदर्थमप्यशक्तत्वादुन्मत्तादप्यधमः । अयं सार्वज्ञाभावादेव शास्त्रकृद्भवितुं नार्हः । लोकतत्परिज्ञानात्किमुत उन्मत्तादपि नीचत्वात्किं पुनरिति द्योतयति **स्वीकारेति** ।

७४३ प्रत्यभिज्ञानं स्थिरत्वसाधकं न भवति । पुर्ववस्तुसंस्कारनिबन्धनोत्तरवस्तुसादृश्यवशभ्रममात्रत्वादित्यभिधानं पूर्वोत्तरवस्तुसादृश्यज्ञानं व्याप्त्यनुसन्धानमनुमानप्रयोगश्च क्षणिकत्वान्न घटत इत्युत्तरेत्यादिसूत्रव्याख्यानेनाह **उत्तरेति** ।

७४५ अपि च अनुभवस्य प्रबलत्वेन तद्विरोधात् तदनुमानकल्पिते प्रतिक्षणवस्त्वभिधा न सम्भवतीत्याह **एकत्वमिति** ।

७४६ उत्तरोत्पत्तीत्यत्र प्रकरणस्य नाशात्संस्कारार्पणानुपपत्तिरुक्ता । अथ कार्यस्य कारणकालवर्तित्वं विना च संस्कारार्पणं न घटत इत्युच्यते **कार्येति** ।

७४७ कार्यकारणयोरेककालीनत्वं विना संस्कारार्पणं न घटत इत्येतदेव प्रतिपादयति **सम्बद्धा इति** ।

७४८ संस्कारार्पणहेतुः सम्बन्धोऽपि कार्यस्य कार्येण सहवासरूपोऽभिप्रेतः । स चैकक्षणातिरिक्तवस्तुस्थित्यनङ्गीकारादनुपपन्नः । तन्मतेऽङ्गीकर्तुमनङ्गीकृते च सम्बन्धे तन्निबन्धनसंस्कारापादितसादृश्यवशभ्रममात्रत्वापादनं प्रत्यभिज्ञानस्य न घटते । एवं वस्तुनः स्थिरत्वनिरासाय स्थिरत्वमङ्गीकर्तव्यम् । तेनेति क्षणिकत्वं व्याहतमित्यभिप्रैति **एकेति** ।

७४९ एकक्षणदीपवत् वस्त्वोत्पत्तिं कार्योत्पादनं संस्कारार्पणं च युज्यत इति न क्षणिकत्वभङ्ग इति वक्तुं न युक्तम् । तेन पूर्वापरमध्यकलारहितक्षणाभ्युपगमादित्याह **पूर्वेति** ।

७४९ इतोऽपि क्षणिकत्वानुपपत्तिरित्यसति प्रतिज्ञेत्यादिसूत्रव्याख्यानेनाह **पूर्वभावेति** ।

७५१ दीपादौ प्रतिक्षणं स्थिरत्वचलत्वादिविरुद्धधर्मदर्शनस्य प्रतिक्षणं कार्योत्पत्त्यनङ्गीकारे का गतिरित्यत आह **अभेदेऽपि** ।

७५२ अबाधितस्यास्थिरत्वदर्शनाप्रामाण्यवद्विशेषदर्शनाप्रामाण्योपपत्तेरपि तन्मतमयुक्तमित्याह **विशेषेति** ।

७५२ दीपादिविशेषवदबाधितप्रत्ययवेद्यत्वात् गगनं सदित्यङ्गीकार्यम् । तद्वद्दिगाद्यपीत्याह **दिगिति** ।

७५३ अनयोरन्यस्याधिकदूष्यत्वमाह **विश्वमिति** ।

७५४ अस्य मायावाद्युपमत्वं सर्वप्रमाणविरुद्धवादित्वादित्याह **सर्वेति** ।

७५५ न केवलं सर्वप्रमाणविरुद्धवादादेव वादिनः सर्वदूषणम् । किन्तु अनुभवमात्रविरुद्धवादादपि भवतीत्याह **सर्व लोक इति** ।

७५६ अनुभवविरोधमपि तन्मते दर्शयति **सोऽहमिति** ।

७५७ उत्प्रेक्ष्य इत्युक्तमपेक्ष्यत्वं निगमयति **अत इति** ।

॥ इति समुदायाधिकरणम् ॥ ७ ॥

* * *

॥ असदधिकरणम् ॥

७५८ अथ ज्ञानार्थाभाववादिमाध्यमिकस्य मतमनुवदति **अपर इति** ।

७६४ निरस्यति च नासत इत्यादि सूत्रव्याख्यानेन **नासतो जगत इति** ।

७६५ न केवलं प्रमाणादृष्टत्वादसतः कारणत्वं नास्ति । अखिलाद्वरं दृष्टिप्रमाणं चासतः कारणत्वाभावमेव वेदयतीत्यर्थः । असतः कारणत्वेऽतिप्रसङ्गमाह **यदीति** ।

७६७ अस्मिन् देश एवास्मिन्काल एव फलपुष्पादिकं भवेदिति । दृष्टो नियमोऽपि शून्यस्य निधर्मकत्वात् तत्पक्षेऽनुपपन्नः । तस्माच्च तस्य कारणत्वं नेत्यर्थः । शून्यकारणत्वमनुमानविरुद्धं चेत्याह **पुरुषेति** ।

७६८ वस्तुत्वहेतुत्वसिद्धिं सर्वस्यैवाभावात् तस्य शून्योद्धृतत्वनिषेधासम्भवाशङ्कां च नाभाव इत्यादि सूत्र-व्याख्यानेन परिहरति **न चेति** ।

७६९ सदिति गम्यते । तथाप्यसदित्यत आह **अनुभवेति** ।

७६९ तेन परिहरति **स्वप्नेति** ।

७७० वचनस्यासत्त्वे बाधकाभावात्प्रतिपक्षसाध्यधर्मः सिद्धः स्यादित्यर्थः । दृष्टमपि विश्वसत्त्वं स्वप्नादिवत् काल्पनिकमित्याशङ्कां वैधर्म्याच्चेत्यर्थः । इदानीं निवर्तते चेत्तदपि विश्वं दृष्टत्वात् कल्पितरजतवत् स्वविषयज्ञानेन निवर्तिष्यत इत्यत आह **अनादेरिति** ।

७७१ दृष्टप्रपञ्चस्य भ्रान्तत्वमदृष्टायाः प्रपञ्चनिवृत्तेरभ्रान्तत्वमिति न युक्तमित्याह **दृष्टस्येति** ।

७७२ तत्र दृष्टान्तमाह **गवामिति** ।

७७२ भवत्पक्षे कथं दश कालादिनियमा युज्यत इत्यत आह **अस्माकमिति** ।

७७३ न निवर्तत इति बाधकाभावात् प्रपञ्चस्य सत्त्वमुक्तम् । तत्रानुमानं बाधकमाशङ्क्य विशेषतः परिहरति **दृश्यत्वादिति** ।

७७४ हेतोरव्यभिचारायानुमानस्य मिथ्यात्वं चेत् साधकत्वसाध्यमित्याह **साधकत्वमिति** ।

७७५ नेत्याह **सत्त्वमिति** ।

७७५ अनुभूतिविरोधे अनुमानतो मिथ्यात्वं सिद्ध्यतीति न मन्तव्यम् । बाधितविषयत्वेन अमानत्वात् तस्ये-त्यभिप्रैति **अनुभूतीति** ।

७७६ प्रत्यक्षानुभवो विश्वस्य वर्तमानमात्रत्वं गृह्णाति न निवृत्तिं गृह्णाति । अतो विरोधाभावान्न बाध्यबाधकमाह इत्यत आह **अतीति** ।

७७७ यथा वर्तमानानुभवो भविष्यत्कालं गृह्णाति । तद्वदिदानीं दृष्टं भविष्यत्कालेऽप्यबाध्यमिति गृह्णातीत्यर्थः । दृष्टस्य बाध्यत्वं गृह्णाति चेच्छुक्तिरजतमबाध्यं स्यादित्यत आह **दृढेति** ।

७७७ विश्वदृष्टिः प्रमाणशुक्तिरजतदृष्टिः प्रमाणाभासः तन्मतेऽपि तस्मादपि न विश्वमिथ्यात्वमित्याह **भ्रान्तेरिति**।

७७८ यद्विश्वग्राहिप्रमाणं तथाप्यतत्त्वावेदकं विश्वस्य विज्ञाने व्यभिचारादित्यत आह **विज्ञानादिति** ।

७७९ दृष्टत्वात्प्रपञ्चो मिथ्येति यत्प्रमाणमुदेति तदपि दृष्टत्वान्मिथ्येति । मिथ्यात्वे प्रमाणाभावात्प्रपञ्चसत्यत्व-सिद्धिरिति स्वविरोधः । अत्र चोदयति **भेद इति** ।

७८० विशेषणविशेष्यभावापेक्षया भेदसिद्धिर्विशेषणविशेष्याभावश्च भेदसापेक्षः । इदमस्माद्भिन्नमिति । धर्मप्रति-योग्यपेक्षया भेदसिद्धिः भेदापेक्षश्च धर्मिप्रतियोगिभाव इत्यन्योन्याश्रयता दुर्निरूपत्वाद्भेदस्य भेदात्मकः प्रपञ्चो मिथ्येति तदेतन्निरस्यति । स्वरूपग्रहे भेदस्याग्रह इति पक्षदोषमाह **अन्यथेति** ।

७८१ तदेव प्रकटयति **अगृहीत इति** ।

७८२ स्वरूपेण सह भेदाग्रहे दोषोऽभिहितः । अथ स्वरूपेण सह ग्रहे विरोधो नेत्याह **धर्मित्वेति** ।

७८३ धर्मिप्रतियोगिग्रहणादनन्तरं भेदस्य ग्रहदर्शनान्न सहग्रह इत्याशङ्क्याह **स्वरूपेणेति** ।

७८४ अस्यामुष्माद्भेद इति । स्वव्याहतं च भेददूषणमित्याह **किञ्चेति** ।

७८६ माध्यमिकदूषणेनैव मताभेदान्मायावाद्यपि दूषितो भवतीत्याह **एतादृशस्येति** ।

७८७ मताभेदं दर्शयति **तदिति** ।

७८८ ब्रह्मणः शून्यत्वादनृतादिविरोधित्वं वैशिष्ट्यं मायावादिनाङ्गीकृतमिति न मन्तव्यमित्याह **अनृतेति** ।

७८९ उभयोरपि स्ववाक्यस्य विषयेण सह मिथ्यात्वाङ्गीकारान्न कल्पाद्यधिकार इत्याह **स्ववाक्येति** ।

७९० मायिमाध्यमिकमतस्य स्वव्याहतत्वान्न भगवता स्वमतप्रतिष्ठापनाय तद्दूषणं कर्तव्यम् । किन्तु तन्मते दोषबाहुल्यप्रकटनायेत्यप्रयत्नादित्युक्तम् ।

७९१ योगाचारमतं दूषयितुमनुवदति **ज्ञानमिति** ।

७९२ ज्ञानस्य प्रति देहं सन्ततिभेदः । सोऽहमित्यभेदश्च भ्रान्तिकल्पितः । नानासंवृत्तिभूमिषु अन्तःकरणेषु इदं. दूषयति नाभाव इत्यादि सूत्रव्याख्यानेन **इत्येतदिति** ।

७९३ इतोऽपि तन्मतमयुक्तमित्याह **क्षणिकत्वाच्चेति** ।

७९४ सूत्रव्याख्यानेन क्षणिकत्वादिति घटादिज्ञानं चक्षुरादिसंयोगप्रवाहजं क्षणिकम् । घटादीन्द्रियसंयोगात्पूर्वोत्तरकालीनवर्तिस्थिरम् । तस्मान्न तयोरैक्यमित्यर्थः ।

७९४ **सर्वथे**त्यादिसूत्रव्याख्यानेन चतुर्विधबौद्धनिरासमुपसंहरति **सर्वेति** ।

७९५ अथ वेदबाह्यनिरासङ्गान्धिनमतं दूषयितुमनुवदति **आहेति** ।

७९६ अथ 'नैकस्मिन्नि'त्यादिसूत्रव्याख्यानेन दूषयति **नैतदिति** ।

७९३ दृष्टेर्बाधकप्रमाणं न सम्भवतीत्याह **भावेति** ।

७९७ स्वरूपेण सत्त्वमन्यरूपेणासत्त्वं विश्वस्य न सदसद्विलक्षणत्वादिकमित्येव दृष्टिरित्यर्थः । सदसद्विलक्षणत्वादि वा उदितदोषपरिहारान्यथानुपपत्त्या सत्यविधत्वं स्वीकृतमित्यत आह **तत्तदिति** ।

७९८ तस्मात् दृष्टिविरुद्धत्वं वदतः कोऽपि दोषः परिहर्तुमशक्यमित्यभिप्रैति **अतिहायेति** ।

८०० इतोऽपि तन्मतं दुष्टमिति वक्तुं पुद्गलस्य तदुक्तं देहमानवत्त्वमनुवदति **वक्तीति** ।

८०१ अथ दूषयति । एवं चात्मेत्यादिसूत्रत्रयविवरणेन तदित्यादिनान्यथाभावात्तन्मते किं दुष्टमिति चेज्जीवनित्यत्वमित्याह **अन्यथेति** ।

८०२ स्वपक्षे जीवस्यान्यथाभावो न नित्यत्वदूषकमाह **नानित्यतेति** । चैतन्यादेर्लक्षणस्य निवृत्तावेव विशेषिणो जीवादेरनित्यत्वं स्यात् चैतन्यं च न निवर्तते । न तस्माज्जीवानित्यत्वमित्यर्थः ।

८०३ अनित्ये घटादौ किं लक्षणं निवर्तमानमनित्यं नापादकमित्यत आह **ओतेति** ।

८०४ भवन्मतेऽन्यथाभावानाशलिङ्गं न चेदमपि रूपादिमात्रं जीवस्य नाशगमकमित्यत आह **भौतिकमिति** ।

८०५ नैवं जैनेनाभ्युपगन्तुं शक्यमित्याह **नैवमिति** ।

८०६ यदि रूपादिमत्किञ्चिन्नित्यं स्यात् । तर्हि जगदपि रूपादिमत्त्वान्नित्यं स्यादिति भयेन जिनेन रूपादिमत्सर्वमनित्यमभ्युपगतमित्यर्थः । अणुमहच्छरीरेषु पुद्गलस्य सङ्कोचविकासाख्यविकारवन्नित्यत्वमुद्भावितमथ मुक्तस्य नित्योर्ध्वगतिरूपविकारादनित्यत्वमुद्भाव्यते **नित्येति** ।

८०७ नित्योर्ध्वगतिरूपविकारो नाशगमको नेति चेत्पृच्छति **कीदृश इति** ।

८०८ सर्वावयवसन्निवेशविश्लेषलक्षणविकार एत .... विकारमात्रं पुद्गलस्य तादृशविकाराभावान्नानित्यत्वमिति तदुक्तं उत्तरमनूद्य दूषयति **संस्थानेति** ।

८०८ भूसागरादित्वेन ये विकारमात्रं लिङ्गमेव मानमभ्युपगन्तव्यम् । सङ्ख्यादावपगमादर्शनाद्वेदानङ्गीकारवादिना तथाभ्युपगमेन दोषमाह **यः कश्चिदिति** ।

८०९ इतोऽपि तन्मत .... यत्स्थावराणामतिदीर्घत्वादिकं विकारत्वादनात्मत्वे कारणमभिमतम् । तेन तद्गजानामनात्मत्वेऽपि सममित्याह **देहेति** ।

८१० तदेव साम्यं प्रकटयति **अण्विति** ।

८११ स्थावराणां सात्मकत्वं जीवलिङ्गैः साधयति **गीतादिति** ।

८१२ इति प्रतिपादितार्थसूत्रारुढ इत्याह **एवमिति** ।

८१२ अथ पाशुपतादीनां मतमुपन्यस्य बहुश्रुतिविरुद्धत्वेनापादेयमित्याह पत्युरित्यादि सूत्रव्याख्यानेन **सर्वज्ञत्वेति** ।

८१३ तादृशीर्दर्शयति **तच्चेत्यादिना** ।

८१८ आसु श्रुतिषु पशुपतेरीश्वरत्वविरुद्धं दूषणं किं प्रतीयते इत्यत आह **इत्यादीति** ।

८१९ पशुपतेः जन्यादिपरिहारायाशरीरत्वमङ्गीकृतम् । पाशुपतेरितोऽपि तन्मतं नोपादेयमित्याह सम्बन्धेत्यादि सूत्रव्याख्यानेन **अशरीरत्वत इति** ।

८२० जडमेव नित्यं किञ्चिद्देहादिवत्सृष्ट्यनङ्गभूतमीशस्येत्याशङ्क्य करणवदित्यादि सूत्रव्याख्यानेन नुदति **न चेति**। इतोऽपि पशुपतेः कर्तृत्वान्नेत्याह **न चेति**।

८२१ अधिष्ठानेत्यादिसूत्रव्याख्यानेन **अधिष्ठान इति**।

८२२ शरीरवर्जितः पशुपतिरधिष्ठानं निरपेक्षमेव कर्तेत्याशङ्क्यान्तवत्त्वमित्यादिसूत्रं व्याख्याति **अदेह इति**।

८२३ पशुपतेरुक्तदूषणं विष्णौ नेत्याह **न चेति**।

८२३ अनुमानमूलत्वात्पाशुपतागमस्य प्रतितर्कपराहतत्वेन न पशुपत्यैश्वर्यसाधकत्वं सम्भवति। वेदमूलागमस्य प्रतितर्कपराहतत्वाभावेन विष्ण्वैश्वर्यसाधकत्वं सम्भवतीति श्रुतिप्रामाण्यगौरवादित्युक्तम्। आनन्दाद्यात्मकदेहत्वाद्विष्णोः कर्तृत्वं श्रुत्या साधयति **मनोबुद्धीति**।

८२४ किमात्मको भगवानित्याद्युक्तशाखतां प्राकृतदेहवत्त्वादिमाहात्म्यं विष्णोरन्यस्य न विद्यत इत्यत्र श्रुतिमाह **न त इति**।

८३१ विष्णोरेकस्य विष्णोर्देहदेहिभावो विरुद्ध इति न मन्तव्यमित्याह **मानवत्त्वादिति**।

८३१ मानदृष्टेर्विरोधोद्भावनं तर्हि मानानदृष्ट्येऽपि विरोधे तदभावोद्भावनं प्रसज्यतेत्यभिप्रैति **अविरोध इति**।

८३२ 'अनिलयने भयं, स इदं, सर्वे सृजत, सशिरः सदक्षिणः पक्षः' इत्याद्युक्तनिरधिष्ठानकर्तृत्वादिकं विष्णोर्युक्तमिति निगमयति **अत इति**।

८३२ विश्वस्य स्रष्टारमनेकरूपं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति इति शिवस्यापि जगत्स्रष्टृत्वं श्रूयत इत्यत आह **शिवेति**।

८३३ शिवादिनाम्नां विष्णुविषयवत्त्वेऽपि विष्णुनाम्नां शिवादिविषयत्वाभावे च प्रमाणमाह **नामानीति**।

८३४ इतोऽपि शिवादीनामयुक्तम्, श्रुतयो विष्णुवाचका इत्याह **चोक्त इति**।

८३५ लिङ्गादिपुराणान्यपि रुद्रस्य जगत्कारणत्वेन मानमित्याह **पुराणानीति**।

८३५ न केवलं पुराणान्तरादिविरोधादेव न तत्र मानं भवति लिङ्गादिकम्। किन्तु पूर्वापरविरोधात् समब्राह्मविरोधादेश्चेत्याह **तदिति**।

८३७ न केवलमनेन न्यायेन रुद्रकर्तृत्वान्निराकृतम् । किन्तु स्कन्दादिकर्तृत्वमिति निराकृतमित्यत आह **स्कन्देति** ।

८३८ तर्हि किमिति शक्तिपक्षनिराकरणं पृथगित्यत आह **निराकृताविति** ।

८३८ अथ दूषणायानुवदति **महतीति** ।

८४० अथ दूषयत्युत्पत्तीत्यादिसूत्रव्याख्यानेन तन्त्रेति अनुपपत्तिं दर्शयति **दृष्टेति** ।

८४१ अथामध्यमवाममतमनूद्य दूषयति न चेत्यादिसूत्रव्याख्यानेन **वामैरिति** ।

८४३ अथाणुवाममतमनूद्य दूषयति विज्ञानेत्यादिसूत्रव्याख्यानेन **अन्य इति** ।

८४४ न केवलमीशवदप्रसङ्गात्तन्मतमयुक्तं कल्पनागौरवाच्चेत्याह **सार्वज्ञेति** ।

८४५ अस्तु तर्हि पशुपतिरेव कर्तेत्यत आह **उक्तेति** ।

८४५ न केवलं युक्तिविरोधादेव तन्मतमनङ्गीकार्यम् । किन्तु श्रुत्यादिविरोधाच्चेति सूत्रव्याख्यानेत्याह **श्रुतीति** ।

८४६ केचिदुत्पत्तीत्यादिसूत्राणि पञ्चरात्रनिराकरणपराणि योजयन्ति । तदनूद्य दूषयन्ति **पञ्चरात्रेति** ।

८४७ पञ्चरात्रनिराकरणं भगवन्मतविरोधीति सप्रमाणकमाह **यत इति** ।

८४९ इतोऽपि तद्विरुद्धमित्याह **गीतेति** । गीतापञ्चरात्रसङ्क्षेप इति भागवतेरितमिति यावत् ।

८५१ इतोऽपि पञ्चरात्रममानं नेत्याह **श्लोका इति** ।

८५२ पुराणं विद्या उपनिषदः श्लोका इति श्रुतौ श्लोका इति वचः पञ्चरात्रं प्रमाणत्वेनोपनिषदादिभिः सह सङ्गृह्णातीति अर्थः ।

८५३ वासुदेवात् सङ्कर्षणो नाम जीवो जायत इति सूत्रश्रुतिविरुद्धजीवोत्पत्तिवचनं पञ्चरात्राप्रामाण्यकारणदोष इत्यत आह **उत्पत्तिरिति** ।

८५३ ज्ञात एव आत्मनो शुद्ध्यन्तीत्यभूतभावो न कथ्यते किन्तु जीवस्य देहोपाधिकोत्पत्तिरेवेति चेत्पञ्चरात्रेऽपि तथेत्याह **न चेति** ।

८५४ सूत्रश्रुत्योर्विवक्षितोत्पत्त्यङ्गीकारे 'यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्' । 'न हन्यते हन्यमाने शरीरे'ति जीवस्य नित्यत्ववचनं कारणमस्ति । पञ्चरात्रे किं विशेषवचनमित्यत आह **अनादीति** ।

८५५ सूत्रश्रुत्योः सादित्वं नाभिमतम् । जीवस्य पञ्चरात्रेऽपि तथेत्यभिप्रैति **न हीति** ।

८५५ अथ वासुदेवात् सङ्कर्षणो नाम जीवो जायत इत्यादेः परानवगतार्थद्वयमाह **जीवेति** ।

८५८ तत्र भगवांच्छाण्डिल्यः षडङ्गं वेदमधीत्य तस्मिन्महत्याम्नाये निष्ठामनधिगच्छन्नित्यादिना पञ्चरात्रस्य वेदनिन्दनपरत्वादप्रामाण्यमित्याशङ्कां नुदति **यदीति** ।

॥ इति द्वितीयाध्यायस्य द्वितीयः पादः ॥

* * *

अथ द्वितीयाध्यायस्य तृतीयः पादः

८५९ पञ्चरात्रस्यादुष्टत्वं निगमयति **अत इति** ।

८६० पादतात्पर्यार्थमुपसंहरति **अत इति** ।

८६० अतः श्रुतेः समयविरोधाभावादित्यर्थः ।

८६१ किमिति । यक्षाण्यामविद्यामयानां निराकरणमित्याशङ्कायां तत्परिहाराय तदनिराकरणं तमोगतिकारणप्रमाणं दर्शयति **अन्धन्तम इति** ।

८६२ अथाविद्यामयपक्षपरिज्ञानं तत्पक्षनिराकरणद्वारा दुःखपरिहारासाधनत्वेनापादनीयम् । विद्यामयपक्षपरिज्ञानं तत्पक्षसाधनद्वारा सुखप्राप्तिसाधनतयापादनीयमित्यत्र मानं दर्शयति **तत इति** ।

८६३ परमतीयानां स्वस्वविरोधेनाप्रामाण्यवद्वेदस्यापि स्वविरोधेनाप्रामाण्यमित्याशङ्कापरिहाराय सर्वश्रुतिविरोधं परिहरिष्यन्नधिदेवादिगतश्रुतीनां मिथो विरोधं परिहरतीति पादसङ्गतिमाह **अथेति** ।

८६५ एतत्पादगतपूर्वपक्षसिद्धान्तयुक्तीराह **अनुभूतीति** ।

८७१ तत्र 'न वियदि'त्यादि सूत्रव्याख्यानेन वियदादिगतश्रुतीनां मिथो विरोधमपाकरोति **प्रकृतिरिति** ।

८७२ स इदं सर्वमसृजतेति सूत्रितवाक्ये भगवद्व्यतिरिक्तसर्वपदार्थजनिविषये प्रोक्तजननं किं लक्षणमित्याशङ्क्याह **पराधीनेति** ।

८७३ उक्तलक्षणजननमन्तरेण सर्वस्यां भूतजननाङ्गीकारे बाधकमाह **अवकाशमात्रमिति** ।

८७३ प्रलयकाशाभावादभूत्वाभवनमेव तस्येत्यत आह **यदीति** ।

८७४ कुतो नियम इत्यत आह मूर्ते यद्यनाकाशताभिधीयते तर्हि मूर्तसम्पूर्णतैव प्रकृतसम्भवात् । अवकाशो नास्तीति व्यवहारादेव पदार्थसम्बन्धानुभवादित्यर्थः । मूर्तसम्पूर्णता चाकाशसद्भावमेवावगमयतीत्याह **मूर्तेति** ।

८७५ अवकाशस्याभूतभावाख्योत्पत्तिर्न घटत इति प्रतिपादितम् । 'अथाकाशस्सम्भूतः' इति श्रुतिविवक्षितोत्पत्तिं प्रपञ्चयति अवकाशस्यानित्यत्वं न घटत इति । यतः अतः आकाशः सम्भूत इत्यस्य वक्ष्यमाणप्रकारेणार्थोऽवगन्तव्य इति यावत् ।

८८२ एयुर्वाव नित्य इति श्रुतिर्वायोर्विष्णवसृष्टत्वमाशङ्क्य परिहरति यतेनेत्यादि सूत्रव्याख्यानेन **एवमिति** ।

८८३ प्रोक्तं जन्मलक्षणमाश्रित्य सर्वस्य जनिमत्त्वं निगमयति **नैवेति** ।

८८४ त्रिगुणादिवत्सूक्ष्मरूपेण स तु स्थूलत्वं दधि तत्पूर्वसंज्ञापरित्यागेन संज्ञान्तरलाभाख्यं वा जन्मेति विवक्षायां रमादेर्न जन्मतेत्याह **स्थूलतेति** ।

८८७ हरिसामर्थ्यं निरवधिकमुपपादयति व्यतिरेक इत्यादि सूत्रव्याख्यानेन **अच्छेद्यस्येति** ।

८८८ 'असतः सदजायते'त्यादिश्रुत्या परमात्मन उत्पत्तिमाशङ्क्य परिहरति असम्भव इत्यादि सूत्रव्याख्यानेन स्वतन्त्रत्वादिति प्रतिपादितम् ।

८८९ सर्वमीशवशमित्युक्तम् । तदवशं किमपि नास्तीत्याह **अविभागमिति** ।

॥ इति व्यतिरेकाधिकरणम् ॥ १३ ॥

* * *

८९० एवं प्रतिपादितभगवत्सामर्थ्यमनादृत्य तद्योऽहं 'सोऽसावि'त्यादिश्रुतिभिः अनुमया च जीवेशाभेदं गृणानां मतं दूषयितुमुपन्यस्यति **एवमिति** ।

८९१ न तदिति दूषयति 'पृथगि'त्यादिसूत्रव्याख्यानेनोपदिश्यमानो भेदः सांसारिक एवेति न मन्तव्यम् । मुक्तावप्युपदेशादित्याह **प्रज्ञेति** ।

९०३ श्रुतिर्भेदमुपदिशति चेत् अनुमानेन भेदः साधयामः इति न मन्तव्यमित्याह **नानुमेति** ।

९०४ अथ तदभिमतानुमानं दूषयितुमनुवदति **मिथ्येति** ।

९०४ अथ परिहरति **साध्येति** ।

९०५ मिथ्येत्युक्तेऽनिर्वचनीयत्ववादिना सत्त्वमसत्त्वं चाङ्गीकर्तुं न शक्यते । अपसिद्धान्तात् । उभयान्यत्वमुच्यते चेत्पक्षस्याप्रसिद्धविशेषणत्वं दृष्टान्तस्य साध्यवैकल्यं चोभयान्यत्वसिद्धिः स्यादित्यर्थः ।

९०६ प्रयुक्तानुमानदृष्टान्तगतभेदस्यानिर्वचनीयत्वमसिद्धं चेन्मानान्तरेण साधयितुं शक्यमित्यत आह **न चेति** ।

९०६ अनुमानेन साधयितुं शक्यमिति चेन्नेत्याह **अनुमानेनेति** ।

९०७ भेदमात्रस्यानिर्वचनीयत्वं सुसाधनमिति चेदागमेन प्रत्येक्षाणार्थापत्त्या वा न प्रथम इत्याह **न चेति** ।

९०७ तदेव स्पष्टयति **नासदिति** । तम आसीदिति परिशिष्टस्य तमसोऽनिर्वचनीयत्ववादिनामित्यादिना परिशिष्टस्य ब्रह्मणोऽनिर्वाच्यत्वप्रसङ्ग इत्यर्थः ।

९०८ न द्वितीय इत्याह **न चेति** ।

९०९ असतः ख्यात्ययोगात् सतो बाधायोगात् ख्यातिबाधान्यथानुपपत्त्या निर्वचनीयो भेद इत्यर्थापत्तिरस्तीति चेत् तत्र बाधो न स्यादित्यनिष्टप्रसङ्गो न घटत इत्याह **बाधायोगादिति** ।

९१० कादाचित्कारणानां तैरपि भ्रान्तिर्नाभूदित्यनुभवाभावात् । बाधो नाधिगम्यते । किं पुनः सदातनत्वेन प्रमितस्य भेदस्येत्यर्थः ।

९१० तर्हि भ्रमविषयस्य बाधोऽस्तीति चेत् बाधानाश इत्यभिप्रायश्चेन्न घटत इत्याह **विषयस्येति** ।

९११ बाधो नाश इत्यभिप्राये सतो बाधायोग इति व्याप्तिरपि न युज्यत इत्याह **बाधेति** ।

९१२ अबाधाभाव इष्टापत्तिः । भेदसत्यत्वसिद्धिरित्यर्थः । तर्हि भ्रान्तौ सम्प्रतिपन्नबाधेनानिर्वचनीयसिद्धिरित्यत आह **न हीति** । तदेव प्रतिपादयति **विषयस्येति** । विद्यमानमन्यथाज्ञानमेव बाध्यत इत्यर्थः । यत्सत्तत्र बाध्य-

मिति व्याप्तिरपि नेत्याह **बाधेति** । विषयस्य बाधश्चेद्विकल्पयति **कश्च इति** । इति वा । असतो नाशो न भवेदित्युभयसम्प्रतिपन्नं हि । तथा सति कोऽयं बाधः । निवृत्तिर्वा नासीन्नास्ति न भविष्यतीति ज्ञायमेयतादिति विकल्पाभिप्रायः । अथ दूषयति **निवृत्तिरित्यादिना** ।

९१३ निवृत्तिव्यापारा सति सा चाप्रवृत्तस्य न सम्भवति । बाधकप्रमाणं हि भ्रान्तिकल्पितमित्यङ्गीकार्यम् । तथा चापसिद्धान्त इत्यर्थः ।

९१४ सतो बाधायोगादिति दूषितं अथासतः ख्यात्ययोगादिति दूषयति **प्रतीतिरिति** ।

९१४ तत्तदेव द्योतयति **निषेध इति** ।

९१५ असदित्यनूद्यैव ख्यातिः निषिध्यते । अनुवादश्च ख्यात्यायत्त इति यावत् । अत्यन्तासतो निषेधमुखेन ख्यातत्वेन विधिमुखेन न भ्रमविषयत्वं नास्ति । न वाच्यं स्वप्ने नरशृङ्गस्यात्यन्तासतो विधिमुखेन सविषयत्वदर्शनादिति चाभिप्रायम् । उपमाप्रमाणं तु न तत्र शङ्कार्हमित्याह **न चेति** ।

९१५ प्रत्यक्षं तु घटादिभेदसत्तायामेव मानं नानिर्वचनीय इत्याह **प्रत्यक्षादिति** ।

९१५ एवमनिर्वचनीये मानाभावात् दृष्टान्तस्य साध्यविकलतया जीवेशभेदानिर्वचनीयत्वानुमानं मानमिति सिद्धम् । अथ धर्मिग्राहिप्रमाणविरोधाच्चामानमित्याह **शास्त्रेति** ।

९१३ भेदः स्वात्मन ईय इत्युक्तं विस्तरयति **किञ्चिदिति** ।

९१४ अनुभवाख्यधर्मिग्राहिप्रमाणमभेदविरोधीति निरूपितम् । श्रुत्याख्यधर्मिग्राहिप्रमाणमपि तथेत्याह **सर्वज्ञ इति** ।

९१७ सर्वज्ञादिश्रुतेर्भेदविरोधित्वमसर्वज्ञत्वात् । भेदाभिप्रायेण वचनादित्याह **अनुभूतादिति** ।

९१८ अनुमानं जीवेशाभेदेन मानमित्युक्तम् । तद्योऽहमित्यादि श्रुतिरपि धर्मिग्राहिप्रमाणविरोधात्तदभेदं बोधयति । नायमित्याह **उपजीव्येति** ।

९१८ यः सर्वज्ञ इत्यादिकमीश्वरमात्र एव प्रमाणम् । न तु तत्सर्वज्ञत्वादि । तदेतस्मान्नाभेदवाक्यस्योपजीव्यविरोध इत्यत आह **अप्रामाण्यमिति** । सार्वज्ञादिभेदमन्तरेणेश्वरमात्रासिद्ध्या तदभेदबोधनार्थं सार्वज्ञादिभेदवाचकं प्रमाणमित्यङ्गीकार्यमित्यर्थः ।

९१९ अपि च यः सर्वज्ञ इत्यादिवाक्यमीश्वरे यन्मानं तद्वत्सार्वज्ञादावपि मानम् । सर्वज्ञा एवेश्वर इत्येकविषय-ज्ञानमेव तस्माद्वाक्यादुत्पद्यत इत्यनुभवादित्याह **यदीति** ।

९२० द्वयं मानं भविष्यतीत्युक्तम् । अथ विशेषपदं मानं न चेत्तद्विशेषणपदमपि विशेषकारणाभावादमानं नेत्याह **न चेदिति** ।

९२१ अभेदागमस्य धर्मिग्राहिविरोधदोषो दुर्वार एवेति निगमयति **धर्मीति** । तस्माद्धर्मिग्राहिप्रमाणस्य सार्वज्ञादि-वैलक्षण्यविशिष्टेश्वरविशिष्टत्वादित्यर्थः । अभेदागमस्य धर्मिग्राहिविरोधदूषणमस्तीत्युक्तम् । भेदागमस्य तन्नेत्याह **नोपजीव्य इति** ।

९२१ जीवेशद्वयमुपजीव्यैवाभेदागमो वर्तते । भेदागमस्तु न जीवेशैक्यमुपजीव्य वर्तत इति तस्य बलवत्त्व-मित्यर्थः ।

९२२ जीववन्मानान्तरसिद्ध एवेश्वरो यः सर्वज्ञ इत्यादि भेदागमेनानूद्यते । तस्मात्तस्य कथं दौर्बल्यं न स्यादित्यत आह **न चेति** ।

९२२ यद्यागमान्मानान्तरं ब्रह्मण्युपजीव्यप्रमाणमभिमतं तदपि जीवाद्भिन्नमेव । ब्रह्मावगमयतीत्याह **येनेति** ।

९२३ तदेव द्योतयति **सर्वज्ञ इति** ।

९२३ कथं च न केवलानुमानगम्यत्वमीशस्यात्यन्तविरुद्धमपि यद्यभ्युपगम्यते तर्ह्यपीत्यर्थः ।

९२४ अस्त्वीशः सार्वज्ञादिगुणवान् बहुप्रमाणसिद्धत्वेन । तथापि तस्य जीवेनाभेदो नावरुध्यते । दुःखा-ज्ञानादेर्भ्रान्तिकल्पितत्वेन भेदकाभावादित्यत आह **न दुःखेति** ।

९२४ कुत इत्यत आह **न हीति** ।

९२५ विमुक्तश्च विमुच्यत इति श्रुतिः दुःखादिबन्धबाधिकेति चेद्दुःखाद्यनुभवेन तस्याः श्रुतेः बाधप्रसङ्ग इत्याह **यदीति** ।

९२६ श्रुतिर्मानमित्यनुभवप्रमाणसिद्धत्वाद्यदि न बाध्यते तर्हि दुःखानुभवो न बाध्य इत्याह **श्रुतिस्वरूपमिति** ।

९२७ श्रुतिप्रामाण्यसिद्ध्यन्यथानुपपत्त्यानुभवः प्रमाणमित्युक्तम् । अथ सर्वार्थनिश्चयान्यथानुपपत्त्या च प्रमाण-मित्याह **बाध इति** ।

९२८ तदेवं प्रकटयति **कोऽपीति** ।

९२८ तदेव विशिनष्टि **भ्रमत्वमिति** ।

९२८ दुःखाद्यनुभवस्य भ्रमाभ्रमविभागानुभवोऽपि भ्रमः स्यात् । तथा सति कोऽप्यर्थो न निश्चेतुं शक्य इति यावत् ।

९३० नास्तु निर्णय इति न मन्तव्यम् । घटादिपदार्थे विशेषनिर्णयाभावे व्यवहारानुपपत्तेरिति द्योतयति **विशेषा इति** ।

९३१ निश्चयवान् व्यवहार एव साक्षिसकाशाच्छुध्यन्ते सादृश्यो मानस एवेत्याह **साक्षिण इति** ।

९३२ अनुभवस्याबाध्यत्वं निगमयति **तस्मादिति** ।

९३३ सर्वप्रमाणसिद्धस्य सर्वेषां प्रमाणसिद्धस्य निश्चितस्य निश्चितस्येत्यर्थः ।

९३३ साक्षिनिर्दोषत्वेन च दुःखादेरभ्रान्तिकल्पितत्वं भवतीत्याह **शुद्ध इति** ।

९३३ दुःखादेरभ्रान्तिकल्पितत्वाज्जीवस्योपजीव्यप्रमाणमीश्वराद्भेदग्राहकमित्याह **उपजीव्येति** ।

९३४ जीवस्य दुःखादिमत्त्वादीशस्य पूर्णसुखादिमत्त्वात् तयोर्भेदः सुस्थिर इति निगमयति **अत इति** ।

९३४ एवं चेत् 'तत्त्वमसी'त्यादि श्रुतेः 'अहं हरिः सर्वमिदं जनार्दनः' इत्यादि पुराणवाक्यस्यापि का गतिः इत्याशङ्क्य 'तद्गुणे'त्यादिसूत्रव्याख्यानेन परिहरति **तथापीति** ।

९३६ नात्र जहदजहल्लक्षणया प्राप्तिः जगत्स्रष्टुः परमर्शिनः तच्छब्दस्यैव त्वंशब्दवाच्ये जीवे गौणवृत्त्याश्रयणेन तत्त्वम्पदयोरुभयोरुभयोरपि लक्षणावृत्त्याश्रयणस्य पराहतत्वात् पदद्वयस्यामुख्यार्थत्वाश्रयणादेकपदस्यामुख्यात्वाश्रयणस्य वृथात्वादिति यावदुपजीव्यप्रमाणविरुद्धार्थपरित्यागेन उपजीवकाभेदवाक्यस्य अर्थान्तरत्वं न्यायसिद्धं श्रुत्या प्रपञ्चयति **सादृश्याच्चेति** ।

९३७ 'ब्रह्म वेद ब्रह्मैव भवती'ति मुक्तस्य विशेषाभेदवचने कारणं चेशाभेदादन्यदेव श्रुत्या दर्शयति **स्थानैक्यमिति** ।

९३८ 'सर्वं खल्विदं ब्रह्मे'त्यत्र जडाभेदं च विवक्षितम् । तत्र च कारणं श्रुत्या दर्शयति **जडानामिति** ।

९३९ 'प्रद्युम्नोऽनिरुद्धोऽहं मिथ्या' ईशरूपाद्यभेदवचने तत्स्वरूपैक्यमेव कारणमिति श्रुत्या दर्शयति **ईशेति** ।

९४० 'यथोदकमि'ति श्रुतेः ईशरूपादीनामीशाद्भेददर्शनमनर्थकारणं चेत्याह **यथोदकमिति** ।

९४१ 'एकमेवे'त्यादि श्रुतिनिषिद्धत्वात् । ईशरूपक्रियादीनां तेन भेदाभेदावपि नेत्याह **नोभयमिति** ।

९४२ अस्यां श्रुतौ भेदाभेदनिषेधोऽस्तीति प्रतिपादयति **इतीति** ।

९४३ इवशब्दस्य प्रस्तुतार्थप्रतियोगिग्रहणसामर्थ्यमस्तीत्यत्र नियामकमाह **इवेति** ।

॥ इति पृथगधिकरणम् ॥ १४ ॥

* * *

॥ यावदधिकरणम् ॥

९४३ 'नेहनानास्ति किञ्चन, मृत्योः स मृत्युमाप्नोति' इति श्रुतेः जीवेशनानात्वनिषेधोऽनुपपन्नः । इहेति पदेन निषेधस्य सावधिकत्वात् मृत्योः स मृत्युमाप्नोतीत्यनीशस्य दुर्गतिवचनेन भेददर्शनाच्चेति निर्णीतम् । अथ यदैनं मुक्तोऽनुप्रविशतीति मुक्तस्य भेदवचनाच्च । तथेत्याह **भेदस्येति** ।

९४४ चेतनत्वात्सत्त्वाच्च जीवानामीशैक्यं स्यादिति चेत्सत्यमित्याह **चेतनत्वेति** ।

९४५ विष्णोर्जीवैक्यं नेत्यत्र श्रुतिमाह **न केनचिदिति** । 'अंशो नाने'त्यादि अधिकरणे जीवस्य भिन्नांशत्व-प्रतिपादनाच्च ।

९४६ ब्रह्मदाशा इत्यादिश्रुतयो ब्रह्मसादृश्यमात्रविषया न ब्रह्मत्वविषया इत्याह **अभेदश्रुतय इति** ।

९४७ ततो जगन्मङ्गलमच्युतांशमित्युक्तस्य कृष्णादेरीशादभिन्नांशत्वम् । 'ममैवांशो जीवलोके जीवभूत' इत्युक्तस्य जीवस्य भिन्नांशत्वमित्यभिप्रेतांशद्वैविध्यपरमश्रुत्या साधयति **अंशस्त्विति** ।

९४९ अंशस्य द्वैविध्यं सदृष्टान्तमुपपादयति 'प्रकाशादिवदित्यादि' सूत्रव्याख्यानेन **सूर्येति** ।

९५२ ईशोऽनुग्राह्यत्वात् च जीवस्य भिन्नांशत्वमिति प्रतिपादयत्यनुजेत्यादि सूत्रव्याख्यानेन **देहेति** ।

९५४ अननुग्राह्यत्वान्मत्स्यादेः ईशाद्भिन्नांशत्वमित्याह **न त्विति** ।

९५५ मुख्यभेदाभावाज्जीवानामीशाभासत्वं निगमयति **अंशाभासा इति** ।

९५६ जीवानामंशाभासत्वे प्रमाणमाह **यथेति** ।

९५६ 'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवी'ति द्युस्थितपादत्वपददेवजीवानापत्यश्रवणात् । कथं परस्यांशाभासत्वमित्याशङ्क्य परमश्रुत्या परिहरति **न त्विति** ।

९५८ पादत्रयस्यामृतत्वादिविशेषणात् तदसम्भवाज्जीवानां न पराभेदः भृगुतपाकृतिवत् सादृश्याज्जीवानामीश-पादत्रयमित्यर्थः । पादार्थं शिक्षाप्याह **अक्षय इति** ।

॥ इति द्वितीयाध्यायस्य तृतीयः पादः ॥

* * *

अथ द्वितीयाध्यायस्य चतुर्थः पादः

९६६ मिथः श्रुतिविरोधः परिहृतः । अथ युक्तिसहितश्रुतिविरोधः परिह्रियते इति पादसङ्गतिमाह **श्रुत्यर्थ इति** ।

९६७ 'तथा प्राणा' इत्याद्यधिकरणेषु पूर्वपक्षसिद्धान्तयुक्तिरेकोक्त्या दर्शयति **तत्रेति** ।

॥ इति द्वितीयाध्यायस्य चतुर्थः पादः ॥

* * *

अथ तृतीयाध्यायः

अथ तृतीयाध्यायस्य प्रथमः पादः

९३९ अध्यायद्वयेन भगवत्स्वरूपं निर्णीतम् । अथ तद्दर्शनेच्छोः तद्दर्शनप्रथमसाधनवैराग्यप्रतिपादनरूपपादगत-स्वयुक्तिराह **स्वाभाविकेत्यादिना** ।

९७३ रेतस्सिग्योगोऽथ इत्यत्र अथशब्दविवक्षितपक्षान्तरं दर्शयति **बीजेति** ।

॥ इति तृतीयाध्यायस्य प्रथमः पादः ॥

* * *

अथ तृतीयाध्यायस्य द्वितीयः पादः

९७४ वैराग्यार्थं गत्यादि निरूपितम् । अथ विरक्तस्य भगवति भक्त्यर्थं तत्सामर्थ्यवर्णनरूपपादगतस्वपरयुक्तीराह **पश्चादिति** ।

९७८ अत्र भगवतः स्वप्नस्रष्टृत्वमाहात्म्यं विवक्षितम् । तच्चोपादानकारणशून्यत्वेन न सम्भवतीत्याशङ्कापरिहाराय तदुपादानं दर्शयति **वासना इति** ।

९७९ जगल्लये मनसापि नाशः सम्भवात् कथं तस्यानादित्वमित्याशङ्कापरिहाराय तदनादित्वं प्रतिपादयति **त्रिगुणेति** ।

९८० 'एतस्माज्जायते प्राणो मन' इत्युत्पत्तिवचनात् कथं मनसोऽनादित्वमित्यत आह **सूक्ष्मत्वेनेति** ।

९८० मनसोऽनादित्वानङ्गीकारे बाधकमाह **यदेति** ।

९८१ 'सन्ध्ये सृष्टिराह ही'त्यादिसूत्रं व्याख्याति **संस्कारैरिति** ।

९८२ स्वप्नजाग्रत्वस्य जाग्रद्दशायामननुभवाद्वासनया सृष्ट्यनुपपत्तेः । स्वप्नजाग्रत्वं भ्रान्तिरित्यभिप्रैति **भ्रान्ति-रिति** ।

९८२ अननुभूतविषयसंस्कारानुपपत्तिश्रुतिपुराणाभ्यां सिद्धान्त्याह **अदृष्ट इति** ।

९८३ अननुभूतस्यापि स्वप्ने दृश्यमानत्वात् कथमिदं वाक्यमिति चेत् इहादृष्टपूर्वजन्मानुभवसंस्कारवशा दृश्यते । तत्रादृष्टं यत्तत्पूर्वजन्मानुभवसंस्कारवशादित्यनादित्वात् संस्कारपरम्परायाः युज्यते तद्वावाक्यमित्याह **इतीति** ।

९८३ यथा स्वप्नघटादिकं वासनाजनितत्वेन विद्यते न तद्वच्छशविषाणवत्त्वं स्वप्नदृष्टमनुभवायोग्यत्वाद्वासनाजनितत्वेनापि विद्यते । किन्तु भ्रममात्रमेवेत्याह **कदाचिदिति** ।

९८४ स्वप्नपदार्थस्य सत्यत्वे किमिति जाग्रत्पदार्थवदस्पष्टत्वम् इत्याशङ्कापरिहाराय मायामात्रमित्यादिसूत्रं व्याख्याति **वासनेति** ।

९८५ अथ मायामात्रशब्देन स्वप्नस्यानिर्वचनीयत्वं प्रतिपादयितुं यन्मायावादिना खण्डनं क्रियते । तदनूद्य दूषयति **भेद इति** ।

९८६ निखिलार्थस्य प्रश्नदूषणमाह **प्रश्नदोषा इति** ।

९८६ वन्ध्या किं पुत्रवती न वेति किं प्रश्नः स्वव्याहतः । ब्रह्म जगत्कारणमित्युक्ते जगत्क्षणिकत्वे किं मानमिति प्रश्नोऽसङ्गतः । पुरोवर्तित्वेन दृश्यमानो घटः किमत्रास्तीति प्रश्नः सन्दिग्धोऽर्थविषयः । कति काकदन्ता इति प्रश्नोऽपि फलः । व्याहतादिप्रश्नानां करणे बाधकमाह **न तैरिति** ।

९८७ व्याहतादिप्रश्नकथात्रयेऽपि निग्रह इत्याह **तत्त्वेति** ।

९८८ सिद्धार्थप्रश्नवत्परिहारेऽपि सिद्धार्थप्रतिज्ञानं दूषणमित्याह **परिहार इति** ।

९८९ तदन्यहेतोर्दृष्टान्तस्य चेत्यर्थः ।

९८९ असिद्धदोषप्रस्तावे हेतोराश्रयासिद्ध्यादिकं परैर्दूषणत्वेनाभिहितमूचे तदपि न दूषणमित्याह **आश्रयेति** ।

९९० आश्रयासिद्धेरदूषणत्वेन भृङ्गमस्ति भृङ्गत्वादित्यपि साध्यः स्यादित्यत आह **दोष इति** ।

९९१ अत्र व्याहतिः प्रत्यक्षादिविरोध इत्यर्थः । व्याहत्यभाव आश्रयासिद्धिर्न दोषः ।

९९१ वन्ध्यापुत्रो न वक्ता असत्त्वात् खपुष्पवदिति साधनसम्भवादित्यभिप्रैति **यत्रेति** ।

९९१ आश्रयासिद्धो हेतुः साधकश्चेत्प्रत्यक्षादिविरुद्धः किमिति न साधक इत्याशङ्कायामनुमानस्य प्रत्यक्षागममूलत्वात् तद्विरोधेन मानत्वमिति परिहारं दर्शयितुं प्रत्यक्षागममूलत्वमाह **प्रत्यक्षेति** ।

९९२ प्रत्यक्षादिमूलन्यायस्याविरुद्धार्थसाधकत्वं साक्षी निश्चिनोतीत्याह **अदृष्ट इति** ।

९९३ मानानामेव मानत्वं साक्षिणावसीयते । यतस्तस्मान्मानस्य न्यायस्य मानबाधे सति साक्षिणः तत्साधकत्वज्ञानं न भवेदित्यर्थः ।

९९४ कुत्रचिदमानस्य क्षणिकत्वानुमानस्य साक्षिणा प्रामाण्यग्रहणान्मानमेव मानत्वं साक्षिगृहीतमिति नियमो नास्तीत्यत आह **अमानस्येति** ।

९९४ भोजनेष्टसाधनतानुमानस्य व्यभिचारेऽपि साक्षिप्रामाण्यं गृह्णाति तस्मान्मानत्वाद्धि तस्य प्रामाण्यं न गृह्णातीति कथं युक्तमित्यत आह **उत्सर्गत इति** ।

९९५ यद्भोजनेष्टसाधनतानुमानं प्राप्तं तदपवादो विवक्षित उत्सर्गतः प्रमाणं भविष्यति । अपवादेन प्रमाणमपि भविष्यतीत्येव साक्षिनिश्चयः । अतो न मानबाधितस्य प्रामाण्यं साक्षी गृह्णातीत्यर्थः । एवं सति साक्षिनिर्धारणादेव भोजनेष्टसाधनतानुमानं प्रवर्तत इत्याह **अत इति** ।

९९७ आश्रयासिद्धिवद्व्यधिकरणासिद्धिरपि दूषणं नेति सोदाहरणमाह **व्याप्तत्व इति** ।

९९८ विश्वं सदसद्विलक्षणमिति पक्षस्य सिद्धान्तिना अप्रसिद्धविशेषणत्वेन दूष्यत्वात् तस्य दूषणत्वमेव । इतरथा तदनुमानस्य दूषणानुपपत्तेरित्यत आह **अन्यदिति** ।

९९८ स्वव्याहत्यभावे प्रसिद्धमपि हेत्वविनाभावेन साध्यमित्यङ्गीकारेति प्रसङ्गेनेत्याह **असिद्धेति** ।

९९९ न चाप्रसिद्धसाध्येन हेतोरविनाभावो नास्तीति वाच्यम् । जीवच्छरीरं सात्मकं प्राणादिमत्त्वान्न यदेवं यथा घट इति व्यतिरेकव्याप्त्यङ्गीकारादित्यभिप्रेत्य **व्याप्तिरिति** ।

९९९ यत्सदसद्विलक्षणत्ववादिना प्रसिद्धविशेषणत्वपरिहाराय मिथ्येत्युच्यते, तदप्रयोजकत्वमित्याह **अप्रसिद्धस्येति** ।

१००० अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तम् । विवादपदं सकर्तृकमिति यत्परमाण्वाद्यत्प्रसिद्धसाधनं परमाणवः सन्तीश्वरोऽस्तीत्युक्तिं विना तदप्रयोजकमित्याह **साधनमिति** ।

१००१ तदप्रयोजकत्वं प्रतिपादयति **यथेति** ।

१००२ अनुमानस्य साध्यसिद्धिदूषणत्ववदवयवनियमोऽपि न सिद्ध्यति । परिशेषवदनङ्गीकारादित्याह **परिशेष इति** ।

१००४ सिद्धप्रश्नवत्सिद्धपरिहारेऽपि न वादकथावसानमित्याह **सिद्धेति** । व्यभिचारो नैकान्तित्वं सविशेषणस्य हेतोर्विशेषणवैयर्थ्यं विशेष्यवैयर्थ्यं च दूषणम् । तयोरेकेनापि हेत्वसिद्धिरित्यर्थः ।

१००६ प्रश्नदोषेष्वप्रयोजकत्वप्रथमप्रश्नस्यैवोत्तरप्रश्नस्य तदुपयोगित्वोपपत्तेः । अनुपयुक्तस्य सङ्गतिदोषसम्भवा-दित्यभिप्रैति **अप्रयोजनतेति** ।

१००६ विरोधासङ्गतिन्यूनाधिक्यसंवादानुक्तय एव निग्रहः । तत्र सिद्धप्रश्नसिद्धपरिहारादिकमाधिक्यान्तर्भूतमित्याह **सिद्धेति** ।

१००७ अर्थापत्त्यादेरनुमादेः पृथक्त्वं यदपरे मन्यन्ते तदपि निग्रहषट्कात्पृथङ्निग्रहकल्पनावदयुक्तमनुवादान्त-र्भावादित्याह **अर्थापत्तीति** ।

१००९ प्रारम्भादीनामपि युक्तित्वमभिमतं चेत्किमिति बृहत्संहितायां युक्तिपर्यायोपपत्तेः । पृथगुपक्रमोपसंहारा-वित्यादिवचनमित्यत आह **कुरुपाण्डववदिति** ।

१०१० सिद्धान्तिनानभ्युपगतेन अप्रसिद्धविशेषणत्वदूषणेन भेदमिथ्यात्वानुमानदूषणा सिद्धान्त इत्यत आह **स्वन्यायैरिति** । साधनं स्वन्यायैरेव कार्यम् । साधितैः स्वन्यायैश्च यदा दूषणं शक्यम् । किं पुनस्तन्न्यायैः इत्यर्थः ।

१०११ कथं परन्यायैर्दूषणेऽपसिद्धान्तदोषो न स्यादित्याशङ्कायामेवं चेदेवं स्यादित्यतिप्रसङ्गवदिति परिहार-मभिप्रैति **प्रसङ्गेति** ।

१०१२ दूषणं तु परोक्तन्यायेन भवतीति दर्शयितुं वन्ध्यापुत्रवती न वेत्यादिप्रश्नस्य स्वव्याहतिदूषणवच्छल-जात्युत्तरयोरपि व्याहतिदूषणमस्तीत्याह **छलमिति** ।

१०१२ अनुमानं प्रमाणं पदार्थत्वादप्रमाणवदिति जातिः । न च कम्बलोऽयं माणवक इत्युक्ते च्छलवाद्याह कुतोऽस्य नवकम्बला इति । न हि माणवकस्य पृथिवीत्वेन नवकम्बला युज्यन्त इति च्छलम् । पूर्वत्र स्ववाक्येनैव व्याहतिः । उत्तरत्र स्वन्यायेन व्याहतिरिति विशेषः ।

१०१२ अनिर्वाच्यसिद्ध्यर्थं तदुद्भावितदौर्घट्यं विघटितम् । अथ प्रसङ्गतश्चिन्तितसन्न्यायादिविरोधाच्च नानिर्वा-च्यत्वं सूत्राभिप्रेतमित्याह **एवमिति** ।

१०१३ सन्न्यायविरोधं दर्शयति **विलक्षणमिति** ।

१०१४ सतां विलक्षणं विश्वमित्युक्ते ब्रह्मणः प्रतियोगित्वाङ्गीकारात्सविशेषत्वमपि स्यादित्याह **प्रतियोगित्व-मिति** ।

१०१५ विलक्षणत्वमविलक्षणत्वं च किमपि धर्मरूपं न ब्रह्मणस्तस्मान्न जगत इव मिथ्यात्वमित्यत आह **यदीति**।

१०१७ इत्थं भावधर्मो न चेति प्रतियोगित्वाभावेन जगद्विलक्षणत्वेन ब्रह्मणो मिथ्यात्वं स्यादित्युक्तशेष एव भवती-त्यभिप्रैति **न चेन्न प्रतियोगितेति** ।

१०१७ निर्धर्मकत्वे श्रुतिविरोधोऽप्यस्तीत्याह **इत्थम्भावात्मकानिति** ।

१०१८ 'अदृश्यत्वादिगुणको धर्मोक्तेरि'ति सूत्रेण भगवता च सगुणत्वमेव ब्रह्मणोऽभिप्रेतमित्याह **अदृश्यत्वेति** ।

१०१८ अन्यव्यावृत्तिरूपधर्माय यदा गुणास्तदा व्यावर्तकधर्मरूपा गुणा इति किमु वक्तव्यमेवमित्यर्थः। अभावरूपा एव धर्माः ब्रह्मणः सन्ति न भावरूपा इति कल्पना प्रमाणशून्या निर्विशेषत्वभङ्गाद्व्यर्था चेत्याह **यदीति** ।

१०१९ अन्यापेक्षतया सर्वज्ञत्वं न चेद्गुणाधीननिरूपणत्वान्निर्गुणत्वं अभूदस्ति भविष्यतीति कालाधीननिरूपण-त्वात् । सत्ता च न स्यात् । तथा च शून्यत्वं ब्रह्मणः स्यादिति दर्शयति **अन्येति** ।

१०२० सत्तादिसर्वधर्मानङ्गीकारे शास्त्रस्य निरर्थकत्वमित्याह **सर्वेति** ।

१०२० अविद्यमानमेव सर्वज्ञत्वादिकं बोधयति शास्त्रमित्यत आह **मिथ्येति** ।

१०२१ भ्रान्तितः प्रतीतं सार्वज्ञत्वादिकं निषेद्धुम् अनुवदतः शास्त्रस्य कथमप्रामाण्यमित्यत आह **अप्राप्तमिति** ।

१०२१ सर्वज्ञत्वादेः मिथ्यात्वाङ्गीकारे तद्वचनमनुवादरूपं न भवति । किन्तु अप्राप्तभ्रान्त्यापादनमेव भवती-त्यभिप्रेतं **अप्राप्तमिति** । तत्कथमित्यत आह **न हीति** ।

१०२२ केवलवेदवेद्यत्वसार्वज्ञादेर्मिथ्यात्वे तदभिमतैक्यस्यापि स्यादित्याह **वेदेति** । निर्गुणश्रुत्या यद्गुणजातं ब्रह्मणि निषेध्यम् । सार्वज्ञादिश्रुतेस्तत्समर्पणपरत्वमेवेति न वाच्यम् । 'असदेवेदमग्र आसीदि'ति श्रुत्या यत्सत्त्वं निषेध्यं तत्समर्पणपरत्वमेव । 'सदेव सौम्येदमग्र आसीदि'त्यादि श्रुतेरिति प्रसङ्गेन ब्रह्मणः शून्यत्वापातात् । यच्चसत्पद-मव्यक्तत्वाभिप्रायं तर्हि निर्गुणपदमपि प्राकृतगुणराहित्याभिप्रायम् । तस्मान्न सर्वज्ञादिनिषेधो युक्त इत्यर्थः ।

१०२२ आरोपितधर्मविधायकत्वे वेदस्याप्रामाण्यमुक्तम् । अथ निर्विशेषे धर्मारोपोऽपि न युक्त इत्याह **धर्मेति** ।

१०२३ तदेव प्रतिपादयति **इदमिति** ।

१०२४ धर्मारोपार्थमिदं तदादिधर्मारोपकलायामनवस्थानमित्याह **तदर्थमिति** ।

१०२४ सर्वज्ञत्वादेर्मिथ्यात्वे तत्प्रतिपादकवाक्यस्य प्रामाण्यं न स्यादित्युक्तम् । नानिष्टं सर्वस्यापि **यूपत्वमेव** हेतुना मिथ्यात्वाङ्गीकारादित्यत आह **ईशेति** ।

१०२६ मिथ्यात्वे दृश्यत्वे हेतोः प्रत्यक्षादिविरुद्धत्वेनाभासत्वाद्बाधकाभावेन सत्त्वं सिद्ध्यतीति यावत् । सर्वे भ्रान्त्या जगद्व्याहरन्तीति वदतः एकस्यां भ्रान्तित्वं सर्वप्रमाणसम्मतविरुद्धम् । वादित्वाद्युक्तमेव न सर्वेषां भ्रान्तत्वमित्याह **येनेति** ।

१०२७ जगन्मिथ्यात्ववादीव भ्रान्त ईशादयस्तु भ्रान्तिमन्त इति किं न स्यादित्यत आह **भवेयुरिति** ।

१०२७ प्रत्यक्षविरुद्धं जगन्मिथ्यात्वमनुमानेन साधयितुमशक्यं चेदागमेन न शक्यं स्यादित्यत आह **सत्यत्वमिति** ।

१०२८ प्रत्यक्षं भ्रान्तिविकल्पितविषयं चेत्प्रत्यक्षेण गृहीतागमस्तत्प्रामाण्यं च कल्पितमिति न विश्वसत्यबाधकप्रमाणं सिद्ध्यतीत्यर्थः ।

१०२८ प्रत्यक्षेणैवागमप्रामाण्यग्रहणमित्याह **साक्षीति** ।

१०२९ प्रत्यक्षस्य यावद्बाधं प्रामाण्यात् तद्गृहीतप्रामाण्येन आगमेन विश्वसत्यत्वं बाधः स्यादित्यत आह **तात्कालिकमिति** ।

१०३२ प्रत्यक्षस्याप्रामाण्यं चेदैक्यागमस्यापि तथेत्युक्तमथाद्वैतागमस्य प्रामाण्यमबाध्यमित्यङ्गीकृत्य प्रत्यक्षप्रामाण्यं बाध्यमिति कल्पना चाद्वैतहानिः सामान्याद्धथेत्याह **अद्वैतेति** ।

१०३२ बाधकाभावाद्विश्वसत्यत्वं सिद्धमैक्यागमत्वेन प्रत्यक्षस्य स्वतः प्रामाण्याङ्गीकाराच्च सिद्ध्यतीत्याह **यदीति** ।

१०३३ प्रत्यक्षादेरयथार्थत्वे प्रामाण्यमेव न स्यात् । किं पुनः स्वतः प्रामाण्यमित्यर्थः । द्वैतमानस्य बाधोदयपर्यन्तं प्रामाण्यमस्ति । पश्चान्नेत्यत आह **प्रामाण्यस्येति** ।

१०३३ बाधोदयकाले कालत्रयेऽप्यमानमिति गृहीतं चेत् कदापि प्रामाण्यं न भवतीत्यर्थः ।

१०३४ तर्हि द्वैतावभासकस्याप्रामाण्यं सर्वदास्तु । द्वैतमिथ्यात्वमानेन बाध्यमानत्वादिति चेन्मिथ्यात्वमानमपि न घटत इत्याह **मिथ्यात्वेति** ।

१०३४ मिथ्यात्वमानं मोक्षे न बाधितं चेत् अद्वैतहानिः बाधितं चेत् आत्मनः कैवल्यानुभवरूपमोक्षस्याभावात् संसारिता स्यादित्यर्थः ।

१०३५ विकल्पान्तरेणापि दूषयति **अस्ति चेदेति** ।

१०३६ तथा काले च विकल्पः कार्य इत्यर्थः ।

१०३६ तदेव प्रतिपादयति **काल इति** ।

१०३७ प्रत्यक्षाभास एव । तत्प्रत्यक्षसिद्धं तु केनापि न बाध्यमिति द्योतयति **क्व चेति** ।

१०३८ प्रत्यक्षसिद्धमपि देहात्मत्वं मानान्तरबाधितमित्याशङ्क्य नुदति **देहेति** ।

१०३९ तर्हि मम देह कृष्ण इति व्यवहारमन्तरेणाहं कृष्ण इति व्यवहारः कथमित्यत आह **उपचार इति** ।

१०३९ शुक्लपटे कृष्णशब्दव्यवहारः उपचारमात्रम् । किन्तु कर्दमोपाधिकं कार्ष्ण्यमप्यस्तीति चेदपि स्वतः शुक्लपटस्य कार्ष्ण्यवदात्मनोऽपि मम कार्ष्ण्यमिति देहोपाधिकमेव कार्ष्ण्यं प्रतीयते । न तु भ्रान्तिकल्पितम् । तस्मान्न देहात्मत्वं प्रत्यक्षसिद्धम् । मानान्तरबाधितमिति वक्तुं शक्यमित्याह **यदीति** ।

१०४० मम कार्ष्ण्यमिति न प्रतीयते । किमिति काक्वा योजनमभिप्रेतं पटकर्दमयोः पृथगुपलम्भात् पटस्य कार्ष्ण्यं कर्दमोपाधिकृतमिति प्रत्येतुं शक्यते । देहात्मनोरपृथगुपलम्भात्मककार्ष्ण्यं देहोपाधिकृतमिति प्रत्ययो न घटते । तस्मात्कृष्णोऽहमिति देहात्मप्रतीतेरेव मम देह इति तु चैतन्यमितिवदौपचारिक इति कुतो नाङ्गीकर्तुमशक्य-मित्यत आह **कथमिति** ।

१०४१ देहादेर्भेदः प्रतीयत इति प्रतिपादयति **ज्ञातमात्रा इति** ।

१०४२ इष्टसाधनत्वेन सह स्तनपानादेः पूर्वदेहानुभूतान्वयव्यतिरेकव्याप्त्यनुसन्धानेनैव बाल्यदशायां प्रथमस्तन-पानादौ प्रवर्तमानत्वादस्त्येव मनुष्यादीनां देहात्मभेदज्ञानमित्यर्थः ।

१०४२ इष्टसाधनत्वेन सह स्तनपानादेः पूर्वदेहभूतान्वयव्यतिरेकव्याप्त्यनुसन्धानाभावे प्रथमस्तनपानादौ प्रवर्तनं न घटत इत्याह **अस्मृताविति** ।

१०४२ पूर्वदेहस्मृत्याभावतद्गतस्तनपानादेरिष्टसाधनत्वेन सहान्वयव्यतिरेकव्याप्त्यनुभवस्मृतिर्न भवति । तदनु-भवविस्मृतौ सत्यां प्रथमतः स्तनपानादेरिष्टसाधनत्वविज्ञानं न सम्भवति । तथा च प्रथमतः स्तनपानादौ प्रवृत्तिः न घटते । प्रवृत्तिश्च दृश्यते । तस्माद्देहान्तरज्ञानमस्तीत्यर्थः ।

१०४३ अतः कृष्णोऽहमिति व्यवहारो देहात्म्यैक्यावसितिनिबन्धनो नेत्याह **यदेति** ।

१०४३ कृष्णोऽहमिति व्यवहारस्य सहेतुकमुदाहरणान्तरमाह **व्यासत्वादिति** ।

१०४४ अन्ययशोभेदपरिज्ञानेऽप्यग्नेरयसि व्यासत्वात् । अयो दहतीति व्यवहारवत् देहात्मनोर्भेदज्ञानेऽप्यात्मनो देहव्यासत्वादहं कृष्ण इत्यभेदव्यवहार इत्यर्थः ।

१०४५ उक्तप्रकारेण प्रत्यक्षसिद्धस्य मानान्तरबाधानुपपत्तेः । तत्सिद्धप्रपञ्चसत्यत्वं न केनापि बाध्यमिति निगमयति **ततो हीति** ।

१०४६ प्रत्यक्षस्य वर्तमानमात्रग्राहित्वात् जगतः कालान्तरवर्तिप्रमाणबाध्यत्वमविरोधाद्युक्तमित्याशङ्क्य परिहरति **तच्चेदिति** ।

१०४७ उत्तरकालस्तद्भ्रमोक्षश्चागमादेव जायत इत्यत आह **आगम इति** ।

१०४७ आगमोऽप्यनुमानवत् सामान्यतः प्रत्यक्षसिद्धमेवातीतानागतविशेषतो बोधयेदिति यावत्प्रत्यक्षतः सामान्याकारेण सर्वपदार्थसिद्ध्यनङ्गीकारे शक्तिग्रहसम्भवदोषमाह **कथमिति** ।

१०४८ अथागमाद्विशेषाकारेण सर्वपदार्थपरिज्ञानस्य शक्तिग्रहनिबन्धनत्वं प्रतिपादयति **अतीतेति** ।

१०४९ शक्तिग्रहस्यातीतानागतार्थविषयत्वे सत्येव प्रत्यक्षत्वं सामान्यव्यापारेण सर्वपदार्थसिद्धिरङ्गीकार्या । शक्तिग्रहश्च वर्तमानार्थ एव । तस्मात्प्रत्यक्षस्य वर्तमानार्थविषयत्वमेवेत्याशङ्क्य परिहरति **शक्तिश्चेदिति** ।

१०५० वर्तमानार्थ एव शक्तिग्रहश्चेदयं घट इति व्युत्पादनाय प्रयुक्तशब्दश्चातीतानागतघटबोधकत्वाभासप्रसङ्गः । यद्यतीतानागतघटेषु शक्तिग्रहस्तर्ह्यतीतानागतपदार्थसामान्याकारग्रहणं प्रत्यक्षतः स्यादेवेत्यर्थः ।

१०५० घटादिशब्दानां घटादिव्यक्तिषु सम्बन्धग्रहणकाले दृष्टं घटत्वादि सामान्यमेव देशकालान्तरगतव्यक्तिषु स्थितं घटादिशब्दो बोधयेत् । न पुनः कालान्तरादिगतपटादिकम् । कालान्तरगतपटादिकं तु घटादिशब्दवाच्यमिति घटत्वादि सामान्याधिष्ठानत्वलिङ्गादेव ज्ञायते । तस्मान्नत्यक्षतोतीतानागतपदार्थग्रहणमित्याशङ्क्य अपनुदति **सामान्यमिति** ।

१०५१ स्वरूपत्वसामान्याङ्गीकारेऽपसिद्धान्त इति द्योतयति **न स्वरूपत्वेति** ।

१०५१ स्वरूपत्वमपि सामान्याकारेणानुगतं चेत्सामान्याकारस्य विशेषाकारातिरिक्तत्वनियमात्स्वरूपमतिरिच्य विशेषाकाराभावाद्विशेषाकारासिद्धिरपि दोषः स्यादित्याह **स्वरूपं चेदिति** ।

१०५२ स्वरूपमतिरिच्य विशेषाकारो नेत्याह **सर्वेति** ।

१०५३ तदेव प्रतिपादयति इति कामनादुक्तभङ्ग्या स्वरूपत्वसामान्याभावादतीतानागतस्वरूपेषु स्वरूपशब्द-व्युत्पत्त्यर्थं तेषां सामान्याकारावगतिरङ्गीकार्येत्यत आह **एवमिति** ।

१०५४ एकेन पदेन शक्तिग्रहणकाले सामान्याकारेण प्रतीतं पदान्तरेण विशेषाकारेण प्रतीयते । अतो विशेष-सामान्यरूपं सर्वपदार्थजातं सामान्यरूपं व्यावृत्तरूपमिति व्यवहारभेदोऽपि विशेषादेवेत्याह **अत इति** ।

१०५५ तेन सामान्यकल्पनाया प्रयोजकत्वेन गोत्वादिधर्मणां प्रतिव्यक्तिरूपादिवद्भेददृष्ट्यायं गौरियं गौरित्यादि-पदार्थानामनुगतसादृश्यलक्षणस्यैव दर्शनाच्च । पदार्थानामेकधर्मतामयुक्तेत्याह **न चेति** ।

१०५६ उक्तार्थं निगमयति **अत इति** । **सर्वमिति** ।

१०५७ सामान्यतः सर्वपदार्थस्य साक्षिसिद्धत्वं स्पष्टयति **किञ्चिदिति** ।

१०५८ पदव्युत्पत्त्यन्यथानुपपत्त्या च सामान्यतः सर्वमपि । ....

१०५८ अखिलस्य गवादिवस्तुनः तद्भवादावेव वर्तमानसादृश्यपरिमाणतः कस्यचित्सास्नादिमल्लक्षणसादृश्य-विज्ञानाच्च गवादिशब्दग्रहः एतादृशाः सास्नादिमतोऽतीतानागतपदार्था गवादिपदवाच्या इति स्यादित्यर्थः ।

१०६० मानसप्रत्यक्षमनुभूतार्थविषयत्वादप्रमाणमिति यद्वदन्ति तदापाकरणमुखेन प्रत्यक्षस्य वर्तमानातिरिक्तार्थ-विषयत्वं प्रतिपादयति । स्मृतेर्वर्तमानाविषयभागं स्पष्टीकृत्य मानतां निगमयति । यदि स्मरणप्रत्यक्षं वर्तमानाति-रिक्तार्थविषयं तर्ह्यपि तदितरप्रत्यक्षवर्तमानार्थमात्रविषयमित्यत आह **मानत्वमिति** ।

१०६१ न च अतीतकालसम्बन्धो वोक्तस्मरणसांश्लिष्टमेतज्ज्ञानमिति वाच्यम् । तदिदं चावृततद्विषयादज्ञानस्या-प्येकत्वाप्रत्यक्षमेवातीतवर्तमानविषयमित्याह **न चेति** ।

१०६२ प्रत्यक्षतः सर्वस्य मानमातृप्रमेयरूपस्य सार्वकालीनाबाधात्वं बाधयितुं प्रत्यक्षस्य वर्तमानैकग्राहित्वं निषिद्धम् । तत्र मानमातृप्रमेयातिरिक्तप्रमित्याख्यं प्रमाणफलरूपं यदुच्यते तन्निरस्यति **न चेति** ।

१०६३ मयैतज्ज्ञातमिति । मानमातृप्रमेयातिरिक्तं यत्किञ्चित्प्रमारूपमवगम्यत इत्यत आह **मयेति** ।

१०६४ तस्मान्मानमातृप्रमेयमेव सर्वं तस्य बाधोऽपि नेत्याह **मानेति** ।

१०६४ स्वप्नजागरितयोः क्वचिद्यस्य कस्यचिद्भ्रान्तत्वात्तयोः सर्वात्मना भ्रान्तत्वमिति चेत् आत्मन्यपि यस्य कस्यचित्स्वतन्त्रकर्तृत्वादेर्भ्रान्तित्वादात्मैव भ्रान्तिकल्पितः स्यादित्याह **क्वचिदिति** ।

१०६८ बाधदर्शनात्स्वप्नादेरमिथ्यात्वमुक्तम् । जाग्रति घटमपश्यम् । स्वप्ने गजमपश्यमिति बाधरहितानुभवाच्च न भ्रान्ततेत्याह **अबाधितेति** ।

१०६८ जगन्मिथ्यात्वे प्रतिपादितसर्वप्रमाणाभावेन सह तत्सत्यत्वे सर्वप्रमाणस(त्यत्वं)द्भावं समुच्चिनोति **न चेति** ।

१०६९ मनोगोचरस्य सर्वस्य निरूपितं जीवब्रह्मैक्यजगन्मिथ्यात्वप्रतिपादनस्य विपरीतज्ञाननिबन्धनत्वाङ्गीकाराच्च तन्मतं दुष्टमित्याह **किञ्चेति** ।

१०७१ तदेव द्योतयति **भ्रान्तित्वेति** ।

१०७१ तन्मतस्य प्रतिपादितं दुष्टस्य गर्भीकृत्याद्यत्वमाह **अशेषेति** ।

१०७२ न स्वमतहेयत्वमङ्गीकृतम् । तस्य तन्मतं हेयमित्यन्वयः । केवलं विशेषबुद्ध्यैव तन्मतं त्याज्यमुन्मत्तबुद्ध्या च त्याज्यमिति । सहेतुकमाह **भ्रान्तित्वादिति** ।

१०७३ ज्ञानिनामज्ञानिनामुन्मत्तानां च तन्मतस्वीचिकीर्षाभावे कैस्तन्मतं प्रवृत्तमित्यत आह **ईशेति** ।

१०७४ मायामात्रपदस्य तदभिमतानिर्वचनीयविषयत्वं निरस्तम् । अथ स्वाभिमतार्थं प्रपञ्चयति **अत इति** ।

१०७५ सह पृथगिति द्वे, तद्विवृणोति **उभाभ्यामिति** ।

१०७६ वासनोपादानस्य स्वप्नस्य प्रज्ञोपादानत्वं कुतोऽभिधीयते इत्यत आह **प्रज्ञात्मकमिति** ।

१०७६ मनसः प्रज्ञात्मकत्वे श्रुतिराह **धीर्भीरिति** ।

१०७७ ज्ञानात्मकत्वे मनसो जडधर्मोपपदत्वं कथमित्याशङ्कायां मनस एव जडरूपज्ञानभागस्योपादानत्वविरोधपरिहाराय चिदचिन्मिश्रत्वमाह **चिदचिन्मिश्रत्वमिति** ।

१०७८ कृत्स्नेनेत्याह । सूत्रावयवार्थं प्रपञ्चयति **मनोविकारा इति** ।

१०८० तदेव विस्तरति **सृष्ट्वेति** ।

१०८० 'सन्ध्ये सृष्टिरि'ति भगवत्स्वप्नसृष्टिरुक्त्वा अथ स्वप्नसंहारोऽपि तत एवेति 'पराभिध्यानादि'त्यादिसूत्रव्याख्यानेनाह **वासनेति** ।

१०८१ सृष्ट्यादिकमपि भगवत एवेति तदभाव इत्यादि सूत्रचतुष्टयाख्यानेनाह **सुषुप्तीति** ।

१०८२ भगवतः सामर्थ्यान्न्यूनताशङ्कापरिहाराय स्वप्नाद्यवस्थासु जीववत् ज्ञानादितारतम्यं बहुस्थानगतघटादिव-द्बहुस्थानगतस्य स्वरूपभेदश्च नास्तीति न स्थानत इत्यादि सूत्रव्याख्यानेनाह **न स्थानेति** ।

१०८२ स्थानभेदतोऽप्यस्य भेदो नास्तीत्यत्र सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते इति श्रुतिं प्रमाणीकरोति **सर्वत्रेति** ।

१०८२ सर्वेषु भूतेषुस्थं विष्णुं ब्रह्मेत्येव पूर्णगुणक इत्येवाचक्षत इत्यर्थः ।

१०८३ न सत्यं नापि चानृतम् । प्राज्ञः किञ्चन संवेत्ति तुरीयं तत्सर्वदृक् सदेति ज्ञत्वाज्ञत्ववचनाद्विष्णोस्तत्र तत्र स्थितरूपेण सर्वगुणपूर्णत्वविरुद्धमिदं वाक्यमिति नाशङ्कनीयम् । प्राज्ञो न वेदयतीति न वेत्तीत्युच्यते । तुरीय-रूपः सर्वं दर्शयतीति सर्वदृगुच्यत इत्यविरुद्धस्य प्रामाण्योपपत्तेरित्यभिप्रैति न भेदादित्यादिसूत्राभिप्रायकथनेन **तद्विरुद्धमिति** ।

१०८५ प्रयोजनवदर्थवत्त्वेनैव वेदस्य प्रामाण्यमिति । प्रतिप्रयोजनवदर्थत्वं च मोक्षनिमित्ते भगवत्प्रसादजनकगुणो-त्कर्षज्ञानावेतन्निर्दोषगुणपूर्तिकथन एवेति द्योतयति **तदीशानादिति** ।

१०८६ तत्र प्रमाणमाह **यो मामिति** ।

१०८८ वेदस्य भगवतो दोषकथने प्रयोजनमाह .... प्रामाण्यमभिप्रेतम् । महातात्पर्यरोधेनेत्यत्र दोषकथनं प्रयोजनवदर्थविरोधीत्यत्र मानमाह **किं मा निन्दन्तीति** ।

१०८८ 'किं मा निन्दन्ति शत्रव' इति भगवन्निन्दकानां तेन प्रतिहन्यमानत्ववचनतन्निदर्शनरूपत्वादशेषकथनं प्रयोजनवदर्थवत्त्वविरुद्धमिति यावत् ।

१०८९ लोकः .... सिद्ध्यतीत्याह **लोकत इति** ।

१०९२ श्रुतिपुराणादेर्विष्णोर्दोषित्वादिकथने महातात्पर्य मुख्यस्य यो विरोधः प्रतिपादितोऽत एव विरोधाद्विष्णो-र्दोषित्वाद्यर्थो न भवतीति यावत् । यद्विष्णोर्निर्गुणत्वादावनुमानतत्कालात्ययापदिष्टत्वेनाप्रमाणमिति निगमयति **अत इति** ।

१०९४ ईशरूपाणां सर्वगुणसाम्याद्यभेदो नास्ति । तर्हि चित्वसाम्याज्जीवस्यापीशाभेद इत्याशङ्कानुक्त्याभास इत्यादि सूत्रव्याख्यानेन चेज्जीवस्यानाभासत्वमेवेत्यत्र श्रुतिप्रमाणमाह **यथेति** ।

१०९५ 'यथैषे'त्यस्य विवरणं 'च्छाया यथे'त्यादि जीवस्य परमात्मनः प्रतिनिधित्वेऽप्यभेद इति मतं तदधीनत्वोक्तेर्निराकृतं भवति ।

११०२ कृष्यादिवच्चेतनत्वेन न देवदत्तादीनामपीशांशत्वात्सर्वचेतनसमुदाय एवेश इत्युच्यते । देवदत्तादेः ईशाभासत्वं नास्ति । देहाद्यपगमे कृष्णादिसमत्वप्राप्तेः पृथगुपदेशादित्युक्तम् । पृथुक्तवचनं तु कृष्णादिलक्षणसमुदायांशाज्जीवलक्षणसमुदायांशस्य सांसारिकसामर्थ्यन्यूनतालक्षणपृथक्त्वमविषयमित्याक्षेपवचनाभिप्रायः ।

१११० अथैतमाक्षेपं परिहरति अत एवेत्यादि सूत्रव्याख्यानेन दर्शयति **तदधीनत्वमिति** ।

११११ अनुपाद्यधीनचेतनत्वाज्जीवस्य किमिति कृष्णादिवदीशो भेदो न स्यादित्यत आह **जीवेति** ।

११३७ जीवादीशपदार्थस्य सामर्थ्यासम्पूर्तिलक्षणभेदस्येत्यत आह **तस्मादिति** ।

११३९ भगवद्भक्त्युद्रेकाय जगत्स्थितिरप्येतदधीनेत्यादि पापकृतेत्यादिसूत्रव्याख्यानेन समर्थयति **सृष्टीति** ।

११४० उपास्तिद्वारेण भगवदधीनसाधनकः कार्येति 'तदेकमव्यक्तमनन्तरूपं, न चक्षुषा पश्यति कश्चनैनमि'ति । हरेरदृश्यत्वश्रवणादित्याशङ्कापरिहाराय **आनन्त्येने**त्यादिसूत्रं व्याख्याति **अव्यक्त इति** ।

११४० अव्यक्ता च भक्तानां च भक्तिः सामर्थ्येन दृश्यते । भक्तानां स्वशक्त्यैव दृश्यत इति दृश्यादृश्यवचनयोरर्थ इति यावत् ।

११४१ सर्वे गुणा ईश इति भक्तिर्न घटते । गुणगुणिभेदेनावस्थानात् । अभेदे गुणगुणिभावानुपपत्तेरित्याशङ्क्य उभयव्यपदेशादित्यादिसूत्रव्याख्यानेन परिहरति **तदभिन्ना इति** ।

११४२ युक्तमैक्यमकादाचित्कैरानन्दादिभिरीशस्य पुनः पुनः स्रष्टृत्वादिधर्मैः सर्जनादिकर्मभिश्च कादाचित्कैरनित्यत्वप्रसङ्गादित्यत आह **विशेषात्मतयेति** ।

११४३ न विशेषरूपानित्यत्वं शङ्क्यम् । नित्यशक्ताभेदादित्याह **न विशेषेति** ।

११४३ शक्तिरूपव्यक्तिरूपयोरभेदेऽपि व्यवहारभेदस्तु विशेषादित्यभिप्रैति । विशेषस्य विशेषान्तरापेक्षया नानवस्थानिर्वाहकत्वेन विशेषान्यत्वादित्याह **विशेष इति** ।

११४४ विशेषिणा भेदेऽप्ययमस्य विशेष इति प्रमाणावगते अनवस्थाभङ्ग इत्याह **तथापीति** ।

११४५ एकस्य परमात्मनोर्विशेषिविशेषभावः 'स इमान् लोकान् सृजते'ति श्रुत्या सिद्ध्यति । तच्छन्दा-दसृजतेत्यादि हि तस्यार्थान्तरत्वादि हि तस्यार्थान्तरत्वेऽपि सामान्याधिकरणेनाभेदप्रतीत्यन्यथानुपपत्तेरित्याह **ससर्ज इति** ।

११४६ निर्विशेषत्वपक्षे श्रुतिविरोधो दर्शितोऽपि नायुक्तिविरोधं प्रतिपादयति **भेद इति** ।

११४७ तेन वा .... स्रष्टृत्वाद्यभिन्नविशेषो नाभ्युपगम्यत एवेति तदनवस्थानापगच्छतीति यावत् । स्रष्टृत्वादिसकलविशेषस्य विशेषिणस्तेनाङ्गीकृतभेदस्य विशेषविशेषिभ्यां भेदेन च न मुक्तविशेषविशेषिभ्यामभेदे तन्न्यायेन विशेषविशेषिभेद एव न स्यादित्युक्तम् । अथैकस्य विशेषितो वा भेदोऽप्यस्ति स च भिन्नः तस्मा-दनवस्थात्र न भवति । निर्विशेषश्च तस्माद्भेदस्य विशेषविशेष्यभेदवद्विशेषविशेषिणोरभेदोऽपि न प्रसज्यत इत्येत-द्दूषयति **अभिन्न इति** ।

११४८ .... विशेषित्वमित्याह **अनेनेति** ।

११५२ इतोऽपि विशेषः सिद्ध्यतीत्यत आह **अभेदेति** ।

११५४ सविशेषाभेदमाश्रित्य धर्मधर्मिव्यवहारवत् व्यवहारभेदोऽपि स्यादित्यत आह **ऐक्येति** ।

११५५ 'आनन्दो ब्रह्मे'त्याद्यभेदप्रतीतिरेव सविशेषाभेदमाश्रित्य व्यवहारकारणमिति यावत् । न केवलं धर्मधर्मि-भावमङ्गीकुर्वता वादिनैव तदन्यथानुपपत्त्या विशेषोऽङ्गीकार्यः किन्तु अनङ्गीकुर्वताऽप्यभेदवादिना सच्चिदाद्यपर्याय-सिद्ध्योऽङ्गीकार्य इत्याह **सच्चिदिति** ।

११५७ मायाविशेषराहित्यविशेषिता तथा सत्त्वविशेषवन्मायाकल्पिता चे ......हित्यविशेषिता परमार्थभूता स्यात् । तस्याश्च मायाकल्पितत्वेन तदनवस्थेति यावत् । सत्यस्य निर्विशेषितत्वे सच्चिदादेः पर्यायत्वे प्रसङ्ग एव न किन्तु शब्दप्रवृत्तिनिमित्ताभावात् तदुक्तभावोऽपि प्रसज्यत इत्याह **यदीति** ।

११५८ अस्त्ववाच्यत्वं ब्रह्मणो निर्विशेषत्वात्सत्यादिपदैरनृतादि वृत्तिद्वारा लक्ष्यत्वस्यैवाङ्गीकारादिति चेदनृतादि-व्यावृत्तिविशिष्टत्वेनानृतादि व्यावृत्तपदवाच्यत्वं लक्षत्वेन भावविशिष्टत्वं च लक्ष्यपदवाच्यत्वं च स्यादिति आह **लक्ष्यते चेदिति** ।

११५८ लक्ष्यपदेनाप्यलक्ष्यव्यावृत्तिद्वारा लक्ष्यत्वाङ्गीकारे त्वलक्ष्यव्यावृत्तिविशिष्टत्वेनालक्ष्यव्यावृत्त्या पदवाच्यत्वं लक्ष्यत्वविशिष्टत्वेन लक्ष्यपदवाच्यत्वं च पूर्ववत्स्यादिति सगोत्रमनवस्थेत्याह **पुनः पुनरिति** ।

११६१ यद्यसार्वज्ञनिषेधेऽप्यसार्वज्ञस्य वृत्तिर्न ग्राह्या । सुखत्वासत्त्वनिषिधेऽपि तद्व्यावृत्त्यभावादसुखत्वासत्त्वा-दिकं ब्रह्मणः स्यादित्यर्थः ।

११६३ अखण्डखण्डनीवादिभ्यां खण्डाखण्डेन चैव तदित्यत्राखण्डवादी गुणगुणिभेदाभेदवादी। अतः ब्रह्मगुणानां तद्भेदस्य प्रमाणविरुद्धत्वादित्यर्थः।

११६५ ब्रह्मपदाभिहितस्य पदान्तरपर्यालोचनया गुणान्वयो भवेत्। न तु ब्रह्मपदेनैव गुणान्वितमभिधीयते। ब्रह्मपदाभिधेयज्ञानमेव मुक्तिसाधनमुक्तः। ब्रह्मविदाप्नोति। न तु ब्रह्मगुणज्ञानं मुक्त्यनुपयोगित्वादेव तस्मान्न ब्रह्मणो गुणिश्रुतितात्पर्यं सिद्ध्यतीत्याशङ्क्य प्रतिषेधति **तच्चेति**।

११६६ तत्प्रमाणविरुद्धत्वादेवाभिहितान्वयो नेत्यर्थः। तदेव प्रतिपादयति एकधर्मिपदमपि सामान्यतस्तत्तद्धर्मा-वच्छिन्नधर्माणां धर्म्यभेदादित्याह **यत इति**।

११६८ शक्तिग्रहणकाले विशेष्यपदेन विशेष्यपदार्थे सामान्यतः स्वविशेषान्विते विशेष्यपदेन विशेषधर्मान्विना-नुभूयते। यस्मात्पदानामन्विताभिधानं न वर्तत इत्यभिप्रैति **स्वार्थ इति**।

११६९ पक्षदोषमाह **यदीति**।

११७० तन्मते शब्दश्च तद्वक्ता चान्वयं न ज्ञापयेदित्याह **व्यापार इति**।

११७१ शब्दस्यान्वयाबोधनं च स्वार्थप्रकाशनव्यापारो न भवति। तन्मते तेनान्वयस्य शब्दार्थत्वाग्रहणादिति प्रतिपादयति **यदेति**।

११७२ पदमनन्वयं न बोधयति चेद्बाध्या बाधयेदित्यत आह **निराकाङ्क्षेति**।

११७३ कर्मादिपदानामाकाङ्क्षापूर्वकत्वात् कर्तृपदस्याकाङ्क्षाजनकत्वाच्च पदान्यन्वितवाचीनीत्याह **तत्तदिति**।

११७३ अभिधानमन्तरेणान्वयपरिज्ञाने लक्षणाख्यकारणं नृशृङ्गवन्नास्तीति आह **अपूर्तिरिति**।

११७४ कर्तृकर्मक्रियापूरकपदैः अनभिहितोऽन्वयो नेत्याह **कर्मकर्तृ इति**।

११७५ पदानां स्वार्थमभिधाय पुनर्लक्षणया स्वार्थान्वयबोधनव्यापारेति प्रसङ्गमाह **व्यापारश्चेदिति**।

११७९ विपक्षेऽनुभवविरोधं दर्शयितुमनुभवं प्रपञ्चयित्वा सिद्धान्तं निगमयति **कर्त्रिति**।

११८१ विशेषादेर्न सामान्यतः सर्वविशेषणाभिधानमनुभूयते यतः अतो विशेष्यपदेन सामान्यतोऽनन्तगुणा अभिहितसर्ववेदैः विशेषेणोच्यत इत्याह **अत इति**।

११८२ भगवदानन्दादेः लोकानन्दादिवदल्पत्वाशङ्कापरिहाराय परमत इत्यादि सूत्राभिप्रायमाह **ते चेति** ।

११८२ गुणानां वैलक्षण्यं विस्तरति **सर्व इति** ।

११८३ लोकगुणेषु प्रसिद्धपदैरलौकिकब्रह्मगुणाभिधानं कथमित्याशङ्कापरिहाराय बुध्यर्थ इत्यादि सूत्राभिप्रायमाह **विद्वदिति** ।

११८४ आनन्दादिपदवाच्यत्वान्यथानुपपत्त्या भगवदानन्दादेरन्यानन्दस्य लक्षणमङ्गीकर्तव्यम् । तत्किमित्यत आह **अन्येति** ।

११८५ तां श्रुतिमाह **पूर्णेति** ।

११८६ फलस्य कर्माधीनत्वेनेशनिरपेक्षत्वाद्भगवतो निरवधिकसामर्थ्याभाव इत्याशङ्कापरिहाराय फलमत इत्यादि सूत्राभिप्रायमाह **स एवेति** ।

११८९ राजा हि सेवया प्रीतिः फलदो न तु कर्म । कृष्यादिकमपीशत्वं फलनिस्वतः फलने कदाचिदपि वैफल्यानुपपत्तिरिति यावत् । कर्मणः फलकारणत्वे ईशाधीनत्वादीशस्य कर्मत्वेनेत्याह पूर्ववदित्यादिसूत्रव्याख्यानत इति । भगवच्छक्तेः निस्सीमत्वं प्रतिपादयति **कर्माणीति** ।

११९१ कर्माण्यभिमान्यपेक्षया चेतनान्यचेतनशरीरकर्मफलभोक्तॄणि चेत्युक्तम् । तत्रार्थवादमाह **एकेति** ।

११९४ पदार्थमुपसंहरति **तस्मादिति** ।

इति तृतीयाध्यायस्य द्वितीयः पादः

* * *